महाकविकालिदासप्रणीतं

कुमारसम्भवमहाकाव्यम्

प्रकाशिका-विवरणाख्यव्याख्याद्वयोपेतम्

कुलपतेः प्रो. राजेन्द्रमिश्रस्य प्रस्तावनया विभूषितम्

सम्पादकः

प्रो. रेवाप्रसादद्विवेदी

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
वाराणसी

सरस्वतीभवन-ग्रन्थमाला

[१४८]

महाकविकालिदासप्रणीतं

कुमारसम्भवमहाकाव्यम्

प्रकाशिका-विवरणाख्यव्याख्याद्वयोपेतम्

कुलपतेः प्रो. राजेन्द्रमिश्रस्य प्रस्तावनया विभूषितम्

सम्पादकः

प्रो. रेवाप्रसादद्विवेदी

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय
श्रुतं मे गोपाय

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

वाराणसी

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
श्रुतम् मे गोपाय

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय
श्रुतम् मे गोपाय

ORIGINAL Bensia ORIGINAL

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
श्रुतम् मे गोपाय

SARASVATĪBHAVANA-GRANTHAMĀLĀ

[Vol. 148]

KUMĀRASAMBHAVAMAHĀKĀVYAM

OF

MAHĀKAVI KALIDĀSA

With the Commentaries

'PRAKĀŚIKĀ'

By

ŚRĪ ARUṆAGIRINĀTHA

'VIVARAṆA'

By

PAṆDITAŚRĪ NĀRĀYAṆA

FOREWORD BY

PROF. RAJENDRA MISHRA

VICE-CHANCELLOR

EDITED BY

PROF. REWĀPRASĀDA DWIVEDĪ

Formerly Professor and Head of the Dept. of Sāhitya
Emeritus Professor
Banaras Hindu University, Varanasi

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

VARANASI
2004

Research Publication Supervisor—
Director, Research Institute
Sampurnanand Sanskrit University
Varanasi.

ISBN : 81-7270-124-I

◆

Published by—
Dr. Harish Chandra Mani Tripathi
Director, Publication Institute
Sampurnanand Sanskrit University
Varanasi-221 002.

◆

Available at—
Sales Department,
Sampurnanand Sanskrit University
Varanasi-221 002.

◆

First Edition, 500 Copies

Price : Rs. 600.00

◆

Printed by—
Shreejee Computer Printers
Nati Imli, Varanasi-221 002

सरस्वतीभवन-ग्रन्थमाला

[१४८]

महाकविकालिदासप्रणीतं

कुमारसम्भवमहाकाव्यम्

श्रीमदरुणगिरिनाथकृतया
'प्रकाशिका'-व्याख्यया
पण्डितश्रीनारायणकृतया
'विवरण'-व्याख्यया

कुलपतेः प्रो. राजेन्द्रमिश्रस्य प्रस्तावनया च विभूषितम्

सम्पादकः
प्रो. रेवाप्रसादद्विवेदी
साहित्यविभागाचार्याध्यक्षचरः
काशीहिन्दूविश्वविद्यालये, वाराणसी

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
श्रुतं मे गोपाय

वाराणस्याम्
२०६० तमे वैक्रमाब्दे १९२५ तमे शकाब्दे २००४ तमे खैस्ताब्दे

अनुसन्धान-प्रकाशन-पर्यवेक्षकः — ISBN : 81-7270-124-I
निदेशकः, अनुसन्धान-संस्थानस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी।

❏

प्रकाशकः—
डॉ. हरिश्चन्द्रमणित्रिपाठी
निदेशकः, प्रकाशन-संस्थानस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी-२२१००२

❏

प्राप्ति-स्थानम्—
विक्रय-विभागः,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी-२२१००२

❏

मुद्रकः—
प्रथमं संस्करणम् – ५०० प्रतिरूपाणि
मूल्यम् – ६००.०० रूप्यकाणि

❏

मुद्रकः—
श्रीजी कम्प्यूटर प्रिंटर्स
नाटी इमली, वाराणसी।

नान्दीवाक्

तत्तुल्यकवेरभावादद्यापि कविगणनाप्रसङ्गे यो विद्योत्तमाजानिर्विक्रमार्कसभारत्नभूतः कालिदासः कनिष्ठिकाधिष्ठित एव परिलक्ष्यते, तमेवाधिकृत्य किञ्चित्प्रस्तोतुमुपक्रम्यते। सहस्रद्वयवर्षाणि व्यतीतानि। सहस्रमिताः कवयस्सञ्जाताश्चतुर्दिक्षु भारतवर्षे। सैव रघुवंशगाथा शिवशिवाकथा वाऽन्यैरप्युट्टङ्किता। मेघदूतस्य परम्परायां प्रायेण पञ्चाशदुत्तरशतत्रयमितानि दूतकाव्यानि प्रणीतानि शैवशाक्तवैष्णवार्हतकविपुङ्गवैः। नाटकानामपि संख्या महीयसी परिलक्ष्यते। हन्त, तथापि न क्वचित्कालिदासस्य भूयोऽवतारो नवावतारो वा संलक्ष्यते। अन्ये कवयस्तु भारविमाघादयोंऽशानुकृताः पूर्णानुकृता वाऽनेके दृश्यन्ते; परन्तु व्यतीतेऽपि प्रचुरेऽनेहसि कालिदास एक एव तिष्ठति।

केचन वैशारद्यभिमानिनः कालिदासद्वयं स्वीकृत्यावभृथस्नानमाचरन्ति स्वोपज्ञवादिजयाध्वरान्ते। तन्मतेन काव्यकृत्कालिदास एकः। नाट्यकारश्चान्यः। कश्चिद् देवानुग्रह एवं निर्दिशति यद्वा तेषां गहनगहनं बुधान्तरासाध्यं दिव्यमध्ययनमेव तानेवं वक्तुं नियोजयतीति कृतेऽपि प्रयत्ने नाहं वेद्मि। किञ्च, सौम्याः केचनात्मानं विवादाद् वारयन्तो राजशेखरप्रामाण्येन कालिदासत्रयमङ्गीकुर्वन्ति। ततश्च, कालिदासबहुलीकरणरसिकाः साम्प्रतिका अनेके विद्वांसस्तं काश्मीरे (बदरीनाथकल्ला), गढवालमण्डले (सदानन्दजखमोला), उज्जयिन्यां (सूर्यनारायणव्यासः), मिथिलायां (आद्याचरणझा), कलिङ्गे (प्रफुल्लकुमारमिश्रः) च प्रसह्य जनयन्तस्तं त्र्युत्तरं मन्वते। कालिदासविषयिणी चर्चाऽद्यापि शान्ता न जाता।

अनया प्रसरत्परिचर्चया महाकवेस्तस्य महामहिमशालित्वं साधु सूच्यते। अपरिमिताभिप्राया तस्य भारती। लोकोत्तरा तस्य वाक्सिद्धिः। वागधिष्ठात्री स्वयमेव कालिदासीभूय तदुपज्ञं वाङ्मयमरीरचदिति मन्ये। मन्ये चावितथवाचं कोलाचलमल्लिनाथसूरिमेवंवादिनम्—

कालिदासगिरां सारं कालिदासः सरस्वती।
चतुर्मुखोऽथवा ब्रह्मा विदुर्नान्ये तु मादृशाः॥

विविधशास्त्रपारङ्गतानामाचार्यमल्लिनाथानामप्येतादृशं वानीरकल्पं विनत्यतिशयं सम्प्रेक्ष्य किमपरं वक्तुमवशिनष्टि कालिदासविषये? वस्तुतः कविकुलगुरुः

कालिदासो न विवादविषयः। संवादविषयोऽसौ। सारस्वतसंवादः, सामाजिकसंवादः, राष्ट्रियसंवादः, वैश्विकसंवादः, किञ्च यद्विधोऽपि संवादो विपश्चिद्भिः कल्पितुं शक्यते तस्य पृष्ठभूमिः साधकप्रमाणं वा कालिदाससाहित्य एव समुपलभ्यते, नान्यत्र।

कालिदाससंस्थानस्य संस्थापको वाराणसेयो विद्वन्मनीषिधुर्यस्सनातनोपाह्वः काश्यप **आचार्यरेवाप्रसादद्विवेदी** तयैव समञ्जसदृष्ट्या कालिदासं समीक्षितुं प्रयत्नपरो दृश्यते। आचार्यसीतारामचतुर्वेद्यनन्तरमभिनवकालिदासग्रन्थावलीं स्वोपज्ञमूलपाठसंवलितां सम्पाद्य निखिलेऽपि राष्ट्रे सम्प्राप्तसमज्ञो विद्वत्कुलमणिरयं सम्प्रति रघुवंशमहाकाव्य**मरुणागिरिनाथ**टीकासम्भूषितं सम्पादितवान् यत्खलु रघुकारकाव्यमर्मावगमलुब्धानां सहृदयानामुपकाराय विश्वविश्रुतस्य वाराणसीस्थसम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य प्रकाशनसंस्थानेन प्रकाश्यते।

संस्कृतजगति यादृशमवदानं सन्दृश्यते श्रीमद्गणपतिशास्त्रि-रामकृष्णकवि-मोरेश्वररामकृष्णकाले-गजेन्द्रगडकर-सुक्थाङ्कर-करमरकर-पुसालकर-देवधर-प्रभृतीनां ग्रन्थसंस्कर्तॄणां सर्वथा तत्सजातीयमेव, किञ्च तदतिशाय्येव संलक्ष्यतेऽवदानं काश्यपमहोदयानाम्। तादृशं तत्सम्पादनवैशिष्ट्यमत्रापि द्रष्टुं शक्यते। महताऽध्यवसायेन साङ्गोपाङ्गाध्ययनेन च सम्पुष्टां तत्समीक्षापद्धतिं दृष्ट्वा महदाश्चर्यं जायते। यथाऽसौ नामान्तराणि कविकुलगुरोः कालिदासस्य कालदासमातृगुप्तभर्तृमेण्ठचन्द्रमौलिप्रवरसेनेश्वरदासकुमारदासदीपशिखादीनि समुदाहरति, यथा वा नवसाहसाङ्ककारं भोजदेवयुगीनं पद्मगुप्तपरिमलकालिदासं, नलोदययमककर्तारं कालिदासं, चम्पूभारतकारं नवकालिदासं, लम्बोदरप्रहसनकारं कालिदासं, सङ्क्षेपशङ्करविजयकर्तारं माधवाभिनवकालिदासं, समस्यापूर्तिकविमकबरसभारत्नभूतं कालिदासं परिचाययति, यथा वाऽसौ ज्योतिर्विदाभरण-शृङ्गारतिलक-नलोदययमक-श्रुतबोध-श्यामलादण्डक-नवरत्नमालाप्रभृतिग्रन्थकर्तृत्वसमलङ्कृतं कालिदासं विवृणोति, तत्सर्वं सारस्वततपस्सम्भारमहिमदृष्ट्या परिशील्य श्रीमद्द्विवेदिचरणान् प्रति समुदेति काचिद् विलक्षणैव स्वयंस्फूर्ता विनयगर्भा श्रद्धा। वस्तुतः संक्षिप्तेऽपि स्वोपज्ञे सम्पादकीयवाचिके आचार्यरेवाप्रसादद्विवेदिमहोदयाः पाश्चात्त्यपौरस्त्योभयविद्वन्निकायनिर्व्यूढं कालिदासविषयकं समग्रमप्यनुसन्धानं सम्यक् समीक्ष्य स्वाभिमतमसंस्तुतं स्वतोऽन्विष्टप्रायमिदम्प्रथमतया प्रस्तुवन्ति।

कविकुलगुरोः कालिदासस्याभ्युदयकालं निश्चिन्वानो द्विवेदिमहोदयो निर्विशङ्कं लिखति—'एवं च निर्णेतुं शक्यते यत्कालिदासस्तदाऽजायत यदा शास्ति स्म बैम्बिको राजा भारतीयां वसुधां विदिशां राजधानीकृत्य। अत्यन्तमल्पीयानेष

कालावधिः। अत एवास्माकं निश्चयः २०७० वर्षाणि जातानि जातस्य कालिदासस्येति'।

प्रस्तावोऽयं मह्यमप्यतितरां रोचते। ममानुमोदने केवलमेतावन्मात्रं समधिकं यदग्निमित्रविक्रमादित्ययोरपि, वयसः केनचिदंशेन समतया, कालिदासस्य तयोरुभयोरपि युगपदेव सहचरत्वं सूच्यते। तत्सर्वमपि सविश्रम्भमवधार्य मया स्वोपज्ञनाटिकायां **विद्योत्तमायां** किञ्चिदभिनवमुपकल्पितम्। कुमारसम्भवादिषड्रचनाकर्तुः कालिदासस्य सम्भावना गुप्तयुगे कथमपि साधयितुं नोचिता प्रतिभाति। तदेवाचार्यद्विवेदिनामपि मतम्।

विक्रमादित्यस्यैतिह्यविषये न कापि संशीतिः। एवमेव विक्रमादित्याग्निमित्रकालिदासानां समकालस्थितावपि न कश्चन सन्देहः। स्कन्दपुराणे (१.२.३९ तः ४२ तमं यावत्) स्पष्टमुक्तम्—

ततस्त्रिषु सहस्त्रेषु विंशत्या चाधिकेषु च।
भविष्यं विक्रमादित्यराज्यं सोऽथ प्रलप्स्यते॥

प्रमाणेनानेन ३०२० मिते कलिसंवत्सरे किञ्च विक्रमाब्दारम्भाद् द्व्यशीतिवर्षपूर्वम्, अर्थात् ख्रिस्तपूर्वं द्व्यशीतितमे वर्षे शकारिविक्रमार्कस्यास्तित्वमधिवसुधमासीत्। **जैनवाङ्मये**ऽपि महावीरनिर्वाणानन्तरं ४७० हायनेषु व्यतीतेषु सत्सु विक्रमराज्यारम्भोऽङ्गीकृतः। तद्यथा,

विक्कमरज्जारम्भ परउ सिरि वीर निव्वुइ भणिया।
सुन्नमुनिवेदजुतो विक्कमकालउ जिनकाली॥

अर्थात् शून्य (=०) मुनि (=७) वेद (=४) मिते वीरनिर्वाणसंवत्सरे विक्रमराज्यारम्भो जातः। अनेनैतदुक्तं भवति यत् ख्रिस्तपूर्वं सप्तसप्ततिमिते वर्षे विक्रमोऽस्यां पृथिव्यां प्रशशास। एवमेव ३७७ मितख्रिस्ताब्दे प्रणीतं **प्रभावकचरितं** ४६६ मिते वीरनिर्वाणवर्षे (अर्थात् ८१ मिते ख्रिस्तपूर्ववर्षे) विक्रमसाम्राज्यं प्रमाणयति। एवं हि मयोद्धृतेन प्रमाणत्रयेण विक्रमराज्यस्थितिः क्रमेण सप्तसप्तति-(७७) एकाशीति-(८१) द्व्यशीति-(८२) मिते ख्रिस्तपूर्ववर्षे सिद्ध्यति। आच'र्यप्रवरा रेवाप्रसादद्विवेदिनोऽप्येवम्मन्वाना एव संलक्ष्यन्ते स्वोपज्ञनिर्णयेन—

'एतैरन्यैश्चैवंविधैः साधकबाधकप्रमाणैः स्थितमिदं यन्नास्पृशत् कालिदासः २०७० तमादर्वाचीनां समयसीमाम्'।

एवमेव रविकीर्तिबाणभट्टाभ्यां स्मृतस्य कालिदासस्य चरमा स्थितिसीमा सप्तमख्रिस्ताब्दपरिमिता प्रतीयते। तत्रापि न काचिद् विप्रतिपत्तिः।

तदलमेतावन्मात्रेणैव कालिदासप्रसङ्गेन। तदीयं प्रथमं महाकाव्यं कुमारसम्भवाभिधमिदानीं विश्वविद्यालयेनानेन प्रकाश्यते। कोलाचलमल्लिनाथसूरिप्रणीतसञ्जीवनीटीकासंवलितं कुमारसम्भवन्तु प्रायेण सहृदयाः परिचिन्वन्त्येव पाठ्यक्रमांशभूतत्वात्; परन्तु शिवदासापरनाम्नाऽ**रुणगिरिनाथेन** प्रणीतया **प्रकाशिका**ख्यया टीकया सम्भूषितमिदं महाकाव्यं विरला एव संस्कृतज्ञा जानन्ति, विरलप्रचारत्वात्तस्या उत्तरभारते। ततश्चोपटीकारूपेण **विवरणं** प्रणीय **नारायण**नामा कश्चित्कोविदो यथाऽरुणगिरिनाथाभिप्रायं समधिकतरं विशकलितवान् तद्योगदानं सारस्वतं मनसि निधाय सम्पादकप्रवर आचार्यरेवाप्रसादो द्विवेदस्सनातन उभय्याऽपि टीकया संवलितं महाकाव्यमिदं सम्पाद्य प्रकाशयितुं प्रवृत्तस्सुरभारतीसमुपासकानां सारस्वतविनोदाय।

कुमारसम्भवस्य सर्वाः पूर्वटीकाः समालोच्याऽरुणगिरिनाथः कामपि विलक्षणामिमां सोपयोगां टीकां कृतवान्, टीकाविषयि कैमर्थक्यं कथं-कथिकत्वञ्च शमयाञ्चकार। तद्यथाऽसौ रघुवंशप्रकाशिकायां स्वयमभिदधाति—

आलोच्य पूर्वटीकाश्च लक्षणानि च धीमताम्।
विनिर्मिता मया सेयं सोपयोगा भविष्यति॥
न चेह पूर्वटीकाभिः कैमर्थक्यं प्रतीयताम्।
यतो विद्वन्मता सर्वो न सर्वं पश्यतीति वाक्॥

आत्मवृत्तप्रकाशनविषये धृतमौनस्यास्य टीकाकारस्य स्थितिमाचार्यद्विवेदी मम्मटरुय्यकयोर्मध्यावधावङ्गीकरोति। तन्मतेनासौ त्रयोदशख्रिस्तसंवत्सरारम्भे समजायत। दाक्षिणात्यत्वं तु तस्य विदितचरमेव।

ततश्च, **विवरणकारो नारायणः** काली-नीलकण्ठयोः सूनुः, पुरुषोत्तमस्य नप्ता, श्रीकृष्णस्य च भागिनेय आसीत्। मातामहोऽस्य श्वेतग्रामस्य शङ्करारामे लब्धजन्मा कविग्रामणीरभूत्। पितृपाण्डित्यप्रतियातनाकल्प एवासीत्तत्तनयः श्रीकृष्णोऽपि यस्मान्नारायणः सर्वमपि विद्याजातं जग्राह। ब्रह्मखलाभिधं कमपि तीर्थविशेषं सङ्केतयन्नयमपि दाक्षिणात्य एव प्रतिभातीति सविस्तरं ससमीक्षं निरूपितत्वादाचार्यद्विवेदिमहोदयैः प्रसङ्गोऽयमत्रैव शङ्कुसहोदरीकृत्य परिहीयते।

संस्कृतवाङ्मये टीकोपटीकाभाष्योपभाष्यपञ्जिकाफक्किकादीनां यादृशं महत्त्वं तन्नाविदितं विपश्चिताम्। मूले यन्नोक्तं तदुक्तं टीकाकारेण, मूले यदनुन्मीलितं तदुन्मीलितं टीकाकारेण, मूले यद् गोपितं तत्प्रकाशितं टीकाकारेण, मूले यन्मुक्तं तद्योजितं टीकाकारेण, मूले यदविद्यमानं तदुत्प्रेक्षितं टीकाकारेणेति विलक्षणैव कापि सारस्वती परम्परा देववाण्यां परिलक्ष्यते। अनया परम्परया परिपुष्टमेव

षड्दर्शनं काव्यकदम्बकं शास्त्रवाङ्मयं वा साङ्गोपाङ्गतायाः परिपूर्णतायाश्च शिखरमधिरोहति। नेयं परम्परा क्वचिदन्यत्र परिलक्ष्यते निखिलेऽपि जगतीतले। वस्तुतः संस्कृतवाङ्मये दर्शनविशेषस्य शास्त्रविशेषस्य कविविशेषस्य वा नैकला स्थितिः। तेषामपि सन्दृश्यते कश्चित्कुटुम्बो यदङ्गभूता भवन्ति तदभिप्रायप्रकाशकाः टीकाकाराः, व्याख्याकाराः, किञ्च तदनुरागरञ्जितहृदयाः पाठकाश्च। नैकलः कालिदासः। कालिदासस्य कश्चित्सारस्वतकुटुम्बोऽपि वर्तते। स कुटुम्ब एव कालिदासकाव्यपरम्परायाः सार्थकतां साधयति। यस्य कवेः, चिन्तनसरणेः, शास्त्रस्य वा कुटुम्बो न समजनि स एव क्षीणशक्तिर्जातोऽकाले वा कवलीभूतः। सौभाग्यवन्तो जाताः केवलं कुटुम्बवन्तस्साहित्यकाराः कालिदासबाणभट्टानन्दवर्धनमम्मटादिकाः। मन्ये, प्रख्योपाख्याप्रसरसुभगं सरस्वत्यास्तत्त्वं प्रशंसन्नधिलोचनं महामाहेश्वरोऽभिनवगुप्तपादाचार्यस्तमेव **सारस्वतकुटुम्बं** निर्दिशति। अयमेव कुटुम्बस्सम्प्रदायोऽप्युच्यते।

तादृग्गुणविशिष्ट एव कश्चित् कविकुलगुरुकालिदासस्य कुटुम्बसदस्यः आचार्यः श्रीरेवाप्रसादद्विवेदोऽपि। किञ्च—

विद्यावदातहृदयं सदयं सुशीलं नित्यं दिशन्तमिह पथ्यपथं बुधेन्द्रम्।
वन्दे गुणौघतुहिनाचलमात्मपूतं प्रज्ञाध्वरे सततदीक्षममेययोग्यम्॥

द्वैपायनोपमधियं विदुषां वरेण्यं सारस्वतश्रमजकीर्तिलसच्छरीरम्।
माङ्गल्यधुर्यसरणिं नवमम्मटाख्यं वन्दे सनातनकविं श्रितकालिदासम्॥

वाणी यदीयवशगा शतपत्रमृद्वी यद्धीश्च गोमुखपतच्छतवारिधारा।
यद्वैखरी प्रतिगवादिभयङ्करी तं स्वातन्त्र्यसम्भवकविं सततं नतोऽहम्॥

प्राज्ञाश्रवो दुरभिमानकथाऽसहिष्णुर्वज्रं बहिर्हृदि पुनर्नवनीतकम्रः।
गङ्गान्तरालतुहिनाचलचारुदेहं वन्दे सदाशिवमयं कविताविलासम्॥

एभिरेव पद्यबन्धैः सम्पादकवैदुष्यगुणगरिमगाथामुपस्तुवन्नहं कविकुलगुरोः कालिदासस्य वाङ्मयवपुष्कल्पमिदं महाकाव्यं साऽरुणगिरिनाथनारायणटीकं सहृदयानां करकमलेषु समर्पयामि। अस्मिन्महनीये प्रकाशनकर्मणि व्यापृतस्य **डॉ. हरिश्चन्द्रमणित्रिपाठिनो**ऽपि वर्तत एव कश्चित्कुटुम्बः कालिदासस्येव। स च तत्कुटुम्बिनश्च सर्वे मया भूयोभूयोऽभिनन्द्यन्ते।

वाराणसी
भैरवाष्टमी,
वि.सं. २०६०

विद्वद्वशंवदः
मिश्रोऽभिराजराजेन्द्रः
कुलपतिः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

सम्पादकीयम्

अथेदं प्रस्तूयते भगवदनुग्रहपवित्रवागिति महामाहेश्वरैरभिनवगुप्तपादैः सम्भावितस्य केवलेन कवीश्वर इत्यपि परिचायितस्य माकिं २०७० वर्षेभ्यः पूर्वं भ्रियमाणस्य कालदासाऽपरपर्यायस्य कालिदासस्य रघुवंशाग्रजं सर्गबन्धं कुमारसम्भवमिति। अयमत्र विशेषो यदत्र **शिवदासा**परनाम्नाऽरुणाचलनाथेन या '**प्रकाशिका**'नाम्नी नितान्तं हृद्या टीका व्यरचि, व्यरचि च तस्या विशकलनरूपं **विवरणं** नारायणेन तदुभयमपि दीयते। मूलं च ताभ्यां स्वीकृतचरमेव गृह्यते। उभे अपीमे त्रिवेन्द्रमसंस्कृतग्रन्थमालायां तस्या विश्रुतनामधेयैरध्यक्षैः श्रीमद्भिर्गणपतिशास्त्रिभिः १९१३-१४ खीष्टाब्दाभ्यां प्रकाशितचरे। आस्तामिमे बहुभ्यो वर्षेभ्यः सुदुर्लभे इति भूयोऽपि प्रकाश्येते काश्या गौरवभूतेन सम्पूर्णानन्द-संस्कृतविश्वविद्यालयेनास्माकमनुरोधं पालयता।

विज्ञेयमिदं यट्टीकयोरनयोः कुमारसम्भवस्याद्या अष्टावेव सर्गाः कालिदासकृतत्वेन स्वीकृताः। यथा चेदं तत् प्रथमस्य पद्यस्यान्तिमस्य च 'समदिवसे'ति पद्यस्य टीकयोः प्रत्यपाद्येव विद्वद्भ्यामाभ्यामिति नोद्धरणपौनरुक्त्यमाद्रियामहे। ये चाष्टमसर्गतः परमपि नव सर्गाः केषुचित् पाण्डुलेखेषु दृश्यन्ते, दृश्यन्ते च निर्णयसागरादिभ्यो मुद्रितप्रकाशितास्ते हि न कालिदासप्रतिभाप्रसूताः। अत एव नोद्धृताः काव्यशास्त्रकृतां सुमहत्या पारम्पर्या। भाषाऽपि तत्रासंस्कृतप्रायैव। वस्त्वपि १-८ सर्गीयेण वस्तुना न केवलं न समन्वेति यावदशिष्टतामपि न परिहरति। त इमे सर्वेऽपि हेतवोऽस्माभिः कालिदासग्रन्थावल्या द्वितयेऽपि संस्करणे प्रदर्शिताः, प्रदर्शिताश्च सद्यस्तरां प्रकाशितस्याऽस्माकं कुमारविजयमहाकाव्यस्य पीठिकायाम्। कालिदाससंस्थानस्याऽस्य सचिवेन डॉ. सदाशिवेन द्विवेदिना च स्वकीये पीएच्.डी.शोधप्रबन्धे, सम्पूर्णानन्द-संस्कृतविश्वविद्यालयेनैव प्रकाश्यमाने। अथ प्रश्नो यद् यदि न कालिदासेन तर्हि केन वाऽपरेणेमे विरच्य योजिता इति तत्रोत्तरं पश्यामः कुमारसम्भवस्यैव—

अहो अहो देवगणाः सुरेन्द्रमुख्याः शृणुध्वं वचनं ममैते।
विचेष्टते शङ्करदेव एष कार्याय सज्जो भवतां सुताद्यैः॥१२.५४॥

इत्यस्मिन् पद्यार्थे। प्रसिद्ध एव हि उत्कलदेशीयः शङ्करदेवः। आसीदसौ विरक्तो भक्तकविरिति, तस्यैवासावनामग्रहो योग इति। सन्दिग्धमिदमिति प्रतिप्रश्ने पुनर्ब्रूमहे

कालिदास एव कुमारसम्भवस्य कवयितेत्यत्राऽपि सन्देहमेव पश्यामः कृतपदम्। ऋते सर्गान्तपुष्पिका नास्त्येतेषु कुत्रापि कालिदासस्योल्लेखः कवित्वेनेति। येन च कर्त्रा स्वकीयं नामैवाऽगोपि तस्याऽस्य कूर्चे तृणमपीदं बहु। अथ कथन्नाम दद्यादसौ स्वकीयं नाम यस्य प्रतिपद्यमेव महती स्खलना पदसङ्घटनायामपि। प्रमाणार्थं नवभ्य एभ्यः सर्गेभ्यः किमप्येकमाददतु पद्यं विचारयत च तद्रचनाकौशलम्। ननु सप्तदशस्य सर्गस्य पद्यमिदम्—

जम्भद्विषत्प्रभृतिदिक्पतिचापमुक्ता
बाणाः शिताः/शितान् दनुज/असुर-नायकबाणसङ्घान्।
अह्नाय तार्क्ष्यनिवहा इव नागपूगान्
सद्योविचिच्छिदुरलं कणशो रणान्ते॥ (१७.७३)

अत्र या पदावलिः सा छन्दोमात्रपूर्तिप्रयोजनैव। न भवन्त्यत्र सङ्घपूगनिवहशब्दानां बहुवचनान्ताः प्रयोगाः समर्थनीयाः। तार्क्ष्येण सह शराणामौपम्यमप्यत्रासदृशमेव। तार्क्ष्यस्य विततच्छदत्वायाऽपि विद्यते प्रसिद्धिः, केवलं तीव्रवेगत्वमेव नास्ति तत्र कारणम्। 'मज़ा किरकिरा हो गया' इति या हिन्दीभाषाया लोकोक्तिरियमस्मिन्नेवार्थे सर्गेष्वेषु त्रिः प्रयुज्यमाना दृश्यते ९.१४ इत्यादिषु। अत्र खलु पद्ये 'मन्मथरङ्गभङ्ग'-पदमस्मिन्नेव हि तात्पर्ये प्रयुज्यमानं दृश्यते। न च संस्कृतभाषायामस्मिन्नर्थे शब्द एष कुत्राप्यन्यत्र प्राचीने संस्कृतसाहित्ये प्रायोज्यत। कुमारः कार्तिकेय उत्पन्नः कृत्तिकासु, किन्तु भागेऽस्मिन् स एष गिरीशगौर्योः पुत्रत्वेन कीर्त्तितः—

एवं त्वमेव तनयोऽसि गिरीशगौर्योः
किं यासि कालविषयं विषमैः शरैर्मे।
सङ्ग्रामतोऽपसर जीव पितुर्जनन्या-
स्तूर्णं प्रविश्य वरमङ्कतलं विधेहि॥ (१७.१४)

'अङ्कतलं वरं विधेही'ति वचनमत्र विशेषणविहीनत्वावच्छिन्नमेव। शोभयेत्यादिवचनान्तरस्यैष विषयः। पितुर्जनन्या इति विपरीतमर्थं ददाति पितामहीरूपम्। नास्ति च प्रसिद्धा माता भगवतः शिवस्य। अस्ति चात्र विवक्षितः 'पितुर्जनन्याश्चे'ति समुच्चयः। तथा चोपस्थितोऽत्रैकशेषः 'पित्रोः' इति 'जगतः पितरौ वन्दे(र.१.१)'इत्यादिवत्। सोऽयं न्यूनपदत्वरूपो दोषः। स्त्रीपुंसयोः प्रथमसमागमापवरकस्य कृते निरूढमेव 'कौतुकागार'पदम्। सप्तमसर्गान्ते कालिदासस्तदेव प्रयुङ्क्ते 'क्षितिविरचितशय्यं कौतुकागारमागात्'(७.९४) इति। नवमस्य सर्गस्य प्रथम एव पद्ये तदिदं पदमसौ न स्मरति। एतस्य कृते प्रयुज्यतेऽत्र सम्भोगवेश्मेत्यशिष्टप्रायं पदम्। तथा हि—

तथाविधेऽनङ्गरसप्रसङ्गे मुखारविन्दे मधुपः प्रियायाः।
सम्भोगवेश्म प्रविशन्तमन्तर्ददर्श पारावतमेकमीशः॥९.१॥

वस्तुतस्तु पारावत एष कामिनोर्हृद्गतः स्मरानलः। पर्यायशतैरप्यप्रशान्त एष रतानामनयोरिति 'समदिवसनिशीथं सङ्गिनः' इत्यष्टमसर्गान्तपद्येनार्थस्यास्य कविनैवोपनिबद्धत्वात्। कथमत्र पारावतस्यैवोपस्थापनमिति चेत् सुरतपर्यायशताय पारावतस्यैव प्रसिद्धेः। नासौ वस्तुतः पारावतः, पारापतः खल्वेषः, परापतति कपोतीष्विति कृत्वा। सोऽयमवितृप्तिपर्यायस्य कामस्यैव प्रतीकः। अत एवोक्तमस्माभिः कुमारविजये—

स्मरवह्निकषायितौ शिवौ पृथिवीभावमवापतुर्यदा।
भगवत्यभवन्मही तदा भगवाँश्चाप्यभिसंविवेश ताम्॥१.३॥
स हि बिन्दुवपुष्क ईश्वरो गिरिपुत्रीस्मरवह्निमाविशत्।
कृतवान् स हि विघ्नमेतयोर्निभृतं तत्र कपोतवर्ष्मणा॥१.४॥

इति। प्रपञ्चित एष एवाभिप्रायस्तत्रैवैवम्—

शिवयोरभिदैव भिन्नतामुपयाता स हि षण्मुखः सुतः।
इयमेव सृतिर्मनीषिणां शिवशृङ्गाररसः स लौकिकः॥
शिवया खलु रस्यते शिवः शिव एष स्वदते शिवामिमाम्।
अनयो रसनैव सा परा प्रसरीसर्त्ति सिसर्त्ति वा सृतौ॥ इति,
(कुमारविजये, १.९-१०)

इति च। प्रारब्धं चेदं काव्यममुमेवाश्रित्य भूमिकाम्—

शिवयो रमणोत्सवो य आसीद् रमणार्थं न स केवलं बभूव।
मरणार्थमिदं तु तारकस्य विधिमार्गेण सनातनात्मना॥
विधिमार्गत एषका सृतिर्नरनारीशिवयोः स्मरागमः॥१.१२॥ इति।

अत्र विधिपदं श्लिष्टम्, विधिर्ब्रह्मा, धर्मश्चेति। धर्मश्चात्र सनातनः सार्वदिकः शाश्वतिको वा। त इमे रहस्यदिग्धा विषया नास्फुरन्नेतेषां सर्गाणां कर्त्तुः प्रज्ञाकोशे। अत एव विमुखावत्रारुणगिरिनाथनारायणौ वल्लभदक्षिणावर्त्ताविवैव। उचितं च तत्। मल्लिनाथोऽपि सप्तमं सर्गं यावदेव निबबन्ध तस्य सञ्जीविनीम्। या चाष्टमसर्गेऽपि मल्लिनाथसञ्जीविनीनाम्ना टीकैका निर्णयसागरीये १९४६ यीशुवर्षीये संवत्सरे प्रकाशिते कुमारसम्भवसंस्करणे परिशिष्टतयाऽयोजि तत्रास्ति प्रकृतिभेदः पूर्ववर्त्तिसर्गगतसञ्जीविनीतः। ततस्तत्रापि जागर्त्ति प्रश्नचिह्नं मल्लिनाथसूरिनिर्मितत्वे। योऽयमष्टमः सर्गस्तस्य भावमाधुरीं रचनाकौशलीं च रसयतां कालिदासैकरचितत्वं सूपपादम्। नान्यः कवयितुं प्रभवेत्—

पश्य पक्वफलिनीफलत्विषा बिम्बलाञ्छितवियत्सरोऽम्भसा।
विप्रकृष्टविवरं हिमांशुना चक्रवाकमिथुनं विडम्ब्यते॥८.६१॥

एवंविधं काव्यबन्धम्। प्रकृतोभयोपमाऽत्रालङ्कारः। हिमांशुबिम्बद्वयमिव चक्रवाकमिथुनमपि विप्रकृष्टविवरम्, पक्वफलिनीफलत्विट् च। उभयत्रापि कालसामानाधिकरण्यं जागरूकमेव। यदा हिमांशुबिम्बयोर्विप्रकर्षस्तदैव चक्रवाकयोरपि। देशसामानाधिकरण्येनापि प्रवर्त्तते महाकवेरस्य प्रतिभा प्रकृतोभयौपम्यमुपनिबन्धुम्। तथा हि रघुवंशस्य चतुर्थे सर्गे—

आपादपद्मप्रणताः कलमा इव ते रघुम्।
फलैः संवर्धयामासुरुत्खातप्रतिरोपिताः॥४.३७॥

इत्यस्मिन् वङ्गानन्तरीयाणां सुह्मदेश्यानां वर्णने। यस्मिन् क्षेत्रे ऋतौ च कलमपदवाच्याः शालयः फलभारानता दृश्यन्ते तस्मिन्नेव तद्राजानोऽपि रघुं फलैः संवर्धयन्ते। उत्खातप्रतिरोपितत्वमप्युभयत्र समानम्। रघुणा सुह्मगता राजानस्तथैवोत्खाय तत्रैव प्रतिरोपिता यथा कलमा उत्खाय प्रतिरोप्यमाणा अदृश्यन्तेति तत्रार्थद्वयसङ्गतिः।

ऐतिह्यमप्यष्टमसर्गस्य कुमारसम्भवघटकत्वे प्रमाणति। तथा हि तत्तेषां कवीनामुदाहरणैरात्मनः सिद्धान्तसूत्राणि प्रमाणयतां काव्यशास्त्राचार्याणां प्रथमः ८०० यीशुसंवत्सरे काव्यालङ्कारसूत्रवृत्तिग्रन्थस्य कर्त्ता तत्रभवाञ्जयापीडनाम्नः शारदादेशीयस्य राज्ञो मन्त्री वामनः। स हि कुमारसम्भवस्यास्याष्टमस्य सर्गस्य पद्यान्युद्दध्रे। तेषु ८.३१ सीकरव्यतिकरमित्यादिकमेकम्, ८.६२ 'शक्यमोषधिपतेरि'ति द्वितीयं, ८.६३ 'अङ्गुलीभिरिवे'ति च तृतीयं वामनेनोद्धृतं पद्यम्। अस्ति च ध्वन्यालोककृताऽऽनन्दवर्धनोऽस्यैव सर्गस्य विषये दर्शितवाननौचित्यदोषम्। सोऽयं नवमशतकीयः। मम्मटोऽप्यमुमेव दोषमुदाजहार, उदाहजहार चामुं सर्गं मम्मटपूर्ववर्त्ती महिमभट्टो 'निम्नमुन्नतमवस्थितमि'ति। तदेवमेकादशे शतके महिमभट्ट इव द्वादशशतकपूर्वार्द्धे मम्मटोऽप्यस्य सर्गस्य कुमारसम्भवीयत्वे समानरूपेणैवाऽविसंवाद्येव। अनौचित्यमिदमत्र प्रस्तुताभ्यां टीकाकृद्भ्यां पुनर्निपुणं निराकारि। युगनद्धभावमुद्रा खलु भगवद्भक्तानधिकतमं प्रत्याहृतेन्द्रियान् करोति। भगवतोश्चेष्टाशतान्तरवत् तोषजनकमेव सुरतव्यापृतिवर्णनम्। भगवत्या भवान्या यौवनोद्भेदस्य प्रथमसर्गमारभ्यान्तिमं सर्गं यावद् यत् खलु वर्त्तिकयेवोन्मीलनं सोऽपि कवितुः चित्रकारस्य मूर्त्तिकारस्य च महानेव जपध्यानयोगः। या चाऽत्र पित्रोः स्मृतिः सा केवलाऽभावप्रतियोगिन्येव, तां भूमिकामारूढस्य स्वमालिन्यस्यैवानुभविकत्वात्। न स्मर्यतेऽत्र स्वभिन्नं किमपि। येषु च स्मृतिरियं वस्तुभूता तैः परिसरेऽत्र न ह्येव प्रवेष्टव्यम्। अनधिकृतास्तेऽस्य सर्गस्यानुभवे।

ऐतिह्यानि

अथेदानीमवधेयान्यैतिह्यानि कुमारसम्भवकर्त्तुः कालिदासस्य, प्रकाशिकाकर्त्तुररुणगिरिनाथस्य, विवरणकर्त्तुर्नारायणस्य च। तत्र—

१. कालिदासः

कालिदासो नाम स महान् कविर्यस्य नाम्ना प्रणीतानि निम्नलिखितनामानि काव्यनाट्यानि—

१. मेघदूत/सन्देशम्	१११ मन्दाक्रान्तामयं शृङ्गारकाव्यम्।
२. कुमारसम्भवम्	१-८ सर्गात्मकं महाकाव्यम्।
३. रघुवंशम्	१-१९ सर्गात्मकं महाकाव्यम्।
४. मालविकाग्निमित्रम्	१-५ अङ्कात्मकं नाटकम्।
५. विक्रमोर्वशीयम्	१-५ अङ्कात्मकं नाटकम्।
६. अभिज्ञानशाकुन्तलम्	१-७ अङ्कात्मकं नाटकम्।

ऋतुसंहारनामकमपि षडृतुकाव्यं कालिदासकृतत्वेनैव प्राप्तप्रसिद्धिकम्। एवमेव ज्योतिर्विदाभरणमिति ज्योतिश्शास्त्रप्रकरणमपि रघुवंशकृतः कवेरेव कृतित्वेन प्रसिद्धम्, शृङ्गारतिलकम्, नलोदययमकम्, श्रुतबोधनामकं छन्दःशास्त्रमपि कालिदासकृतित्वेनैव प्रख्यातिमापादितम्। एतानि सर्वाणि सन्दर्भरत्नान्याश्रित्य गवेषकैर्बहुधा कल्पितं जल्पितं च। तत्र 'ए हिस्ट्री आफ् क्लासिकल संस्कृतलिटरेचर' इति आङ्ग्लभाषया निबद्धे ग्रन्थरत्ने तद्रचयितुः कृष्णमाचार्यमहोदयस्य प्रतिपत्तिः (पृ.११३) भिन्नभिन्ना मा किं नव भवन्ति कालिदासा इति। तेषु—

१. रघुवंशम्, कुमारसम्भवम्, मेघदूतम्, ज्योतिर्विदाभरणञ्चेत्येतेषां रचयिता कालिदास एकः। स हि विक्रमसंवत्सरप्रवर्त्तकस्य विक्रमादित्यस्य नवरत्नेष्वन्यतमं रत्नमिति। मेधारुद्र इत्यस्य द्वितीयं नामेति।

२. मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलञ्चेति नाटकत्रयम् सेतुबन्धनामकं प्राकृतमहाकाव्यञ्चेत्येतेषां कविर्मातृगुप्तः खलु द्वितीयः कालिदासः। अस्याश्रयदाता विक्रमादित्यः कश्मीराणां शासको हर्षः।

३. तृतीयश्च कालिदासः १३४७-१४३० यीशुसंवत्सरान्तरालभावी काञ्चीकामकोटिकवेर्मूकस्य शिष्यः। ऋतुसंहारम्, शृङ्गारतिलकम्, श्यामलादण्डकम्, नवरत्नमाला, श्रुतबोधश्चेति ग्रन्थपञ्चकस्यासावेव रचयितेति।

अन्येऽपि षट् कालिदासास्तेनैव महोदयेनैवमत्रैवोल्लिखिताः—

१. नवसाहसाङ्कचरितस्य निबन्धा पद्मगुप्तपरिमलकालिदासः।

२. नलोदययमकस्य कर्त्ता कालिदासः। नलोदयस्य सुबोधिनीनाम्न्या संस्कृतटीकया सहितमतीव सुमुद्रणं संस्करणम् १८३० यीशुसंवत्सरे बरोलिनीनगरतः प्रकाशितमासीत्।

३. चम्पूभारतकारो नवकालिदासः।

४. अकबरसभारत्नभूतः समस्यापूर्त्तिकविः कालिदासः।

५. लम्बोदरप्रहसनस्य रचयिता कालिदासः।

६. सङ्क्षेपशङ्करविजयस्य कर्त्ता माधवनामाऽभिनवकालिदास इति।

एवमाहत्य कालिदासत्वं कृष्णमाचारीतिहासे नवत्वव्याप्यजातिकं जातमित्यहो नः क्षोदनिपुणिमा। ईदृश्येव प्रतिपत्तिः साकेतकस्य डॉ. रमाशङ्करतिवारिमहोदयस्य[1]।

कालिदासस्य नामान्तराणि

योऽयं महाकविरिदानीं केवलेन कालिदास इति नाम्ना प्रतीतस्तस्य मिलन्ति नामान्तराण्यपि तानि चेमानि—

१. कालदास इति २. मातृगुप्त इति ३. भर्तृमेण्ठ इति ४. चन्द्रमौलिरिति
५. ईश्वरकृष्ण इति ६. प्रवरसेन इति ७. कुमारदास इति ८. दीपशिखेति
९. कालिदास इति च।

एतेषां कालिदास इति पूर्वोक्तानां रघुवंशादीनां सर्गान्तपुष्पिकासु, नाटकप्रस्तावनासु च प्राप्यते। रघुवंशगतास्वेव सप्तमाष्टमनवमदशमादिसर्गपुष्पिकासु कालिदास एव कालदास इति लिखितो लभ्यते। पाटणादिभ्यः प्राप्तासु रघुवंशमातृकासु त इमे लेखा इति स्पष्टमेवास्माकं कालिदासग्रन्थावल्या द्वितीये १९८६ खीष्टाब्दे प्रकाशिते संस्करणे। केयं काली कीदृशश्चासौ कविस्तस्या दास इति कुतूहलेषु विविधमुत्प्रेक्षन्ते सहृदयाः। अस्माकं पुनरियं प्रतिपत्तिः यत् कालीयं कालिदासयुगस्य स्थितिः। प्रस्तुता चेयं कुमारसम्भवस्यैवाष्टमे सर्गे—

नोर्ध्वमीक्षणगतिर्न चाप्यधो नाभितो न पुरतो न पृष्ठतः।
लोक एव तिमिरौघवेष्टितो गर्भवास इव वर्त्तते निशि॥८.५६॥

---

[1] 'नाटककार कालिदास और काव्यकार कालिदास' पृष्ठ-१४, परिमलपब्लिकेशन, दिल्ली, २००१ ई.। अन्येऽपि डाक्टरप्रभाकरनारायणकवठेकरमहोदयप्रभृतयोऽमुमेव पक्षं पोषयन्ति, नवीना दाममित्रादीनां सद्यःप्राप्ताः प्राचीनाः शासनादेशाश्च।

इति नितान्तं सूक्ष्मेक्षिकया चित्रितेयं स्थितिः। बौद्धा हि वैनाशिकाः। तेषामनुयायिनां नन्दानां शासने समाज ईदृशीमेवावापद् दुर्दशाम्। तमिममुद्ध्रे बैम्बिकः सेनापतिः पुष्यमित्रः, बृहद्रथं विशस्याधिगृहीतमौर्यशासनः प्रसह्य। पुष्यमित्रश्च ब्राह्मणः। वर्णाश्रमव्यवस्थामसौ भूयोऽपि रूढमूलां व्यधादिति पुराविदां शासनम्। व्याकरणमहाभाष्यकारो भगवान् पतञ्जलिः कथयति—'इह पुष्यमित्रान् याजयामः' इति। अस्ति चाभिलेखः 'पुष्यमित्रो द्विरयष्टाश्वमेधेने'ति। सर्वदा सङ्क्रान्तिकाल एष भारतानामितिहासे। तथा चासीदस्य प्रभावो यद् वैदेशिका अपि वैष्णवाः समजायन्त। सेयं भगवती महाकाली। अस्या दासः सेवकः। सेवा चेयं वाङ्मयौपयिकी। प्रीता चानया भगवत्येषा। सहस्रशः खलु लेखाः प्रतिलेखाश्च साधितास्तत्तासु लिपिषु सम्पूर्णेऽपि भारतीये वसुन्धरावलये, सिंहलेषु च। एतेषामसौ पञ्चमः पञ्चशतीपर्यायः।

कालिदासस्य स्थितिकालः

ननु यदि पञ्चम एष पर्यायः पञ्चशताब्दीनां कालिदाससाहित्यलिपिकर्मणि तर्हि कस्तावत् प्रथम इति प्रश्ने २०७० वर्षेभ्यः प्रागित्यत्रास्माकीना प्रतिपत्तिः। मूलमत्र निम्नाङ्कितानि तथ्यानि—

उल्लेखः केवलस्य बैम्बिकवंशीयस्य शासकत्रयस्य—

१. पुष्यमित्रस्य तत्पुत्रस्य
२. अग्निमित्रस्य तत्पुत्रस्य च
३. वसुमित्रस्य
४. वसुमित्रकृतस्य सिन्धुतीरे यवनजयस्य
५. विदिशाया राजधानीत्वेन प्रसिद्धेः
६. उरगपुरस्य च पाण्ड्यदेशराजधानीत्वस्य
७. निष्कनाम्न्याः सुवर्णमुद्रायाः। इतिहाससिद्धानीमानि।

अनुल्लेखः १. संवत्प्रवर्त्तकस्य विक्रमादित्यस्य
२. विक्रमादित्यप्रवर्त्तितस्य संवत्सरस्य
३. विक्रमादित्यपरवर्त्तिषु शककुषाणकनिष्कगुप्तानाम्
४. चतुर्णामपि धाम्नाम्
५. प्रयागे समुद्रगुप्तप्रशस्तेः, महाकुम्भस्य च।

उद्धरणम् व्याकरणमहाभाष्यस्य ऋऌक्सूत्रे चतुष्टयी शब्दानां प्रवृत्तिरिति वचनस्य—

पुराणस्य कवेस्तस्य चतुर्मुखसमीरिता।
प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी।।

(कुमारसं.२.१७) इति।

अनुद्धरणम्—बुद्धस्य, तदीयानां धाम्नाञ्च साँचीप्रभृतीनाम्। परिहरति स खलु प्रसङ्गपतितानपीमान् प्रसङ्गान्। अत एव नासौ स्मरति 'हेलियोदर'निर्मितं गरुडध्वजमवन्तिकामार्गे, नापि च काशीं पार्श्ववर्त्तिसारनाथक्षेत्रपरिजिहीर्षुः।

एतैरन्यैश्चैवंविधैः साधकबाधकप्रमाणैः स्थितमिदं यन्नास्पृशत् कालिदासः २०७०तमादर्वाचीनां समयसीमाम्।

विक्रमादित्यकोलाहलः

ननु योऽयं महान् कोलाहलो यदुत कालिदासः खलु विक्रमादित्यसभारत्नेष्वन्यतम इति तस्य मूलं किमिति प्रश्ने ब्रूमः निम्नलिखिता उक्तयस्तत्र मूलमिति—

१. 'ख्यातिं कामपि कालिदासकृतयो नीताः शकारातिने'ति।

२. अभिज्ञानशाकुन्तलपाण्डुग्रन्थानां कतिपयेषु प्रस्तावनागतं वचनम् 'अभिरूपभूयिष्ठा परिषदियं रसभावविशेषदीक्षागुरोर्विक्रमादित्यस्य साहसाङ्कस्ये'ति।

३. कालकाचार्यकथादिकञ्चेति।

अत्रास्माकं प्रतिपत्तिः 'शकारातिना विक्रमादित्येन तदानीमुपलब्धाः सनातनधर्मप्रचारानुकूलाः कालिदासकृतयो भृशमादृताः' इति हि ततो निष्कर्षो ग्राह्यः, न तु कालिदासो विक्रमादित्यसभाकविरिति। एवमेव शाकुन्तलप्रस्तावनायां यो विक्रमादित्यस्य समुल्लेखः स प्रयोगकालप्रभावः, यथा काशीहिन्दूविश्वविद्यालयस्य हीरकोत्सवे प्रयुज्यमानस्य शाकुन्तलस्य प्रस्तावनायां तादृशस्योत्सवस्य, यथा वोज्जयिन्यां सम्पद्यमाने कालिदासमहोत्सवे तादृशस्य महोत्सवस्य। किञ्च योऽयं शाकुन्तलप्रस्तावनायां 'विक्रमादित्य'पदस्योल्लेखस्तत्र तस्य नामशब्दत्वं सिद्ध्यति, साहसाङ्क इत्युपाधेः प्रयोगात्। तथा च नाऽत्र समापतति गुप्तवंशीयानां विक्रमादित्योपाधिभृतां चन्द्रगुप्तस्कन्दगुप्तादीनां प्राप्तिप्रसङ्गः। ततश्चापहस्तिता नाम समूलमेवाधुनिकानां गुप्तशासने बहुमानभृतां विदुषां ते ते कल्पाः, तत्समकालिकः कालिदास इति सिद्धान्तयितुं सचेष्टानाम्। ये च पुरातत्त्वेतिहाससङ्ग्राहकाः फर्गूसनप्रभृतयस्ते हि भारतीयेषु घटनाचक्रेषु न स्वच्छचित्ता इति तेषां कल्पना

दूरतोऽपि भारतीयैः प्रामाण्यप्रियैर्विद्वद्भिः कथमप्यादर्त्तुं न शक्यन्ते। विक्रमसंवत्सरस्योल्लेखमपश्यद्भिरेभिः कल्प्यते यस्मिन् काले समुल्लेखस्तस्मिन्नेव हि काले विक्रमसंवत्सरस्य प्रारम्भः, किन्तु ६०० वर्षाणां प्राचीनतां कल्पयित्वेति। प्रतितर्कस्त्वत्र बलवान् 'न जानाम्यहं नामानि मम वृद्धप्रपितामहादीनाम्, ततो निष्क्रष्टुं शक्यते किं नाभूवँस्ते' इति। सोऽयमुपहासास्पदं ग्रहः यावज्जीवमहं मौनीति वदतो वचनमिव। 'पश्यति पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम्' इति यत् सुभाषितं तदेवाऽत्र चरितार्थम् 'पाश्चात्त्येषु हि संवत्सरस्य बहोः कालात् पश्चादपि प्रवर्त्तितस्य बहोः कालात् पूर्वप्रवर्त्तितत्वस्य प्रचारात्। प्रश्नान्तरमिदं 'विक्रमादित्य आसीन्नवेति, एतत्तु सिद्धं कालिदासस्तं न वेत्ती'ति।

यदि वा 'मित्र आदित्य' इत्यनर्थान्तरमेव। ततश्च शक्योन्नयस्त्वेष कल्पो यत् शुङ्गेष्वेव केनापि विक्रमेणापि भाव्यं यस्य नामनि आदित्य इति मित्रपर्यायो योजितो विक्रमादित्य इति, प्रवर्त्तितश्च तेनैव संवत्सर इति।

भावसंवादाः

काव्यगतानां भावानां चित्रमूर्त्त्यादिषु ये संवादाः गुप्तकाले दृश्यन्ते, तत्र मूलं कालिदासस्य साहित्यमेव कल्पनीयं, न तु वैपरीत्येन कालिदाससाहित्यगते संवादे प्राचीनानां चित्रमूर्त्त्यादीनां प्रभावः। यदि वा संवादेषु संवादमात्रं कल्प्यम्, न तु प्रभावः। अन्यथा भिन्नराष्ट्रगतानां कवीनां विभिन्नकालिकत्वेनान्योन्याऽपरिचितत्वेन च यो मतिसंवादस्तत्रापि प्रभाव एष कल्प्येत। कल्प्यमाने तु प्रभावे दुःशकनिर्णयोऽत्रानुयोगिप्रतियोगिभावः कस्य कुत्र प्रभाव इति। ततश्चैतिह्यविदां संवादेन यः पूर्वापरीभूतत्वभावविकल्पः स खल्वाश्रयासिद्धिदोषकवलितः।

चरमा सीमा

कालिदासो हि हर्षवर्धनसमकालिकेन बाणभट्टेन सादरं स्मर्यते हर्षचरिते रविकीर्त्तिनेव अयहोलाभिलेखे ६३४ यीशाब्दीये—

येनायोजि न वेश्म स्थिरमर्थविधौ विवेकिना जिनवेश्म।
स विजयतां रविकीर्त्तिः कविताश्रितकालिदासभारविकीर्त्तिः॥ इति।

अत्र जिनवेश्मपदस्य सभङ्गश्लेषं पूर्वार्धे, रविकीर्तिपदस्य चोत्तरार्धे याऽऽवृत्तिः सा यमकविधानं स्मारयति कालिदासस्य रघुवंशीये नवमे सर्गे विद्यमानम्। ततोऽप्यधिकमत्र कौशलमिति कविताश्रितपदे कविताऽश्रितेति योगोऽपि कल्पयितुं शक्यते। सेयं कालिदाससमयस्य चरमा सीमा। प्रथमा तु सीमा पुष्यमित्रस्तस्याश्वमेधे आचार्यपदं बिभ्राणस्य महर्षेः पतञ्जलेः। पुष्यमित्रपुत्रस्य

विदिशास्थस्याग्निमित्रस्य कृते मालविकाग्निमित्रनाटकं रचयितुरस्य भूयोऽपि समयसङ्कोचः। संवत्सरप्रवर्त्तकस्य विक्रमादित्यस्याऽनुल्लेखाच्च ततोऽप्यधिकः समयसीमासङ्कोचः। पुष्यमित्रोऽश्वमेधेऽग्निमित्रमाह्वयति 'आगन्तव्यं विगतरोषचेतसे'ति। उल्लेख एष नातीवोपयुक्तो नाटकप्रयोगे। तथापि लिङ्गमिदं कालिदासस्याग्निमित्रसमकालिकत्वे। एवं च निर्णेतुं शक्यते यत् कालिदासस्तदाऽजायत यदा शास्ति स्म बैम्बिको राजा भारतीयां वसुधां विदिशां राजधानीकृत्य। अत्यन्तमल्पीयानेष कालावधिः। अत एवाऽस्माकं निश्चयः २०७० वर्षाणि जातानि जातस्य कालिदासस्येति।

विरुद्धास्तर्काः

रघुवंशे हूणानां वंक्षुनदक्षेत्रे स्मरणं, समुल्लेखश्च ग्रीकपरिभाषाया 'जामित्र' इत्यस्या पार्वतीविवाहमुहूर्त्तत्वेन कालिदासं चन्द्रगुप्तविक्रमादित्यसमकालिकं साधयतीति यैः कीथादिभिरन्तिमत्वेनानुल्लङ्घनीयत्वेन च निर्धारितो विरुद्धस्तर्कस्तस्यापि न लभामहे क्षोदक्षमत्वम्। तथा हि हूणाः कालिदासेन महाभारताद् गृहीताः, महाभारतं च यीशादपि वर्षपञ्चशतीप्राचीनं पश्चात्त्यैरेव स्वीकृतम्। हूणा अपि नैकविधाः श्वेतहूणाः ताम्रहूणाश्चेति। तत्र श्वेतहूणा नैकवारं भारतानाचक्रमिरे। यच्च जामित्रपदं तद्धि ज्यौतिषे शास्त्रे सप्तमस्य भावस्य ग्रहशून्यत्वाय प्रसिद्धमित्यरुणगिरिनाथादयः। ततस्तस्याऽस्य ग्रीकपदप्रसवत्वं कल्पनैकपरम्। एवं तत्रापि न वीक्षामहे विरुद्धान् विदुषः कृतार्थान्। एवं हि बाधकद्वयमपीदं न सिद्ध्यति बाधाव्यभिचरितम्। या च कुन्तलेश्वरदौत्यादीनां कथा तद्धि कथामात्रमेव। न पश्यामस्तत्र पारमार्थिकत्वम्, खण्डितं चैतत् डॉ. वे. राघवन्महोदयेन स्वकीये शृङ्गारप्रकाशे पृ.७७८।

अन्ये प्रकल्पाः

कालिदासस्य वंशः कः, पितरौ कौ, धर्मपत्नी केत्यादयो ये प्रश्नास्तेष्वपि कल्पनयैव प्रवृत्तिर्विदुषाम्। तथापि मातुर्नाम पार्वतीति कल्पयितुं शक्यम्, पितुश्च परमेश्वर इति। तत एव रघुवंशमङ्गलस्यानुरूपत्वसिद्धिः। धर्मपत्नी केषाञ्चन मते विद्योत्तमेति, केषाञ्चन मते भारतीति केषाञ्चन च मते कमलेति कल्प्यते।

आत्मबलिदानेन विद्यामार्जीदसाविति नन्दिनीवृत्तान्तेन शक्यमुन्नेतुम्। रामदासमहात्मनोऽपि विषये समानैव कथा श्रूयते शिष्यपरीक्षणे। 'विश्वसिमि गुरुचरणयोरि'ति वादिनं शिष्यं रामदासः स्वामी कूपोदरे लम्बमानं शाखाग्रमारोहेति व्यादिदेश। आरुक्षच्छिष्यस्तथैव। अथ कृपाणमुत्थाप्य स्वामी कथयति मूलमस्याः

कर्त्तयामीति। तथा सति कूपे निपतेदेव शिष्यस्तथापि प्रत्युवाच यथा रोचते गुरुभ्य इति। गुरुश्च कृपाणमचालयत्। शाखा छिन्ना। पतति सम्प्रति शिष्यः कूपोदरे, किन्तु तन्मुखान्निर्यान्ति शब्दाः 'श्रीगुरुः शरणम्' इति। अथ स पश्यति नास्ति तत्र कूपः। अस्ति तु तत्र केवलः स्मयमानमुखकमलः श्रीगुरुरि'ति। सिद्ध एष शिष्यः। सैव च कथा कालिदासेन योजनीया दिलीपवृत्तान्तेन। सोऽयं प्राणपणेन विद्याभ्यासः। विद्योत्तमापदवाच्या, भारतीपदवाच्या वाऽस्य धर्मपत्न्येव वस्तुतो गुरुः। सैव च कमलापि। सोऽयमनन्यसाधारणः श्रीसरस्वत्योः समागमः। उदलिखदमुं विक्रमोर्वशीयभरतवाक्ये स्वयमसावेव सुकविः—

परस्परविरोधिन्योरेकसंश्रयदुर्लभम्।
सङ्गतं श्रीसरस्वत्योर्भूतयेऽस्तु सदा सताम्॥५.२४ वि.॥ इति।

अयमेवार्थ इन्दुमतीस्वयंवरेऽपि निबद्धः सुकविनाऽनेन—

निसर्गभिन्नास्पदमेकसंस्थमस्मिन् द्वयं श्रीश्च सरस्वती च।
कान्त्या गिरा सूनृतया च योग्या त्वमेव कल्याणि! तयोस्तृतीया॥६.२९ रघु.।

अङ्गनाथस्येदं वर्णनम्। आचारवती नृपकन्या मूर्खपत्नी जाता चेद् धैर्येण किमन्यत् कुर्वीत ऋते पत्युः प्रशिक्षणम्। 'ज्ञातरहस्या राजकुमारी वातायनान्मूर्खमिममधोऽपातयत्। पतंश्चासौ जिह्वां प्रालम्बयत्। सा च मध्ये स्थिताया भद्रकाल्याः प्रलम्बया जिह्वया सञ्जघर्ष न्यकृत्यत च। जिह्वारक्तमास्वाद्य भगवती भद्रकाली प्रकटिता बभूव प्रोवाच च वरं ब्रूहीति। सर्वशास्त्रसमृद्धां विद्यां त्वसौ वव्रे। जातश्च प्रतिभानवान् महाकविरिति या वृत्तकल्पना नाऽत्र पश्यामः कमप्यन्यमर्थम्।

कालिदाससमये विद्यास्थानानां संख्या १४ आसीदिति—

निर्बन्धसञ्जातरुषाऽर्थकार्श्यमचिन्तयित्वा गुरुणाऽहमुक्तः।
वित्तस्य विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरेति॥ रघु.५.२१॥

स्पष्टमेतस्य साहित्येन सर्वेष्वपि विद्यास्थानेषु पारदृश्वतामानर्ज महाकविरसाविति। कौटिलीयमर्थशास्त्रमप्यस्य कण्ठे विरराज मनुशास्त्रमिव। आनिषेकादौर्ध्वदेहिकं यावत् समग्रमपि वैदिकमार्गोपदिष्टं कर्म्मकाण्डमसौ महाभाष्यकारः पतञ्जलिरिव तथैवाभ्यस्यद् यथा तन्त्रमार्गोपदिष्टं तत् तत्रभवान् महामाहेश्वर आचार्योऽभिनवगुप्तः। अथापि काव्येष्वसौ कर्मकाण्डमिदं नाम्रेडयामास श्रीधर इव शिवराज्योदयकाव्ये। वर्णेकरोपाह्वः श्रीधरो हि राज्याभिषेकमन्त्रानपि शिवाजीराज्याभिषेकप्रसङ्गे काव्याङ्गीचकार। कर्मकाण्डेन मन्त्रसहितेनैव भाव्यमिति

कालिदासो वेद। तथा हि 'तत्रेश्वरो..सर्वममन्त्रवर्जम्' इति वचनमस्य कवेरत्रैव काव्ये (७.७२)। रघुवंशे तत्र तत्र कृतराज्याभिषेकोल्लेखोऽपि नायोजयताभिषेकमन्त्रानसौ काव्यकुक्षौ। श्रीधरस्तु काव्यमर्यादामिमां नाऽपालयत, केनापि हेतुना। परिचितनागरकाचारोऽप्यसावारण्यकानां चर्यामपि काव्यार्थममन्यत। मानुषीयां संस्क्रियामिव विक्रियामपि नितान्तं सूक्ष्मतयाऽसौ वेद। विक्रियास्वभिनिवेशमपि वेदैषः, वेद चैष रजोनिमीलितानां परिणतिमपथे पदार्पणरूपां व्यसनजननीम्। उक्तमेवैतेन—'अपदे/थे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः' (रघु.९.७४) इति। मेलयत्यसौ विपुलपरिणाहिवक्षोजयुगलानताङ्गीभिर्व्यूढोरस्कान् वीरान् प्रयच्छति च राष्ट्रियान् विनीतान् सर्व्वदमनानपि भरतान् नायकोत्तमान्। एवं स्वस्तिवचनमेवास्य कवित्वं समग्रायै मानवीयायै वसुमत्यै। वीरेष्वसौ धीरत्वमपि संस्काररूपेण धित्सति। धीरता चास्य मतेन विकारहेतावुपस्थितेऽपि चेतोधातोरविक्रियैव 'विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः' (कुमा.१.५९) इति। कुशोऽर्धरात्रे शयनागारं प्रविष्टां वनितामेकां पश्यति। प्रोषितपतिकावेषा सा न दुर्गमा। किन्तु कुशो नितान्तं धीरः। विस्मितः स तामपृच्छत्—

का त्वं शुभे! कस्य परिग्रहो वा किं वा मदभ्यागमकारणं ते।
आचक्ष्व मत्वा वशिनां रघूणां मनः परस्त्रीविमुखप्रवृत्ति॥ इति।
(रघु.१६.८)

सम्पूर्णेऽपि संस्कृतकाव्यशास्त्रे काव्यमिदं सुभाषितोत्तमत्वेन कण्ठाभरणतामवाप। आगते प्रसङ्गे युद्धमप्यसावभिनन्दत्यदर्शितपृष्ठतयैव, किन्तु नास्त्यस्य प्रियो मानुषरक्तपातः। अस्त्यस्य मन्त्रो 'न चारिहिंसा विजयश्च हस्ते' (रघु.५.५७) इति। मृगयायामप्यसौ दृप्तानां दर्पशृङ्गमात्रमुच्छिनत्ति, न प्राणान् 'शृङ्गं स दृप्त विनयाधिकृतः परेषामत्युच्छ्रितं न ममृशे, न तु दीर्घमायुः' (रघु.९.६२) इति। सनियमा यमा एवास्य समाजधारणकृद् धर्मः। अमुमसौ कुत्र न स्मरति? न ह्येव विस्मरत्यसाविमान् क्षणार्धायापि। न जानाति चासौ धर्मलिङ्गानि चन्दनललाटिकादिरूपाणि। ऊर्ध्वपुण्ड्रकोऽसौ वैष्णवः, भस्मललाट एष शैव इति या क्षीणतमानां नृणां कथास्तत्राऽनभ्यन्तर एवासौ महाकविः।

सौन्दर्यं यदि न मारजित् तर्हि पर्यन्ते नातिक्रामति नयनाश्रूणि। पार्वती तदैव भगवता स्वीचक्रे यदा पञ्चमसर्गदर्शितेन पथा तपश्चर्यया पञ्चस्वपि क्षरणमरणधर्मेषु महाभूतेष्वक्षरणाऽमरणशीलत्वमसावशानाऽमृतत्वम्—'अद्य प्रभृत्यवनताङ्गि तवास्मि दासः क्रीतस्तपोभिरि'ति (कु.सं.५.८६)। शतं शकुन्तलाः, सहस्रं मालविकाः अयुतं चौर्व्वश्यो नीराजयेयुरिमां भगवतीमपर्णाम्।

चित्रकरत्वं मूर्त्तिकृत्त्वं वा दर्शयत्यसौ पार्वतीवर्णनेषु, किन्तु प्रथमं तस्यै प्रणामाञ्जलिं समर्प्य—'अभ्युन्नताङ्गुष्ठनखप्रभाभि'रित्यत आरभ्य 'लज्जा तिरश्चां यदि' इति पर्यन्तम्। अतिशयेन सम्भावनेन सादृश्यगतेन मालात्वेन वाऽसौ अनुक्तानपि विशेषानुपश्लेषयतीव चेतश्चक्षुषा। व्यतिरेकविधिं वा क्वचिदाश्रयति 'नागेन्द्रहस्तास्त्वचि-रुपमानबाह्या' इति। भेदकथेयं स्मारयत्याक्षेपशरीरम्। सेयं २०७० वर्ष प्राचीना कालिदासकविता सुबहून् परिवर्त्तानशान लिप्यन्तरैः। अथापि सम्पादनस्य 'एक्लिक्टिक'—संज्ञकेन मार्गेण कथञ्चिदुपमूलमानीतापि प्रकाशितापि च तन्निर्वृत्तेन रूपेण कालिदासग्रन्थावल्या १९८६ संवत्सरे प्रकाशिते काशीहिन्दूविश्वविद्यालयीयेऽस्मत्संस्करणे ग्रन्थेऽत्र तेनैव रूपेणोपस्थापयामो यद्धि टीकाकृतोरनयोरभिमतम्। द्वयोरन्तरं च परिशिष्टे दीयते। 'पराजितेनापि कृतौ हरस्य यौ कण्ठपाशो (न तु कण्ठपाशौ) मकरध्वजेन' (१.४१) इत्यत्र, 'तदिच्छामो विभोः सृष्टम् (न तु स्रष्टुम्), (२.५१) इत्यत्र च स एष विशेषः स्पष्टः।

कालिदासकाव्यानां नामान्तराण्यपि लभ्यन्ते। तथाहि रघुवंशस्य नामान्तरं गभीरकाव्यमिति, मेघदूतस्य मेघसन्देशमिति। कुमारसम्भवस्यापि भवितव्यमेव केनापि नामान्तरेण, न तु तल्लभ्यते। ततः कालिदासग्रन्थावल्या द्वितीये संस्करणेऽस्माभिस्तत् प्रकल्पितम्—'अष्टमूर्त्तिकाव्यमि'ति, दर्शिताश्च सर्गाणामन्ते सम्बद्धानां पृथिव्यादिमूर्त्तीनां नामानि, रचितं च तमेव भावं विशकलयद्भिः कुमारविजयं नाम महाकाव्यम्।

कालिदासस्य कविकर्मणो ये विशेषास्तानुल्लिखितवन्ति एव प्राचीनानि संवत्सरशतकानि 'आबाणादा च भवभूतेः'। साम्प्रतिकेष्वपि शर्मण्यदेशीयं महाकविं गेटेमारभ्य रवीन्द्रनाथप्रभृतीन् यावत्, यावच्च 'कामायनी'कर्त्तारं वाराणसेयं कविवरं जयशङ्करप्रसादम्। कामायन्या 'हिमगिरि के' इत्यस्मिन् १.१ पद्ये यत् 'एकपुरुष भीगे नयनो से' इति 'एकपुरुष'—पदं तद्धि न न स्मारयति 'वेदान्तेषु यमाहुरेकपुरुषमि'-ति कालिदासस्य वचनम्। श्रूयते च प्रसादः कालिदाससाहित्यस्यापि आवृत्तिं करोति स्म ध्वन्यालोकस्येवेति। यदि च नैषधीयचरितादिषु कालिदाससाहित्यस्य च्छाया गवेष्येत विपुलकायः सन्दर्भग्रन्थः सम्पद्येत। छाया हि द्विविधा भवति साक्षादनुहरणरूपा वैधर्म्येण पूर्वोक्तिप्रतिक्षेपरूपा च व्यतिरेकावलम्बिनी। अनयोरपरमेव मार्गं श्रयति श्रीश्रीहर्षः 'अधारि पद्मेषु तदङ्घ्रिणा घृणा क्व तच्छयच्छायलवोऽपि पल्लवे' इत्यादिषूक्तिशतेषु। परा हि काष्ठा मार्गस्यास्य—

सरोरुहं तस्य दृशैव निर्जितं जिताः स्मितेनैव विधोरपिच्छटाः।
अतदद्वयीजित्वरसुन्दरान्तरे न तन्मुखस्य प्रतिमा चराऽचरे॥ इत्यत्र।

अत्र यस्तृतीयश्चरणस्तत्रापुष्टिमनुभवामः। दृक्स्मिते हि मुखरूपस्यावयविनोऽवयवौ। यदाङ्गाभ्यामेव कमलचन्द्रौ पराजितौ तदाऽङ्गिनो मुखबिम्बस्य कृते किं नु गवेष्येत प्रतिमल्लतायै इति तु काव्यार्थस्योत्तरार्धमुपस्थितं भवति, न तु कमलेन्दुद्वन्द्वभिन्न-सुन्दराभावपदार्थस्य, तत्रापि च जित्वरत्वस्य। न हि अङ्गेषु जित्वरस्य सादृश्यमङ्गिना परिणमेत्। इयमेव तु दुःस्थितिर्नैषधस्य नितान्तं गाढेष्वपि बन्धान्तरेषु 'अस्य क्षोणिपते' (नैषध. १२)इत्यादिषु। एवंविधाऽवद्यशतीकवलितापि नैषधकविता न भवत्यकविता, कवितात्वं यद्यपि तत्र गवेषणैकलभ्यम्। कालिदास इव श्रीश्रीहर्षे नास्ति प्रसादगुणप्लावितो बन्धः। माघः शाब्दिकेन श्लेषेणैव व्यामोहित-मतिरुपमानगतामनौचितीं न पश्यति भगवतो नारदस्य वर्णने, अत एव सुरापं बलदेवमप्युपमानीकरोति नारदाय देवर्षये, उपमिमीते च तमेनं भगवन्तं गजेन 'कुथेन नागेन्द्रमिवेन्द्रवाहनमि'ति कालिदासः पुनरमुमेव प्रसङ्गं प्रस्तौति विक्रमोर्वशीये किन्तु तावन्मात्रं ब्रूते यावदपरीहार्यम्—'गोरोचनानिकषे'-ति पद्येन (५.१९) अमोघदर्शनाः खलु महात्मानः, अत एव जङ्गमकल्पवृक्षा एव ते इति कालिदासस्योक्तिः। चरितार्था चात्र नायकयोरवियोगसिद्धेः। अलमेतया प्रसक्तानुप्रसक्तया कथया। सर्वथाऽत्र भवान् कालिदास औचित्यमात्रदर्शी। स हि संयमं परिपालयितुं चेष्टतेतरां यथाशक्ति। तत्रभवन्तः श्रीश्रीहर्षप्रभृतयः पाण्डित्यशौण्डीर्यकषायितशेमुषीकाः। ते हि अनौचित्येऽपि त्याज्यत्वं न पश्यन्ति। अत एवोच्यत एतेन—'तदात्मताध्यातधवा रते च का चकार वा न स्वमनोभवोद्भवम्' इति (नैषधारम्भे)। अत एवास्माकं श्लोको यत्र नृत्यलग्नाऽस्ति शारदाम्बा—

बाणो वाण्याश्चरणरणितं नूपुरं दण्डपादो
माघो दण्डी कटितटरटत् किङ्किणीचक्रवालम्।
पिण्डीबन्धश्चलतरलयोर्हस्तयोर्हीरपुत्रः
क्रीडाशैलद्वयमुरसि यत् तत् तु नः कालिदासः॥ इति।

सर्वथा कालिदासस्य सौन्दर्यं शिवाय, शिवश्च सौन्दर्यायेति कुमारसम्भवे कालिदासस्यैदम्पर्यम्। अथ टीकितारविमौ पश्यामः। तत्रारुणाचलनाथं प्राक्।

२. अरुणाचल/णगिरिनाथः

कुमारसम्भवात् पूर्वं रघुवंशे प्रकाशिकामारचितवॉस्तत्रभवान् अरुणगिरिनाथोऽरुणाचलनाथनाम्नापि व्यपदिश्यते। नाम्न्येते सम्प्रदायविशेषेण दत्ते, वस्तुतस्तु 'शिवदास' इति विदुषोऽस्य मुख्यं नाम। प्रमाणमत्रास्ति रघुवंशप्रकाशिकायां स्वयमरुणगिरिनाथस्यैवाधोदत्तं वचनम्—

अरुणाचलनाथेन द्विजपादाब्जसेविना।
शिवदासाऽपराख्येन मया टीका वितन्यते॥ इति।

येयमत्र विवरणनाम्नी द्वितीया टीका तन्निर्माता तत्रभवान् नारायणोऽप्यरुणगिरिनाथममुं शिवदासनाम्नैव परामृशति। बह्वीषु कुमारसम्भवटीकास्वसौ प्रकाशिकामेवादर्शत्वेन वृणुते ब्रूते च—

व्याख्यान्तरेषु दृष्टेषु विमृष्टेष्वपि तत्त्वतः।
सुभगः शिवदासोक्तो मार्ग एवाऽनुगम्यते॥' इति।

१.१ विवरणारम्भे दशमः श्लोक एषः। एतेन स्पष्टं यदरुणगिरिनाथः 'शिवदास'-नाम्नैवासीद् व्यवह्रियमाणः। अत्र सुभग इति यो मार्गस्य विशेषो यश्च स्वगतोऽनुगमनात्मा सह ताभ्यां स्पष्टभूयिष्ठैवारुणगिरिनाथप्रकाशिकां प्रति नारायणस्य श्रद्धा। नास्ति परः कश्चिच्छिवदासः। अरुणगिरिनाथ एव प्रथमस्य सर्गस्य प्रारम्भे पञ्च अष्टमस्य सर्गस्य चान्त एकं श्लोकं निबबन्ध। चूलीन्यायेनान्तिमः श्लोक एषः—

ये वाक्यार्थविचारकर्कशधियो ये वा रसस्त्रोतसि
स्वेच्छामज्जनकेलिषु व्यसनिनो ये वा शिवौ संश्रिताः।
ते निर्मत्सरसावधानमनसो मत्कां मनोहारिणीं
सङ्गृह्णन्तु कुमारसम्भवसमुद्बोधाय टीकामिमाम्॥

प्रथमसर्गारम्भे च ये श्लोकास्तेऽमी सर्गारम्भत एवावसेयाः। अनयाऽरुणगिरिनाथस्य व्यापिकी शास्त्रव्युत्पत्तिः संस्तवं भजति। अस्त्यस्मिन् व्याकरणपूर्वमीमांसयोरनवद्यहृद्योऽवगमः, आगमिता ह्यत्रालङ्क्रियाः, विश्वस्य वैचित्रीचित्रे व्यवहारेऽप्यस्त्यस्य मतिः प्राप्तप्रतिष्ठा, निपुणश्चैष रसभावसम्मिश्रणे गुणप्राधान्यनिर्णीताविति नियतमेवास्य शास्त्रव्युत्पत्तिर्नितान्तं प्रौढा। प्रौढिमिमां शिवे दृढभक्तिरेष भवपादपङ्कजरजःसम्पर्कप्रसूतां प्रतिजानीते। सोऽस्य विनयः। रघुवंशे प्रकाशिकां विरच्याऽसौ कुमारसम्भवप्रकाशिकां रचयितुमारभतेत्यपि चास्मादेव सन्दर्भात् सुखोन्नेयम्। रघुवंशप्रकाशिकायामेषा भवत्यरुणगिरिनाथस्य श्लोकानां द्वाविंशतिः—

नमस्तस्मै गणेशाय यत्प्रसादान्महीयसाम्।
आरम्भाः फलपर्यन्ताः परानुग्रहहेतवः॥१॥

नमामि निखिलातङ्कनिर्वापणमहौषधिम्।
मातरं जगतामेकां चन्द्रशेखरवल्लभाम्॥२॥

कृतिर्या कालिदासस्य सर्वार्थसुरपादपः।
तस्याऽस्य रघुवंशस्य बहुमार्गाऽवगाहिनः॥३॥

अरुणाचलनाथेन द्विजपादाब्जसेविना।
शिवदासाऽपराख्येन मया टीका वितन्यते॥४॥
आलोच्य पूर्वटीकाश्च लक्षणानि च धीमताम्।
विनिर्मिता मया सेयं सोपयोगा भविष्यति॥५॥
न चेह पूर्वटीकाभिः कैमर्थक्यं प्रतीयताम्।
यतो विद्वन्मता 'सर्वो न सर्वं पश्यतीति वाक्॥६॥
सर्वविद्यासतत्त्वानामादर्शे चाऽत्र लक्ष्यते।
प्रबन्धेऽस्य कवीन्द्रस्य सर्वलोकातिशायिता॥७॥
शतं प्रकरणानां यत् साशीति कृतवान् मुनिः।
विष्णुगुप्तोऽर्थशास्त्राब्धेस्तत् प्रायोऽत्र निदर्शितम्॥८॥
चतुर्वर्गाभिधानेऽपि भूयसाऽर्थोपदेशकृत्।
इत्युक्तवान् भामहो हि सर्गबन्धस्य लक्षणे॥९॥(किन्तु)
रसानुगुणशब्दार्थव्यवहारे नियामिका।
भारतीया स्थितिश्चाऽत्र सम्यक् सर्वा समर्पिता॥१०॥
कामसूत्रार्थतत्त्वं च कलाशास्त्रविनिश्चयः।
देवतापारमार्थ्यं च धर्मशास्त्रगतिस्तथा॥११॥
इतिहासप्रमेयाणि मोक्षशास्त्रस्थितिस्तथा।
एतत् सर्व्वमथाऽन्यच्च कवीन्द्रेणाऽत्र दर्शितम्॥१२॥
अभिप्रायेण चैतेन धीरोदात्तादिभेदिनाम्।
अनेकेषां नरेन्द्राणां वृत्तं वर्ण्यतयाश्रितम्॥१३॥
तादृशोऽस्य प्रबन्धाब्धेः कस्तलं गन्तुमर्हति।
यथामति विचारे तु कस्य वा नाऽस्ति योग्यता॥१४॥
वाक्यार्थतत्त्वावगमो नालङ्कारगतिं विना।
ततो मयाऽर्थालङ्कारा बाहुल्येनाऽत्र दर्शिताः॥१५॥
आलस्यादपरिज्ञानादतिविस्तरभीतितः।
अनुल्लेखितया चात्र क्वचित् केचिन्न वर्णिताः॥१६॥
क्रियते च प्रदेशेषु रसभावनिरूपणम्।
यतो निर्जीवतां याति काव्यं तेन विनाकृतम्॥१७॥

अनुप्रासादिरूपं च क्वचित् किञ्चिन्निरूप्यते।
यतः शब्दविशेषाणां लोके सिद्धा रसाङ्गता॥१८॥

गुणादर्शतया व्याप्ता वाणी यद्यपि सत्कवेः।
तथापि दुष्करे (रं) तत्र प्रतिपत्प्रतिपादने (नम्)॥१९॥
तादृगन्यच्च काव्याङ्गं स्वयमूह्यं मनीषिभिः।
को वा सर्वविशेषाणामुन्मेषं कर्त्तुमर्हति॥२०॥

तत् प्रसन्नेन मनसा गुणलेशेऽपि सादराः।
सन्तः शृण्वन्त्विमां टीकां रघुवंशप्रकाशिकाम्॥२१॥ इति।

(१.१ पद्यटीकारम्भे)

इत्थं विचित्रसरसेऽत्र मया प्रबन्धे
सन्दर्शितं विविधकाव्यनयप्रपञ्चम्।
आलोच्य साधु परिबृंहितशेमुषीकाः
सर्वत्र काव्यविषये विहरन्तु सन्तः॥२२॥
एतत्प्रबन्धविवृतिव्यपदेशतो य-
च्छब्दार्थतत्त्ववितप्रविवेचनं नः।
तत् सर्वमस्तु पदपङ्कजयोः सपर्य्या
सर्वात्मनः सकललोकगुरोः शिवस्य॥२३॥ इति।

(१९.५७ टीकान्ते)

मध्ये त्रयोदशस्य सर्गस्यारम्भेऽपि प्रकाशिकायां निम्नलिखितः प्रक्षेपो दृश्यते—

जागर्त्ति वाङ्मयीतीरे देवता कापि वाङ्मयी।
तथा चाऽर्थमयी कापि स्यातां ते मे विभूतये॥ इति।

स्पष्टमेतैः पद्यैर्यदरुणगिरिनाथः स्वविषयके विवरणे तूष्णीमेव तिष्ठति। रघुवंशप्रकाशिकापेक्षया स्वविषयेऽसावधिकं मुखर इह कुमारसम्भवप्रकाशिकायाम्। रघुवंशप्रकाशिकायामिवाऽत्राप्यसौ द्विजपादाब्जसेवित्वमात्मन उल्लिखति। अस्त्यत्र सहृदयेषु प्रणयः पूर्वं रघुवंशप्रकाशिकामनुशीलयन्तु ततः परमिमामिति। अस्ति चास्यात्मनष्टीकां प्रति प्ररोचना—

वर्ण्यते शिवयोर्वृत्तं कालिदासस्य सूक्तयः।
व्याख्यातारो वयं चेति मन्ये कोऽप्युत्सवः सताम्॥ इति।

अक्षरशश्च सत्य एष समुद्गारः। काऽस्य माता, कः पिता, को गुरुः, गृहस्थो वा विरक्तो वा, सर्वमिदमेतद्विषये कल्पनैकशरणम्। दाक्षिणात्त्य इत्येतदेव तु विषयेऽस्य निश्चितम्। अथास्य स्थितिकालः क इति प्रश्नः। अत्रास्माकमुत्प्रेक्षा-काव्यप्रकाशमुद्धृतवानेषोऽनुल्लिखितालङ्कारसर्वस्वस्त्रयोदशख्रीष्टसंवत्सरारम्भ उदभूदिति। तदैव चाजायत मल्लिनाथः। अन्योन्याऽविदिताविमौ। यदि वा मल्लिनाथादरुणाचलनाथः प्राचीनः 'नाऽनपेक्षितमुच्यत' इति प्रतिजानान एष कदाचिदरुणगिरिनाथमेव लक्षयति। 'नाथ'पदेन यं हि टीकितारं मल्लिनाथः परामृशति दक्षिणावर्त्तनाथः सः, न पुनररुणगिरिनाथ इति प्रसाधितचरमेव रघुवंशप्रकाशिकाप्रकाशयितृभिः श्रीमद्भिरैयरवंशकरीरै रामचन्द्रमहोदयैः [T.K.-Ramachandra Aiyer, Principal, Sanskrit College, Tripunithura, Keral, 24.11963]।

इदमत्र सविशेषमुल्लेख्यं यदरुणगिरिनाथो भामहस्य साहित्यसम्प्रदायाद् वैमुख्यं दर्शयति, न त्वानन्दवर्धनादिवच्छ्रद्धातिशयम्। अरुणगिरिनाथस्य यः साहित्यशास्त्रसम्प्रदायस्तत्र प्रतिबिम्बितो दृश्यते धाराधीशो महाराजो भोजः। तस्यानेके सन्दर्भा अनेन समुल्लिखिताः। सहृदयता चास्य तथा मेदुरमेदुरात्मा यथाऽतिशेत इवासौ महाराजमिमं भोजम्, स्पृशति च पेशलतां कुन्तकाचार्यस्य। अस्ति चास्य कालिदाससाहित्येऽपि स्वकीयः सम्प्रदायो यत्र कतिपये श्लोका न पठ्यन्ते। तथा च १८.०२ प्रकाशिकायां रघुवंशेऽस्य स्पष्टोक्तिः— 'तेनोरुकार्येणे'ति पद्ये 'अयन्तु श्लोको वल्लभपाठ एव दृष्टत्वा[1]ल्लिख्यते तेनोरुकार्येण—'फलात्मकेने'ति। अत्रैव नारायणोऽपि टीकते—'तेनेति'। तेनोरुवीर्येण—'फलात्मकेने'ति। अस्मद्गुरोः परम्परायामसौ श्लोको न पठ्यते। अरुणाचलनाथेन तु वल्लभपाठमाश्रित्य व्याख्यातम्।।' इति।

३. नारायणः

रघुवंशे पदार्थदीपिकामिव कुमारसम्भवेऽत्र विवरणं रचितवानेष नारायणो नूनमेवारुणगिरिनाथापेक्षया माकिं वर्षशतकानन्तरमजायत। अनेन कुमारसम्भवस्य बह्व्यष्टीका अनुशीलिताः, अनुसृता तु अरुणगिरिनाथस्य रीतिः। शिवदास

---

[1] (क) लिख्यत इत्यस्यायमभिप्रायो यदिमे टीकाकृतः पूर्वं पूर्णं श्लोकमपि लिखन्ति स्म। न तु प्रतीकमात्रेण तुष्यन्ति स्म।

(ख) इदमपि च नारायणस्य वचनात् स्पष्टं यदनयोर्द्वयोष्टीकित्रोः गुरुपारम्पर्यमपि भिन्नमभूत्। नारायणस्य गुरुस्तस्य मातुलः श्रीकृष्णो यमसौ प्रतिसर्गपुष्पिकं स्मरति।

(ग) एतदपि सम्भवदुद्भावनं यदनयोर्मध्ये प्रायेणासीदन्तरालं वर्षशतकस्य। नारायणो नैषधीयचरितमप्युद्धरतितरामसकृदेव। अरुणस्तु श्रीहर्षं न वेदेति।

इत्यरुणगिरिनाथस्यैवाऽपरं नामेति प्रत्यपाद्येवानुपदमेव। अरुणगिरिनाथस्य कालिदासपाठपरम्परातो नारायणस्य कालिदासपाठपरम्परा भिन्नेति प्रत्यपाद्येवाऽत्रैवाऽस्माभिः। अनुसरन्नप्यरुणगिरिनाथमसौ विरुणद्ध्यपि दक्षिणावर्त्तमिवारुणाचलनाथः। नारायण एषोऽलङ्कारसूत्रनाम्नाऽलङ्कारसर्वस्वमप्यलङ्कारनिर्णये प्रमाणीकरोति, न तु वेत्ति तदीयां जयरथकृतां भाष्योपमां विमर्शिनीम्। एवं स्थितमेतद् यन्नारायणोऽलङ्कारसर्वस्व-तद्विमर्शिनीकृतोर्मध्यवर्त्तीति। समय एष प्रायेण त्रयोदशस्य यीशुसंवत्सरस्यान्तिमश्चरणश्चतुर्दशस्य यीशुसंवत्सरस्य प्रथमं चरणं स्पृशन्निव।

नारायणस्य मानमेयोदयनाम्नी मीमांसासु प्रसिद्धैव रचना। विवरणस्यास्य पर्यवसानिकैः पद्यैरिव मानमेयोदयोपोद्घातपद्यैर्ज्ञायते यत् **'काली'**ति मातुरस्य संज्ञा, **श्रीनीलकण्ठ** इति पितुः, **कुमार** इति भ्रातुः, मातामहस्य नाम **पुरुषोत्तम** इति। मातामह एष श्वेतग्रामस्य शङ्करारामे लब्धजनुः कविग्रामणीरभूत्, अभूच्च तादृश एव तस्य मातुलः श्रीकृष्णः। अस्मादेव श्रीकृष्णान्नारायणः सर्वाण्यपि शास्त्राण्यध्यगीष्ट। काव्यकर्मण्यपि स एवास्य दीक्षिता। अस्मादेव मातुलात् कुमारतन्त्राम्भोधिमवाप नारायणः। तत्र 'कुमारतन्त्र'पदं श्लिष्टतया नेयम्, येनैकतो वैद्यशास्त्रे विदितं कौमारभृत्यनामकं प्रकरणमपि गृह्येतान्यतश्च कुमारसम्भवनामकमिदं कालिदासकाव्यमपि। सम्पूर्णमपि कार्त्तिकेयोपासनातन्त्रमपि शक्यग्रहं ततः। श्रीकृष्णस्य विषये नारायणस्य विशेषणमस्ति 'आलक्षितसर्वलक्षण' इति। अत्र लक्षणपदं नूनमेव लक्षणशास्त्रपरम्। लक्ष्यतयाऽत्र तन्त्रान्तरमिव काव्यतन्त्रमपि सुखग्रहम्। काव्यशास्त्रे हि प्रथमेनाचार्येण सुकविना दण्डिना स्वकीयं यत् स्वतन्त्रं काव्यशास्त्रं व्यरचि तस्य मुख्यमभिधानमस्ति 'लक्षणमि'त्येव। काव्यादर्श इति तस्य साम्प्रतं प्रसिद्धिः। एतच्च तथैव यथा भामहग्रन्थस्य मुख्यं नाम भामहालङ्कार इति विषयाश्रितं च प्रसिद्धं तत्तु काव्यालङ्कार इति, यदि वा आनन्दवर्धनग्रन्थस्य मुख्यं नाम 'काव्यालोक' इति, किन्तु ध्वनिस्तत्र मुख्यतया प्रतिपाद्य इति कालान्तरे प्रसिद्ध एष ध्वन्यालोक इति। एवं च नारायणस्य गुरुः श्रीकृष्णः सर्वेष्वपि विद्यास्थानेषु स्वभ्यस्तलक्षण इत्यस्माद् विशेषणादायातम्। काव्यशास्त्रे या लक्षणग्रन्थकाराणां पारम्परी तस्याः प्रभवः षट्साहस्रीति नामान्तरं बिभ्राणस्य नाट्यशास्त्रस्य कर्त्ता महान् मुनिर्भरतः। तस्य प्रथमोऽनुसर्त्ता वैदिकः कविवरस्तत्रभवान् दण्डी। ततः परं सौगतो भामहः, तदनुसर्त्तृषु च उद्भटः वामनः, रुद्रटः, आनन्दवर्धनः, कुन्तकः, राजशेखरः, अभिनवगुप्तः, क्षेमेन्द्रः, महिमभट्टः, भोजराजः, जयदेवः, रुय्यकः, मङ्खः, विश्वनाथः, अप्पय्यदीक्षितः, विश्वनाथदेवः, पण्डितराजो जगन्नाथश्चेति स्वतन्त्रमतयो लक्षणकाराः। एतेषु

दण्डिभामहौ प्रायेण समकालौ उद्भटवामनाविव, रुद्रटानन्दवर्धनाविव, महिमभट्टभोजाविव, भोजाभिनवगुप्ताविव, कुन्तकाभिनगुप्ताविव वा। साहित्यमार्गे पथिकृत्स्वेषु महात्मसु 'भरतः, वामनः, आनन्दवर्धनः, अभिनवगुप्तः, कुन्तकः, महिमभट्टः, भोजः, मम्मटो रुय्यकश्चेति नाम्न एवाचार्यानिमौ स्मरतः उल्लिखतश्च टीकितारौ। यथा चैतत् तद् ग्रन्थकृत्परिशिष्टे द्रष्टव्यम्। नारायणोऽरुणगिरिनाथापेक्षया पुनरधिकं संरम्भवान् दृश्यते। एवं च नारायणेन स्वगुरवे यदिदमालक्षितसर्वलक्षण इति विशेषणं प्रायोजि तद्धि प्रत्यक्षरमन्वर्थकमेव। अयञ्चास्य अर्थः 'आ समन्तात् कणेहत्य नु लक्षिता उपक्रमोपसंहारसङ्गत्या अभ्यस्ता सर्वेषां शास्त्राणां सर्वे लक्षणग्रन्था येनेति। यथार्थश्चासौ। अलङ्कारनिर्णये नारायणोऽलङ्कारसूत्रनाम्ना रुय्यककृतमलङ्कारसूत्रं स्मरति, स्मरति च 'सर्वस्वनाम्ना तत्रैवोपनिबद्धमलङ्कारसर्वस्वमपि मङ्खकृतम्। न तु स्मरति तत्र जयरथकृतामलङ्कारविमर्शिनीम्। अर्थशास्त्रमिव कामशास्त्रमपि निपुणमभ्यस्तवानेष वात्स्यायनरचितम्। आगते प्रसङ्गे दर्शयति संरम्भमेष कामशास्त्रस्यापि दुर्लभेषु सन्दर्भेषु। तत्रैव मतिसंवादाय प्रत्युपस्थापयति रत्नावलीवेणीसंहारादीनि यदृच्छयैव। जामित्रयोगेऽनयोर्व्याख्यानं ग्रीसदेशभवेभ्यो ज्योतिर्विद्भ्य आहृतस्य 'ड्यामिद्रियस'—पदस्यापभ्रंश इति पाश्चात्त्यानां विकल्पमुत्थातुमेव न ददात्यवसरम्। एतदुभयमते यथा पूर्वमप्युक्तं जामित्रत्वं नाम सप्तमस्य भावस्य सर्वग्रहशून्यत्वम्।

नारायणो हि परममुत्कृष्टः कविः। विपुलमस्य रचनाजातम्। स्वरचना इमा नारायणेन तत्तेषु श्लोकेषु संस्मृताः। तथा हि—

१. आश्लेषाशतकम् ४.४६.२
२. ऊढाभोगनृसिंहचम्पूः ६.८४.२, ६.९४.२
३. गोविन्दाङ्गगुणौघवर्णनम् १.५९.२
४. मानमेयोदयम् २.६३.२
५. वैदेहीनवसङ्गमचम्पूः ८.९१.२
६. श्रीमद्भागवतप्रबन्धः ५.८६.२
७. श्रीमासोत्सवचम्पूः ३.७६.१

विवरण-पदार्थदीपिकयोरस्य गणेशवन्दना समानैव 'षट्पदमुखरितगण्डम्' इत्यादिरूपा। अतः परं निध्येयरचनासौष्ठवास्तत्रास्यामी श्लोकाः—

पान्तु वो नरसिंहस्य नखा बालेन्दुकोमलाः।
दैत्यवर्गतमःस्तोमविदारणसुदारुणाः॥२॥

भाति ब्रह्मखले[1] काचित् करुणा शरणार्थिनाम्।
भवनाशकरी गौरीकुचकुङ्कुमपङ्किला॥३॥

रघुवंशे महाकाव्ये पदार्थान्वयशालिनी।
वाक्यार्थालङ्क्रियोपेता[2] मिता व्याख्या विलिख्यते॥४॥

विद्वांसोऽपि समत्सरा नृपतयः कार्येषु पर्याकुलाः
मूढाः[3] प्रौढतमःप्ररोहमलिनाः किं तैरलं चिन्तया।
एषा स्यात् फलशालिनी न रचना नूनं तथाऽप्यत्र ये
सन्तः सन्ति परोपकारनिरताः शृण्वन्तु ते मे गिरम्॥५॥

अत्र येऽभिप्रायास्त एव कुमारसम्भवविवरणारम्भेऽपि दशभिः श्लोकैरुपनिबद्धाः, किन्तु कुमारसम्भवविवरणश्लोकेषु प्रौढिरधिकेति मन्ये नारायणेनाप्यनन्तरमेव निरमायि विवरणमत्र पदार्थदीपिकानिर्मितेः।

टीकान्तरतो वैलक्षण्यम्

प्रकाशिका विवरणश्चेति ये द्वे टीके अनयोः प्रकाशिका केषुचित् पद्येषु न लभ्यते। येषु लभ्यते तेष्वपि क्वचिदतिसङ्क्षिप्ता, क्वचिच्चातिविस्तृता। विवरणं पुनः सर्वेष्वेव पद्येषु सुलभं सर्वत्रैव च वितत्य विद्यमानमेव। प्रकाशिका प्रायेण निगीर्णसर्वस्वेव नारायणविवरणेन। अनयोष्टीकयोर्वल्लभस्य पञ्जिकया, दक्षिणावर्त्तनाथस्य, मल्लिनाथस्य वा टीकया साम्यवैषम्यपर्यालोचनेन स्फुटो जायते विशेषः। तत्र काव्यस्य कुमारसम्भवमिति नपुंसकलिङ्गान्तं नाम सर्वैः प्रचारितम्। इमौ पुनष्टीकितारौ 'कुमारसम्भवः' इति तस्य पुंलिङ्गान्तत्वं साधयतः, तथैव चायं त्रिवेन्द्रमसंस्कृतग्रन्थमालायां दत्तशीर्षको मुद्रितः। अथ प्रश्नः 'सम्भव' पदमत्र किमर्थकमिति, तत्रापीमौ कृतशास्त्रार्थौ दृश्येते साधयन्तौ चाष्टमसर्गपर्यन्तकत्वमेवाऽस्य काव्यस्य। वल्लभोऽपि दृश्यतेऽस्पृष्टाष्टमसर्गकः। मल्लिनाथस्य स्थितिरष्टमसर्गे सन्दिग्धैव।

अथ येयं काव्यस्यास्याष्टमसर्गमात्रपर्याप्ता तनुरस्यामपि २०७० वर्षाणामन्तरालेन ये समुत्पादिताः परिवर्त्तनावर्त्तास्तित्राऽनवहितावपीमौ शास्त्रान्तरप्रमाणोपन्यासैः शतशो विशदयन्ति निभृतनिभृतानर्थान्। यथा चैतत् तदाद्यस्यैव

---

[1] ब्रह्मखलो नाम तीर्थविशेषोऽत्रापि विवरणारम्भे तुरीये पद्ये स्मर्यमाणः। अत्र भवस्यैव भवनाशकृत्त्वेन विरोधाभासः। गौरीकुचकुङ्कुमपङ्किलत्वस्य भव एव सम्भवात्।

[2] उपमादीनां वाक्यार्थधर्मत्वेनाऽवाच्यत्वमेव तथाप्यधन्य एव ध्वनिवादिनां वाच्यत्वप्रचारः।

[3] नृपतिविशेषणमिदमित्यहो धैर्यं कवेः। नेति प्रश्नकाकुः।

‘अस्त्युत्तरस्या’मिति पद्यस्य टीकाभ्यां स्पष्टम्। अत्र प्रश्नः काव्यस्यास्य नायकौ भगवन्तौ परमशिवौ विहाय हिमाचलस्मरणेनारम्भे का नु साधिका युक्तिरिति। उत्तरमनयोरत्र शास्त्रसमर्थितमेव। हिमाचलोऽपि न नास्त्यत्र नायकः, पताकानायकत्वेन तस्यापि दूरविसर्पिवर्णनात्। न चास्ति निर्बन्धो मुख्येनैवाऽत्र भवितव्यं नायकेनेति।

अस्ति च प्रतिज्ञाऽनयोर्भवे भक्तिरेवास्य प्रतिपाद्यं महाकाव्यस्येति। इदं च विस्पष्टं प्रथमसर्गस्यैवान्तिमाभ्यां मङ्गलपद्याभ्याम्—‘नारायणक्ष्मादेवस्य कृतौ गिरीशगिरिजाभक्तिवृद्धोदय’ इति, ‘गिरिसुतापादाब्जभक्तिः’ इति च। प्रथमस्य सर्गस्य सारसर्वस्वं कियता कौशलेन नारायणो न्यबन्ध्नादिति तस्य ‘सर्गोऽयं प्रथमो गुणैश्च गिरिजालावण्यसारं परं यस्मिन् वर्णयति स्म कर्णमधुरैर्वर्णैः कविग्रामणी’रिति पद्येन स्पष्टम्। एवमेव प्रत्येकं सर्गस्यान्ते नारायणस्येयमेव भक्तिमती वाक्। ८.९१ टीकयोस्तु भक्तिरियं विवृततमत्वेनोपास्थापि द्वाभ्यामपि सहृदयशिरोमणिभ्यां टीकितृभ्याम्। अयञ्चात्र विशेषो यद् भगवती पार्वत्येव कुमारं जनयितुं हिमाचलगेहे जनिमगृह्णादिति। अरुणाचलनाथापेक्षया नारायणमत्राधिकश्रमं लभामहे।

धन्यताप्रकाशः

एतस्य विपुलकायस्य महतो ग्रन्थस्य प्रकाशनार्थं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य पूर्वकुलपतिना **प्रो. राममूर्तिशर्मणा**, वर्त्तमानेन च कुलपतिना कविवरेण **प्रो. राजेन्द्रमिश्रेण** दर्शितः समानमान उत्साहः। तेनैव चोत्साहेन परिपूरिता पूर्वप्रक्रियाऽस्यैव विश्वविद्यालयस्य प्रकाशननिदेशकेनाचार्येण **डॉ. हरिश्चन्द्रमणित्रिपाठिमहोदयेन**। एते सर्व्वेऽपि ‘धन्या’ इति वक्तुमुत्सहते मे चेतोधातुः। अथ—

रेवाप्रसादेन सनातनेन
शृङ्गारभक्तेः प्रतिपादनं यत्।
कुमारकाव्ये विवृतिद्वयं तत्
सम्पाद्य विद्भ्यः प्रतिपाद्यतेऽद्य॥

इति शमिति विनयः।

रेवाप्रसादस्य द्विवेदिनः

०९.१०.२००२, बुधः
काशी।

।। श्रीः ।।

महाकविकालिदासप्रणीतं

कुमारसम्भवम्

।। प्रथमः सर्गः ।।

अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य*
स्थितः पृथिव्या इव मानदण्डः।।१।।

प्रकाशिका

समस्तागमसंवेद्यं समस्तागमकारणम्।
शरण्यं सर्वलोकानां प्रपद्येऽहं कपर्दिनम्।।१।।

यः काव्ये पदवाक्यशक्त्यवगमो योऽलङ्क्रियास्वागमो
या नानाविधवेद्यवस्तुविषये प्राप्तप्रतिष्ठा मतिः।
यश्चायं रसभावमेलनगुणप्राधान्यबोधोदय-
स्तत् सर्वं भवपादपङ्कजरजःसम्पर्कजं मन्महे।।२।।

रघुवंशे महाकाव्ये विमृश्य रससम्पदम्।
कालिदासकवीन्द्रस्य ज्ञातास्वादेन सूक्तिषु।।३।।

अरुणाचलनाथेन द्विजपादाब्जसेविना।
कुमारसम्भवाख्येऽपि मया टीका वितन्यते।।४।।

वर्ण्यते शिवयोर्वृत्तं कालिदासस्य सूक्तयः।
व्याख्यातारो वयं चेति मन्ये कोऽप्युत्सवः सताम्।।५।।

---

* 'वारिविधि विगा॰' नारायणः।

तत्र कविरादौ वस्तुनिर्देशं करोति—

अस्तीति। उत्तरस्यां दिशीति हिमवतो देवभूम्यन्तर्भाव उक्तः। वक्ष्यति च 'पितुः प्रदेशास्तव देवभूमयः' (कुसं. ५.४५) इति। देवतात्मा, न केवलं स्थावरात्मा। इदं तु वक्ष्यमाणचेतनकृत्यविवाहादिघटनार्थम्। नाम प्रसिद्धौ। पूर्वेत्यादि मानदण्डोत्प्रेक्षाङ्गम्। मानं परिच्छेदस्तदर्थो दण्डो मानदण्डः। अन्ये तु पृथिवीमतिव्याप्य स्थितत्वात् तस्याः पृथुत्वाभिमानदम इवेति व्याचक्षते। न त्वेतत् सरसकाव्ययोजनासु युज्यते। ननु कोऽयं वस्तुनिर्देशो नाम। उच्यते। वस्त्वितिवृत्तम्। तत्र च प्राधान्याद् वस्तुशब्देनात्र नायक उच्यते। तस्य प्रधानस्येतरस्य वा निर्देशो वस्तुनिर्देशः। अत्र च घंघणेन 'श्रियः पतिः' इत्युदाहृतं, भोजेन तु हयग्रीववधे 'आसीद् दैत्यो हयग्रीवः' इत्यादि। हिमवांश्चात्र प्रबन्धे पताकानायकः। ननु वस्तुनिर्देशैकोपक्रमेषु काव्येषु शिष्टप्रवाहसिद्धो मङ्गलाचारः कविभिर्नादृतः स्यात्। न। तत्रापि तैः परमेश्वरनमस्कारो मानसः क्रियते। वाचिकस्तु कैश्चिच्चरितार्थम्मन्यतयोपेक्ष्यते, कैश्चित्तु व्याख्यातृश्रोतृजनानुग्रहाय प्रयुज्यते। इह तु हिमवत्कीर्तनान्मङ्गलमप्याचरितमेव॥१॥

विवरणम्

षट्पदमुखरितगण्डं कोटीरभरावबद्धशशिखण्डम्।
प्रणमत वारणतुण्डं पदकमलप्रणतसकलसुरषण्डम्॥१॥

अपारकरुणापूरतरङ्गितदृगञ्चलम्।
कलाय[1]कोमलच्छायं जानकीनायकं भजे॥२॥

सुरारातेर्वक्षःकुहररुधिरक्षोदकपिशैः
स्वतः श्वेतैः सन्ध्याकपिशशशिखण्डांशुसदृशैः।
नखोद्योतैर्भक्तप्रकरहृदयध्वान्तभिदुरा
दया काचिद् दिव्या विलसति पुरश्रेणिविपिने॥३॥

लोकानामुदयस्थितिक्षतिकरी वन्दारुबृन्दारक-
श्रेणीमौलिमणिप्रभारविकरप्रोद्यत्पदाम्भोरुहा।
भाति ब्रह्मखलालये शशिकलाशुम्भज्जटावल्लरी
भक्ताभीष्टविधानकल्पलतिका काचित् कृपावल्लरी॥४॥

---

[1] कलायो मटरपदे प्रसिद्धमन्नम्। तच्च नीलवर्णम् T

अङ्गे तुङ्गशशाङ्कशङ्खधवलं कोटीरभारे परे
बालादित्यकराङ्कुरप्रतिभटं कण्ठे घनश्यामलम्।
सत्त्वादीनपि बिभ्रतं त्रिजगतां रक्षादिसिद्ध्यै गुणा-
नाबद्धाञ्जलि बालचन्द्र[1]निलयं माराारिमाराधये।।५।।

कृष्णो विबुधाधिपतिर्निष्णातो वितरणेषु विद्यायाः।
मुष्णातु हृदयतिमिरं पुष्णातु च मङ्गलानि सकलानि।।६।।

प्राचीनाचार्यकृताः सुविचार्य कुमारसम्भवव्याख्याः।
बालप्रबोधनार्थे ललितं करवाणि विवरणं तस्य।।७।।

प्राचीनसूरिविहिते महति प्रभूते
व्याख्यान्तरे विफल एष परिश्रमो मे।
वाति प्रकामसुभगे मलयाद्रिजाते
वाते फलं किमु करोति मुखानिलोऽयम्।।८।।

व्याख्यैषा तु तथापि प्रदर्शितान्वयपदार्थवाक्यार्था।
विवृतसमासा पठतां गुरुतरमुपकारमारचयेत्।।९।।

व्याख्यान्तरेषु दृष्टेषु विमृष्टेष्वपि तत्त्वतः।
सुभगः शिवदासोक्तो मार्ग एवानुगम्यते।।१०।।

इह खलु महाकविः कालिदासः पार्वतीपरमेश्वरपवित्रचरित्रविचित्रं कुमारसम्भवाभिधानं काव्यं चिकीर्षुः 'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्' इति वचनानुसारेण वस्तुनिर्देशं तावत् करोति—

अस्तीति। ननु काव्ये यत् साध्यं तदनुसारेणैव काव्यसंज्ञा कर्तव्या, यथा युधिष्ठिरविजयजानकीहरणशिशुपालवधप्रभृतीनाम्। अत्र तु तारकासुरनिग्रहः काव्ये साध्यतया निर्दिष्टः, 'तस्मिन् विप्रकृताः काले तारकेण दिवौकसः' (कुसं. २.१) इत्युपक्रमात्। तस्मात् तारकवध इत्येव संज्ञा कर्तव्या। तत्पर्यन्तं च काव्यं प्रवर्तयितव्यम्। न चैतत् कृतम्। तस्मादसमञ्जसमिदं काव्यम्। अपि च कुमारोत्पत्तिपर्यन्तमपि न काव्यं कृतम्। तस्मादनुपपन्नमिदं नामापीति। अत्रोच्यते। नात्र तारकासुरनिग्रहः काव्ये साध्यः। 'तदिच्छामो विभो! सृष्टं सेनान्यं तस्य शान्तये' (कुसं. २.५०) इति देवैः कुमारसृष्टिमात्रस्यैव ब्रह्माणं प्रति प्रार्थितत्वात्। तारकासुरनिग्रहस्तु कुमारोद्भवप्रस्तावकतया निमित्तत्वेनोपक्षिप्तः, यथा किरातार्जुनीये दुर्योधनजयः। तस्मात् कुमारसम्भव इत्येव संज्ञा युक्ता। नचैवं सति तत्पर्यन्तं काव्यं प्रवर्तयितव्यमिति वाच्यम्।

उमारूपेण ते यूयं संयमस्तिमितं मनः।
शम्भोर्यतध्वमाक्रष्टुमयस्कान्तेन लोहवत्।। (कु. सं. २.५९)

---

[1] बालमन्द।

इति ब्रह्मणः प्रतिवचनेन शम्भोश्चित्ताकर्षणमात्रस्यैव परमसाध्यत्वेन प्रतिपादनात्। कारणपौष्कल्ये कार्यस्यावश्यम्भाव एव ब्रह्मणस्तथा निर्देशे हेतुरिति चावगन्तव्यम्। शम्भोश्चित्ताकर्षणं पुनरष्टमे सर्गे विस्तरतः प्रतिपादितम्। यथोक्तमन्त्यश्लोके—

समदिवसनिशीथं सङ्गिनस्तत्र शम्भोः
शतमगमदृतूनां साग्रमेका निशेव।
स न सुरतरसेषुच्छिन्नतृष्णो बभूव
ज्वलन इव समुद्रान्तर्गतस्तज्जलेषु।। इति।

उक्तं च पञ्चमसर्गान्ते देवीं प्रति देवेनैव 'अद्यप्रभृत्यनवमताङ्गि! तवास्मि दासः क्रीतस्तपोभिरि'ति। तस्मादुमारूपेणेत्युपक्रमाद् अद्यप्रभृतीति परामर्शात् समदिवसनिशीथमित्युपसंहाराच्च शम्भोश्चित्ताकर्षणमात्र एव तात्पर्यम्,

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये।। इति वचनात्।

तच्च सम्यक् प्रतिपादितम्। अष्टमसर्गे सम्भोगवर्णनेन कुमारोत्पत्तेर्बिन्दूपक्षेपोऽपि कृत इति सर्वमनवद्यम्। यत्त्वत्र तारकासुरनिग्रहपर्यन्तं चिकीर्षितमिदं काव्यं निजसम्भोगवर्णनेन कुपिताया देव्याः शापादसंपूर्णं जनितमिति कैश्चिदुक्तं, तदप्युक्तया रीत्या परिहृतं वेदितव्यम्। कवेश्चिकीर्षाया एतत्पर्यन्तत्वस्य समर्थितत्वात्। देव्याः शापाभावं पुनरष्टमसर्गादौ निपुणमुपपादयिष्यामः। ननु कुमारसंभव इत्यत्र कः समासः। षष्ठीतत्पुरुष इति ब्रूमः। नचैवं सति कुमारसंभवरूपार्थपरत्वाच्छब्दस्य कुमारसंभवः काव्यमिति सामानाधिकरण्यं न स्यादिति वाच्यम्, अभिधेयेनाभिधायकस्यापि बहुशो व्यपदेशदर्शनात्। यथा जानकीहरणं प्रबन्धः शिशुपालवधः काव्यमित्यादिष्वित्यलमतिप्रसङ्गेन। प्रकृतमेवानुसरामः। उत्तरस्यां दिशि हिमालयः नाम नगाधिराजः अस्ति। उत्तरस्यां दिशीत्यनेन हिमवतो देवभूमिष्वन्तर्भाव उक्तः। वक्ष्यति च 'पितुः प्रदेशास्तव देवभूमयः' (कुसं. ५.४५) इति। उत्तरस्यां दिशि देवभूमयः, दक्षिणस्यां दिश्यसुरभूमयः, मध्ये मनुष्यभूमय इति पुराणप्रसिद्धिः। हिमानां तुषाराणामालयो हिमालयः। नामेति प्रसिद्धिवाचकमव्ययम्। हिमवानिति प्रसिद्ध इत्यर्थः। नगानां पर्वतानामधिराजो नगाधिराजः। अधिराजः श्रेष्ठः। अस्ति भवति। अत्रास्तीति वर्तमाननिर्देशेन परमेश्वरश्वशुरस्यास्य नित्यत्वमुक्तम्। 'आसीदुदीच्यां दिशी'—त्यादिरीत्या विनाशसहधर्मचारिण्या उत्पत्तेरनुपादानात्। वक्ष्यमाणानां चेतनेष्वेवोपपन्नानां विवाहपुत्रोत्पादनादिधर्माणाम् उत्पत्तिं दर्शयन् नगाधिराजं विशिनष्टि देवतात्मेति। देवतास्वरूपः न केवलं स्थावरात्मेत्यर्थः। हिमवत आयामविस्तरादिकं दर्शयति—पूर्वापरौ वारिनिधी विगाह्य

स्थितः। पूर्वमपरं च पूर्वापरौ प्राच्यपश्चिमौ वारिनिधी समुद्रौ विगाह्य सम्प्राप्य स्थितः अवस्थितः। अत एवोत्प्रेक्षते—पृथिव्या मानदण्ड इवेति। पृथिव्या भूमेः मानाय परिच्छेदाय दण्डो मानदण्डः। मानदण्डो हि मेयेन तुल्यपरिमाणो भवति। ननु परमेश्वरो ह्यत्र नायकः। तन्निर्देशाभावे कथमत्र वस्तुनिर्देशः। उच्यते। अत्र पताकावृत्तनायकभूतस्य हिमवतो निर्देशाद् वस्तुनिर्देशः। कथाशरीरं हि वस्तुशब्देनोच्यते। तत्र प्रधानभूतत्वान्नायकोऽपि वस्तु निर्देश्यम्। नायकास्तु प्रधाननायकपताकानायकप्रतिनायकभेदेन त्रिविधाः। तत्र घंघणाचार्यः कथायां प्रधानभूतस्य नायकस्य निर्देशो वस्तुनिर्देश इत्युक्त्वा 'श्रियः पतिः श्रीमति शासितुं जगद्' इत्यादिश्लोकमुदाहृतवान्। भोजराजस्तु हयग्रीववधे काव्ये 'आसीद् दैत्यो हयग्रीव' इत्यादिश्लोकमुदाहृत्य प्रतिनायकनिर्देशस्यापि वस्तुनिर्देशत्वमुक्तवानिति युक्तमत्र पताकानायकनिर्देशस्यापि वस्तुनिर्देशत्वमित्यलमनेन।

न च वस्तुनिर्देशमात्रोपक्रमेषु काव्येषु कविभिः शिष्टाचारसिद्धो मङ्गलाचारः समुपेक्षित इति शङ्कनीयम्, तत्रापि मानसस्य वाचिकस्य वा पारमेश्वरस्य नमस्कारस्य तैरङ्गीकृतत्वात्। अङ्गीकृतत्वे च तेषां शिष्टत्वमेव प्रमाणम्। कैश्चित् तु श्रोतृजनानुग्रहाय स्वग्रन्थेषु निवेश्यत इत्येव विशेषः। इह तु महाकविरादावस्तिपदप्रयोगात् तेनैव परमार्थसतः परमात्मन एव प्रतिपादनाद् देवतात्मनो हिमवतः प्रतिपादनाच्च निष्प्रत्यूहपरिसमाप्त्यादिप्रयोजनं शिष्टाचारसिद्धमिष्टदेवतास्मरणात्मकं मङ्गलमपि कृतवानेवेत्यवसेयम्। अत्र प्रकृतस्य हिमवतस्तुल्यपरिमाणत्वलक्षणसमानधर्मयोगात् पृथिवीमानदण्डत्वेन संभवनादुत्प्रेक्षालङ्कारः। 'सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यद्' इत्युत्प्रेक्षालक्षणम् (काव्यप्रकाशे)।।१।।

यं सर्वशैलाः परिकल्प्य वत्सं
मेरौ स्थिते दोग्धरि दोहदक्षे।
भास्वन्ति रत्नानि महौषधीश्च
पृथूपदिष्टां दुदुहुर्धरित्रीम्।।२।।

प्रकाशिका

अथ,

यत्तदादेरुपादानं क्रियाभ्याससमुच्चयौ।
क्रियासमभिहारश्च वाक्यार्थान् युञ्जते मिथः।।

इति न्यायेन यच्छब्दपरामर्शेन वर्णनावाक्यार्थान् प्रकृतेन योजयति—

यं सर्वशैला इति। पुरा किल पृथुरादिराजः प्रजानां सिद्धये गोरूपां पृथिवीं

तत्तददूदुहत्। तत्र च तेषु वर्गेषु यथोचितं दोग्धारो वत्साश्च परिकल्पिता इति तदनुसारेणेदं वाक्यम्। मेराविति सतिसप्तमीति दक्षिणावर्तः। भोजसूत्रं तु 'क्रियार्हस्य कारकत्वम्' इति सप्तमीविधायकम्। दुदुहुरित्यन्तर्भावितण्यर्थत्वान्मेरोर्दोग्धृत्वं न व्याहतम्। अनेन भुवः साराग्र्यवस्तुपात्रत्वमस्य हिमवतो द्योत्यते। यतो वत्सपीतशेषं दोग्धार उपयुञ्जते। मेरुहिमवतोर्दोग्धृत्ववत्सत्वकरणवद् धरित्र्या गोत्वकरणमपि पृथूपदिष्टामिति विशेषणवशाल्लभ्यते॥२॥

विवरणम्

अथ षोडशभिः श्लोकैरयमेव गिरिवर्यो यच्छब्दवाक्यैरुपवर्ण्यते। न च तत्रत्यानां यच्छब्दानां तच्छब्दाकाङ्क्षा, प्रागेवाध्याहृततच्छब्देन हिमालयशब्देनैवाकाङ्क्षानिवृत्तेः,

यत्तदादेरुपादानं क्रियाभ्याससमुच्चयौ।
क्रियासमभिहारश्च वाक्यार्थान् युञ्जते मिथः॥

इति न्यायात्। तत्रादौ हिमवतः स्वजातिश्रेष्ठत्वमाह—

यमिति। मेरौ दोग्धरि स्थिते सर्वशैलाः यं वत्सं परिकल्प्य धरित्रीं भास्वन्ति रत्नानि महौषधीश्च दुदुहुः। मेरौ महामेरौ दोग्धरि दोहनं कर्तरि स्थिते अवस्थिते। अत्र 'क्रियार्हस्य कारकत्वम्' इति भोजसूत्रेण सप्तमी। अत्र दोहनक्रियार्हस्यैव कारकत्वात्। सर्वशैलाः सर्वे निषधविन्ध्यादयोऽन्ये शैलाः यं हिमवन्तं वत्सं परिकल्प्य वत्सत्वेन कल्पयित्वा धरित्रीं भूमिं भास्वन्ति प्रशस्तशोभायुक्तानि, प्रशंसायां मतुप्, रत्नानि मकतपद्मरागमौक्तिकप्रभृतीन् मणीन् महौषधीः महतीः वीर्ययुक्ताः ओषधीः मृतसञ्जीविनीप्रभृतीः। चकारः समुच्चयार्थः। दुदुहुरित्यत्रान्तर्भूतण्यर्थत्वं द्रष्टव्यम्। अन्यथा मेरोर्दोग्धृत्वनिर्देशानुपपत्तेः। दोहयामासुरित्यर्थः। अत्र दुहेर्द्विकर्मकत्वाद् धरित्र्या रत्नादीनां च कर्मत्वम्। तत्र धरित्र्या 'अकथितं च' (१.४.५१) इति कर्मसंज्ञा। रत्नमहौषधीनां 'कर्तुरीप्सिततमं कर्म' (१.४.४९) इति कर्मसंज्ञा। हिमवतो वत्सत्वनिर्देशाद् दोहनकर्मभूताया धरित्र्याः पशुरूपधारणमितिहासप्रसिद्धमर्थादायातीति तन्नोक्तम्। मेरोर्दोग्धृत्वे हेतुमाह—दोहदक्ष इति। दोहने दक्षे विदग्धे। यो यस्मिन् कर्मणि कुशलस्तं तस्मिन्नेव योजयेदिति हि न्यायविदो वदन्ति। ननु कथं पृथिव्यां तत्र तत्रावस्थितानां रत्नमहौषधीप्रभृतीनां दोहनोपपत्तिः, अत आह—पृथूपदिष्टामिति। पृथुर्नाम नारायणांशभूतो राजा।

वेनो नामाभवद्राजा दुश्शीलो दुष्पराक्रमः।
तं शप्त्वा मुनयो जग्मुः पीडितास्तदुपद्रवैः॥
राजाभावात् ततो जाता धरित्री दुर्जनाकुला।
ततस्ते मुनयः सर्वे सञ्चिन्त्य मनसा हरिम्॥

ममन्थुस्तस्य वेनस्य गतप्राणं कलेवरम्।
तस्मादभून्महातेजा अरणेरिव पावकः।।
नारायणांशसम्भूतः पृथुः पृथुपराक्रमः।

इति भागवतप्रसिद्धायाः पृथूत्पत्तेः संक्षेपः। तेनोपदिष्टाम्। जनानामभीष्टदोहनार्थं त्वयानुकूलया भवितव्यमित्युपदेशप्रकारः। पुरा किल पृथुः क्षुत्क्षामदेहानां प्रजानाम् अन्नपानाद्यभीष्टसिद्ध्यर्थं गोरूपधरामुर्वीं प्रजाभिरात्माभीष्टमर्थं दोहयामास। तत्र तेषु तेषु वर्गेषु यथोक्तं दोग्धारो वत्साश्च परिकल्पिता इति भागवतप्रसिद्धा कथानेन वाक्येनोच्यते। नहि नारायणप्रभावात् किमपि दुर्लभमिति भावः। अत्र हिमवतो वत्सत्वनिर्देशाद् वसुन्धरासारभूतानां रत्नादीनां समृद्धिर्हिमवति द्योत्यते। वत्सनिपीतशेषं दोग्धार उपयुञ्जत इति न्यायात्। अपि च देवादीनामिष्टदोहने महेन्द्रादीनां स्वजातिश्रेष्ठानामेव वत्सत्वं परिकल्पितम्।

सर्वे स्वमुख्यवत्सेन स्वे स्वे पात्रे पृथक् पयः।
सर्वकामदुघां पृथ्वीं दुदुहुः पृथुभाविताः।। (श्री भा.४.१८.२६)

इति भागवतवचनात्। अतो हिमवतः स्वजातिश्रेष्ठत्वमनेन श्लोकेनोच्यते।।२।।

अनन्तरत्नप्रभवस्य यस्य
हिमं न सौभाग्यविलोपि जातम्।
एको हि दोषो गुणसन्निपाते
निमज्जतीन्दोः किरणेष्विवाङ्कः।।३।।

प्रकाशिका

अनन्तेति। रत्नान्युत्तमवस्तूनि तेषां प्रभवो जन्मकारणम्। सौभाग्यमभिगम्यता। सन्निपातो बहूनां समवायः। निमज्जति न्यग्भवति। ननु विशेषस्य सामान्येन समर्थने किमत्र दृष्टान्तेन, यः खलु

यथा रन्ध्रं व्योम्नश्चलजलदधूमः स्थगयति
स्फुलिङ्गानां रूपं दधति च यथा कीटमणयः।
यथा विद्युज्ज्वालोल्लसनपरिपिङ्गाश्च ककुभ-
स्तथा मन्ये लग्नः पथिकतरुषण्डे स्मरदवः।।

इत्यत्र काव्यानुमानेऽपि कार्कश्यभयात् तर्कानुमान इव न प्रयुज्यते। तत्र ह्यप्रतीतप्रतीत्युत्पादनं क्रियते। अर्थान्तरन्यासे तु प्रतीतोपपादनम्। न च क्वचिदीदृशे विषये दृष्टान्तो दृश्यते। न च वाच्यं,

गुणानामेव दौरात्म्याद् धुरि धुर्यो नियुज्यते।
असञ्जातकिणस्कन्धः सुखं स्वपिति गौर्गडिः॥

इत्यत्र सामान्यस्य समर्थको यो विशेषः, स दृष्टान्त एव, एवमिहापि दृष्टान्तोऽस्त्विति। यतस्तत्र स एव समर्थकः प्रकृतायाः सामान्यव्याप्तेः। इह तु प्रकृतस्य विशेषस्य समर्थिका सेति विशेषः। न च तस्या अपि स्थिरीकरणाय दृष्टान्तोऽपेक्ष्यः। न हि काव्ये प्रमाणप्रतिपन्नेनैवार्थेन व्यवहारः, प्रतीतिमात्रस्यैव उपयोगात्। तत् कथमत्र दृष्टान्तः। उच्यते। न तावदयं दृष्टान्तो व्याप्तिविरोधी, किन्त्वतिरिक्त इति शङ्क्यते। न च नैवं शङ्क्यम्। चारुत्वाधानात्। अर्थान्तरन्यासस्य ह्यस्य शृङ्गाराङ्गभूतः स्वभावसुकुमारोऽयं दृष्टान्तश्चारुत्वमाधत्ते। उक्तं च कुन्तकेन—

अलंकारस्य कवयो यत्रालङ्करणान्तरम्।
असन्तुष्टा निबन्धन्ति हारादेर्मणिबन्धनम्॥ इति।

यः पुनर्यच्छब्दवाक्यस्य तच्छब्दवाक्येन साकाङ्क्षत्वादर्थान्तरन्यास-वाक्येनासम्बन्धः कैश्चिच्छङ्कितः, सोऽपि न। यतोऽत्र द्विधाकाङ्क्षा, शाब्दी चार्थी च। तत्र प्रथममर्थस्य स्वभावकृतत्वादन्तरङ्गभूताया आर्थ्या आकाङ्क्षाया अर्थान्तरन्यास-वाक्यान्वयेन निवृत्तौ पश्चादितरान्वयेनेतरा निवर्तते॥३॥

विवरणम्

नन्वस्य सर्वगुणास्पदत्वेऽपि हिमदोषदूषितत्वात् कुतो वैशिष्ट्यम्, अत आह—

अनन्तेति। अनन्तरत्नप्रभवस्य यस्य हिमं सौभाग्यविलोपि न जातम्। अनन्तरत्नप्रभवस्य अनन्तानां निरवधिकानां रत्नानामुत्तमवस्तूनां प्रभवस्य जन्मकारणस्य यस्य हिमवतः हिमं 'तुषारस्तुहिनं हिमम्' इत्यमरः। सौभाग्यविलोपि सौभाग्यम् अभिगम्यतागुणं विलोप्तुं नाशयितुं शीलं यस्य तादृशम्। अत्र रत्नशब्दः स्वजातिश्रेष्ठवाची 'रत्नं स्वजातिश्रेष्ठेऽपी'त्यमरः। उमाख्यस्य कन्यारत्नस्य, वैदूर्यादीनां मणिरत्नानां, देवदारुप्रभृतीनां वृक्षरत्नानां, मृतसञ्जीवनीप्रभृतीनाम् औषधरत्नानां, गङ्गादीनां सरिद्रत्नानां, सोमलताप्रभृतीनां यज्ञद्रव्यरत्नानां च प्रभवस्य जन्मकारणभूतस्य यस्य हिमदोष एको रमणीयतामपहन्तुं न शशाकेत्यर्थः। उक्तमर्थमर्थान्तरन्यासेन समर्थयते—एको दोषो गुणसन्निपाते निमज्जति हि। एकः असहायो दोषः गुणसन्निपाते एकत्र समवाये निमज्जति न्यग्भवति, तिरस्कृतो भवतीत्यर्थः। हिशब्दः प्रसिद्धौ। 'हि हेतौ च प्रसिद्धौ च' इति भोजः। अत्र स्वभावसुकुमारं दृष्टान्तमुपन्यस्यति—इन्दोः किरणेषु अङ्क इव। इन्दोश्चन्द्रस्य किरणेषु रश्मिषु अङ्कः कलङ्क इव। 'कलङ्काङ्कौ लाञ्छनं च चिह्नं लक्ष्म च लक्षणमि'त्यमरः। न चात्रार्थान्तरन्यासस्य तर्कसमय इव दृष्टान्तेन समर्थनं, न

शृङ्गाराङ्गमिति शङ्कनीयम्। अत्र दृष्टान्तस्य विशेषतश्चारुत्वाधानमात्रपरत्वादिति। यथाह कुन्तकाचार्यः—

> अलङ्कारस्य कवयो यत्रालङ्करणान्तरम्।
> असन्तुष्टा निबध्नन्ति हारादेर्मणिबन्धवत्॥ इति। (वजी. १.३५)

अनेन श्लोकेनाभिगम्यत्वगुणयोगित्वं हिमवतः समर्थितम्। अत्र एको हि दोष इत्यत्र विशेषस्य सामान्येन समर्थनादर्थान्तरन्यासः।

> सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।
> यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा॥ (काव्यप्रकाशे)

इति तस्य लक्षणम्। इन्दोः किरणेष्विवाङ्क इत्यत्र तूपमा। 'साधर्म्यमुपमा भेद' [काव्यप्रकाशे] इति तल्लक्षणम्। अत्र तु तयोः संयोगरूपेणावस्थानात् संसृष्टिरलङ्कारः। 'एषां तिलतण्डुलन्यायेन मिश्रत्वे संसृष्टिः' इति तल्लक्षणम्। वस्तुतस्तु विकस्वरालङ्कार एव। यत्र कस्यचिद्विशेषस्य समर्थनार्थं सामान्यं विन्यस्य तत्प्रसिद्धावप्यपरितुष्यता कविना तत्समर्थनाय पुनर्विशेषान्तरमुपमारीत्या अर्थान्तरन्यासविधया वा विन्यस्यते, तत्र विकस्वरालङ्कारः। 'यस्मिन् विशेषसामान्यविशेषाः स विकस्वरः' इति च [चन्द्रलोके]तल्लक्षणम्॥३॥

यश्चाप्सरोविभ्रममण्डनानां
सम्पादयित्रीं शिखरैर्बिभर्ति।
बलाहकच्छेदविभक्तरागा-
मकालसन्ध्यामिव धातुमत्ताम्॥४॥

प्रकाशिका

यश्चेति। चो वाक्यार्थसमुच्चये। विभ्रमेति विलासेन क्रियमाणानां मण्डनानां तदुपकरणीभावेन सम्पादयित्रीम्। वलाहकच्छेदाः सन्ध्यावायुना विच्छिन्ना मेघाः। यदुक्तं रघुवंशेऽपि 'दिनान्तमुग्रानिलभिन्नमेघम्' (१६.११) इति। तेषु विभक्तः संक्रमितः स्वरूपभूतो रागो यया। अकालसन्ध्यामादित्यास्तमयकालव्यतिरिक्तकालभवां सन्ध्याम्। धातुमत्तां धातुसम्पदम्। अत्र शिखरप्रतिवस्तुभूतवलाहकच्छेदविभक्तरागया अकालसन्ध्यया शिखरगता धातुसम्पदध्यवसीयते, न तूपमीयते, सिद्धेनैवोपमानेन भवितव्यमिति। अयं च विवेको रघुवंशप्रकाशिकायां विस्तरेणास्माभिः कृतः, तत एवावधार्यताम्। दक्षिणावर्तस्तु 'विभ्रमस्त्वरयाकाले भूषास्थानविपर्यय' इति लक्षणानुसारेण विभ्रमशब्दं व्याख्याय यस्य शिखरलग्नां

धातुमत्तामालोक्याकाले सायंसन्ध्याभ्रमेण त्वरमाणाः सायन्तनमण्डनमयथायथमप्सरसः कुर्वन्तीत्यभिप्राय इति व्याचष्ट। न चैतद् युक्तम्। स ह्यर्थो विभ्रमशब्दस्य शास्त्रव्यवहार एव। लोके तु विलासपर्यायो विभ्रमशब्दः। यथा 'विव्वोकैर्बकसहवासिनां परोक्षैरि'त्यत्र विव्वोकदशब्दः। तदर्थत्वे मण्डनशब्दश्चातिरिक्तः। न च तासां तथा भ्रमः केनचिच्छब्देनोक्तः, यथा—

कपाक्ते मार्जारः पय इति कराँल्लेंढि शशिन-
स्तरुच्छिद्रप्रोतान् विसमिति करी सङ्कलयति।
रतान्ते तल्पस्थान् वसनमिति गृह्णाति वनिता
प्रभामत्तश्चन्द्रो जगदिदमहो विप्लवयति।।

इत्यत्र, येन तासामयथायथं मण्डनमुपपद्यते। न च कविकर्तृका तत्सम्भावना तदुपपादयितुमलं, व्यधिकरणत्वात्। यदप्यत्रान्यदवकरप्रायमस्य व्याख्यानं, तद् विस्तरभयान्नोद्भाव्य दूषितम्।।४।।

विवरणम्

अथ शृङ्गाराङ्गभूताङ्गरागास्पदत्वेनाप्यस्य सर्वपर्वतोत्कर्षमाह—

यश्चेति। यः शिखरैः धातुमत्तां बिभर्ति च। यो हिमवान् शिखरै शृङ्गैः 'कूटोऽस्त्री शिखरं शृङ्गमि'त्यमरः। धातुमत्तां धातुसम्पदमित्यर्थः। बिभर्ति दधाति। चकारः पूर्वोक्तगुणग्रामसमुच्चयार्थः। धातुसम्पदां रमणीयत्वमाह—अप्सरोविभ्रममण्डनानां सम्पादयित्रीमिति। अप्सरसाम् अप्सरःस्त्रीणां विभ्रमेण विलासेन 'विभ्रमः सम्भ्रमे भ्रान्तौ शोभायां चे'ति वैजयन्ती। क्रियमाणानां मण्डनानामलङ्काराणां सम्पादयित्रीं स्वयमेव तदुपकरणतां सम्प्राप्य सम्पादयित्रीम्। अनेन विशेषणेन धातुसम्पदामप्रयाससाध्यत्वाद् अन्यालङ्कारसाधनेभ्यो व्यतिरेको दर्शितः। तादृशीं धातुसम्पदामुत्प्रेक्षते—वलाहकच्छेदविभक्तरागामकालसन्ध्यामिवेति। वलाहकच्छेदेषु छिन्नेषु वलाहकेषु। अत्र छेदशब्देन छिन्नं द्रव्यं लक्ष्यते। कार्यकारणभावश्च सम्बन्धः। छेदस्य तात्कालिकत्वप्रतिपादनेन मनोहारित्वप्रतीतिः फलम्। सन्ध्यावायुना विच्छिन्नेषु मेघेष्वित्यर्थः। उक्तं च रघुवंशे 'दिनान्तमुग्रानिलभिन्नमेघम्' (१६.११) इति। विभक्तस्तादात्म्येन सङ्क्रमितो रागो यया ताम् अकालसन्ध्याम् आदित्यास्तमयकालव्यतिरिक्तकालसम्भवां सन्ध्यामिव। अत्र शिखरस्थानीयानि वलाहकशकलानि, अकालसन्ध्या तु धातुसम्पत्स्थानीयेति विवेकः। धातुसम्पदां रागातिशय उत्प्रेक्षाहेतुः। गोरोचनाद्यलङ्कारान्तरानादरप्रतीतिः फलम्।।४।।

पदं तुषारस्रुतिधौतरक्तं
यस्मिन्नदृष्ट्वापि हतद्विपानाम्।
विदन्ति मार्गं नखरन्ध्रमुक्तै-
र्मुक्ताफलैः केसरिणां किराताः॥५॥

प्रकाशिका

पदमिति। पदमङ्घ्रिविन्यासप्रतिबिम्बम्। तस्य तुषारस्रुतिधौतरक्तत्वाददर्शनम्। कुटिलत्वात् सरन्ध्रेषु नखेषु लग्नानां मुक्तानां पदविन्यासवशाद् गलनमित्यवसेयम्। अत्र मुक्तासंपदुदात्तमलङ्कारः॥५॥

विवरणम्

सत्स्वपि सर्वेषु रत्नेषु हिमवति मुक्ताफलानां प्राचुर्यमाह—

पदमिति। किराताः यस्मिन् हतद्विपानां केसरिणां पदम् अदृष्ट्वापि नखरन्ध्रमुक्तैःमुक्ताफलैः मार्गं विदन्ति। किराता वनेचरा यस्मिन् हिमवति हतद्विपानां हताः निहताः द्विपाः गजाः यैः तेषां केसरिणां सिंहानां 'सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिरि'त्यमरः। पदम् अङ्घ्रिविन्यासप्रतिबिम्बम्। 'पदमङ्घ्रौ' इत्यारभ्य 'चिह्नेऽङ्घ्रिविन्यासे' इति **केशवः**। अदृष्ट्वा अनवलोक्यापि। अपिशब्दो विरोधमाह। नखरन्ध्रमुक्तैः नखानां रन्ध्रेभ्यो मुक्तैर्गलितैः। सिंहनखानां सरन्ध्रत्वं प्रसिद्धम्। मुक्ताफलैर्मौक्तिकैः मार्गं पन्थानं केसरिणामित्यनुषज्यते। विदन्ति जानन्ति। शोणिताक्तस्य पदस्यानवलोकने हेतुमाह—तुषारस्रुतिधौतरक्तमिति। तुषारो हिमम् 'तुषारस्तुहिनं हिमम्'इत्यमरः। तस्य स्रुतिभिः आस्रवैः धौतं क्षालितं रक्तं शोणितं यस्मिंस्तत्। अयमभिप्रायः—सर्वेषु हि पर्वतेषु हतगजानां सिंहानां शोणिताक्तानङ्घ्रिप्रतिबिम्बानवलोक्य किरातास्ताननुगच्छन्ति। हिमवति पुनः शोणितानामनवरतस्रुतहिमजलसंक्षालितत्वात् तादृशान् पदविन्यासानवलोक्यानुगन्तुमसमर्था अपि कुटिलेषु सरन्ध्रेषु नखेषु गजमस्तकेभ्यो लग्नानां मुक्ताफलानां पदविन्यासवशात् क्रमेण गलितत्वात् तान्येवावलोक्य सिंहानां मार्गमनुगच्छन्तीति। मौक्तिकानामुत्पत्तिर्गजेन्द्रेभ्योऽप्यस्तीत्युक्तम**गस्त्येन**—

द्विपेन्द्रजीमूतवराहशङ्खमत्स्याहिशुक्त्युद्भववेणुजानि।
मुक्ताफलानि प्रथितानि लोके तेषां तु शुक्त्युद्भवमेव भूरि॥ इति।

अत्रोदात्तमलङ्कारः, दर्शनसमय एवादाय रक्षितव्यानां मौक्तिकानां सिंहमार्गप्रदर्शनोपक्षीणत्वप्रतिपादनेन मुक्तासम्पदामुपादानात्। 'उदात्तं वस्तुनः संपद्' इति तल्लक्षणम्॥५॥

आमेखलं सञ्चरतां घनानां
छायामधःसानुगतां निषेव्य।
उद्वेजिता वृष्टिभिराश्रयन्ते
शृङ्गाणि यस्यातपवन्ति सिद्धाः॥६॥

प्रकाशिका

आमेखलमिति। अभिविधावाङ्। अद्रेर्मध्यसानुप्रदेशेष्वित्यर्थः। सिद्धाः प्राप्ताष्टगुणैश्वर्या विश्वावसुप्रभृतयो देवयोनयः। छायाया निषेवणं ग्रीष्म आतपोद्वेगाद्, यथा वर्षासु वृष्ट्युद्वेगादातपस्य॥६॥

विवरणम्

हिमवतः सर्वकालरमणीत्वमाह—

आमेखलमिति। सिद्धाः आमेखलं संचरतां घनानां छायाम् अधस्सानुग[1]ताः निषेव्य वृष्टिभिः उद्वेजिता यस्य शृङ्गाणि आश्रयन्ते। सिद्धाः संप्राप्ताष्टैश्वर्या विश्वावसुप्रमुखा देवयोनयः। आमेखलम्, अभिविधावाङ्। मेखला मध्यसानुप्रदेशः। तत्रैव सञ्चरतामित्यर्थः। घनानां मेघानां छायाम् अनातपम्। 'छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातप' इत्यमरः। अधस्सानुगताः अधोभागे ये सानवः प्रस्थाः 'स्नुः प्रस्थः सानुरस्त्रियाम्' इत्यमरः। तान् गताः प्राप्ताः सन्तः उष्णबाधानिवृत्तिपर्यन्तं नितरां सेवित्वा। छायानिषेवणे पूर्वमातपोद्वेजितं हेतुरिति द्रष्टव्यम्। पुनश्च वृष्टिभिरुद्वेजिताः पीडिताः सन्तो यस्य हिमवतः शृङ्गाणि शिखराणि आश्रयन्ते सेवन्ते। हिमवच्छिखरेषु वर्तमाना गन्धर्वादयः पूर्वमातपोद्वेजिताः किंचित्कालमधोवर्तिनो भूत्वा छायासुखमनुभूय पुनश्च शीतबाधायां जयमानायां शृङ्गप्रदेशमेवाश्रयन्त इत्यर्थः। शृङ्गनिषेवणे हेतुमाह—आतपवन्तीति। प्रशंसायां मतुप्। प्रशस्तातपयुक्तानीत्यर्थः। प्रशस्तत्वं च सद्य एव शीतबाधकत्वात्। अत्र पर्वतवर्तिनां जनानां छायातपयोर्यथेष्टनिषेवणप्रतिपादनेनातिक्रान्तमेघमार्गत्व-प्रतिपादनेन चास्य सर्वकालरमणीयत्वमौन्नत्यं चोक्तम्। अत्र काव्यलिङ्गमलङ्कारः। वृष्टिभिरुद्वेजिता इति पदद्वयस्य आतपवन्तीति पदस्य च शृङ्गनिषेवणे हेतुत्वेनोपादानात्। 'काव्यलिङ्गं हेतोर्वाक्यपदार्थता' इति [काव्यप्रकाशे] तल्लक्षणम्। अयमलङ्कारः प्रायेण सार्वत्रिकः॥६॥

---

[1] गताः N

न्यस्ताक्षरा धातुरसेन यत्र
भूर्जत्वचः कुञ्जरबिन्दुशोणाः।
व्रजन्ति विद्याधरसुन्दरीणा-
मनङ्गलेखक्रिययोपयोगम्।।७।।

प्रकाशिका

न्यस्ताक्षरा इति। कुञ्जरा इव बिन्दुशोणाः। 'उपमानानि सामान्यवचनैः' (२.१.५५) इति समासः। कुञ्जरेषु पद्मकाख्यं बिन्दुजालकम्। 'बिन्दुः पद्मकं बिन्दुजालकम्' इति सिंहः। भूर्जत्वक्षु धातुद्रवबिन्दुर्बिन्दुः। कुञ्जरस्थानीया भूर्जत्वचः। बिन्दुजालकस्थानीया धातुद्रवविहिताक्षरबिन्दवः। अनङ्गसूचकं पत्रमनङ्गलेखः तस्य क्रियया करणेन उपयोगमङ्गभावम् अर्थात् प्रियतमाह्वानादौ। विद्याधराः खड्गगुलिकाञ्जनादिविद्याधारिणो जीमूतवाहनादयः।।७।।

विवरणम्

अथ शृङ्गाराङ्गभूतपदार्थसमृद्धिरस्मिन् पर्वते चतुर्भिः श्लोकैरुपवर्ण्यते। तत्रादौ प्रियतमानयनादौ यदुपकरणं, तस्य समृद्धिमाह—

न्यस्ताक्षरेति। यत्र भूर्जत्वचः विद्याधरसुन्दरीणाम् अनङ्गलेखक्रियया उपयोगं व्रजन्ति। भूर्जत्वचः मृदुतरास्तद्देशसुलभा वृक्षत्वग्विशेषाः। 'भूर्जपत्रो भुजो भूर्जो मृदुत्वक् चर्मचर्मिका' इति यादवः। विद्याधरसुन्दरीणां विद्याधरस्त्रीणाम् अनङ्गसूचकं पत्रम् अनङ्गलेखः तस्य क्रियया करणेन उपयोगम् अङ्गभावं प्रियतमाह्वानादावित्यर्थात् सिध्यति। सर्वत्र हि तालीपत्रादौ आत्मनः सन्देशान् विलिख्य कामिन्यः कामुकेभ्यः प्रयच्छन्ति, हिमवति तु भूर्जत्वक्ष्विति भावः। तेन च मनोहरतराणां भूर्जत्वचां सुन्दरीणां च निरवधिकत्वं ध्वन्यते। उपयोगप्रकारमाह—धातुरसेन न्यस्ताक्षरा इति। धातुरसो धातुद्रवः तेन न्यस्तानि लिखितान्यक्षराणि यासु तास्तथा। गैरिकरसविलिखिताक्षरा इत्यर्थः। अत एव कुञ्जरबिन्दुशोणाः कुञ्जरा इव बिन्दुशोणाः। 'उपमानानि सामान्यवचनैः' (२.१.५५) इति समासः। बिन्दुभिः शोणाः बिन्दुशोणाः। कुञ्जरेषु बिन्दवः पद्मकानि। 'पद्मकं बिन्दुजालकम्' इत्यमरः। भूर्जत्वक्षु धातुद्रवबिन्दवः। अनेन विशेषणेन परभागदर्शनीयत्वमपि भूर्जत्वचां प्रतिपादितम्।।७।।

यः पूरयन् कीचकरन्ध्रभागान्
दरीमुखोत्थेन समीरणेन।
उद्गास्यतामिच्छति किन्नराणां
तानप्रदायित्वमिवोपगन्तुम्।।८।।

प्रकाशिका

य इति। कीचका वेणवः। 'वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः' इति सिंहः। किन्नरा अश्वमुखा देवगायना इति दक्षिणावर्तः। तत्र निरूप्यते। 'बिम्बोष्ठं बहु मनुते तुरङ्गवक्त्रश्चुम्बन्तं मुखमिह किन्नरं प्रियायाः' (४.३८) इत्यत्र माघप्रयोगे अश्वमुखादन्यः किन्नर इति प्रतीयते। भट्टमयूरप्रयोगे तु

मार्गोपान्ते सुमेरोर्नुवति कृतनतौ नाकधाम्नां निकाये
वीक्ष्य व्रीलावतीनां प्रतिकुहरमुखं किन्नरीणां मुखानि।
सूतेऽसूयत्यपीषज्जलगति वहतां कन्धरार्धैर्वलद्भि-
र्वाहानां व्यस्यताद्वः सममसमहरेर्हेषितं कल्मषाणि।।

इत्यत्राश्वमुखः किन्नर इति प्रतीयते। अत्र हि कुहरस्थानां तासां मुखमात्रदर्शने वाहानां स्वजातिभ्रमादभिलाषः, 'नान्ययोनिषु गन्धर्वा मनः कुर्वन्ति सङ्गम' इति वचनात्। तस्मादश्वमुखानश्वमुखभेदेन द्विधा किन्नरजातिः। सा च मुखमात्रे तद्व्यतिरिक्तगात्रमात्रे च नराकृतित्वात् किन्नरकिंपुरुषशब्दाभ्यां वितर्कव्युत्पादिताभ्यामुच्यत इत्यवसेयम्। तानो नामोद्गातव्यस्य स्वरादेरियत्तापरिच्छेदः। स चांशस्वर उच्यते। अत्राभिनवगुप्तः—

द्विकत्रिकचतुष्काः स्युर्ज्ञेया वंशगताः स्वराः।
अधोऽधस्तारतां प्राप्तास्तानस्त्वंशस्वरो मतः।। इति।

अंशस्वरलक्षणे भरतः—

रागोऽस्मिन् निवसति यस्माच्चापि प्रवर्तते।
नेता च तारमन्द्राणां योऽत्यर्थं चोपलभ्यते।।

ग्राहोपन्यासविन्याससंन्याससन्यासगोचरः।
अनुवृत्तश्च यश्चेह सोंऽशः स्याद् दशलक्षणः।। इति।

तानप्रदानं च वंशेनैव कार्यम्। 'गाता यं यं स्वरं गच्छेत् तं तं वंशेन वादयेदि'ति भरतः। अत्र सर्वो वाक्यार्थ उत्प्रेक्ष्यते। ननु पूरणादेर्वास्तवस्य किमुत्प्रेक्षया। न। गिरेस्तत्र तावत् पूरणव्यापारासम्भवः। तत एव च तत्कारक-

वर्गस्याप्यसंभवः, क्रियापेक्षित्वात् कारकाणाम्। ततस्तत्सर्वमुत्प्रेक्षाप्राणकम्। तामेव च दरीमुखेति रूपकमुपस्करोति। यथा 'पिनष्टीव तरङ्गाग्रैरुदधिः फेनचन्दनम्' इत्यत्र। एवं तत्कर्तृकायामिच्छायां तदङ्गभूतपदार्थवर्गे चोत्प्रेक्षा। तर्हीवशब्दः केनान्वयमुपेयात्। प्रधानभूतेनेच्छतिना। प्रधानभूततदर्थोत्प्रेक्षयैव। सामर्थ्यादितरोत्प्रेक्षासिद्धेः। यथाह महिमा—

एकत्रोत्प्रेक्षितत्वेन यत्रार्था बहवो मताः।
तत्रेवादिः प्रयोक्तव्यः प्रधानादेव नान्यतः।। (व्यक्तिविवेके पृ. ४५०)

इति।।८।।

विवरणम्

उद्दीपनसद्भावमप्याह—

य इति। यः दरीमुखोत्थेन समीरणेन कीचकरन्ध्रभागान् पूरयन् उद्गास्यतां किन्नराणां तानप्रदायित्वम् उपगन्तुम् इच्छतीव। यो हिमवान् दरीमुखोत्थेन दर्येव मुखं दरीमुखं, दरी गुहा। तस्या मुखत्वारोपो वंशपूरणोत्प्रेक्षासिद्ध्यर्थम्। दरीमुखादुत्तिष्ठतीति दरीमुखोत्थः। 'आतश्चोपसर्गे' (३.१.१३६) इति कर्तरि कः। 'उदःस्थास्तम्भोरि' (८.४.६१)ति पूर्वसवर्णश्च। तेन समीरणेन वायुना कीचकानां सरन्ध्राणां वेणूनां, 'वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धता' इति सिंहः। रन्ध्रभागान् रन्ध्रप्रदेशान्। 'भागः प्रदेशे शकले भागधेये च कथ्यते' इति भोजः। पूरयन् सन् उद्गास्यताम्। 'लृटः सद्वा' (३.३.१४) इति लृटः शत्रादेशः। उच्चैर्गानं करिष्यतामित्यर्थः। तानप्रदानस्य गानारम्भात् पूर्वमेव कर्तव्यत्वनियमा-दुद्गास्यतामित्युक्तं, त तूद्गाय तामिति। किन्नराणां किम्पुरुषाणाम्। अश्वमुखा अनश्वमुखाश्चेति द्विविधाः किन्नराः। अश्वमुखाः मुखव्यतिरिक्तेषु गात्रेषु नराकृतयः। अनश्वमुखास्तु मुखे नराकृतयः इतरत्र पश्वाकृतयः। अत एव नरः किमयं, पुरुषः किमयमिति शङ्काजनकत्वादुभे च जाती किन्नरकिम्पुरुषाभ्यामुच्येते इति विवेकः। अत एव माघेन द्विविधा किन्नरजातिरुक्ता।

बिम्बोष्ठं बहु मनुते तुरङ्गवक्त्र-
श्चुम्बन्तं मुखमिह किन्नरं प्रियायाः।
श्लिष्यन्तं पुनरितरोऽपि तं
निजस्त्रीमुत्तुङ्गस्तनभरभङ्गभीरुमध्याम्।। इति। (४.३८)

तानप्रदायित्वं तानं प्रदातुं शीलमस्येति तानप्रदायी, तस्य भावस्तत्त्वम्। उद्गातव्यस्य स्वरादेरियत्तापरिच्छेदस्तान इत्युच्यते। स एवांशस्वर इति च व्यपदिश्यते। यथोक्तमभिनवगुप्तेन—

द्विकत्रिकचतुष्काः स्युर्ज्ञेया वंशगताः स्वराः।
अधोऽधस्तारतां प्राप्तास्तानस्त्वंशस्वरो मतः॥ इति।

अंशस्वरलक्षणं च भरतेनोक्तं—

रागो यस्मिन्निवसति यस्माच्चापि प्रवर्तते।
नेता च तारमन्द्राणां योऽत्यर्थं चोपलभ्यते॥
ग्रहोपन्यासविन्यासससंन्यासन्यासगोचरः।
अनुवृत्तश्च यश्चेह सोंऽशः स्याद् दशलक्षणः॥ इति।

तदुपगन्तुं प्राप्तुमिच्छतीव। तानप्रदानं च वंशेनैव कर्तव्यमित्याह भरतः—'गाता यं यं स्वरं गच्छेत् तं तं वंशेन वादयेदि'ति। अत एव रघुवंशे वंशकृत्यमित्युक्तं 'स कीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिरापादितवंशकृत्यम्' (२.१२) इति। यथा केषुचिद् गातुमारब्धेषु गानारम्भात्पूर्वं कश्चिन्मुखमारुतेन वेणुसुषिरं पूरयन् गेयानां स्वराणाम् इयत्तापरिच्छेदं करोति, तथायमपि कर्तुमिच्छतीवेति क्रियोत्प्रेक्षा। यद्यप्यत्र मुखमारुतेन वेणुरन्ध्रपूरणादिकं सर्वमप्युत्प्रेक्षितमेव, तथाप्ययमिवशब्दः प्रधानभूतेनेच्छतिनैवान्वयमुपेयात्। तदन्वये च सामर्थ्यादितरोत्प्रेक्षापि सिध्यति। यथाह महिमा—

एकत्रोत्प्रेक्षितत्वेन यत्रार्था बहवो मताः।
तत्रेवादिः प्रयोक्तव्यः प्रधानादेव नान्यतः॥ इति।

गानादीनामुद्दीपनत्वं प्रसिद्धम्। उक्तं च शाकुन्तले—'रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान् पर्युत्सुकीभवति यत् सुखितोऽपि जन्तुः' (५.२) इति। अत्र दरीमुखोत्थेनेत्यत्र रूपकमलङ्कारः। 'तद् रूपकमभेदो य उपमानोपमेययोः' इति तल्लक्षणम्। तदेव रूपकमुत्प्रेक्षाणामभिव्यञ्जकम्। तस्मादत्र सजातीयानामुत्प्रेक्षाणां विजातीयस्य रूपकस्य च परस्परार्थापेक्षत्वादङ्गाङ्गिभावलक्षणः सङ्करः। 'अविश्रान्तिजुषामात्मन्यङ्गाङ्गित्वं तु सङ्करः' इति तल्लक्षणम्॥८॥

कपोलकण्डूः करिभिर्विनेतुं
विघट्टितानां सरलद्रुमाणाम्।
यत्र स्रुतक्षीरतया प्रसूतः
सानूनि गन्धः सुरभीकरोति॥९॥

प्रकाशिका

कपोलकण्डूरिति। विघट्टितानां कपोलकषणेन मृदितानां सरलद्रुमाणां गन्ध इत्यन्वयः॥९॥

विवरणम्

हिमवति सौरभ्यस्याप्यप्रयाससाध्यत्वमाह—

कपोलेति। यत्र करिभिः कपोलकण्डूः विनेतुं विघट्टितानां सरलद्रुमाणां स्नुतक्षीरतया प्रसूतो गन्धः सानूनि सुरभीकरोति। यत्र हिमवति करिभिः गजैः कपोलकण्डूः कपोलयोः गण्डप्रदेशोः कण्डूः स्रवन्मदजलतया भ्रमराधिष्ठिततया च जनिता गण्डकण्डूतीः विनेतुं शमयितुं विघट्टितानां संघर्षणोन्मृदितानां सरलद्रुमाणां सुगन्धिनिर्यासानां वृक्षविशेषाणां स्नुतक्षीरतया स्नुतानि गलितानि क्षीराणि निर्यासा येभ्यः, तेषां भावस्तत्ता, तया हेतुना प्रसूत उद्भूतः गन्धः सानूनि प्रस्थान् सुरभीकरोति सुगन्धीकरोति। अभूततद्भावे च्विः। प्रस्थशब्देनात्र प्रस्थगताः पदार्था अप्युपलक्ष्यन्ते। यत्र गजैः परिमृदितानां सरलद्रुमाणां गन्धः सौरभ्यरहितानपि पदार्थान् सुरभिलान् करोतीत्यर्थः। सुगन्धानामुद्दीपनत्वमनुभवसिद्धं, 'यथा सन्निधिमात्रेणगन्धः क्षोभाय जायत' इत्यादिवचनसिद्धं च॥९॥

वनेचराणां वनितासखानां
दरीगृहोत्सङ्गनिषक्तभासः।
भवन्ति यत्रौषधयो रजन्या-
मतैलपूराः सुरतप्रदीपाः॥१०॥

प्रकाशिका

वनेचराणामिति। 'तत्पुरुषे कृति बहुलम्' (६.३.१४) इत्यलुक्। इदं विशेषोक्तावुदाहृतं वामनेन। अस्मन्मते तु रूपकविशेष एवायम्॥

विवरणम्

रतिप्रदीपानामप्यप्रयाससाध्यत्वमाह—

वनेचराणामिति। यत्र ओषधयः रजन्यां वनितासखानां वनेचराणाम् अतैलपूरा सुरतप्रदीपाः भवन्ति। यत्र हिमवति ओषधयः रात्रावुज्ज्वला वृक्षविशेषाः रजन्यां रात्रौ वनितानां सखायो वनितासखाः तेषाम्। षष्ठीतत्पुरुष एवात्र समासः। बहुव्रीहिविवक्षायां तु समासप्रत्ययो न स्यात्। स्त्रीसहितानामित्यर्थः। अनेन विशेषणेन सुरतप्रदीपानामुचितत्वमुक्तम्। वने चरन्तीति वनेचराः तेषाम्। 'तत्पुरुषे कृति बहुलम्'(६.३.१४) इत्यलुक्। अतैलपूरा तैलानां स्नेहानां पूरेण रहिताः। तैलनिषेकनिरपेक्षा इत्यर्थः। अनेनाप्रयाससाध्यत्वमुक्तम्। मध्ये विनाशाभावादयश्च द्योत्यन्ते। सुरतोपयोगिनः प्रदीपाः सुरतप्रदीपाः। सुरतगृहे दीपस्याप्यावश्यकत्वमुक्तं रतिरहस्ये—

प्रसृतसुरभिधूपे पुष्पदामावकीर्णे
ज्वलितमहितदीपे धाम्नि कामी सुवेषः।
सह सहचरवर्गैर्वामभागे निवेश्य
स्त्रियमुपहितभूषां भावयेन्नर्मगोष्ठीम्।। इति।

ओषधीनां रतिप्रदीपत्वरूपणे हेतुमाह—दरीगृहोत्सङ्गनिषक्तभास इति। दर्यो गुहाः, ता एव गृहा दरीगृहाः, तेषाम् उत्सङ्गेष्वन्तर्भागेषु निषक्ताः नितरां सक्ताः भासः प्रभा यासां तास्तथा। अत्रौषधीनां सुरतप्रदीपत्वेन रूपणात् सुरतप्रदीपानामतैलपूरत्वविशिष्टत्वाच्च सविशेषणं रूपकमलङ्कारः, भोजराजेन रूपकभेदस्य चतुर्धा दर्शितत्वात् 'समस्तं व्यस्तमुभयं सविशेषणमित्यपि' इति।।१०।।

उद्वेजयत्यङ्गुलिपार्ष्णिभागान्
मार्गे शिलीभूतहिमेऽपि यत्र।
न दुर्वहश्रोणिपयोधरार्ता
भिन्दन्ति मन्दां गतिमश्वमुख्यः।।११।।

प्रकाशिका

उद्वेजयतीति। उद्वेजयत्यपीत्यन्वयः। अङ्गुलिपार्ष्णिभागग्रहणं शैत्यभयादसमग्रपादतलार्पणं द्योतयति। अत्र शैत्यदुःखादपि श्रोणिपयोधरदुर्वहत्वदुःखस्य तत्कार्यभूतशीघ्रगतिविरुद्धस्वकार्यसम्पादनेन प्रबलतरत्वमुक्तम्।।११।।

विवरणम्

इत्थमुपवर्णितानामुद्दीपनानां तदनुरूपवनिताजनसद्भावप्रतिपादनेन सोपयोगत्वमाह—

उद्वेजयतीति। यत्र अश्वमुख्यः दुर्वहश्रोणिपयोधरार्ताः मन्दां गतिं न भिन्दन्ति। यत्र हिमवति अश्वमुख्यः किन्नराङ्गनाः दुःखेनोह्यन्त इति दुर्वहाः। कृच्छ्रार्थे खल्। तैः श्रोणिपयोधरैः श्रोण्या जघनस्थलेन पयोधराभ्यां स्तनाभ्यां च आर्ताः पीडिता सत्य इति मन्दगमनपरित्यागाभावे हेतु। मन्दां गतिम् अत्यन्तमन्दं गमनं न भिन्दन्ति नान्यथा कुर्वन्ति, न परित्यजन्तीत्यर्थः। ननु स्त्रियः श्रोणिपयोधरभारान्मन्दमेव गच्छन्ति। अत्र को विस्मयः, यदेवमुच्यत इत्यत्राह—शिलीभूतहिमे मार्गे अङ्गुलिपार्ष्णिभागान् उद्वेजयत्यपीति। शिलीभूतानि शिलात्वं प्राप्तानि हिमानि यस्मिंस्तस्मिन् मार्गे अङ्गुलीः पार्ष्णिभागौ च। गुल्फयोरधोभागः पार्ष्णिशब्देनोच्यते। 'तद्ग्रन्थी घुटिके गुल्फौ पुमान् पार्ष्णिरधस्तयोः' इत्यमरः। उद्वेजयति पीडयति

सत्यपि। अत्रापिशब्दः शीघ्रगमनस्य कारणपौष्कल्यं दर्शयति। अङ्गुलीनां मार्दवाधिक्यात् तासु शैत्यकाठिन्यबाधाया अप्याधिक्यमिति शैत्यादिभयात् पार्ष्णिभागाभ्यां गमनम्। तेन च तत्रापि पीडाधिक्यमिति पार्ष्णिशब्दं प्रयुञ्जानस्याभिप्रायः। अत्र शैत्यादिदुखस्य कार्यं शीघ्रगमनम्। तत्तु श्रोणिपयोधरदुर्वहत्वखेदेन बाध्यत इति श्रोणिपयोधरगौरवातिशयः प्रतिपादितः। तेन च तत्रत्यानां वधूनां सर्वावयवसौन्दर्यं दर्शितम्॥११॥

दिवाकराद् रक्षति यो गुहासु
लीनं दिवा भीतमिवान्धकारम्।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने
ममत्वमुच्चैःशिरसां सतीव॥१२॥

प्रकाशिका

दिवाकरादिति। भीतमिव दिवा गुहासु लीनमित्यन्वयः। क्षुद्रोऽनार्यः। शरणं प्रपन्ने शरणत्वेनात्मानमुपसन्न इत्यर्थः। ममत्वं मदीयमित्यभिमानित्वम्। ममेत्यस्मच्छब्दप्रतिरूपकमव्ययमिति केचित्। अन्ये तु—सर्वेषां प्रायः शब्दानां त्रयोऽर्थाः—स्वरूपं व्यवहार्योऽर्थो बुद्धिश्च। तत्र स्वरूपं यथा—घटशब्दस्य घकारटकारसमुदायः। व्यवहार्योऽर्थो यथा—तस्य पृथुबुध्नोदराकारो मृदादिविकारः। बुद्धिर्यथा—तद्विषया तदाकारा च बुद्धिः। तत्र बुद्ध्यर्थत्वे शब्दशक्तिस्वाभाव्याद् इत्यवच्छिन्नत्वेन वृत्तिगतत्वेन वा केवलं प्रयोगः। यथा घट इति बुद्धिरिति, घटबुद्धिरिति वा, न तु स्वातन्त्र्येण प्रयोगः। तस्मान्ममशब्दस्य ममेति बुद्धिरर्थः, यथा 'निर्मम' इत्यत्र। तया चात्र तद्वाँल्लक्ष्यते। तस्य भावो ममत्वमिति समर्थयन्ते। उच्चैश्शिरसाम् उन्नतानाम्। सति आर्ये। अत्र काव्यप्रकाशकृता दूषितम्। तद्यथा—उत्प्रेक्षितमपि तात्त्विकेन रूपेण परिवर्जितत्वान्निरुपाख्यप्रख्यम्। तत्समर्थनाय यदर्थान्तरन्यासोपादानं, तद्वालेख्यमिव गगनतलेऽत्यन्तमसमीचीनमिति निर्विषयत्वमेव तस्य, अनुचितार्थतैव दोष इत्युक्त्वा इमं तु श्लोक-मुदाहृत्यात्राचेतनस्य तमसो दिवाकरात् त्रास एव न संभवतीति कुत एव तत्प्रयोजितमद्रिणा परित्राणम्। संभावितेन तु रूपेण प्रतिभासमानस्यास्य न काचिदनुपपत्तिरिति व्यर्थ एव तत्समर्थनायां यत्न इति[काव्यप्रकाशान्ते]। तदयुक्तम्। यतः परित्राणं वक्तुं प्रकृतम्। तत्र हेतुत्वेन केवलं भीतिरसंभविनी संभाव्यते। परित्राणं च नासंभवि। तद्धि नाम बाधकनिवारणम्। बाधकश्चात्र तमसोऽर्कालोकः। स च व्यवधीयतेऽस्य पातालकुक्षिकल्पाभिर्गुहाभिरिति॥१२॥

विवरणम्

आश्रितवात्सल्यमप्याह—

दिवाकरादिति। यः अन्धकारं दिवाकराद् रक्षति। यो हिमवान् अन्धकारम् अन्धतमसं दिवाकराद् आदित्याद् रक्षति परित्रायते। रक्षणे हेतुमाह—भीतमिव दिवा गुहासु लीनमिति। भीतं सूर्यालोकात् त्रस्तं सदिव। इवशब्दोऽयमुत्प्रेक्षाद्योतकः। अचेतनेषु भयासंभवात्। हेतूत्प्रेक्षा चेयम्। दिवा अहनि गुहासु कुहरेषु लीनं स्थितं, रविकिरणभयादिव दिवसे सर्वतः प्रदेशात् परावृत्य निजकुहराभ्यन्तरमेवाश्रितमित्यर्थः। उक्तमर्थमर्थान्तरन्यासेन समर्थयते—उच्चैश्शिरसां क्षुद्रेऽपि शरणं प्रपन्ने सतीव ममत्वं नूनम्। उच्चैश्शिरसाम् उन्नतानामित्यर्थः। क्षुद्रे अनार्ये जनेऽपि। अपिशब्दोऽयमनार्यरक्षणस्यायुक्ततां द्योतयति। सन्तमसस्यानार्यत्वं सर्वदृष्टिनिरोधनेनाज्ञानप्रदत्वादित्यवसेयम्। शरणं प्रपन्ने शरणं रक्षिता। 'शरणं गृहरक्षित्रोः' इत्यमरः। तं प्रपन्ने प्राप्ते, त्वमेव रक्षितेत्यात्मानं प्राप्त इत्यर्थः। सति आर्ये जन इव ममत्वं मदीयत्वाभिमानित्वमित्यर्थः। भवतीति शेषः। सज्जनेष्विव दुर्जनेष्वपि शरणं प्राप्तेषु महतां ममत्वमुपपन्नमेवेति भावः। नूनं शब्दोऽयं निश्चयं वदन् प्रसिद्धिं द्योतयति। दिवाकरादित्यत्र 'भीत्रार्थानां भयहेतुः' (१.४.२५) इत्यपादानत्वम्। ममत्वमित्यत्र ममेत्यस्मच्छब्दप्रतिरूपकमव्ययं षष्ठ्यर्थे, तस्य भावस्तत्त्वमिति कैश्चिद् व्याख्यातम्। कैश्चित् पुनरेवं व्याख्यातं—सर्वेषामपि शब्दानां त्रयोऽर्थाः स्वरूपं व्यवहार्योऽर्थो बुद्धिश्चेति। तत्र स्वरूप पक्षे घटशब्दस्य घकारटकारसमुदायोऽर्थः। व्यवहार्यार्थपक्षे पृथुबुध्नोदराकारो मृदादिविकारोऽर्थः। बुद्धिपक्षे तु घट इति ज्ञानमेवार्थः। तस्मादत्र ममशब्दस्य ममेति बुद्धिरित्यर्थः। अत एव ममेति बुद्धिर्यस्य नास्ति स निर्मम इत्युच्यते। अत्र ममेति बुद्ध्या तद्वानेव लक्ष्यते। **ममस्य भावो ममत्वम्**। तथा च सति ममत्वमित्यस्य मदीयत्वाभिमानित्वमित्यर्थ इति। अयं तु श्लोकः काव्यप्रकाशदूषितः। तद्यथा—अचेतनस्य तमसो दिवाकरात् त्रास एव न सम्भवतीति कुतस्तत्प्रयोजितमद्रिणा परित्राणं, कुतस्तरां तत्समर्थनार्थमर्थान्तरन्यास इति[काव्यप्रकाशान्ते]। तत् पातालकुक्षिकल्पाभिर्गुहाभिः परिहीयते। केवलम् भयमेव तत्रारोपितम्। अत एव तस्योत्प्रेक्षारूपत्वमिति युक्त एव परित्राणसमर्थनार्थमर्थान्तरन्यास इत्यलमनेनन॥१२॥

लाङ्गूलविक्षेपविसर्पिशोभै-
रितस्ततश्चन्द्रमरीचिगौरैः।
यस्यार्थयुक्तं गिरिराजशब्दं
कुर्वन्ति बालव्यजनैश्चमर्यः॥१३॥

प्रकाशिका

लाङ्गूलेति। लाङ्गूलं बालदण्डः। गिरिराजशब्दं बालव्यजनैरर्थयुक्तं चमर्यः कुर्वन्तीति। राजशब्दस्यार्थो हि सामान्येन प्रकृतिषट्कस्वामित्वम्। गिरिराजशब्दस्यापि तद्विशेष एव कश्चिदर्थः। तेनैव हि तस्यार्थयुक्तता युक्तिमती। एवं स्थितेऽत्र स्वार्थचिह्नभूतैर्बालव्यजनैर्गिरिराजशब्दस्यार्थयुक्तत्वकरणमुपचर्यते।।१३।।

विवरणम्

गिरिराजशब्दवाच्यत्वमप्यस्यैव युक्तमित्याह—

लाङ्गूलेति। चमर्यः यस्य गिरिराजशब्दं बालव्यजनैः अर्थयुक्तं कुर्वन्ति। चमर्यश्चमरमृग्यः। अत्र चमरस्त्रीणामुपादानेन स्त्रीणामेव चामरग्रहणाधिकार इति दर्शयति। यथोक्तम् 'एतासामरविन्दसुन्दरदृशां द्राक् चामरान्दोलनाद्' इति। यस्य हिमवत गिरिराजशब्दं गिरिराजोऽयमिति शब्दं बालव्यजनैः निजलाङ्गूलमयैश्चामरैरर्थयुक्तं यथार्थं कुर्वन्ति। प्रकृतिषट्कस्वामित्वं हि सामान्यतो राजशब्दस्यार्थः। अतोऽत्र तत्स्वामिनश्चिह्नभूतैर्बालव्यजनैः गिरिराजशब्दस्यार्थयुक्तत्वकरणमुपचार इत्य**रुणाचलनाथेन** व्याख्यातम्। वयं तु बालव्यजनावधूननदर्शनेनायमेव गिरिराज इति या सर्वजनप्रतीतिः, तत्करणमेवात्रार्थयुक्तत्वकरणमिति मन्यामहे, प्रतीतिमात्रपरायणत्वात् काव्यव्यवहाराणाम्। न केवलं बालव्यजनानां सत्तामात्रम्, अपि तु वीजनमपि दृश्यत इत्याह—लाङ्गूलविक्षेपविसर्पिशोभैरिति। लाङ्गूलानां बालदण्डानां विक्षेपेण चालनेन विसर्पिण्यो व्यापिन्यः शोभा येषु तैः। अनेन विशेषणेन व्यजनान्दोलनसमयसम्भविनी महती शोभा दर्शिता, बालदण्डानां व्यजनदण्डसाम्यं च प्रकाशितम्। सितव्यजनसाम्यमप्याह—इतस्ततश्चन्द्रमरीचिगौरैरिति। इतस्ततः समन्ततः सर्वत इत्यर्थः। चन्द्रमरीचिगौरैः चन्द्रस्य मरीचिवत् किरणवद् गौरैः धवलैः, सर्वश्वेतैरित्यर्थः।।१३।।

यत्रांशुकाक्षेपविलज्जितानां
यदृच्छया किंपुरुषाङ्गनानाम्।
दरीगृहद्वारि विलम्बिबिम्बा-
स्तिरस्करिण्यो जलदा भवन्ति।।१४।।

प्रकाशिका

यत्रेति। आक्षेपो हरणम्। यदृच्छया सङ्गत्या। बिम्बं शरीरम्। 'बिम्बोऽस्त्री मण्डलसमप्रतिमामुखलक्ष्मसु, प्रतिबिम्बे तत्प्रकृतौ' इति यादवः। तिरस्करिण्यो

यवनिकाः। अत्र लज्जया गुह्यगूहनाय करतलेषु व्यापार्यमाणेषु दैवोपनतेन जलदरोधतमसा समीहितसौकर्यमिति समाधिरलङ्कारः प्राधान्येन ध्वन्यते॥१४॥

विवरणम्

नवोढानुसरणमप्यत्रैव सुखकरमित्याह—

यत्रेति। यत्र अंशुकाक्षेपविलज्जितानां किम्पुरुषाङ्गनानां जलदाः तिरस्करिण्यो भवन्ति। यत्र हिमवति अंशुकाक्षेपविलज्जितानाम् अंशुकानां वसनानाम् आक्षेपेण हरणेन विलज्जितानां विशेषेण लज्जितानाम्। नवोढा हि पूर्वमेव लज्जिताः प्रियतमकृते तु वसनहरणे विशेषेणेति भावः। किंपुरुषाङ्गनानां किन्नरस्त्रीणां जलदा मेघा एव तिरस्करिण्यो यवनिका भवन्ति। 'प्रतिसीरा यवनिका स्यात् तिरस्करिणी च सा' इत्यमरः। जलदानां यवनिकात्वप्राप्तिप्रकारमाह—यदृच्छया दरीगृहद्वारि विलम्बिबिम्बा इति। यदृच्छया यादृच्छिकसङ्गत्या दरीगृहद्वारि दरीरूपाणां सुरतभवनानां द्वारि द्वारप्रदेशे विलम्बिनो लम्बनशीला बिम्बाः शरीराणि येषां ते तथा। 'बिम्बोऽस्त्री मण्डलसमप्रतिमामुखलक्ष्मसु, प्रतिबिम्बे तत्प्रकृतौ' इति यादवः। गुहाद्वारे घनोपरुद्धे सति गुहायामोषधिप्रकाशादिप्रवेशाभावात् तमोवृद्धिः। ततश्च गुह्यगोपनार्थं करतलादिव्यापारनैरपेक्ष्यमिति भावः। अत्र जलदेषु तिरस्कारिणीत्वमारोपितम्। तस्य च प्रकृतोपयोगित्वात् परिणामोऽलङ्कार। 'आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणाम' इत्यलङ्कारसूत्रम्। काव्यप्रकाशकृत्पक्षे तु रूपकमेव। 'अतैलपूरा' इत्यत्राप्येवं द्रष्टव्यम्। तत्र सविशेषणस्य रूपकस्यातिस्फुटत्वादयमलङ्कारो नोक्तः। अत्र समाधिरलङ्कारः प्राधान्येन ध्वन्यते च। जलदरोधतमसा नवोढागुह्यगोपनकार्यसिद्धेः। 'समाधिः सुकरं कार्यं कारणान्तरयोगत' इति[काव्यप्रकाशे]॥१४॥

भागीरथीनिर्झरशीकराणां
वोढा मुहुः कम्पितदेवदारुः।
यद्वायुरन्विष्टमृगैः किरातै-
रासेव्यते भिन्नशिखण्डबर्हः॥१५॥

प्रकाशिका

भागीरथीति। मुहुः सद्यः। 'पौनःपुन्ये भृशार्थे च सद्योर्थे स्यान्मुहुःपदम्' इत्यजयः। अत्रेदं च प्रमाणं 'भित्त्वा सद्यः किसलयपुटं देवदारुद्रुमाणाम्' (१०५) इति प्रयोगः। यद्वायुर्यत्सम्बन्धी वायुः। अन्विष्टमृगैरिति श्रमस्य विभावः, वायुसेवनमनुभावः। भिन्न इतस्ततो विकीर्णः शिरोभूषणं शिखण्डबर्हो यैः॥१५॥

विवरणम्

हिमवति वायोरपि गुणोत्कर्षमाह—

भागीरथीति। यद्वायुः अन्विष्टमृगैः किरातैः आसेव्यते। यद्वायुर्यत्सम्बन्धी वायुः अन्विष्टा मृगा यैस्तैः। मृगान्वेषणार्थमितस्ततः कृतावधानैरित्यर्थः। अनेन श्रमस्य विभाव उक्तः। किरातैः शबरैः आसेव्यते आभीक्ष्ण्येन सेव्यत इति श्रमस्यानुभावः। वायोः श्रमहरत्वद्योतकानि विशेषणान्याह—भागीरथीत्यादिना। तत्र शैत्यमाह—भागीरथीनिर्झरशीकराणां वोढा इति। भारीरथ्यां गङ्गायामेव निर्झरि वारिप्रवाहे। 'वारिप्रवाहो निर्झरो झर' इति सिंहः। हिमवति निर्झरो गङ्गैव। तत्र ये शीकरा जलकणाः। 'शीकरोऽम्बुकणा स्मृता' इत्यमरः। तेषां वोढा वाहकः। सौरभ्यमाह—मुहुः कम्पितदेवदारुरिति। मुहुः पुनः पुनः कम्पिता देवदारवो वृक्षविशेषा येन। देवदारूणां सौरभ्यातिशयः प्रसिद्धः। मुहुःपदेन सौरभ्यस्यानन्त्यमुक्तम्। मुहुःपदस्य सद्य इति वार्थः। 'पौनःपुन्ये भृशार्थे च सद्यार्थे स्यान्मुहुःपदम्' इत्यजयः। 'भित्त्वा सद्यः किसलयपुटं देवदारुद्रुमाणाम्' (१०५) इति मेघसन्देशप्रयोगश्चास्मिन्नर्थे प्रमाणम्। मान्द्यमाह—'भिन्नशिखण्डिबर्ह' इति। भिन्ना इतस्ततो विकीर्णाः शिखण्डिनां वनप्रदेशेषु वर्तमानानां बर्हिणां बर्हा पिच्छाः येन स तथा शिखण्डिबर्हैर्निरुद्धवेगप्रसरत्वाद् वायोर्मान्द्यम्। 'भिन्नशिखण्डिबर्हैरि'ति पाठे वायोः सकलशरीरस्पर्शार्थं स्वकराभ्यामितस्ततो विक्षिप्ता निजशिरोमण्डनशिखण्डिबर्हा यैरित्यर्थः। अस्मिन्नर्थे वायुसेवनस्वभावोत्त्या स्वाभावोक्तिरलङ्कारः। 'स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम्' इति [काव्यप्रकाशे] तल्लक्षणम्। अत्र तमःप्रकृतीनां मृगवधलालसानां किरातानामप्यनवरतगङ्गाजलसेवनप्रतिपादनेन प्रारब्धभोगक्षये तत्रत्यानां मुक्तिरेव ध्वन्यये॥१५॥

सप्तर्षिहस्तावचितावशेषा-
ण्यधो विवस्वान् परिवर्तमानः।
पद्मानि यस्याग्रसरोरुहाणि
प्रबोधयत्यूर्ध्वमुखैर्मयूखैः॥१६॥

प्रकाशिका

सप्तर्षीति। अवशिष्यत इत्यवशेषः। कर्मणि घञ्। 'त्रिष्वन्यत्रोपयुक्तत' इति केशवस्वामिवचनादुपयुक्तादन्यदभिदधानस्य शेषशब्दस्य विशेष्यलिङ्गत्वमवसेयम्। हस्तशब्दः स्वयङ्ग्रहणेनादरं द्योतयति। सप्तर्षीत्यादिपदेन विशिष्टोपयोगित्वमुक्तम्।

अथवा सप्तर्षिहस्तावचिताविति निमित्तसप्तमी। अशेषाणीति बोधनस्य प्रायत्निकत्वं ध्वनितम्। सप्तर्षिस्थानस्य सूर्यादुपरिवर्तित्वादियमुक्तिः। वक्ष्यति च 'नित्यमर्काच्च सोमाच्च परमध्यास्महे पदम्' (कुस. ६.१९) इत्यादि।।१६।।

विवरणम्

औन्नत्यमाह—

सप्तर्षीति। विवस्वान् यस्य अग्रसरोरुहाणि पद्मानि ऊर्ध्वमुखैः मयूखैः प्रबोधयति। विवस्वान् आदित्यः यस्य हिमवतः अग्रसरोरुहाणि अग्रसरस्सु अधित्यकावर्तिषु सरस्सु कमलिनीषु (कमलाकरेषु) रोहन्ति उद्भवन्तीति तथा पद्मानि कमलानि ऊर्ध्वमुखैः ऊर्ध्वं मुखानि अग्रभागा येषां तैः मयूखैः रश्मिभिः प्रबोधयति उन्मीलयति। सविता यस्य शिरःपुष्करिणीषु प्ररूढानि कमलानि बिम्बस्य पृष्ठभागादूर्ध्वं गतैरेव मयूखैरुन्मीलयतीत्यर्थः। तत्र हेतुमाह—अधः परिवर्तमान इति। अधित्यकापेक्षयात्यन्तमधोभाग एव परितो वर्तमानः। तत्रत्यानां पद्मानां विशिष्टोपयोगित्वमाह—सप्तर्षिहस्तावचितावशेषाणीति। सप्तर्षिभिरादरातिशयात् स्वहस्तैरेवावचितानि लूनानि। अवशिष्यत इत्यवशेषः। कर्मणि घञ्। 'त्रिष्वन्यत्रोपयुक्ततः' इति केशवस्वामिवचनं शेषशब्दस्याभिधेयवल्लिङ्गत्वे प्रमाणम्। सप्तर्षिभिर्देवतार्चनाद्यर्थं यानि कानिचिदवचितानि, पुनश्च पद्मानां बहुत्वात् सरस्स्वेवावशिष्टानि पद्मानीत्यर्थः। सप्तर्षिहस्तावचिताविति वा पदच्छेदः। निमित्तसप्तमी चेयम्। अशेषाणि समस्तानि। यत्र सूर्यः सप्तर्षीणामुपयोगार्थं समस्तानि पद्मानि प्रबोधयतीत्यर्थः। सप्तर्षीणां सूर्यमार्गादुपरि वर्तमानत्वादित्थमुक्तम्। उक्तं च वसिष्ठसिद्धान्ते—

औत्तानपादिरखिलग्रहकारकाणा-
मुच्चैस्तरे वसति धाम्नि ततोऽप्यधस्तात्।
सप्तर्षिमण्डलमवस्थितमप्यमुष्मात्
तिष्ठन्त्यधो नभसि च ग्रहतारकाद्याः।। इति।

वक्ष्यति च 'नित्यकमर्काच्च सोमाच्च परमध्यास्महे पदम्' (६.१९) इति। अत्र हिमवतः सूर्यमार्गोल्लङ्घित्वकथनादौन्नत्यं भङ्ग्यन्तरेणोक्तमिति पर्यायोक्तमलङ्कारः। 'गम्यस्यापि भङ्ग्यन्तरेणाभिधानं पर्यायोक्तम्' [अलङ्कारसर्वस्वसूत्र] इति। अग्रसरोरुहाणि पद्मानीत्यत्र पुनरुक्तवदाभासोऽलङ्कारः। 'पुनरुक्तवदाभासो विभिन्नाकारशब्दगः एकार्थतेव' [काव्यप्रकाशः] इति।।१६।।

यज्ञाङ्गयोनित्वमवेक्ष्य यस्य
सारं धरित्रीधरणक्षमं च।
प्रजापतिः कल्पितयज्ञभागः
शैलाधिपत्यं स्वयमन्वतिष्ठत्॥१७॥

प्रकाशिका

यज्ञाङ्गेति। यज्ञाङ्गानि सोमलताप्रभृतीनि। अत्र पुराणवचनं ज्ञापकं—

हिरण्यगर्भो भगवान् व्याजहार हरिं प्रति।
देवतानां मुनीनां च समक्षं सर्वसाक्षिणम्॥
अस्य देवस्य वामाङ्गाज्जातस्त्वमनया सह।
दक्षिणाङ्गात् समुद्भूत सृष्ट्यर्थं जगतामहम्॥
यज्ञाङ्गार्थं मया सृष्टो हिमवानचलेश्वरः। इति।

सारो बलम्। कल्पितो हस्तिरूपो यज्ञभागो येन। अत्र किल श्रुतिः प्रमाणम्। स्वयं आत्मना। अन्वतिष्ठद् अन्तर्भावितण्यर्थः प्रयोगः। 'अनुष्ठितानन्तरजाविवाहः' (रघु.७.३२) इतिवत्। यज्ञाङ्गयोनित्वाद् यज्ञभागं कल्पयित्वा तस्य साराधिकत्वाच्छैलाधिपत्यं प्रजापतिः स्वयमनुष्ठापितवानित्यर्थः। हिमवन्तमधिष्ठाय प्रजापतिः स्वयं शैलाधिपत्यमनुष्ठितवानिति पुराणवचनविरुद्धम्। तद् तथा ब्रह्माण्डे—

शैलानां हिमवन्तं च नदानामथ सागरम्।
गन्धर्वाणामधिपतिं चक्रे चित्ररथं विधिः॥ इति।

अत्र प्रकरणे 'यं सर्वे'त्यादिना स्वजातिश्रेष्ठत्वम्, 'अनन्तरत्ने'-त्यादिनाभिगम्यत्वं, 'पदं तुषारे'त्यादिना लाङ्गूले'त्यादिना च रत्नसम्पद्, 'आमेखलमि'त्यादिना सर्वकालसुखत्वं, 'दिवाकरादि'त्यादिना संश्रितरक्षणं, 'सप्तर्षी'त्यादिना तुङ्गत्वं, 'यज्ञाङ्गे'त्यादिना देवत्वमैश्वर्यं च, इतरैस्तु श्लोकैर्यथासम्भवं शृङ्गाराङ्गभूतपदार्थवत्तया रमणीयत्वं चोक्तम्॥१७॥

विवरणम्

देवत्वमैश्वर्यं चाह—

यज्ञेति। प्रजापतिः यस्य यज्ञाङ्गयोनित्वं धरित्रीधरणक्षमं सारं च अवेक्ष्य कल्पितयज्ञभागः शैलाधिपत्यं स्वयम् अन्वतिष्ठत्। प्रजापतिर्ब्रह्मा यस्य हिमवतो यज्ञाङ्गानां सोमलताप्रभृतीनां योनित्वम् उद्भवस्थानत्वम्। एतच्च पुराणप्रसिद्धं—

हिरण्यगर्भो भगवान् व्याजहार हरिं प्रति।
देवतानां मुनीनां च समक्षं सर्वसाक्षिणाम्।।
अस्य देवस्य वामाङ्गाज्जातस्त्वमनया सह।
दक्षिणाङ्गात् समुद्भूतः सृष्ट्यर्थं जगतामहम्।।
यज्ञाङ्गार्थं मया सृष्टो हिमवानचलेश्वर। इति।

धरित्रीधरणक्षमं धरित्र्याः भूमेः धरणे धारणे क्षमं शक्तं सारं बलं च अवेक्ष्य सम्यगवलोक्य कल्पितयज्ञभागः कल्पितो यज्ञेषु यागेषु भागो हस्तिरूपोऽशो येन तथाभूतः सन्, इन्द्राद्यैस्तुल्यमेवास्य हविर्भागं कल्पयित्वेत्यर्थः। हिमवतो हस्ती यज्ञभाग इति श्रुतिप्रसिद्धिः। शैलाधिपत्यं पर्वताधिपतित्वं स्वयमन्वतिष्ठत् स्वयमेवानुष्ठापितवान्। अन्तर्भूतण्यर्थोऽयं प्रयोगः। 'अनुष्ठितानन्तरजाविवाहः' (रघु. ७.३२) इतिवत्। प्रजापतिः स्वयमेव हिमवन्तमधिष्ठाय शैलाधिपतित्वमनुष्ठितवानिति कैश्चिद् व्याख्यातम्। तत्तु पुराणविरुद्धम्। यथोक्तं ब्रह्माण्डे—

शैलानां हिमवन्तं च नदानामथ सागरम्।
गन्धर्वाणामधिपतिं चक्रे चित्ररथं विधिः।। इति।

अत्र यज्ञाङ्गयोनित्वमित्यादिना क्रमेणोद्दिष्टयोरर्थयोः कल्पितयज्ञभाग इत्यादिना पश्चान्निर्देशाद् यथासङ्ख्यमलङ्कारः। 'उद्दिष्टानामर्थानां क्रमेणानूद्देशो यथासङ्ख्यम्' [अलङ्कारसर्व] इति।।१७।।

स मानसीं मेरुसखः पितॄणां
कन्यां कुलस्य स्थितये स्थितिज्ञः।
मेनां मुनीनामपि माननीया-
मात्मानुरूपां विधिनोपयेमे।।१८।।

प्रकाशिका

स इति। मुनीनामपि माननीयां ब्रह्मवादयोगवत्तया। अत्र श्रीविष्णुपुराणवचनं—

पितरो ब्रह्मणा सृष्टां व्याख्याता ये मया तव।
अग्निष्वात्ता बर्हिषदो नाग्नयः साग्नयश्च ये।।
तेभ्यः स्वधासुता जज्ञे मेना वैतरणी तथा।
ते उभे ब्रह्मवादिन्यौ योगिन्यौ चाप्युभे द्विज!।। इति।

तस्या मानसीत्वे ब्रह्माण्डवचनं—

तेषां तु मानसी कन्या मेना नाम महागिरेः।
पत्नी हिमवतो यस्याः पुत्रो मैनाक उच्यते।। इति।

कुलस्य स्थितये, न तु कामाय। अनेनातिसत्त्वोत्तरत्वादस्य शान्तनायकत्वम् अस्याश्च मुनीनामपि माननीयत्वेन द्योतितम्। अत एवात्मानुरूपामित्युक्तिः। स्थितिर्मर्यादा, गृहीतविद्येन गुरुकुलनिवृत्तेन गार्हस्थ्यमङ्गीकार्यमिति या शास्त्रमर्यादा तस्या अभिज्ञः। विधिना शास्त्रतः। एवञ्च सदपत्येन कुलस्थितिः स्यात्। मेरुसख इत्यनेन वरणसंविधानादिषु तत्सहायत्वमुक्तम्।।१८।।

विवरणम्

इत्थमुपवर्णितस्य हिमवतो जगदेकनायिकायाः प्रबन्धनायिकाया उत्पत्तिहेतुभूतं विवाहं वर्णयति—

स इति। सः मेनां विधिना उपयेमे। सः हिमवान् मेनां नाम्ना मेनेति प्रसिद्धां विधिना शास्त्रतः। शास्त्रसिद्धेन विधिना स्वीकृतायां हि भार्यायां सदपत्येन कुलस्थितिर्भवेदिति भावः। उपयेमे परिणीतवान्। ननु पूर्वोक्तसकलगुणविशिष्टः स किमर्थं कामोपभोगे मनः कृतवानित्यत्राह—कुलस्य स्थितये इति। कुलस्य वंशपरम्परायाः स्थितये स्थिरत्वाय, न कामार्थमित्यर्थः। अनेनातिसत्त्वोत्तरत्वादस्य शान्तनायकत्वमुक्तम्। तेन च पार्वतीजन्मयोग्यत्वं ध्वनितम्। मेनायाः कुलशुद्धिमाह—पितॄणां मानसीं कन्यामिति। पितॄणां अग्निष्वात्तादीनां मानसीं मनसो जाताम्। अनेनायोनिजत्वमुक्तम्। तेन च दिव्यत्वं ध्वन्यते। उक्तञ्च मेनाया मानसीत्वं ब्रह्माण्डे—

तेषां तु मानसी कन्या मेना नाम महागिरेः।
पत्नी हिमवतो यस्याः पुत्रो मैनाक उच्यते।। इति।

अत्र तेषामिति पुराणे प्रकृतानां पितॄणामुपादानम्। बहुसहायसाध्ये विवाहे हिमवतः सहायसम्पत्तिं दर्शयति—मेरुसख इति। मेरोः सुमेरोः सखा। अनेन वरणादिष्वपि तत्सहायत्वं द्रष्टव्यम्। हिमवतः शास्त्रीयविवाहप्रवृत्तौ हेतुमाह—स्थितिज्ञ इति। स्थितिर्मर्यादा, तां जानातीति स्थितिज्ञः। विद्याग्रहणानन्तरं गुरुसकाशान्निवृत्तेन गार्हस्थ्यमङ्गीकार्यं, पुनश्चाग्न्याधानादिकर्म कर्तव्यमिति शास्त्रमर्यादां जानन्नित्यर्थः। मेनाया उत्तमनायिकात्वमाह—मुनीनामपि माननीयामिति। मुनीनां मुनिभिः। 'कृत्यानां कर्तरि वा' (२.३.७१) इति षष्ठी। सर्वमाननीयैर्मुनिभिरपि माननीयामित्यपिशब्दार्थः। मुनिमाननीयत्वं ब्रह्मवादवत्तया योगवत्तया च। तदुक्तं श्रीविष्णुपुराणे—

पितरो ब्रह्मणा सृष्टा व्याख्याता ये मया तव।
अग्निष्वात्ता बर्हिषदो नाग्नयः साग्नयश्च ये॥
तेभ्यः स्वधासुता जज्ञे मेना वैतरणी तथा।
ते उभे ब्रह्मवादिन्यौ योगिन्यौ चाप्युभे द्विज!॥ इति।

अत एव प्रागुक्तस्य नायकगुणविशिष्टस्य हिमवतः सदृशी भार्या चेयमित्याह—आत्मानुरूपामिति। आत्मनोऽनूरूपां सदृशीम्। 'कुलाद्यैः सदृशीं भार्यां विन्देत स्नातको द्विजः' इत्यादिस्मृतेरिति भावः। अत्र कामव्यपोहाय कुलस्य स्थितय इत्युक्तमिति परिसङ्ख्यालङ्कारः।

किञ्चित् पृष्टमपृष्टं वा कथितं यत् प्रकल्पते।
तादृगन्यव्यपोहाय परिसङ्ख्या तु सा स्मृता॥

[काव्यप्रकाशः] इति॥१८॥

असूत सा नागवधूपभोग्यं
मैनाकमम्भोनिधिबद्धसख्यम्।
क्रुद्धेऽपि पक्षच्छिदि वृत्रशत्रा-
ववेदनाज्ञं कुलिशक्षतानाम्॥१९॥

प्रकाशिका

असूतेति। नागवधूपभोग्यत्वं तत्परिणयनादिति दक्षिणावर्तः। वयं तु समुद्रमग्नस्य नागलोकसन्निकर्षादिति मन्यामहे। तत्सख्यस्य फलमाह—क्रुद्धेऽपीति। अत्रेतिहासः सुलभः। ननु किमनेन मैनाकोत्पत्तिकथनेन कथानुपकारिणा। न। देव्याः सभ्रातृकत्वेन परिणेयत्वात्। अत्र मनुः—

यस्यास्तु न भवेद् भ्राता न विज्ञायेत वा पिता।
नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्मशङ्कया॥ (३.११)

इति॥१९॥

विवरणम्

'यस्यास्तु न भवेद् भ्राता न विज्ञायेत वा पिता' नोपयच्छेत तां प्राज्ञः' इति मनुवचनेनाभ्रातृकाणां स्त्रीणां परिणेयत्वनिरासाद् भवान्याः सभ्रातृकत्वं प्रतिपादयितुं मेनायां पुत्रोत्पत्तिं दर्शयति—

असूतेति। सा मैनाकम् असूत। सा मेना मैनाकं नाम पर्वतम् असूत

प्रसूतवती। मेनातनूजस्य सौभाग्यातिशयमाह—नागवधूपभोग्यमिति। नागवधूभिः सर्पस्त्रीभिः उपभोग्यम् उपभोक्तुं योग्यम्। नागवधूपभोग्यत्वे हेतुमाह—अम्भोनिधिबद्धसख्यमिति। अम्भोनिधिना समुद्रेण सह बद्धं स्थिरीकृतं सख्यं बन्धुत्वं येन तं, सदा समुद्रस्थमित्यर्थः। समुद्रस्य नागलोकसन्निकर्षाद् भुजङ्गाङ्गनोपभोग्यमिति भावः। समुद्रसख्यस्य फलमाह—वृत्रशत्रौ पक्षच्छिदि क्रुद्धेऽपि कुलिशक्षतानामवेदनाज्ञमिति। वृत्रशत्रौ वृत्राभिधानस्यासुरस्य शत्रौ। अनेनास्य दुरभिभवत्वमुक्तम्। तेन च महाजनसख्यस्य फलपरिपूर्तिर्ध्वन्यते। पक्षौ छिनत्तीति पक्षच्छिद् तस्मिन्, पक्षच्छेदोद्युक्ते सतीत्यर्थः। न केवलमुद्युक्तः, कुपितश्चेत्याह—क्रुद्ध इति। अपिशब्देन पक्षच्छेदस्य कारणपौष्कल्यं दर्शयति। कुलिशक्षतानां वज्रप्रहारजनितानां व्रणानाम् अवेदनाज्ञं वेदनां पीडां जानातीति वेदनाज्ञः वेदनाज्ञो न भवतीत्यवेदनाज्ञः तम्। महेन्द्रे पक्षच्छेदोद्युक्ते रुष्टेऽपि महासत्त्वस्य समुद्रस्य सख्याद‌द्यापि कुलिशक्षतवेदनानभिज्ञमित्यर्थः।

सर्वेऽपि पर्वताः पूर्वं पक्षवन्तः किलाभवन्।
ततस्तेषामवस्थानैर्वेगैः पक्षसमीरणैः॥
चूर्णीभूतान् जनपदानवलोक्याथ वृत्रहा।
क्रुद्धः कुलिशमादाय पक्षच्छेदेन पर्वतान्॥
क्षणेन स्थावरीचक्रे मैनाकस्तरसा ततः।
अम्भोधिमतिगम्भीरं महासत्त्वमुपाश्रितः॥
समुद्रसख्याद‌द्यापि तत्पत्रौ नाहतौ।

इति कथाऽनेन श्लोकेन दर्शिता॥१९॥

अथावमानेन पितुः प्रयुक्ता
दक्षस्य कन्या भवपूर्वपत्नी।
सती सती योगाविसृष्टदेहा
तां जन्मने शैलवधूं प्रपेदे॥२०॥

प्रकाशिका

एवमाधिकारिकस्य पीठिकात्वेन प्रासङ्गिकमुपवर्ण्याधिकारिकं प्रस्तौति—

अथेति। अथशब्दः प्रकरणान्तरोपक्रमद्योतकः। अवमानेन स्वभर्तुर्हविर्भागाप्रदानादिकृतेन प्रयुक्ता प्रेरिता। पितुरिति पितुः परमगुरुत्वात् तद्विषये प्रकारान्तरेण कोपप्रतीकारः कर्तुमनुचित इति द्योत्यते। सती इदं दक्षसुतात्वे नाम। सती भवन्ती।

योगविसृष्टदेहा सतीत्यन्वयः। शैलवधूमिति स्त्रीजनने स्त्रियाः प्राधान्यात्। अत्र भवपूर्वपत्नीत्यनेन परशक्तिरूपत्वं ध्वनयता भुवनैकमातुः स्वेच्छया विग्रहत्यागस्वीकारावुपपादितौ॥२०॥

विवरणम्

इत्थं पीठप्रतिष्ठामुपपाद्याधिकारिकं वृत्तमेव प्रस्तुवन् नायिकाया उत्पत्तिं वर्णयति श्लोकद्वयेन। तत्रादौ देव्याः पूर्वजन्मवृत्तान्तसंक्षेपकथनेन नित्याया एव तस्या उत्पत्तौ हेतुं वदन्नुत्पत्तेः पूर्वावस्थामाह—

अथेति। अथ दक्षस्य कन्या भवपूर्वपत्नी पितुः अवमानेन प्रयुक्ता योगविसृष्टदेहा सती सती जन्मने तां शैलवधूं प्रपेदे। अथशब्दोऽयं प्रकरणान्तरोपक्रमद्योतकः। 'मङ्गलानन्तरारम्भप्रश्नकात्स्न्येंष्वथो अथ' इत्यमरः।. दक्षस्य दक्षप्रजापतेः कन्या पुत्री भवपूर्वपत्नी भवस्य परमशिवस्य पूर्वपत्नी प्राचीनभार्या। अनेन नित्यायाः परमशक्तिरूपाया देव्याः स्वेच्छयैव शरीरत्यागस्वीकारसामर्थ्यं दर्शितम्। पितुः आत्मनो जनकभूतस्य दक्षस्य अवमानेन स्वभर्तुर्हविर्भागाप्रदानादिरूपया निन्दया प्रयुक्ता प्रेरिता देहत्यागायेति शेषः। परमगुरौ पितरि विषये प्रकारान्तरेण कोपप्रतीकारोपायादर्शनात् तदवमानेन शरीरत्यागायैव प्रेरितेत्यर्थः। योगविसृष्टदेहा जीवात्मनः परमात्मनि योजनं योग इत्युच्यते, तेन विसृष्टः परित्यक्तो देहो यया। सती भवन्ती। सती दक्षसुतात्वे देव्या नाम। जन्मने स्वोत्पत्तये तां पूर्वोक्तसकलगुणविशिष्टां शैलवधूं मेनां प्रपेदे प्राप्ताभूत्। हिमवत्प्राप्तिद्वारेणेत्यर्थात् सिध्यति। स्त्रीजन्मनि स्त्रीणामेव प्राधान्याच्छैलवधूं प्रपेद इत्युक्तम्। पितुरवमानेन शरीरत्यागाय प्रेरिता योगाग्निना निर्दग्धशरीरा भवन्ती सतीदेवी स्वजन्मलाभाय लोकोत्तरगुणविशिष्टां मेनां प्राप्तवतीत्यर्थः। अनेन स्वेच्छयैव देव्याः शरीरपरित्यागस्वीकाराविति दर्शितम्।

पुरा किल पुरारातावपमानं प्रकाशयन्।
अनाहूयैव तं देवं देवानन्यानुपानयत्॥
मोहान्धो यज्ञमारेभे दक्षो दाक्षायणी तदा।
अनाहूता स्वपित्रापि प्रतिषिद्धापि शम्भुना॥
जगाम स्वपितुर्गेहं यज्ञदर्शनलालसा।
अनादृतापि पित्रा सा दृष्ट्वा च सकलाः क्रियाः॥
रुद्रभागविनिर्मुक्ताः कोपेनापाटलेक्षणा।
तत्याज योगमास्थाय दक्षेणोत्पादितं वपुः॥

इति श्रीभागवतादिप्रसिद्धायाः कथायाः सङ्क्षेपः॥२०॥

सा भूधराणामधिपेन तस्यां
समाधिमत्यामुदपादि भव्या।
सम्यक्प्रयोगादपरिक्षतायां
नीताविवोत्साहगुणेन सम्पद्॥२१॥

प्रकाशिका

सेति। समाधिमत्यां तपस्विन्याम्। वक्ष्यति च 'अलं समाधिना' (५.४५) इति। कथमन्यथा परमेश्वरीजन्माधिकरणतेति भावः। उदपादि अजनि। कर्मण्ययं प्रयोगः। उत्पत्तिश्चात्र—

सुराणां कार्यसिद्ध्यर्थमाविर्भवति सा यदा।
उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते॥

इति दुर्गासप्तशतीन्यायेन द्रष्टव्या। भव्या कल्याणी। अपरिक्षतायाम् अविहतायाम्। नीतौ सन्ध्यादिप्रयोगे। उत्साहस्य गुणेनासंमोहाध्यवसायादिस्वकारणसामग्रीलक्षणेन। कर्मधारयपक्षे गुणशब्दो गतार्थः। अत्रोपमायामधिकरणयोर्विशेषणे बिम्बप्रतिबिम्बभावेन स्थिते। भव्येति तु कर्मणोः साधारणम्। उपमया च तल्लाभेन मेनाहिमवतोः कृतार्थता द्योत्यते॥२१॥

विवरणम्

अथ देव्या उत्पत्तिं वर्णयति—

सेति। सा भूधराणाम् अधिपेन समाधिमत्यां तस्याम् उदपादि। सा दाक्षायणी भूधराणां पर्वतानाम् अधिपेन श्रेष्ठेन हिमवता समाधिमत्यां समाधिस्तपः। वक्ष्यति च—

दिवं यदि प्रार्थयसे वृथा श्रमः पितुः प्रदेशास्तव देवभूमयः।
अथोपयन्तारमलं समाधिना न रत्नमन्विच्छति मृग्यते हि तत्॥ इति (५.४५)

तद्वत्यां तपस्विन्यामित्यर्थः। अनेन परमेश्वरीजन्माधिकरणत्वयोग्यता दर्शिता। तस्यां मेनायाम् उदपादि। कर्मण्ययं प्रयोगः। गर्भसंस्कारादिपुरस्सरं जनिताभूदित्यर्थः। उत्पत्तिश्चात्र नित्याया भगवत्या देवकार्यसिद्ध्यर्थं स्वेच्छया शरीरस्वीकार एव। तदुक्तं देवीमाहात्म्ये—

देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा।
उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते॥ इति।

अत्र तारकासुरनिग्रहार्थं कुमारोत्पादनं देवकार्यमित्यवसेयम्। अत्रोपमामाह—सम्यक्प्रयोगाद् अपरिक्षतायां नीतौ उत्साहगुणेन संपद् इवेति। अत्र प्रयोगस्य सम्यक्त्वं नाम परात्मनोः प्राबल्यदौर्बल्यादिविवेकपूर्वकत्वम्। यथोक्तं रघुवंशे—

परात्मनोः परिच्छिद्य शक्त्यादीनां बलाबलम्।
ययावेभिर्विशिष्टश्चेत् परस्मादास्त सोऽन्यथा।। (१७.५९)

इति। सम्यक्प्रयोगाद्धेतोरपरिक्षतायाम् अविहतायां नीतौ सन्ध्यादिप्रयोगे। सन्धिविग्रहयानासनद्वैधीभावसमाश्रयभेदेन षड्विधा या राजनीतिः, सा तत्तदुचिते प्रयुक्ता सती न विहन्यत इति तादृश्यां नीत्यामित्यर्थः। उत्साहगुणेन उत्साहस्य गुणेन। तस्य गुणश्च सम्मोहाभावादिरूपः। असम्मोहसावधानत्वादिलक्षणगुणसामग्रीसहितेनोत्साहेनेत्यर्थः। उत्साह एव गुण उत्साहगुण इति कर्मधारयसमासस्तु गुणशब्दस्य निरुपयोगत्वप्रसङ्गादयुक्तः। सम्पत् समृद्धिरिव। यथा सम्यक्प्रयोगादपरिक्षतायां नीतावुत्साहगुणेन सम्पदुत्पाद्यते, तथा समाधिमत्यां मेनायां भूधराणामधिपेन देवी समुत्पादिताभूदित्यर्थः। अत्र समाधिमत्यामिति मेनाविशेषणं सम्यक्प्रयोगादपरिक्षतायामिति नीतिविशेषणं च परस्परं बिम्बप्रतिबिम्बत्वमनुभवतः। देवीसम्पदोः साधारणं विशेषणमाह—भव्येति। भव्या कल्याणी। उपमानोपमेयसाधारणधर्माणामिवशब्दस्य चोपादानात् पूर्णोपमेयम्। तया चात्र देवीलाभेन मेनाया हिमवतश्च कृतकृत्यता द्योत्यते।।२१।।

प्रसन्नदिक् पांसुविविक्तवातं
शङ्खस्वनानन्तरपुष्पवृष्टि।
शरीरिणां स्थावरजङ्गमानां
सुखाय तज्जन्मदिनं बभूव।।२२।।

प्रकाशिका

प्रसन्नदिगिति। विविक्तो रहितः। शङ्खस्वनेति। उत्सवशङ्खस्वनं श्रुत्वा देवैर्भक्त्या कृतपुष्पवर्षमित्यर्थः। 'भवो हि लोकाभ्युदयाय तादृशाम्' (रघु. ३.१४) इतिवन्नात्रोपपादनं, तज्जन्मेतिविशेषणबलादेव तदनपेक्षत्वात्। या सर्वस्यात्मभूता, सा हि भगवती जन्मावलम्बते।।२२।।

विवरणम्

इत्थमुत्पन्नाया देव्या जन्मदिनं वर्णयति—

प्रसन्नेति। तज्जन्मदिनं स्थावरजङ्गमानां शरीरिणां सुखाय बभूव। तज्जन्मदिनं

तस्याः भगवत्याः जन्मदिनं जननदिवसः स्थावरजङ्गमानां स्थावराणां महीरुहमहीधरप्रभृतीनां जङ्गमानां जरायुजाण्डजस्वेदजभेदेन त्रिविधानां नरतिर्यगादीनां च शरीरिणां सुखायाभूत्। सुखकारणान्याह—प्रसन्नदिगित्यादिना विशेषणत्रयेण। प्रसन्नाः क्रूरातपमेघावरणराहित्यान्मनोहरा दिशो यस्मिंस्तत्। अनेन नेत्रसुखमुक्तम्। त्वगिन्द्रियसुखमाह—पांसुविविक्तवातमिति। मन्दत्वात् पांसुभी रजोभिः विविक्ताः विरहिताः वाता वायवो यस्मिंस्तत्। श्रोत्रेन्द्रियस्य घ्राणेन्द्रियस्य च प्रीतिमाह—शङ्खस्वनानन्तरपुष्पवृष्टीति। शङ्खस्वनस्य शङ्खनादस्यानन्तरं पुष्पवृष्टिः पुष्पवर्षं यस्मिंस्तत्। उत्सवशङ्खस्वनश्रवणानन्तरं भक्त्या दैवैः पुष्पवृष्टिः कृतेत्यवसेयम्। अथवा आदौ देवैर्मङ्गलार्थः शङ्खनादः कृतः। पुनः प्रसादातिशयात् पुष्पवृष्टिरपि कृतेत्यर्थः। आकाशदेशाद् दिव्यकुसुमेषु पतत्सु किमिदमित्यूर्ध्वमवलोकयतां जनानामास्ये दिव्यमकरन्दबिन्दुपतनाज्जिह्वेन्द्रियस्यापि प्रीतिरर्थादनेनैवोक्तेति माधवः। स्थावराणां तु पत्रपुष्पफलादीनां सातिशयोत्पत्तिदर्शनेन सुखं जातमित्यवसेयम्। उक्तञ्च श्रीकृष्णविलासे—

तद्वंशनालच्युतमच्युतस्य गीतामृतं साधु निषेव्य वृक्षाः।
चिरं जराजर्जरितत्वचोऽपि बाला इवासन् नवपल्लवाढ्याः।। इति।

अत्र स्थावरजङ्गमानामिति बहुवचनेन हिमवतीत्यादिविशेषानुपादानाच्च तज्जन्माजानतामपि कोऽप्यानन्दातिशयः सञ्जात इत्युक्तं भवति। नात्र कश्चिद् विस्मयः, सर्वात्मिकापि भगवती जन्मावलम्बत इति समर्थनस्य तज्जन्मदिनमित्यनेनैवोक्तत्वादत्र 'भवो हि लोकाभ्युदयाय तादृशाम्' (३.१४) इत्यनेन रघुवंश इवार्थान्तरन्यासो न कृत इत्यवसेयम्।।२२।।

तया दुहित्रा सुतरां सवित्री
स्फुरत्प्रभामण्डलया चकाशे।
विदूरभूमिर्नवमेघशब्दा-
दुद्भिन्नया रत्नशलाकयेव।।२३।।

प्रकाशिका

तयेति। विदूरो नाम पर्वतः। मेघशब्दाद् वैदूर्यमुत्पद्यत इति प्रसिद्धम्। यथाह माघकविः—

उरगेन्द्रमूर्धरुहरत्नसन्निधेर्मुहुरुन्नतस्य रसितैः पयोमुचः।
अभवन् यदङ्गणभुवः समुल्लसन्नववालवायजमणिस्थलाङ्कुराः।।' (१३.५८)

इति।।२३।।

विवरणम्

जातमात्राया देव्या नैसर्गिकीं शरीरसुषमामाह—

तयेति। सवित्री तया दुहित्रा सुतरां चकाशे। सवित्री माता तया दुहित्रा पुत्र्या सुतराम् अत्यर्थं चकाशे शोभते स्म। जातमात्रायामेव देव्यां मातुः पूर्वावस्थातः शोभाधिक्यं जातमित्यर्थः। अत्रोपमामाह—विदूरभूमिः नवमेघशब्दाद् उद्भिन्नया रत्नशलाकयेवेति। विदूरभूमिः विदूरो नाम रत्नोद्भवस्थानभूतः पर्वतविशेषः, यदुद्भूतं रत्नं वैदूर्यमित्युच्यते। घनगर्जिताद् उद्भिन्नया स्थलीं भित्त्वोद्गतया रत्नशलाकया शलाकारूपेण रत्नेन, रत्नाङ्कुरेणेत्यर्थ। विदूरभूमेर्मेघशब्दाद् वैदूर्योत्पत्तिः। यदाह भोजः—

> अस्ति शैलो विदूराख्यः पर्यन्ते तत्र काचन।
> मही रत्नाकरीभूता वैदूर्यं तत्र जायते॥
> मेघशब्देन जायन्ते तत्र रत्ननवाङ्कुराः।
> क्रमात् परिणतास्ते स्युर्मणयो राजपूजिताः॥ इति।

उपमानोपमेययोः साधारणं धर्ममाह—स्फुरत्प्रभामण्डलयेति। स्फुरत् शोभमानं प्रभामण्डलं मण्डलाकारा प्रभा यस्यां सा तथा।

> अरिष्टशय्यां परितो विसारिणा सुजन्मनस्तस्य निजेन तेजसा।
> निशान्तदीपाः सहसा हतत्विषो वभूवुरालेख्यसमर्पिता इव॥ (३.१५)

इति रघुवंशोक्तप्रकारोऽनेन दर्शितः॥२३॥

दिने दिने सा परिवर्धमाना
लब्धोदया चान्द्रमसीव रेखा।
पुपोष लावण्यमयान् विशेषा-
ञ्ज्योत्स्नान्तराणीव कलान्तराणि॥२४॥

प्रकाशिका

दिने दिन इति। लब्ध उदयः सूर्यात् पृथगुपलम्भो यया प्रतिपदि। लावण्यमयान् लावण्योत्तरान्। लावण्यं हि नामावयवसंस्थानाभिव्यङ्ग्यं निखिलावयवव्यतिरिक्तं किञ्चिदेव तत्त्वान्तरमिति [१.४. ध्वन्यालोकलोचने] ध्वनिकारः [अभिनवः]। विशेषान् अवयवान्। 'विशेषोऽवयवे व्यक्तौ पुण्ये शेषविवर्जिते' इत्युत्पलमालायाम्। ज्योत्स्नया अन्तरं व्यवधानं येषामिति विग्रहः। कलान्तराणि कलाविशेषान्। अत्र हलायुधः—

मध्ये वस्त्रे तथा छिद्रे व्यवधानेऽन्तरात्मनि।
अवकाशे बहिर्योगे विशेषेऽवयवेऽन्तरम्।। इति।

दक्षिणावर्तः—मयटोऽन्तरशब्दस्य चावयवार्थत्वं तु न युक्तम्। नन्वत्रैकेनैवेवशब्देन किं न चरितार्थत्वम्, न, प्रतिपदार्थमुपमितिविवक्षणात्। वाक्यार्थोपमाव्यवहारस्त्वीदृशे विषये, वाक्यार्थव्यापित्वात्। ज्योत्स्नालावण्ययोस्तु वृत्त्यन्तर्भावान्नेवशब्दस्तद्विषयः। अर्थतस्तूपमितिः। तदेवमन्वयः—लब्धोदया चान्द्रमसी रेखेव दिने दिने परिवर्धमाना सा ज्योत्स्नान्तराणि कलान्तराणीव लावण्यमयान् विशेषान् पुपोषेति।।२४।।

विवरणम्

उत्पन्नाया देव्याः शरीरपरिपोषानुरूपां लावण्यवृद्धिमाह—

दिने दिन इति। लब्धोदया चान्द्रमसी रेखेव दिने दिने परिवर्धमाना सा ज्योत्स्नान्तराणि कलान्तराणीव लावण्यमयान् विशेषान् पुपोष। लब्धोदया लब्ध उदय आविर्भाव सूर्यात् पृथग्भावश्च यया। अमावास्यायां सूर्यं प्रविष्टस्येन्दोः पूर्वपक्षारम्भे यस्तस्मात् पृथग्भावः, स एवोदयशब्देनोच्यते। यथोक्तं ज्योतिःशास्त्रे—

भानोः समासन्नतया ग्रहाणामदर्शनं यत् तदिहास्तमुक्तम्।
ततश्च तेषां रविदूरगत्या यद् दर्शनं स्यादुदयं तदाहुः।। इति।

चान्द्रमसी चन्द्रमःसम्बन्धिनी। 'हिमांशुश्चन्द्रमाश्चन्द्र' इत्यमरः। रेखा कलेव, प्रतिपच्चन्द्रकलेवेत्यर्थः। दिने दिने अहन्यहनि परिवर्धमाना वर्धनमुपयान्ती सा पार्वती ज्योत्स्नान्तराणि ज्योत्स्नया चन्द्रिकया अन्तरं व्यवधानम् आच्छादनं येषां तानि, ज्योत्स्नामयानीत्यर्थः। कलान्तराणि कलारूपानवयवानिव।

मध्ये वस्त्रे तथा छिद्रे व्यवधानेऽन्तरात्मनि।
अवकाशे बहिर्योगे विशेषेऽवयवेऽन्तरम्।।

इति हलायुधः। लावण्यमयान् लावण्योत्तरान्। प्राचुर्यार्थे मयट्। विशेषान् अवयवान्। 'विशेषोऽवयवे व्यक्तौ' इत्युत्पलमाला। पुपोष प्राप। यथा पूर्वपक्षप्रतिपदुदिता शशिकला प्रतिदिनमधिकाधिकज्योत्स्नान् कलारूपानवयवान् प्राप्नोति, तथेयमपि जन्मलाभानन्तरमनुदिनं लावण्यप्रचुरानवयवानुपलेभ इत्यर्थः। अवयवसंस्थानविशेषाभिव्यङ्ग्यं निखिलावयवेभ्यो व्यतिरिक्तं यत्किञ्चित् तत्त्वान्तरं लावण्यमिति [१.४ लोचने] **ध्वनिकारः** [अभिनवः]। अत्र प्रतिपदार्थमुपमिते-

र्विवक्षणादिवशब्दद्वयोपादानमिति द्रष्टव्यम्। ज्योत्स्नालावण्ययोस्तूपमानोपमेयभावे सत्यपि तयोः समासान्तर्भावात् तत्रेवशब्दो न प्रयुक्तः॥२४॥

तां पार्वतीत्याभिजेनेन नाम्ना
बन्धुप्रियां बन्धुजनो जुहाव।
उ मेति मात्रा तपसो निषिद्धा
पश्चादुमाख्यां सुमुखी जगाम॥२५॥

प्रकाशिका

तां पार्वतीति। आभिजनेनाभिजनमिमित्तेन। जुहाव आकारितवान्। उ इति तपोवाचकमव्ययम्। मा निषेधे। तपसे मा भवेति निषिद्धेत्यर्थः॥२५॥

विवरणम्

नामकरणप्रकारमाह—

तामिति। बन्धुजनः ताम् आभिजनेन नाम्ना पार्वतीति जुहाव। बन्धुजनः महामेरुप्रभृतयो बन्धवः तां गौरीम् आभिजनेन अभिजन आभिजात्यं तन्निमित्तम् आभिजनम् आभिजात्यनिमित्तेन नाम्नेत्यर्थः। जुहाव 'ह्वेञ् स्पर्धायां शब्दे च'इत्यस्माद्धातोर्लिटि रूपम्। धातूनामुपसर्गेण येऽर्थाः प्रतीयन्ते ते सर्वेऽपि तेषां स्वार्था एव। उपसर्गाणां पुनरभिव्यञ्जकत्वम्। यदाह माघः—धातुलीनमुपसर्ग इवार्थम् (१०.१५) इति। तस्माद् युक्त एवात्रोपसर्गेण विनापि प्रयोगः। देवतात्मकत्वादभिजनसम्पन्नस्य पर्वतस्यापत्यमिति व्युत्पत्त्या बन्धवस्तां पार्वतीत्याहूतवन्त इत्यर्थः। बन्धुजनस्य तद्विषयां प्रीतिमाह—बन्धुप्रियामिति। बन्धूनां प्रियामिष्टाम्। अनेनाह्वाने तेषामादरातिशयो द्योत्यते। एवं नामान्तराण्यपि सञ्जातानीति दर्शयन्नाह—सुमुखी मात्रा उ मा इति तपसः निषिद्धा पश्चाद् उमाख्यां जगाम। शोभनं मुखं यस्याः सा सुमुखी। अनेन स्मितपूर्वभाषित्वादिरूपो महागुणो दर्शितः। मात्रा मेनया उशब्दस्तपोवाचकमव्ययम्। 'उ तापेऽव्ययमीशे ना' इति यादवः। माशब्दो निषेधवाचकमव्ययम्। 'मा स्म मालं च वारण' इत्यमरः। तपो मा भवेदिति तपसः सकाशान्निषिद्धा वारिता सती पश्चात् तपश्चरणारम्भकाले उमाख्याम् उमेत्याख्यां च जगाम प्राप्तवती। मृदुशरीरा कठिनतरं तपः कर्तुकामा रोगभीतया जनन्या 'मनीषितायार्च' (५.४) इत्यादिवक्ष्यमाणप्रकारेण तपसः सकाशान्निषिद्धा सती सा पश्चादुमेति नाम च जगामेत्यर्थः। एवं देव्या गुणकर्मानुरूपाणि नामान्तराण्यपि बभूवुरिति भावः॥२५॥

महीभृतः पुत्रवतोऽपि दृष्टि-
स्तस्मिन्नपत्ये न जगाम तृप्तिम्।
अनन्तपुष्पस्य मधोर्हि चूते
द्विरेफमाला सविशेषसङ्गा॥२६॥

प्रकाशिका

महीभृत इति। अत्र पर्यायप्रक्रमभङ्गदोषं पश्यन् काव्यप्रकाशकृदुक्तवान्—अपत्यवतोऽपीति युक्तम्। अत्र सत्यपि पुत्रे कन्यारूपेऽपत्ये सस्नेहोऽभूदिति केचित् समर्थयन्त इति। तस्य चान्यदीयं समर्थनमपि नानुमतम्। अनुमतत्वे पाठान्तरं न दद्यात्। दत्त्वा वा यद्वेत्यादि विकल्पवाचि पदमनन्तरवाक्ये प्रयुञ्जीत। न च केचिदित्येकीयमतत्वेन निर्दिशेत्। युक्तं चैतत्। तथाहि—प्रतिवस्त्वलङ्कारे दृष्टान्तदार्ष्टान्तिकयोर्वाक्यार्थयोर्बिम्बप्रतिबिम्बभावेन भाव्यम्। अन्यथा तद्भावासंभवात् तदसम्भवे च भवत्येकवाक्यता न स्यात्। एवं स्थितेऽत्र दृष्टान्ते पुष्पशब्देन सामान्यवाचिनोपक्रमे चूतशब्देन विशेषवाचिनोपसंहारः। दार्ष्टान्तिके पुत्रशब्देन विशेषवाचिनोपक्रमे अपत्यशब्देन सामान्यवाचिनोपसंहारः, सर्वनामवशाद्वा विशेषान्तरवाचिनोपसंहारः। ततश्च न बिम्बप्रतिबिम्बभाव इति। ननु—

> आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियान्त्वमी।
> आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे॥

इत्यमरसिंहवचनाद् विशेषवाचिनः पुत्रशब्दस्य कथमपत्यपर्यायत्वम्। भिन्नव्युत्पत्तिनिमित्तयोः प्रवृत्तिनिमित्तैक्ये हि पर्यायत्वम्। नैवम्। सामान्यवाच्यपि पुत्रशब्दोऽस्ति। तथाश्वलायनगृह्ये दर्शनाद् 'यदि कामयते पुमांस एव मे पुत्रा जायेरन्नि'ति। एवञ्च सामान्यविशेषरूपोभयार्थवाचिनः पुत्रशब्दस्य सामान्यार्थत्वे पर्यायप्रक्रमभङ्गः। तत्परिहाराय तु विशेषार्थत्वे वाक्यार्थयोरनन्वयः। तत्रानन्वयात् पर्यायप्रक्रमभेदो वरम्। तदपेक्षयाल्पदोषत्वात्। महाकविप्रयोगे चासंभावनीयस्तादृशो वाक्यार्थदोषः। न हि मन्दचक्षुरपि पुरःस्थं द्विरदवरं न पश्येत्, किमुत चक्षुष्मान्। अनयैव खलु युक्त्या व्यक्तिविवेककाव्यप्रकाशकारौ महामती प्रक्रमभेदमेवाङ्गीचक्रतुः॥२६॥

विवरणम्

पितुस्तस्यां स्नेहातिशयमाह—

महीभृत इति। महीभृतः दृष्टिः तस्मिन् अपत्ये तृप्तिं न जगाम। महीभृतो हिमवतो दृष्टिर्नेत्रद्वयी तस्मिन् पार्वतीरूपे अपत्ये।

आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियान्त्वमी।
आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे।। इत्यमरः।

तृप्तिम् अलम्भावं न जगाम न प्राप्ताभूत्। हिमवतो दृष्टिः पार्वत्यामेव सस्पृहं सक्ताभूदित्यर्थः। ननु किमपत्यान्तरराहित्यं तत्र हेतुः, नेत्याह—पुत्रवतोऽपीति। स्त्रीरूपे पुरुषरूपे चापत्यान्तरे सत्यपीत्यर्थः। तत्र स्त्रीरूपमपत्यान्तरं गङ्गा। तदुक्तं श्रीकृष्णविलासे—

अधीशितुः सानुमताममुष्य कः स्तोतुमीष्टे कमलाक्ष! कन्ये।
ययोः स देवः स्मरशत्रुरेकां धत्ते जटायामपरां शरीरे।। इति।

सामान्यवाच्यपि पुत्रशब्दोऽस्ति। तदुक्तमाश्वलायनगृह्ये 'यदि कामयते पुमांस एव मे पुत्रा जायेरन्' (१.७.३) इति। अत्र प्रतिवस्तूपमामाह—अनन्तपुष्पस्य मधोः द्विरेफमाला चूते सविशेषसङ्गा हीति। अनन्तानि निरवधिकानि पुष्पाणि कमलादीनि यस्य, तस्य मधोर्वसन्तस्य द्विरेफमाला भ्रमरसन्ततिः चूते सहकारकुसुमे सविशेषसङ्गा सविशेषं विशेषसहितं यथा भवति तथा सङ्गः सक्तिर्यस्याः सा तथा। हिशब्दः प्रसिद्धौ। उक्तञ्च रघुवंशे 'न हि प्रफुल्लं सहकारमेत्य वृक्षान्तरं काङ्क्षति षट्पदाली' (६.६९) इति। अत्र महीभृद्वसन्तौ दृष्टिद्विरेफमाले पुत्रान्तरपुष्पान्तराणि पार्वतीरूपापत्यचूतकुसुमे च परस्परं बिम्बप्रतिबिम्बभावमनुभवन्ति। अत एव पुत्रशब्दः 'आत्मजस्तनयः सूनुरि'त्याद्यमर-सिंहवचनमतिक्रम्याश्वलायनमतेन सामान्यवाचित्वेन व्याख्यातः। अन्यथा सामान्यवाचिनः पुष्पशब्दस्यैतत्प्रतिबिम्बत्वाभावप्रसङ्गात्। बिम्बप्रतिबिम्बभावाभावे च प्रतिवस्तुत्वमपि विरुध्यत एव। प्रतिवस्तुत्वाभावे पुनरेकवाक्यता न स्यादित्य-लमनेन। यत् पुनरत्र पुत्रवतोऽपीत्युपक्रम्य पर्यायान्तरेणापत्यशब्देनोपसंहार इति पर्यायप्रक्रमभेददोष इति, तत्तु महाकविप्रयोगस्य महनीयगुणान्तरास्पदत्वात् सहनीयम्। यत्तु पर्यायप्रक्रमभेदभयाद् महीभृतोऽपत्यवतोऽपीति पाठान्तरं दत्तं, तदपि तादृशगुणाभावादेवोपेक्षणीयम्। अत्रात्यासङ्गः साधारणो धर्मः शब्दभेदेन वाक्यद्वयेऽप्युपात्त इति प्रतिवस्तूपमालङ्कारः। वाक्यार्थगतत्वेन सामान्यस्य वाक्यद्वये पृथङ्निर्देशे प्रतिवस्तूपमेति। नात्रार्थान्तरन्यासत्वं शङ्कनीयं, सामान्यविशेषभावाभावात्। नापि दृष्टान्तालङ्कारत्वं, साधारणधर्मस्यापि बिम्बप्रतिबिम्बभावाभावात्।।२६।।

प्रभामहत्या शिखयेव दीप-
स्त्रिमार्गयेव त्रिदिवस्य मार्गः।
संस्कारवत्येव गिरा मनीषी
तया स पूतश्च भूषितश्च॥२७॥

प्रकाशिका

प्रभेति। दीपो नाम स्निग्धवर्त्यादिगतो वह्निः। शिखा तु तस्य क्षणनश्वरोऽवयवप्रसरः। त्रिदिवस्य मार्ग आकाशः। संस्कारवत्या लक्षणानुसारिण्या। दीपस्य पूतत्वमवतमसमेलनाभावः। आकाशस्य तच्छीकरादिसम्पर्कात् तत्रत्यानां दुरितक्षयः। मनीषिणः पुण्यलाभः। तदुक्तम्—'एकः शब्दः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग् भवती'ति। महीभृतस्त्वनुग्रहोन्मुखया तया मलमायाकर्मतत्कार्याणां दग्धप्रायता। विभूषितत्वं तु सर्वत्र जनितशोभत्वम्। अत्र व्यङ्ग्येनापि केनचित् साधारणधर्मेण प्रत्युपमानं भिन्नेनावश्यं भवितव्यमिति केचिन्मन्वते। न तदलङ्कारकृतामनुमतम्। अनुमतं चेन्मालोपमाप्रस्तावेऽभिदध्युः। ते तु प्रत्युतास्या अभिन्नभिन्नधर्मत्वेन द्वैविध्यमूचुः।

अधनस्येव दातृत्वं क्लीबस्येवास्त्रकौशलम्।
अज्ञस्येव प्रगल्भत्वमकवेः शास्त्रवेदनम्॥

इत्यत्र त्वश्रूयमाणत्वात् साधारणधर्मस्याक्षेपे कर्तव्ये औचित्यादनेक आक्षिप्यते, न तु व्यज्यते। यत्र तु महाकविप्रयोगे क्वचिद् व्यङ्ग्येनापि भूयेत तत्राधिकं चारुत्वमस्तु। न त्वेतावता तन्नियमः। न चैकस्मिन्नुपमान उपात्ते उपमानान्तर-वैयर्थ्यशङ्कया यव्यङ्ग्यधर्मभेदो मृग्यः। उपमानान्तरम्य सौन्दर्यातिशयहेतुत्वात्। यथालङ्कारान्तरस्य चन्द्र इव वदनकमलमस्या इति॥२७॥

विवरणम्

अथानुग्रहोन्मुखया भगवत्या हिमाचलस्य मायातत्कार्याणां दग्धप्रायत्वं जनितशोभत्वं चाह—

प्रभेति। सः तया पूतश्च विभूषितश्च। सः हिमवान् तया निजानुग्रहार्थमेव निजपुत्रीत्वमनुभवन्त्या देव्या पूतः संसारप्रवर्तकाज्ञानविनाशनवशाद्विशुद्धान्तःकरणः विभूषितः इतस्ततः सञ्चरन्त्या तया जनितशोभश्च बभूवेति शेषः। अत्रोपमात्रय-माह—प्रभेत्यादि। दीपः प्रभामहत्या शिखयेव। स्निग्धवर्त्त्यादिद्रव्यवर्ती वह्निर्दीप इत्युच्यते। प्रदीपात् प्रतिक्षणमुद्गच्छन्नालोकप्रसरः शिखेत्युच्यते। प्रभया शोभया

महती प्रभामहती। यथा दीपः प्रभामहत्या शिखया पूतश्च विभूषितश्च भवति, तथायमपि तयेत्यर्थः। शिखया दीपस्य पूतत्वं तमोऽनभिभवनीयत्वं, विभूषितत्वं तु स्पष्टमेव। अनेनोपमानेन लोकान्तरेऽप्यज्ञानाभिभवो न भविष्यतीति द्योत्यते। उपमानान्तरमाह—त्रिदिवस्य मार्गः त्रिमार्गया इव। त्रिदिवस्य मार्ग आकाशः। पातालभूतलाकाशवाहिनीत्वात् त्रयो मार्गा यस्याः सा त्रिमार्गा गङ्गा, आकाशस्य गङ्गया पूतत्वं तच्छीकरादिसम्पर्कात् तत्रत्यानां दुरितनिवृत्तिः। विभूषितत्वं दर्शनीयत्वम्। अनेनोपमानेन हिमवतः समीपवर्तिनामपि जनानां शुद्धिर्दर्शिता। उपमानान्तरमप्याह—मनीषी संस्कारवत्या गिरेवेति। मनीषी विद्वान् संस्कारवत्या व्याकरणादिलक्षणानुसारिण्या गिरा वाचेव। अत्र मनीषिणः पूतत्वं सुकृतलाभः। तदुक्तं—

> यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले।
> सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः।। इति।

विभूषितत्वं जनबहुमानास्पदत्वम्। अनेनोपमानेन हिमवतः पङ्क्तिपावनत्वं द्योत्यते। अत्र मनुः—

> यश्च व्याकुरुते वाचं यश्च मीमांसतेऽध्वरम्।
> तावुभौ पुण्यकर्माणौ पङ्क्तिपावनपावनौ।।

इति।।२७।।

मन्दाकिनीसैकतवेदिकाभिः
सा कन्दुकैः कृत्रिमपुत्रकैश्च।
रेमे मुहुर्मध्यगता सखीनां
क्रीडारसान्निर्विशतीव बाल्यम्।।२८।।

प्रकाशिका

मन्दाकिनीति। क्रीडारसादिति पाठः। निर्विशतीति हेत्वर्थे शता। यथा राजानमाराधयन् धनं विन्देतेति। यथा क्रीडारसहेतुकमस्या बाल्यग्रहणं तद्धेतुकं च रमणमित्युत्प्रेक्ष्यते, तथा सातिशयं रेम इत्यर्थः। ननु बाल्यग्रहणस्य रमणे हेतुत्वं नोत्प्रेक्ष्यं, वास्तवत्वात्। न। क्रीडारसहेतुकस्य तस्य तदसिद्धेः। लोकानुजिघृक्षया हि सर्वो व्यापारो भगवत्याः। तर्हि तदेवोत्प्रेक्ष्यं, न तु बाल्यग्रहणस्य रमणे हेतुत्वमपि। नैवम्। बाल्यग्रहणस्यैवासिद्धायमानत्वात्। यथा विधिवाक्ये चारेण पश्येदित्यादौ प्रधानभूतदर्शनादिक्रियाभिनिर्वर्तकस्वक्रियाभिसंवन्धाच्चारादेः साध्याय-

मानता, तथेहाप्यसिद्धक्रीडारसहेतुकत्वान्वयाद् बाल्यग्रहणस्यासिद्धायमानता। तत्र च यथा चारादेः करणत्वादिमात्रं विधेयं, तथात्र बाल्यग्रहणस्य हेतुत्वमात्रम्। यथा च प्रमाणान्तरसिद्धत्वाद् दर्शनादेर्न विधेयत्वं, तथा प्रकृतत्वाद् रमणस्य नोत्प्रेक्ष्यत्वम्। न चानैकान्तिकः प्रकृतत्वहेतुः। प्रकृतस्य ह्यतिशयाधानाय तत्राप्रकृतमुत्प्रेक्ष्यते। प्रकृतं तु तस्य विषयत्वेनावतिष्ठते। तस्येहोत्प्रेक्ष्यत्वे मिथ्यात्वमनलङ्कारत्वं च स्यात्। अलङ्कारान्तरेष्वप्ययं न्यायोऽनुसन्धेयः। तर्हि 'त्वन्मुखमिव कमलमि'त्यत्र कथं प्रकृतस्योपमानत्वम्। न तत्रोपमानत्वं वास्तवम्। इह तूत्प्रेक्ष्यत्वं वास्तवमेवेति विशेषः। एवञ्चोक्तन्यायेन रमणस्याप्यसिद्धायमानत्वं स्यादिति चोद्यमपि परिहृतम्। अथवा क्रीडारसहेतुकत्वविशिष्टस्य बाल्यग्रहणस्यासिद्धत्वं, यथा 'कपालेनोन्मुक्तः स्फटिकधवलेनाङ्कुर इवे'त्यत्र कपालोन्मुक्तत्वविशिष्टस्याङ्कुरस्य। क्रीडारसमिति पाठे क्रीडया क्रीडारसेन रसो यत्रेति विग्रहेऽप्ययमेवार्थनिर्वाहः॥२८॥

विवरणम्

क्रमेण सम्पन्नबाल्यावस्थाया देव्याः क्रीडाप्रकारानाह—

मन्दाकिनीति। सा सखीनां मध्यगता मन्दाकिनीसैकतवेदिकाभिः कन्दुकैः कृत्रिमपुत्रकैश्च मुहुः रेमे। सा पार्वती सखीनां मध्यं मध्यभागं गता सती। अनेन सखीनां तद्दर्शनमात्रकौतुकं ध्वनितम्। मन्दाकिनीसैकतवेदिकाभिः मन्दाकिन्या गङ्गायाः सैकते पुलिने। 'तोयोत्थितं तत् पुलिनं सैकतं सिकतामयमि'त्यमरः। या वेदिकाः कौतुकात् स्वेनैव रचिता इत्यर्थात् सिध्यति। ताभिः मन्दाकिनीतटे स्वेनैव रचितैः सिकतासन्निवेशमयैः मण्डपविशेषैरित्यर्थः। कन्दुकैः कन्दुकाघातैः कृत्रिमपुत्रकैः कृत्रिमैः करणनिर्वृत्तैः पुत्रकैः। अल्पार्थे कः। बालपुत्रैः पुत्रत्वेन कल्पितैर्दारुविशेषैरित्यर्थः। मुहुः पुनः पुनः, अनवरतमित्यर्थः। भृशार्थे वा मुहुश्शब्दः। चकारोऽनुक्तानामपि समुच्चयार्थः। अनुक्ताश्च तेऽर्था बालस्वभावादेवावसेयाः। रेमे चिक्रीड। 'रमु क्रीडायाम्' इति धातुः। इत्थं देव्याः सखीभिः सह सततं विहितायां क्रीडायां हेतुमुत्प्रेक्षते—क्रीडारसाद् बाल्यं निर्विशतीवेति। क्रीडारसात् क्रीडायां यो रसः रागः, तस्माद्धेतोः बाल्यं बालभावं निर्विशती अनुभवन्ती सतीव। निर्विशतीति हेतौ शता। क्रीडारसादेव बाल्यमवलम्ब्यावस्थितत्वादिवेत्यर्थः। 'कृष्णमाराधयन्नपवर्ग लभत' इतिवत्। अत्रातिमहत्येवंविधे रमणे बाल्यानुभवरूपो हेतुरुत्प्रेक्ष्यते, बाल्यानुभवे च क्रीडारस इति विवेकः। यथा नित्याया भगवत्याः क्रीडारसहेतुकं बाल्यग्रहणं, बाल्यग्रहणहेतुकं च रमणमित्युत्प्रेक्ष्यते, तथा सातिशयं रेम अत्यर्थः। जगदुपकृतिमात्रव्यापाराया देव्या बाल्यग्रहणादिव लोकोत्तरं रमणमित्येकोत्प्रेक्षा, क्रीडारसादिव बाल्यग्रहणमित्यन्या॥२८॥

तां हंसमालाः शरदीव गङ्गां
महौषधिं नक्तमिवात्मभासः।
स्थिरोपदेशामुपदेशकाले
प्रपेदिरे प्राक्तनजन्मविद्याः॥२९॥

प्रकाशिका

तामिति। स्थिरो वासनारूपेण उपदेशः पूर्वजन्मकृतो यस्याः। उपदेश आचार्यैः कृतः, तस्य काले यौवनादर्वाचि वयसि। यदाह मुनिः 'प्राग् यौवनाद् युवतिरि'ति। न च विद्यासु स्त्रिया नाधिकारः। तस्यापि मुनिना समर्थितत्वात्। अत्र स्थिरोपदेशामिति उपदेशकाल इति च विद्याविनयस्य स्वाभाविकः कृतकश्चेति यावंशावुक्तौ, तयोः प्रत्येकं प्रतिविम्बनायोपमानद्वयं दत्तमित्यवसेयम्। आचार्याणामनतियत्नश्च द्योत्यते॥२९॥

विवरणम्

अथ देव्या विद्याग्रहणप्रकारमाह—

तामिति। प्राक्तनजन्मविद्याः उपदेशकाले तां प्रेपदिरे। प्राक्तनजन्मविद्याः प्राक्तने प्राचीने जन्मनि दक्षसुतात्वावस्थायां या विद्यास्ताः सर्वा अपि उपदेशकाले आचार्यैः क्रियमाणस्योपदेशस्य काले समये। स च यौवनोत्पत्तेः पूर्वकालः। यदाह मुनिः 'प्राग् यौवनाद् युवतिरि'ति। विद्यां ग्राहयितव्येति शेषः। तां पार्वतीं प्रपेदिरे संप्रापुः। प्राक्तनजन्मविद्याः आचार्योपदेशमात्रं निमित्तीकृत्य देवीं प्रतिपेदिर इत्यर्थः। तत्र हेतुमाह—स्थिरोपदेशामिति। स्थिराः वासनारूपेण पूर्वमेव वर्तमानाः उपदेशाः पूर्वजन्मकृताः यस्यां, ताम्। अनेन स्वाभाविको विद्याविनय उक्तः, उपदेशकाल इत्यनेन कृतकः। द्विविधो विद्याविनयः। यदाह विष्णुगुप्तः—'कृतकः स्वाभाविकश्च विनयः' (कौटि. अर्थ. १.५.२) इति। तत्र कृतके विद्याविनये प्रथममुपमानं दर्शयति—हंसमालाः शरदि गङ्गामिवेति। हंसमालाः हंसपङ्क्तयः शरदि शरत्काले गङ्गामिव।. हंसानां वर्षासु मानसे स्थितिः, पुनश्च शरदारम्भे स्वाभिमतेषु भागीरथीप्रदेशादिष्विति प्रसिद्धिः। स्वाभाविके विद्याविनयेऽप्युपमानमाह—आत्मभासः नक्तं महौषधिमिवेति। आत्मभासः दिवसेषु सूर्यप्रभाभिभूता निजा एव भासः प्रभाः। नक्तमिति रात्रिवाचकमव्ययम्। 'दोषा च नक्तं च रजनौ' इत्यमरः। महौषधिं रात्रावुज्ज्वलं वृक्षविशेषमिव। यथा सूर्यप्रभाभिभूता निजा एव प्रभाः सूर्यप्रभातिरोभावे महौषधिं प्राप्नुवन्ति, तथा बाल्यादप्रकाशमाना वासनारूपेण पूर्वमपि विद्यमाना विद्यास्तामपीत्यर्थः। अत्रोपमाद्वयेनाचार्याणामनतिप्रयासो व्यज्यते॥२९॥

असम्भृतं मण्डनमङ्गयष्टे-
रनासवाख्यं करणं मदस्य।
कामस्य पुष्पव्यतिरिक्तमस्त्रं
बाल्यात् परं साथ वयः प्रपेदे॥३०॥

प्रकाशिका

असम्भृतमिति। असंभृतमसंपादितं मण्डनमलङ्क्रियासाधनम्। अनासवाख्यं आसवत्वशून्यमित्यर्थ। अस्त्रं जयसाधनम्। अथानन्तरं, कालक्रमेणेत्यर्थः। अत्र संभृतत्वादिर्मण्डनादेः प्रसिद्धो हेतुर्व्यावर्त्यते, हेत्वन्तरं च स्तनोद्भेदधातूपचयलावण्यलक्ष्मीलाभादिर्विभाव्यत इति विभावनात्रालङ्कार इति भोजः। कश्चित् तु विभावनायाममुं श्लोकमुदाहृत्य 'अत्र द्वितीये पादे मदस्य प्रसिद्धं यदासवाख्यं करणं तदभावेऽपि यौवनहेतुकत्वेनोपनिबन्धः कृत' इति योजनां कृत्वा 'असंभृतं मण्डनमिति कामस्य पुष्पव्यतिरिक्तमस्त्रमिति चात्र विवदन्ते—इयमेव विभावनेति केचित्। संभरणस्य पुष्पाणां च मण्डनमस्त्रं च प्रत्यकारणत्वाद् वार्तमेतद्' इति पादद्वये विभावनां निराकृतवान्। तत्र च रूपकमुत्कटत्वेन प्रतीयते॥३०॥

विवरणम्

अथ यौवनावस्थां वर्णयितुमुपक्रमते—

असम्भृतमिति। अथ सा बाल्यात् परं वयः प्रपेदे। अथ विद्याग्रहणानन्तरं, कालक्रमेणेत्यर्थः सा यौवनारम्भात् पूर्वमपि लोकोत्तरशरीरलावण्या पार्वती। अनेन शरीरसामान्यमपि यौवनारम्भे मनोहरं भवति, किं पुनः शरीरविशेष इति दर्शितम्। तेन च वक्ष्यमाणानां गुणानामुपपत्तिर्ध्वन्यते। बाल्यात् परं वयः यौवनं प्रपेदे प्राप्तवती। कीदृशं पुनस्तदित्यत्राह—असम्भृतमित्यादिना विशेषणत्रयेण। तत्रादौ नेत्रानन्दकरत्वमाह—अङ्गयष्टेः असम्भृतं मण्डनमिति। अङ्गयष्टेः प्रशस्ताङ्गस्य, 'हस्तयष्टिलतादयः प्रशंसावचना' इत्युक्तत्वात्। अत्राङ्गविशेषानुपादानादस्य सर्वाङ्गीणत्वमुक्तम्। असम्भृतम् असम्पादितं मण्डनम् अलङ्क्रियासाधनम्। अप्रयाससाध्यं नयनानन्दनजनकमलङ्कारसाधनमित्यर्थ। शरीरशोभापादनद्वारा नयनानन्दकारित्वं मण्डनत्वरूपणे हेतुः। दर्शनानन्तरभवस्य चित्तविकारस्यापि हेतुत्वमाह—मदस्य अनासवाख्यं करणमिति। मदस्य अन्तःकरणविभ्रमस्य। 'सम्मोहानन्दसम्भेदो मदिरादिकृतो मदः' इति भोजः। अनासवाख्यम् आसवो मद्यम्। आसव इत्याख्या यस्य नास्ति तदनासवाख्यम्। करणं साधकतमम्। 'करणं साधकतमे क्षेत्रगात्रेन्द्रियेष्वपि' इति सिंहः। आसवव्यतिरिक्तं मदकारणमित्यर्थः।

अनेन मदकरेभ्यो द्रव्यान्तरेभ्यो व्यतिरेक उक्तः। मनोहरवस्तुदर्शनं मदकारणमित्युक्तं रघुवंशे 'अमदयन् सहकारलता मनः सकलिकाः कलिकामजितामपि' (९.३३) इति, 'किसलयप्रसवोऽपि विलासिनां मदयिता दयिताश्रवणार्पितः' (९.२८) इति च। चित्तविकारानन्तरभवस्य कामविकारस्यापि हेतुत्वमाह—कामस्य पुष्पव्यतिरिक्तम् अस्त्रमिति। कामस्य मदनस्य पुष्पव्यतिरिक्तं पुष्पाद् व्यतिरिक्तं पुष्पादन्यत् पुष्पादत्यन्तोत्कृष्टमिति च प्रतीयते। 'व्यतिरिक्तः समधिक' इत्यमरः। अस्त्रं जयसाधनम्। अथास्यैव श्लोकस्यापरा व्याख्या—बाल्यात् परं साथ वयः प्रपेदे इत्यत्र नार्थलाभः। यौवनस्य नैसर्गिकं शरीरशोभाहेतुत्वमाह—अङ्गयष्टरसम्भृतं मण्डनमिति। अत्र यौवनस्य मण्डनत्वरूपणेन मण्डनवच्छोभाहेतुत्वमुक्तम्। तेन च देव्याः शरीरे तद्धेतु कोऽपि शोभाविशेषो जात इति व्यज्यते। सविलासगमनादिनिदानभूतस्य मदस्यापि हेतुत्वमाह—मदस्य अनासवाख्यं करणमिति। यौवनस्य मदकारणत्वं प्रसिद्धम्। यथोक्तम् 'उपदिशति कामिनीनां यौवनमद एव ललितानि' इति। विशेषणद्वयेनोक्तस्यार्थस्य फलमाह—कामस्य पुष्पव्यतिरिक्तमस्त्रमिति। मदनस्य त्रैलोक्यजयसाधनमित्यर्थः। केचित् तु देवीजयस्यैव साधनमिति व्याचक्षते। अस्य श्लोकस्यालङ्कारनिर्णये भोजराजप्रभृतिभिरनेकधा विवादः कृतः। सर्वत्र विभावनेति भोजराजः। द्वितीयपाद एव विभावनेति मङ्खुकः। वामनः पुनः 'एकगुणहानकल्पनायां साम्यदार्ढ्यं विशेषोक्तिः' इति लक्षणमाश्रित्य विशेषोक्तिरलङ्कार इत्युक्तवान्। यौवनस्य मण्डनत्वादिरूपणाद् रूपकालङ्कार एव स्फुटः। सव्यतिरेकं चेदं रूपकमित्यस्मद्गुरोरुपदेशः॥३०॥

उन्मीलितं तूलिकयेव चित्रं
सूर्यांशुभिर्भिन्नमिवारविन्दम्।
बभूव तस्याश्चतुरस्त्रशोभं
वपुर्विभक्तं नवयौवनेन॥३१॥

प्रकाशिका

उन्मीलितमिति। उन्मीलितं स्फुटीकृतम्। तूलिकया चित्रलेखनशलाकया। भिन्नं विकासितम्। चतुरस्त्रा शोभा यस्य। चतुरस्त्रब्दोऽयं निरूढलक्षणया समग्रार्थः। चतुरस्त्रशोभीति पाठे चतुरस्त्रं शोभितुं शीलमस्येति णिनिरिति वामनः। विभक्तं व्यक्तीकृतस्तनजघनादिसंस्थानमित्यर्थः। तूलिकयोन्मीलितं चित्रमिव सूर्यांशुभिर्भिन्नमरविन्दमिव च नवयौवनेन विभक्तं तस्या वपुश्चतुरश्रशोभं बभूवेत्यन्वयः। अत्रोन्मीलितभिन्नत्वे विभक्तत्वं च दृष्टान्तलङ्कारवदन्योन्यं बिम्बप्रतिबिम्बभावेन

स्थितानि यथास्वं धर्मिणि साधारणधर्मभूतस्य चतुरश्रशोभत्वस्य हेतवः। प्रथमेनोपमानेन सातिशयचमत्कारहेतुत्वं द्वितीयेन तु विशिष्टोपयोगयोग्यत्वं च वपुषः प्रत्याय्यते। नवशब्देन त्वापातत एवेदृशकार्यकारि यौवनं लब्धप्रतिष्ठत्वे कि कि न कुर्यादिति द्योत्पते। ननु लिङ्गवचनकालभेददोषाः कथमत्र न स्युः। उच्यते। दष्टताहेतोः साधारणधर्मभेदस्याभावादाद्ययोर्न दुष्टत्वम्। तृतीयस्तु कविप्रभावेण निराक्रियते।।३१।।

विवरणम्

तादृशावस्थायास्तस्याः शरीरसुषमां वर्णयति—

उन्मीलितमिति। नवयौवनेन विभक्तं तस्या वपुस्तूलिकया उन्मीलितं चित्रमिव सूर्यांशुभिर्भिन्नमरविन्दमिव चतुरश्रशोभं बभूव। नवयौवनेन नवेन यौवनेन। अत्र नवशब्देन यौवनमिदमारम्भावस्थायामेवैतादृशं कार्यं चकार, लब्धप्रतिष्ठं पुनः कि किं न कुर्यादिति द्योत्यते। विभक्तं कृतविभागं, व्यक्तीकृतस्तनजघनाद्यवयवसंस्थानमित्यर्थः। तस्याः पार्वत्या वपुः शरीरं तूलिकया चित्रलेखनशलाकया उन्मीलितं स्फुटीकृतं चित्रमिव। अनेनोपमानेन सातिशयचमत्कारहेतुत्वं वपुषः प्रतिपादितम्। सूर्यांशुभिः सूर्यस्यांशुभिः भिन्नं विकासितमरविन्दमिव। अनेन विशिष्टोपयोगयोग्यत्वम्। चकारोऽध्याहार्यः। चतुरश्रशोभं चतुरश्रा समग्रा शोभा यस्य तत् तथा। चतुरश्रशब्दोऽयं निरूढलक्षणया समग्रार्थवाचकः। सम्पूर्णशोभमित्यर्थः। बभूव सञ्जातम्। अत्र चतुरस्त्रशोभत्वम् उपमानद्वयस्योपमेयस्य च साधारणो धर्मः। अत्र तूलिकोन्मीलितत्वसूर्यांशुभिन्नत्वे यौवनविभक्तावयवत्वं च दृष्टान्तालङ्कारवत् परम्परं बिम्बप्रतिबिम्बभावमनुभवन्ति, साधारणधर्मभूतस्य चतुरश्रशोभत्वस्य हेतुभावमप्यनुभवन्ति।।३१।।

अभ्युन्नताङ्गुंष्ठनखप्रभाभि-
र्विक्षेपणाद् रागमिवोद्गिरन्तौ।
आजह्नतुस्तच्चरणौ पृथिव्यां
स्थलारविन्दश्रियमव्यवस्थाम्।।३२।।

प्रकाशिका

अभ्युन्नतेति।

यस्या रक्तनखौ पादावुन्नताग्रौ तलस्पृशौ।
निगूढगुल्फौ निचितौ सा स्यान्नृपतिसम्मता।।

इति सामुद्रिकवचनाद् अभ्युन्नतत्वविशेषणम्। स्त्रीनखानां रक्तत्वमुचितम्। तथा चास्यान्यः प्रयोगः 'अग्रे स्त्रीनखपाटलं कुरवकं श्यामं द्वयोर्भागयोरि'-[विक्रमोर्व. २.७]ति। विक्षेपणात् सवेगप्रेरणात्, तज्जनितात् खेदादित्यर्थः। रागं लाक्षाम्। 'रागोऽनुरागे लाक्षायामि'ति यादवः। अव्यवस्थां सञ्चारिणीम्। अतः सविशेषेयं निदर्शना। 'हस्ती हि जङ्गमं दुर्गमि'ति सशिषरूपकवत्॥३२॥

विवरणम्

अथ षोडशभिः श्लोकैर्देव्या अवयवान् वर्णयति। तत्रादौ अङ्गुष्ठयोः शोभातिशयं चरणयोः शोभां चाह—

अभ्युन्नतेति। तच्चरणौ स्थलारविन्दश्रियमाजह्रतुः। तच्चरणौ तस्या देव्याश्चरणौ पादारविन्दे स्थलारविन्दश्रियं स्थलारविन्दस्य स्थलपद्मस्य श्रीः शोभा या ताम् आजह्रतुराहृतवन्तौ। तत्र हेतुमुत्प्रेक्षते—पृथिव्यां विक्षेपणादभ्युन्नताङ्गुष्ठनखप्रभाभी रागमुद्गिरन्ताविवेति। पृथिव्यां भूम्यां विक्षेपणात् पदविन्यासाद्धेतुना। अभ्युन्नताङ्गुष्ठनखप्रभाभिः अभ्युन्नतयोस्तलस्पर्शनसमयेऽधिकमुन्नताग्रयोरिति यावत्। तयोरङ्गुष्ठयोर्यौ नखौ तयोः प्रभाभिः करणभूताभिः रागं लाक्षाम्। 'रागाऽनुरागे लाक्षायाम्' इति यादवः। उद्गिरन्तौ उद्वमन्ताविव। पूर्वसेवितं लाक्षारसं स्वभावारुणैर्नखमयूखैरुद्वमन्ताविवेत्यर्थः। खेदाकुला हि पूर्वसेवितमुद्वमन्तीति भावः। तत्राहरणहेतुं श्रीविशेषणमाह—अव्यवस्थामिति। सञ्चारिणीमिति यावत्। अनेनारविन्दश्रीविशेषणेन तन्नखश्रीः सर्वदैवेति द्योतितं, न तलस्पर्शनसमय एवेति भावः। अत्र नखमयूखानां रागातिशय उत्प्रेक्षाहेतुः। चरणाग्रस्याभ्युन्नतत्वं रक्तनखत्वं च महाभाग्यद्योतकम्। यथोक्तं सामुद्रिके—

> यस्या रक्तनखौ पादावुन्नताग्रौ तलस्पृशौ।
> निगूढगुल्फौ निचितौ सा स्यान्नृपतिसम्मता॥

इति॥३२॥

सा राजहंसैरिव सन्नतांसा
गतेषु लीलाञ्चितविक्रमेषु।
व्यनीयत प्रत्युपदेशलुब्धै-
रादित्सुभिर्नूपुरशिञ्जितानि॥३३॥

प्रकाशिका

सा राजहंसैरिति। सन्नतांसेति राजहंससाम्यप्रतिपत्त्यर्थम्। ते हि तथा प्रसिद्धाः

प्रयोगेषु, यथा—'स्मर्तव्याः शिथिलांसहंसरुचयो गोदावरीवीचयः'इति। यथा वा 'बक! यदि तथा वेत्सि किञ्चिच्छ्लथांसस्तूष्णीमेवासितुमपि सखे! त्वं कथं मे न हंस'इति। अञ्चितः पूजितः विक्रमः पदविन्यासः। इदं तदीयगतसाम्यसिद्ध्यर्थम्। अत्र देव्या गतेषु विषयभूतेषु राजहंसकर्तृकं विनयनं, तद्धेतुतया प्रत्युपदेशलोभः, तद्धेतुतया नूपूरशिञ्जितादित्सा चोत्प्रेक्ष्यते। तत्र च तद्गमनसंवादिनो देव्यास्तथाविधस्य गमनस्य, तन्नूपुरशिञ्जितसंवादिनस्तद्रुतस्य चोपलम्भो हेतुः। प्रत्युपदेशश्चार्थादादित्सासमानविषयोऽवसेयः॥३३॥

विवरणम्

अथ चरणगतं सविलासगमनं वर्णयति—

सेति। सा राजहंसैर्व्यनीयतेव। सा पार्वती राजहंसैर्हंसविशेषैः।

हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकसः।
राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः॥

इति सिंहः। गतेषु गमनेषु व्यनीयत विनीताभूत्। पार्वती गमनविषये राजहंसैः शिक्षिताभूदिवेत्युत्प्रेक्षा। देव्यास्तादृशगमनशिक्षणे योग्यत्वमाह—सन्नतांसेति। सन्नतौ सम्यङ्नतावंसौ य़स्याः सा तथा। 'सन्नतांसाः स्त्रियः पूज्या उन्नतांसास्तु पूरुषाः' इति सामुद्रिकप्रसिद्धिः। अनेन स्वरूपतोऽपि देव्या राजहंससाम्यं प्रतीयते। हंसा हि सन्नतांसतया प्रसिद्धाः 'स्मर्तव्याः शिथिलांसहंसरुचयो गोदावरीवीचयः' इत्यादिषु। ननु हंसविनीतत्वोत्प्रेक्षायां को हेतुरित्यत्र गमनविशेषणमाह—लीलाञ्चितविक्रमेष्विति। लीलया विलासेन अञ्चिताः पूजिताः विक्रमाः पदविन्यासा येषु तेषु। हंसगमनानामपि तथात्वमुत्प्रेक्षाहेतुरिति भावः। किमर्थमेते देवीमशिक्षयन्नित्यत्राह—प्रत्युपदेशलुब्धैरिति। प्रत्युपदेशे लुब्धैः सश्रद्धैः।

गुरुशुश्रूषया वापि पुष्कलेन धनेन वा।
अथवा विद्यया विद्या तुरीयं नोपपद्यते॥

इति न्यायेन प्रत्युपदेशलोभादिति भावः। ननु किमेतेषामभिलषितमित्यत्राह—नूपुरशिञ्जितान्यादित्सुभिरिति। नूपुरयोः मञ्जीरयोः। 'पादाङ्गदं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियामि'त्यमरः। शिञ्जितानि शब्दान्। 'भूषणानां तु शिञ्जितमि'त्यमरः। अत्र देव्याः सविलासगमने राजहंसकर्तृकं विनयनमुत्प्रेक्ष्यते। विनयने तु प्रत्युपदेशलोभो हेतुत्वेनोत्प्रेक्ष्यते। लोभे तु नूपुरशिञ्जितादित्सेति सर्वोऽप्युत्प्रेक्षित एवायं वाक्यार्थः। देव्यां तद्मनसंवादिनो गमनस्य, हंसेषु नूपुरशिञ्जितसंवादिनो रुतस्य च दर्शनमुत्प्रेक्षाहेतुः॥३३॥

वृत्तानुपूर्वे च न चातिदीर्घे
जंघे शुभे सृष्टवतस्तदीये।
शेषाङ्गनिर्माणविधौ विधातु-
र्लावण्यमुत्पत्तमिवास यत्नः॥३४॥

प्रकाशिका

वृत्तेति। वृत्ते अनुपूर्वे अनुगतपूर्वे पूर्वानुरूपे च ये भवतः, ते तथा। शुभे भद्रे, लावण्यमय्यावित्यर्थः। शेषाङ्गनिर्माणविधौ 'निमित्तात् कर्मसंयोगे'-(वा. २.३.३६) इति सप्तमी, 'चर्मणि द्वीपिनं हन्ती'तिवत्। शेषाङ्गनिर्माणेन हि निमित्तेन लावण्यमुत्पाद्यते। अनादरे सप्तमीति तु न युक्तं, निमित्तस्य रमणीयत्वात्। अत्रासेति प्रयोगं समर्थयितुं वामनसूत्रम् 'आसेत्यसतेः' (५.२.२७)। वृत्तिश्चास्य सूत्रस्य 'लावण्यमुत्पाद्यमिवास यत्न इत्यत्रासेत्यसतेर्धातोः अस गतिदीप्त्यादानेष्विति प्रयोगः, नास्तेः, भू-भावविधानाद्' इति। दक्षिणावर्तेन तु धातुप्रदीपकारमतमनुसरता 'लावण्य उत्पाद्य इवास यत्न' इति पाठोऽङ्गीकृतः, गत्यर्थत्वं च। तत्र विसन्धिदोषोऽर्थासङ्गतिश्च, गत्यर्थयोगे कर्मणोऽपेक्षितत्वात्। उत्पत्तुमिति पाठेऽप्यन्तर्भावितण्यर्थत्वेन धातोर्दीप्त्यर्थत्वेन च निर्वाहः शक्य इव प्रतिभाति। नातिदीर्घे इति प्रसज्यप्रतिषेधो न युक्तः। तत्र हि क्रियापदसम्बद्धेन नञा भाव्यम्। तदा च विवक्षितार्थवैपरीत्यं स्यात्। पर्युदासेन तु भाव्यम्। यतस्तत्र प्रतिषेधवाचिनः समासे गुणीभावात् क्रियाया न निषेधः। इत्थञ्च प्रसज्यप्रतिषेधपर्युदासयोर्नैकविषयत्वम्। तयोश्च लक्षणं कृतं भर्तृहरिणा—

> प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता।
> पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्॥
> अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता।
> प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्॥

इति॥३४॥

विवरणम्

जङ्घाद्वयं वर्णयति—

वृत्तेति। तदीये शुभे जङ्घे सृष्टवतः विधातुः शेषाङ्गनिर्माणविधौ लावण्यमुत्पत्तुं यत्न आस इव। तदीये तत्सम्बन्धिन्यौ शुभे भद्रे लावण्यमय्यावित्यर्थः। जङ्घे जङ्घाद्वयं सृष्टवतो निर्मितवतो विधातुर्ब्रह्मणः शेषाङ्गनिर्माणविधौ शेषाणामवशिष्टा-

नामङ्गानामवयवानां निर्माण एव विधौ विधाने। 'विधिर्विधाने दैवेऽपी'त्यमरः। 'निमित्तात् कर्मसंयोगे'(वा. २.३.३६)इति सप्तमी। चर्मणि द्वीपिनं हन्तीतिवत्। शेषाङ्गनिर्माणमेव लावण्योत्पादने निमित्तम्। अर्थात् तस्या इति लभ्यते। लावण्यं सौन्दर्यम् उत्पत्तुमुत्पादयितुम्। अन्तर्भूतण्यर्थोऽयं प्रयोगः। यत्नः प्रयासः आस बभूवेव। नायमस्तिधातोरुत्पन्नः शब्दः, तस्य 'अस्तेर्भूः'(२.४.५२)इति भूभावविधानात्। 'अस गतिदीप्त्यादानेष्वि'ति धातोर्लिटि दीप्त्यर्थोऽयं शब्दः। दिदीपे यत्नोऽतीव बभूवेत्यर्थः। तथाच वामनसूत्रम् 'आसेत्यसतेः' (५.२.२७) इति। तदीयाङ्गनिर्माणार्थं सम्पादितेषु लावण्यद्रव्येषु सर्वेष्वपि जङ्घाद्वयनिर्माणकर्मण्येवोपक्षीणेषु पुनर्महता प्रयासेन लावण्यपुञ्जं सम्पाद्य तदनुरूपमवयवान्तरं निर्मितवानिव विधातेत्युत्प्रेक्ष्यते। जङ्घाद्वये लावण्यातिशयदर्शनमुत्प्रेक्षाहेतुः। लावण्यातिशयमेव विशेषणद्वयेनाह—वृत्तानुपूर्वे चेत्यादिना। अत्रातिदीर्घे न भवत इति नञः क्रियासम्बन्धानुपपत्तेर्न प्रसज्यप्रतिषेधः; किन्तु पर्युदास एव। प्रसज्यप्रतिषेधपर्युदासयोर्विशेषे भर्तृहरिः—

प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता।
प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्।। इति।

अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्।। इति च।

तदेवमन्वयः—वृत्तानुपूर्वे चातिदीर्घे न चेति। वृत्ते चानुपूर्वे चेति वृत्तानुपूर्वे। वृत्ते वर्तुले अनुगतपूर्वे पूर्वानुरूपे पूर्ववर्णितचरणद्वयानुगुणे चेत्यर्थः। अतिदीर्घे अत्यन्तं दीर्घे च न, नाप्यतिह्रस्वे चेति भावः। 'अतिदीर्घा भृशं ह्रस्वा', 'दीर्घजङ्घा प्रपद्यायुर्दीर्घकालं सुखं त्यजेत्', 'ह्रस्वजङ्घां स्त्रियं त्यजेद्' इत्यादिसामुद्रिकोक्तस्त्रीदोषनिषेधपरमिदं विशेषणम्।।३४।।

नागेन्द्रहस्तास्त्वचिकर्कशत्वा-
देकान्तशैत्यात् कदलीविशेषाः।
लब्ध्वापि लोके परिणाहि रूपं
जातास्तदूर्वोरुपमानबाह्याः।।३५।।

प्रकाशिका

नागेन्द्रहस्ता इति। त्वचिकर्कशत्वादिति 'अमूर्धमस्तकात् स्वाङ्गाद्—'

(६.३.१२) इत्यलुक्। एकान्तं नियतम्। अनेन घर्मकाल एव तदूर्वोः शीतलत्वमिति ध्वन्यते। कदलीविशेषा विशिष्टकदल्यः। यथा 'पुरुषविशेष ईश्वर' [योगसूत्रे] इति। लोके लोकदृष्टौ। यथा लोकवृत्तं लोक इति। उपमानमुपमितिः, तत्र बाह्या अनुपयोगिनः, अर्थादुपमानत्वेन। लोक उपमानबाह्या जाता इत्यन्वयः। नागमात्रहस्तस्य कदलीमात्रस्य च नैतदूरुतुल्यपरिणाहिरूपत्वमपीतीन्द्रविशेषशब्दौ प्रयुक्तौ। व्यतिरेकश्चात्रालङ्कारः। तस्य चाङ्गं विरोधः। तथाहि—प्रसिद्धः साधारणधर्म उपमानत्वं प्रयोजयति। एवं स्थिते परिणाहिरूपत्वलक्षणसाधारणधर्मे सत्युपमानत्वाभावो विरुद्धः। विरोधे सत्यपि स्वधर्मनिकर्षहेतोः कर्कशत्वशीतलत्वलक्षणधर्मद्वयस्य प्राबल्यात् तत्कार्यभूतस्योपमेयाधिक्यस्य लब्धप्रतिष्ठत्वम्। आधिक्यमेव चास्मन्मते व्यतिरेकः। तं चात्र सन्नप्यसत्कल्पो विरोधः पुष्णाति। यथा बाध्यत्वेन निबद्धो रसोऽङ्गिनं रसम्। ननु तदूर्वोरिति विधेयाविमर्शदुष्टं, वर्णनीयतया तदर्थस्य प्राधान्यात्, समासे च तस्य गुणीभावात्। न। ऊर्वोरिव वर्णनीयत्वेन संरम्भविषयत्वात्। न च तत्सम्बन्धनिबन्धन ऊर्वोरतिशयो विवक्षितः। यथा रामस्य बाहुरसीत्यादौ बाहोर्निर्दयत्वम्। किन्तु सम्बन्धमात्रम्। तस्मान्न विधेयत्वम्। तदुक्तं—

सम्बन्धमात्रमर्थानां समासो ह्यवबोधयेत्।
नोत्कर्षमपकर्षं वा वाक्यात् तूभयमप्यदः।।

इति [व्यक्तिविवेके महिम्ना पृ. २६५-६]।।३५।।

विवरणम्

ऊरुद्वयं वर्णयति—

नागेन्द्रेति। नागेन्द्रहस्ताः त्वचिकर्कशत्वात् कदलीविशेषा एकान्तशैत्यात् परिणाहि रूपं लब्ध्वापि लोके तदूर्वोरुपमानबाह्या जाताः। नागेन्द्रहस्ताः नागेन्द्राणामैरावतादीनां हस्ताः शुण्डाः, न तु सामान्यगजहस्ताः, तेषां परिणाहेनापि सादृश्याभावात्। त्वचिकर्कशत्वाद् 'अमूर्धमस्तकात् स्वाङ्गादकामे' (६.३.१२) इत्यलुक्। त्वग्गतात् कार्कश्यादित्यर्थः। कदलीविशेषाः विशिष्टाः कदल्यः, न तु सामान्यकदल्यः। नन्दनोद्यानादिप्ररूढाः कनककदलीकाण्डा इति भावः। यथोक्तं सौन्दर्यलहर्यां 'करीन्द्राणां शुण्डाः कनककदलीकाण्डपटलीमुभाभ्यामूरुभ्यामुभयमपि निर्जित्य भवती' इति। एकान्तशैत्याद् एकान्तेन नियमेन यत् शैत्यं शीतत्वं तस्माद्धेतोः। घर्मकाल एव तदूर्वोः शीतलत्वादिति भावः। यथोक्तं 'शीतकाले भवत्युष्णमुष्णकाले च शीतलम्, सुन्दरीणां कुचद्वन्द्वमूरुद्वन्द्वं च' इति। परिणाहि परिणाहो विशालतास्यास्तीति परिणाहि। 'परिणाहो विशालता' इत्यमरः। रूपं स्वरूपं लब्ध्वापि सम्प्राप्यापि लोके लोकदृष्टावित्यर्थः। लोकवृत्तं लोक इतिवत्।

तदूर्वो तस्या पार्वत्याः ऊर्वोः ऊरुप्रदेशयोः उपमानबाह्याः उपमानं उपमितिः। भावे ल्युट्। तत्र बाह्या अनुपयोगिनो जाताः। करीन्द्रशुण्डादीनां विशालत्वरूपसाधारणधर्मलाभे सत्यपि स्वरूपणावस्थायां कर्कशत्वैकान्तशैत्याभ्यामपकर्षः, उपमेयस्य तु तदभावादुत्कर्ष इत्युपमानादुपमेयस्योत्कर्षप्रतिपादनाद् व्यतिरेकोऽलङ्कारः। 'उपमानाद् यदन्यस्य व्यतिरेकः स एव स' [काव्यप्रकाशे] इति। परिणाहिरूपं लब्ध्वाप्युपमानबाह्या जाता इति प्रतीयमानो विरोधस्तु व्यतिरेकस्याङ्गम्॥३५॥

एतावता नन्वनुमेयशोभं
काञ्चीगुणस्थानमनिन्दितायाः।
आरोपितं यद् गिरिशेन पश्चा-
दनन्यनारीकमनीयमङ्कम्॥३६॥

प्रकाशिका

एतावतेति। एतच्छब्देन यच्छब्दं परामृश्योत्तरवाक्यार्थः प्रत्यचमृश्यते। प्रत्ययेन तु वाक्यबलात् परिमितपरिमाणवाचिनानुमितेः सौकर्यगुणो दर्शितः। ननुरवधारणे। तेन शोभावगमे वर्णनानपेक्षोच्यते। अनिन्दिताया अनवद्यायाः, सर्वाङ्गशोभिन्या इत्यर्थः। ततश्च नितम्बशोभायाः सातिशयत्वमनुमीयते, न शोभामात्रमित्यवसेयम्। आरोपितं न त्वारूढम्। गिरिशेन, न तु गिरिशस्य। वर्ण्यमानावस्थापेक्षया पश्चाच्छब्दः। अनन्यनारीकमनीयम्, अत्यन्तदुरवापत्वात्। तथाविधपरमेश्वराङ्कारोपणेनैव नितम्बस्य सर्वातिशायिशोभत्वमनुमेयं, न त्वितरावयवद् वर्णनापेक्षीत्यर्थः। नन्वनेकस्यैकत्र विकल्पेन प्राप्तौ नियमः। ततश्चानेकसाधारणेन विषयेण भवितव्यम्। तदत्र लिङ्गवर्णनयोः साधारणं मेयत्वमेवोपादेयं, न तद्विशेषोऽनुमेयत्वं, तस्यामसाधारणत्वात्। सत्यम्। किन्तु मेयत्वमेवात्र विवक्षितम्। न चात्र सामान्यपरिवृत्तिर्दोषः, यतोऽनेनानुमितेरर्थाव्यभिचारित्वाद् वर्णनात् उत्कर्षो द्योत्यते। तस्मादत्र दोषस्यापि गुणत्वम्॥३६॥

विवरणम्

नितम्बप्रदेशं वर्णयति—

एतावतेति। अनिन्दितायाः काञ्चीगुणस्थानमेतावता ननु अनुमेयशोभम्। अनिन्दितायाः निन्दितं दोषस्तद्रहितायाः, अनवद्याया इत्यर्थः। सर्वावयवसुन्दर्या इति यावत्। तेन च नितम्बशोभाया निरतिशयत्वमेवात्रानुमेयं, न शोभामात्रमिति व्यज्यते। काञ्चीगुणस्य रशनादाम्नः स्थानं, नितम्बप्रदेश इत्यर्थः। एतावता

एतावन्मात्रेण। अत्र एतच्छब्देन उत्तरवाक्यार्थः परामृश्यते। परिमितपरिमाणवाचिना वतुप्रत्ययेन पुनरनुमितेः सौकर्यं दर्शितम्। ननुशब्दोऽवधारणे। एतावन्मात्रेणैवेत्यर्थ। अनुमेया अनमातुं शक्या शोभा यस्य तत् तथा। भगवत्या नितम्बशोभा वक्ष्यमाणप्रकारेणैव सुखानुमेयेति किं तद्वर्णनयेति भावः। तमेव प्रकारमाह—पश्चाद् गिरिशेनाङ्कमारोपितं यदिति। अत्र वर्ण्यमानावस्थापेक्षया पश्चाच्छब्दः। गिरिशेन न तु गिरिशस्य। अङ्कमुत्सङ्गमारोपितं, न त्वारूढम्। जगदीश्वरेण स्वमेव रागातिशयादारोपितं, न तु देव्या गिरिशस्याङ्कमारूढमिति भावः। यद् यस्मात् तस्माद्धेतोरनुमेयशोभमिति पूर्वेणान्वयः। गिरिशाङ्कस्य विशेषणमाह—अनन्यनारीकमनीयमिति। अन्याभिर्नारीभिः कामयितुं शक्यं न भवतीति तथा। न ह्यत्यन्तदुरवापेऽर्थे कामः सम्भवतीति भावः। नन्वत्रावगम्यशोभमित्येव वक्तव्यम्। अत्र हि वर्णनयावगम्यत्वं प्रतिषिध्यते, न लिङ्गान्तरेणावगम्यत्वम्। यदि लिङ्गान्तरं प्रतिषिध्य गिरिशाङ्कारोपणरूपं लिङ्गं विधीयते, तर्ह्यनेनैवानुमेयशोभमिति शक्यं वक्तुं, (न) वर्णनप्रतिषेधपरत्वे। मैवम्। 'अवगम्यत्वमात्रस्यैवात्रापि विवक्षितत्वात्। न चैवं सति सामान्यवाचिनावगम्यशब्देनैव वक्तव्यमिति वाच्यम्। अनुमितेरर्थाव्यभिचारित्वं, वर्णनायास्तु न तथेति विशेषप्रतिपादनपरत्वादनुमेयशब्दप्रयोगस्य। तस्मात् सामान्यपरिवर्तो नात्र दोषाय, अपितु गुणायैव॥३६॥

तस्याः प्रविष्टा ततनाभिरन्ध्रं
रराज तन्वी नवरोमराजिः।
नीवीमतिक्रम्य सितेतरस्य
तन्मेखलामध्यमणेरिवार्चिः॥३७॥

प्रकाशिका

तस्या इति। नतनाभिरन्ध्रं प्रविष्टेति रोमावल्यास्तदवधिकप्रसरत्ववचनेन नवत्वं, तेन च नवयौवनस्यावस्थाविशेष प्रकाश्यते। सम्भावनाभागेऽपि नतनाभिरन्ध्रं प्रविष्टेत्यनुषञ्जनीयम्। अन्यथा अतिक्रमस्य पौर्वकाल्यं किमपेक्षं स्यात्। तन्वीति प्रशस्तलक्षणार्थम्। नीवी वस्त्रग्रथनम्। 'स्त्रीकटीवस्त्रबन्धे स्यान्नीवी' इत्यादि केशवः। तदतिक्रमणमर्चिषोऽसम्भवदुत्प्रेक्षाङ्गम्॥३७॥

विवरणम्

रोमराजिं वर्णयति—

तस्या इति। तस्या नतनाभिरन्ध्रं प्रविष्टा नवरोमराजिः रराज। तस्याः पार्वत्या नतनाभिरन्ध्रं नतं गम्भीरं नाभिरन्ध्रं नाभिप्रदेशं प्रविष्टा प्राप्ता सती। तदानीमेव

नाभिरन्ध्रं प्रसृतेत्यर्थः। अत एव यौवनारम्भसम्पादिता रोमराजी रोमावलिः रराज शुशुभे। अत्र नतनाभिरन्ध्रमित्यनेन नाभिवर्णनमपि कृतम्। रोमराज्या मनोहारित्वमाह—तन्वीति। तन्वी कृशा। एतदपि प्रशस्तनारीलक्षणम्। रोमराजिमुत्प्रेक्षते—सितेतरस्य तन्मेखलामध्यमणेरर्चिर्नीवीमतिक्रम्य नतनाभिरन्ध्रं प्रविष्टेवेति। सितेतरस्य कृष्णस्य तन्मेखलामध्यमणेः तस्या पार्वत्या मेखला रशना तस्या मध्ये यो मणिः रत्नम्। 'रत्नं मणिर्द्वयोरि'त्यमरः। तस्यार्चिस्तेजो नीवीं वस्त्रबन्धम्। 'स्त्रीकटीवस्त्रबन्धेऽपि'इत्यमरः। तामतिक्रम्य नतनाभिरन्ध्रं प्रविष्टेव। मेखलामध्यवर्तिनो नायकमणेरर्चिरेव नीवीमतिक्रम्य नतनाभिरन्ध्रं प्रविष्टेवेत्यर्थ। वर्णसाम्यादिकमुत्प्रेक्षाहेतुः। नेयमुपमा, अर्चिषो नीव्यतिक्रमासम्भवात्॥३७॥

मध्येन सा वेदिविलग्नमध्या
वलित्रयं चारु बभार बाला।
आरोहणार्थं नवयौवनस्य
कामेन सोपानमिव प्रयुक्तम्॥३८॥

प्रकाशिका

मध्येनेति। वेद्या विलग्नं मध्यमिव मध्यं यस्या इति विगृह्णानो दक्षिणावर्त 'सप्तम्युपमाने'त्यादिना समासममंस्त। वयं तु वेदिरिव विलग्नमध्येति विगृह्य 'उपमानाति—' (२.१.५५) इति समासं मन्यामहे विलगति हसतीति विलग्नं कृशमित्यर्थः। ननु 'अवलग्नं विलग्नं च मध्यो मध्यम इत्यपी'ति हलायुधवचनाद् वेदिविलग्नं वेदिमध्यमिव मध्यं यस्या इति विग्रहः किं नाश्रितः। तदाश्रयणे वेदिविलग्नेति वेदिमध्येति वा रूपं स्यात्। उत्तरपदलोपात्। अत्राकारसाम्याद् वलित्रये विशिष्टसोपानोत्प्रेक्षायां कामेनेति कर्तृविशेषवाचिना शब्दोपात्तस्य चारुत्वस्य लोकोत्तरता ध्वन्यते। सोपानौचित्याद् आरोहणस्य प्रयोजनत्वेन कल्पनम्। नवयौवनस्येति तत्कर्तृविशेषवाचिना प्रागेव तदागमनप्रतीक्षता कामस्य ध्वन्यते। दक्षिणावर्तस्तु—कालेनेति पठित्वा यौवनोत्पादकालेनेति व्याचष्ट। तत्र कर्तृविशेषस्यानुपयोगः। कर्तृमात्रस्यान्यथापि सिद्धिः॥३८॥

विवरणम्

वलित्रयं वर्णयति—

मध्येनेति। सा बाला मध्येन बलित्रयं बभार। सा पार्वती। बालेत्यनेन वलित्रयाभिव्यक्तेः कालप्राप्तिर्ध्वन्यते। मध्येनावलग्नेन। 'अवलग्नं विलग्नं च मध्यं

मध्यम इत्यपि' इति हलायुधः। वलित्रयं वलीनां त्रयं, त्रिबलीमित्यर्थः। बभार धृतवती। वलित्रयमुत्प्रेक्षते—नवयौवनस्यारोहणार्थं कामेन प्रयुक्तं सोपानमिवेति। नवयौवनस्य नवस्याभिनवस्य यौवनस्य। अत एवारोहणे सोपानापेक्षा। आरोहणार्थं स्तनवदनादिप्रदेशप्राप्त्यर्थमित्यर्थः। अत्र तादृशवलित्रयरूपसोपाननिर्माणकर्म तच्छिल्पिनं कल्पयति—कामेनेति। न ह्यन्येन निर्मिते तादृशं चारुत्वं सम्भवतीति भावः। प्रयुक्तं निर्मितं सोपानमिव। अत्र मदनस्य सोपानकर्तृत्वोत्प्रेक्षया तस्य प्रागेवागत्य यौवनागमप्रतीक्षणं ध्वन्यते। तेन च देव्याश्चारुत्वातिशयः। अवलग्नं वर्णयति—वेदिविलग्नमध्येति। वेदिरिव विलग्नमध्या। 'उपमानानि सामान्यवचनैः' (२.१.५५) इति समासः। वेदिर्यज्ञशालायां द्व्यङ्गुलनिखातो भूभागः। विलगति ह्रसतीति विलग्नं, कृशमित्यर्थः। वेदिरिव कृशमध्येत्यर्थः। वेद्याः कृशमध्यत्वं प्रसिद्धम्। वलित्रयस्य सोपनपरम्परावद् क्रमेणावस्थानं तदुत्प्रेक्षाया हेतुः। अत एव चारु सुन्दरम्॥३८॥

अन्योन्यमुत्पीडयदुत्पलाक्ष्याः
स्तनद्वयं पाण्डु तथा प्रवृद्धम्।
मध्ये यथा श्याममुखस्य तस्य
मृणालसूत्रान्तरमप्यलभ्यम्॥३९॥

प्रकाशिका

अन्योन्यमिति। उत्पीडयदुत्थाय पीडयत्। पाण्डुत्वं श्याममुखत्वं च यौवनप्रौढिकृतम्। मृणालसूत्रस्यान्तरमवकाशः। अलब्धं परीक्षकलोकेनेति शेषः। 'मृणालसूत्रेण पदं न लब्धमि'ति केचित् पठन्ति। तदानीत्यर्थः सुगमः। किन्त्वपेरपेक्षितत्वान्न्यूनपदत्वम्। ननु उत्पीडनकर्तृभूतस्तनसमुदायरूपैकार्थवाचिस्तनद्वयशब्दसमभिव्याहारेणान्योन्यशब्दः कथं प्रयुज्यते, तस्यानेकविषयकर्मव्यतीहारवाचित्वात्। नैवम्। स हि न कर्मव्यतीहारवाची। किन्तु कर्मव्यतीहारविषयभूतसमकक्ष्यानेकपदार्थसमुदायवाची। तत्स्मात् कर्तृद्वयवाचिना स्तनद्वयशब्देन कर्मद्वयवाचिनोऽन्योन्यशब्दस्य समभिव्याहारो घटत एव॥३९॥

विवरणम्

स्तनद्वयं वर्णयति—

अन्योन्यमिति। उत्पलाक्ष्याः स्तनद्वयं तथा प्रवृद्धम्। उत्पलाक्ष्याः उत्पले कुवलये इवाक्षिणी यस्यास्तस्याः। स्तनद्वयं स्तनयोः कुचयोर्द्वयं द्वन्द्वम्। तथा

वक्ष्यमाणप्रकारेण प्रवृद्धं प्रकर्षेण वृद्धं परिपुष्टमासीत्। तमेव प्रकारमाह—यथा श्याममुखस्य तस्य मध्ये मृणालसूत्रान्तरमपि अलभ्यमिति। यथा यादृशेन वर्धनेन श्याममुखस्य श्यामं मुखं यस्य तस्य। श्याममुखत्वं यौवनकृतम्। तस्य स्तनद्वयस्य मध्ये अन्तराले। मृणालसूत्रान्तरं मृणालस्य सूत्रं मृणालसूत्रं, तस्यान्तरमवकाशः। किं पुनरन्यसूत्राणामन्तरमित्यपिशब्दार्थः। अलभ्यं लब्धुमशक्यम्। कियदन्तरमनयोरित्यवगन्तुं परीक्षाप्रसङ्गे तन्मध्यं नीयमानस्य विसतन्तोरन्तरमपि यथा परीक्षकजनेन न लभ्यं, तथा प्रवृद्धमासीदित्यर्थः। 'मृणालसूत्रान्तरमप्यलब्धमि'ति पाठे कर्मणि निष्ठा। 'मृणालसूत्रेण पदं न लब्धमि'ति पाठस्तु सुगमार्थोऽप्यपिशब्दाभावेन न्यूनपदत्वदोषादुपेक्षणीयः। उक्तार्थसमर्थकं विशेषणमाह—अन्योन्यमुत्पीडयदिति। अन्योन्यं परस्परम्। उत्पीडयदुत्थाय पीडयत्। अत एव चारु सुन्दरम्। पाण्ड्वति पाठे पाण्डुत्वमपि यौवनकृतम्।।३९।।

शिरीषमालाधिकसौकुमार्यौ
बाहू तदीयाविति मे प्रतर्कः।
पराजितेनापि कृतौ हरस्य
यौ कण्ठपाशौ मकरध्वजेन।।४०।।

प्रकाशिका

शिरीषेति। प्रतर्क ऊहः। विजितविश्वो मकरध्वजो दर्पाद् देवमासादयन् पराजितो विफलीभूतसुकुमारतरपूर्वोपकरणजातः सन्नप्याभ्यामुपकरणभावमुपयद्भ्यां पशुमिव रज्ज्वा कण्ठे गृहीत्वा तमेव देवं यदात्मविधेयं चकार, तदनयोर्बाह्वोः सौकुमार्यं शिरीषादिना नोपमातुं शक्यमिति भावः।।४०।।

विवरणम्

बाहुद्वयं वर्णयति—

शिरीषेति। तदीयौ बाहू शिरीषमालाधिकसौकुमार्यौ इति मे प्रतर्कः। तदीयौ तत्सम्बन्धिनौ बाहु भुजौ। शिरीषपुष्पैः कृता माला शिरीषमाला, तदपेक्षाप्यधिकं सौकुमार्यं सुकुमारत्वं ययोस्तौ। इति उक्तप्रकारेण। प्रतर्क ऊहः। पार्वतीभुजयोः सुकुमारत्वं शिरीषमालाया अप्यधिकतरमिति वयं मन्यामह इत्यर्थः। कथमेवं प्रतर्क इत्यत्राह—यौ पराजितेनापि मकरध्वजेन हरस्य कण्ठपाशौ कृताविति। यौ बाहू पराजितेन पराजयं प्राप्तेन, विफलीभूतसुकुमारतरपूर्वोपकरणेनापीत्यर्थः। मकरो मत्स्यविशेषो ध्वजो यस्य तेन कामदेवेन। हरस्य परमेश्वरस्य कण्ठे पाशौ

कण्ठपाशौ, स्ववशीकृत्य स्वेच्छया तत इतः कर्षणार्थं कण्ठे निक्षिप्तौ पाशावित्यर्थः। कृतौ विहितौ। यो मकरध्वजः पूर्वं दर्पाद् देवमासाद्य विफलीभूतसुकुमारतरपूर्वोपकरणो जातः, स एव याभ्यां पशुमिव रज्ज्वा कण्ठे निबध्यात्मविधेयं चकार, तयोः सौकुमार्यं कथं शिरीषकुसुमादिभिरुपमातुं शक्यमिति भावः। अत्र व्यतिरेकोऽलङ्कारः॥४०॥

कण्ठस्य तस्यास्तनुबन्धुरस्य
मुक्ताकलापस्य च निस्तलस्य।
अन्योन्यशोभाजननाद् बभूव
साधारणो भूषणभूष्यभावः॥४१॥

प्रकाशिका

कण्ठस्येति। 'बन्धुरं तून्नतानतमि'ति, 'कलापो भूषणे' इति, वर्तुलं निस्तलं वृत्तमि'ति च सिंहः। अत्र विशेषणयोः शोभाजननं प्रति हेतुत्वम्। तत्रापि यथा निस्तलत्वं शोभाजनने हेतुः, तथा तनुबन्धुरत्वमित्युपमानोपमेयभावोऽपि द्रष्टव्यः, अन्योन्यस्मिन् शोभाप्रादुर्भावात्। अन्योन्येन शोभाजननादिति तु पक्षे भूषणभाव एव साधारणो न भूष्यभाव इति दक्षिणावर्तः। तदयुक्तम्। तथाहि—न तावदयमन्योन्यशब्द उभयपर्यायः। स हि कर्मव्यतीहारविषयवाची। तद्योगे च शोभोत्पत्तेरनपेक्षितहेतुत्वं कथं घटते। अन्योन्येनेति विग्रहे भूष्यभावोऽप्यर्थसिद्धः, भूषणभावस्तु शाब्द इत्येतावान् विशेषः। नन्वेवं भूषणभूष्यभावाविति वक्तव्यम्। एकवचनान्तनिर्देशे तु सम्बन्धस्य वाच्यत्वात् तस्य च द्विष्ठत्वात् साधारणत्वं न हेत्वपेक्षं न चातिशयप्रयोजकम्, उच्यते, भूषणभूष्ययोर्भाव इति विग्रहे भावशब्दो यद्यपि सामान्यवाची यथा स्त्रीणां चक्षुषा कुवलायितानि वातायनानीत्यत्र चक्षुश्शब्दः, तथापि तस्य व्यक्तिपर्यवसायित्वात् कण्ठमुक्ताकलापविषये व्यक्तिधर्मोऽसाधारणत्वमेवोपपन्नः। तत्र चक्षुश्शब्दस्य व्यक्तिपर्यवसायित्वादनेकवातायनकुवलयनम्। अनुगतरूपाभिधाने हि तस्य सम्बन्धवाचकत्वं मन्तव्यम्॥४१॥

विवरणम्

कण्ठं वर्णयति—

कण्ठस्येति। तस्याः कण्ठस्य मुक्ताकलापस्य च अन्योन्यशोभाजननाद् भूषणभूष्यभावः साधारणो बभूव। तस्याः पार्वत्याः कण्ठस्य गलस्य मुक्ताभिः मौक्तिकैः कृतः कलापो मुक्ताकलापः। कलापो भूषणम्। 'कलापो भूषणे बर्हे तूणीरे

संहतावपी'त्यमरः। अन्योन्येन हेतुना शोभाजननात् शोभाया जननात् प्रादुर्भावात्। 'जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भव' इत्यमरः। यद्यप्यन्योन्येन शोभाजननादिति विग्रहे शोभाजनने हेतुभूतयोः कण्ठमुक्ताकलापयोर्भूषणभाव एव कण्ठोक्तः, न भूष्यभावः, तथापि भूष्यमाणयोः कण्ठमुक्ताकलापयोर्भूष्यभावोऽप्यर्थादायातीति न काचिदनुपपत्तिः। भूषणभूष्ययोर्भावो भूषणभूष्यभावः। द्वन्द्वात् परः श्रूयमाणो भावशब्दः प्रत्येकमभिसम्बध्यते। भूषणभावो भूष्यभावश्चेत्यर्थः। नन्वत्र भूषणभूष्यभावाविति वक्तव्यम्। एकवचनान्तनिर्देशे तु सम्बन्धस्य वाच्यत्वात् तस्य च 'सम्बन्धो हि सम्बन्धिभ्यां भिन्नस्तावाश्रितश्चैकश्च' ति न्यायेन स्वभावादेवोभयाश्रितत्वनियमादन्योन्यशोभाजननादिति हेतुर्निष्प्रयोजनः स्यात्। कण्ठमुक्ताकलापयोर्भूषणभूष्यभावरूपः सम्बन्धः साधारणोऽभूदित्युक्तेनापि न कश्चिदतिशयः प्रतिपादितो भवति। मैवम्। सामान्यवाचिनोऽप्यस्य भावशब्दस्य व्यक्तिद्वयपर्यवसायित्वात्। यथा स्त्रीणां चक्षुषा कुवलायितानि वातायनानीत्यत्र सामान्यवाचिनोऽपि चक्षुश्शब्दस्य सर्ववातायनगतचक्षुर्विशेषपर्यवसायित्वं, तथात्रापीति। कण्ठेन मुक्ताकलापस्य शोभाजनने हेतुमाह—तनुबन्धुरस्येति। तनुश्चासौ बन्धुरश्चेति तनुबन्धुरः। तनोः कृशस्य, नात्यन्तपीवरस्येत्यर्थः, अत एव वन्धुरस्य सुन्दरस्य। 'बन्धुरौ नम्रसुन्दरौ' इति वैजयन्ती। मुक्ताकलापेन कण्ठशोभाजनने हेतुमाह—निस्तलस्येति। निस्तलस्य वर्तुलस्य। 'निस्तलं वर्तुलं वृत्तम्' इति सिंहः। एते विशेषणे च परस्परमुपमानोपमेयभावमप्यनुभवतः। यथा निस्तलत्वं शोभाजनने हेतुस्तथा तनुबन्धुरत्वमपीति। 'अत्रान्योन्यमलङ्कारः। 'परस्परक्रियाजननेऽन्योन्यम्' इति।।४१।।

चन्द्रं गता पद्मगुणान् न भुङ्क्ते
पद्माश्रिता चान्द्रमसीमभिख्याम्।
उमामुखं तु प्रतिपद्य लोला
द्विसंश्रयां प्रीतिमवाप लक्ष्मीः।।४२।।

प्रकाशिका

चन्द्रमिति। भुङ्क्ते अनुभवति। 'भुजोऽनवने' (१.३.६६) इत्यात्मनेपदम्। अभिख्यां शोभाम्। रात्रिसङ्कोचदिवानुदयलक्षणेन प्रसिद्धेन हेतुद्वयेन पद्मचन्द्रगुणान् पर्यायेणानुभवन्ती तत एव च तत्र तत्र भ्रमन्ती लक्ष्मीस्तदुभयगुणविशिष्टं देव्या वदनकमलं दैवादासाद्य तदुभयानुभवजन्यां प्रीतिं प्रापेत्यर्थः।।४२।।

विवरणम्

वदनं वर्णयति—

चन्द्रमिति। लक्ष्मीश्चन्द्रं गता पद्मगुणान् न भुङ्क्ते। लक्ष्मीः श्रीः चन्द्रं पूर्णचन्द्रं गता प्राप्ता सती। पद्मगुणान् पद्मे पङ्कजे ये गुणा दिवारमणीयत्वसौरभ्यादयः, तान्। न भुङ्क्ते नानुभवति। 'भुजोऽनवने' (१.३.६६) इत्यात्मनेपदम् तर्हि पद्माश्रितैवास्त्वित्यत्राह—पद्माश्रिता चान्द्रमसीमभिख्यामिति। पद्मं पङ्कजमाश्रिता प्राप्ता सती। चान्द्रमसीं चन्द्रमःसम्बन्धिनीमभिख्यां कान्तिम्। 'अभिख्या कान्तिर्द्युतिश्छविः' इत्यमरः। अत्र चकारोऽर्थाद् द्रष्टव्यः। न भुङ्क्त इति अत्राप्यनुषञ्जनीयम्। लक्ष्मीः पद्माश्रिता सती रजनीरमणीयत्वादिकान् गुणांश्च नानुभवतीत्यर्थः। इत्थं रात्रौ चन्द्रम् अहनि पद्मं च पुनः पुनराश्रित्य भ्रमन्त्या लक्ष्म्या देवीजननानन्तरं दैववशात् कोऽप्यानन्दः सञ्जात इत्याह—उमामुखं प्रतिपद्य तु द्विसंश्रयां प्रीतिमवापेति। उमामुखम् उमायाः पार्वत्या मुखम्। प्रतिपद्य प्राप्य। तुशब्दः पूर्वस्माद् विशेषमाह। 'तु स्याद् भेदेऽवधारणे' इत्यमरः। द्विसंश्रयां द्वौ पद्मचन्द्रौ संश्रय आश्रयो यस्यास्तादृशीं प्रीतिमवाप प्रतिपेदे। सर्वकालरमणीयस्वाभाविकसौरभ्याभिरामं देवीवदनं प्राप्य तु लक्ष्मीश्चन्द्रपद्मानुभवजन्यां प्रीतिमाससादेत्यर्थः। लक्ष्म्याः पार्वतीवदनप्राप्तेः पूर्वकालीनं विशेषणमाह—लोलेति। लोला चञ्चला। रात्रौ चन्द्रप्राप्तेरहनि पद्मप्राप्तेश्च नियतावस्थानरहितेत्यर्थः।।४२।।

पुष्पं प्रवालोपहितं यदि स्या-
न्मुक्ताफलं वा स्फुटविद्रुमस्थम्।
ततोऽनुकुर्याद् विशदस्य तस्या-
स्ताम्रोष्ठपर्यस्तरुचः स्मितस्य।।४३।।

प्रकाशिका

अथ मुखावयवान् वर्णयति—

पुष्पमिति। अत्र यद्यर्थबलादसिद्धस्यार्थस्य कल्पनमतिशयोक्तिरलङ्कारः। असिद्धौ च तथाविधावुपमानधर्मिणौ ताभ्यामनुकारश्च।।४३।।

विवरणम्

अथ मुखगतानवयवान् वर्णयिष्यन्नादौ मन्दस्मितं वर्णयति—

पुष्पमिति। पुष्पं प्रवालोपहितं मुक्ताफलं स्फुटविद्रुमस्थं वा स्याद् यदि ततस्तस्याः स्मितस्यानुकुर्यात्। पुष्पम् अर्थाद् धवलपुष्पम्। प्रवालोपहितं प्रवाले

रक्तपल्लवे उपहितं न्यस्तम्। मुक्ताफलं मौक्तिकम्। स्फुटविद्रुमस्थं स्फुटे स्पष्टकान्तौ भद्रतर इत्यर्थः, विद्रुमे रक्तरत्नविशेषे तिष्ठतीति तथा। 'सुपि स्थः' (३.२.४) इति कः। वाशब्दो विकल्पे। स्यादिति सम्भावनायां लिङ्। यदिशब्दस्तथाविधस्य धर्मिणोऽभावं सूचयति। ततस्तर्हि। तस्याः पार्वत्याः। स्मितस्य मन्दहासस्यानुकुर्यात्। अत्रापि सम्भावनायां लिङ्। अनुकरणं हि तुल्यतया वर्तनमिति 'तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्' (२.३.७२) इति षष्ठी। स्मितमनुकुर्यादित्यर्थः। प्रवालोपहितधवलपुष्परूपं स्फुटविद्रुमस्थमुक्ताफलरूपं वोपमानधर्मिद्वयं यदि कुत्रचिदुपलभ्येत, तर्हि तयोरन्यतरत् पार्वतीमन्दस्मितमनुकुर्यादित्यर्थः। असिद्धौ च तादृशावुपमानधर्मिणौ। ततश्च तत्कर्तृकमनुकरणमप्यसिद्धमेवेति भावः। ननु किं तादृशोरुपमानधर्मिणोरेवानुकरणसामर्थ्यं, न चन्द्रिकादीनामितीमामाशङ्कां विशेषणद्वयेन परिहरति—विशदस्येत्यादिना। विशदस्यात्यन्तधवलस्येत्यर्थः। विशेषणान्तरमाह—ताम्रोष्ठपर्यस्तरुच इति। ताम्रे रक्ततरे ओष्ठे दन्तच्छदे पर्यस्ता परितः क्षिप्ता रुक् शोभा येन तस्य। चन्द्रिकादीनां तादृशधावल्ये सत्यपि ताम्रद्रव्योपहितत्वाभावान्नानुकरणसामर्थ्यमिति भावः। अत्र यदिशब्दबलादसिद्धस्यार्थस्य कल्पनमिति 'यद्यर्थोक्तौ च कल्पनम्' [काव्यप्रकाशे] इत्युक्तोऽतिशयोक्तिभेदोऽलङ्कारः।।४३।।

स्वरेण तस्याममृतस्रुतेव
सञ्जल्पितायामभिजातवाचि।
अप्यन्यपुष्टा प्रतिकूलशब्दा
श्रोतुर्वितन्त्रीरिव ताड्यमाना।।४४।।

प्रकाशिका

स्वरेणेति। सञ्जल्पितायां सञ्जल्पितुमुपक्रान्तायाम्। आदिकर्मणि क्तः। प्रजल्पितायामिति वा पाठः। अभिजातशब्दो लक्षणया सुकुमारार्थः। यथा 'अभून्नवाम्भोजदलाभिजात' इति। अन्यपुष्टेति ताड्यमानेति च पाठः। 'तन्त्रिकुटुम्बधारण' इति धातोः 'अवितॄस्तृतन्त्रिभ्य ईः' (उणा. ३.१५८) इति ईप्रत्यये तन्त्रीरिति भवति। विरुद्धा तन्त्रीर्वितन्त्रीरिति प्रादिसमासः। या तूत्पाद्यस्य स्वरादेर्विहितताडनक्रमं विना यथासम्भवं ताडिता स्यात्, तां वितन्त्रीरित्याहुराचार्याः। अमृतस्राविणेव स्वरेण तस्यां संल्लपितुमुपक्रान्तायां तच्छ्रोतुस्ताड्यमाना वितन्त्रीरिव कोकिलाऽप्यरम्यशब्दाऽभवदित्यर्थः। अत्रोपक्रमदशैव तावद् रम्येऽप्यरम्यप्रतिभाकारिणी, किमुत प्रसिद्धस्य तद्धेतोः परिशीलनहेतुरनिवृत्तिदशेत्युपक्रमवाचिना प्रत्ययेन द्योत्यते।

श्रोतुः श्रोतृमात्रस्यैव, न तु तद्विशेषस्य। अत्र माधुर्यसौकुमार्यसाम्ये सत्यमृतस्रुतेवेति तदतिरेकद्योतिकयोत्प्रेक्षयोपकृतः प्रतिकूलशब्दाभिव्यङ्ग्यो देवीसञ्जल्पितस्य कोकिलारुताद् व्यतिरेकोऽलङ्कारः प्रतीयते।।४४।।

विवरणम्

वचनं वर्णयति—

स्वरेणेति। अभिजातवाचि तस्याममृतस्रुतेव स्वरेण सञ्जल्पितायामन्यपुष्टापि श्रोतुः प्रतिकूलशब्दा। अभिजातवाचि अभिजातशब्दोऽयं लक्षणया सुकुमारार्थपर्यवसायी। तथा च प्रयोगः 'अभून्नवाम्भोजदलाभिजात' इति। अभिजाता सुकुमारा वाग् यस्यास्तस्याम्। अथवा स्थानप्रयत्नादिगुणयोगात् सम्यगुत्पन्ना वाग् यस्यास्तस्याम्। कथ्यमानार्थसमर्थकमिदं विशेषणम्। तस्यां पार्वत्याम्। अमृतस्रुता अमृतं पीयूषं स्रावयतीमृतस्रुत् तेन स्वरेण। अन्तर्भूतण्यर्थः प्रयोगः। सञ्जल्पितायाम् 'आदिकर्मणि क्तः कर्तरि च' (३.४.७१)। सम्यग्वक्तुमुपक्रान्तायामित्यर्थः। अनेन देवीसञ्जल्पनस्यारम्भदशायामेवैतावान् प्रभावः, किं पुन परिशीलनदशायामिति दर्शयति। यथोक्तं सौन्दर्यलहर्याम्—

विपञ्च्या गायन्ती विविधमपदानं पशुपते-
स्त्वयारब्धे वक्तुं चलितशिरसा साधुवचने।।
तदीयैर्माधुर्यैरपहसिततन्त्रीकलरवां
निजां वीणां वाणी निचुलयति चोलेन निभृतम्।। इति।

अन्यपुष्टा कोकिला। यस्याः शब्दो माधुर्यसौकुमार्यादिगुणवत्तया प्रसिद्धः, सापीत्यपिशब्दार्थः। श्रोतुः श्रोतृमात्रस्य। विशेषज्ञस्य किं पुनरिति भावः। प्रतिकूलशब्दा प्रतिकूलो विरुद्धः शब्दो यस्याः सा तथा। आसीदिति शेषः। उक्तमर्थमुपमया स्फुटयति—ताड्यमाना वितन्त्रीरिवेति। ताड्यमाना शास्त्रानभिज्ञैराहन्यमाना। विरुद्धा तन्त्रीर्वितन्त्रीरिति प्रादिसमासः। 'तत्रि कुटुम्बधारणे' इति धातोः 'अवितॄस्तृतन्त्रिभ्य ईः'। (उणा. ३.१५८) इति ईप्रत्यये तन्त्रीरिति पदम्। तन्त्रीरिति च वीणागुण उच्यते।

उत्पाद्यानां स्वरादीनां विहितं ताडनक्रमम्।
विना या ताड्यते मन्दैः सा वितन्त्रीरिहोच्यते।।

इत्याहुराचार्याः। देवीवचनान्तराले सञ्जल्पन्ती कोकिलापि वीणायाः समीचीनवादनवेलायामक्रमताडिता वीणागुणवल्लरीव श्रोतृजनानामरुन्तुदमेव शब्दमुत्पादयामासेति भावः। अत्रामृतस्रुतेत्युत्प्रेक्षा माधुर्यसौकुमार्यादिगुणैः परभृताविरुताद्

देवीसञ्जल्पितस्य व्यतिरेकं द्योतयति, प्रतिकूलशब्दश्च तमभिद्योतयतीति व्यतिरेकालङ्कारो ध्वन्यते।।४४।।

प्रवातनीलोत्पलनिर्विशेष-
मधीरविप्रेक्षितमायताक्ष्या।
तया गृहीतं नु मृगाङ्गनाभ्य-
स्ततो गृहीतं नु मृगाङ्गनाभिः।।४५।।

प्रकाशिका

प्रवातेति। अधैर्यप्रतिवस्तुतया प्रवातसम्बन्ध उपात्तः। ससन्देहोऽत्रालङ्कारः। 'ससन्देहस्तु भेदोक्तौ तदनुक्तौ तु संशय' इति [काव्यप्रकाशे]। नन्वत्र नुशब्दो वितर्कद्योतकः। वितर्कश्च भोजराजेन पृथगलङ्कारत्वेनोक्तः। उच्यते। नुशब्दोऽयमुभयं द्योतयति वितर्कं संशयं च। अत्र भोजः—'कः पुनर्वितर्कसंशययोर्भेदः। उच्यते। निर्णयासन्नो वितर्कः। वितर्कासन्नः संशयः। संशयानो हि वितर्कस्य कोटिमारुह्य ततो विभ्रष्टस्तत्त्वं चाभिनिविशते। शब्दाश्च किंस्विदित्यादयस्तुल्यरूपा एव संशयवितर्कयोरिति दुरवबोधस्तद्विशेष' [सरस्वतीकण्ठाभरणालङ्कारे ४.४२ वृत्तौ] इति। अत एवास्मदलङ्कारकृता ससन्देहात् पृथगलङ्कारत्वेन वितर्को नोक्तः। विशेषणानां संशयाङ्गत्वं द्रष्टव्यम्।।४५।।

विवरणम्

कटाक्षं वर्णयति—

प्रवातेति। प्रवातनीलोत्पलनिर्विशेषम् अधीरविप्रेक्षितम् आयताक्ष्या तया मृगाङ्गनाभ्यो गृहीतं नु मृगाङ्गनाभिस्ततो गृहीतं नु। प्रवातनीलोत्पलनिर्विशेषं प्रकृष्टोऽधिको वातो यस्मिन् देशे स प्रवातः, तत्रत्यं नीलोत्पलं प्रवातनीलोत्पलं, तेन निर्विशेषं विशेषरहितं, सदृशमिति यावत्। अधीरविप्रेक्षितम् अधीरं चपलं यद् विप्रेक्षितं विलोकनम्। भावे निष्ठा। तद् आयताक्ष्या आयते विशाले अक्षिणी यस्यास्तया। अनेन नेत्रस्यापि मृगनेत्रसादृश्यं दर्शितम्। तेन च नेत्रस्वरूपवर्णनमपि कविः कृतवानित्यवसेयम्। तया पार्वत्या मृगाङ्गनाभ्यः मृगीभ्यः सकाशाद् गृहीतं स्वीकृतं नु। नुशब्दः संशयवाचकः। मृगाङ्गनाभिर्मृगस्त्रीभिः ततः पार्वतीसकाशात्। उभयत्रापि 'आख्यातोपयोगे' (१.४.२९) इति पञ्चमी। गृहीतं स्वीकृतं नु। चारुमारुतावधूयमानचञ्चलेन्द्रीवरसदृशं कटाक्षविक्षेपणं किं तया मृगाङ्गनासकाशाद् गृहीतम् उत मृगाङ्गनाभिस्तत्सकाशादितीमं विशेषं निपुणतरं निरूपयन्तोऽपि वयं नावगच्छाम इति भावः। प्रवातग्रहणम्। आयताक्ष्या इति विसर्गान्तपाठे आयताक्ष्याः

प्रवातनीलोत्पलनिर्विशेषमवीरविप्रेक्षितमित्यन्वयः। सन्देहोऽत्रालङ्कारः 'विषयस्य सन्दिह्यमानत्वे सन्देह' इति। विशेषणसन्देहोऽङ्गमम्।।४५।।

तस्याः शलाकाञ्जननिर्मितेव
कान्तिर्भ्रुवोरानतरेखयोर्या।
तां वीक्ष्य लीलाचतुरामनङ्गः
स्वचापसौन्दर्यमदं मुमोच।।४६।।

प्रकाशिका

तस्या इति। शकालाग्रस्थेन हरितालद्रवादिना निर्मितस्य चित्रादेर्निर्मातमनोनुकूला शोभा भवतीति शलाकाञ्जननिर्मितत्वमुत्प्रेक्ष्यते। आनता कुटिला रेखा सन्निवेशो ययोः। लीलाभिर्विलासैश्चतुराम्। अत्रापि शोभासन्निवेशविशेषाभ्यां साम्ये सत्यनङ्गचापाद् देवीभ्रुवोर्लीलाचतुरत्वेनाधिक्येन तां वीक्ष्येत्यादिना व्यतिरेक उक्तः। अत्र सा यां वीक्ष्येति पठितव्यमिति कश्चित् सुधीः। एवं हि वाक्यस्य प्रकृतपर्यवसायित्वं भवतीति।।४६।।

विवरणम्

भ्रुवौ वर्णयति—

तस्या इति।. तस्याः भ्रुवोः कान्तिः सा। तस्याः पार्वत्याः भ्रुवोः भ्रूयुगलस्य कान्तिः शोभा सा तथाविधेत्यर्थः। अवाङ्मनसगोचर इति भावः। अत एवोत्प्रेक्षते—शलाकाञ्जननिर्मितेवेति। शलाका चित्रलेखनसाधनं, शलाकाग्रावस्थितमञ्जनं शलाकाञ्जनं, तेन निर्मितेव। शलाकाग्रवर्तिना हरितालद्रवादिना लिखितं हि चित्रं निर्मातृजनमनोनुकूलं भवतीति सन्निवेशविशेषसौन्दर्यमुत्प्रेक्षाफलम्। तादृशं सन्निवेशविशेषमेव विशेषणेनाह—आनतरेखयोरिति। आनता कुटिला रेखा सन्निवेशो ययोस्तयोः। भ्रूशोभाया अवाङ्मनसगोचरत्वमेव द्रढयति—अनङ्गो यां वीक्ष्य स्वचापसौन्दर्यमदं मुमोचेति। अनङ्गो मन्मथः यां भ्रूकान्ति वीक्ष्यावलोक्य स्वचापसौन्दर्यमदं स्वस्य चापस्य यत् सौन्दर्यं मनोहारित्वं, तेन यो मदः आत्मश्लाघिता, तं मुमोच त्यक्तवान्। तत्र हेतुमाह—लीलाचतुरामिति। लीलया विलासेन चतुरां सुन्दरम्। 'चतुरौ दक्षसुन्दरौ' इति वैजयन्ती। अनेन विशेषणेन गुणान्तरसाम्ये सत्यपि देवीभ्रुवोरनङ्गचापाद् व्यतिरेकः प्रतिपादितः। 'कान्तिर्भ्रुवोरानतरेखयोर्या तां वीक्ष्ये'ति पाठे पुनरेकवाक्यतया योजना। अत्र व्यतिरेकोऽलङ्कारः।।४६।।

लज्जा तिरश्चां यदि चेतसि स्या-
दसंशयं पर्वतराजपुत्र्याः।
तत् केशपाशं प्रसमीक्ष्य कुर्यु-
र्वालप्रियत्वं शिथिलं चमर्य।।४७।।

प्रकाशिका

लज्जेति। तत् तस्मात्। अत्राप्यतिशयोक्तिभेदः प्रागुक्तोऽलङ्कारो व्यतिरेकश्च गम्यते। वाक्यार्थयोश्चात्र लोकसिद्धः कार्यकारणभावः—योऽधिकगुणदर्शनाल्लज्जितः, स स्वगुणेषु नादरं कुर्वीतेति।।४७।।

विवरणम्

केशपाशं वर्णयति—

लज्जेति। तिरश्चां चेतसि लज्जा स्याद्यदि तत् चमर्यः पर्वतराजपुत्र्याः केशपाशं प्रसमीक्ष्य वालप्रियत्वं शिथिलं कुर्युः असंशयम्। तिरश्चां तिर्यग्योनिजानां पश्वादीनां चेतसि मनसि लज्जा अपत्रपा। स्यादिति सम्भावनायां लिङ्। यदीति यच्छब्दस्य प्रतियोगिनं तच्छब्दं निर्दिशति—तदिति। तर्हीत्यर्थः। पर्वतराजपुत्र्याः पर्वतानां राज्ञः पुत्र्याः पार्वत्याः केशपाशं प्रशस्तं केशम्। 'पाशः पक्षश्च हस्तश्च कलापार्थाः कचात् परे' इत्यमरः। प्रसमीक्ष्य प्रकर्षेण सम्यक् चावलोक्य। अत्र प्रकर्षेणावलोकनं नाम देव्याश्चमरीणां च हिमवत्पार्श्ववर्तित्वादनवरतावलोकनम्। देवीकेशपाशगतानां स्वाभाविकसौरभ्यादिगुणयोगित्वादीनां स्ववालेष्वभावावगमपर्यन्तमवलोकनं सम्यगवलोकनम्। तस्मात् सम्यगवलोकनं प्रकर्षावलोकनसाध्यमिति प्रशब्दस्य पूर्वनिर्देशः। चिरपरिचयवशाद् देवीकेशपाशगतान् विशेषगुणान् विविच्यावगम्येत्यर्थः। अत्र विविच्यावलोकनमारोपितम्। वालप्रियत्वं वालो लाङ्गूलं प्रियो यासां ताः वालप्रियाः, तासां भावस्तत्त्वम्। 'त्वतलोर्गुणवचनस्य पुंवद्भावो वक्तव्यः' (वा. ६.३.३५) इति पुंवद्भावादत्र टापो निवृत्तिः। शिथिलमल्पं कुर्युः। अत्रापि सम्भावनायां लिङ्। असंशयं, नात्र सन्देह इत्यर्थः। यो हि गुणाधिकदर्शनेन लज्जितः, (सः) स्वगुणेषु नादरं करोतीति लोकसिद्धम्। तत्र यदि मनुष्यादीनामिव पश्वादीनामपि गुणाधिकदर्शनेन लज्जा भवेत्, तर्हि चमर्यो देवीकेशपाशदर्शनानन्तरं स्ववालेषु कदाचिदपि नादरं कुर्वीरन्नित्यर्थः। चमरीणां देवीकेशपाशदर्शने सत्यपि यदेताः स्वलाङ्गूलेष्वादरं कुर्वन्ति, तिर्यग्योनिजातानामेतासां लज्जाभाव एव तत्र हेतुरिति भावः। अत्र 'पुष्पं प्रवालोपहितं यदि

स्याद्' [कु. १.४३] इत्यत्र प्रतिपादितोऽतिशयोक्तिभेदोऽलङ्कारो व्यतिरेकश्च ध्वन्यते॥४७॥

सर्वोपमाद्रव्यसमुच्चयेन
यथाप्रदेशं विनिवेशितेन।
सा निर्मिता विश्वसृजा प्रयत्ना-
देकस्थसौन्दर्यदिदृक्षयेव॥४८॥

प्रकाशिका

एवं दिङ्मात्रदर्शनाय कांश्चित् प्रधानावयवानुपवर्ण्योक्तानुक्तावयवसाधारण्या वर्णनया प्रकरणमुपसंहरति—

सर्वोपमेति। उपमाद्रव्यं प्रागुक्तं चन्द्रकमलादि, अनुक्तं च नासादिप्रतिवस्तुतिलकुसुमादि, तस्य समुच्चयः समाहारः समूह इत्येकोऽर्थः। तेनयथाप्रदेशं यथाशब्दः पदार्थानतिक्रमे। प्रदेशो विषयः। स्वस्वोचितप्रपदादिविषयानतिक्रमेणेत्यर्थः। विनिवेशितेन तिर्यगूर्ध्वादिविशेषतो निवेशितेन। अन्यथा परस्परसाङ्कर्यानौचित्याभ्यां सौन्दर्यव्यतिरेकाभावः स्यात्। अनेन निर्मातुरवधानातिशयो ध्वन्यते। विश्वसृजेति, तस्य किमशक्यमिति भावः। प्रयत्नात् प्रकृष्टं यत्नमवलम्ब्य। एवं निर्माणे हि तस्यापि महता यत्नेनावश्यं भाव्यमिति भावः। एकस्थस्य एकावयविस्थितस्य सौन्दर्यस्य, अर्थात् सर्वोपमाद्रव्यगतस्य सर्वस्यैव। अन्यथा त्वसमुच्चयेऽप्येकैकस्थस्य सौन्दर्यस्य खण्डशो द्रष्टुमशक्यत्वात्। अत्राखण्डसौन्दर्यदिदृक्षामूलैवंविधिनिर्माणोत्प्रेक्षयां देव्यामखण्डसौन्दर्याध्यासः प्रतीयते॥४८॥

विवरणम्

इत्थं दिङ्भात्रप्रदर्शनार्थं देव्याः कांश्चन प्रधानावयवानुपवर्ण्य विस्तरभिया महाकविरनुक्तानामुक्तानां चावयवानां साधारणवर्णनेन प्रकृतमङ्गवर्मनमुपसंहरति—

सर्वोपमेति। विश्वसृजा सा एकस्थसौन्दर्यदिदृक्षया प्रयत्नाद् यथाप्रदेशं विनिवेशितेन सर्वोपमाद्रव्यसमुच्चयेन निर्मितेव। विश्वसृजा विश्वं सृजतीति विश्वसृट् (तेन) सकलजगन्निर्माणकर्मठेन ब्रह्मणा। तस्य किं दुष्करमिति भावः। सा पार्वती। एकस्थसौन्दर्यदिदृक्षया एकस्थस्यैकस्मिन्नेवावयविनि वर्तमानस्य सौन्दर्यस्य सर्वोपमाद्रव्यगतस्येत्यर्थात् सिध्यति, द्रष्टुमिच्छया। हेतौ तृतीया। न हि पृथक्पृथगवस्थापने पुञ्जीकृत्यावस्थापनेऽपि सुकुमाराणां चन्द्रकमलादीनां सौन्दर्यमेकस्मिन्नेवावयविनि वर्तमानतया द्रष्टुं शक्यमिति भावः। प्रयत्नात् ल्यब्लोपे

पञ्चमी, प्रयत्नमवलम्ब्येत्यर्थः। यथाप्रदेशं यथाशब्दः पदार्थानतिक्रमे। प्रदेशो मुखादिस्थानं, तत्तदुचितप्रदेशानतिक्रमेणे त्यर्थः। विनितेशितेन विशब्दो विशेषवाची, तिर्यगूर्ध्वादिविशेषेण निवेशितेन स्थापितेन। पदादिस्थाने पद्मादीनामधोमुखतया स्थापनं, नयनादिस्थाने कुवलयादीनां तिर्यगवस्थापन-मित्यादिविशेषेणेत्यर्थः। अनेन विश्वसृजोऽपि सावधानत्वं ध्वन्यते। सर्वोपमाद्रव्य-समुच्चयेन सर्वेषां न तु केषाञ्चिद्, उपमाद्रव्याणां चन्द्रकमलादीनाम्, अनुक्तानां नासादिप्रतिवस्तुभूतानां तिलकुसुमादीनामप्युपादानार्थं सर्वशब्दः, समुच्चयेन समाहारेण। 'समाहारः समुच्चय' इत्यमरः। समूहेनेत्यर्थः। करणार्थे तृतीया। निर्मिता सृष्टेव। इत्र ततइतो विप्रकीर्णानि चन्द्रकमलाद्युपमाद्रव्याणि प्रयत्नादेकत्र समानीय पुनश्च तानि यथोचितप्रदेशं रमणीयतया विन्यस्य ब्रह्मणस्तदङ्ग-निर्माणमित्युत्प्रेक्ष्यते, एकस्थसौन्दर्यदिदृक्षा तु तत्र हेतुत्वेन। अनेनोत्प्रेक्षाद्वयेन च देवीसौन्दर्यस्य लोकोत्तरत्वं ध्वन्यते॥४८॥

तां नारदः कामचरः कदाचित्
कन्यां किल प्रेक्ष्य पितुः समीपे।
समादिदेशैकवधूं भवित्रीं
प्रेम्णा शरीरार्धहरां हरस्य॥४९॥

प्रकाशिका

अथैतत्प्रकरणमुपयोजयन् प्रकरणान्तरमारभते—

तामिति। तामेवंविधगुणविशिष्टाम्। कामचर इति दर्शनस्य यादृच्छिकत्वे हेतुः। कदाचिदिति यादृच्छिकत्वम्। कन्यामिति कन्यानां दर्शने हि तत्पित्रादिप्रीतये तत्प्रवृत्तये वा भाविनमर्थमादिशन्ति सन्तः, लोकदृष्ट्यनुसारेणैव नारदस्य तद्दर्शनादिकमिति च ध्वन्यते। अन्यथा कथं शिवयोरासन्नसेवकः स तयोस्तत्त्वं न विजानीयात्। तौ हि तत्त्वतो नित्यव्यतिशक्तावेवेति सोऽन्य एव परमार्थः। किलशब्दो वार्तायाम्। पितुः समीप इति दर्शनोपपत्त्यर्थम्। आदेशो भाव्यर्थशंसनम्। एकामद्वितीयां वधूं भार्याम्। भवित्रीं भाविनीम्। अयमादेशप्रकारः। इदमेव तावन्मनोरथस्याप्यविषयः। इतोऽप्यपरमस्तीत्याह—प्रेम्णेति। प्रेम्णा, न तु दाक्षिण्यादिना। शरीरस्यार्धहरामिति विग्रहः। अन्यथा अर्धशब्दस्य समप्रविभागवाचित्वे सति 'अर्धं नपुंसकम्' (२.२.२) इति समासकरणादर्धशरीरहरामिति स्यात्। हरस्येत्यत्र तु यथाबुद्धि व्यङ्ग्योऽर्थोऽनुसर्तव्यः, न तु संज्ञिमात्रम्॥४९॥

विवरणम्

अथैतत्प्रकरणोपयोगी प्रकरणान्तरमारभते—

तामिति। नारदः कदाचित् तां कन्यां पितुः समीपे प्रेक्ष्य हरस्यैकवधूं भवित्रीं समादिदेश किल। नारद इत्यनेन श्रद्धेयवाक्यत्वमुक्तम्। स हि परमेश्वरस्यासन्नसेवकः। कदाचिदित्यनेन नारदस्य यादृच्छिकमागमनं प्रतिपादितम्। तां पूर्वोक्तसकलगुणविशिष्टाम्। अनेन हरयोग्यत्वमुक्तम्। कन्यामित्यनेन पितुस्तदुचितभर्तृचिन्ता व्यज्यते। तत एव नारदस्य समादेशावकाशश्च ध्वन्यते। सन्तो हि कन्यादर्शने पित्रादिप्रीतये भाविनमर्थमादिशन्ति। पितुः हिमवतः समीपे। अनेन नारदस्य देवीदर्शनोपपत्तिरुक्ता। प्रेक्ष्य सम्यगवलोक्य। अनेन नारदस्य तद्गुणावलोकनं तादृशादेशे हेतुरिति लोकदृष्ट्यनुसारो व्यज्यते। हरस्य परमेश्वरस्य एकवधूम् एकामद्वितीयाम्, अनेन पत्न्यभाव उक्तः, वधूं भार्याम्। 'वधूर्जाया स्नुषा स्त्री चे'त्यमरः। भवित्रीं भाविनीम्। समादिदेश सम्यगादिदेश। अत्र भाव्यर्थकथनमादेश इत्युच्यते। तत् कृतवानित्यर्थः। एषा हरवधूर्भविष्यतीति स्पष्टमेवोक्तवानित्यर्थः। किलेत्यनेन पुराणप्रसिद्धोऽयमर्थ इति ध्वन्यते। एतावन्मात्रमपि पितुर्मनोरथस्याप्यविषयः। ततोऽप्यधिकं किञ्चिदस्तीत्याह—प्रेम्णा शरीरार्धहरामिति। प्रेम्णा स्नेहेन, न तु दाक्षिण्यादिनेति भावः। 'प्रेम स्नेह' इत्यमरः। शरीरार्धहरां, नन्वत्र समांशविवक्षायामर्धशरीरहरामिति वक्तव्यम्। 'अर्धं नपुंसकम्' (२.२.२) इति समस्यमानस्यार्धशब्दस्योपसर्जनत्वेन पूर्वनिपातस्यावश्यम्भावात्। अर्धशब्दस्य पुल्लिङ्गत्वे तु शरीरैकदेशहरामित्येवार्थः स्यात्। 'अर्धं समेंऽशक' इत्यमरसिंहवचनात्, मैवम्, शरीरस्यार्धहरामिति विग्रहस्वीकारात्। नारदस्य यादृच्छिकदेवीदर्शने हेतुमाह—कामचर इति। कामं चरतीति कामचरः॥४९॥

गुरुः प्रगल्भेऽपि वयस्यतोऽस्या-
स्तस्थौ निवृत्तान्यवराभिलाषः।
ऋते कृशानोर्न हि मन्त्रपूत-
मर्हन्ति तेजांस्यपराणि हव्यम्॥५०॥

प्रकाशिका

ततः किमित्याह—

गुरुरिति। प्रगल्भे प्रौढे वयसि प्रकृते यौवने। अतो नारदवचनात्। तस्थौ व्याकुलतामत्यजत्। निवृत्तोऽन्यस्मिन् देवव्यतिरिक्ते वरे वोढर्यभिलाषो यस्य। अयमर्थः—प्रथमं प्रौढयौवनां तां दृष्ट्वानुरूपस्य कस्यचिद्वरस्याभिलषितत्वान्निरूप्य-

माणस्यापि तस्यान्यस्य लोकेऽनुपलम्भादनुरूपस्य च देवस्य मनोरथानामप्यविषयत्वादसौ व्याकुलोऽभूत्। पश्चान्नारदवचनाद् देवे भाविनि वर उपलब्धे निवृत्तान्यवराभिलाष एव भूत्वा निर्व्याकुलोऽभूदिति। युक्तश्चैतदित्याह—ऋत इति। हविषि मन्त्रपूतत्वमपरानर्हत्वे हेतुः। प्रकृते तु प्रकरणप्रतिपादितो विश्वातिशायी गुणग्रामः॥५०॥

विवरणम्

नारदादेशानन्तरं पितुः प्रवृत्तिमाह—

गुरुरिति। गुरुरतोऽस्याः प्रगल्भे वयस्यपि निवृत्तान्यवराभिलाषस्तस्थौ। गुरुः पिता हिमवान् अतो विश्वसनीयनारदादेशाद्धेतोः अस्याः पार्वत्याः प्रगल्भे प्रौढे वयसि, यौवन इत्यर्थः। अपिशब्दो दुहितुर्यौवनावस्थायां पितुस्तथावस्थानस्यासम्भवं द्योतयति। तस्य च मुनिवचनमेव हेतुरिति सूचयति—निवृत्तान्यवराभिलाषः। निवृत्तो व्यावृत्तः अन्यस्मिन् भगवद्व्यतिरिक्ते वरे विवाहकर्तरि अभिलाषो यस्य तथाविधः सन् तस्थौ। 'ष्ठा गतिनिवृत्तावि'ति धातुः। मनोव्यापारनिवृत्तिरेवात्र विवक्षिता। लोकातिशायिलावण्यामारूढयौवनां च तनयामेवमवलोकयन् हिमवान् भगवद्व्यतिरिक्तस्य कस्यचिदपि देव्या असमानत्वाद्, भगवतस्तु मनोरथानामप्यविषयत्वात् को वा मे दुहितुर्भर्ता भविष्यतीति व्याकुलोऽभूत्। नारदादेशानन्तरं तु निर्व्याकुलोऽभूदिति भावः। युक्तं चैतदित्याह—मन्त्रपूतं हव्यं कृशानोर्ऋते अपराणि तेजांसि नार्हन्तीति। मन्त्रैः पूतं मन्त्रपूतम्। एतच्चान्यानर्हत्वे हेतुः। देव्याः पूर्वप्रतिपादितविश्वातिशायिगुणगणप्रतिवस्तुभूतं चेदं विशेषणम्। हव्यं हविः कृशानोर्ऋते अग्निं विना। 'अन्यारादितरर्ते'(२.३.२९) इति पञ्चमी। अपराण्यन्यानि तेजांसि सूर्याचन्द्रमसादीनि नार्हन्ति। हिशब्दः प्रसिद्धौ। यथा मन्त्रपूतं हविः कृशानुरेवार्हति, तथा तामपि हर एवेति भावः॥५०॥

अयाचितारं न हि देवदेव-
मद्रिः सुतां ग्राहयितुं शशाक।
अभ्यर्थनाभङ्गभयेन साधु-
र्माध्यस्थ्यमिष्टेऽप्यवलम्बतेऽर्थे॥५१॥

प्रकाशिका

तर्हि किमसौ स्वयं कन्यया देवं नोपस्थितवानित्याह—

अयाचितारमिति। अभ्यर्थनाभङ्ग, प्रत्याख्यानम्। साधुर्मानी। माध्यस्थ्यम-

प्रवृत्तिम्। अत्र देवगतस्यायाचनस्य अद्रिगतस्य कन्याग्राहणाशक्तत्वस्य च कार्यकारणभाव:

अयाचितानि देयानि सर्वद्रव्याणि भारत!।
अन्नं विद्या तथा कन्या अनर्थिभ्यो न दीयते।।

इत्यागमसिद्ध:। अत्र प्रत्युपसृष्टस्य गृह्णाते: प्राप्त्यर्थत्वाद् 'गतिबुद्धि-' (१.४.५२) इत्यादिसूत्रेण कर्मसंज्ञायां देवमिति द्वितीयेति **दक्षिणावर्त:।** वयं त्वनुपसृष्टस्यापि प्राप्त्यर्थत्वं मन्यामहे। तथा च 'देवदेवमद्रि: सुतां ग्राहयितुमि'ति महिमा पपाठ। एवञ्च—

तमादौ कुलविद्यानामर्थमर्थविदां वर:।
पश्चात् पार्थिवकन्यानां पाणिमग्राहयत् पिता।।

इत्यत्रोत्तरवाक्ये दक्षिणावर्तदर्शितो विभक्तिविपरिणामो न कार्य:।।५१।।

विवरणम्

ननु यदि हर एवास्या: पतिरिति नारदादेशादवगतं हिमवता तर्हि केन कारणेनासौ स्वयमेव कन्यया न देवमुपस्थितवानत आह—

अयाचितारमिति। अद्रि: सुतामयाचितारं देवं प्रतिग्राहयितुं न हि शशाक। आद्रि: हिमवान् अयाचितारं याचनं करोतीति याचिता, ततोऽन्यम् अयाचितारं देवं परमेश्वरं सुतां तनयां प्रतिग्राहयितुम्। अत्र 'गतिबुद्धि—' (१.४.५२) इत्यादिसूत्रे ग्रहेरनुपादानाद् देवं प्रतिग्राहयितुमिति द्वितीयानुपपत्ते: प्राप्त्यर्थत्वमेव युक्तम्। तत् तु प्रत्युपसर्गवशादिति दक्षिणावर्त:। अरुणाचलनाथस्तु—निरुपसर्गस्यापि ग्रहे: प्राप्त्यर्थत्वमुक्तवान्। सुतां देवं प्रापयितुमित्यर्थ:। हिशब्दोऽवधारणे। नैव शक्तोऽभूदित्यर्थ:।

अयाचितानि देयानि सर्वद्रव्याणि भारत!।
अन्नं विद्या तथा कन्या अनर्थिभ्यो न दीयते।।

इति वचनादिति भाव:। अत्रार्थान्तरन्यासमाह—मानी इष्टे अर्थे अभ्यर्थनाभङ्गभयेन माध्यस्थ्यमवलम्बत इति।. मान्यभिमानी जन: इष्टे स्वसाध्यभूतेऽर्थेऽपीत्यर्थ:। अभ्यर्थना याचना, तस्यास्तु भङ्ग: प्रत्याख्यानं, तस्माद् भयेन। न वयमस्यां सक्ता इत्यादिवचनभयादिति भाव:। मध्यस्थस्य भावो माध्यस्थ्यमौदासीन्यमिति यावत्। मानिनो हि जना निजाभिलषितेऽप्यर्थे प्रत्याख्यानभिया नातीव प्रयतन्त इत्यर्थ:।।५१।।

यदैव पूर्वे जनने शरीरं
सा दक्षरोषात् सुदती ससर्ज।
तदाप्रभृत्येव विमुक्तसङ्गः
पतिः पशूनामपरिग्रहोऽभूत्॥५२॥

प्रकाशिका

इत्थं सकलजगदेकनायिकायाः प्रबन्धनायिकायाश्चरितमुपवर्ण्य तत्प्रसङ्गेन नायकस्य वृत्तान्तमवतारयति। तत्र चायं प्रसङ्गः—एवंविधां पूर्वपत्नीं किमयं देवः स्वयं भूधरेन्द्रं न याचितवानिति।

यदैवेति। दक्षिणावर्तेनोक्तं 'दक्षरोषात्तु सतीति पाठः। तुशब्दोऽवधारणे। सतीति तादात्विकं नामे'ति। तत्पाठे तुशब्दः प्रकरणान्तरोपक्रमद्योतको युक्तः। यथा महाभारते 'कृत्वा विवाहं तु कुरुप्रवीरा' इति, 'कृतशौचं तु राजानं धर्मात्मानमि'ति च। रामायणेऽपि 'प्रविश्य तु महारण्यं दण्डकारण्यमि'ति। सती सेत्यन्वयः। सुदतीति पाठे सुदतीशब्दस्य वयोवस्थाविशेषवाचित्वान्निरुपयोगता। देवतानां वयोवस्थाया अविशेषात्। यद्वा वयोवस्थया देवं प्रति देव्या अपर्याप्तभुक्तत्वं लक्ष्यते। तच्च निर्वेदकारणम्। अपर्याप्तभुक्तस्येष्टस्य वस्तुनो झटित्यत्यन्तनाशः सत्त्ववतां सर्वतो निर्वेदाय हि भवति। सङ्गत्यागश्च निर्वेदः। अपरिग्रहो ममत्वरहितः। ममत्वं हि सङ्गस्य कार्यम्। पशूनां पतिरित्यनेन सकलचेतनप्रवृत्तिनिवृत्तिकर्णधारस्यास्य कथमपरिग्रहत्वमिति कथं वास्य मायाकार्यं परिग्रह इति वा सोत्प्राशोक्तिर्व्यज्यते। अत्र देवीदेहत्यागो देवस्य सङ्गत्यागे कारणम्। तथा हि—प्रकृष्टशोकाभिभूताः सन्तः सत्त्ववन्तः प्रत्यवमर्शिकया सत्त्वात्मिकया दृष्ट्या विपयेषु दोषान् पश्यन्तः सर्वतो निर्विद्यन्ते। किञ्च जनयिता च विप्रियाचरणेन देहत्यागहेतुर्जातः। तस्मात्—

यावतः कुरुते जन्तुः सम्बन्धान् मनसः प्रियान्।
तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कवः॥

इति न्यायेन सम्बन्धः सर्वतो दुःखावह इति देहत्यागस्य सङ्गत्यागहेतुत्वं समर्थयितुं प्रकरणसिद्धोऽपि दक्षरोषो हेतुरुपात्तः। तर्हि तद्देहत्यागस्य हेतुत्वमात्रे वक्तव्ये तदैव प्रभृतीति कालनियमोपक्रमवाचीनि पदानि किमर्थमुपात्तानि। उच्यते। अत्र तदेति निर्दिष्टस्य कालविशेषस्यैव शाब्दं हेतुत्वम्। अव्ययत्वात्तु विभक्त्यश्रवणम्। कालो हि सकलभावानां प्रवृत्तिनिवृत्तिहेतुत्वेनेष्टः। अत एव तस्य नैमित्तिकाधिकरणत्वं 'मधौ माद्यन्ति कोकिला' इत्यादाविच्छन्ति शाब्दिकाः। देहत्यागस्य तु

कालविशेषणत्वादार्थं हेतुत्वम्। विशेषणे हि तात्पर्यं भवति। एवशब्दस्तु तस्यैव कालस्य हेतुत्वमिति द्योतनाय। यद्यपि सर्ववाक्यानां सावधारणत्वं, तथापि व्यवच्छेद्यस्योत्कटत्वेन प्राप्ताववधारणस्य विवक्षितत्वद्योतनाय तद्वाचि पदं प्रयुज्यते। अत्र देहत्यागस्य परम्परया सङ्गत्यागं प्रति हेतुत्वे कालान्तरस्य हेतुत्वं, साक्षात्तु हेतुत्वे तद्विशिष्टस्यैव कालस्य हेतुत्वमिति विकल्पेन कालद्वय-प्राप्ताववधारणस्य विवक्षितत्वम्। नन्वेवमेक एव तच्छब्दनिकटस्थ एवशब्द उपादेयः, न त्वाद्यः। अर्थाविशेषाभावात्। नैवम्। अनुवाददशायामपि कालविशेष-धर्मस्यावधारणस्य वक्तृबुद्धावुद्रेकेणावभासमानत्वात्। तथा च शिष्टप्रयोगः—'यैव त्वं हि पुरा जाता सैव त्वं हि शिखण्डिनी'ति। प्रभृतिशब्दस्याभावे तु सङ्गत्यागस्याऽनुवृत्तिर्न प्रतीयेत। तस्मात् त्रितयमप्युपादेयम्। इतःप्रभृति स्वेच्छापरिगृहीतधीरोदात्तावस्थस्य देवस्य लोकानुग्रहहेताविति वृत्त आधिकारिकतया वर्ण्यमाने दयावीरो रसोऽङ्गी। तदन्येषामङ्गत्वम्। अत्र पूर्वप्रवृत्तत्वेन सूचितस्य शृङ्गारस्य विरोधी तपश्चर्यानुभावकः शान्तो रसस्तृतीयसर्गान्तं यावदनुवर्तते। तयोश्च विरोधस्तदुभयाविरुद्धेन देवीदेहत्यागसूचितेन मध्ये पतता करुणेन प्रशमितः। तदुक्तं ध्वनिकृता—

> रसान्तरान्तरितयोरेकवाक्यस्थयोरपि।
> निवर्तते हि रसयोः समावेशे विरोधिता।।

[ध्वन्यालोके ३.२७] इति।।५२।।

विवरणम्

इत्थमखिललोकनायिकायाः प्रबन्धनायिकाया वृत्तमुपवर्ण्य तत्प्रसङ्गप्राप्तो नायक-वृत्तान्तः प्रस्तूयते। तत्रायं प्रसङ्गप्रकारः कैश्चिदुक्तः—ननु यदि देवगतमयाचनमद्रिगतस्य कन्याग्राहणाशक्तत्वस्य हेतुस्तर्हि केन हेतुनायं देवः स्वयमेव हिमवन्तं निजपूर्वपत्नीं न याचितवानित्यत्राह—**यदैवेतीति**। वयं तु देवीशरीरत्यागानन्तरं देव किमकरोदित्यत्राहेति ब्रूमः।

सुदती सा पूर्वे जनने दक्षरोषाद् यदैव शरीरं ससर्ज, पशूनां पतिस्तदा-प्रभृत्येवापरिग्रहः अभूत्। शोभना दन्ता यस्याः सा सुदती। 'वयसि दन्तस्य दतृ' (५.४.१४१) इति दत्रादेशः। 'उगितश्च' (४.१.६) इति ङीप्। शोभनदशना युवतिश्चेत्यर्थः। अनया च वयोवस्थया देवस्य देवीसम्भोगेष्वतृप्तत्वं लक्ष्यते। देवतानां वयोवस्थाया अविशेषात्। अर्धभुक्तमिष्टं विनष्टं हि वस्तु सत्त्ववतां सर्वतो निर्वेदमापादयति। अत एव विमुक्तसङ्ग इत्युक्तम्। दक्षरोषात् तु सतीति पाठे तुशब्दः प्रकरणान्तरोपक्रमद्योतकः। सतीति नाम। सा पार्वती पूर्वे जनने पूर्वस्मिन्

जन्मनि, दक्षपुत्रीत्वावस्थायामित्यर्थः। दक्षरोषाद् दक्षविषयाद् रोषाद् यदैव शरीरं ससर्ज विससर्ज, पशूनां कर्मपाशयन्त्रितानां ब्रह्मादिस्तम्बपर्यन्तानां जीवानां पतिः अन्तर्यामितया नियन्ता। अनेन सङ्गत्यागादीनामप्यस्य लोकयात्रामूलत्वं व्यज्यते। तदाप्रभृत्येव तदानीमेवारभ्य अपरिग्रहो ममत्वरहितोऽभूत्। यदैव देवी दक्षरोषादात्मनः शरीरं विससर्ज, तदानीमेव परमेश्वरोऽहम्ममाभिमानरहितोऽभूदित्यर्थः। किमत्र चित्रम्। पितापि विप्रियमाचरन् पुत्र्याः शरीरत्यागे हेतुर्जात इति द्योतयितुं प्रकरणसिद्धमपि दक्षरोषमुपात्तवान्। देवी तु—

यावतः कुरुते जन्तुः सम्बन्धात् मनसः प्रियान्।
तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कवः॥

इति न्यायमवलम्ब्य स्वशरीरमेव तत्याजेत्यर्थः। अपरिग्रहत्वावलम्बे हेतुमाह—विमुक्तसङ्ग इति। विमुक्तो विशेषेण मुक्तः सङ्गः सक्तिर्येन स तथा। सङ्गो हि ममत्वाभिमाने हेतुः। ननु कुतो भगवतो ममत्वं, कुतस्तरां तत्परित्यागः, सत्यम्, इष्टजनवियोगे महाजनैरेवमेव कर्तव्यं, न पुनरतिमोह इति लोकशिक्षार्थमेव देवस्यायं व्यापारः। ननु यदि देवीशरीरत्याग एव देवस्य ममत्वपरित्यागे हेतुस्तर्हि किमर्थं तदाप्रभृत्येवेति कालनिर्णयस्योपादानम्। देवीशरीरत्यागाद् देवो ममत्वरहितोऽभूदित्येव हि वक्तव्यम्। उच्यते। काल एव हि सर्वेषामपि भावानां प्रवृत्तिनिवृत्तिहेतुः, 'मधौ माद्यन्ति कोकिला' इत्यादिव्यवहारदर्शनात्। तस्माद् देवीशरीरत्यागविशिष्टस्य कालस्यैव सङ्गत्यागकारणत्वमिति न काचिदनुपपत्तिः॥५२॥

स कृत्तिवासास्तपसे यतात्मा
गङ्गाप्रपातोत्थितदेवदारु।
प्रस्थं हिमाद्रेर्मृगनाभिगन्धि
किञ्चित् क्वणत्किन्नरमध्युवास॥५३॥

प्रकाशिका

ततः किमित्याह—

स इति। यतात्मा हिंसादिभ्यो निवृत्तचित्तः। प्रपतत्यस्मिन्निति प्रपातः। मृगनाभि कस्तूरी। क्वणत्किन्नरं किञ्चित् प्रस्थमिति विशेषानादरं द्योतयति। परमेश्वरपरिगृहीतस्यैव क्षेत्रत्वात्। अत्राद्येन विशेषणत्रयेण तपसः परिकर उक्तः। अन्त्येन विशेषणद्वयेन रमणीयत्वप्रतिपादकेन विरोधिसन्निधावप्यतिधीरत्वाद् देवस्य धैर्यलोपशङ्का नास्तीति द्योत्यते। यथा शाकुन्तले—

प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तोये काञ्चनपद्मरेणुकपिशे धर्माभिषेकक्रिया।
ध्यानं रत्नशिलातलेषु विबुधस्त्रीसन्निधौ संयमो
यत् काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी।।

[७.१२]इति।।५३।।

विवरणम्

निस्सङ्गस्य भगवतः प्रवृत्तिं दर्शयति—

स इति। स कृत्तिवासास्तपसे हिमाद्रेः किञ्चित् प्रस्थमध्युवास। सः य एवं निर्विण्णः स इत्यर्थः। कृत्तिवासाः कृत्तिरर्थाद् गजचर्म वासो यस्य स तथा। अनेन तपःपरिकरभूतमजिनधारणमुक्तम्। तपसे तपश्चरितुं हिमाद्रेर्हिमाचलस्य किञ्चिद् यत्किञ्चित्। अनेन प्रस्थविशेषणेन देवस्य प्रस्थविशेषानादर उक्तः, परमेश्वरपरिगृहीतस्यैव पुण्यफलत्वात्। प्रस्थं सानुम्। 'प्रस्थः सानुरस्त्रियाम्' इत्यमरः।. 'पुंनपुंसकयोः प्रस्थम्' इति शाश्वतः। अध्युवासाध्यास्त। 'उपान्वध्याङ्वसः' (१.४.४८) इति प्रस्थस्य कर्मसंज्ञा। तपसः परमोपकरणमाह—यतात्मा। यतः संयत आत्मा मनो येन। एतच्च बहिरिन्द्रियाणामप्युपलक्षणम्, अन्येन्द्रियप्रवृत्तिपूर्वकत्वात्। जितेन्द्रिय इत्यर्थः। तपसो बाह्योपकरणसम्पत्तिं दर्शयितुं प्रस्थं विशिनष्टि—गङ्गाप्रपातोत्थितदेवदारु। गङ्गायाः प्रपातो गङ्गाप्रपातः। प्रपतत्यस्मिन्निति व्युत्पत्त्या प्रपात प्रपतस्थानम्। गङ्गायाः प्रपतनस्थानमित्यर्थः। तत्रोत्थिताः प्ररूढाः देवदारवो वृक्षविशेषा यस्मिंस्तत्। अनेन प्रस्थस्य पावनत्वं, जलबाहुल्यं, छायासौख्यं चोक्तम्। प्रस्थस्य रमणीयत्वमाह—मृगनाभीत्यादिना विशेषणद्वयेन। मृगनाभिः कस्तूरी, तस्य गन्धोऽस्त्यस्मिन्निति तथा। क्वणन्तो वीणया सह गायन्त किन्नरा यस्मिंस्तत् तथा। अनेन विशेषणद्वयेन देवस्यातिधीरत्वाद् रमणीयवस्तुसन्निधावपि समाधिभङ्गशङ्का नाभूदिति द्योत्यते। उक्तं च शाकुन्तले—

प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तोये काञ्चनपद्मरेणुकपिशे धर्माभिषेकक्रिया।
ध्यानं रत्नशिलातलेषु विबुधस्त्रीसन्निधौ संयमो
यत् काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी।। इति।

तेन च कथानायकस्य स्वेच्छापरिगृहीतधीरोदात्तावस्था ध्वन्यते।

महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः।
स्थिरो निगूढाहङ्कारो धीरोदात्तो दृढव्रतः।।

इति [दशरूपके] धीरोदात्तलक्षणमिति। अत्र काव्ये तावदाधिकारिकतया वर्ण्यमाने तारकासुरनिग्रहाय कुमारोत्पादनरूपे भगवच्चरिते दयावीरो रसोऽङ्गी। इतरेषां तु शृङ्गारादीनां तदङ्गता। नन्वत्र तृतीयसर्गान्तं यावत् तपश्चर्यानुभावभासुरः शान्तो रसोऽङ्गतया वर्ण्यते। स च पूर्ववृत्तत्वेनोपक्षिप्तस्य शृङ्गारस्य विरोधीति कथं तयोः समावेशः। उच्यते। तद्विरोधनिवृत्त्यर्थमेव हि महाकविना तन्मध्ये तदुभयाविरोधी देवीदेहत्यागसूचितः करुणो रस उपक्षिप्त इति नात्र कश्चिद् विरोधः। तदुक्तं ध्वनिकारेण—

> रसान्तरान्तरितयोरेकवाक्यस्थयोरपि।
> निवर्तते हि रसयोः समावेशविरोधिता॥

[ध्वन्या. ३.२७] इति॥५३॥

गणा नमेरुप्रसवावतंसा
भूर्जत्वचः स्पर्शवतीर्वसानाः।
मनःशिलाविच्छुरिता निषेदुः
शैलेयगन्धेषु शिलातलेषु॥५४॥

प्रकाशिका

गणा इति। नमेरुः सुरपुन्नागः। मनःशिलया विच्छुरितास्तदङ्गरागाः। शैलेयं गन्धौषधिविशेषः शिलाजतु वा। अत्र परमेश्वरोपासकानां मायागर्भनिष्क्रान्तानां सर्वज्ञत्वादिगुणयुक्तानामपि गणेश्वराणां लीलावलम्बितलोकवृत्तत्वात् तद्देशोचितोपभोगवर्णनमुपपद्यत एव। एवमुत्तरश्लोकेऽप्यवसेयम्॥५४॥

विवरणम्

इत्थं तपश्चरणोद्युक्ते परमेश्वरे तदुपासनापरिहृतमायातत्कार्याणां भूतगणानां तद्देशकालोचितमुपभोगं वर्णयति—

गणा इति। गणाः शैलेयगन्धेषु शिलातलेषु निषेदुः। गणाः परमेश्वरपार्षदा भूतगणाः। शैलेयगन्धेषु, शैलेयाः गन्धौषधिविशेषाः शिलाजतु वा। 'शिलाजतु तु शैलेयम्' इति वैजयन्ती। शैलेयानां गन्धो येषु तेषु शिलातलेषु शिलाप्रदेशेषु। अनेनावस्थानसौख्यमुक्तम्। निषेदुः स्थितिं चक्रुः। तेषां तद्देशकालोचितं भूषणादिकं वर्णयति विशेषणत्रयेण। तत्रादौ शिरोलङ्कारमाह—नमेरुप्रसवावतंसा इति। नमेरूणां सुरपुन्नागानां प्रसवाः पुष्पाण्यवतंसाः शिरोलङ्कारा येषां ते तथा। अनेन

नमेरुकुसुमानामतिरक्तत्वादलङ्कारसौख्यमुक्तम्। वसनसौख्यमाह—स्पर्शवतीर्भूर्जत्वचो वसाना इति। स्पर्शवतीर्विशिष्टतरस्पर्शगुणयुक्ताः, अतिमृद्वीरित्यर्थः। अनेन परिधानसौख्यमुक्तम्। भूर्जत्वचस्तद्देशसुलभान् वृक्षत्वग्विशेषान्। वसानाः परिदधानाः। अङ्गरागसौख्यमाह—मनश्शिलाविच्छुरिता इति। मनश्शिला धातुविशेषः, तया विच्छुरिता रूषिताः, तदङ्गरागा इत्यर्थः। अनेन तेषां रक्ततरत्वादितराङ्गरागेभ्यो मनोहारित्वमुक्तम्। भूतगणास्तद्देशसुलभैरुपभोगसाधनैर्भगवत्सन्निधावेव रेमिर इति भावः।।५४।।

तुषारसङ्घातशिलाः खुराग्रैः
समुल्लिखन् दर्पकलः ककुद्मान्।
दृष्टः कथञ्चिद् गवयैर्विविग्नै-
रसोढसिंहध्वनिरुन्ननाद।।५५।।

प्रकाशिका

तुषारेति। तुषारसङ्घातश्चासौ शिला चेति विग्रहः। दर्पकलः दर्पेण कलः सुन्दरः। विविग्नैर्भीतैः। गवयाः गोसदृशाकृतयो मृगाः। नित्यदृप्तत्वात् तद्देशसम्भविनं धीरधीरं सकलसत्त्वभीषणं सिंहध्वानमसहमानस्तत एव खुरविलिखिततुहिनशिलः कैलासकूटप्रख्यवपुष्मत्तया प्रलयमेघगर्जितप्रतिमध्वानतया च चकितैः सजातीयशङ्कया गवयैर्विलोक्यमानो देवस्यौपवाह्यो वृषो जगर्जेत्यर्थः।।५५।।

विवरणम्

भगवद्वाहनभूतस्य ककुद्मतः प्रवृत्तिं वर्णयति—

तुषारेति। ककुद्मानुन्ननाद। ककुद्मान् हरवृषभः उन्ननाद उच्चैर्ननाद। वृषभस्वभावमाह—तुषारसङ्घातशिलाः खुराग्रैः समुल्लिखन्निति। तुषाराणां तुहिनानां सङ्घाताः समूहाः तुषारसङ्घाताः, तुषारसङ्घाताश्च ताः शिलाश्चेति तुषारसङ्घातशिलाः, ताः खुराग्रैः समुल्लिखन् खुराणामग्रैः कर्षन्। खुराणामग्रैस्तद्देशसुलभान् हिमजालोपलाननवरतमुल्लिखन्नित्यर्थः। अयं च कुपितानां मत्तानां वृषभाणां स्वभावः। तत्र मत्तत्वमाह—दर्पकल इति। दर्पेण परिभूतसकलमृगतया जनितेनाहङ्कारेण कलः सुन्दरः। अत एव विविग्नैर्गवयैः कथञ्चिद् दृष्टः। विविग्नैर्भीतैश्चलितैश्च। 'ओविजी भयचलनयोः' इत्यस्माद् धातोर्निष्ठान्तोऽयं शब्दः। गवयैर्गोसदृशाकृतिभिर्मृगविशेषैः। कथञ्चित् कथमपि दृष्टो विलोकितः। कैलासप्रतिमाङ्गतया प्रलयघनघटागर्जित-सदृशनिस्वानतया च जायमानात् त्रासात् स्वयूथ्यशङ्काजनितेन

विश्वासलवेन च यथाकथञ्चिदवलोक्यमान इत्यर्थः। कुपितत्वमाह—असोढसिंहध्वनिरिति। सोढो मर्षितो न भवतीत्यसोढः, असोढः सिंहानां ध्वनिर्येन स तथा। तद्देशसुलभं सकलजनभयानकं सिंहध्वनिमप्यसहमान इत्यर्थः। अत्र स्वभावोक्तिरलङ्कारः। 'स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम्' इति [काव्यप्रकाशे]॥५५॥

तत्राग्निमाधाय समित्समिद्धं
स्वमेव मूर्त्यन्तरमष्टमूर्तिः।
स्वयं विधाता तपसः फलानां
केनापि कामेन तपश्चचार॥५६॥

प्रकाशिका

तत्रेति। अग्नेः सकलवैदिकानुष्ठाने प्राधान्येन तदाधानस्य पौर्वकाल्यम्। अग्निश्चायं तपोर्थः न गार्हपत्यादिः, अपत्नीकत्वात्। समित्समिद्धमिति तत्परिचर्यायामविकलत्वं द्योत्यते। स्वमेव मूर्त्यन्तरमिति तत्स्वरूपविशेषाभिज्ञत्वम्। तपसः फलानां स्वयं विधातेति परमपरिपूर्णत्वेन स्वतन्त्रत्वेन च स्वर्गादिप्रसिद्धफलापेक्षाविरहं द्योतयता विशेषणेन केनापीति निर्दिष्टं कामस्याचिन्तनीयत्वमुपपादितम्। तपसः कामनापूर्वकत्वाद् निष्कामानामपि वा तपस्यतामन्तःकरणशुद्धेः कर्मपरिक्षयस्य वा समभिहितत्वात् फलभावानुमितिः। फलस्य चोक्तप्रकारेणाचिन्तनीयत्वम्। अभिसन्धिविशेषश्च फलं कामः। तस्मात् केनापि कामेनेत्युक्तम्। अतिशयार्थं चाचिन्तनीयत्वं कामस्योक्तम्। वस्तुतस्तु लोकानुग्रहाय कारुणिकस्य तस्य तप इति पुराणादिप्रसिद्धम्॥५६॥

विवरणम्

इत्थं भगवत्पार्षदानां प्रवृत्तिं प्रतिपाद्य प्रकृतस्य भगवतस्तप एव प्रस्तौति—

तत्रेति। अष्टमूर्तिस्तत्राग्निमाधाय केनापि कामेन तपश्चचार। सूर्यानलादिभेदेनाष्टौ मूर्तयः शरीराणि यस्य सोऽष्टमूर्तिः शिवः। यथोक्तं—

सूर्यानलेन्द्वात्मधरानिलाम्बुव्योमाह्वया यस्य हि मूर्तयोऽष्टौ।
तं लोकनाथं कथयन्ति सन्तः शैलेन्द्रकन्यापतिमष्टमूर्तिम्॥ इति।

अनेन भगवतस्त्रैलोक्यात्मकत्वमुक्तम्। तत्र हिमवच्छिखरे अग्निमाधाय विलेखनप्रोक्षणादिना सम्पाद्य। नात्र गार्हपत्यादीनामग्नीनां श्रौतेनाधानविधिना

सम्पादनं विवक्षितं, तत्र सपत्नीकस्यैवाधिकारात्। सकलवैदिककर्मानुष्ठानेष्वग्नेरेव प्राधान्यात् तदाधानस्य पूर्वकालत्वम्। केनापि कामेन निपुणं निरूपयतामप्यवाङ्मनसगोचरेण केनाप्यभिसन्धिविशेषेण। हेतौ तृतीया। तपश्चचार तपः कृतवान्। अग्नौ विहितानि कर्माण्यपि संक्षिप्य दर्शयति—समित्समिद्धमिति। समिद्भिः समिद्धं सम्यगिद्धम्। अनिद्धेऽग्नौ होमनिषेधादिद्धमित्युक्तम्। पुनश्च समिद्धोमानन्तरं ताभिः सम्यगिद्धमिति भावः। देवेनाराध्यस्य देवतान्तरस्याप्यभावं द्योतयन्नग्निं विशिनष्टि—स्वमेव मूर्त्यन्तरमिति। स्वमात्मीयमेव मूर्त्यन्तरं मूर्तिभेदम्। अष्टमूर्तेर्भगवत एका हि मूर्तिरग्निरेव। भगवतस्तपःफलेष्वनादरं द्योतयन् भगवन्तं विशिनष्टि—स्वयं तपसः फलानां विधातेति। अत्र स्वयमित्यनेन फलप्रदाने स्वातन्त्र्यमुक्तम्। तपःफलत्वेन प्रसिद्धानां स्वर्गादीनां स्वयमेव प्रदातेत्यर्थः। अनेन देवस्य तपश्चरणे फलप्रदात्रन्तराभाव उक्तः। अखिलकर्मिणां कर्मफलप्रदस्य भगवतस्तपश्चरणे तदाराधनीयस्य देवतान्तरस्याभावात् फलप्रदात्रन्तराभावात् प्रदेयस्य स्वर्गादेः स्वानुवर्तित्वेन भगवतस्तत्र साध्यत्वाभावाच्च कथं देवकृतस्य तपसः फलविशेषानुमानोपपत्तिरिति केनापि कामेनेत्युक्तम्। नत्वकामनया तपश्चरणमस्तु। मैवम्। अकामनया तपश्चरतामपि दुरितक्षयादिभिरन्तःकरणशुद्धिद्वारेण मोक्षफलार्थित्वात्। नित्यमुक्तस्य भगवतश्च तदभावात्। तस्मात् तपश्चरणदर्शनेन फलसामान्याभिलाषानुमानोदये सत्यपि तद्विशेषानुमानस्य दुष्करत्वादुपपन्नमेव केनापि कामेनेति वचनम्। कामस्याचिन्तनीयत्वप्रतिपादनमतिशयार्थमेव। परमार्थतस्तु भगवतस्तपश्चरणं लोकानुग्रहणाय। अनुग्रहश्च सर्वैरप्येवं कर्तव्यमित्युपदेशः। यथोक्तं भागवते—

ईजे च भगवान् रामो यत्रास्पृष्टोऽपि कर्मणा।
लोकानां ग्राहयञ्छीलं यथान्योऽघापनुत्तये।।

इति।।५६।।

अनर्घमर्घ्येण तमद्रिनाथः
स्वर्गौकसामर्चितमर्चयित्वा।
आराधनायास्य सखीसमग्रां
समादिदेश प्रयतां तनूजाम्।।५७।।

प्रकाशिका

अथ वक्ष्यमाणाधिकारिकवृत्तभागसङ्घटनाय स्वावसरे पताकादिवृत्तं किञ्चिदनुसन्धत्ते—

अनर्घमिति। अर्घः पूजा, तद्रहितोऽनर्घः। दवीयस्तया तदगोचरमित्यर्थः। स्वर्गौकसामर्चितं देवैरर्च्यमानम्। 'मतिबुद्धि—' (३.२.१८८) इत्यादिना वर्तमाने क्तः। 'क्तस्य च वर्तमाने' (२.३.६७) इति षष्ठी। प्रयतां शुद्धाम्। तनूजामिति गृहमेधिनो ह्यतिथीनां सत्काराय कन्यका नियुञ्जन्ति। यथा दुर्वाससः कुन्तीं कुन्तिभोजः। यथा वा बलभद्रः सुभद्रां यतिवेषस्य किरीटिनः। अयमर्थः—यदनुग्रहविशेषलब्धतत्तदैश्वर्या ब्रह्मादयः पुनरनावृत्ति यत्पदमावाप्तुं यमेव करणग्रामागोचरं नानाद्रव्यमयेषु लिङ्गेष्वर्चयन्तीति श्रूयते, तं देवं केनापि पुण्यपरिपाकेनोपस्थितमुपलभ्य भूधरेन्द्रोऽर्घ्यादिभिरभ्यर्च्य तदविच्छेदाय श्रद्धादिगुणसमन्वितां देवीमेव तत्र नियुक्तवानिति।।५७।।

विवरणम्

इत्थमुपवर्णितवृत्तयोर्नायिकानायकयोः परस्परसंघटनार्थं प्रसङ्गागतं किमपि वृत्तं प्रस्तौति—

अनर्घमिति। अद्रिनाथस्तमर्घ्येणार्चयित्वास्याराधनाय सखीसमग्रां तनूजां समादिदेश। अद्रिनाथो हिमवान्। तम् इत्थं तपश्चरन्तं भगवन्तम्। अर्घ्येण, अर्घः पूजा तदर्थं जलमर्घ्यम्। एतच्च गन्धपुष्पादीनामप्युपलक्षणम्। अर्चयित्वा पूजयित्वा। जलगन्धादिक्रमेण पूजयित्वेत्यर्थः। अस्य भगवतः आराधनाय पूजायै सखीसमग्रां सखीभिः समग्रां सम्पूर्णां तनूजां समादिदेश सम्यगादिदेश नियुक्तवान्। गृहमेधिनो हि गृहागतानामतिथीनामाराधनाय कन्यकां नियुञ्जते। यथा दुर्वाससः परिचर्यार्थं कुन्तिभोजः कुन्तीमादिदेश, यथा वा यतिवेषधारिणः किरीटिनः परिचर्यार्थं सुभद्रां बलभद्रः। भगवतो माननीयत्वातिशयमाह—अनर्घमिति। अर्घः पूजाविधिः। 'मूल्ये पूजाविधावर्घ' इत्यमरः। तद्रहितोऽनर्घः, अवाङ्मनसगोचरतया पूजाविधेरगोचरमित्यर्थः। अनेन विशेषणेन हिमवतस्तदर्चनलाभस्य सुकृतपरिपाकमात्रायत्तत्वमुक्तम्। अत एवाह—स्वर्गौकसामर्चितमिति। स्वर्ग ओको गृहमेषामिति स्वर्गौकसो देवाः, तैरर्चितं पूज्यमानम्। 'मति बुद्धिपूजार्थेभ्यश्च'(३.२.१८८) इति वर्तमाने क्तः। 'क्तस्य च वर्तमाने'(३.२.६७) इति षष्ठी। भगवदनुग्रहमात्रलब्धब्रह्मादिलोका देवा अप्यनावृत्तिपदोपलब्धये वचसां मनसामप्यगोचरं यमेव देवं नानाद्रव्यनिर्मितासु प्रतिमास्वेवार्चयन्तीति श्रुतिपुराणादिषु प्रतिपाद्यते, तमेव देवं साक्षादर्चयतो हिमवतः पुण्यपरिपाका मनसां वचसामप्यगोचरा एवेति भावः। तनूजायास्तदर्चननियोगे योग्यत्वमाह—प्रयतामिति। शुद्धान्तःकरणामित्यर्थः। हिमाचलमध्यासीनं भगवन्तं हिमाचलः स्वयमेवार्घ्यपाद्यादिभिरभ्यर्च्य तदविच्छेदाय परिशुद्धान्तःकरणां तनूजामेवादिदेशेत्यर्थः।।५७।।

प्रत्यर्थिभूतामपि तां समाधेः
शुश्रूषमाणां गिरिशोऽनुमेने।
विकारहेतौ सति विक्रियन्ते
येषां न चेतांसि त एव धीराः॥५८॥

प्रकाशिका

प्रत्यर्थीति। प्रत्यर्थिभूतामिति वर्णितां रूपसंपदमनुस्मारयति।. शुश्रूषमाणां परिचरन्तीम्। 'ज्ञाश्रुस्मृदृशां सनः' (१.३.५७) इत्यात्मनेपदम्। शुश्रूषाशब्दश्च कार्यलक्षणया परिचर्यायां रूढः। एतच्च वाक्यं वक्ष्यमाणकामदहनपर्यन्त-प्रकरणावसेयस्य परमेश्वरगतस्यारूपहार्यत्वस्य बीजम्॥५८॥

विवरणम्

तस्यां भगवतः प्रतिपत्तिमाह—

प्रत्यर्थीति। गिरिशस्तां शुश्रूषमाणामनुमेने। गिरिशः परमेश्वरः तां पार्वतीं। शुश्रूषमाणां परिचरन्तीम्। 'ज्ञाश्रुस्मृदृशां सनः' (१.३.५७) इत्यात्मनेपदम्। शुश्रूषाशब्दश्च श्रवणेच्छायाः कार्यं लक्षयन् परिचर्यायां रूढः। परिचरन्तीं सतीम् अनुमेने अनुज्ञातवान्। नन्वस्या लावण्यसम्पदः सकलजनचित्तक्षोभकरत्वमनवगम्यैव वा किमेवमनुज्ञातवान्, नेत्याह—समाधेः प्रत्यर्थिभूतामपीति। समाधेश्चित्तैकाग्र्यस्य प्रत्यर्थिभूतां परिपन्थिभूतामपि। सर्वेषामेतद्दर्शने चित्तैकाग्र्यं दुष्करमित्यवगच्छन्नपीत्यर्थः। एतेन विशेषणेन वर्णिता रूपसम्पदनुस्मारिता। युक्तं चैतदनुमननं देवस्येत्याह—येषां चेतांसि हृदयानि विकारस्य चित्तक्षोभस्य हेतौ कारणभूते रूपादौ सत्यपि। न विक्रियन्ते विकारं न प्राप्नुवन्ति। कर्मकर्तरीदं रूपम्। त एव धीराः नान्य इत्यर्थः। अनेन वाक्येन वक्ष्यमाणकामदहनादिवृत्तान्तावगम्यस्य देवगतस्यारूपहार्यत्वस्य बीजन्यासः कृतः। अत्राप्रस्तुतस्य धीरवृत्तसामान्यस्य कथनेन प्रस्तुतं विशेषभूतं देवस्य धीरत्वं प्रतीयत इत्यप्रस्तुतप्रशंसाविशेषः। अप्रस्तुतात् सामान्यविशेषभावे कार्यकारणभावे सारूप्ये च प्रस्तुतप्रणीतावप्रस्तुतप्रशंसा॥५८॥

अवचितबलिपुष्पा वेदिसम्मार्गदक्षा
नियमविधिजलानां बर्हिषां चोपनेत्री।
गिरिशमुपचचार प्रत्यहं सा सुकेशी
नियमितपरिखेदा तच्छिरश्चन्द्रपादैः॥५९॥

प्रकाशिका

अथोत्तरसर्गार्थप्रस्तावाय प्रस्तुतां शुश्रूषामाह—

अवचितेति। वेदिरुपवेशनार्था। सम्मार्गः शोधनम्। नियमस्याचमनादेः विधिरनुष्ठानं, तदर्थानि जलानि। 'नियमस्तु स यत् कर्म नित्यमागन्तुसाधनमि'ति सिंहः। अवचयादीनां शुश्रूषाप्रकारत्वादियमुक्तिः। प्रत्यहमित्यतन्द्रीकत्वमुक्तम्। तच्छिरश्शब्देन चन्द्रपादानां नित्यसुलक्षत्वमुक्तम्। कूपखनकवद् वृत्तिरिति च ध्वन्यते, सेवया जनितः श्रमस्तयैवापनुद्यत इति। अत्र परिखेदसुकेशीशब्दाभ्यां—

स्त्रस्तांसावतिमात्रलोहिततलौ बाहू घटोत्क्षेपणा-
दद्यापि स्तनवेपथुं न जहति श्वासाः प्रमाणाधिकाः।
बद्धं कर्णशिरीषरोधि वदने घर्माम्भसां जालकं
बन्धे स्रंसिनि चैकहस्तयमिताः पर्याकुला मूर्धजाः।। [शाकु. १.२७]

इत्युक्तः श्रमावस्थासुलभः शोभाविशेषः प्रत्याय्यते। अत्र प्रकरणे कविकुलपरमेश्वरेण कामतन्त्रे कन्यासम्प्रयुक्तकाधिकरणे 'प्रयोज्यस्योपावर्तनमि'ति यत् प्रकरणं तदर्थोऽनुसंहितः। तथापि—प्रयोज्यस्य प्रवर्तनीयस्योपावर्तनमभिमुखीकरणमिति सूत्रार्थः। तत्र **प्रथमं भाष्यं**—मन्दोपदेशा गुणवत्यपि कन्यका धनहीना मातापितृवियुक्ता वा ज्ञातिकुलवर्तिनी समानैरयाच्यमाना प्राप्तयौवना स्वयमेव पाणिग्रहणं लिप्सेतेति। तत्र पाणिग्रहणस्वयंलिप्सायां प्राप्तयौवनत्वे सत्यनुरूपवरायाच्यमानत्वं नियतो हेतुः। मन्दाभिज्ञधनहीनपितृवियुक्तत्वानां चायाचनहेतूनां प्रायिकत्वम्। ते हि प्रायो लोके हेतवो भवन्ति। तस्मादिह परमेश्वरस्वभावो लोकविलक्षणो हेतुरयाचने। अयाचनं चोक्तम् 'अयाचितारम्'(१.५१)इति। अनुरूपवरान्तराभावश्चोक्तो 'निवृत्तान्यवराभिलाषः'(१.५०)इत्यनेन। न चात्र देव्यास्तद्विषया लिप्सा नोक्तेति मन्तव्यम्। 'भवपूर्वपत्नी' (१.२०) इति प्रतिपादिताया नैसर्गिक्या रतेर्यौवनेनाविस्पष्टमुद्बोधितायाः पुनर्नारदवचसा स्पष्टोद्बोधात्। प्रौढयौवनायाः स्वयंवरश्चानुमतो धर्मशास्त्रे—

त्रीणि वर्षाण्युदासीत कुमार्यृतुमती सती।
ऊर्ध्वं तु कालादेतस्ताद् विन्देत सदृशं पतिम्।। इति।

सदृशश्च देव एवेत्युक्तम्। माता चैनां सखीभिर्धात्रेयिकाभिश्च सह तदभिमुखीं कुर्यादिति **चतुर्थं भाष्यम्**। तत्र सखीभिः सहेति लज्जापनयनार्थम्। मातेति गुरुपलक्षणत्वात् तद्विहितमनुष्ठानं 'सखीसमग्रां समादिदेश' (१.५७) इत्युक्तम्। पञ्चमे च गत्वा गन्धपुष्पताम्बूलहस्ताया विजने काले च तदुपस्थानमित्या-

दिनोक्तमनुष्ठानम् 'अवचितबलिपुष्पे'त्यादिना दर्शितम्। दर्शयिष्यते च परस्ताद् 'अथोपनिन्ये गिरिशाय गौरी' (३.६५)इत्यादिना॥५९॥

।। इत्यरुणगिरिनाथविरचितायां कुमारसम्भवप्रकाशिकायां
प्रथमः सर्गः।।१।।

विवरणम्

अथोत्तरसर्गे कथान्तरप्रस्तावाय प्रस्तुतशुश्रूषाप्रकारेणैव देव्याश्चिरावस्थानं दर्शयितुं शुश्रूषाप्रकारमेवाह—

अवचितेति। सा सुकेशी प्रत्यहं गिरिशमुपचचार। सा या गिरिशेन शुश्रूषायामनुमता सेत्यर्थः। सुकेशी शोभनाः केशा यस्याः सा तथा प्रत्यहमहरहः। अनेनातन्द्रितत्वं सावधानत्वं चोक्तम्। गिरिशं परमेश्वरम् उपचचार पर्यचरत्। परिचर्याप्रकारमाह—अवचितेत्यादिना विशेषणत्रयेण। तत्रादौ प्रातरेव कर्तव्यं पुष्पावचयमाह—अवचितबलिपुष्पेति। अवचितानि बल्यर्थानि पुष्पाणि यया सा तथा। पुनस्तदन्तरकर्तव्यमाह—वेदिसम्मार्गदक्षेति। वेदिरवस्थानभूमिः, तस्याः सम्मार्गे शोधने दक्षा निपुणा। अथ गिरिशागमनानन्तरं कर्तव्यमाह—नियमविधिजलानां बर्हिषानां चोपनेत्रीति। नियमानामाचमनादिकर्मणाम्। 'नियमस्तु स यत् कर्म नित्यमागन्तुसाधनम्' इत्यमरः। तेषां विधिरनुष्ठानं, तदर्थानां जलानाम्। सर्वकर्मणामाचमनपूर्वकत्वाद् जलानां पूर्वमुपादानम्। बर्हिषां परिस्तरणाद्यर्थानां च उपनेत्री समीपप्रापणं कुर्वाणा। चकारोऽनुक्तानां प्रदीपादीनामपि समुच्चयार्थः। उपचचार। खेदप्रशमनोपायोऽपि तत्रैव सुलभ इत्याह—तच्छिरश्चन्द्रपादैर्नियमितपरिखेदेति। तस्य परमेश्वरस्य शिरसि यश्चन्द्रस्तस्य पादै रश्मिभिः कर्तृभूतैः नियमिताः परिखेदाः परित खेदाः सकलशरीरव्यापिनः खेदाः पीडा यस्याः सा तथा। अत्र तच्छिरश्शब्देन पीडाहारकाणां नित्यसुलभत्वं कूपखनकवृत्तिश्च ध्वन्यते। यथा कूपखनकस्य खननोद्भवं खेदं तदुद्भूतमेव जलमपनयति, तथास्या अपि हरसेवाजनितश्रमस्तच्छिरश्चन्द्रपादैरेवापनुद्यत इति भावः। अत्र परिखेदसुकेशीशब्दाभ्यां श्रमावस्थासुलभ शोभातिशयः प्रत्याय्यते। यथोक्तं शाकुन्तले—

स्रस्तांसावतिमात्रलोहिततनौ बाहू घटोत्क्षेपणाद्
अद्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः।
बद्धं कर्णशिरीषरोधि वदने घर्माम्भसां जालकं
बन्धे स्रंसिनि चैकहस्तयमिताः पर्याकुला मूर्धजाः॥ [१.२७] इति।

एतादृशशोभाविशेषदर्शने कस्यचित्क्षोभो न भवेदिति भावः। अत्र प्रकरणे

कविप्रवरः कामशास्त्रे कन्यासम्प्रयुक्ताधिकरणे प्रतिपादितं सर्वमप्यर्थं यथावत् प्रतिपादितवान्। तत्र 'प्रयोज्यस्योपावर्तनम्' इति वात्स्यायनसूत्रम्। अस्यार्थः—प्रयोज्यस्य प्रवर्तनीयस्य स्वाभिमतस्य वरस्येत्यर्थः। उपावर्तनम् अभिमुखीकरणं, स्वानुकूलताविधानमिति यावत्। कुर्यादिति शेषः। स्वानुरूपं वरं तत्कालोचितशुश्रूषादिभिरात्मानुकूलं कुर्यादिति। न चेदं धर्मशास्त्रविरुद्धं,

त्रीणि वर्षाण्युदासीत कुमार्यृतुमती सती।
ऊर्ध्वं तु कालादेतस्माद् विन्देत सदृशं पतिम्।।

इति स्मृत्या स्वयंवरस्यानूदितत्वात्। अनुरूपवरान्तरविरहिता स्वानुरूपेण वरेणायाच्यमाना गुणवती प्राप्तयौवना कन्या तत्राधिकरिणीति जयमङ्गलायामुक्तम्। तत्रानुरूपवरान्तराभावो 'निवृत्तान्यवराभिलाषः' (१.५०) इत्यत्रोक्तः, प्राप्तयौवनत्वं 'बाल्यात् परं साथ वय प्रपेदे' (१.३९) इत्यत्र, गुणवतीत्वं पुनरङ्गवर्णनादौ। 'भवपूर्वपत्नी'(१.२०)त्यनेन देव्याः परमेश्वरविषयो नैसर्गिकोऽभिलाषः प्रदर्शितः। उद्बोधितश्चासाववविस्पष्टं यौवनेन। नारदवाक्येन तु स्पष्टमुद्बोधित इति भगवतः प्रयोज्यत्वमपि प्रतिपादितमेव। तस्यानुकूल्यकरणोपायश्च गुरुजनानुवादपूर्वकं सखीजनैः सह तदभिमतगन्धपुष्पताम्बूलादिप्रदानं, विजने काले च तदुपस्थानमित्यपि जयमङ्गलायामुक्तम्। तदपि 'सखीसमग्रां समादिदेश' (१.५७) 'अवचितबलिपुष्पे'त्यादिना च प्रदर्शितम्। वक्ष्यति च 'अथोपनिन्ये गिरिशाय गौरी'(३.६५) इत्यादिनेति सर्वं सुमङ्गलम्।।५९।।

सर्गोऽयं प्रथमो गुणैश्च गिरिजालावण्यसारं परं
यस्मिन् वर्णयति स्म कर्णमधुरैर्वर्णैः कविग्रामणीः।
तत्राहं कृशधीः करोमि किमिति व्यालोलचित्तं तु मा-
मित्थं किञ्चिदजल्पयद् गिरिसुतापादाब्जभक्तिः स्वयम्।।
गोविन्दाङ्गगुणौघवर्णनविधौ दक्षस्य नारायण-
क्ष्मादेवस्य कृतौ गिरीशगिरिजाभक्तिप्रवृद्धोदये।
व्याख्यानेऽत्र कुमारसम्भवपदार्थालोचनप्रक्रिया-
निष्णाते प्रथमः समाप्तिमगमत् सर्गो निसर्गोज्ज्वलः।।

।। इति श्रीकृष्णप्रियशिष्यस्य नारायणस्य कृतौ कुमारसम्भवविवरणे
प्रथमः सर्गः।।१।।

।। अथ द्वितीयः सर्गः।।

तस्मिन् विप्रकृताः काले तारकेण दिवौकसः।
तुरासाहं पुरोधाय धाम स्वायम्भुवं ययुः॥१॥

प्रकाशिका

अथैतत्प्रकरणोपयोगितया प्रकरणान्तरमारभते—

तस्मिन्नति। तस्मिन् काले उपावर्तनकाले। इदमप्यपरमासीदित्यर्थः। तुराषाट्छब्दस्य 'छन्दसि सहः' (३.२.६३) इति ण्विप्रत्ययविधानाच्छन्दस्येव साधुत्वम्। भाषायामपि साधुत्वं गिरिशादिवत्। तदाश्रयणपक्षे तु तुरासाहमिति पाठः। यद्वा भाषायामपि साधुत्वम्। यथा क्षीरतरङ्गिण्यां—तुरं त्वरितं साहयत्यभिभवत्यरीन्। 'षह मर्षण' इति चौरादिकोऽयं धातुः। ततो णिजन्तात् क्विप्। पूर्वपदस्य 'न हि वृति—'(६.३.११६) इत्यादिना दीर्घः। 'सहेः साडः सः'(८.३.५६) इति साड्भूतस्य सहेः षत्वविधानाद् द्वितीयायां षत्वं नास्ति। पुरोधाय पुरस्कृत्य। धाम सदनम्। स्वायंभुवं 'ओर्गुणः' (६.४.१४६) इति गुणग्रहणाद् गुणज्ञापितस्यानित्यत्वाद् गुणाभावः॥१॥

विवरणम्

अथोपवर्णितप्रकरणानुगुणं प्रकरणान्तरमारभते—

तस्मिन्निति। दिवौकसः तस्मिन् काले तारकेण विप्रकृताः तुरासाहं पुरोधाय स्वायम्भुवं धाम ययुः। दिवौकसो देवाः तस्मिन् काले देव्याः प्रयोज्योपावर्तनकाले तारकेण तारकाख्येनासुरेण विप्रकृताः पीडिताः सन्तः। तुरासाहम् इन्द्रम्। तुराषाट्छब्दस्य 'छन्दसि सहः' (३.२.६३) इति ण्विप्रत्ययविधानात् कथं भाषायां साधुत्वम्। उच्यते। तुरं त्वरितं साहयत्यभिभवत्यरीनिति तुराषाट्। 'षह मर्षण' इति चौरादिको धातुः। ततो णिजन्तात् क्विप्। 'नहिनृति—' (६.३.११६) इत्यादिना पूर्वपददीर्घः। 'सहेः साडः सः' (८.३.५६) इति साड्भूतस्यैव सहेः षत्वविधानाद् द्वितीयायां तदभावेन षत्वाभावः। पुरोधाय पुरस्कृत्य स्वयम्भुव इदम्। 'ओर्गुणः' (६.४.१४६) इति गुणग्रहणाद् गुणज्ञापितस्य 'संज्ञापूर्वको विधिरनित्य' इति अनित्यत्वादत्र गुणाभावः। धाम सदनम्। 'धाम तेजस्सदनयोरि'ति भोजः। ययुः जग्मुः। देव्याः परमेश्वरपरिचर्यासमये शतमखमुखा मखभुजस्तारकासुरपरिभवमसहमानास्तन्निवेदनाय परमेष्ठिनः सद्म प्रपेदिर इत्यर्थः॥१॥

तेषामाविरभूद् ब्रह्मा परिम्लानमुखश्रियाम्।
सरसां सुप्तपद्मानां प्रातर्दीधितिमानिव॥२॥

प्रकाशिका

तेषामिति। आविरभूत् प्रकाशोऽभूत्। 'प्रकाशे प्रादुराविः स्यादि'त्यमरः। अनेन स्वयमनुग्रहोन्मुख आत्मानं दर्शितवान्, न तु ते स्वप्रयत्नेन ददृशुरिति द्योत्यते। अत एव तादृगुपमानं दत्तम्। उपमानेन च स्वापस्येव परिम्लानमुखश्रीत्वस्य तदीयाविर्भावावधिकत्वं द्योत्यते। प्रातरिति नियतनिमित्तभूतकालवाचिना ब्रह्मणोऽपि लोकानुग्रहार्थं भाविनि सभायामाविर्भावे निमित्तत्वेन नियतस्वेच्छापरिकल्पितः कालः प्रकाश्यते, यत्र तेषां तदुपस्थानमासीत्॥२॥

विवरणम्

तेषां तद्दर्शनप्रकारमाह—

तेषामिति। ब्रह्मा तेषाम् आविरभूत्। तेषां दिवौकसाम्। सम्बन्धषष्ठी चेयम्। आविरभूत् प्रकाशोऽभूत्। 'प्रकाशे प्रादुराविः स्यादि'त्यमरः। तेषां तारकासुरपीडाया अनुभावमाह—परिम्लानमुखश्रियामिति। परिम्लाना परितः समन्ताद् म्लाना म्लानिमुपगता मुखश्रीः मुखशोभा येषाम्। कल्पान्तकृशानुकल्पेन तारकासुरभुजबलोष्मणा परिम्लानमुखानां बर्हिर्मुखानां दयानिधिः परमेष्ठी स्वयमेवात्मानं दर्शितवान्, न तु तैः प्रयत्नेनान्विष्य दृष्टोऽभूदिति भावः। अनेन ब्रह्मणोऽपि देवकार्यानुगुणत्वं व्यज्यते। अत एव तदनुगुणमुपमानमाह—सुप्तपद्मानां सरसां प्रातः दीधितिमान् इव इति। सुप्तपद्मानां सुप्तानि मुकुलितानि पद्मानि येषां तेषां सरसां पद्माकराणां प्रातः प्रभाते। उपमेयपक्षे तद्दर्शनानुगुणकाल इत्यर्थात् सिध्यति। दीधितिमान् आदित्य इव। अत्र परिम्लानमुखश्रियामिति सुप्तपद्मानामिति विशेषणद्वयं परम्परबिम्बप्रतिबिम्बभावेन स्थितम्। उपमया तेषां मुखवैवर्ण्यस्य ब्रह्मदर्शनावधिकत्वं ध्वनितम्॥२॥

अथ सर्वस्य धातारं ते सर्वे सर्वतोमुखम्।
वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे॥३॥

प्रकाशिका

अथेति। सर्वस्य धातारमिति प्रणिपातोपस्थानौचित्यम्। सर्वे, न त्वतिभूयस्त्वादलब्धसाम्मुख्येन केचन। कुत इत्याह—सर्वतोमुखमिति। अनेन समन्ताद् युगपच्चोपस्थानं प्रतीयते। तत एव वक्ष्यति—चतुर्मुखसमीरिता चतुष्टयी शब्दानां

प्रवृत्तिरिति। अर्थ्याभिरर्थादनपेताभिः, सत्याभिरित्यर्थः। यतोऽयं वागीशः, ततोऽस्योपस्थाने तथाविधानां वाचां प्रसर उपपन्न एवेति भावः। उपतस्थिरे पूजयामासुः। उपाद् देवपूजासंगति—' (वा. १.३.२५) इत्यादिनात्मनेपदम्॥३॥

विवरणम्

तेषां तदुपस्थानप्रकारमाह—

अथेति। अथ ते सर्वे वागीशं प्रणिपत्य अर्थ्याभिः वाग्भिः उपतस्थिरे। अथ आविर्भावान्तरं ते दिवौकसः सर्वे, न तु जनबाहुल्यादलब्धसम्मुखत्वेन केचिदेवेत्यर्थः। वागीशं वाचः सरस्वत्या ईशं भर्तारम्। अत एव तदुपस्थाने तथाविधानां वाचां प्रसर इति भावः। प्रणिपत्य प्रणम्य अर्थ्याभिः अर्थादनपेताभिः। 'धर्मपथ्यर्थन्यायादनपेते' (४.४.९२) इति यत्प्रत्ययः। यथार्थभूताभिर्वाग्भिः उपतस्थिरे पूजयामासुः। 'उपाद् देवपूजासङ्गतिकरणमित्रसरणपथिष्विति वक्तव्यम्'(वा.१.३.२५) इत्यात्मनेपदम्। तस्य प्रणिपातोस्थानयोग्यत्वमाह—सर्वस्य धातारमिति। सर्वस्य कृत्स्नस्य जगतः धातारं स्रष्टारम्, अखिलजगन्निर्माणकर्तारमित्यर्थः। ननु कथमेकस्यैव सर्वेषां युगपदाभिमुख्येन प्रणिपातादिसम्भवः, अत आह—सर्वतोमुखमिति। सर्वतः सर्वासु दिक्षु मुखानि यस्य तं, चतुर्मुखमित्यर्थः। तस्य चतुर्मुखत्वात् समन्ताद् युगपच्चोपतस्थिर इति भावः। अत एव वक्ष्यति—

> पुराणस्य कवेस्तस्य चतुर्मुखसमीरिता।
> प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टमी॥ (२.१६)

इति॥३॥

नमोऽस्त्वमूर्तये तुभ्यं प्राक् सृष्टेः केवलात्मने।
गुणत्रयविभागाय पश्चाद् भेदमुपेयुषे॥४॥

प्रकाशिका

नमोऽस्तित्वति। अमूर्तये अशरीराय। केवलात्मने एकात्मने। 'निर्णिक्ते केवलमिति त्रिलिङ्गं त्वेककृत्स्नयोरि'ति सिंहः। गुणत्रयेण विभागो यस्य। भेदमुपेयुषे त्रिमूर्तित्वेनेति शेषः। अयमर्थः—सृष्टेः प्रागेकात्मनेऽमूर्तये पश्चात् सत्त्वादिगुणमधिष्ठाय ब्रह्मविष्णुरुद्रात्मने तुभ्यं नमोऽस्त्विति॥४॥

विवरणम्

अथ तेषां वाचिकमुपस्थानं प्रपञ्चयति नमोऽस्त्वित्यादिभिरेकादशभिः श्लोकैः। तत्रादौ ब्रह्मणस्त्रिमूर्तिसृष्टौ हेतुत्वमाहुः—

नम इति। तुभ्यं नमः अस्तु। तुभ्यं 'नमस्स्वस्ति—'(२.३.१६)इत्यादिना नमश्शब्दयोगे चतुर्थी। नम इति नमस्कारवाचकमव्ययम्। अस्तु भवतु। अस्माभिः कृतो नमस्कार एतादृशाय भवते भवत्वित्यर्थः। कीदृशायेत्याकाङ्क्षायां ब्रह्मणो मूर्तित्रयसृष्टेः पूर्वावस्थामाहुः—सृष्टेः प्राक् केवलात्मने अमूर्तये इति। सृष्टेः प्राक् त्रिमूर्तिसृष्टेः पूर्वावस्थायां केवलात्मने एकात्मने। 'निर्णीते केवलमिति त्रिलिङ्गं त्वेककृत्स्नयोरि'त्यमरः। अद्वितीयायेत्यर्थः। अत एवामूर्तये अशरीराय। सृष्ट्यनन्तरं तु भवानेक एव त्रिधा भासत इत्याहुः—पश्चाद् भेदम् उपेयुषे इति। पश्चात् सृष्टेरूर्ध्वकालं भेदं ब्रह्मविष्णुशिवात्मना त्रैविध्यव्यवहारम् उपेयुषे प्राप्तवते। त्रैविध्यप्राप्तौ हेतुमाहुः—गुणत्रयविभागायेति। गुणानां सत्त्वरजस्तमसां त्रयं गुणत्रयं, तेन विभागः पृथग्भावो यस्य तस्मै। तदुक्तं—

पालने विमलसत्त्ववृत्तये जन्मकर्मणि रजोजुषे लये।
तामसाय जगतां पराकृतद्वैतजालवपुषे नमोऽस्तु ते।।

इति।।४।।

यदमोघमपामन्तरुप्तं बीजमज! त्वया।
अदश्चराचरं विश्वं प्रभावस्तस्य गीयते।।५।।

प्रकाशिका

यदिति। 'अदश्चराचरं विश्वं प्रभावस्तस्य गीयत' इति पाठः। प्रकृष्टो भावः प्रभावो विभूतिः। 'श्रिणीभुवोऽनुपसर्गे' ३.३.२४) इत्यनुपसर्गाद् घञ्विधानात्। अयमर्थः—त्वया यद् बीजमपामन्तर्निषिक्तं, तस्य बीजस्य प्रभाव इति चराचरमिदं विश्वं लोकैर्गीयत इति। अत्र मनुः—

अप एव ससर्जादौ तासु वीर्यमवासृजत्।
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्।। इति।

अत्राप्शब्देन सूक्ष्मभूतान्युच्यन्त इति तद्विदः। 'अतश्चराचरं विश्वं प्रभवस्तस्य गीयस' इति पाठे यदमोघमपामन्तरित्यस्य पौनरुक्त्यं स्यात्।।

विवरणम्

अथ जगत्सृष्टिप्रकारमाहुः—

यदिति। हे अज! त्वया अपाम् अन्तः यद् बीजम् उप्तं चराचरम् अदः विश्वं तस्य प्रभावः गीयते। अज! न जायत इत्यजः। 'अन्येष्वपि दृश्यते' (३.२.१०१) इति डः। अनेन जननप्रतिषेधेन विनाशोऽपि प्रतिषिद्धः। 'जातस्य

हि ध्रुवो मृत्युरि'त्युत्पन्नस्यैव भावस्य विनाशप्रतिपादनात्। जगतामेवोत्पत्तिः, त्वं तु नित्य एव इति भावः। अपां त्वयैवादौ सृष्टानां जलानाम्। अत्रापामित्यनेन सूक्ष्मरूपाणामपामुपादानं, चराचरं विश्वमित्यनेन तु स्थूलरूपाणामिति सृष्टिप्रकरणात् सिध्यति। अन्तः अन्तर्भागे यद् बीजं वीर्यम् उप्तं निषिक्तं चराचरम् अदो दृश्यमानं विश्वं तस्य प्रभाव इति गीयते। मन्वादिभिरिति शेषः। प्रकृष्टो भावः प्रभावो विभूतिः। 'श्रिणीभुवोऽनुपसर्गे' (३.३.२४) इति अनुपसर्ग एव घञ्विधानात्। गीयते उच्यत इत्यर्थः। तस्य बीजस्य जगदुत्पादनसामर्थ्यमाहुः—अमोघमिति। सफलमित्यर्थः। जगदुत्पत्तेः प्रकृष्टं कारणमिति यावत्। त्वया पूर्वं जलं निर्माय तदन्तर्भागे निषिक्तस्य वीर्यस्य विभूतिरेव चराचरात्मकमिदं विश्वमिति मन्वादयो वदन्तीत्यर्थः। अत्र पुराणवचनं मनुवचनं च—

> हिरण्यगर्भो भगवान् सिसृक्षुर्विविधाः प्रजाः।
> अप एव ससर्जादौ तासु वीर्यमवासृजत्॥
> तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्।
> तस्मादण्डात् समुत्पन्नं जगत् स्थावरजङ्गमम्॥

इति।।५।।

तिसृभिस्त्वमवस्थाभिर्महिमानमुदीरयन्।
प्रलयस्थितिसर्गाणामेकः कारणतां गतः॥६॥

प्रकाशिका

तिसृभिरिति। उदीरयन् प्रकाशयन्। 'पश्चाद् भेदमुपेयुषे'(२.४) इत्यस्य प्रपञ्चनरूपेयमुक्तिः।।६।।

न केवलं सृष्टिरेव त्वदुपक्रमा, अपितु स्थितिसंहारावपीत्याहुः—

तिसृभिरिति। त्वम् एकः प्रलयस्थितिसर्गाणां कारणतां गतः। त्वमेकः, नान्यसहाय इत्यर्थः। अनेन स्थितिप्रलययोर्विष्णुरुद्रोपज्ञत्वप्रतीतिर्निरस्ता। प्रलयस्थितिसर्गाणां प्रलयः संहारः, स्थिती रक्षा, सर्गः सृष्टिः, तेषामिति द्वन्द्वः। कारणताम् उपादानादिरूपतां गतः प्राप्तोऽसि। अत्र सर्गस्थितिप्रलयानामिति क्रममपहाय सर्गस्य चरमोपादानं तस्य पूर्वश्लोक एव प्रतिपादितत्वेनानुवादरूपत्वादित्यवगन्तव्यम्। अविवक्षित एव वा क्रमः। ननु स्थितिप्रलयौ विष्णुरुद्रकर्तृकत्वेन प्रसिद्धाविति कथं त्वमेक इत्युच्यते, अत आहुः—तिसृभिः अवस्थाभिः महिमानम् उदीरयन् इति। तिसृभिः हरिहरहिरण्यगर्भस्वरूपाभिः (अवस्थाभिः

अवस्थाविशेषैः। महिमानं माहात्म्यम् 'उदीरयन् प्रकाशयन्, निजमेव वैभवं मूर्तित्रयभेदेन प्रकटयन्नित्यर्थः। 'पश्चाद् भेदमुपेयुषे'(२.४)इत्यस्य विवरणत्वेनेयमुक्तिः।।६।।

स्त्रीपुंसावात्मभागौ ते भिन्नमूर्तेः सिसृक्षया।
प्रसूतिभाजः सर्गस्य तावेव पितरौ स्मृतौ।।७।।

प्रकाशिका

एवं लिङ्गसृष्टिमुक्त्वा मिथुनसृष्ट्यर्थं ब्रह्मणो रूपमाह—

स्त्रीपुंसाविति। स्त्रीपुंसौ निपातनादच् समासान्तः। भिन्नमूर्तेः परिगृहीतमूर्त्यन्तरस्य। प्रसूतिभाजः मिथुनीभूय सन्तानकारिणः। अत्र मनुः—

द्विधा कृत्वात्मनो देहमर्धेन पुरुषोऽभवत्।
अर्धेन नारी तस्यां तु विराजमसृजत् प्रभुः।।

इति।।७।।

विवरणम्

अथ मिथुनसर्गप्रकारमाहुः—

स्त्रीपुंसाविति। सिसृक्षया भिन्नमूर्तेः ते आत्मभागौ स्त्रीपुंसौ यौ तौ एव प्रसूतिभाजः सर्गस्य पितरौ स्मृतौ। सिसृक्षया स्रष्टुमिच्छया भिन्नमूर्तेः भिन्ना मायावलम्बनेन प्रकृतिपुरुषात्मना द्विधाकृता मूर्तिः शरीरं येन तस्य। ते तवात्मभागौ आत्मन एव भागौ अंशौ स्त्रीपुंसौ स्त्री च पुमांश्च स्त्रीपुंसौ। 'अचतुर'—(५.४.७७)इत्यादिना निपातनादच् समासान्तः। तावेव नान्यावित्यर्थः। प्रसूतिभाजः प्रसूतिं प्रसवं भजत इति प्रसूतिभाक् तस्य, मिथुनीभूय सन्तानकारिण इत्यर्थः। सर्गस्य सृष्टेः पितरौ मातापितरौ। 'पिता मात्रा' (१.२.७०) इत्येकशेषः। स्मृतौ, मन्वादिभिरिति शेषः। अत्र मनुः—

द्विधा कृत्वात्मनो देहमर्धेन पुरुषोऽभवत्।
अर्धेन नारी तस्यां तु विराजमसृजत् प्रभुः।। इति।

अत्र विराडिति प्रपञ्चरूपः पुरुष उच्यते। तस्य च स्वरूपमित्थमुक्तं श्रीभागवते—'नाभिर्नभोऽग्निर्मुखमम्बु रेतो द्यौः शीर्षमाशाः श्रुतिरङ्घ्रिरुर्वी' इत्यादि। तव शरीरभेदमेव मन्वादयो मिथुनसर्गप्रकरणे स्त्रीपुरुषात्मना व्यपदिशन्तीत्यर्थः।।७।।

स्वकालपरिमाणेन व्यस्तरात्रिन्दिवस्य ते।
यावेव स्वप्नबोधौ तौ भूतानां प्रलयोदयौ॥८॥

प्रकाशिका

स्वकालेति। स्वकालः परार्धद्वयं, तस्य परिमाणेन करणभूतेन। पट्त्रिंशत्सहस्रसङ्ख्यैरहोभिर्यथा स्वकालः परिमितो भवति, तथा व्यस्तानि विभक्तानि रात्रिन्दिवानि येनेत्यर्थः। अनेन स्वायुषोऽपि स्वयमेव व्यवस्थापक इतीश्वरस्येतरवन्न कालाधीनत्वमित्युक्तम्। अनेन स्वप्नबोधयोः प्रलयोदययोश्च स्वेच्छाधीनत्वमुक्तम्॥८॥

विवरणम्

अथ वेदान्ताभिमतसृष्टिप्रलयप्रसङ्गेनापि स्तुवन्ति—

स्वकालेति। ते स्वप्नबोधौ यौ तौ एव भूतानां प्रलयोदयौ। ते जगदीशितुस्तव स्वप्नश्च बोधश्च स्वप्नबोधौ, लीलामात्रकल्पितौ निद्राप्रबोधावित्यर्थः। तावेव पञ्चभूतानां तत्कार्याणां प्रलयोदयौ प्रलयो महाप्रलयः उदयः सर्गः। तव निद्रैव जगतो महाप्रलयः। तत्सर्गस्तु तव प्रबोध एवेत्यर्थः। तदुक्तं वेदान्तविद्भिः—

निःश्वसितमस्य वेदा वीक्षितमेतस्य पञ्च भूतानि।
स्मृतमेतस्य चराचरमस्य च सुप्तं महाप्रलयः॥ इति।

पुराणप्रसिद्धश्चायमर्थः—

यदा स देवो जागर्ति तदेदं चेष्टते जगत्।
यदा स्वपिति शान्तात्मा तदा सर्वं प्रलीयते॥

इति। स्वापप्रबोधयोर्निमित्तभूतस्याहोरात्रविभागस्यापि स्वेच्छामात्रनिर्मितत्वमाहुः—स्वकालपरिमाणेन व्यस्तरात्रिन्दिवस्य। स्वस्य कालः स्वकालः, स च द्विपरार्धसंवत्सरपरिमितः, तस्य परिमाणमियत्ता, तेन करणभूतेन व्यस्तं विभक्तं रात्रिन्दिवं येन तस्य। रात्रिश्च दिवा च रात्रिन्दिवम्। 'अचतुर—'(५.४.७७)इत्यादिना निपातनादच् समासान्तः। परार्धद्वयपरिमितेनात्मनः परमायुषा यथासम्भवं कल्पिताहोरात्रविभागस्येत्यर्थः। अनेन स्वायुषोऽपि स्वयमेव व्यवस्थापक इत्युक्तं भवतीति जगदीश्वरस्य नेतरजनवत् कालाधीनत्वं, नापि कर्माधीनत्वमिति लोकतो व्यतिरेको ध्वन्यते॥८॥

जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः।
जगदादिरनादिस्त्वं जगदीशो निरीश्वरः॥९॥

प्रकाशिका

जगद्योनिरिति। योनिरीश इत्याभ्यां क्रमादुपादानत्वमधिष्ठातृत्वं चोक्तम्। आदिरन्त इत्याभ्यां जगतः प्राक् पश्चाच्चास्यावस्थितिरुक्ता। अयोनिरित्यादिभिरस्योपादानान्तरादिविरह उक्तः॥९॥

विवरणम्

ननूपादानादिना विना कथं स्वप्नप्रबोधमात्रेण जगतः प्रलयोद्भवाद्युपपत्तिरत आहुः—

जगद्योनिरिति। त्वं जगद्योनिः। जगतः स्थावरजङ्गमात्मकस्य प्रपञ्चस्य योनिः उपादानकारणमसि। अनाद्यविद्यातिरस्कृतस्य स्वरूपस्याज्ञानादेवाधिष्ठानभूते त्वयि जायमानस्य प्रपञ्चभ्रमस्य सर्पभ्रमस्य रज्जुरिव त्वमेवोपादानकारणमसीत्यर्थः। तदुक्तं—

यदज्ञानाद् विश्वं भवति फणिवद् रज्जुशकले
निलीनं यज्ज्ञाने भवति सनिदानं त्रिभुवनम्।
यदुच्चैराम्नायैः सततमवगम्यं मुनिजनै-
स्तदेतद् ब्रह्माहं सहजपरमानन्दसुभगम्॥ इति।

त्वं पुनः कारणान्तररहित एवेत्याहुः—अयोनिरिति। योनिः उपादानादिकारणम् अस्य नास्तीत्ययोनिः। इत्थं देवस्य जगदुपादानत्वमुक्त्वा कर्तृत्वमप्याहुः—त्वं जगदीश इति। जगतामीशः स्वामी। उत्पादको रक्षिता चेत्यर्थः। त्वं पुनरीशान्तररहित इत्याहुः—निरीश्वर इति। ईश्वररहितः। उत्पादको रक्षिता च तव नास्तीत्यर्थः। जगद्योनित्वाद् जगदुत्पत्तेः पूर्वमपि विद्यमान एव त्वमित्याहुः—जगदादिरिति। जगतामादिः। अत एवानादिः आदिरस्य नास्तीत्यनादिः, पूर्वकोटिरहित इत्यर्थः। संहर्तृत्वमप्याहुः—त्वं जगदन्त इति। जगतामन्तः अवधिकरोऽसि। त्वं पुनः संहर्तृरहित इत्याहुः—निरन्तक इति। अन्तकोऽस्य नास्तीति निरन्तकः, अपरकोटिरहित इत्यर्थः॥९॥

आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना।
आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे॥१०॥

प्रकाशिका

अथ पराधीनज्ञानसर्गस्थितिप्रलयात् प्रपञ्चादस्य व्यतिरेकमाह—

आत्मानमिति। आत्मानमात्मना वेत्सीति उत्पत्स्यमाने स्वात्मनि तदुत्पत्त्युपायं स्वयमेव जानासीत्यर्थः। सृजस्यात्मानमात्मना स्वज्ञातेनोपायेन सृज्ये स्वात्मनि

स्वयमेव सृजसीत्यर्थः। आत्मना कृतिना च त्वमात्मन्येव प्रलीयस इति। कृतिना कृतकृत्येन। कृतकृत्यत्वं चात्मनः स्थितौ। कृतिना आत्मना स्वात्मन्येव प्रलीयस इत्यर्थः। अत्र मनुः—

एवं स सर्वं सृष्ट्वेदं मां चाचिन्त्यपराक्रमः।
आत्मन्यन्तर्दधे भूयः कालं कालेन पीडयन्॥

इति॥१०॥

विवरणम्

ननूत्पादकान्तरराहित्ये दृश्यमानस्य चतुर्मुखस्य कथमुत्पत्तिरित्यत्राहुः—

आत्मानमिति। त्वम् आत्मना आत्मानं वेत्सि। आत्मना स्वमेव। 'स्वयमात्मने'त्यमरः। आत्मानं सृज्यं स्वदेहं वेत्सि जानासि। सृष्टेः सृज्यस्वरूपावगमाधीनत्वाद् आदौ सृज्यं स्वदेहं तत्सृष्ट्युपायं च स्वयमेव जानासीत्यर्थः। तदनन्तरं तु सृजसीत्याहुः—आत्मना आत्मानं सृजसि इति। आत्मना स्वयमेव आत्मानं स्वदेहं सृजसि सृष्टं करोषि। 'सृज विसर्ग' इति धातुः। स्वयमेव स्वदेहसृष्टिरित्यर्थः। स्वदेहस्यापि स्वयमेव संहर्तेत्याहुः—कृतिना आत्मना आत्मन्येव प्रलीयसे चेति। कृतिना कृतकृत्येन, स्वावतारकार्याणां विधानान्निर्वृतेनेत्यर्थः। आत्मना स्वदेहेन करणभूतेन आत्मनि स्वस्मिन्नेव प्रलीयसे प्रकर्षेण लीनो भवसि। त्वमादावात्मदेहस्वरूपं तत्सर्गोपायं च स्वयमेव जानासि। ततः परं तं सृजसि। सर्गान्तरं पुनः परार्धद्वयवत्सरपर्यन्तं रक्षिते स्वदेहे स्वावतारकार्येषु च निर्वृत्तेषु कृतकृत्यः सन् स्वदेहं स्वात्मन्येव लीनं करोषीत्यर्थः। अत्र मनुः—

एवं स सर्वं सृष्ट्वेदं मां चाचिन्त्यपराक्रमः।
आत्मन्यन्तर्दधे भूयः कालं कालेन पीडयन्॥

इति। अत्र स्वाधीनात्मसर्गस्थितिप्रलयस्यास्य ब्रह्मणः पराधीनसर्गादेः प्रपञ्चाद् व्यतिरेकोक्तिः॥१०॥

उद्घातः प्रणवो यासां न्यायैस्त्रिभिरुदीरणम्।
कर्म यज्ञः फलं स्वर्गस्तासां त्वं प्रभवो गिराम्॥११॥

प्रकाशिका

उद्घात इति। उद्घात आरम्भः। 'स्यादभ्यादानमुद्घात आरम्भ' इति सिंहः। न्यायैरुदात्तादिभिः। कर्म प्रतिपाद्यम्। गिराम् अर्थाद् वेदानाम्॥११॥

विवरणम्

वेदा अपि त्वदुद्भूता एवेत्याहुः—

उद्घात इति। त्वं तासां गिरां प्रभवः। तासां तादृशीनां गिरां वाचाम्। यच्छब्दवाक्यविशेषणवशाद् वेदवाक्यानामित्यर्थः प्रभव उद्भवस्थानमसि। अत्र तार्किकास्तावत्—कविरिव काव्यं महश्वरो वेदवाक्यान्यारचितवानित्याहुः। वेदान्तिनस्तु—निःश्वासरूपेण परब्रह्मण एवोद्भूयमाना वेदा इत्याहुः। सर्वथापि त्वदुद्भवा वेदा इत्यर्थः। कीदृशीनां गिरामित्यत्र तासां वेदत्वद्योतकं विशेषणत्रयम्। तत्रादावध्ययनारम्भसमय एवावगम्यं विशेषमाहुः—यासां प्रणव उद्घात इति। यासां गिरां प्रणवः प्रणवोच्चारणम् उद्घात आरम्भो भवति। 'स्यादभ्यादानमुद्घात आरम्भ' इति सिंहः। या गिरः प्रणवोच्चारणपूर्वकमुच्चार्यन्त इत्यर्थः। अनेनारम्भसमय एव गीरन्तरव्यतिरेक उक्तः। अध्ययनवेलायामपि व्यतिरेकमाहुः—यासां त्रिभिर्न्यायैरुदीरणम् इति। त्रिभिर्न्यायैरुदात्तानुदात्तस्वरितभेदेन त्रिभिः न्यायैः व्यवस्थाभिः उदीरणम् उच्चारणं भवति। अथार्थज्ञानसमयेऽपि व्यतिरेकमाहुः—यासां यज्ञः फलं स्वर्गः कर्म इति। यज्ञो यागः तस्य फलं स्वर्गश्च कर्म प्रतिपाद्यं भवतीति शेषः। प्रतिपादनक्रियायां यज्ञस्वर्गयोः कर्मत्वात् कर्मेत्युक्तम्। यासां गिरां यागश्च तत्फलभूतः स्वर्गश्च प्रतिपाद्यो भवतीत्यर्थः।।११।।

त्वं पितॄणामपि पिता देवानामपि दैवतम्।
परतोऽपि परश्चासि विधाता वेधसामपि।।१२।।

प्रकाशिका

त्वमिति। अत्र पूर्वार्धेन वेदेषु प्राधान्येन यष्टव्ययोः पितृदेवगणयोरपि पतित्वमुक्तम्। परतो विश्वोत्तीर्णात् पुरुषात् परोऽधिकः। वेधसां मरीच्यादीनामपि विधाता स्रष्टा।।१२।।

विवरणम्

उक्तप्रकारसिद्धमस्य सर्वोत्कर्षमाहुः—

त्वमिति। त्वं पितॄणाम् अपि पिता असि। पितॄणाम् अग्निष्वात्तादीनाम्। अपिशब्दः पितॄणां पुराणप्रसिद्धसर्वोत्कर्षमाह। 'इज्यन्ते पितरो देवैः सुरेन्द्रादिभिरप्युत' इत्युक्तत्वात्। पिता माननीयोऽसि। देवाधिपतित्वमप्याहुः—त्वं देवानामपि दैवतम् असि इति। इन्द्रादिदेवानामप्यधीश्वरोऽसि। कर्मकाण्डे यष्टव्यतया प्रसिद्धानां पितृदेवगणानामपि त्वमेव पतिरित्यर्थः। तेषामप्यधिपतित्वे हेतुमाहुः—त्वं परतः अपि परः च असि इति। प्रपञ्चोत्तीर्णाद् मायाशबलात् पुरुषादपि परः

परमात्मैवासीत्यर्थः। अत एवाहुः—त्वं वेधसाम् अपि विधाता असि। वेधसां जगत्सर्गकृतां मरीच्यादीनामपि विधाता स्रष्टासि। वक्ष्यति च मरीच्यादीनां जगदेकदेशकर्तृत्वं 'सर्गशेषविधायित्वाद्'(६.९)इत्यत्र॥१२॥

त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्तनीम्।
तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः॥१३॥

प्रकाशिका

त्वामिति। प्रकृतिः मूलकारणम्। पुरुषस्यार्थान् भोगान् प्रवर्तयतीति कर्तरि ल्युट्। तद्दर्शिनं प्रकृतिदर्शिनम्। उदासीनं प्रवृत्तिरहितम्॥१३॥

विवरणम्

सांख्यसिद्धान्तसिद्धौ प्रधानेश्वरावपि त्वमेवेत्याहुः—

त्वामिति। त्वां पुरुषार्थप्रवर्तनीं प्रकृतिम् आमनन्ति। त्वां, नान्यं कञ्चिदित्यर्थः। पुरुषार्थप्रवर्तनीं पुरुषस्यार्थान् भोगान् प्रवर्तयतीति तथा। कर्तरि ल्युट्। तादृशीं प्रकृतिम्। 'प्रधानं प्रकृतिः स्त्रियामि'त्यमरः। आमनन्ति। 'म्ना अभ्यासे' इति धातु। 'पाघ्राध्मास्थाम्ना—'(७.३.७८)इत्यादिना मनादेशः। आम्नायसिद्धार्थत्वेन व्यपदिशन्तीत्यर्थ। साङ्ख्यस्मृतय इति शेषः। सत्त्वरजस्तमसां साम्यावस्था प्रधानमिति साङ्ख्यानां व्यवहारः। तामेव मूलप्रकृतिरिति प्रकृतिरिति च ते व्यवहरन्ति। तदुद्भूतो महदादिप्रपञ्च इति तेषां मतम्। तदुक्तं साङ्ख्यसप्तत्यां—

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः॥ इति।

तत्र साङ्ख्या द्विविधाः निरीश्वराः सेश्वराश्चेति। तत्र निरीश्वराः साङ्ख्या अन्यनिरपेक्षात् प्रधानादेव जगदुद्भवस्थितिविलया इत्याहुः। सेश्वराः पुनरीश्वरस्य निष्क्रियस्यापि सान्निध्यमात्रेणैव प्रधानाज्जगदुद्भवादय इत्याहुः। तदुक्तं—

यथा सन्निधिमात्रेण गन्धः क्षोभाय जायते।
मनसो नोपकर्तृत्वात् तथासौ परमेश्वरः॥ इति।

तत्र सेश्वरसाङ्ख्यमतसिद्धा प्रकृतिरनेन वाक्येनोच्यते। पुरुषस्यार्थान् प्रवर्तयितुमेव तस्या व्यापार इति च तेषां मतम्। तदप्युक्तं साङ्ख्यसप्तत्यां—

रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्तम्।
पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृतिः॥ इति।

सेश्वरसाङ्ख्यास्त्वामेव जगत्सर्गादिकरीं मूलप्रकृतिमाहुरित्यर्थः। साङ्ख्यसम्मतः पुरुषोऽपि त्वमेवेत्याहुः—त्वामेव तद्दर्शिनम् उदासीनं पुरुषं विदुः इति। तां प्रकृतिं द्रष्टुं शीलमस्येति तद्दर्शी, तम्। उदासीनं निर्व्यापारं पुरुषम् ईश्वरं विदुः। 'विदो लटो वा'(३.४.८३) इति णलादिविकल्पः। विदन्तीत्यर्थ। निर्व्यापारस्यापि यस्य सन्निधिमात्रेण प्रधानस्य जगत्सर्गादिसामर्थ्यमिति साङ्ख्यविदो वदन्ति, सोऽपि त्वमेवेत्यर्थः॥१३॥

त्वमेव हव्यं होता च भोग्यं भोक्ता च शाश्वतम्।
वेद्यश्च वेदिता चासि ध्याता ध्येयं च तत्परम्॥१४॥

प्रकाशिका

त्वमिति। हव्यं हविः। भोग्यं पशुवर्गादि। शाश्वतमित्यनेन भोग्यस्य कर्मविनाशेऽप्यवस्थानमुक्तम्। अत्र पूर्वार्धेन वेदेषु कर्मभागविषयोऽर्थः उत्तरार्धेन ज्ञानभागविषयोऽर्थश्चोच्यते। एषु च स्तुतिवाक्येष्वन्यथापि योजयन्ति तद्विदः॥१४॥

विवरणम्

अथास्य सर्वात्मकत्वप्रतिपादनेन स्तुतिगोचरत्वं निराकुर्वन्तः स्तुतिमुपसंहरन्ति—

त्वमिति। त्वम् एव हव्यं होता च असि। हव्यं पशुपुरोडाशादिरूपं होमसाधनं होता यजमानश्चासि। हविर्यजमानश्च न त्वत्तो भिन्नावित्यर्थः। भोग्यभोक्तृस्वरूपत्वमप्याहुः—त्वम् एव शाश्वतं भोग्यं भोक्ता च असि इति। शाश्वतं नित्यं भोग्यं फलं भोक्ता यागादिकर्मफलानुभोक्ता चासि। स्वर्गपश्वादिरूपं फलं तद्भोक्ता चासीत्यर्थः। अत्र शाश्वतमिति भोग्यविशेषणेन 'यत् कर्मफलं तत् कर्मनाशे नश्यति, यथा मर्दनकर्मनाशे तत्फलभूतं सुखम्। तस्मादग्निहोत्रादिकर्मणां कालान्तरे स्वर्गादिफलदातृत्वं वदतां वेदवाक्यानामुन्मत्तप्रलपितप्रायत्वमेव' इति नास्तिकानुमानं निरस्यते। अग्निहोत्रादिफलं तु नित्यमेव, न कर्मविनाशे नश्यतीति भावः। अनेन पूर्वकाण्डप्रतिपाद्यानामर्थानां ब्रह्मात्मकत्वं प्रतिपादितम्। अथोत्तरार्धेनोत्तरकाण्डप्रतिपाद्यार्थस्यापि तदात्मकत्वमाहुः—वेद्यमित्यादिना। त्वं वेद्यं वेदिता च असि। वेद्यं प्रपञ्चः, वेदिता ज्ञाता। प्रपञ्चः प्रपञ्चसाक्षी च त्वमेवेत्यर्थः। उपास्योपासकभेदप्रतिभासस्यापि त्वमेवाधिष्ठानमित्याहुः—त्वं ध्याता तत्परं ध्येयं च असीति। ध्याता उपासका जीवाः। जातावेकवचनम्। एकजीवपक्षापेक्षया वा। तत्परं तस्मादुपासकात् परम् उत्कृष्टम् ध्येयम् उपास्यं च। उपासका मुमुक्षवो जीवाः। उपासकेभ्यः परं सकलनिष्कलभेदभिन्नं स्वरूपं त्वमेवासीत्यर्थ। तदिति पृथक्पदं वा। वेदान्तवाक्येषु तच्छब्दवाच्यतया प्रसिद्धमित्यर्थः॥१४॥

इति तेभ्यः स्तुतीः श्रुत्वा याथार्थ्यहृदयङ्गमाः।
प्रसादाभिमुखो वेधाः प्रत्युवाच दिवौकसः॥१५॥

प्रकाशिका

इतीति। इत्थम्भूताः। स्तुतिर्नाम स्वाभिप्रायानुरूपं देवतावीर्योद्बोधनम्। अभिप्रायश्चात्र वक्ष्यते 'तदिच्छामः'(२.५०)इत्यादिना। तत्र च सेनानीसृष्टिः सृष्टेन च लोकस्थितिः तारकासुरसंहारः तस्य च निरतिशयशक्तिमत्त्वं चेत्येतत् सर्वमभिप्रेतम्। तदनुरूपविधातृवीर्योद्बोधनं चात्र स्पष्टम्। याथार्थ्येन स्वरूपानतिक्रमेण। प्रसादेनाभिमुखोऽनुग्रहोन्मुखः। अनेनास्य सुप्रसादत्वाल्लोकतो व्यतिरेकः प्रतीयते। लोके हि स्तुतय आरोपितप्रायार्थाः प्रसादनाय, इह तु यथार्था इति॥१५॥

विवरणम्

अथ ब्रह्मणः प्रतिवचनं प्रस्तौति—

इतीति। वेधा तेभ्यः इति स्तुतीः श्रुत्वा प्रसादाभिमुखः दिवौकसः प्रत्युवाच। वेधाः ब्रह्मा तेभ्यः देवेभ्यः सकाशाद् इति उक्तप्रकाराः स्तुतीः। स्तुतिर्नाम स्वाभिप्रायानुरूपं देवतावीर्योद्बोधनम्। अभिप्रायश्चात्र 'तदिच्छामो विभो स्रष्टुं सेनान्यं तस्य शान्तये' (२.५०) इति वक्ष्यते। अतस्तादृशवीर्यतारकासुरविमर्दनक्षमस्य सेनान्यः सृष्टौ यद् ब्रह्मणो वीर्यं तदुद्बोधनं 'नमोऽस्तु'(२.४)इत्यादिभिः श्लोकैः कृतम्। लीलामात्रकल्पितसकलजगत्सृष्टिस्थितिप्रलयस्य तव सेनानीसृष्टौ कः प्रयास इति स्तुतिवचनानां तात्पर्यार्थः। श्रुत्वा आकर्ण्य। प्रसादाभिमुखः अनुग्रहोन्मुखः सन् दिवौकसः देवान् प्रत्युवाच प्रतिवचनं कृतवान्। ब्रह्मणः स्तुतौ सामान्यस्तुतिव्यतिरेकमाह—याथार्थ्यहृदयङ्गमा इति। याथार्थ्येन यथार्थत्वेन हृदयङ्गमाः मनोहराः। लोके हि प्रसादनाय क्रियमाणाः स्तुतयः प्रायेणारोपितार्थाः ब्रह्मणः स्तुतयस्तु यथार्था एवेति भावः॥१५॥

पुराणस्य कवेस्तस्य चतुर्मुखसमीरिता।
प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी॥१६॥

प्रकाशिका

प्रतिवचनप्रस्तावे विशेषमाह—

पुराणस्येति। पुराणस्याद्यस्य कवेर्निबन्धुः प्राज्ञस्य वा। चतुर्भिर्मुखैः समीरिता सम्यगीरिता सकलसंस्कारसमग्रमुच्चारिता। प्रवृत्तिः प्रवाहः। पुराणकविसम्बन्धात्

समग्रसंस्कार:। अत एव चरितार्था। चतुर्भ्यो मुखेभ्यश्चतुर्धा शब्दानां प्रवृत्तिरासीदित्यर्थ:। चरितार्थत्वं त्वौपचारिकं द्रष्टव्यम्। यथा देवा: सर्वतोमुखत्वादस्य सुलभसाम्मुख्या: सन्त: सर्व एव युगपत् परितश्चोपतस्थिरे, तथासावपि तान् सर्वानेव चतुर्मुखविनिर्गतया चतुष्टय्या शब्दानां प्रवृत्त्या [ऋऌक्सूत्रमहाभाष्ये] युगपत् परितश्च प्रत्युक्तवानित्यर्थ:। **दक्षिणावर्तस्तु**—वैखर्यादिरूपेण चतुष्टयीति व्याचष्ट। तत् तु निरूपयितव्यम्॥१६॥

विवरणम्

अथास्य प्रतिवचनप्रस्तावे विशेषमाह—

पुराणस्येति। पुराणस्य कवे: चतुर्मुखसमीरिता चतुष्टयी शब्दानां प्रवृत्ति: चरितार्था आसीत्। पुराणस्य आद्यस्य कवे: प्रवाह: सर्वज्ञस्य वा। 'वाक्प्रबन्धविधाता च सर्वज्ञश्च कवि: स्मृत' इति **भोज:**। चतुर्मुखसमीरिता चतुर्भिर्मुखै: वदनै: समीरिता सम्यक् सकलसंस्कारसमग्रम् ईरिता उच्चारिता चतुर्मुखोदीरितत्वादेव चतुष्टयी। 'संख्याया अवयवे तयप्' (५.२.४२)। अवयवचतुष्टययुक्तेत्यर्थ:। शब्दानां प्रवृत्तिर्वचसां प्रवाह: चरितार्था कृतार्था आसीद् बभूव। चतुर्भ्यो मुखेभ्य: प्रवृत्ताश्चत्वारो वाक्प्रवाहा कृतार्था बभूवुरित्यर्थ:। यथा देवा: सर्वतोमुखत्वादस्य सुलभसाम्मुख्या: सन्त: सर्व एव युगपत् परितश्चोपतस्थिरे, तथासावपि तान् सर्वानपि चतुर्भिर्वदनैर्युगपदेव प्रत्युवाचेत्यर्थ:। सर्वेषामपि युगपदेव प्रतिवचनसिद्धे: कृतार्थत्वम्। अत्र वक्तु: कृतार्थत्वं वाक्प्रवृत्तावुपचर्यते, वाक्प्रवृत्तेरचेतनाया: कृतार्थत्वानुपपत्ते:। इह वाक्प्रवाहस्य पुराणकविसम्बन्धात् समग्रसंस्कारवत्त्वं, चतुर्मुखोच्चरितत्वाच्चतुष्टयत्वं, तेन कृतार्थ(त्व)मिति विभाग:॥१६॥

स्वागतं स्वानधीकारान् प्रभावैरवलम्ब्य व:।
युगपद् युगबाहुभ्य: प्राप्तेभ्य: प्राज्यविक्रमा:॥१७॥

प्रकाशिका

स्वागतामिति। स्वागतं शोभनमागमनम्। अधीकारान् 'उपसर्गस्य घञि'—(६.३.१२२) इति दीर्घ:। व: युष्मभ्यम्। प्रभावै: स्वानधीकारानवलम्ब्य स्थितेभ्यो युष्मभ्यं स्वागतमित्यर्थ:। युगपदित्यनेन प्राप्ते: सहेतुकत्वं सूचयति। युगानीव बाहवो येषामिति समास:। प्राज्यं प्रभूतम्॥१७॥

विवरणम्

विधातु: प्रतिवचनप्रकारमाह स्वागतमित्यादिभिरेकादशभि: श्लोकै:। तत्रादौ स्वागतमाह—

स्वागतमिति। हे प्राज्यविक्रमा:! व: स्वागतम्। हे प्राज्यविक्रमा:! प्राज्य: प्रभूतो विक्रमो येषाम्। 'प्रभूतं प्रचुरं प्राज्यमि'त्यमर:, 'विक्रमस्त्वतिशक्तिता' इति च। अनया सम्बुद्ध्या तेषां परिभवावकाशाभावो ध्वन्यते। व: युष्मभ्यं स्वागतं शोभनमागमनम्। अस्त्विति शेष:। भवतामागमनकार्यं शोभनं भूयादिति भाव:। प्राज्यविक्रमत्वस्य फलमाह—प्रभावै: स्वान् अधीकारान् अवलम्बेति। स्थितेभ्य इति शेष:। प्रभावै: सामर्थ्यै: स्वान् आत्मीयान्। 'स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने' इति सिंह:। अधीकारान् 'उपसर्गस्य घञ्यमनुष्ये बहुलम्'-(६.३.१२२) इति दीर्घ:। अवलम्ब्य धृत्वा स्थितेभ्य:। स्वाधिकारावलम्बने शक्तत्वमाह—युगबाहुभ्य इति। युगा इव बाहवो येषाम्। 'यानाद्यङ्गे युग: पुंसि' इत्यमर:। आगमनं सहेतुकमिति द्योतयन्नाह—युगपत् प्राप्तेभ्य इति। युगपत् सहैव प्राप्तेभ्य आगतेभ्य:। तत्र आत्मीयानधिकारानवलम्ब्य पृथगवस्थितानां सम्भूयागमनवचनेनागमनं सहेतुकं, स च हेतुर्महानिति च व्यज्यते॥१७॥

किमिदं द्युतिमात्मीयां न बिभ्रति यथापुरम्।
हिमक्लिष्टप्रसादानि ज्योतींषीव मुखानि व:॥१८॥

प्रकाशिका

किमिति। किं प्रश्ने। इदमिति वक्ष्यमाणं वैकृतं परामृष्टम्। इदं किंहेतुकमित्यर्थ:। तदाह किमित्यादिना श्लोकाष्टकेन। तत्र सामान्यतो निरूपयति—द्युतिमिति। अत्मीयां नैसर्गिकीम्। न तु सर्वथा न बिभ्रतीत्याह—यथापुरमिति। ज्योतींषि चन्द्रतारकादीनि॥१८॥

विवरणम्

इत्थं सूचितमर्थं किञ्चिद् विवृणोति—

किमिति। इदं किम्। इदंशब्देन वक्ष्यमाणं मुखवैवर्ण्यादिकं सर्वप्रत्यक्षदृष्टं परामृष्टम्। किंशब्द: प्रश्ने। दृश्यमानमिदं सर्वं किंकारणकमित्यर्थ:। तत्रादौ सकलसुरसाधारण्येन मुखवैवर्ण्यमेवाह—व: मुखानि आत्मीयां द्युतिं यथापुरं न बिभ्रति इति। व: युष्माकं मुखानि वदनानि आत्मीयां स्वाभाविकीं द्युतिं कान्तिं। यथापुरम्। पदार्थानतिवृत्तौ यथाशब्द:। पूर्वकालानतिक्रमेण, पूर्ववदिति यावत्। न बिभ्रति न दधति। भवतां मुखानि पूर्ववत् कान्तिं न दधतीत्यर्थ:। मुखवैवर्ण्यमुपमया स्फुटयति—हिमक्लिष्टप्रसादानि ज्योतींषीवेति। हिमेन तुषारेण क्लिष्ट: क्लेशं प्राप्त: प्रसाद: येषां तानि ज्योतींषि चन्द्रादीनीव। अनेनोपमानेन कालवशात् प्राप्तस्य वैवर्ण्यस्य कालान्तरे निवृत्तिरप्यस्तीति द्योत्यते॥१८॥

प्रशमादर्चिषामेतदनुद्गीर्णसुरायुधम्।
वृत्रस्य हन्तुः कुलिशं कुण्ठिताश्रीव लक्ष्यते॥१९॥

प्रकाशिका

अथ विशेषतो निरूपयति—

प्रशमादिति। अनुद्गीर्णसुरायुधम् अनुद्गतनानारत्नच्छायम्। अनेन कार्यमुखेनार्चिःप्रशम उपपादितः। अश्रिः कोटिः। अर्चिषां प्रशमादिति कुण्ठिताश्रित्वोत्प्रेक्षणे हेतुः। अत्रार्चींषि किरणाः, न तु ज्वालाः, तासामूर्ध्वमुखत्वेनाश्रिवत् सर्वतोमुखत्वासिद्धेः॥१९॥

विवरणम्

इत्थं सामान्येनोक्तं विशेषतः प्रतिपादयति सप्तभिः श्लोकैः। तत्रादौ प्राधान्यान्महेन्द्रावस्थामाह—

प्रशमादिति। वृत्रस्य हन्तुः एतत् कुलिशं कुण्ठिताश्रि इव लक्ष्यते। वृत्रस्य हन्तु वृत्राभिधानस्य दानवपतेः निग्रहीतुः। देवेन्द्रस्य तादृशावस्थाप्राप्तेरनौचित्यमुक्तम्। एतद् दृश्यमानं कुलिशं वज्रम्। अनेन अचलेष्वप्यकुण्ठितत्वं द्योत्यते। कुण्ठिताश्रि कुण्ठिताः क्षीणधारा अश्रयः कोटयो यस्य। 'स्त्रियः पाल्यश्रिकोटय' इत्यमरः। तथाभूतमिव लक्ष्यते। कुण्ठिताश्रित्वोत्प्रेक्षायां च हेतुमाह—अर्चिषां प्रशमाद् अनुद्गीर्णसुरायुधमिति। अर्चिषां किरणानां, न तु ज्वालानाम्। तासामूर्ध्वमुखत्वेन सर्वतोमुखाश्रिसाधर्म्यानुपपत्तेः। प्रशमात् संक्षयाद् अनुद्गीर्णसुरायुधम् अनुद्गीर्णम् अनुद्गतं सुरायुधम् इन्द्रचापरूपा नानारत्नप्रभा यस्य तत् तथा। नानारत्नप्रभानुद्गमनादर्चिःप्रशमः सुखावसेयः। अर्चिःप्रशमनेन कुण्ठिताश्रित्वमुत्प्रेक्ष्यत इति भावः॥१९॥

किञ्चायमरिदुर्वारः पाणौ पाशः प्रचेतसः।
मन्त्रेण हतवीर्यस्य फणिनो दैन्यमाश्रितः॥२०॥

प्रकाशिका

किञ्चेति। अपि च **दैन्यं चेतसोऽनौजस्यम्**। तेन तत्कार्यभूतमनुज्ज्वलत्वमत्र लक्ष्यते। नन्विन्द्रावरुणावादित्येष्वन्तर्भूतौ। सत्यम्। अधिकारभेदात् तु विग्रहभेदो व्यवहारभेदश्च॥२०॥

विवरणम्

अथ वरुणावस्थामाह—

किञ्चेति। किञ्च प्रचेतसः पाणौ यं पाशः मन्त्रेण हतवीर्यस्य फणिनः दैन्यम् आश्रितः। किञ्च अपि चेत्यर्थः। प्रचेतसः वरुणस्य। 'प्रचेता वरुणः पाशी'त्यमरः। पाणौ हस्ते वर्तमान इत्यर्थात् सिध्यति। अयं दृश्यमानः। अनेन दैन्यस्य प्रत्यक्षप्रमाणसिद्धत्वमुक्तम्। यमवरुणौ पाशहस्ताविति प्रसिद्धिः। मन्त्रेण अर्थाद् गरुडदैवतेन हतवीर्यस्य हतं प्रतिहतं वीर्यं प्रभावो यस्य। 'वीर्यं बले प्रभावे चे'त्यमरः। तस्य फणिनः दैन्यं दीनत्वम्। 'दौर्गत्यादेरनौजस्यं दैन्यं कार्ष्ण्यामृजादिकृत्' (५.१४) इति दशरूपके। मानस ओजःक्षय इत्यर्थः। तेनात्र तत्कार्यभूतमनुज्ज्वलत्वं लक्ष्यते। आश्रितः प्राप्तः। पाशस्य पूर्वावस्थामाह—अरिदुर्वार इति। अरिभिः शत्रुभिः दुर्वारः दुःखेन वार्यत इति तथा। कृच्छ्रार्थे खल्। अरिजनैरवारणीयशक्तिरित्यर्थः। अनेनास्यैतादृशदशाप्रवेशानवकाशो निरूप्यते। अपकारिजनदुर्वारः फणी यथा मन्त्रप्रमथितशक्तिर्दीनां दशामाप्नोति, तथा वरुणस्यायं पाशोऽपीत्यर्थः। पाशफणिनोः स्वरूपसाम्यमेवंव्यवहारे हेतुः। ननु 'अमी च कथमादित्याः (२.२३)इत्यनेन श्लोकेन द्वादशादित्यावस्थाया वक्ष्यमाणत्वादिन्द्रावरुणयोश्च द्वादशादित्येष्वेवान्तर्भावात् कथं पृथग् वर्णनम्। मैवम्। अधिकारभेदनिमित्ताद् विग्रहभेदात् पृथग् व्यवहारोपपत्तेः। अत्र पाशः फणिदैन्यसदृशं दैन्यमाश्रित इति निदर्शना।।२०।।

कुबेरस्य मनःशल्यं शंसतीव पराभवम्।
अपविद्धगदो बाहुर्भग्नशाख इव द्रुमः।।२१।।

प्रकाशिका

कुबेरस्येति। शंसतीवेत्युत्प्रेक्षया स्फुटत्वं द्योत्यते। मनःशल्यं पराभवमिति रूपकम्।।२१।।

विवरणम्

कुबेरावस्थामाह—

कुबेरस्येति। कुबेरस्य अपविद्धगदः बाहुः पराभवं शंसति इव। कुबेरस्य वैश्रवणस्य। अपविद्धगदः अपविद्धा त्यक्ता। यथा रघुवंशे 'अपविद्धशुचाविव' [रघु. १०.७४]इति। अपविद्धा शत्रुप्रहारसामर्थ्याभावेन निरुपयोगत्वात् त्यक्ता गदा येन सः बाहुः हस्तः पराभवं परिभवं शंसति कथयतीव। वैश्रवणस्य गदाशून्यो हस्त एव शत्रुपरिभवं कथयतीवेत्युत्प्रेक्षा। कथनोत्प्रेक्षया च पराभवस्य स्फुटत्वं द्योत्यते। कथितं हि स्फुटतरमवगम्यते। तादृशं बाहुमुपमिनोति—भग्नशाखः द्रुमः एव इति। भग्नाः भङ्गं प्रापिताः शाखा यस्य तादृशो द्रुमः वृक्ष इव।

पराभवस्यात्यन्तासह्यत्वं द्योतयन् पराभवं विशिनष्टि—मनश्शल्यमिति। मनसः शल्यं शल्यवदत्यन्तदुस्सहमित्यर्थः। रूपकं चेदम्। अत्रोत्प्रेक्षोपमारूपकाणां संसृष्टिः॥२१॥

यमोऽपि विलिखन् भूमिं दण्डेनास्तमितत्विषा।
कुरुतेऽस्मिन्नमोघेऽपि निर्वाणालातलाघवम्॥२२॥

प्रकाशिका

यमोऽपीति। भूबिलेखनं विषादस्यानुभावः। लाघवमबहुमानम्। अयं तु श्लोकः 'प्रशमादर्च्चिषाम्' (२.१९)इत्यस्यानन्तरं पठनीयः॥२२॥

विवरणम्

यमावस्थामाह—

यमोऽपीति। यमः अपि दण्डेन भूमिं विलिखन् अमोघे अपि अस्मिन् निर्वाणालातलाघवं कुरुते। यमयति नियमयत्यसत् इति यमः। असतां नियन्तायमन्तकोऽपीत्यपिशब्दार्थः। अनेनास्य पूर्वोक्तदिक्पालत्रयव्यतिरेक उक्तः। तथाभूतोऽयमप्येतादृशो जातः, किमुतान्य इति भावः। यमस्यैतादृशं विशेषं प्रतिपादयितुमेव महेन्द्रवृत्तान्तवर्णनानन्तरं क्रममतिक्रम्य वरुणकुबेरयोरवस्था प्रतिपादिता। अरुणाचलनाथादयः पुनः—अयं तु श्लोकः 'प्रशमादर्च्चिषाम्' (२.१९) इत्यस्यानन्तरं पठनीय इत्येवोक्तवन्तः। दण्डेन स्मरणमात्रेणाप्यसतां भयङ्करेणेत्यर्थः। भूमिं विलिखन्। विषादवन्तो हि दण्डादिना भूमिविलेखनं कुर्वन्तीति विषादस्यानुभावोऽयम्। अमोघे मोघो निष्फलो न भवतीत्यमोघः तस्मिन्नपि, सफलप्रहारेऽपीत्यर्थः। अपिशब्दोऽस्य तादृशावस्थाया अयोग्यत्वं सूचयति। अस्मिन् दण्डे निर्वाणालातलाघवं निर्वाणे प्रशान्तानले अलाते उल्कायां यल्लाघवम् अबहुमानः, तत् करोति। यतोऽयं तादृशमपि दण्डमित्थं भूविलेखनादानुपयोजितवान्, ततोऽस्य तस्मिन्ननादरः स्फुट एव। अनादरश्च शत्रुप्रहारसामर्थ्याभावकृत इत्यवसेवयम्। दण्डस्यापि निस्तेजस्त्वप्राप्तिर्दर्शनमात्रेणैवावसेयेत्याह—अस्तमितत्विषेति। अस्तमिता विनष्टा त्विट् शोभा यस्य तत्तथा। एतच्च दण्डविशेषणं निर्वाणालातसाम्यसिद्ध्यर्थम्। अत्रेन्द्राद्यायुधानां नष्टप्रभावत्वप्रतिपादनेन तदधिष्ठात्र्या देवताया अपि भयाकुलत्वं दर्शितम्॥२२॥

अमी च कथमादित्याः प्रतापक्षयशीतलाः।
चित्रन्यस्ता इव गताः प्रकामालोकनीयताम्॥२३॥

प्रकाशिका

अमी इति। कथमिति विस्मये। प्रकामं यथेच्छम्॥२३॥

विवरणम्

दिक्पालावस्थावर्णनानन्तरमवशिष्टेषु देवेषु प्रधानभूतानामादित्यानामवस्थां प्रस्तौति—

अमी इति। अमी आदित्याः च प्रकामालोकनीयतां गताः कथम्। अमी पुरतो दृश्यमानाः। हस्तनिर्देशपूर्वकोऽयं व्यवहारः। आदित्याः द्वादशादित्याः। चकारोऽयमपिशब्दार्थे। ये पूर्वं प्रभया दुर्निरीक्षाः, तेऽपीत्यर्थः। प्रकामालोकनीयतां प्रकामं यथेच्छम् आलोकनीया द्रष्टुं शक्या इति प्रकामालोकनीयाः, तेषां भावस्तत्ता, तां गताः कथम्। कथंशब्दो विस्मये। तादृशा आदित्या अप्येवंभूताः, अत्यद्भुतमेतदित्यर्थः। उत्प्रेक्षते—चित्रन्यस्ता इव इति। चित्रेषु न्यस्ताः लिखिता इव। न हि चित्रन्यस्ता आदित्या दुरालोका भवन्ति। प्रकामालोकनीयत्वप्राप्तौ हेतुमाह—प्रतापक्षयशीतला इति। प्रतापस्य आतपस्य। 'प्रतापौ पौरुषातपौ' इति **यादवः**। क्षयेण शीतलाः शीताः। एतच्च पराभवहेतुकस्य दैन्यस्यानुभावः॥२३॥

पर्याकुलत्वान्मरुतां वेगभङ्गोऽनुमीयते।
अम्भसामोघसंरोधः प्रतीपगमनादिव॥२४॥

प्रकाशिका

पर्याकुलत्वादिति। मरुतां वायूनाम्। ते च स्मृत्युक्ता अष्टौ—

गगनः स्पर्शनो वायुरनिलो मारुतस्तथा।
प्राणः प्राणेशजीवौ च मरुतोऽष्टौ प्रकीर्तिताः॥ इति।

अथवा तन्त्रान्तरोक्तानां वायूनामेकोनपञ्चाशतो ग्रहणम्, अत्र लिङ्गं वेगभङ्गः, न तु मरुद्गणानां, तदसम्भवात्॥२४॥

विवरणम्

वायुनामवस्थामाह—

पर्याकुलत्वादिति। मरुतां पर्याकुलत्वाद् वेगभङ्गः अनुमीयते। मरुतां

गगनः स्पर्शनो वायुरनिलो मारुतस्तथा।
प्राणः प्राणेशजीवौ च मरुतोऽष्टौ प्रकीर्तिताः॥

इति स्मृत्युक्तानामष्टानां वायूनां, न तु मरुद्गणानां, तेषां वेगभङ्गानुपपत्तेः। 'पर्याकुलत्वाद् व्याकुलत्वाद्, अयथापूर्वसंचाराद्धेतोरित्यर्थः। वेगस्य भङ्गो वेगभङ्गः।

अनुमीयते दृश्यमानेन पर्याकुलत्वेन लिङ्गेन वायूनामपि वेगो यत्रकुत्रापि भग्नो जात इत्यनुमीयत इत्यर्थः। अत्रोपमामाह—अम्भसाम् ओघसंरोधः प्रतीपगमनाद् इव इति। अम्भसां जलानाम् ओघसंरोधः ओघस्य प्रवाहस्य संरोधः सम्यग्रोधः समुद्रवर्धनादिना विच्छेदः प्रतीपगमनात् प्रतीपं प्रतिकूलं यथा भवति तथा गमनादिव। यथा नदीनां वेगभङ्गः सुखानुमेय इति भावः॥२४॥

आवर्जितजटामौलिविलम्बिशशिकोटयः।
रुद्राणामपि मूर्धानः क्षताहङ्कारशंसिनः॥२५॥

प्रकाशिका

आवर्जितेति। आवर्जिते जटामये मौलौ केशबन्धे विशेषेण लम्बिन्यः शशिकोटयो येषाम्। अहङ्कारोऽभिमानित्वम्। अहङ्कारस्याधिदैवतं शिवः। स एवैकादशात्मा रुद्रः। तत इयमुक्तिः॥२५॥

विवरणम्

रुद्राणामवस्थामाह—

आवर्जितेति। रुद्राणां मूर्धानः अपि क्षताहङ्कारशंसिनः। रुद्राणामेकादशरुद्राणां मूर्धानः शिरांसि क्षताहङ्कारशंसिनः क्षतं भग्नम् अहङ्कारम् अभिमानित्वं शंसितुं शीलमेषामिति तथा। भवन्तीति शेषः। अहङ्कारस्याधिदैवतं शिव इति पुराणप्रसिद्धिः। एकादशात्मा रुद्रोऽपि स एव। ततश्च अहङ्काराधिदैवतानामप्यहङ्कारक्षतिरिति विरोधोऽपिशब्देनोच्यते। मूर्ध्नामहङ्कारक्षतिकथनप्रकारं विशेषणद्वारेणाह—आवर्जितजटामौलिविलम्बिशशिकोटय इति। आवर्जितेषु विषादभरानतशिरस्कतया शिरसा सहावनमितेषु जटारूपेषु मौलिषु केशबन्धेषु। 'चूडा किरीटं केशाश्च संयता मौलयस्त्रय' इति सिंहः। विलम्बिन्यः लम्बनशीलाः शशिकोटयश्चन्द्रकला येषु ते तथा। नम्नशिरस्त्वं विषादस्यानुभावः। शिरोनमने शिरोलङ्कारस्रंसस्तु स्वभावसिद्ध इति स्वभावोक्तिः॥२५॥

लब्धप्रतिष्ठाः प्रथमं न खलु स्थ बलोत्तरैः।
अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः परैः॥२६॥

प्रकाशिका

इत्थं निरूपितस्य वैकृतस्य हेतुं स्वयमेवाभ्यूहति—

लब्धेति। प्रथमं लब्धप्रतिष्ठाः प्राप्तस्वपदस्थितयः। न खलु स्थ। खलुर्जिज्ञासायाम्। एतद् विशेषतो ज्ञातुमिच्छामीत्यर्थः। न स्थ न भवथ। काक्वा

भवथैवेत्यर्थः। 'मथ्नामि कौरवशतमि'[वेणीसंहारे]त्यादिवत्। कृतव्यावृत्तयः स्वपदाच्च्याविताः। अत्र हेतुः—बलोत्तरैरिति। अपवादानां बलवत्तरत्वं 'स्वावकाशनिरवकाशयोर्निरवकाशो बलीयानि'ति न्यायात्। परै शत्रुभिः॥२६॥

विवरणम्

इत्थं प्रतिपादितानां मुखवैवर्ण्यादीनां कारणं स्वयमेवाभ्यूह्य कथयति—

लब्धेति। यूयं परैः कृतव्यावृत्तयः न खलु स्थ। परैः शत्रुभिः कृतव्यावृत्तयः कृता विहिता व्यावृत्तिः स्वपदच्युतिर्येषां तथाविधा न खलु। खलुशब्दो जिज्ञासायाम्। स्थ भवथ। अत्र काक्वा भवथैवेत्यर्थः। 'मथ्नामि कौरवशतं समरे न कोपाद्'[वेणीसंहारे]इत्यादिवत्। भवन्तः शत्रुभिः स्वपदात् प्रच्याविता एवं। तद्विशेषविषया मे जिज्ञासेति भावः। 'निषेधवाक्यालङ्कारजिज्ञासानुनये खलु' इत्यमरः। स्वपदात् प्रच्यावनमुपमया स्फुटयति—अपवादैः उत्सर्गाः इव इति। अपवादैर्विशेषविधिभिः उत्सर्गाः सामान्यविधय इव। यथा विशेषविधिभिः सामान्यविधयः स्वस्थानान्निरस्यन्ते, तथा यूयमपि परैरिन्द्रादिस्थानान्निरस्ता एव। के पुनस्त इत्यादयो विशेषाः कथ्यन्तामित्यर्थः। सामान्यविधीनां देवानां च साधारणं धर्ममाह—प्रथमं लब्धप्रतिष्ठा इति। प्रथमं शत्रुसमागमात् पूर्वं विशेषशास्त्रश्रवणात् पूर्वं च लब्धा प्राप्ता प्रतिष्ठा स्वपदस्थितिर्यैस्ते तथा। परेषां विशेषविधीनां च साधारणं धर्ममाह—बलोत्तरैरिति। बलेन शक्त्या उत्तरैः उत्कृष्टैः। इन्द्रादिभ्योऽपि बलाधिकैरित्यर्थः। विशेषविधीनां बलोत्तरत्वं तु 'सावकाशनिरवकाशयोर्निरवकाशो विधिर्बलीयानि'ति न्यायात्। सर्वे ब्राह्मणा भोजयितव्या इत्यादयः सामान्यविधयः। देवदत्तस्तु क्षीरयवागूं पाययितव्य इत्यादयो विशेषविधयः। तत्र ब्राह्मणसामान्यतः प्रथमं देवदत्तेऽपि प्राप्तं भोजयितव्यत्वं पाश्चात्येन विशेषविधिना निरस्यते। तत्र यदि विशेषविधिर्देवदत्तादपि निवर्तेत, तर्हि स निरवकाश एव स्यात्। न च विधेर्निरवकाशत्वं युक्तं कल्पयितुम्। सामान्यविधिस्तु ब्राह्मणान्तरेषु सावकाश एवेति युक्तं विशेषविधीनां बलोत्तरत्वम्॥२६॥

तद् ब्रूत वत्साः! किमितः प्रार्थयध्वे समागताः।
मयि सृष्टिर्हि लोकानां रक्षा युष्मास्ववस्थिता॥२७॥

प्रकाशिका

तदिति। तत् तस्माद्, यस्माद् वैकृतहेतुरेवंविधः। ब्रूत वत्साः!। किं ब्रूम इत्याह—किमित इति। यत् प्रार्थितं तद् ब्रूतेत्यर्थः। इतोऽस्मत्तः। समागताः सम्भूयागमनात् प्रार्थनयावश्यं भवितव्यमिति भावः। ननु लोकस्थितिभङ्गे सति

लोकगुरोस्तव लोकपालानामस्माकं च समानेयं प्रार्थनेत्याह—मयीति। तस्माद् रक्षाप्रार्थना युष्माकमेवेत्यभिप्रायः॥२७॥

विवरणम्

अथ तस्मिन् विषये स्वकर्तव्यांशं पृच्छन् वचनमुपसंहरति—

तदिति। तद् वत्साः! समागता यूयम् इतः किं प्रार्थयध्वे ब्रूत। तद् भवतामिदं मुखवैवर्ण्यादिकं परपरिभूतत्वं यतो वदति, तस्मादित्यर्थः। वत्साः! पुत्राः!। अनेनानुकम्पातिशय उक्तः। समागताः सम्भूयागताः। अनेन प्रार्थनाया अवश्यम्भावः। सूचितः। इतः मत्सकाशात् किं वस्तु प्रार्थयध्वे। 'अर्थ याच्ञायाम्' इति धातुः। ब्रूत व्यक्तं वदत। 'ब्रूञ् व्यक्तायां वाचि' इति धातु। को भवतां पराभवकर्तेति शेषः कथ्यतामित्यर्थः। किं प्रार्थयध्वे इत्यनेन प्रश्नेनैव ब्रूतेत्येतद् गतार्थमपि पुनर्वचनं त्वराविशेषं द्योतयति। मत्सकाशाद् यदपेक्षितं, तत् त्वरितं ब्रूत, नात्र शङ्का कर्तव्येत्यर्थः। ननु लोकरक्षापरिक्षये जायमाने लोकगुरोस्तव लोकपालानामस्माकं च समानमेव व्यसनम्। तस्मात् किमर्थं प्रार्थयध्व इत्युच्यत इत्यत्राह—मयि लोकानां सृष्टिः अवस्थिता, रक्षा युष्मासु हि इति। रजोगुणमवलम्ब्यावस्थिते मयि लोकानां सृष्टिरवस्थिता। रक्षा तु लोकपालनाधिकृतेषु युष्मास्वेव। हिशब्दः प्रसिद्धौ। ततो लोकरक्षापरिक्षये तद्रक्षणाधिकृतानां युष्माकमेव प्रार्थना युक्तेति भावः॥२७॥

ततो मन्दानिलोद्धूतकमलाकरशोभिना।
गुरुं नेत्रसहस्त्रेण चोदयामास वासवः॥२८॥

प्रकाशिका

तत इति। गुरुं बृहस्पतिम्॥२८॥

विवरणम्

अथ प्रतिवचनप्रस्तावे वाचस्वतेरेव तद्योग्यत्वान्महेन्द्रस्य तन्नियोगप्रकारमाह—

तत इति। ततः वासवः नेत्रसहस्त्रेण गुरुं चोदयामास। ततः ब्रह्मणो नियोगानन्तरं वासवः इन्द्रः नेत्राणां सहस्त्रेण करणभूतेन गुरुं बृहस्पतिम्। 'बृहस्पतिः सुराचार्यो गीष्पतिर्धिषणो गुरुरि'ति सिंहः। चोदयामास प्रेरयामास। 'चुद प्रेरण' इति धातुः। प्रतिवक्तुमिति शेषः। नेत्रसहस्त्रव्यापारप्रतिपादनेन नियोगप्रकारमेव वदन् नेत्रसहस्त्रं विशिनष्टि—मन्दानिलोद्धूतकमलाकरशोभिनेति। मन्दानिलेन मन्दवातेन उद्धूतश्चलितो यः कमलाकरः पद्माकरः तद्वत् शोभितुं शीलमस्येति तथा।

गुरुविषयगौरवद्योतकं तत्कालविशेषणं च। अत्र नेत्रसहस्ररूपोऽवयवी कमलाकरस्थानीयः। अवयवभूतानि नेत्राणि तु कमलस्थानीयामीति विभागः।।२८।।

स विनेतृ हरेश्चक्षुर्दशचक्षुश्शताधिकम्।
वाचस्पतिरुवाचेदं प्राञ्जलिर्जलजासनम्।।२९।।

प्रकाशिका

स इति। हरेरिन्द्रस्य चक्षुः अर्थप्रकाशकत्वादुपचारः। दश च तानि चक्षुश्शतानि चेति दशचक्षुश्शतानि, तेभ्योऽधिकं विशिष्टम्। कथं वैशिष्ट्यमित्याह—विनेतृ। विनयोपदेशकम्। 'स द्विनेत्र' इति पाठे द्वे नेत्रे यस्य धर्मदृष्टिरर्थदृष्टिश्च। अनेन भगवतो बृहस्पतेर्भगवतः शुक्राद् व्यतिरेको ध्वनितः। स हि बलियज्ञे विरोधमाचरन् भगवता विष्णुना धर्मदृष्ट्या विफलीकृतः। असौ तु दृष्टिद्वययोगाद् धर्मार्थावुभावपि समीक्ष्योक्तवानित्यर्थः। दशचक्षुश्शताधिकं तदगोचरार्थग्राहकमित्यर्थः। वाचस्पतिः अलुकि 'षष्ठ्याः पतिपुत्र—' (८.३.५३) इति सत्वम्।।२९।।

विवरणम्

अथ बृहस्पतेः प्रतिवचनप्रस्तावमाह—

स इति। सः वाचस्पतिः प्राञ्जलिः जलजासनम् इदम् उवाच। सः य एवं वासवेन नियुक्तः स इत्यर्थः। वाचस्पतिः गीष्पतिः। 'जीव आङ्गिरसो वाचस्पतिरि'त्यमरः। अलुक्। 'षष्ठ्यः पतिपुत्र'— (८.३.५३)इति सत्वम्। अनेन बृहस्पतेरुक्तिचातुर्यं दर्शितम्। तच्च नियोगहेतुः। प्राञ्जलिः प्रकृष्टोऽञ्जलिर्यस्य तथाभूतः सन्, अञ्जलिं कृत्वेत्यर्थः। जलजासनं ब्रह्माणम् उवाच उक्तवान्। न केवलमुक्तिचातुर्यं, विचारचातुर्यं चास्तीत्याह—द्विनेत्र इति। धर्मदृष्टिरर्थदृष्टिश्चेति द्वे नेत्रे यस्य स द्विनेत्रः। अनेनासुराचार्याद् भार्गवात् सुराचार्यस्यास्य व्यतिरेको ध्वन्यते। शुक्रो हि बलियज्ञे नारायणप्रार्थितपदत्रयपरिमितभूभागप्रदाने विरोधमाचरन् भगवता धर्मदृष्ट्या वियोजितः। असौ तु दृष्टिद्वयशालित्वाद् धर्मार्थावुभावपि समीक्ष्योक्तवान्। अत एव विजयार्थं सेनानीसृष्टिमात्रं प्रार्थयिष्यति 'तदिच्छामः'(२.५०)इत्यादिना। अस्य महेन्द्रयोगक्षेमविधानमात्रतत्परत्वं महेन्द्रापेक्षया विज्ञानाधिक्यं चाह—हरेः दशचक्षुश्शताधिकं चक्षुरिति। हरेरिन्द्रस्य।

यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु।
शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु।।

इति सिंहः। दश च तानि चक्षुश्शतानि चेति तथा। तेभ्योऽधिकं विशिष्टं

चक्षुरित्यर्थ:। चक्षुश्शब्दोऽयमर्थप्रकाशकत्वाद् वाचस्पतौ गौण:। 'लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता'[श्लोकवार्त्तिके] इति। चक्षुस्सहस्त्रागोचरार्थग्राहक इत्यर्थ:।।२९।।

एवं यदात्थ भगवन्नामृष्टं न: परै: पदम्।
प्रत्येकं विनियुक्तात्मा कथं न ज्ञास्यसि प्रभो!।।३०।।

प्रकाशिका

एवमिति। 'लब्धप्रतिष्ठा:' (२.२६)इत्यादिना परैरस्माकं पदमाक्रान्तमिति यदात्थ, तदेवं, सत्यमित्यर्थ:। प्रत्येकं प्रतिपदार्थम्। विनियुक्तात्मा विभक्तशक्ति:। विश्वव्यापित्वात् सर्वगतं जानासीत्यर्थ:।।३०।।

विवरणम्

वचनप्रकारमेवाह—

एवमिति। हे भगवन्! त्वं यद् आत्थ तद् एवम्। भगा: सन्त्यस्येति भगवान्।

ऐश्वर्यस्य समग्रस्य वीर्यस्य यशस: श्रिय:।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा।।

हे भगवन्! ऐश्वर्यादिषड्गुणपरिपूर्ण! त्वं यद् आत्थ 'लब्धप्रतिष्ठा: प्रथमम्' (२.२६)इत्यादिनास्माकं पदं परैराक्रान्तमिति यद् ब्रवीषि। 'ब्रुव: पञ्चानाम्' (३.४.८४)इत्यादिना सिपस्थलादेशो ब्रुवश्चाहादेश:। तदेवं, तत्तथेत्यर्थ:। अनूदितमेवार्थं सुखग्रहणार्थमुद्दिशति—न: पदं परै: शत्रुभि:। अत्र तारकासुरस्यैकत्वेऽपि तत्सहचराणां बहुत्वाद् बहुवचनम्। इन्द्रादीन् प्रायशस्तत्तत्स्थानेभ्यो निरस्य स्वानेव दैत्यांस्तत्र तत्र नियोजितवानिति बहुवचनेन द्योत्यते। आमृष्टं परिभूतम्। भवता यदस्मद्विज्ञापनात् पूर्वमेवास्मद्वृत्तान्तसाक्षात्कार: कृत:, तदुपपन्नमेवेति वदन् पुनरपि स्तौति—प्रभो! प्रत्येकं विनियुक्तात्मा त्वं कथं न ज्ञास्यसि इति। हे प्रभो! सर्वलोकनियन्त:! प्रत्येकं प्रतिपदार्थम्। सर्वेष्वपि पदार्थेष्वित्यर्थ:। विनियुक्त: आत्मा येन स तथा। अनेन सर्वलोकसाक्षित्वमुक्तम्। तत एव हेतो: कथं न ज्ञास्यसि कथं न जानीया:। ऌट्प्रयोगस्तु 'कथं स लक्ष्यप्रभवो भविष्यति'[कु.सं.५.८१], 'भविष्यति प्रार्थितदुर्लभ: कथम्'-[कुसं.५.४६]इत्यादिवद् द्रष्टव्य:। सर्वजनान्तर्यामितया विश्वव्यापी भवान् किं किं न लोकवृत्तं जानातीति भाव:।।३०।।

त्वया दत्तवरोदीर्णस्तारकाख्यो महासुरः।
उपप्लवाय लोकानां धूमकेतुरिवोत्थितः॥३१॥

प्रकाशिका

तमेव स्वाधिकारोपप्लवं प्रपञ्चयति—

त्वयेति। दत्तवरत्वादुदीर्ण उद्रिक्तः। अनेन शक्त्युपचय उक्तः। महासुर इत्यसुरविजयित्वात् तस्य क्रूरत्वमुक्तम्। अत एवाह—उपप्लवायेति। धूमकेतुरुत्पातविशेषः॥३१॥

विवरणम्

अथ तमेव स्वाधिकारोपप्लवं विस्तरतः प्रदर्शयिष्यन्नुपप्लवहेतुभूतं तारकासुरमेव निर्दिशति—

त्वयेति। तारकाख्यो महासुरः लोकानाम् उपप्लवाय उत्थितः। तारक इत्याख्या नाम यस्य स तथा महासुरः महान् असुरः 'आन्महतः—' (६.३.४६) इत्यादिनात्वम्। असुरश्रेष्ठ इत्यर्थः। असुरविजयित्वात् क्रूरस्वभाव इति भावः। **धर्मविजयिनश्च लोभविजयिनश्चासुरविजयिनश्चेति त्रिविधाः खलु विजिगीषवः।** यदाह कौटिल्यः—धर्मलोभासुरविजयिन इति त्रयोऽभियोक्तारः। तेषामभ्यवपत्त्या धर्मविजयी तुष्यति; तमभ्यवपद्येत। परेषामपि भयाद् भूमिद्रव्यापहरणेन लोभविजयी तुष्यति; तमर्थेनाभ्यवपद्येत। भूमिद्रव्यपुत्रदारप्राणहरणेनासुरविजयी तुष्यति; तं भूमिद्रव्याभ्यामुपगृह्याग्राह्यः प्रतिकुर्वीत (१२.१.१६२) इति। अत एव वक्ष्यति—

इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम्।
शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः॥ (२.३९)

इति। लोकानां चतुर्दशभुवनानाम् उपप्लवायात्यन्तविनाशाय। असुरविजयित्वादिति भावः। उत्थितः उदितः, भवतीति शेषः। ननु लोकोत्तरबलैर्भवद्भिरेव स हन्यतामित्यत्राह—त्वया दत्तवरोदीर्ण इति। त्वया विश्वगुरुणा भवतैव, न तु येनकेनचिदिति भावः। दत्तवरोदीर्णः दत्तो वरो यस्मै स दत्तवरः, अत एव उदीर्ण उद्रिक्तः। त्वद्वरादस्माकमवध्यतां गत इत्यर्थः। एतस्यैव चतुर्दशलोकविनाशहेतुत्वमुपमया स्फुटयति। धूमकेतूः इव इति। धूमाकारः केतुर्धूमकेतुः उत्पातविशेषः। 'अग्न्युत्पातौ धूमकेतु' इत्यमरः। धूमकेतोरुदयस्यात्यन्तिक विनाशहेतुत्वमुक्तं गार्ग्यसंहितायाम्—

उत्तिष्ठति यदा भीमो धूमकेतुर्नभस्तले।
तदा विनश्यति क्षिप्रं जगदेतच्चराचरम्॥ इति॥३१॥

पुरे तावन्तमेवास्य तनोति रविरातपम्।
दीर्घिकाकमलोन्मेषो यावन्मात्रेण सिध्यति॥३२॥

प्रकाशिका

अथ तद्विषये यथाशक्त्यनुवृत्तिमाह सप्तभिः श्लोकैः—

पुर इति। यावन्मात्रेण, मात्रशब्दोऽवधारणे। यावतैषेत्यर्थः॥३२॥

विवरणम्

अथ विषयीभूतेषु तद्विषयेषूपायान्तरेषु स्वशक्त्यनुरूपां समाश्रयवृत्तिं दर्शयति सप्तभिः श्लोकैः। तत्रादौ रवेरनुवृत्तिमाह—

पुर इति। रविः अस्य पुरे तावन्तम् एव आतपं करोति। रविरादित्यः अस्य तारकासुरस्य पुरे राजधान्यां तावन्तं तत्परिमाणम्। 'यत्तदेतेभ्यः परिमाणे वतुप्' (५.२.३९)। आतपं प्रकाशम्। 'प्रकाशो द्योत आतप' इत्यमरः। करोति विदधाति। किंपरिमाणमित्यत्राह—यावन्मात्रेण दीर्घिकाकमलोन्मेषः सिध्यति इति। यावन्मात्रेण, मात्रशब्दोऽवधारणे। 'मात्रं कार्त्स्न्येऽवधारण' इत्यमरः। यावतैवेत्यर्थः। दीर्घिकाकमलोन्मेषः दीर्घिकासु क्रीडावापीषु। 'वापी तु दीर्घिके'त्यमरः। तासु यानि कमलानि पद्मानि तेषामुन्मेषो विकासः सिध्यति सिध्येत्। यावतैव निजातपेन वापीकमलविकाससिद्धिः, रविस्तत्पुरे तावन्मात्रमेवातपं करोति, न न्यूनमधिकं वा। न्यूनत्वे कमलोन्मेषाभावेनापराधप्रसङ्गाद्, अधिकत्वे तु तदवरोधवधूमुखारविन्दपरिम्लानताविधानेनात्यन्तमपराधप्रसङ्गाच्चेति भावः॥३२॥

सर्वाभिः सर्वदा चन्द्रस्तं कलाभिर्निषेवते।
नादत्ते केवलां रेखां हरचूडामणीकृताम्॥३३॥

प्रकाशिका

सर्वाभिरिति। सर्वदा अपरपक्षेऽपि। केवलामेकाम्॥३३॥

विवरणम्

चन्द्रस्यानुवृत्तिमाह—

सर्वाभिरिति। चन्द्रः सर्वदा सर्वाभिः कलाभिः तं निषेवते। चन्द्रः 'चदि आह्लादने' इति धातुः। इदमेव तस्य सर्वदा निषेवणनिर्बन्धहेतुः,

गुणानामेव दौरात्म्याद् धुरि धुर्यो नियुज्यते।
असञ्जातकिणस्कन्धः सुखं स्वपिति गौर्गडी॥

इति न्यायादिति भावः। सर्वदा अपरपक्षेऽपि सर्वाभिः, न तु कृष्णप्रतिपदादिषु न्यूनाभिः। कलाभिः 'कला तु षोडशो भाग' इत्यमरः। उपलक्षणतृतीया चेयम्। निषेवते नितरां सेवते। चन्द्रोऽयं सकलकलापरिपूर्णः सन् सर्वदा तमेव निषेवत इत्यर्थः। ननु हरजटाकोटिघटिता चन्द्रस्यैका कला। अतः कथं सर्वाभिरित्युक्तं, तत्राह—हरचूडामणीकृतां केवलां रेखां न आदत्ते इति। हरेण परमेश्वरेण चूडामणीकृतां शिरोलङ्कारतां प्रापितां केवलामेकां रेखां कलां, रेखाशब्देनात्यल्पत्वमुक्तम्। इदमसुराधिपतेस्तदुपादाननिर्बन्धाभावे हेतुः। नादत्ते न स्वीकरोति। किमनया ममात्यल्पया रेखयेति तदुपेक्षामात्रेण चन्द्रः परमेश्वरपराधीनां रेखां नादत्त इत्यर्थः॥३३॥

व्यावृत्तगतिरुद्याने कुसुमस्तेयसाहसात्।
न वाति वायुस्तत्पार्श्वे तालवृन्तानिलाधिकम्॥३४॥

प्रकाशिका

व्यावृत्तेति। व्यावृत्ता निवृत्ता गतिर्यस्य। उद्याने आक्रीडे। कुसुमस्तेयसाहसात् कुसुमापहारदण्डमाशङ्क्येत्यर्थः॥३४॥

विवरणम्

पवनस्यानुवृत्तिमाह—

व्यावृत्तेति। वायुः तत्पार्श्वे तालवृन्तानिलाधिकं न वाति। वायुः 'वा गतिगन्धनयोरि'ति धातुः। सञ्चारशीलोऽपीत्यर्थः। तत्पार्श्वे तस्य तारकासुरस्य पार्श्वे समीपे तालवृन्तानिलाधिकमिति वानक्रियाविशेषणम्। तालवृन्तस्य व्यजनस्यानिलो वायुस्तालवृन्तानिलः। व्यजने वीज्यमाने जायमानोऽनिल इत्यर्थः। तस्मादधिकं यथा भवति तथा न वाति औचित्यानुसारेण तालवृन्तानिलवद् वाति चेत्यर्थः। किमर्थं ततोऽधिकं न वातीत्यत्राह—उद्यानकुसुमस्तेयसाहसाद् व्यावृत्तगतिरिति। उद्यानकुसुमस्तेयसाहसादिति ल्यब्लोपे पञ्चमी। उद्यानकुसुमस्तेयसाहसमाशङ्क्येत्यर्थः। उद्याने आक्रीडे 'पुमानाक्रीड उद्यानमि'त्यमरः। यानि कुसुमानि पुष्पाणि तेषां स्तेयम् अपहारः, तस्माद्धेतोर्यः साहसः दण्डः, 'दण्डो दमः साहसोऽस्त्री' इति वैजयन्ती। तम् आशङ्क्य व्यावृत्तगतिः निवृत्तस्वैरसञ्चारः। उद्यानकुसुमस्तेयरूपादनालोचितकर्मणः सकाशाद् व्यावृत्तगतिरिति केचिद् व्याचक्षते। तत्पक्षे गतिशब्दो निरुपयोगः स्याद्, उद्यानकुसुमस्तेयसाहसाद् व्यावृत्त इत्यनेनैव चरितार्थत्वात्॥३४॥

पर्यायसेवामुत्सृज्य पुष्पसम्भारतत्पराः।
उद्यानपालसामान्यमृतवस्तमुपासते॥३५॥

प्रकाशिका

पर्यायेति। सम्भारः सम्पादनम्। उद्यानपालैः सामान्यं यथा भवति॥३५॥

विवरणम्

ऋतूनामनुवृत्तिमाह—

पर्यायेति। ऋतवः पर्यायसेवाम् उत्सृज्य तम् उद्यानपालसामान्यम् उपासते। ऋतवः वसन्तादयः।

वसन्तश्च तथा ग्रीष्मः प्रावृट् च शरदेव च।
हेमन्तः शिशिरश्चैव षडेत ऋतवः स्मृताः॥ इति।

पर्यायसेवां पर्यायेण क्रमेण सेवा पर्यायसेवा, ताम्। तत्सृज्य त्यक्त्वा। सर्वत्र हिं वसन्तादयः क्रमेण प्रवर्तन्ते, तद्गृहे तु युगपदेवेति भावः। तं तारकम्। उद्यानपालसामान्यमित्युपासनक्रियाविशेषणम्। उद्यानमाक्रीडं पालयन्तीत्युद्यानपालाः, तैः सामान्यं साधारणं यथा भवति तथा। समानशब्दात् 'चतुर्वर्णादीनां स्वार्थ उपसङ्ख्यानम्' (वा. ५.१.१२४) इति स्वार्थे ष्यञि कृते सामान्यशब्दसिद्धिः। उपासते सेवन्ते। ननु कथमृतूनामुद्यानपालसाधारण्यमित्याशङ्क्य साधारणं धर्ममाह—पुष्पसम्भारतत्परा इति। पुष्पाणां सर्वर्तुसम्भवानां चम्पकादीनां सम्भारे सम्पादने तत्पराः सावधानाः। शीतोष्णादिकं स्वगुणमपहायाक्रीडपालकवत् स्वस्वकुसुमसम्पादनमात्रपरा वसन्तादयः कुसुमान्तरमविनाशयन्तो युगपदेव तमाराधयन्तीत्यर्थः। यथोद्यानपालकानां पुष्पसामग्र्या अन्यथाभावे दण्डः, तथा वसन्तादीनामप्यस्तीति भावः॥३५॥

तस्योपायनयोग्यानि रत्नानि सरितां पतिः।
कथमप्यम्भसामन्तरानिष्पत्तेः प्रतीक्षते॥३६॥

प्रकाशिका

तस्येति। निष्पत्तेः उपायनयोग्यतावस्थायाः। रत्नेषु यानि समग्रगुमत्वात् तदुपायनयोग्यानि अम्भसि पच्यमानानि कालपरिणामापेक्षित्वाद् अनिष्पन्नानि रत्नानि, तेषां निष्पत्तिं समुद्रस्तत्सेवात्वरया कथञ्चिद् धैर्येण प्रतिपालयतीत्यर्थः॥३६॥

विवरणम्

वरुणस्यानुवृत्तिमाह—

तस्याति। सरितां पतिः तस्य उपायनयोग्यानि रत्नानि अम्भसाम् अन्तर्निष्पत्तेः

आ कथमपि प्रतीक्षते। सरितां पतिः समुद्रः तस्य तारकासुरस्य उपायनयोग्यानि उपायने उपचारार्थपदार्थप्रदाने योग्यानि उचिततानि रत्नानि मौक्तिकादीनि अम्भसामन्तः स्वजलान्तर्भागे निष्पत्तेः आ उत्पत्तिपर्यन्तम्। मर्यादायामाङ्। उपायनयोग्यताप्राप्तिपर्यन्तमित्यर्थः। कथमपि धैर्यमवलम्ब्येति भावः। प्रतीक्षते प्रतिपालयति। समग्रगुणानामेव रत्नानां तदुपायनयोग्यत्वात् तदितरप्रदाने दण्डमाशङ्क्य स्वजलान्तर्भागे पच्यमानानां रत्नानां कालवशादेव परिपाकोपपत्तेरुपायनयोग्यताप्राप्तिपर्यन्तं तत्सेवायाः कालविलम्बमप्याशङ्कमानो यथाकथञ्चित् प्रतीक्षते। शुक्तिकायां पतितो जलबिन्दुःषण्मासोत्तरकालमुद्गीणो हि प्रशस्तं मौक्तिकं भवति। यदाह राजशेखरः—मौक्तिकानां दत्तषाण्मासिकानामिति। एवं रत्नान्तरेष्वपि तदुचितकालप्राप्तेरावश्यकत्वात् प्रतीक्षणोपपत्तिः। योग्यताप्राप्त्यनन्तरं तु झटिति तस्मै समर्पयत्येवेति भावः॥३६॥

ज्वलन्मणिशिखाश्चैनं वासुकिप्रमुखा निशि।
स्थिरप्रदीपतामेत्य भुजङ्गाः पर्युपासते॥३७॥

प्रकाशिका

ज्वलदिति। ज्वलन्तो मणय एव शिखा येषाम्। स्थिराः वाय्वादिभिरनिर्वापणीयाः प्रदीपाः दीपभाजनवर्त्यादिसमष्टयः, अथवा स्थिरप्रदीपाः तत्र तत्राविचलत्वेन स्थापिता गृहप्रदीपा दीपभाजनानि॥३७॥

विवरणम्

अथ भूलोकवासिनां क्षुद्रत्वात् तदनुवृत्तिकथनमतिलङ्घ्य पातालवासिनां नागानामनुवृत्तिमाह—

ज्वलदिति। वासुकिप्रमुखाः भुजङ्गाः निशि स्थिरप्रदीपताम् एत्य एनं पर्युपासते। वासुकिप्रमुखाः वासुकिः प्रमुखः आदिर्येषां ते तथा, वासुकिप्रभृतय इत्यर्थः। भुजङ्गाः सर्पाः। न केवलं स्वर्गवासिनो वयं, किन्तु पातालवासिनो विषकटुका भुजङ्गाश्चेति चशब्दार्थः। निशि रात्रौ। अनेन प्रदीपयोग्यकालो निर्णीतः स्थिरप्रदीपताम्। स्थिराः, अनेन तेषां तैलवर्त्यादिनिरपेक्षत्वेन तद्विनाशनिमित्ताभावात् पवनादिभिरनिर्वापणीयत्वाच्च प्रदीपान्तरेभ्यो व्यतिरेक उक्तः। प्रदीपाः दीपभाजनवर्तिज्वलनानां समष्टयः। स्थिराश्च ते प्रदीपाश्चेति स्थिरप्रदीपाः, तेषां भावस्तत्ता, तामेत्य। अथवा दीपयोग्येषु तेषु तेषु स्थानेषु निश्चलतया स्थापिताः प्रदीपाः स्थिरप्रदीपाः, प्रदीपशब्दस्य प्रदीपभाजनमर्थः। एनं तारकं पर्युपासते परितः समन्तात् सेवन्ते। भुजङ्गानां प्रदीपत्वप्राप्तौ हेतुमाह—ज्वलन्मणिशिखा इति।

ज्वलन्तो मणय एव शिखा ज्वाला येषां ते तथा। भुजङ्गाः समुत्क्षिप्तफणास्तेषु तेषु प्रदेशेष्ववस्थाय निजफणामणिभिस्तिमिरमहरन्तस्तमेव सेवन्त इत्यर्थः॥३७॥

तत्कृतानुग्रहापेक्षी तं मुहुर्दूतहारितैः।
अनुकूलयतीन्द्रोऽपि कल्पद्रुमविभूषणैः॥३८॥

प्रकाशिका

इत्थं भूलोकवासिनः स्वल्पबलानविगणय्य स्वर्गपातालवासिनां तारकं प्रति दण्डोपतनवृत्तमुक्त्वा त्रैलोक्याधिपतेरिन्द्रस्य वृत्तं विशेषत आह—

तत्कृतेति। अयमर्थः—उभयोरपि त्रैलोक्याधिपतित्वेन मत्सरस्य संश्रयवृत्तावपि दुरपाकरत्वाद् विशेषतस्तस्यासुरविजयित्वात् तत्सन्निकर्षतो बिभ्यद् दूरस्थ एवेन्द्रस्तदनुग्रहमाकाङ्क्षन् दूतमुखेन प्रापितैः कल्पद्रुमजैर्भूषणैस्तमनुवर्तत इति। अत्र कौटिल्यः—भूमिद्रव्यपुत्रदारप्राणहरणेनासुरविजयी तुष्यति। तं भूमिद्रव्याभ्यामुपगृह्याग्राह्यः प्रतिकुर्वीत। (१२.१.१६२) इति॥३८॥

विवरणम्

इत्थं त्रैलोक्यवासिनां तारकं प्रति दण्डोपनतवृत्तं प्रतिपाद्य त्रैलोक्याधिपतेरिन्द्रस्य वृत्तं सविशेषमाह—

तत्कृतेति। इन्द्रः अपि दूतहारितैः कल्पद्रुमविभूषणैः तं मुहुः अनुकूलयति। न परं त्रैलोक्यवासिनः, अपि तु तत्पतिरिन्द्रोऽपीत्यपिशब्दार्थः। दूतहारितैः आत्मनो दूतैः प्रयोज्यकर्तृभिः हारितैः असुरसमीपं प्रापितैः कल्पद्रुमविभूषणैः कल्पद्रुमोत्पन्नैर्विचित्रैराभरणैः तं तारकम्। मुहुः प्रतिक्षणम् अनुकूलयति आत्मानुकूलं करोति। त्वया मयि प्रसादः क्रियतामिति दूतमुखेन वदन् तदुचितान्याभरणानि च प्रतिपादयन् प्रतिक्षणं तं प्रसादयतीति यावत्। किमर्थमेवं करोतीत्यत्राह—तत्कृतानुग्रहापेक्षी इति। तत्कृतमसुरकृतमनुग्रहमपेक्षितुं शीलमस्येति तथा। अयमभिप्रायः—इन्द्रस्त्रैलोक्याधिपतित्वाभिमानिनमात्मानं प्रति समत्सरस्य विशेषतश्चासुरविजयिनस्तारकासुरस्य संश्रयवृत्त्याप्यानुकूल्यकरणमशक्यमिति निश्चिन्वानः ग्रहणबन्धनादिभयात् सन्निधिं परिहृत्य दूरावस्थित एव तदनुग्रहमाकाङ्क्षमाणः प्रतिक्षणं दूतजनप्रापितैः कल्पद्रुमविभूषणैः तमनुवर्तते। 'तं भूमिद्रव्याभ्यामुपगृह्याग्राह्यः प्रतिकुर्वीत' (१२.१.१६२) इति कौटिल्योक्तप्रकारोऽनेन दर्शित इति वेदितव्यम्॥३८॥

इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम्।
शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः॥३९॥

प्रकाशिका

इत्थमुपवर्णिताया: संश्रयवृत्तेर्वैफल्यमाह—

इत्थमिति। क्लिश्नाति बाधते। विग्रहमेवास्मास्वाचरतीत्यर्थ:। शाम्येत् सन्धिरेव संश्रयोऽपि। अत्र नोपकारेण शाम्येदित्येतावता विरोधपरिहारे सत्यपि प्रत्यपकारेण शाम्येदिति वचनं तन्नियमप्रतीत्यर्थम्।३९॥

विवरणम्

इत्थमुपवर्णिताया: संश्रयवृत्तेरप्यसुरविजयिनि तस्मिन् विफलत्वमाह—

इत्थमिति। इत्थम् आराध्यमान: अपि भुवनत्रयं क्लिश्नाति। इत्थं पूर्वोक्तप्रकारेण आराध्यमान: सेव्यमानोऽपि। अपिशब्द: सेव्यमानस्य विरोधाचरणं विरुद्धमिति दर्शयति। भुवनानां त्रयं भुवनत्रयं त्रैलोक्यं क्लिश्नाति पीडयति। अस्मासु वैरमेवाचरतीत्यर्थ:। ननु प्रतिक्षणमाराध्यमानस्य कथं प्रतिकूला प्रवृत्तिरितीमामाशङ्कां दुर्जनस्यायं स्वभाव इत्यर्थान्तरन्यासेन परिहरति—दुर्जन: प्रत्यपकारेण शाम्येद् उपकारेण नेति। दुष्टो जन: दुर्जन:। अपकारिणमुद्दिश्य क्रियमाणोऽपकार: प्रत्यपकार:, तेन। शाम्येत् सन्धिं कुर्यात्। उपकारस्तु दुर्जने दोषमेवावहतीत्याह—उपकारेण नेति। उपकारेण तु न शाम्येदित्यर्थ:। ननु दुर्जनो नोपकारेण शाम्येदित्येतावदेवात्र वक्तव्यमिति किमर्थं प्रत्यपकारोपन्यास:। प्रत्यपकारेणैव शाम्येदिति नियमप्रतिपादनार्थमिति ब्रूम:। यदाह माघ:—

> चतुर्थोपायसाध्ये तु शत्रौ सान्त्वमपक्रिया।
> स्वेद्यमामज्वरं प्राज्ञ: कोऽम्भसा परिषिञ्चति।। (२.५४)

इति। अत्राराध्यमानोऽपि न शाम्यतीत्यस्य समर्थ्यस्य प्रत्यपकारेण शाम्येदित्येतत् सामान्यं वैधर्म्येण समर्थकं, शमनाभावस्यैवोक्तत्वात्।।३९।।

तेनामरवधूहस्तै: सदयालूनपल्लवा:।
अभिज्ञाश्छिन्नपातानां क्रियन्ते नन्दनद्रुमा:।।४०।।

प्रकाशिका

तमेव विग्रहं प्रपञ्चयति सप्तभि: श्लोकै:—

तेनेति। छिन्नपातानामिति कर्मणि षष्ठी। विशेषणेन तदनर्हत्वं द्योत्यते।।४०।।

विवरणम्

क्लिश्नाति भुवनत्रयमिति यो विग्रह उक्तस्तमेव प्रपञ्चयति सप्तभि: श्लोकै:। तत्र विध्वंसनम् अपहरणम् उपरोध इति त्रिविधो विग्रह:। तत्र विध्वंसनमाह—

तेनेति। तेन नन्दनद्रुमाः छिन्नपातानाम् अभिज्ञाः क्रियन्ते। तेन तारकासुरेण। नन्दनद्रुमाः नन्दने नन्दनोद्याने ये द्रुमाः वृक्षाः ते। छिन्नपातानां छिन्नानां पाताः पतनानि छिन्नपाताः, अथवा छिन्नं छेदनं, भावे निष्ठा, तेन पाताः छिन्नपाताः तेषाम् अभिज्ञाः। कर्मणि चेयं षष्ठी। अभिजानन्तीत्यभिज्ञाः क्रियन्त इति कर्मणि लट्। कल्पवृक्षानसौ छित्त्वा पातयतीत्यर्थः। पूर्वं तदभिज्ञानलेशस्याप्यभावमाह—अमरवधूहस्तैः सदयालूनपल्लवा इति। अमरवधूनां स्वर्गस्त्रीणाम्। वधूहस्तस्य कोमलत्वातिशयाद् वधूपदोपादानम्। हस्तैः करैः। सदयमिति लवनक्रियाविशेषणम्। सदयं दयासहितं यथा भवति तथा आलूनाः छिन्नाः पल्लवा येषा ते तथा। अत्रामरशब्देन तेषां नन्दनद्रुमेष्वात्मीयत्वाभिमानः प्रकाश्यते। स च लवने सदयत्वमापादयति। तत्रापि वधूहस्तैरिति कोमलत्वं द्योत्यत इत्यत्यन्तदूरे छिन्नपाताभिज्ञत्वमिति भावः। अत्र कार्यभूतेन छिन्नपातज्ञापनेन कारणभूतं पातनं प्रतीयत इति कार्यद्वारेण पातनस्यैवाभिधानात् पर्यायोक्तमलङ्कारः। नात्रप्रस्तुतप्रशंसा, कार्यकारणयोरुभयोरपि वर्णनीयत्वेन प्रस्तुतत्वात्।।४०।।

वीज्यते स हि सन्तप्तश्वाससाधारणानिलैः।
चामरैः सुरबन्दीनां बाष्पशीकरवर्षिभिः।।४१।।

प्रकाशिका

वीज्यत इति। सन्तप्तश्वासैः साधारणः सदृशोऽनिलो येषाम्। अत्र हेतुर्बाष्पशीकरवर्षिभिरिति। बन्दी हठहृतमहिला। दक्षिणावर्तस्तु तत्सङ्घात इत्याह।।४१।।

विवरणम्

अथ त्रिभिः श्लोकैरपहरणं प्रतिपाद्यते। तत्रादौ अत्यन्तासह्यं दारापहरणमाह—

वीज्यत इति। स हि सुरबन्दीनां चामरैः वीज्यते। सः तारकः। हिशब्दः प्रसिद्धौ। प्रसिद्धः स इत्यर्थ। वाक्यालङ्कारे वा हिशब्दः। सुरबन्दीनां सुरा देवाः तेषां बन्दीनां तारकेण बलात्कारेण हृतानां वनितानाम्। 'बन्दी परस्य वनिता हृता बद्ध्वा बलेन या' इति भोजः। चामरैः सितव्यजनैः वीज्यत इति कर्मणि लट्। वर्तमानेनाद्यापि तदवस्थत्वमुक्तम्। सुरबन्दीनां दुःखातिशयं द्योतयन् व्यजनं विशिनष्टि—सन्तप्तश्वाससाधारणानिलैरिति। सन्तप्तैः सम्यक् तप्तैः, दुःखवशादुष्णतरैरित्यर्थः, श्वासैः दीर्घश्वासैः साधारणः सदृशोऽनिलो वायुर्येषां तैः, प्रियतमवियोगादिदुःखसन्तप्तदीर्घनिःश्वासवातसदृशवातैरित्यर्थः। व्यजनानिलानामुष्णत्वे हेतुमाह—बाष्पशीकरवर्षिभिरिति। बाष्पाणां शोकाश्रूणां शीकरान् कणान् वर्षितुं शीलमेषामिति तथा। मुहुर्मुहुः कराभ्यां बाष्पपरिमार्जनात् ताभ्यां

व्यजनग्रहाच्च बाष्पशीकरवर्षित्वं व्यजनानिलानामित्यवसेयम्। शोकाश्रूणामुष्णत्वमुक्तं रघुवंशे—'शोकोष्णैः पार्थिवाश्रुभिः'(१२.४) इति। अनेन व्यजनानिलानां सुखकरत्वाभावेऽप्यनवरतं वीज्यमानत्ववचनेनासुरविजयिनस्तस्य परपीडामात्रतत्परत्वं व्यज्यते। अत्र पूर्वश्लोक इव पर्यायोक्तं, बन्दीशब्दोपादानेन हठहृतात्वस्य स्पष्टमेवोक्तत्वात्। 'गम्यस्यापि भङ्ग्यन्तरेणाभिधानं पर्यायोक्तिमि'ति हि तस्य लक्षणम्[अलङ्कारसर्व.]। पूर्वत्र तु छिन्नपातज्ञापनकथनेन छित्त्वा पातयतीत्यर्थः प्रतीयत एवेति विशेषः॥४१॥

उत्पाट्य मेरुशृङ्गाणि क्षुण्णानि हरितां खुरैः।
आक्रीडपर्वतास्तेन कल्पिता स्वेषु वेश्मसु॥४२॥

प्रकाशिका

उत्पाट्येति। हरितां सूर्याश्वानाम्। आक्रीड उद्यानम्॥४२॥

विवरणम्

धनापहरणमाह—

उत्पाट्येति। तेन मेरुशृङ्गाणि उत्पाट्य स्वेषु वेश्मसु आक्रीडपर्वताः कल्पिताः। तेन तारकेण मेरोर्महामेरोः शृङ्गाणि शिखराणि उत्पाट्य उन्मूल्य स्वेषु आत्मीयेषु वेश्मसु गृहेषु आक्रीडपर्वताः आक्रीड उद्यानम्। 'पुमानाक्रीड उद्यानमि'त्यमरः। आक्रीडेषु ये पर्वताः क्रीडापर्वताः तत्त्वेन कल्पिताः। मेरुशिखराणि तेन क्रीडापर्वतविधानेषूपयोजितानीत्यर्थः। उत्पाटनसौकर्यमाह—हरितां खुरैः क्षुण्णानीति। हरितां सूर्याश्वानाम्। **'सूर्ये सूर्यतुरङ्गे च मेरौ च हरिदिष्यत'** इति **भोजः।** खुरैः पादाग्रभागैः क्षुण्णानि परिमृदितानि। मेरुपर्यन्तभागेनानुदिनं गच्छतां रवितुरगाणां खुरैरुद्धरणयोग्यतामापादितानीत्यर्थः। धनापहरणस्य दारापहरणवदत्यसह्यत्वाभावादेव तदनन्तरमुपादानमित्यवसेयम्॥४२॥

मन्दाकिन्याः पयः शेषं दिग्वारणमदाविलम्।
हेमाम्बुरुहसस्यानां तद्वाप्यो धाम साम्प्रतम्॥४३॥

प्रकाशिका

मन्दाकिन्या इति। शेषं शिष्टम्। अन्यत् किं कुत्रोपयुक्तमित्याह—हेमेति। तेन हेमाब्जानि स्ववापीविरचनायामुपयोजितानि मेरुशृङ्गाणीवाक्रीडपर्वतविधान इत्यर्थः। दिग्वारणमदाविलत्वं तदुपेक्षाहेतुः। साम्प्रतमिति अयमपरः कालो वर्तत इत्यर्थः॥४३॥

विवरणम्

अथोपभोगसाधनानां कनकारविन्दादीनामप्यपहरणमाह—

मन्दाकिन्या इति। मन्दाकिन्याः पयः शेषम्। मन्दाकिन्याः सुरदीर्घिकायाः। 'मन्दाकिनी वियद्गङ्गा स्वर्णदी सुरदीर्घिके'त्यमरः। पयः शेषं शिष्टमित्यर्थः, भवतीति शेषः। 'त्रिष्वन्यत्रोपयुक्तत' इति केशवस्वामिवचनात् शेषशब्दस्याभिधेयलिङ्गत्वं 'सप्तर्षिहस्तापचितावशेषाणि'(१.१६)इतिवद् द्रष्टव्यम्। किं वा तदन्यत्, कुत्र वा तदुपयुक्तमित्यत्राह—साम्प्रतं हेमाम्बुरुहसस्यानां तद्वाप्यः धामेति। साम्प्रतमिदानीम्। अनेनास्य कालस्य पूर्वस्मात् कालाद् महान् विशेषो जात इति ध्वन्यते। हेमाम्बुरुहसस्यानां हेमाम्बुरुहाणां सुवर्णपङ्कजानां सस्यानां ब्रीह्यादीनाम्। उत्खातप्रतिरोपणात् सुवर्णपङ्कजेषु सस्यत्वारोपः। प्रधानोपभोगसाधनत्वप्रतीतिश्च फलम्। तद्वाप्यः तस्य वाप्यो दीर्घिकाः। 'वापी तु दीर्घिके'त्यमरः। धाम गृहम्। तारकासुरः सुवर्णपङ्कजान्युन्मूल्य स्वावापीरचनायामुपयोजितवान्। ततश्च तत्र जलमात्रमवशिष्टं भवतीत्यर्थः। ननु पयांसि केन नापहतानि, अत आह—दिग्वारणमदाविलमिति। दिग्वारणानां दिग्गजानां मदेन मदजलेन आविलं कलुषं कलुषीकृतमिति भावः। अत्र पर्यायोक्तं स्फुटम्।।४३।।

भुवनालोकनप्रीतिः स्वर्गिभिर्नानुभूयते।
खिलीकृते विमानानां तदाघातभयात् पथि।।४४।।

प्रकाशिका

भुवनेति। भुवनमर्थात् स्वर्गादन्यत्। खिलीकृते सञ्चारवर्जिते विमानानां पथीत्यन्वयः आघातोऽवस्कन्दः।।४४।।

विवरणम्

उपरोधमाह—

भुवनेति। विमानानां पथि तदाघातभयात् खिलीकृते स्वर्गिभिः भुवनालोकनप्रीतिः न अनुभूयते। विमानानां व्योमयानानाम्। 'व्योमयानं विमानोऽस्त्री'त्यमरः। पथि मार्गे तदाघातभयात् तस्य तारकासुरस्याघातस्तदाघातः तस्मात्, तारकासुरकर्तृकादाघातादित्यर्थः। आघातोऽवस्कन्दः अभिभव इति यावत्। आघाताद् यद् भयं तस्माद्धेतोः खिलीकृते सञ्चारवर्जिते। 'खिलमप्रहतस्थानमि'ति **भोजः**। निमित्तसप्तमी चेयम्। स्वर्गिभिर्देवैः भुवनालोकनप्रीतिः भुवनानां स्वर्गादन्येषां लोकानां स्वर्गेऽपि स्वावस्थितप्रदेशव्यतिरिक्तप्रदेशानामिति चार्थादायाति।

आलोकनं दर्शनं तेन या प्रीतिः सा नानुभूयते न प्राप्यते तारकासुराभिभवभयात्। कुत्रापि गुहायामेवास्माकमिदानीमवस्थानमित्यर्थः।।४४।।

यज्वभिः सम्भृतं हव्यं विततेष्वध्वरेषु सः।
जातवेदोमुखान्मायी मिषतामाच्छिनत्ति नः।।४५।।

प्रकाशिका

यज्वभिरिति। सम्भृतमर्पितम्। हव्यं हविः। विततेषु प्रवृत्तेषु। उपक्रमे तु शाठ्यान्न विघ्नमाचरतीति भावः। मायी माययेत्यर्थः।।४५।।

विवरणम्

भोजनस्याप्यपहरणमाह—

यज्वभिरिति। सः अध्वरेषु विततेषु यज्वभिः सम्भृतं हव्यं मिषतां नः जातवेदोमुखाद् आच्छिनत्ति। सः तारकासुरः अध्वरेषु यागेषु विततेषु प्रवृत्तेषु सत्सु यज्वभिः विधिना कृतयज्ञैर्यजमानैः। 'सुयजोर्ङ्वनिप्' (३.२.१०३)इति यजेर्ङ्वनिप्। 'यज्वा तु विधिनेष्टवानि'त्यमरः। अनेन हव्यस्यादरणीयत्वं ध्वनितम्। सम्भृतमर्पितम्। मिषतामित्यनादरे षष्ठी। 'मिष स्पर्धायामि'ति धातुः। 'स्पर्धायां मिषतीति स्यादि'ति देवः। स्पर्धमानानस्माननादृत्येत्यर्थः। उन्मिषतोऽस्माननादृत्येति वा। जातवेदोमुखाद् जातवेदा अग्निः। जातवेदा एव मुखं जातवेदोमुखम्। अग्निरेव हि देवानां मुखम्। तस्माद् आच्छिनत्ति अपहरति। क्रतोरुपक्रमे शाठ्यान्न विघ्नमाचरति। प्रवृत्ते तु यागे वदनादेव हविराहरति चेति भावः। ननु कथं मिषतामेव भवतां हविराहरणोपपत्तिरत आह—मायीति। मायास्यास्तीति मायी। व्रीह्यादित्वादिनिः। मायावी मायामाश्रित्याहरतीत्यर्थः।।४५।।

उच्चैरुच्चैःश्रवास्तेन हयरत्नमहारि च।
देहबन्धमिवेन्द्रस्य चिरकालार्जितं यशः।।४६।।

प्रकाशिका

उच्चैरिति। उच्चैस्त्वं हयानां प्रधानगुणः। महत् सुसंहतमिति शरीरलक्षणे वचनात्। उपलक्षणं चैतदन्येषां गुणानाम्। देहं बध्नातीति देहबन्धं, मूर्तिमदित्यर्थः। चिरकालार्जितमिति उच्चैस्त्वहेतुः लोभनीयत्वादेश्च द्योतकम्। अत्र प्रकरणे 'तेनामरवधू'(४०) इत्यादिना विध्वंसनम्, 'उत्पाट्यहेम'(४२) इत्यादिना 'मन्दाकिन्या'(४३) इत्यादिना चापवाहनं, 'भुवनाला.'(४४) इत्यादिनोपरोधः, अन्यैस्तु विलोप इति विग्रहप्रकारा उक्ताः।।४६।।

विवरणम्

किं बहुना महेन्द्रस्याश्वरत्नमपि तेनापहृतमित्याह—

उच्चैरिति। तेन उच्चैःश्रवाः हयरत्नं च अहारि। तेन तारकेण उच्चैःश्रवा इति इन्द्राश्वस्य नाम। 'हय उच्चैःश्रवा' इत्यमरः। हयरत्नं हयश्रेष्ठः चकारोऽपिशब्दार्थे। किमन्येषामपहरणेन विद्यते, जयसाधनभूतमश्वरत्नमप्यपहृतमित्यर्थः। अहारि अपहृतम्। उच्चैःश्रवसः स्वजातिश्रेष्ठत्वे हेतुमाह—उच्चैरिति। उच्चैरित्यव्ययम्। उन्नतमित्यर्थः। 'महत्युच्चैरि'त्यमरः। अनेनाश्वविशेषणेनान्येभ्यः प्रधानगुणसद्भाव उक्तः। उन्नतत्वमश्वानां प्रधानगुणः, शरीरलक्षणे 'महत् सुसंहतमि'त्युक्तत्वात्। उपलक्षणं चैतदन्येषामपि गुणानाम्। अश्वरत्नमुत्प्रेक्षते—इन्द्रस्य चिरकालार्जितं यशः देहबन्धमिवेति। इन्द्रस्य महेन्द्रस्य चिरकालार्जितं बहुकालसञ्चितम्। एतदुन्नतत्वे हेतुः, लोभनीयत्वादिकं च ध्वनति। चिरकालसञ्चितं हि वस्तु लोभनीयं भवति। तदपहरणं च खेदमातनोति। यशः कीर्तिः देहं बध्नातीति देहबन्धम्। कर्मण्यण्। मूर्तिमदित्यर्थः। उभयोरपि धावल्यमतिमहत्त्वं चोत्प्रेक्षाहेतुः। अश्वापहारे तस्य यशसोऽप्यपहृतत्वप्रतीतिः फलम्॥४६॥

तस्मिन्नुपायाः सर्वे नः क्रूरे प्रतिहतक्रियाः।
वीर्यवन्त्यौषधानीव विकारे सान्निपातिके॥४७॥

प्रकाशिका

तर्हि किमन्यैरुपायैर्नोपक्रान्तमित्याह—

तस्मिन्निति। सर्वे, न केवलमुक्ता संश्रयवृत्तिः। क्रूरे कठिने अभेद्यचित्त इत्यर्थः। प्रतिहता क्रिया कार्यजननं येषाम्। विकारे ज्वरे। सान्निपातिके दोषत्रयसन्निपातभवे॥४७॥

विवरणम्

ननु समाश्रयप्रवृत्तिव्यतिरेकेणान्येऽप्युपायाः सन्ति नाम। ते किं न तस्मिन् प्रयुक्ता इत्याशङ्क्य प्रयुक्तानामपि तेषां वैफल्यमाह—

तस्मिन्निति। नः सर्वे उपायाः तस्मिन् प्रतिहतक्रियाः। नः अस्माकम्। सर्वे, न केवलं संश्रयवृत्तिपर्यन्तः सन्ध्यादिप्रयोगः, अपि तु सामादिप्रयोगोऽपीति भावः। उपायाः सामादयः तस्मिन् तारके। प्रतिहता कृतप्रतिहनना क्रिया कार्यजननं येषां ते तथा। आसीन्निति शेषः। अत्रोपमामाह—सान्निपातिके विकारे वीर्यवन्ति औषधानीवेति। सान्निपातिके, वातपित्तश्लेष्मसमाहारः, सन्निपातः, सन्निपातादुद्भूतः सान्निपातिकः, तादृशे विकारे ज्वरादौ वीर्यवन्ति प्रशस्तवीर्यायुक्तानि। प्रशंसायां

मतुप्। औषधानि मुस्तापर्पटकादीनीव। दोषत्रयसम्भवे ज्वरादौ महावीर्यण्यौषधानीवास्माकमुपायाः सर्वेऽपि तारके प्रतिहतशक्तयो जाता इत्यर्थः। सन्निपातज्वरादावौषधानां निष्फलत्वमुक्तं वैद्यशास्त्रे—

वातपित्तकफानां च सन्निपातो यदा भवेत्।
तदा जातो ज्वरस्तीव्रो ह्यसाध्यः सर्वभेषजैः।। इति।

उपमानोपमेययोः साधारणं धर्ममाह—क्रूर इति। असुरविजयित्वादभेद्यचित्ते दोषत्रयसम्भूतत्वादसाध्ये चेत्यर्थः।।४७।।

जयाशा यत्र चास्माकं प्रतिघातोद्गतार्चिषा।
हरिचक्रेण तेनास्य कण्ठे निष्कमिवार्पितम्।।४८।।

प्रकाशिका

सर्वोपायेभ्यो बलवत्तमो दण्डः कथं न फलेदित्याह—

जयाशेति। यत्र जयाशास्माकमिति दण्डोपाये मूर्धाभिषिक्तत्वं द्योतयति। निष्क उरकण्ठभूषणम्। 'साष्टे शते सुवर्णानां हेम्न्युरोभूषणे पले। दीनारेऽपि च निष्कोऽस्त्री'ति सिंहः। कण्ठकाठिन्यात् प्रतिहतप्रज्वलितेन कण्ठगतेन हरिचक्रेण हेतुनास्य कण्ठे निष्कोऽर्पित इवेत्युत्प्रेक्ष्यते।।४८।।

विवरणम्

ननु सर्वोपायेभ्यो बलवत्तरो दण्डः किं न तस्मिन् फलित इत्यत्राह—

जयाशेति। यत्र अस्माकं जयाशा तेन हरिचक्रेण च अस्य कण्ठे निष्कमर्पितमिव। यत्र यस्मिन् हरिचक्रे अस्माकं जयाशा जेष्यामो वयमनेनेत्याशा, पूर्वमासीदिति शेषः। अनेन विष्णुचक्रस्य दण्डोपायेषु मूर्धाभिषिक्तत्वं द्योत्यते। तस्याप्यत्र निष्फलत्वमाह—तेनेत्यादिना। तेनास्मदाशानिष्ठितेन हरिचक्रेण विष्णोश्चक्रेण सुदर्शनेन हेतुभूतेन। अपिशब्दार्थे चकारः। स चास्य तादृशावस्थाप्राप्त्यनुपपत्तिं द्योतयति। अस्य तारकासुरस्य कण्ठे गले निष्कमुरोभूषणम्। 'साष्टे शते सुवर्णानां हेम्न्युरोभूषणे पले, दीनारेऽपि च निष्कोऽस्त्री'त्यमरः। अर्पितं न्यस्तमिव। उत्प्रेक्षायां हेतुमाह—प्रतिघातोद्गतार्चिषेति। प्रतिघातः प्रतिहननम्। भावे घञ्। तेनोद्गतमुत्थितम् अर्चिः ज्वाला यस्य तेन। शिलातलकर्कशे तत्कण्ठे विष्णुचक्रे पातिते सति कण्ठदेशकाठिन्यादुद्गतया वक्षःप्रदेशपर्यन्तं लम्बमानयानलज्वालयास्य कण्ठदेशे महत्तरमुरोभूषणमर्पितमिवेत्यर्थः। उत्प्रेक्षया हरिचक्रस्यापि तस्मिन् कुण्ठशक्तित्वं सूचितम्।।४८।।

तदीयास्तोयदेष्वद्य पुष्कलावर्तकादिषु।
अभ्यस्यन्ति तटाघातं निर्जितैरावता गजाः॥४९॥

प्रकाशिका

अथ तदवष्टम्भेन तदीयानां दुर्विलसितं दिङ्मात्रेण दर्शयति—

तदीया इति। प्रलयकाल एव वर्षित्वात् तोयपूर्णत्वम्। पुष्कलावर्तकादिषु प्रलयकार्यार्थं सम्भृतेषु देवराजवल्लभेषु कूटस्थमेघेषु। यदाह—'जातं वंशे भुवनविदिते पुष्कलावर्तकानाम्'(मे.६) इति। आदिशब्देन राजावर्तकादयो राजावर्तकादयो गृह्यन्ते। तावातमभ्यस्यन्तीति, लोभनीयेष्वपि परधनेषु दृप्तानां सुलभा निर्दयतेति भावः। निर्जितैरावता इति दर्पकण्डूविनोदस्यान्यत्र दुर्लभत्वं द्योतितम्॥४९॥

विवरणम्

इत्थं निष्फले सति हरिचक्रे हेवेषु च पराङ्मुखेषु विजितलोकत्वेन निवृत्तयुद्धसन्नाहानां तारकासुरपरिजनानां दुर्विलसितं दिङ्मात्रेण दर्शयति—

तदीया इति। तदीयाः गजाः अद्य पुष्कलावर्तकादिषु तोयदेषु तटाघातम् अभ्यस्यन्ति। तदीयास्तारकासुरसम्बन्धिनः। अनेन गजानां तदीयत्वाभिमानित्वाद् गर्वोद्रिक्तत्वं सूचितम्। तारकासुरसम्बन्धित्वादस्माकं के वा प्रतियोद्धार इति हि तेषामभिमानः। अद्य इदानीं, युद्धप्रसङ्गवार्तयापि विरहितेऽस्मिन् काल इत्यर्थः। पुष्कलावर्तकादिषु पुष्कलावर्तकः प्रलयकालवर्षशीलो महामेघः, स आदिर्येषामिति तद्गुणसंविज्ञानो बहुव्रीहिः। आदिशब्देन राजावर्तकादीनामुपादानम्। तोयदेषु मेघेषु। ते हि तोयदाः प्रलयकार्यसिद्ध्यर्थं देवराजेन सम्भृता नित्यास्तस्य प्रियतराश्च। यथोक्तं मेघसन्देशे—'जातं वंशे भुवनविदिते पुष्कलावर्तकानां जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः' इति। तटाघातं वप्रक्रीडां, मत्तानां गजानां गिरिवप्रादिषु कण्डूविनोदनार्थं यो दन्तप्रहारः तमित्यर्थः। अभ्यस्यन्ति पुनः पुनः कुर्वन्ति। ते हि तोयदाः प्रलयकाल एव वर्षन्तीति तेषां नित्यं तोयपूर्णत्वेन काठिन्यात् तेषु तटाघातोपपत्तिः। तद्गजानां दृप्तत्वे हेतुमाह—निर्जितैरावणा इति। निर्जितः नितरं जितः ऐरावणः ऐरावतो यैस्ते तथा। 'ऐरावतोऽभ्रमातङ्गैरावणाभ्रमुवल्लभा' इत्यमरः।. अनेन विशेषणेन दर्पकण्डूविनोदनस्यान्यत्र दुर्लभत्वं द्योत्यते॥४९॥

तदिच्छामो विभो! स्त्रष्टुं सेनान्यं तस्य शान्यते।
कर्मबन्धच्छिदं धर्मं भवस्येव मुमुक्षवः॥५०॥

प्रकाशिका

अथात्र प्रतीकाररूपं स्वाभिलषितं प्रस्तौति—

तदिति। तत् तस्माद्, यस्मादेवमापदन्यश्चोपायो न विद्यते। शान्तये नाशाय। कर्मबन्धच्छिदं निवृत्तिलक्षणम्। भवस्य संसारस्य। उपमानेनैकान्तसिद्धिमाशंसते।।५०।।

विवरणम्

इत्थं देवानां तारकासुरकृतां महतीं पीडां प्रतिपाद्य तत्र प्रतीकाररूपं स्वाभिलषितमर्थयते—

तदिति। हे विभो! तद् वयं तस्य शान्तये सेनान्यं स्रष्टुम् इच्छामः। विभो! प्रभो! भवतः किं दुष्करमिति भावः। तद् यस्माद् वयमेवमापन्नाः आपन्निवृत्त्यर्थमुपायान्तरं च न विद्यते, तस्माद्धेतोः तस्य तारकस्य शान्तये नाशाय 'क्षमायां निर्विकारत्वे तथानिष्टनिवर्तने, परिक्षये च शान्तिः स्यादि'ति भोजः। सेनान्यं देवसेनानायकम्। सेनां रक्षां नयतीति सेनानीः तं स्रष्टुं निर्मातुम् इच्छामः अभिलषामः। अत्रोपमामाह—मुमुक्षवः भवस्य कर्मबन्धच्छिदं धर्ममिवेति। मुमुक्षवो मोक्षेच्छवः भवस्य संसारस्य, जननस्येत्यर्थः। 'भवः संसाररुद्रयोरि'ति भोजः। शान्तय इति अत्रापि योज्यम्। कर्मबन्धच्छिदं कर्मणां बन्धः कर्मबन्धः, कर्मबन्धं छिनत्तीति कर्मबन्धच्छित् तं, निवृत्तिलक्षणं धर्ममित्यर्थः। यथा मुमुक्षवो भवस्य शान्तये निवृत्तिलक्षणं धर्ममिच्छन्ति, तथा वयं तस्य शान्तये सेनान्यमित्यर्थः। अनेनोपमानेन देवानां तारकासुरभयनिवृत्तिमात्रं न केवलमाकाङ्क्षितम्, अपि तु सर्वभयनिवृत्तिरेवेति ध्वन्यते। एतादृशार्थप्रार्थनसमर्थत्वादेवादौ 'स द्विनेत्रो हरेश्चक्षुर्दशचक्षुश्शताधिकम्'(२.२९)इत्युक्तम्।।५०।।

गोप्तारं सुरसैन्यानां यं पुरस्कृत्य गोत्रभित्।
प्रत्यानेष्यति शत्रुभ्यो वन्दीमिव सुरश्रियम्।।५१।।

प्रकाशिका

सेनान्यां लब्धेऽपि कथमेकान्तसिद्धिः, कस्तस्य परिकरः, कीदृशो वा स भवेदित्याह—

गोप्तारमिति। यं यादृशशक्तियुक्तम्। पुरस्कृत्येति देवैः पिङ्गितत्वमुक्तं, गोत्रभिदिति दुर्वारशक्तित्वं, प्रत्यानेष्यतीत्येकान्तसिद्धिः। कथमीदृशोऽसौ तादृशेन सेनान्या न कार्यं साधयेदिति भावः।।५१।।

विवरणम्

ननु सृष्टेऽपि सेनान्यां कथमात्यन्तिकभयनिवृत्तिः, कश्च तस्य परिकरः, कीदृशो वा स भवेदित्यत्राह—

गोप्तारमिति। गोत्रभिद् यं पुरस्कृत्य शत्रुभ्यः वन्दीमिव सुरश्रियं प्रत्यानेष्यति। गोत्रभित् पर्वतपक्षच्छेदी देवेन्द्रः। अनेन देवेन्द्रस्यैव सहजदुर्वारशक्तिमत्त्वं द्योत्यते। सेनानीलाभे स एव जेतुं समर्थ इत्यर्थ। यं सेनान्यं पुरस्कृत्य अग्रतः कृत्वा। अनेन सेनान्यः सुरपरिकरत्वमुक्तम्। शत्रुभ्यः शत्रुजनसकाशाद्, न केवलं तारकासुरादिति बहुवचनस्यार्थः। अनेनात्यन्तिकभयविनाश उक्तः। वन्दीं हठहृतमहिलामिव सुरश्रियं देवलक्ष्मीं प्रत्यानेष्यति प्रत्यानेतुं समर्थो भवेदिति भावः। यादृशेन सेनान्या तादृशशक्तियुक्तो महेन्द्रः स्वयमेव हठहृतमहिलामिव शत्रुवशवर्तिनीं देवलक्ष्मीं प्रत्यानेष्यति, तादृशस्त्वया सृज्यतामित्यर्थः। सृष्टे तु सेनान्यां गोत्रभित् स्वयमेव साधयिष्यति चेति भावः। अत्र प्रबलशत्रुवशवर्तनं तज्जयानन्तरमात्मवशवर्तनं च सुरश्रीवन्द्योः साधारणो धर्मः। अथवा बन्दीमिति जातावेकवचनम्। वन्दीमिव सुरश्रियमित्यस्य वन्दीः सुरश्रियं चेत्यर्थः। यथा रघुवंशे—'वन्यैः पुलिन्दैरिव वानरैस्ताः क्लिश्यन्त उद्यानलता मदीयाः' (१६.१९) इति। सेनानीशब्दस्यार्थमाह—सुरसैन्यानां गोप्तारमिति। सुराणां देवानां सैन्यानि सुरसैन्यानि तेषां गोप्तारं रक्षितारम्॥५१॥

वचस्यवसिते तस्य ससर्ज गिरमात्मभूः।
गर्जितानन्तरां वृष्टिं सौभाग्येन जिगाय सा॥५२॥

प्रकाशिका

ब्रह्मणः प्रतिवचनमाह—

वचसीति। अवसिते निराकाङ्क्ष इत्यर्थ। अनेन वाचोऽवसर उक्तः। उपमानेन विश्वोपकारकत्वं द्योत्यते। तत्राप्यनन्तरशब्दोऽवसरद्योतकः॥५२॥

विवरणम्

अथ ब्रह्मणः प्रतिवचनप्रस्तावं वर्णयति—

वचसीति। तस्य वचसि अवसिते आत्मभूः गिरं ससर्ज। तस्य गुरोः वचसि अवसिते, आकाङ्क्षान्तरविरहिते सतीत्यर्थः। अनेन ब्रह्मणो वचनावसर उक्तः। आत्मभूः ब्रह्मा गिरं वाचं ससर्ज उवाचेत्यर्थः। ब्रह्मणो वचनस्य लोकोपकारकत्वं वृष्ट्युपमानेन दर्शयति—सा सौभाग्येन गर्जितानन्तरां वृष्टिं जिगायेति। सा गीः सौभाग्येन सुभगत्वेन गर्जितानन्तरां गर्जितं मेघनिर्घोषः। 'स्तनितं गर्जितं मेघनिर्घोष'

इत्यमरः। तस्मादनन्तराम् अव्यवधानाम्, अम्भोधरनिनदानन्तरसम्भवामित्यर्थः। गर्जितानन्तरशब्देन वृष्टेरवसर उक्तः। वृष्टिं वर्षम्। जिगाय जितवती। अत्र तारकासुरवृत्तान्तप्रतिपादकस्य गुरुवचनस्य गर्जितोपमानेन गाम्भीर्यं भयहेतुत्वं च व्यज्यते, ब्रह्मवचनस्य वृष्ट्युपमानेन लोकोपकारकत्वम्। परमेष्ठिनः प्रतिवचनं वर्षमिव सर्वानप्यानन्दयामासेत्यर्थः॥५२॥

सम्पत्स्यते वः कामोऽयं कालः कश्चित् प्रतीक्ष्यताम्।
न त्वस्य सिद्धौ यास्यामि सर्गव्यापारमात्मनः॥५३॥

प्रकाशिका

सम्पत्स्यत इति। कामोऽनर्थपरिहारः। अयमिति सेनानीलाभद्वारकः। ननु 'हिमवति दिव्यौषधयः कोपाविष्टः फणी शिरसी'तिवत् सुदूरस्थे प्रतिकारे प्रत्युपस्थिते चानर्थेनास्माकं प्रतिपत्तिरित्याह—काल इति। कालो हि सकलसाधनमिति भावः। कश्चिदिति कार्यक्षमः। प्रतीक्ष्यतां, तावत्कालं सहिष्णुतैव प्रतिपत्तिरित्यर्थः। सम्पादयिष्यामीति किं नोक्तमित्याह—न त्विति। अस्य कामस्य। सिद्धौ सिद्धिमुद्दिश्य। आत्मन इति कर्मणि षष्ठी। अंशेनात्मानं न स्रक्ष्यामीत्यर्थः॥५३॥

विवरणम्

तामेव गिरं प्रपञ्चयति—

सम्पत्स्यत इति। युष्माकम् अयं कामः सम्पत्स्यते। अयं सेनानीलाभद्वारकः कामः अनर्थपरिहारः सम्पत्स्यते भविष्यति। ननु प्रत्युपस्थिते महत्युपद्रवे कथं सम्पत्स्यत इति भविष्यत्कालनिर्देशः। कोपाविष्टे महति फणिनि शिरसि वर्तमाने हिमवच्छिखरे कुत्रापि दिव्यौषधयो भविष्यन्तीति विषवैद्यवचनमिव भवतो वचनमिदमस्माकं प्रतिभातीत्यत्राह—कश्चित् कालः प्रतीक्ष्यतामिति। कश्चिद् योऽस्माकमनुकूलत्वात् कार्यसाधनक्षमः, स इत्यर्थः। कालः उपरिष्टात्। प्राप्तिपरिहारयोः कालो हि साक्षात् साधनमिति भावः। तदुक्तं श्रीभागवते—'तदा वयं विजेष्यामो यदा काल प्रदक्षिणः' (१०.५४.१६) इति। प्रतीक्ष्यतां प्रतिपाल्यताम्, जयानुकूलकालप्राप्तिपर्यन्तमुपद्रवसहिष्णुतैव कर्तव्येति भावः। ननु भवतां काममहमेव सम्पादयिष्यामीति वचनमपहाय किमत्रभवता 'सम्पत्स्यत' इति पृथग्जनवत् कथितमित्यत्राह—अहमस्य सिद्धौ आत्मनः सर्गव्यापारं न तु यास्यामीति। अस्य भवद्भिरिदानीं प्रार्थितस्य कामस्य सिद्धौ प्राप्तिमुद्दिश्य। आत्मन इति कर्मणि षष्ठी। आत्मांशेनैवात्मानं न स्रक्ष्यामीत्यर्थः। सर्गव्यापारं सृष्टिकर्म।

तुशब्दोऽवधारणे। नैव यास्यामीत्यर्थः। भवतामस्याभिलषितस्य सिद्धिमहमेवांशेन न करिष्यामीति भावः।।५३।।

इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम्।
विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्।।५४।।

प्रकाशिका

अत्र हेतुमाह—

इत इति। अभिनयविशेषादिदंशब्दोऽस्मदर्थं बोधयति। अत्र प्रतिवस्तु विषेति। दक्षिणावर्तस्तु 'संवर्ध्यः' इति पदच्छेदमाह। तत्तु न चतुरश्रं, निर्हेतुकत्वदोषात्। क्षयस्यैव निषेध्यत्वेन प्रस्तुतत्वाच्च। 'विषवृक्षम्' इति तु भवितव्यमित्याशङ्क्याह वामनः 'निपातेनाप्यभिहिते कर्मणि न कर्मविभक्तिः, परिगणनस्य प्रायिकत्वात्' (काव्यालङ्का. ५.२.२२) इति। 'तिङ्कृत्तद्धितसमासैरि'ति सूत्रे परिगणनं, तस्य प्रायिकत्वात्। तिङादिना हि बाहुल्येन कर्मणोऽभिधानमिति परिगणनं, न तु नियमार्थम्। तस्मादनभिधानमेव विभक्तेः प्रयोजकमिति निपातेनापि यत् कर्माभिहितं तत्र न द्वितीया। असाम्प्रतमिति तद्धितान्तो निपात्यतेऽयुक्तमित्यस्यार्थे। तस्य चार्थः कर्म। तच्च निपातेनाभिहितमिति न द्वितीया।।५४।।

विवरणम्

ननु किमत्र कारणमित्यत्राह—

इत इति। इतः प्राप्तश्रीः स दैत्यः इत एव क्षयं नार्हति। अभिनयविशेषादितश्शब्दोऽयमस्मच्छब्दार्थः। बहुविधैस्तपोभिस्तुष्टान्मत्त इत्यर्थः। प्राप्तश्रीः प्राप्ता श्रीः ऐश्वर्यं येन स तथा। स दैत्यस्तारकासुरः। इतः मत्सकाशादेव। क्षयं नाशं। नार्हति। मया दत्तवरस्य दैत्यस्य मयैव हन्तुमयोग्यत्वादित्यर्थः। अत्र प्रतिवस्तूपमामाह—विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतमिति। विषवृक्षो नाम प्राणिनां मरणप्रदो वृक्षविशेषः। तदुक्तं—

यस्य स्पर्शनमात्रेण वायुसंस्पर्शनेन वा।
म्रियन्ते जन्तवः सर्वे विषवृक्षः स कीर्तितः।। इति।

अपिशब्दः पूर्वोक्तस्य न्यायस्य सार्वत्रिकत्वं प्रतिपादयति। संवर्ध्य वर्धयित्वा स्वयमेव च्छेत्तुमसाम्प्रतम् अयुक्तम्। असाम्प्रतमित्यव्ययमयुक्तमित्येतस्मिन्नर्थे। 'युक्ते द्वे साम्प्रतमि'त्यमरः। तेन, यदि केनचित् पुरुषेण विषवृक्षोऽपि येन केनापि कारणेन वर्धितो भवेत् तर्हि तस्यैव तद्भङ्गो न युक्त इत्यर्थः। ननु विषवृक्षोऽपीत्यत्र

विषवृक्षमपीति द्वितीयाप्रयोगो युक्तः, तिङ्कृत्तद्धितसमासैरनभिहिते हि कर्मकारके द्वितीया विहिता। अत्र तु निपाताभिहितो विषवृक्षः। असाम्प्रतमित्यस्य निपातत्वात्। तेनैव हि विषवृक्षः कर्मत्वेनाभिहितः, न तिङ्कृत्तद्धितसमासैः। 'तस्माद् विषवृक्षमित्येव भवितव्यम्। न। तिङ्कृत्तद्धितसमासैरिति परिगणनं न नियमार्थम्। तिङादिभिरेव प्रायशः कर्माभिधीयत इत्येव तेषामुपादानं, न नियमार्थम्। तस्मादनभिधानमेव कर्मविभक्तेः प्रयोजकम्। अत्र तु निपातेनापि विषवृक्षोऽभिहित एव। तस्मान्नात्र द्वितीया। तदुक्तं वामनेन—'निपातेनाप्यभिहिते कर्मणि न कर्मविभक्तिः, परिगणनस्य प्रायिकत्वाद्'[काव्याल. ५.२.२२] इति॥५४॥

वृतं तेनेदमेव प्राङ् मया चास्मै प्रतिश्रुतम्।
वरेणाशमितं लोकानल दग्धुं हि तत्तपः॥५५॥

प्रकाशिका

न केवलमयुक्तं, समयभङ्गश्च स्यादित्याह—

वृतमिति। इदमिति 'नाहं त्वया निग्राह्य' इति। किमेवमभ्युपगतमित्याह—वरेणेति। तदपि लोकार्थं कृतमित्यर्थः॥५५॥

विवरणम्

न केवलमयुक्तमित्येव दोषः, समयभङ्गोऽपि भवेदित्याह—

वृतमिति। तेन प्राग् इदमेव वृतम्। तेन तारकेण। इदमेव मदवध्यत्वमेवेत्यर्थः। वृतं प्रार्थितम्। स तारकासुरो वरप्रदानसमये तपसा तुष्टं मां प्रति मदवध्यत्वमेवाभ्यर्थितवानित्यर्थः। अभ्यर्थनानन्तरं देवेन तु किं कृतमित्यत्राह—मया अस्मै प्रतिश्रुतं चेति। मया तपसा तुष्टेनेति शेषः। अस्मै तारकाय। 'प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता' (१.४.४०) इति सम्प्रदानत्वाच्चतुर्थी। तथास्त्विति मया तं प्रत्यनुज्ञातं चेत्यर्थः। नन्वस्मदनुग्रहार्थी भवान् कथं तस्मै तादृशं वरं दत्तवानित्यत्राह—तत्तपः वरेणाशमितं लोकान् दग्धुमलं हि इति। तस्य तारकासुरस्य तपः वरेण तदुक्तवरप्रदानेन अशमितं शान्तिमप्रापितं सत् लोकान् त्रीनपि लोकान् दग्धुं भस्मसात्कर्तुम् अलं पर्याप्तं हि। 'अलं भूषणपर्याप्तिशक्तिवारणवाचकमि'ति सिंहः। यदि तदा तदभ्यर्थितं वरं नादास्यं, तर्हि तस्य मूर्धानं निर्भिद्य निर्गतस्तपोमयो वह्निः सर्वानपि लोकान् भस्मसादकरिष्यत्। यथोक्तं श्रीभागवते हिरण्यकशिपोस्तपःप्रसङ्गे—

> तस्य मूर्ध्नः समुद्भूतः सधूमोऽग्निस्तपोमयः।
> तिर्यगूर्ध्वमधोलोकानतपद् विष्वगीरितः॥ इति।

(स्कन्धः ७.३.४)

उपद्रवसहनमेव हि भस्मीभावाद् वरीयः। 'त्यजेदेकं कुलस्यार्थे' इत्यादिन्यायात्। अतो लोकानुग्रहार्थमेव मया तदुक्ता वराः सर्वे तस्मै दत्ता इति भावः॥५५॥

संयुगे सम्मुखीनं तमुद्गदं प्रसहेत कः।
अंशादृते निषिक्तात् तु नीललोहितरेतसः॥५६॥

प्रकाशिका

कालप्रतीक्षणे कथं भाविनी कार्यसिद्धिरित्याशङ्क्य तस्या दिङ्मात्रं दर्शयितुमुपक्रमते—

संयुग इति। सम्मुखीनं 'यथामुखसम्मुखस्य दर्शनः खः' (५.२.६) इति खः। किं नास्त्येवेत्याह—अंशादिति। 'निषिक्तात् त्वि'ति पाठः। नीललोहितशब्देन कुमारजन्मसमर्थं गौरीशबलत्वं ध्वनितम्। निषेकसामर्थ्यादंशशब्देन पुत्रोऽभिधीयते॥५६॥

विवरणम्

ननु 'कश्चित् कालः प्रतीक्ष्यताम्' (२.५३) इति हि भवतोक्तं, प्रतीक्षिते तु काले कथमापत्प्रतीकारो भविष्यतीत्याशङ्क्यापत्प्रतीकारप्रकारमेव दिङ्मात्रेण दर्शयितुमारभते—

संयुग इति। निषिक्तान्नीललोहितरेतसः अंशाद् ऋते कः तु संयुगे सम्मुखीनम् उद्गदं तं प्रसहेत। निषिक्तात् स्त्रीयोनौ कृतनिषेकाद् नीललोहितरेतसः। नीललोहितो हरः। 'धूर्जटिर्नीललोहितः' इत्यमरः। अत्र नीललोहितशब्देन गौरीसंमिश्रतत्वेन शबलशरीरो हरोऽभिधीयते। तेन च कुमारोत्पत्तेरानुगुण्यं ध्वनितम्। तस्य रेतो वीर्यम्। 'शुक्लं तेजोरेतसी चे'त्यमरः। तस्यांशात्, रेतसः स्त्रीयोनौ निषिक्तोंऽशः पुत्र एवेति निषेकसामर्थ्यादंशशब्देनात्र पुत्रोऽभिधीयते। तस्मादृते हरपुत्रादन्यः क इत्यर्थः। तुशब्देनास्यान्येभ्यो व्यतिरेक उक्तः। संयुगे युद्धे। सम्मुखीनं 'यथामुखसम्मुखस्य दर्शनः खः' अभिमुखगतमित्यर्थः। उद्गदम् उत्क्षिप्तगदं तं तारकं प्रसहेत सोढुं शक्नुयाद्, न कोऽपीत्यर्थः। हरपुत्र एव कालप्रतीक्षणे सति तारकासुरस्य हन्ता भविष्यति, नान्यः कोऽपीति भावः॥५६॥

स हि देवः परं ज्योतिस्तमःपारे प्रतिष्ठितम्।
परिच्छिन्नप्रभावर्द्धिर्न मया न च विष्णुना॥५७॥

प्रकाशिका

तत्रापि का सम्भावनेत्याह—

स इति। देवो द्योतनस्वभावः। तच्च क्रीडाव्यवहारद्युतिस्तुतिकान्तिगतयः। अत एवाह—परं ज्योतिरिति। देशकालाद्यवच्छिन्नप्रकाशं न भवति, तत्प्रकाशकं च। तमोऽविद्या, तस्याः पारे परस्तात्। प्रतिष्ठितं निर्विकारत्वात् कूटस्थ इत्यर्थः। उत्तरार्धेन तु उक्तोपपादनाय 'नोर्ध्वं गम्यः सरसिजभुवो नाप्यधः शार्ङ्गपाणेरि'त्यादिनोक्तमितिहासार्थमनुस्मारयति।।५७।।

विवरणम्

ननु विष्णुनाप्यवध्यं तारकासुरं हरपुत्रः कथं हनिष्यतीत्याशङ्कायां हरस्य तस्माद् व्यतिरेकमाह—

स हीति। स देवः हि। सः हरः देवः द्योतनस्वभावः, क्रीडाव्यवहारद्युतिस्तुतिकान्तिगतिमानित्यर्थः। स्वयंप्रकाश इति वा। हिशब्दः पुराणादिप्रसिद्धिं प्रतिपादयति। द्योतनस्वभावत्वमेवोपपादयति—परं ज्योतिः। परं देशकालाद्यनवच्छिन्नम्। तेजोन्तराणि हि देशकालाद्यवच्छिन्नानि देशकालाद्यवच्छिन्नस्यैव प्रकाशकानि च। अयं तु न तथेति भावः। ज्योतिस्तेजः। देशकालाद्यनवच्छिन्नत्वे हेतुमाह—तमःपारे प्रतिष्ठित इति। तमस अविद्यायाः पारे परस्तात् प्रतिष्ठितः स्थितः। विनाशादिधर्मवतामविद्यातत्कार्याणां परस्तान्निर्विकारत्वात् कूटस्थनित्यत्वेनावस्थित इत्यर्थः। उक्तार्थोपपादनार्थमितिहासप्रसिद्धां कथामनुस्मारयति—परिच्छिन्नेत्यादिना। स इति अत्राप्यनुषज्यते। सः मया परिच्छिन्नप्रभावर्द्धिर्न, प्रपञ्चप्रवर्तकेन मयापीत्यर्थः। परिच्छिन्नप्रभावर्द्धिः परिच्छिन्ना इयत्तया कृतपरिच्छेदा प्रभावस्य महिम्नः ऋद्धिः समृद्धिरतिशयो यस्य स तथा। भगवानपि नारायणस्तत्परिच्छेदे मत्तोऽप्यतिरिक्तो न भवतीत्याह—विष्णुना च नेति। परिच्छिन्नप्रभावर्द्धिरिति अत्रापि योज्यम्। हरतेजसामन्तमवगन्तुं हंसमारुह्य प्रजापतिरूर्ध्वं गतः। विष्णुस्तु भूदाररूपमादायाधोभागं गतः। बहुदिव्यसंवत्सरं गत्वराभ्यामुभाभ्यामपि न तदन्तोऽवगत इति पुराणप्रसिद्धा कथानेन वाक्येनोक्ता। तदुक्तं 'नोर्ध्वं गम्यः सरसिजभुवो नाप्यधः शार्ङ्गपाणेरि'ति।।५७।।

उमारूपेण ते यूयं संयमस्तिमितं मनः।
शम्भोर्यतध्वमाक्रष्टुमयस्कान्तेन लोहवत्।।५८।।

प्रकाशिका

तेजोंशनिषेकोपायमाह—

उमेति। त इति, य इत्थमनर्थप्रतीकारार्थिनः। संयमस्तिमितत्वमाकर्षणीयत्वे हेतुः। परमेश्वरस्यारूपहार्यत्वमभिप्रेत्याक्रष्टुं यतध्वमित्युक्तम्। अन्यथाकर्षतेति ब्रूयात्।

ननु तर्हि किमर्थोऽयं विधिः। न। परम्परया सार्थकत्वस्य दर्शयिष्यमाणत्वात्। अत एव वक्ष्यति—अर्थोऽयमर्थान्तरभाव्य एव (३.१८) इत्यादिना। उपमानेन तु परमेश्वरस्य नैसर्गिकं निजशक्तिपरशक्तिपराधीनत्वं ध्वनितम्। अत्र तु वतिर्निरूप्यः। 'तत्र तस्येव'(५.१.११६) इति, 'तेन तुल्यं क्रिया चेद्वतिः'(५.१.१५) इति सूत्रद्वयनीत्या दुर्लभत्वात्॥५८॥

विवरणम्

तेजोनिषेकोपायप्रकारमप्युपदिशति—

उमारूपेणेति। ते यूयम् उमारूपेण शम्भोः मनः आकृष्टुं यतध्वम्। ते ये सेनानीसर्गद्वारेणापत्प्रतीकारं प्रार्थयन्ते, त इत्यर्थः। उमायाः पार्वत्याः रूपेण सौन्दर्येण साधनेन शम्भोः परमेश्वरस्य मनः चित्तम् आक्रष्टुम् उमाया अभिमुखं प्रवर्तयितुं। यतध्वं यत्नं कुरुत। शम्भोररूपहार्यत्वमभिप्रेत्य यतध्वमित्युक्तं, न पुनराकर्षतेति। इदानीं तु विशेषतोऽप्यनाकर्षणीयमित्याह—संयमस्तिमितमिति। रागद्वेषादिविरहः संयमः, तेन स्तिमितं निश्चलम्। उमारूपेण चित्ताकर्षणमुपमया स्फुटयति—अयस्कान्तेन लोहवदिति। अयस्कान्तेन अयस्कान्तपाषाणेन लोहवल्लोहमिव। अयो यथायस्कान्तेनाकर्षति, तद्वदित्यर्थः। अनेनोपमानेन परमेश्वरस्य स्वाभाविकमेव शक्तिपराधीनत्वमिति ध्वन्यते। अत्र वतिप्रयोगश्चिन्त्यः 'तत्र तस्येव' (५.१.११६) इति सूत्रेण, 'तेन तुल्यं क्रिया चेद्वति'(५.१.११५) इति सूत्रेण च दुर्लभत्वादित्यरुणाचलनाथेनोक्तम्। अतस्तन्मतानुसारिभिरस्माभिश्चिन्त्यते। 'तेन तुल्यं क्रिया चेद्वतिरि'ति तृतीयान्ताद् विहितः प्रत्ययः सर्वविभक्त्यर्थानन्तर्भावयतीति कैयटपदमञ्जर्योः प्रतिपादितम्। अत एव सर्वविभक्तीनां क्रमेणोदाहरणे 'ब्राह्मणेन तुल्यं, ब्राह्मणमिव भवन्तं पश्यामी'ति द्वितीयार्थे वतिरुदाहृतः। तथा च 'पूर्ववत् सनः' (१.३.६२) इत्यत्र पूर्वस्मादिव पूर्ववदिति पञ्चम्यर्थे वतिर्व्याख्यातः॥५८॥

उभे एव क्षमे वोढुमुभयोर्वीर्यमाहितम्।
सा वा शम्भोस्तदीया वा मूर्तिर्जलमयी मम॥५९॥

प्रकाशिका

निषेकं प्रत्यधिकरणान्तरस्यायोग्यत्वं दर्शयति—

उभे इति। सा उमा। तदीया शम्भुसंबन्धिनी। अनेन परमेश्वरशक्तेरेव सर्वभरसहत्वमिति द्योतयति। वाशब्दोऽवधारणे। यद् वक्ष्यति 'सैव क्षमेत्यात्मभुवोपदिष्टम्' (३.१६) इति॥५९॥

विवरणम्

निषेकं प्रत्यधिकरणान्तरस्यायोग्यत्वं दर्शयति—

उभे इति। उभयोः आहितं वीर्यं वोढुम् उभे एव क्षमे। उभयोरिति षष्ठ्या अत्र वीर्यशब्देनैव सम्बन्धः। आहितमित्यस्य कर्ता पुनरुभाभ्यामित्यर्थात् सिध्यति। आहितं निषिक्तं वीर्यं रेतः वोढुं प्रसवपर्यन्तं धर्तुम् उभे एव, नान्याः स्त्रियः, क्षमे शक्ते। उभाभ्यां निषिक्तमुभयोर्वीर्यं धर्तुमुभे एव योषितौ क्षमे इत्यर्थः। उभयशब्दोक्तमर्थं विविच्य दर्शयति—शम्भोः सा वा मम तदीया जलमयी मूर्तिर्वा इति। शम्भोः परमेश्वरस्य। वीर्यमित्यर्थादायाति। सा पार्वती। वाशब्दोऽवधारणार्थे। ननु 'वा विकल्पोपमानद्वन्द्वसमुच्चयेष्वि'ति निपातसूत्रे न वाशब्दस्यावधारणार्थत्वं प्रोक्तम्। सत्यम्। 'निपाता अनेकार्था' इति वचनानुसारिणा कविनात्रावधारणार्थत्वमेव विवक्षितम्। अत एव वक्ष्यति—'योषित्सु तद्वीर्यनिषेकभूमिः सैव क्षमेत्यात्मभुवोपदिष्टम्' (३.१६) इति। शम्भोर्वीर्यं सोढुं पार्वत्येव क्षमेत्यर्थः। मम जगत्सिसृक्षया वीर्यमुत्सृजतः। तदीया शम्भुसम्बन्धिनी। जलमयी जलस्वरूपिणी। मूर्तिः अष्टमूर्तेः परमेश्वरस्यैका मूर्तिः। मद्वीर्यभारसहिष्णुत्वमपामेवेत्यर्थ। 'यदमोघमपाम्' (२.५) इत्यादिना यदपां मद्वीर्यभारसहिष्णुत्वमुक्तं, तदपि तासां हरमूर्तिभेदत्वादेवेति वदता ब्रह्मणा परमेश्वरांशस्यैव तारकासुरनिग्रहसामर्थ्यमित्युक्तं भवति। अत्रापामुपन्यासो दृष्टान्तत्वेनेति मन्तव्यम्॥५९॥

तस्यात्मा शितिकण्ठस्य सैनापत्यमुपेत्य वः।
मोक्ष्यते सुरबन्दीनां वेणीर्वीर्यविभूतिभिः॥६०॥

प्रकाशिका

एवं कृतेऽवश्यंभाविनी सिद्धिरित्याह—

तस्येति। आत्मा पुत्र इत्यर्थः। शितिकण्ठस्येत्यनेन कालकूटनिगरणं द्योतयता स देवोऽस्माकं परमापत्सु शरणमिति द्योतयति। अत्र मोक्ष्यत इत्यादि पर्यायोक्तम्। तद्वीर्यविध्वस्ते शत्रौ सुरस्त्रियः स्वभर्तृविरहभाविनं केशरचनाविशेषं त्यक्ष्यन्तीति प्रतीतेः॥६०॥

विवरणम्

पार्वतीपरमेश्वरयोः परस्परसम्मेलने कृते कार्यसिद्धिरवश्यं भविष्यत्येवेति वाचा देवानानन्दयति—

तस्येति। तस्य शितिकण्ठस्य आत्मा वः सेनापत्यम् उपेत्य वीर्यविभूतिभिः स्वर्गबन्दीनां वेणीः मोक्ष्यति। तस्य, य एवम्भूतप्रभावः तस्येत्यर्थः। शितिकण्ठस्य

नीलकण्ठस्य। 'शिती धवलमेचकावि'त्यमरः। कालकूटनिगरणप्रभूतकण्ठनैल्यस्येत्यर्थः। अनेनायमेवास्माकमापत्सु शरणमिति द्योतयति। आत्मा पुत्र इत्यर्थः। 'आत्मा वै पुत्र उत्पन्न इति वेदानुशासनम्' (स्क.१०.७८.३६) इति श्रीभागवतवचनाद् आत्मशब्दप्रयोगेणात्र तत्पुत्रस्य परमेश्वरतुल्यशक्तत्वं ध्वनितम्। वः युष्माकं सैनापत्यं सेनापतित्वम्। 'पत्यन्तपुरोहितादिभ्यो यक्' (५.१.१२८) इति यक्। उपेत्य प्राप्य वीर्यविभूतिभिः वीर्यातिशयैः। बहुवचनेन विभूतिशब्देन च तद्वीर्याणां निरवधिकत्वं ध्वनितम्। स्वर्गबन्दीनां, बन्द्यो हठहृतमहिलाः। तारकासुरेण बन्दीकृतानां स्वर्गस्त्रीणामित्यर्थः। वेणीः संश्लिष्टकेशान्। 'वेणी प्रवेणी शीर्षण्यशिरस्यावि'त्यमरः। भर्तृविरहिता हि कुलस्त्रियः स्वकेशान् भर्तृसमागमपर्यन्तं दृढं निबद्ध्नन्ति। यथोक्तं शाकुन्तले—

> वसने परिधूसरे वसाना नियमक्षामतनुर्धृतैकवेणिः।
> अतिनिष्करुणस्य शुद्धशीला मम दीर्घं विरहव्रतं वहन्ती।। [७.२१]इति।

मोक्ष्यति विश्लेषयिष्यति। अत्र कार्यभूतेन वेणीविश्लेषणेन कारणभूतस्तारकासुरवध प्रतीयत इति पर्यायोक्तम्।।६०।।

इति व्याहृत्य विबुधान् विश्वयोनिस्तिरोदधे।
मनस्याहितकर्तव्यास्तेऽपि प्रतिययुर्दिवम्।।६१।।

प्रकाशिका

प्रकरणमुपसंहरति—

इतीति। व्याहृत्य तिरोदध इत्यनेन लोककार्यार्थं देवेभ्यो दत्तस्य विधातृदर्शनस्य चिरसुलभत्वं द्योत्यते। मनसीति, मनसा तमेवार्थं सङ्कल्पयन्त इत्यर्थः।।६१।।

विवरणम्

प्रकरणमुपसंहरति—

इतीति। विश्वयोनिः विबुधान् इति व्याहृत्य तिरोदधे। विश्वयोनिर्विश्वस्य योनिरुद्भवस्थानं प्रपञ्चकर्ता ब्रह्मा विबुधान् सुरान् इति पूर्वोक्तप्रकारेण व्याहृत्य उक्त्वा तिरोदधे अन्तर्हितोऽभूत्। इति व्याहृत्य तिरोदध इत्यनेन देवकार्यार्थमेवादौ दर्शनं दत्तं, तच्च दर्शनं तदनुग्रहप्रदानपर्यन्तं सुलभं चाभूदिति देवानां प्रमोदातिशयप्राप्तिर्ध्वनति। लब्धप्रसादानां देवानां प्रवृत्तिमाह—तेऽपि मनसि आहितकर्तव्याः दिवं प्रतिययुरिति। ते देवाः मनसि आहितं निहितं कर्तव्यं करणीयं

यैस्तथाभूताः सन्तः। अनन्तरकरणीयं मनसा निश्चित्येत्यर्थः। दिवं स्वर्गं प्रतिययुः, यथागतं गता इत्यर्थः॥६१॥

तत्र निश्चित्य कन्दर्पमगमत् पाकशासनः।
मनसा कार्यसंसिद्धित्वराद्विगुणरंहसा॥६२॥

प्रकाशिका

अथ तदुपायानुष्ठानरूपोत्तरसर्गार्थबिन्दुमुपक्षिपति—

तत्रेति। तत्र दिवि। निश्चित्य मन्त्रेण प्रक्रंस्यमानमुपायानुष्ठानमवधार्येत्यर्थ। मनसा अगमत् सस्मार उपस्थानार्थम्। 'कार्यसंसिद्धित्वराद्विगुणे'ति पाठः॥६२॥

विवरणम्

अथ पार्वतीपरमेश्वरसङ्गमोपायानुष्ठानरूपमुत्तरसर्गार्थबिन्दुमुपक्षिपति—

तत्रेति। पाकशासनः तत्र निश्चित्य मनसा कन्दर्पम् अगमत्। पाकशासनः इन्द्रः। 'इन्द्रो मरुत्वान् मघवा बिडौजाः पाकशासनः इत्यमरः। तत्र दिवि निश्चित्य करिष्यमाणमुपायानुष्ठानं मन्त्रिभिः सह सम्मन्त्र्य। सम्यगवधार्येत्यर्थः। मनसा कन्दर्पमगमत्। सस्मारेत्यर्थः। समीपागमनार्थमिति शेषः। स्मरणे मनसो विशेषं दर्शयति—कार्यसंसिद्धित्वराद्विगुणरहसेति। कार्यस्य सेनानीलाभरूपस्यार्थस्य संसिद्धौ सम्यक्सिद्धौ या त्वरा त्वरणं तया द्विगुणं प्रवृद्धं रंहः वेगो यस्य तेन। मनसः स्वतो वेगवत्त्वादिति द्विगुणरंहसेत्युक्तम्। स्वाभिलषितस्य सेनानीलाभरूपस्यार्थस्य स्वमनोरथानुरूपे लाभे त्वरया प्रवृद्धवेगेनेत्यर्थः। अनेन मनोविशेषणेन 'कश्चित् कालः प्रतीक्ष्यताम्'(२.५३) इति ब्रह्मणा निर्दिष्टस्य कालप्रतीक्षणरूपस्यांशस्य कार्यसिद्धित्वरयातिक्रान्तत्वात् कामदहनरूपो भविष्यन्ननर्थोऽपि सूचितः॥६२॥

अथ स ललितयोषिद्भ्रूलताचारुशृङ्गं
रतिवलयपदाङ्के चापमासज्ज्य कण्ठे।
सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः
शतमखमुपतस्थे प्राञ्जलिः पुष्पधन्वा॥६३॥

प्रकाशिका

बिन्दोराविर्भावं दर्शयति—

अथेति। अथशब्द आनन्तर्ये। स्मरणानन्तरमेवेत्यर्थः। ललितेत्याद्युपमागर्भम्।

उपतस्थे, सङ्गतिकरण आत्मनेपदम्। शतमखेन सङ्गतोऽभूदित्यर्थः। अत्र विशेषणानि स्वभावोक्तिं पुष्णन्ति। सा च समीहितार्थसाधनक्षमतामस्याभिव्यनक्ति। प्राञ्जलिरिति तु विधेयत्वाभिप्रायम्।।६३।।

।। इत्यरुणगिरिनाथविरचितायां कुमारसम्भवप्रकाशिकायां
द्वितीयः सर्गः।।२।।

विवरणम्

अथोपक्षिप्तस्योत्तरसर्गबिन्दोराविर्भावमपि दर्शयति—

अथेति। अथ सः पुष्पकेतुः कण्ठे चापम् आसज्ज्य प्राञ्जलिः शतमखम् उपतस्थे इति। अथ स्मरणानन्तरमेव। अनेन पुष्पकेतोः शतमखवशवर्तित्वमुक्तम्। सः, य एवं महेन्द्रेण स्मृतः स इत्यर्थः। पुष्पकेतुः कामदेवः कण्ठे चापमासज्ज्य स्थापयित्वा। अनेन चापभृतां स्वभाव उक्तः। तेन च तदुक्तकरणोद्योगः सूचितः। प्राञ्जलिः कृताञ्जलिर्भूत्वेत्यर्थः। अनेन भृत्यतया तदुक्तकारित्वमुक्तम्। शतमखं शतक्रतुम्। अनेन भृत्यतया तदुक्तकारित्वमुक्तम्। शतमखं शतक्रतुम्। अनेन तन्नियोगस्यानतिक्रमणीयत्वमुक्तम्। उपतस्थे, 'उपाद् देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वक्तव्यम्' (वा.१.३.२५) इत्यात्मनेपदम्। शतमखेन सङ्गतोऽभूदित्यर्थः। चापस्य समीहितार्थसाधनक्षमतामभिद्योतयन् चापं विशिनष्टि—ललितयोषिद्भ्रूलताचारुशृङ्गमिति। ललितायाः सुन्दर्याः योषितः स्त्रियाः भ्रूलता प्रशस्ता भ्रूरिव चारु कोमलं शृङ्गम् अग्रं यस्य तत्तथा। अत्र ललितलताशब्दाभ्यामुपमानत्वसिद्धिरुक्ता। अनेन चापविशेषणेनास्मत्कार्यमसौ साधयिष्यत्येवेति शतमखस्य बुद्धिर्ध्वन्यते। तादृशचापाधिष्ठानयोग्यं कण्ठं विशिनष्टि—रतिवलयपदाङ्क इति। रतेरात्मवल्लभाया वलयपदं वलयस्थानमेवाङ्कश्चिह्नं यस्य तस्मिन्। कण्ठाश्लेषे वलयस्य चिरं कण्ठावसक्तत्वाद् वलयप्रतिबिम्बलाञ्छितमित्यर्थः। अनेन गाढालिङ्गनं ध्वनितम्। बाणानामप्यादानमाह—सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्र इति। सहचरस्य त्रैलोक्यविजये सहायभूतस्य मधोर्वसन्तस्य 'मधुर्वसन्ते दैत्ये च मधु मद्ये च माक्षिक' इति भोजः। हस्ते न्यस्तः निक्षिप्तचूताङ्कुर एवास्त्रं येन स तथा। अनेन सहायसम्मतिः सहायस्य स्वाधीनता च दर्शिता।।६३।।

द्वितीय सर्गेऽस्मिन् महति गहनार्थे मितपदे
निगूढानर्थान् को जगति बिवरीतुं प्रभवति।
तथाप्यस्माभिर्यत् प्रलपितमिति क्षीणमतिभि-
र्विलज्जैस्तत् सर्वं भवतु शिवयोः स्तोत्रविधये।।

मीमांसोचितमानमेयघटनादक्षस्य नारायण-
क्ष्मादेवस्य कृतौ गिरीशगिरिजाभक्तिप्रवृद्धोदये।
व्याख्यानेऽत्र कुमारसम्भवपदार्थालोचनप्रक्रिया-
निष्णाते निरगाद् द्वितीय उदितः सर्गो निसर्गोज्ज्वलः।।

।। इति श्रीकृष्णप्रियशिष्यस्य नारायणस्य कृतौ कुमारसम्भवविवरणे द्वितीयः सर्गः।।२।।

●

।। अथ तृतीयः सर्गः ।।

तस्मिन् मघोनस्त्रिदशान् विहाय
सहस्रमक्ष्णां युगपत् पपात।
प्रयोजनापेक्षितया प्रभूणां
प्रायश्चलं गौरवमाश्रितेऽपि।।१।।

प्रकाशिका

अथोपाक्षिप्तमुपायानुष्ठानं प्रपञ्चयति—

तस्मिन्निति। तस्मिन् कामे। त्रिदशान् मन्त्राय समासीनान्। सहस्रमित्यादिना तस्यात्रादरातिशयद्योतनात् स्वगौरवत्यागो दर्शितः। तदुपपादयति—प्रयोजनापेक्षितयेति। चलं गत्वरम्। गौरवं सावष्टम्भावस्थानादि। आश्रितेऽपि परिजनविषयेऽपि। कर्तरि निष्ठा। अयमर्थः—यदा प्रभवः परिजनात् कार्यमपेक्षन्ते, तदा स्वगौरवमपि विहाय परिजनमपि संभावयन्तीति। त्रिदशान् विहायेत्युक्त्या त्रिदशगतं गौरवमेकौघभूतं कामगतमिति दर्शितम्। न चायं दोषः, 'अर्थाधिकारी धीरोद्धत' इति **भोजो**क्तेः। चलश्च कार्यापेक्षया धीरोद्धतः। अत एव प्रायश्शब्दः।।१।।

विवरणम्

अथोपक्षिप्तं पार्वतीपरमेश्वरसङ्गमोपायानुष्ठानं तदनुबद्धं कामदहनं च तृतीयेनानेन सर्गेण वर्ण्यते। तत्र कामदेवागमनानन्तरं मघोनस्तद्विषयां प्रतिपत्तिं दर्शयति—

तस्मिन्निति। मघोनः अक्ष्णां सहस्रं त्रिदशान् विहाय तस्मिन् युगपत् पपात। मघोनः इन्द्रस्य। 'इन्द्रो मरुत्वान् मघवे'त्यमरः। अक्ष्णां नयनानां सहस्रं त्रिदशान् देवान् विहाय परित्यज्य तस्मिन् कामदेवे युगपत् सहैव पपात पतितमासीत्। तत्र सहस्रयुगपच्छब्दाभ्यां मघोनस्त्वरातिशयो द्योत्यते। तेन च कामदेवेऽस्यादरातिशयः। त्रिदशान् विहायेति तेष्वनादरः उक्तः। पूर्वं मन्त्राय समासीनानखिलानमराननादृत्याक्षिसहस्रेण सहस्राक्षस्तत्कालसमागतं कामदेवमेव सबहुमानमवलोकितवानित्यर्थः। ननु मन्त्राय पूर्वमारोपितगौरवेषु देवेषु कथं कामदेवागमनानन्तरमेव तस्यानादरः, कथं वा तत्कालसमागतकामदेवे चादरः, अत आह—प्रभूणाम् आश्रितेषु गौरवं प्रयोजनापेक्षितया प्रायः चलमिति। प्रभूणां राज्ञाम् आश्रितेषु सेवकेषु। कर्तरि निष्ठा। इयं तु विषयसप्तमी। प्रभूणामाश्रितजने विषये यद्

गौरवमादरः, तत् प्रयोजनापेक्षितया प्रयोजनमपेक्षितुं शीलमेषामिति प्रयोजनापेक्षिणः, तेषां भावस्तत्ता, तया हेतुभूतया। प्रायः प्रायेण चलं चञ्चलं भवति। यस्मात् प्रभवः प्रयोजनापेक्षिणः, तस्मादाश्रितविषयस्तेषामादरः प्रायेण तत्तदर्थसाधकेषु जनेषु चञ्चलो भवतीत्यर्थः। धीरोद्धतानामयं स्वभावः। यदाह भोजः—'अर्थाधिकारी धीरोद्धत' इति। धीरोद्धतानामर्थाधिकारित्वात् तेषामादरः स्वगौरवमपहायापि परिजनमपि सम्भावयतीत्यर्थः। अत्रार्थान्तरन्यासः। कार्यापेक्षितयैव चलत्वमिति प्रायश्शब्दः प्रयुक्तः। महेन्द्रस्य धीरोद्धतत्वं प्रतिनायकत्वकृतम्। आश्रितेऽपीति पाठे।।१।।

स वासवेनासनसन्निकृष्ट-
मितो निषीदेति निसृष्टभूमिः।
भर्तुः प्रसादं प्रतिनन्द्य मूर्ध्ना
वक्तुं मिथः प्राक्रमतैवमेनम्॥२॥

प्रकाशिका

स इति। वासवेनेति तत्कृतस्य संभावनस्य दुर्लभतां द्योतयति। आसनसन्निकृष्टं सन्निकृष्टासनम्। आहितग्न्यादिषु पाठात् साधुत्वम्। षष्ठीसमासस्तु न भवति, 'न लोका—'(२.३.६९) इति षष्ठीप्रतिषेधात्। इदं तु निसर्गक्रियाविशेषणं मिथोवचनाङ्गम्। निसृष्टभूमिर्दत्तावस्थानभूमिष्ठ इत्यर्थः। प्रसादं माननम्। मूर्ध्ना, साञ्जलिना नम्रेणेत्यर्थाल्लभ्यते। मिथो रहसि। एवमिति वक्ष्यमाणस्याप्युपसंहारः।।२।।

विवरणम्

अथ वाचिकसम्भावनाप्रदर्शनपुरस्सरं मन्मथस्य वचनावसरं दर्शयति—

स इति। वासवेन इतः निषीदेति आसनसन्निकृष्टं निसृष्टभूमिः सः भर्तुः प्रसादं मूर्ध्ना प्रतिनन्द्य मिथः एनमेवं वक्तुं प्राक्रमत। वासवेन देवेन्द्रेण। अनेन तत्कृतस्य सम्भावनस्यात्यन्तदुर्लभत्वं द्योत्यते। इतः अस्मिन् प्रदेशे। सप्तम्यर्थे तसिः। निषीद स्थितिं कुरु। आसनसन्निकृष्टमिति निसर्गक्रियाविशेषणम्। आसनसन्निकृष्टं सन्निकृष्टासनम्। आहिताग्न्यादिषु पाठात् साधुत्वम्। सन्निकृष्टमासनं यथा भवति तथा निसृष्टभूमिरित्यर्थः। न पुनरत्रासनस्य सन्निकृष्टमिति समासः। 'न लोक'(२.३.६९)इत्यादिना षष्ठीप्रतिषेधात्। निसृष्टा दत्ता भूमिरवस्थानप्रदेशो यस्मै स तथा। पूर्वं कामदेवाधिष्ठितात् प्रदेशादारभ्यात्मसिंहासनपर्यन्तं स्वहस्तेनैवाहूय तत्र दत्तावस्थानप्रदेश इत्यर्थः। तत्रावस्थायेत्यर्थात् सिध्यति। एतच्च मिथोवचनाङ्गम्। सः

कामदेवः भर्तुः स्वामिनः प्रसादं सगौरवावलोकनादिरूपं संमानं मूर्ध्ना, साञ्जलिना नम्रेण शिरसेत्यर्थः। प्रतिनन्द्य प्रसादमभिनन्द्य। मिथः रहसि। अनेन मन्त्रगुप्तिर्दर्शिता। एनं भर्तारम्। एवमिति वक्ष्यमाणप्रकारसङ्क्षेपः। वक्तुं प्राक्रमत उपक्रान्तवान्।।२।।

आज्ञापय ज्ञातविशेष! पुंसां
लोकेषु यत् ते करणीयमस्ति।
अनुग्रहं संस्मरणप्रवृत्त-
मिच्छामि संवर्धितमाज्ञया ते॥३॥

प्रकाशिका

आज्ञापयेति। मद्विशेषमधिगम्य मामस्मर इत्यामन्त्रणपदेन द्योत्यते। यत् करणीयं तदाज्ञापयेत्यर्थः। प्रथममेवाज्ञापयेति किमुक्तमित्याह—अनुग्रहमिति। संवर्धितमिति पाठः। मयि संस्मरणेनाङ्कुरितं तवानुग्रहमाज्ञया संवर्ध्यमानमिच्छामीत्यर्थः।।३।।

विवरणम्

एवंशब्दोक्तमेव प्रपञ्चयत्याज्ञापयेत्यादिभिरष्टभिः श्लोकैः—

आज्ञापयेति। पुंसां ज्ञातविशेष! त्वमाज्ञापय। पुंसां पुरुषाणां ज्ञातो विशेषः सामर्थ्यभेदो येन, ज्ञातसकलपुरुषसामर्थ्यभेदेत्यर्थः। अनेनामन्त्रणेन मत्सामर्थ्यविशेषमवधार्य खलु भवताहं स्मृतः। तस्मान्मदुचिते कार्ये मामाज्ञापयेति ध्वन्यते। 'यो यस्मिन् कर्मणि कुशलः तं तस्मिन्नेव योजयेद्' इति न्यायादिति भावः। आज्ञापनस्य विषयमपि सङ्क्षिप्य दर्शयति—ते लोकेषु यत् करणीयमस्तीति। ते तव लोकेषु लोकत्रये। अत्र बहुवचनेन सर्वलोकगतार्थसाधनसमर्थत्वमात्मनः समर्थितम्। करणीयं कर्तव्यम्। मयेति शेषः। लोकत्रये तव मया यत्कर्तव्यमस्ति, तदाज्ञापयेति पूर्वेणान्वयः। आज्ञापनमात्रस्यैवात्र कालविलम्ब इति भावः। ननु किमर्थमादावेवाज्ञापयेत्युक्तम्, अत आह—अहं संस्मरणप्रवृत्तं तेऽनुग्रहमाज्ञया संवर्धितमिच्छामीति। संस्मरणप्रवृत्तं संस्मरणेन सम्यक् स्मरणेन। अत्र स्मरणस्य सम्यत्त्वं नाम सरभसागमनप्रयोजकत्वम्। प्रवृत्तमङ्कुरितम्। ते त्रैलोक्यनाथस्य तव। अनुग्रहम्। अनेनानुग्रहस्यात्यन्तदुर्लभत्वमुक्तम्। संवर्धितं सम्यग्वर्धितम्। वर्तमाने क्तः। वर्ध्यमानं सन्तमिच्छामि। सर्वलोकाधिपतेस्तव योऽनुग्रहः संस्मरणेन मय्यङ्कुरितोऽभूत्, तमहमाज्ञया वर्ध्यमानमिच्छामीत्यर्थः।।३।।

केनाभ्यसूया पदकङ्क्षिणा ते
नितान्तदीर्घैर्जनिता तपोभिः।
यावद् भवत्याहितसायकस्य
मत्कार्मुकस्यास्य निदेशवर्ती॥४॥

प्रकाशिका

धीरोद्धतत्वाद् दुस्साधेष्वर्थेषु स्वशक्तिं प्रकाशयंस्तानेवार्थानेकैकं पृच्छति षड्भि श्लोकैः—

केनेति। पदकाङ्क्षिणा इन्द्रपदं प्रार्थयता। यावद् भवति भविष्यतीत्यर्थः। असौ भवतीति पाठे वर्तमानसामीप्ये लट्।।४।।

विवरणम्

अत्र प्रतिनायको मारो धीरोद्धतत्वादत्यन्तदुस्साधेष्वप्यर्थेषु स्वशक्तिं प्रकाशयंस्तानेवार्थान् पृच्छति षड्भिः श्लोकैः। तत्र तदिच्छानुसारेण हि प्रश्नः कर्तव्यः। इच्छा च द्विविधा अनिष्टपरिहाररूपा इष्टप्राप्तिरूपा च। तत्रानिष्टपरिहारस्यैव प्राधान्यं 'कृतकृत्यस्य कामेऽधिकार' इति वचनादिति आदावनिष्टपरिहारविषयः प्रश्नः क्रियते। तत्रानिष्टपरिहारोऽपि द्विविधः सर्वस्वनाशपरिहारस्तदेकदेशनाशपरिहारश्च। तत्र सर्वस्वनाशस्यैव हि प्राधान्यमिति आदौ तद्विषयं प्रश्नमवतारयति—

केनेति। केन ते पदकाङ्क्षिणा नितान्तदीर्घैः तपोभिः अभ्यसूया जनिता। अत्र केनेति सर्वनाम्ना निजशक्तेः सार्वत्रिकत्वं द्योत्यते। ते तव पदकाङ्क्षिणा पदं स्थानं काङ्क्षितुं शीलमस्येति तथा। इन्द्रपदं प्रार्थयतेत्यर्थः। नितान्तदीर्घैः अत्यन्तदीर्घैः, बहुकालकृतैरित्यर्थः। अनेन तपसः पदाहरणसामर्थ्यं दर्शितम्। अभ्यसूया असूया जनिता उत्पादिता। त्रैलोक्ये कः पुमान् बहुकालकृतैस्तपोभिस्त्वां दूरतो निराकृत्य स्वयमेवामरावतीमधिष्ठाय माहेन्द्रं पदमहमेवानुभवामीति कृतोद्योगस्तवासूयां जनयतीत्यर्थः। त्वरितं वदेति शेषः। ननूक्त्वा किं फलमित्यत्राह—सः अस्य मत्कार्मुकस्य निदेशवर्ती यावद् भवतीति। कर्तृपदमत्राध्याहार्यम्। अस्य मत्पाणाविदानीं विद्यमानस्य। अनेनायुधादानहेतुकः कालविलम्बो निरस्तः। मत्कार्मुकस्य अनेन स्वातन्त्र्यमायुधस्योक्तम्। निदेशवर्ती निदेशे आज्ञायां वर्तितुं शीलमस्येति तथा। ताच्छील्ये णिनिः। अनेनासौ पुनः कदाचिदपि तपश्चरितुं न यतिष्यत इत्यर्थो द्योत्यते। यावद् भवति, 'यावत्पुरानिपातयोर्लट्'(३.३.४) इति भविष्यदर्थे लट्। स मत्कार्मुकाज्ञाकर एव भविष्यतीत्यर्थः। आहितसायकस्य आहितः कृतसन्धानः सायकः शरो यस्मिन्। अनेन विशेषणेन कार्मुकस्य शरसन्धानव्यतिरिक्तकारणान्तरनिरपेक्षत्वं ध्वनितम्।।४।।

असम्मतः कस्तव मुक्तिमार्गं
पुनर्भवक्लेशभयात् प्रपन्नः।
बद्धश्चिरं तिष्ठतु सुन्दरीणा-
मारेचितभ्रूचतुरैर्विलासैः॥५॥

प्रकाशिका

पुरुषार्थेषु मोक्षमधिकृत्याह—

असम्मत इति। प्रभुणा लोकतन्त्रेऽधिकृतस्य कस्यचिन्मुमुक्षुत्वं प्रभोरसम्मतमिति भावः। तर्हि स कुतस्तत् प्रतिपद्यत इत्याह—पुनर्भवक्लेशभयादिति। सर्वो हि स्वार्थे वर्तते। आरेचनम् एकस्या भ्रुवो ललितमीषदुत्क्षेपणम्। 'रेचितं पुनरेकस्या ललितोत्क्षेपणं भ्रुव' इत्याहुः। एतदेकं वाक्यम्। वाक्यभेदे तु स इत्युत्तरार्धेऽध्याहार्यः।।५।।

मोक्षस्यैव

विवरणम्

अथ पुरुषार्थचतुष्टये ~~धर्मस्यैव~~ प्राधान्यात् तद्विषयः प्रश्नः क्रियते। स तु स्वराज्यैकदेशनाशपरिहारविषयश्चेति मन्वानः पृच्छति—

असम्मत इति। तव असम्मतः पुनर्भवक्लेशभयाद् मुक्तिमार्गं प्रपन्नः कः सुन्दरीणाम् आरेचितभ्रूचतुरैः विलासैः बद्धः चिरं तिष्ठतु। तव असम्मतः त्रैलोक्यरक्षाधिकृतस्य तवानिष्टः। तव सम्मतिं विनैव मुक्तिमार्गं प्रपन्न इत्यर्थः। नहि प्रभुणा लोकतन्त्रे नियुक्तस्य पुरुषस्य मुमुक्षुत्वं प्रभोः सम्मतं भवति। तस्य मुमुक्षुत्वे तत्पदस्य रक्षाशैथिल्येन विनाशप्रसङ्गादित्यर्थः। मुक्तिमार्गप्राप्तौ हेतुमाह—पुनर्भवक्लेशभयादिति। पुनर्भवेण जननमरणेन यः क्लेशः पीडा तद्भयात्। स्वार्थमात्रपरो हि लोकः। अतः परार्थां लोकरक्षामुपेक्ष्य निजक्लेशहारिणीं मुक्तिपदवीमेव प्रपन्न इति भावः। मुक्तिमार्गं मोक्षमार्गम् इहामुत्रभोगविरामादिरूपां पदवीं प्रपन्नः प्राप्तः कः पुमान् सुन्दरीणां सर्वावयवसुन्दरीणां स्त्रीणाम् आरेचिताभिः ईषद्रेचितयुक्ताभिः। रेचितमेकस्या भ्रुवो ललितोत्क्षेपणम्। यथोक्तं सङ्गीतशास्त्रे—'रेचितं पुनरेकस्या ललितोत्क्षेपणं भ्रुव' इति। तादृशीभिर्भ्रूभिः चतुरैः सुन्दरैः। अत्र रेचितशब्देनैव भ्रूशब्दार्थे सिद्धेऽपि पुनर्वचनं करिकलभन्यायादिति मन्तव्यम्। अथवा आरेचिताभिः नर्तिताभिः। 'आरेचितं नर्तितं स्यादि'ति भोजः। अयं तु पक्षो माधवोक्तः। विलासैः कटाक्षविक्षेपादिरूपैः बद्धः वशीकृतः चिरं चिरकालं तिष्ठतु त्वत्प्रसादपर्यन्तं स्त्रीजनपराधीन एव स्थितिं करोत्विति भावः। इत्थमेकवाक्यतापक्षे

योजना। वाक्यभेदे पुनरुत्तरार्धे स इति कर्तृपदमध्याहृत्य पूर्वश्लोकवद् योजनीयम्।।५।।

अध्यापितस्योशनसापि नीतिं
प्रयुक्तरागप्रणिधिर्द्विषस्ते।
कस्यार्थधर्मौ वद पीडयानि
सिन्धोस्तटावोघ इव प्रवृद्धः।।६।।

प्रकाशिका

धर्मार्थावधिकृत्याह—

अध्यापितस्येति। उशनसापीति। 'न कश्चिन्नापनयते पुमानन्यत्र भार्गवादि'ति दर्शनात्। अध्यापितस्यापीत्यन्वयेऽपि अप्यर्थ उशनसि विश्राम्यति, विशेषणे तात्पर्यात्। नीतिमिति, नीतेर्धर्मार्थयोरुभयोरपि पालने साधनत्वात्। प्रयुक्तो रागो विषयाभिषङ्ग एव चारो यस्य। अस्मन्नीतिरौशनसीमपि नीतिं जेतुं क्षमेति भावः। एकेनोभयोरपि पीड्यत्वमुपमयोपपादयति—सिन्धोरिति।।६।।

विवरणम्

अथ धर्मार्थावधिकृत्य प्रश्नः क्रियते। स तु भविष्यदापत्परिहारविषयश्चेति तृतीयं प्रश्नमवतारयति—

अध्यापितस्येति। अहं ते द्विषः कस्य अर्थधर्मौ पीडयानि वद। ते द्विषस्तव शत्रुभूतस्य कस्य अर्थधर्मौ अर्थं च धर्मं च पीडयानि विनाशयेयम्। प्रश्ने लोट्। वद निर्दिश। अत्र कस्यार्थधर्मौ पीडयानीति प्रश्नेनैव वदेत्येतस्य गतार्थत्वेनानुपयोगात् तव वचनविलम्ब एवात्र विलम्ब इत्येतस्मिन्नर्थे शब्दोऽयं सङ्क्रमितः। औद्धत्यपरिहारो व्यङ्ग्य इत्यर्थान्तरसङ्क्रमितवाच्यध्वनिः। न मे प्रभावो नीतिशास्त्रवेदिषु विहन्यत इत्याह—उशनसा नीतिम् अध्यापितस्यापीति। उशनसा भार्गवेण। 'उशना भार्गवः कविरि'त्यमरः। नीतिं नीतिशास्त्रम् अध्यापितस्य अध्ययनं कारितस्यापि। उशनसा स्वयमेव शिक्षितनीतिशास्त्रस्यापीत्यर्थः। उशनस एव नीतिशास्त्रप्रावीण्यमिति प्रसिद्धं 'न कश्चिन्नापनयते पुमानन्यत्र भार्गवात्', 'भार्गवेण समो नये' इत्यादिषु। अर्थपालन इव धर्मपालनेऽपि नीतेरेव साधनत्वप्रसिद्धेरेवमुक्तम्। मम नीतिरौशनसीमपि नीतिं जेतुं क्षमेति भावः। आत्मनो नीतिविदां धर्मार्थविश्लेषे साधनसम्पत्तिं दर्शयति—प्रत्युक्तरागप्रणिधिरिति। प्रयुक्तः प्रेरितो रागो विषयाभिलाष एव प्रणिधिश्चरो येन स तथा। अतिप्रवृद्धो हि

विषयाभिलाषः सर्वानपि पुरुषार्थान् विघटयितुं क्षम इति भावः। परनीतिविश्लेषणस्य प्रणिधिसाध्यत्वाद् रागोऽत्र प्रणिधित्वेन रूपितः। 'प्रणिधिरपसर्पश्चरः स्पश' इत्यमरः। ननु कथमेकस्यैवोभयविश्लेषणसामर्थ्यं युगपदेव सम्भवतीतीमामाशङ्कामुपमया परिहरति—प्रवृद्ध ओघः सिन्धोस्तटाविवेति। प्रवृद्धः प्रावृषि महतीं वृद्धिं प्राप्तः ओघः नदीवेगः। 'ओघोवृन्देऽम्भसां रये' इति सिंहः। सिन्धोः नद्याः तटौ तीरप्रदेशाविव। यथा प्रवृद्धो जलप्रवाहः सिन्धोस्तटद्वयं विघटयति, तथाहं कस्यार्थधर्मौ विघटयेयमिति त्वरितमेव वदेत्यर्थः। त्रैलोक्ये कः पुरुषो धर्मार्थाभ्यामुपायाभ्यां त्वां जेतुमुद्योगं करोति, अहं तस्यार्थधर्मयोः काम एवोपयोगं विधास्यामीति भाव।।६।।

कामेकपत्नीव्रतदुःखशीलां
लोलं मनश्चारुतया प्रविष्टाम्।
नितम्बिनीमिच्छसि मुक्तलज्जां
कण्ठे स्वयंग्राहनिषक्तबाहुम्।।७।।

प्रकाशिका

अथ कामस्य शृङ्गारात्मकस्य सम्भोगविप्रलम्भद्वैविध्ये सति सम्भोगस्यासतो लब्धलाभात्मकत्वाभावात् तं विहाय विप्रलम्भं प्रागसङ्गतवियुक्तविषयत्वेन द्विविधं सामान्येन मन्वानस्तत्राद्यमधिकृत्याह—

कामिति। एकपत्नी, पतिव्रता, तस्या व्रतं परपुरुषादर्शनादि, तेन दुःखशीलां दुरुपक्रमस्वभावाम्। लोलं मनः, मनसः स्वभावलोलत्वादित्यर्थः। चारुतया रूपसम्पदा। मुक्तलज्जामित्यष्टमीं कामावस्थां दर्शयति। तत एव स्वयङ्ग्राहलक्षणा चपलता।।७।।

विवरणम्

अनन्तरमिष्टप्राप्तिरूपः प्रश्नः क्रियते। स त्वत्र कामविषयः। इतरेषां कामदेवानधीनत्वात्। तत्र शृङ्गारात्मको हि कामः। शृङ्गारस्तु सम्भोगविप्रलम्भभेदेन द्विविधः। तत्र सम्भोगस्य अलब्धनायिकाविषयत्वाभावेन तत्सिद्ध्यर्थमात्मनः स्मरणानुपपत्तेस्तत्प्रश्नमपहाय विप्रलम्भविषयः प्रश्नः क्रियते। तत्र विप्रलम्भोऽपि द्विविधः। एकः प्रागसङ्गतनितम्बिनीविषयः, अन्यस्तु विप्रयुक्तनायिकाविषयः। तत्राद्यमधिकृत्याह—

कामिति। त्वम् एकपत्नीव्रतदुःखशीलां कां नितम्बिनीं कण्ठे स्वयंग्राहनिषक्तबाहुम् इच्छसि। एकस्य पत्नी एकपत्नी पतिव्रतेत्यर्थः, तस्या व्रतं पुरुषान्तरादर्शनादिरूपं, तेन दुःखशीलां दुर्धर्षस्वभावाम्। 'शीलं स्वभावे सद्वृत्ते'

इति सिंहः। नितम्बिनीं स्त्रियं कण्ठे स्वयंग्राहनिषक्तबाहुम् आलिङ्गनार्थं स्वयमेव ग्रहणं स्वयङ्ग्राहः। ग्रहणार्थे ग्राहशब्दप्रयोगो मृग्यः, जलचरे ग्राह इति नियमात्। स्वयङ्ग्रह इत्येव मुख्यः प्रयोगः। तथा च माघेन प्रयुक्तं 'स्वयंग्रहाश्लेषसुखेन निष्क्रयम्' (१.५०) इति। माधवस्तु णिजन्तत्वेन साधितवान्। नायिकायाः स्वयमेव स्वबाहुभ्यां यद् ग्रहणं स स्वयंग्राहः। 'एरच्' (३.३५६) इत्यच्प्रत्यय इति। स्वयंग्रहणेन कण्ठे विषक्तौ विशेषेण सक्तौ बाहू यस्यास्तथाभूतां सतीम् इच्छसि अभिलषसि। वदेति शेषः। ननु महेन्द्रस्य कथं परस्त्रीसम्भोगलालसत्वमाशङ्क्यते, अत आह—चारुतया लोलं मनः प्रविष्टामिति। चारुतया चारुत्वेन सौन्दर्यातिशयेनेत्यर्थः। लोलं चञ्चलं मनः चित्तं प्रविष्टां प्राप्ताम्। रूपसौन्दर्याणां निरवधिकत्वाद् मनसः स्वभावलौल्याद् अहल्यावृत्तान्तस्य प्रसिद्धत्वाच्च न काचिदनुपपत्तिरिति भावः। अत्र मनः प्रविष्टामित्यनेन महेन्द्रस्य सङ्कल्पाभिधाना तृतीया कामावस्था दर्शिता। यथाह—

> 'चक्षुःप्रीतिः प्रथमं चित्तासङ्गस्ततोऽथ सङ्कल्पः।
> निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः।।
> उन्मादो मूर्छा मृतिरित्येताः स्मरदशा दशैव स्युः।'

इति। ननु लज्जापरतन्त्रा हि स्वभावतो नितम्बिन्यः, विशेषतश्च पतिव्रताः। अतः कथं तासां स्वयङ्ग्राहाश्लेषोपपत्तिः। अत आह—मुक्तलज्जामिति। मुक्ता त्यक्ता लज्जा यया तां, मद्बाणभिन्नहृदयत्वेन परित्यक्तलज्जाम्। अत एव चपलतया स्वयङ्ग्रहणलक्षणालिङ्गनविशेषप्रवृत्तां चेत्यर्थः। अनेन नितम्बिन्यास्त्रपानाशरूपा सप्तमी कामावस्था दर्शिता, उन्मादरूपाष्टमी च।।७।।

> **कयासि कामिन्! सहसापराधात्**
> **पादानतः कोपनयावधूतः।**
> **यस्याः करिष्यामि दृढानुतापं**
> **प्रवालशय्याशरणं शरीरम्।।८।।**

प्रकाशिका

द्वितीयं विप्रलम्भमधिकृत्याह—

कयासि कामिन्निति। कामिन्निति नर्मसचिवोचितं नर्मगर्भमामन्त्रणम्। सहसापराधात् पादानतः कोपनात्वादवधूत इत्यर्थः। यस्या इति पाठो युक्तः। दृढानुतापमिति नवम्यवस्था दर्शिता। प्रवालशय्याश्रयणं व्याधेरनुभावः। अत्र

धर्मार्थमोक्षाणामात्मनः प्रतिबन्धकत्वेनोक्तिः, कामस्य तु साधकत्वेनेति विशेषः। कामस्य वक्तुस्तथास्वभावकत्वात्।।८।।

विवरणम्

अथ द्वितीयं विप्रलम्भमधिकृत्योच्यते। स तु प्रवासनिमित्तो माननिमित्तश्चेति द्विविधः। तदुक्तं—विप्रयोगस्तु विश्लेषो रूढविस्रम्भयोर्द्विधा। मानप्रवासभेदेने[दशरूपके]ति। तत्र प्रवासनिमित्तः पुरःस्थिते पुरन्दरे न सम्भावित इति माननिमित्तमधिकृत्याह—

कयासीति। कामिन्! अपराधात् पादानतः त्वं कोपनया कया सहसा अवधूतः असि। कामिन्निति नर्मसचिवोचितं नर्मगर्भमामन्त्रणम्। अपराधपादप्रणामादेः कामिनामेवोपपत्तेरेवमुक्तम्। अपराधात् सपत्नीजननामग्रहणादिरूपात्। पादानतः बध्वाः पादयोरानतः प्रणतः। कोपनया कोपशीलया सहसा अविचार्य त्वरितमेव अवधूतः निराकृतोऽसि। अथात्मनस्तद्विषयां प्रवृत्तिं दर्शयति—अहं यस्याः शरीरं प्रवालशय्याशरणं करिष्यामीति। यस्याः कामिन्याः शरीरं देहं प्रवालशय्याशरणं प्रवालैः पल्लवैः कृता शय्यैव शरणं रक्षिता यस्य तथाविधं करिष्यामि। यस्याः शरीरं मया प्रवालशय्यामात्रशरणं विधातव्यं, तथाभूतया कया त्वमवधूतोऽसीति पूर्वेण योजना। प्रवालशय्याशरणत्वमनुतापस्यानुभावः। तमेवानुतापमाह—दृढानुतापमिति। दृढः स्थिरोऽनुतापः सन्तापो यस्य तत् तथा। अनेन तनुताख्या पञ्चमी कामावस्था दर्शिता। अत्र पुरुषार्थप्रकरणे धर्मार्थमोक्षाणां प्रतिबन्धकत्वेनोक्तिः, कामस्य तु साधकत्वेनेत्यात्मनः स्वभावो दर्शितः। अयं च स्वभावविशेषः 'पुंसां ज्ञातविशेषे'त्यामन्त्रणेनैव प्रतिपादितो वेदितव्यः।।८।।

प्रसीद विश्राम्यतु वीर! वज्रं
शरैर्मदीयैः कतमः सुरारिः।
बिभेतु मोघीकृतबाहुवीर्यः
स्त्रीभ्योऽपि कोपस्फुरिताधराभ्यः।।९।।

प्रकाशिका

अथ शस्त्रसाध्यं शत्रुविजयमप्यहमेव करिष्यामीत्याह—

प्रसीदेति। विश्राम्यतु भुवनकण्टकप्रमथनेष्वपर्यायेणाविश्रमेण च निदेशकारी ते वज्रो विश्रमं लभताम्, अत्र प्रसादं विधेहीत्यर्थः। अथ च तादृशेऽपि साधने स्वयमेकवीरः सन् स्वविक्रमलेशेनापि सुकरेऽर्थे मामाज्ञापयितुं प्रसीदेत्यर्थः। मोघीकृतबाहुवीर्यत्वं विषयाकृष्टत्वेन निरुद्यमत्वात्। स्त्रीभ्योऽपि बिभेत्विति, किमतः परं क्लीबत्वं संपादयामीति भावः। अत्र प्रकरणे पञ्चाद्यानि पद्यान्यनन्यसाध्य-

विषयाणि। षष्ठं शस्त्रसाध्यविषयम्। पञ्चस्वप्याद्यं प्रत्युपस्थितमूलहरापत्प्रतीकारविषयम्। द्वितीयं तथाविधैकदेशबाधकापत्प्रतीकारविषयम्, अधिकृतस्य मुमुक्षया तदधिकारवैकल्यात्। तृतीयं त्वद्यागतापत्प्रतीकारविषयं, स्वयमभियुञ्जानादपि विजिगीषुवृत्तप्रवृत्तात् स्वशत्त्युपचयकारिणः कस्माच्चिदात्माभिभवस्य शङ्कितत्वात्। तदनन्तरौ तु स्वसुखविषयाविति विषयभेदः। सुखादप्यसुखपरिहारे गौरवं, तत्रापि प्रत्युपस्थिते विशेषः, तस्मिन्नपि मूलहर इति यथापूर्वं गौरवमिति क्रमो विवक्षितः।।९।।

विवरणम्

एवं तावदनन्यसाध्यस्यार्थस्य प्राधान्यात् प्रथमं तद्विषयः प्रश्नः कृतः। अथ शस्त्रसाध्यं शत्रुविजयमप्यहमेव करिष्यामीत्याह—

प्रसीदेति। वीर! त्वं प्रसीद। अत्र वीरेति सम्बुद्ध्या त्वद्भृत्येन मया विजितेष्वपि शत्रुषु तव वीरत्वहानिर्नास्तीति द्योत्यते। प्रसीद मयि प्रसादं कुरु। शत्रुविजयाख्ये कार्ये मामाज्ञापयेत्यर्थः। नन्वहं वज्रपाणिः, ततो मत्प्रतिपक्षनिग्रहार्थं किमर्थमहं त्वामाज्ञापयामीत्यत आह—वज्रं विश्राम्यतु इति। त्रिभुवनकण्टकोद्धरणार्थमनवरतप्रवृत्तिकं तव वज्रमात्मभारं मद्बाणेषु निधाय परिश्रमापनोदनार्थं कञ्चित् कालं विश्राम्यतु विश्रान्तिं लभताम्। ननु कुसुममात्रायुधस्त्वं कथं वज्रसाध्यं शत्रुविजयं करिष्यसीतीमामाशङ्कां शत्रुविजयप्रकारकथनेन परिहरति—कतमः सुरारिः मदीयैः शरैः मोघीकृतबाहुवीर्यः स्त्रीभ्योऽपि बिभेत्विति। कतमः 'बा बहूनां जातिपरिप्रश्ने डतमच्' (५.३.९३)। दैत्यराक्षसादीनां बहूनां जातिपरिप्रश्नस्यात्र विवक्षितत्वात्। सुराणामरिः सुरारिः मदीयैः मत्सम्बन्धिभिः शरैः बाणैः मोघीकृतबाहुवीर्यः मोघीकृतं निष्फलीकृतम्, अभूततद्भावे च्विः। बाहुवीर्यं बाह्वोर्वीर्यं यस्य तथाभूतः सन्, विषयाकृष्टतया निरुद्यमत्वान्निष्फलदोष्प्रतापो भूत्वा स्त्रीभ्योऽपि बिभेतु स्त्रीसकाशादपि भीतिमान् भवतु। किमतः परं तव रिपूणां क्लीबत्वं सम्पादयिष्यामीति भावः। स्त्रीणां भयजनकत्वमाह—कोपस्फुरिताधराभ्य इति। कोपेन निजशासनोलङ्घनसम्भवेन रोषेण स्फुरितः चञ्चलोऽधरो यासां तास्तथोक्ताः। रोषकृतेनाधरस्फुरणमात्रेणापि बिभेतु, किं पुनर्वचनादिनेति भावः।।९।।

तव प्रसादात् कुसुमायुधोऽपि
सहायमेकं मधुमेव लब्ध्वा।
कुर्यां हरस्यापि पिनाकपाणे-
र्धैर्यच्युतिं के मम धन्विनोऽन्ये॥१०॥

प्रकाशिका

अथ विकत्थनोदीर्णदर्पस्तैषां मन्त्रमजानन्नपि दैवात् तदभिमते परमदुस्साधेऽपि कार्ये स्वशक्त्युपन्यासं कुर्वन् सर्वातिशायितामात्मनः प्रकटयति—

तव प्रसादादिति। तव प्रसादादित्यनौद्धत्येन प्रभुकोपपरिहारः। सहायापेक्षापि नात्यन्तमस्तीत्याह—सहायमिति। कुर्यामिति संभावनायां लिङ्। हरस्य धैर्यच्युतिकारितामपि मयि संभावयामीत्यर्थः। पिनाकपाणेः तादृशसाधनसमग्रस्य। हरस्य स्वयं चतुर्दशभुवनसंहर्तुरित्यर्थः। 'प्रचुरतमसे तत्संहर्त्रे हराय नमो नम' इति वचनात्। अन्यद् दण्डापूपिकया सिद्धमित्याह—के ममेति। किं क्षेपे, अन्ये दूरनिरस्ता इत्यर्थः। अत्र साधनसहायपौष्कल्यलक्षणे कारणे असमग्रेऽपि साध्यभावलक्षणस्य कार्यस्य भाववचनाद् विशेषोक्तिरनुक्तनिमित्ता। निमित्तं च स्ववीर्यातिशयो ध्वन्यते। अनयोश्चेन्द्रकामयोः प्रतिनायकत्वाद् धीरोद्धतत्वमुपपन्नम्।।१०।।

विवरणम्

इत्थं विकत्थनोदीर्णदर्पः कन्दर्पस्तेषां मन्त्रमजानन्नपि परमदुस्साधेऽपि देवकार्ये स्वसामर्ध्यप्रकटनं कुर्वन् गर्वोद्धतः सर्वातिशायितामात्मनः प्रदर्शयति—

तवेति। अहं कुसुमायुधोऽपि तव प्रसादाद् मधुम् एकमेव सहायं लब्ध्वा पिनाकपाणेः हरस्यापि धैर्यच्युतिं कुर्याम्। कुसुमायुधः कुसुममेवायुधं यस्य तथाभूतः सन्नपि। अनेनात्यन्तदुर्बलसाधनत्वमात्मनो दर्शितम्। ननु तथाविधस्य तव कथं तादृशे कार्ये सामर्थ्यमित्यत्राह—तव प्रसादादिति। तत्तादृशो हि प्रभूणां प्रभावः, यदेते नितान्तहीनबलमपि भृत्यं निजाज्ञया बलवत्तरं कुर्वन्ति। यथोक्तं शाकुन्तले—

सिध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः
सम्भावनागुणमवेहि तमीश्वराणाम्।
किं वाऽभविष्यदरुणस्तमसां निहन्ता
तं चेत् सहस्रकिरणो धुरि नाऽकरिष्यत्।।

इति। अनेन वचनेनात्मप्रशंसानिमित्तकोपपरिहारार्थमौद्धत्यपरिहारः कृत इत्यवसेयम्। अस्मिन् कर्मणि सहायापेक्षापि नात्यन्तमस्तीत्याह—मधुमेकं सहायं लब्ध्वा इति। मधुं वसन्तम् एकं निस्सहायम्। एवशब्दः सहायान्तरनैरपेक्ष्यमेव द्रढयति। लब्ध्वा सम्प्राप्य। पिनाकपाणेः, पिनाक इति हरचापस्य नाम। 'पिनाकः शूलिनो धनुरि'ति भोजः। पिनाकः पाणौ यस्य तस्य। अनेन हरस्य प्रबलसाधनत्वमुक्तम्। हरस्य, हरतीति हरः, चतुर्दशभुवनसंहर्तुरपीत्यर्थः। 'प्रचुरतमसे तत्संहर्त्रे हराय नमो नमः'

इति वचनात्। अपिशब्देन हरस्य लोकोत्तरत्वमुक्तम्। धैर्यस्य च्युतिं विश्लेषम्। कुर्यामिति सम्भावनायां लिङ्। इदानीमत्यन्तदुश्चरेऽपि तपसि वर्तमानस्य हरस्य धैर्यच्युतिमपि मयि सम्भावयामीत्यर्थः। धृतपिनाकस्य हरस्य जयेऽपि समर्थस्य ममान्येषां धन्विनां जयः पुनरीषत्कर एवेत्याह—ममान्ये धन्विनः के इति। अन्ये हरव्यतिरिक्ताः धन्विनः धनुष्मन्तः। 'धन्वी धनुष्मान् धानुष्क' इत्यमरः। के, किंशब्दः क्षेपे। न केऽपीत्यर्थः। अन्ये तृणसमाना एवेति भावः। अनेनान्यजयस्य दण्डापूपिकया सिद्धत्वमुक्तमित्यर्थापत्तिरलङ्कारः। दण्डापूपिकयार्थान्तरापातनमर्थापत्तिरिति। जयकारणानामायुधपौष्कल्यादीनामभावेऽपि जयोत्पत्तिवचनाद् विभावना च। कारणाभावे कार्योत्पत्तिर्विभावना चेति।।१०।।

अथोरुदेशादवतार्य पाद-
माक्रान्तिसम्भावितपादपीठः।
सङ्कल्पितेऽर्थे विवृतात्मशक्ति-
माखण्डलः काममिदं बभाषे॥११॥

प्रकाशिका

अथैवंविधया कामोक्त्या लब्धाश्वासस्येन्द्रस्य वृत्तमाह—

अथेति। अत्र चेष्टाविशेषेणादरः प्रतीयते। सङ्कल्पितेऽर्थे विवृतात्मशक्तिमित्यादरे हेतुः। आखण्डलः काममिदमिति। एवं हि कार्यतत्त्वमिति भावः। आखण्डलशब्देन विश्वोत्तरत्वं, काममिति कान्तिमात्रसारत्वम्, इदंशब्देन वक्ष्यमाणवाक्यार्थपरामर्शिनानुवृत्तिपरत्वादि च ध्वन्यते।।११।।

विवरणम्

अथ निजमनोरथपूरणक्षमेणैवम्भूतेन मदनवचनेन जातप्रत्याश्वासस्य वृत्रजितः प्रवृत्तिमाह—

अथेति। अथ आखण्डलः ऊरुदेशात् पादमवतार्य काममिदं बभाषे। अथ हरविषयसामर्थ्यप्रतिपादनानन्तरम् आखण्डल इन्द्रः, अत्राखण्डलशब्देन विश्वोत्तरत्वमिन्द्रस्य द्योत्यते। अखण्डमैश्वर्यं ज्ञानं वा लाति गृह्णातीत्यखण्डलः, स एवाखण्डलः। 'अन्येषामपि दृश्यते' (६.३.१३७) इति दीर्घः पृषोदरादिसूत्रेण वा। ऊरुदेशात् पादमवतार्य आदरातिशयात् प्रसादातिशयाच्च ऊरुदेशस्थितं पादमधः प्रसार्येत्यर्थः। कामं कामदेवम्, अनेनात्र कान्तिमात्रसारत्वमुक्तम्। कमु कान्ताविति धातुः अत्राखण्डलकामशब्दाभ्यां तयोः परस्परोपकारकत्वं सूचितम्। इदं वक्ष्यमाणं,

बभाषे उक्तवान्। आखण्डलं विशिनष्टि—आक्रान्तिसम्भावितपादपीठः इति। आक्रान्त्या आक्रमणेन स्वपादविन्यासेनेत्यर्थः, सम्भावितं सम्मानितं पादपीठं येन स तथोक्त। स्वस्मिन् स्वामिनः पादविन्यास एव हि पादपीठस्यानुग्रह इति भावः। कामविषयादरातिशये हेतुमाह—सङ्कल्पितेऽर्थे विवृतात्मशक्तिमिति। सङ्कल्पिते मन्त्रकुशलैर्देवैः सह सम्मन्त्र्य तैः सम्यक्कल्पिते व्यवस्थापितेऽर्थे परमेश्वरचित्ताकर्षणरूपे विवृता प्रकाशिता आत्मनः शक्तिः सामर्थ्यं येन। हृदयस्थितं कार्यतत्त्वमवधार्य तत्सम्पादननिपुणा हि भृत्याः प्रभूणामादरपदमिति भावः।।११।।

सर्वं सखे! त्वय्युपपन्नमेत-
दुभे ममास्त्रे कुलिशं भवाँश्च।
पूर्वं तपोवीर्यमहत्सु कुण्ठं
त्वं सर्वतोगामि च साधकं च॥१२॥

प्रकाशिका

तत्र स्तुत्या तावदस्य वीर्यं सन्धुक्षयति—

सर्वमिति। एतद् यत् त्वया शक्यत्वेनोक्तम्। अत्र हेतुमाह—उभे इति। तत्र विशेषमाह—पूर्वमिति। कुण्ठं गमनसाधनक्रिययोरक्षमम्। 'कुण्ठो मन्दः क्रियासु य' इति सिंहः। सर्वतः तपोवीर्यमहत्स्वपीत्यर्थः। अनेन तदुक्त्यभ्युपगम कृतः।।१२।।

विवरणम्

अथ स्तुत्या तस्य वीर्यं सन्धुक्षयन्नाह—

सर्वमिति। सखे! एतत् सर्वं त्वयि उपपन्नम्। हे सखे! आदरातिशयद्योतनार्थमिदमामन्त्रणम्। एतत् त्वदुक्तमर्थजातं सर्वं, नैवात्र किञ्चिदर्थजातमनुपपन्नमस्तीति भावः। त्वयि उपपन्नं युक्तं, त्वदुक्तं सामर्थ्यं सर्वमपि त्वय्यस्त्येवेत्यर्थः। उपपन्नत्वमेवोपपादयति—मम उभे अस्त्रे इति। विद्येते इति शेषः। के पुनस्ते इत्यत्राह—कुलिशं भवांश्चेति। कुलिशं वज्रम्। तयोरेकमस्त्रं कुलिशम्, एकस्तु भवानेवेत्यर्थः। उभयोर्मध्ये कुलिशस्य न्यूनतामाह—पूर्वं तपोवीर्यमहत्सु कुण्ठमिति। पूर्वं पूर्वोक्तं वज्रं तपोवीर्यं तपश्शक्तिः तेन महत्सु लोकोत्तरेषु। अस्त्रप्रयोगो हि वीर्यवत्सु कर्तव्य इति वीर्यपदप्रयोगः। कुण्ठमशक्तं, तद्विषये गमने स्वार्थसाधने चासमर्थमित्यर्थः। 'कुण्ठो मन्दः क्रियासु य' इति सिंहः। कामस्य व्यतिरेकमाह—त्वं सर्वतोगामि च साधकं चेति। त्वं त्वद्रूपमस्त्रं सर्वतोगामि सर्वतः तपोवीर्यमहत्स्वपि गन्तुं शीलमस्येति तथा। साधकं स्वार्थसाधकं

च, न केवलं तत्प्राप्तिमात्रसमर्थम्, अपि तु स्वकार्यभूततत्समाधिभङ्गसमर्थं चेत्यर्थः। अस्त्रापेक्षया सर्वतोगामिशब्दस्य साधकशब्दस्य च नपुंसकलिङ्गत्वमित्यवसेयम्। अनेन श्लोकेनानन्यसाध्ये शस्त्रसाध्ये च कर्मण्यहं कुशल इति यत् कामदेवेनोक्तं, तदेवानूदितमित्यवसेयम्।।१२।।

अवैमि ते सारमतः खलु त्वां
कार्ये गुरुण्यात्मसमं नियोक्ष्ये।
व्यादिश्यते भूधरतामवेक्ष्य
कृष्णेन देहोद्वहनाय शेषः।।१३।।

प्रकाशिका

यदहं त्वद्वीर्यं जानामि, तत्र केवलमनया मदुक्त्यावसेयम्, अपितु मत्प्रवृत्त्यापीत्याह—

अवैमीति। सारं बलम्। आत्मसमम् अनुरक्तं शुचिं चेत्यर्थः। एव'मनुरक्तः शुचिर्दक्ष' इति प्रधानगुणत्रयविशिष्टेऽमात्ये त्वयि स्थिते कमन्यमीदृशेऽर्थे नियोक्ष्य इति भावः। कर्त्रभिप्राये क्रियाफल आत्मनेपदम्। भूधरतामवेक्ष्य भूभारधारणक्षमं मत्वा।।१३।।

विवरणम्

अपिच अहं ते सकलमपि वीर्यं जानामीति यदुक्तं, तत्र न केवलमुक्तिमात्रं प्रमाणम्, अन्यैरत्यन्तदुस्साधेऽर्थे मन्नियोगश्चेत्याह—

अवैमीति। अहं ते सारम् अवैमि। सारं बलम्। 'सारो बले स्थिरांशे च' इत्यमरः। अवैमि जानामि। किं तर्हि तत्र प्रमाणमित्यत्राह—अतः खलु अहं त्वां गुरुणि कार्ये नियोक्ष्ये इति। अतः त्वद्वीर्यज्ञानात्। खलुशब्दोऽवधारणे। त्वद्वीर्यज्ञानादेव हेतोरित्यर्थः। नह्यज्ञातशक्तयो भृत्याः प्रभुणा गुरुणि कार्ये विनियुज्यन्त इति भावः। गुरुणि अनन्यसाध्ये कार्ये कर्तव्येऽर्थे नियोक्ष्ये नियोगं करिष्ये। 'स्वरितञितः कर्त्रभिप्राये—' (१.३.७२) इत्यात्मनेपदम्। अस्मादभीष्टसाधनाय हि त्वामहं नियोक्ष्ये, न तु परीक्षाद्यर्थमित्यर्थः। न केवलं तव वीर्यवत्त्वमात्रम्, अपि तु अनुरक्तत्वं निर्व्याजत्वं चास्तीत्याह—आत्मसममिति। आत्मनैव समं तुल्यम्। 'तस्य दण्डवतो दण्डः स्वदेहान्न व्यशिष्यत' (१७.६२) इति रघुवंशोक्तः प्रकारोऽनेन दर्शितः। 'अनुरक्तः शुचिर्दक्ष' इत्यादयोऽमात्यगुणाश्च प्रतिपादिताः। सर्वामात्यगुणविशिष्टे त्वयि स्थिते सति कमन्यमीदृशे कार्ये नियोक्ष्य

इति भावः। गुणावधारणमेवात्मार्थे नियोगे हेतुरिति यदुक्तं, तत् प्रतिवस्तूपमयोपपादयति—शेषः भूधरतामवेक्ष्य कृष्णेन देहोद्वहनाय व्यादिश्यत इति। शेषोऽनन्तः। भूधरतां भुवो भूमेः धरः धर्ता। धरतीति धरः, 'धृञ् धारण' इति धातोः पचाद्यचि रूपम्। भूधरस्य भावो भूधरता, ताम्। अवेक्ष्य ज्ञात्वा कृष्णेन विष्णुना देहोद्वहनाय त्रैलोक्याधिष्ठितस्यात्मशरीरस्योद्वहनायोद्धरणाय व्यादिश्यते नियुज्यते। अनन्तस्य पृथिवीधारणमवधार्यैव हि भगवता नारायणेनायमात्मनः शयनसाधनतां नीत इत्यर्थः।।१३।।

आशंसता बाणगतिं वृषाङ्के
कार्यं त्वया नः प्रतिपन्नकल्पम्।
निबोध यज्ञांशभुजामिदानी-
मुच्चैस्तरामीप्सितमर्थमत्र।।१४।।

प्रकाशिका

नियोगश्च त्वयाङ्गीकृतप्राय एवेत्याह—

आशंसतेति। आशंसता ईषद् ब्रुवता। 'शंसु स्तुतौ' इति धातुः, न तु 'आङः शसि इच्छायाम्' इति, तस्यात्मनेपदित्वात्।

> आशंसते स्यादिच्छायां शंसतीति स्तुतौ भवेत्।
> हिंसायां शसतीच्छायामाशास्ते शास्ति शासने।।

इति निघण्टुः। ईषद्वचनं च कर्तव्यतयानभिसंहितत्वात्। प्रतिपन्नकल्पं, न तु सर्वथा प्रतिपन्नम्, अस्माभिरनिवेदितत्वात्। तस्मादिदं निवेद्यत इत्याह—निबोधेति। उच्चैस्तरामितीप्साया विशेषणम्। उच्चैस्तिरामिति वा पाठः। अत्र वृषाङ्के। देवानामिदानीं यः सातिशयमीप्सितोऽर्थः, तं परमेश्वरविषयमवगच्छेत्यर्थः।।१४।।

विवरणम्

कुर्यां हरस्यापि पिनाकपाणेः'(३.१०)इति वदता त्वया मन्नियोगः प्रायेणाङ्गीकृत एवेत्याह—

आशंसतेति। वृषाङ्के बाणगतिम् आशंसता त्वया नः कार्यं प्रतिपन्नकल्पम्। वृषाङ्के वृषध्वजे बाणगतिं बाणस्य गतिं प्रवृत्तिम् आशंसता ईषद् ब्रुवता। ईषद्वचनमत्र तदेव देवकार्यमिति निश्चयाभावात्। 'शंसु स्तुतौ' इति धातोराङ्पूर्वस्य शत्रन्तमिदं रूपं, न तु 'आङः शसि इच्छायाम्' इत्यस्य धातोः, तस्यात्मनेपदित्वात्। यथोक्तं देवेन—

आशंसते स्यादिच्छायां शंसतीति स्तुतौ भवेत्।
हिंसायां शसतीच्छायामाशास्ते शास्ति शासने।।

इति। त्वया भवता नः कार्यं परवशीकरणरूपं प्रयोजनं प्रतिपन्नकल्पम् अङ्गीकृतप्रायं, न तु सर्वथैवाङ्गीकृतम्, अस्माभिरनुक्तत्वात्। अत एवाह—निबोधेत्यादिना। यज्ञांशभुजाम् इदानीम् उच्चैस्तराम् ईप्सितम् अर्थम् अत्र निबोध। अनेन तारकासुरनिमित्तयज्ञविप्लवनिवृत्त्यर्थोऽयं प्रयास इति सूचितम्। अत एवाह—इदानीमिति। प्रवृद्धतारकासुरोपद्रवेऽस्मिन् काले। उच्चैस्तरामिति ईप्साविशेषणम्। सातिशयमीप्सितमित्यर्थः। अर्थं प्रयोजनम् अत्र वृषाङ्के विषये निबोध जानीहि। 'बुध अवगमन' इति धातोर्लोटि रूपम्। सर्वदा सर्वविषयाणामीप्सितानामस्माकं त्वमेव साधकः। इदानीमत्यन्तमीप्सितोऽर्थः परमेश्वरविषय इत्यवगच्छेत्यर्थः।।१४।।

अमी हि वीर्यप्रभवं हरस्य
जयाय सेनान्यमुशन्ति देवाः।
स च त्वदेकेषुनिपातहार्यो
ब्रह्माङ्गभूर्ब्रह्मणि योजितात्मा।।१५।।

प्रकाशिका

तत् कथमित्याह—

अमी इति। हिशब्दोऽस्यार्थस्य पूर्वोक्तं प्रत्युपपादकत्वं द्योतयति। उशन्ति इच्छन्ति। तत्र का मय्यपेक्षेत्याह—स चेति। एकेति सुकरत्वं द्योतयति। ब्रह्मा अङ्गभूस्तनयो यस्य। तथाच पुराणसिद्धम्। वक्ष्यति च—'यमामनन्त्यात्मभुवोऽपि कारणम्' (५.८१) इति। अनेन पूर्वमपि देवः पुत्रवानिति प्ररोचयति। तर्हि स एव देवः किं न प्रार्थित इत्याह—ब्रह्मणि प्रत्यगात्मनि योजितात्मा योगेनार्पितान्तःकरणः।।१५।।

विवरणम्

हरविषयमभिलाषमेव स्फुटयति—

अमी इति। अमी देवाः जयाय हरस्य वीर्यप्रभवं सेनान्यम् उशन्ति हि। अमी देवाः, ये त्वत्प्रसादकाङ्क्षयात्र तिष्ठन्तः। जयाय तारकासुरविजयाय हरस्य जगत्संहर्तुः परमेश्वरस्य। अनेन तत्सुतस्य शत्रुनिग्रहसामर्थ्यं ध्वन्यते। वीर्यप्रभवं वीर्याद् रेतसः प्रभव उद्भवो यस्य तं सेनान्यं सेनानायकम् उशन्ति इच्छन्ति। 'वश

कान्तौ' इति धातुः। 'ग्रहिज्या—'(६.१.१६) इत्यादिना संप्रसारणम्। अस्यार्थस्य पूर्वोक्तमर्थं प्रत्युपपादकत्वं द्योतयितुं हिशब्दः। अत्र किं मया कर्तव्यमित्याह—स च त्वदेकेषुनिपातहार्य इति। सः हरः। चशब्देनास्य चित्ताकर्षणमन्यैरशक्तमिति द्योत्यते। सोऽपीत्यर्थः। त्वदेकेषुनिपातहार्यः त्वया एकस्यैवेषोर्निपातेन निपतनेन हार्यः हर्त्तुं शक्यः। एकशब्देनात्र त्वया सुकरोऽयमर्थ इति द्योत्यते। चशब्दोक्तं हरस्य विशेषमेवाह—ब्रह्माङ्गभूरिति। ब्रह्मा सकलजगन्निर्माणकर्मठो विधिरेवाङ्गभूस्तनयो यस्य स तथा। श्रुतिप्रसिद्धश्चायमर्थः। वक्ष्यति च—'यमामनन्त्यात्मभुवोऽपि कारणमि'ति। पुराणपुरुषे तस्मिन्नन्ये प्रयासा निरर्थका एवेत्यर्थः। पुनरपीदानीमस्ति विशेष इत्याह—ब्रह्मणि योजितात्मेति। ब्रह्मणि परमात्मनि योजितः एकीभावमापादितः आत्मा जीवात्मा येन स तथा। जीवपरैक्यमवगम्य स्थित इत्यर्थः। अनेन तपोवीर्यमहत्त्वमुक्तम्। तेन चान्यैरसाध्यत्वं द्योत्यते। मदनेन साध्यत्वं तु 'त्वं सर्वतोगामि च साधकं च'(३.१३)इत्यत्रोक्तम्।।१५।।

तस्मै हिमाद्रेः प्रयतां तनूजां
यतात्मने रोचयितुं यतस्व।
योषित्सु तद्वीर्यनिषेकभूमिः
सैव क्षमेत्यात्मभुवोपदिष्टम्।।१६।।

प्रकाशिका

उपायोऽपि तत्र कथ्यत इत्याह—

तस्मा इति। तस्मा इति 'रुच्यर्थानां प्रीयमाणः' (१.४.३३) इति चतुर्थी। हिमाद्रेरिति प्रयतामिति च परमेश्वरयोग्यतां द्योतयतः। यतस्वेत्यत्र हेतुः—यतात्मन इति। अन्यां किन्नेत्याह—योषित्स्विति।।१६।।

विवरणम्

ननु मया हरः कस्या योषितो वशं नेतव्य इत्यत्राह—

तस्मा इति। हिमाद्रेः तनूजां तस्मै रोचयितुं यतस्व। हिमाद्रेः हिमवतः तनूजां पुत्रीम्। अनेनाभिजात्ययुक्ततया पार्वत्याः परमेश्वरयोग्यता दर्शिता। तस्मै हराय। 'रुच्यर्थानां प्रीयमाणः'(१.४.३३) इति सम्प्रदानसंज्ञा। रोचयितुं हरस्य तस्यां रुचिमुत्पादयितुमित्यर्थः। यतस्व यत्नं कुरु। ननु किमर्थं यतस्वेत्युक्तं, न रोचयेति। अत आह—यतात्मन इति। यतः संयतः आत्मा अन्तःकरणं येन तस्मै।

विषयव्यावृत्तचित्तायेत्यर्थः। स्वगुणैरपि पार्वत्याः परमेश्वरयोग्यतामाह—प्रयतामिति। परिशुद्धान्तःकरणामित्यर्थः। किमर्थमस्यान्यस्यां रुचिं नोत्पादयेयम्, अत आह—योषित्सु तद्वीर्यनिषेकभूमिः सा एव क्षमा इति आत्मभुवा उपदिष्टमिति। योषित्सु स्त्रीषु तस्य हरस्य वीर्यनिषेकस्य रेतस्सेचनस्य भूमिः अधिकरणं सा पार्वत्येव क्षमा योग्या, नान्याः स्त्रियः। स्त्रीणां मध्ये सैव हरवीर्यनिषेकाधिकरणत्वयोग्येत्यर्थः। नन्वत्र किं प्रमाणमित्यत्राह—इत्यात्मभुवोपदिष्टमिति। साक्षात् परमेष्ठिनैवोपदिष्टोऽयमर्थ इत्यर्थः। नास्य कदाचिदप्यन्यथात्वं भविष्यतीति भावः।।१६।।

गुरोर्नियोगाच्च नगेन्द्रकन्या
स्थाणुं तपस्यन्तमधित्यकायाम्।
अन्वास्त इत्यप्सरसां मुखेभ्यः
श्रुतं मया मत्प्रणिधिः स वर्गः॥१७॥

प्रकाशिका

तयोस्तु परिचयः प्रवृत्त एवेतयाह—

गुरोरिति। अन्वास्ते उपास्ते। ननु स्त्रीवचसि कथं प्रत्यय इत्याह—मत्प्रणिधिरिति।।१७।।

विवरणम्

ननु हिमाद्रौ वर्तते सा पार्वती, हरस्तु कैलासशिखरे। अतः कथं तयोः परस्परसन्दर्शनोपपत्तिः, कथं वा च परस्परसन्दर्शनेन विना रुचिमुत्पादयेयमित्यत्राह—

गुरोरिति। नगेन्द्रकन्या अधित्यकायां तपस्यन्तं स्थाणुं गुरोः नियोगाद् अन्वास्ते इति मया अप्सरसां मुखेभ्यः श्रुतं च। नगेन्द्रकन्या पार्वती अधित्यकायां हिमवच्छिखरे। 'उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका' इत्यमरः। तपस्यन्तं तपश्चरन्तं स्थाणुं हरं गुरोः पितुः नियोगाद् निदेशाद् अन्वास्ते उपास्ते इति उक्तप्रकारेण अप्सरसामप्सरःस्त्रीणां मुखेभ्यः, अप्सरसां वचनादित्यर्थः। बहूनामप्सरसां मुखेभ्यो बहु श्रुतमिति बहुवचनस्यार्थः। इदं च निर्णये हेतुः। चकारः पूर्वोक्तसमुच्चयार्थः। नन्वनृतवादिन्यो हि स्त्रियः, अतः कथं तद्वचस्सु विश्वासः। अत आह—सः वर्गः मत्प्रणिधिः इति। स वर्गः अप्सरसां गणः मत्प्रणिधिः मम प्रणिधिः गूढपुरुषः। 'यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पश' इत्यमरः। चारवचस्सु विश्वासो युक्त एव, 'चारैः पश्यन्ति राजान' इत्युक्तत्वात्।।१७।।

तद् गच्छ सिद्ध्यै कुरु देवकार्य-
मर्थोऽयमर्थान्तरभाव्य एव।
अपेक्षते प्रत्ययमुत्तमं त्वां
बीजाङ्कुरः प्रागुदयादिवाम्भः॥१८॥

प्रकाशिका

उपसंहरति—

तदिति। तत् तस्माद् यस्मादीदृशोऽर्थः, स चोपायः, उपायस्य चोपस्थितत्वम्। सिद्ध्यै गच्छ त्वद्गमनं सिद्धये भूयात्। कुर्विति नियोगः। ननु: देवीसन्निधिरेव तत्समाधिभङ्गायालमित्याह—अर्थ इति। अर्थान्तरेण देवीसन्निधानादिना भाव्यः साध्यः। प्रत्ययं हेतुम्। 'प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु' इत्यमरः। अत्र दृष्टान्तमाह—बीजाङ्कुर इति। यथा मृत्संयोगादिकारणान्तरसमवधानेऽपि बीजाङ्कुरः स्वोदयाय प्रधानकारणमम्भोऽपेक्षते, तथा देवीसन्निधानेऽपि त्वामयमर्थ इत्यर्थः॥१८॥

विवरणम्

प्रकृतमुपसंहरति—

तदिति। तत् त्वं सिद्ध्यै गच्छ। तद् यस्मात् सेनानीलाभरूपं देवकार्यं पार्वतीपरमेश्वरसङ्गममात्रलभ्यं, पार्वती च पितृनियोगात् परमेश्वरसन्निधावेव वर्तते, तस्मादित्यर्थः। अनेन सिद्धेः कालप्राप्तिरुक्ता। सिद्ध्यै कार्यसिद्ध्यर्थं गच्छ गमनं कुरु। त्वद्गमनं सिद्ध्यै भूयादित्याशीर्वादोऽनेन वाक्येन विवक्षितः। 'अनुग्रहं संस्मरणप्रवृत्तमिच्छामि संवर्धितमाज्ञया ते' (३.३) इत्यत्राभ्यर्थितामाज्ञामेव करोति—देवकार्यं कुरु इति। देवानां कार्यं देवकार्यम्। तच्च परमेश्वरवशीकरणरूपम्। कुरु विधेहि। ननु यदि देवसन्निधावेव देवी विद्यते, तर्हि सा स्वभावसुभगया निजशरीरसुषमयैव देवहृदयमाक्रष्टुं क्षमा किमस्मद्गमनेन। अत आह—अर्थान्तरभाव्य एवायम् अर्थः उत्तमं त्वाम् अपेक्षत इति। अर्थान्तरभाव्यः अर्थान्तरेण त्वद्व्यतिरिक्तेन देवीसन्निधानादिलक्षणेन भाव्य उत्पाद्य एव सन्नपि। एवशब्दः कामदेवस्य प्रयासाधिक्यं वारयति। अयं हरवशीकरणरूपः अर्थः प्रयोजनम्। 'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिष्वि'त्यमरः। उत्तमं प्रकृष्टं प्रत्ययं हेतुम्। 'प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु' इत्यमरः। त्वाम् अपेक्षते आकाङ्क्षति। हरचित्ताकर्षणरूपं देवकार्यं देवीसन्निघानादिभिः साध्यमपि प्रकृष्टकारणत्वे न त्वां

प्रतिपालयतीत्यर्थः। त्वत्प्राप्त्यनन्तरमेवान्येषां साधनानां सफलत्वमिति भावः। अत्रोपमां दर्शयति—बीजाङ्कुरः उदयात् प्राग् अम्भः इवेति। बीजाङ्कुरः, कलमादिबीजानामङ्कुरः। 'अङ्कुरोऽभिनवोद्भिदी'त्यमरः। उदयात् प्राक् स्वोद्भवात् पूर्वम् अम्भः जलमिव। नहि जलसेकमन्तरेण क्षितिवपनादिसंयुक्ताद् बीजादङ्कुरोत्पत्तिरिति भावः।।१८।।

अस्मिन् सुराणां विजयाभ्युपाये
तवैव नामास्त्रगतिः कृती त्वम्।
अप्यप्रसिद्धं यशसे हि पुंसा-
मनन्यसाधरणमेव कर्म॥१९॥

प्रकाशिका

एवं नियुज्य त्रिभिः श्लोकैः पुनस्तमुद्धर्षयति—

अस्मिन्निति। नाम सम्भावनायाम्। अत्र न त्वदन्यस्यास्त्रव्यापारः सम्भाव्यते। तस्मात् त्वं धन्य इत्यर्थः। उपपादयति—अपीति। अप्रसिद्धमपि, किमुत प्रसिद्धमीदृशं कर्मेत्यर्थः।।१९।।

विवरणम्

इत्थं कामदेवं नियुज्य तमेव प्रोत्साहयत्यस्मिन्नित्यादिना श्लोकत्रयेण—

अस्मिन्निति। सुराणाम् अस्मिन् विजयाभ्युपाये तवैव अस्त्रगतिः नाम। सुराणां देवानाम् अस्मिन् इदानीं विचार्य कल्पिते विजयाभ्युपाये विजयस्तारकासुरजयः, तत्राभ्युपायश्च सेनानीलाभाय परमेश्वरचित्ताकर्षणं, तत्र। तवैवास्त्रगतिः अस्त्राणां प्राप्तिः, नान्येषामित्यर्थः। नामशब्दः सम्भावनायाम्। अस्मिन् कर्मणि तवैवास्त्रगतिः सम्भाव्यत इत्यर्थः। ततः किमित्यत्राह—त्वं कृती। कृती धन्य इत्यर्थः। धन्यत्वमेवोपपादयति—अनन्यसाधारणमेव कर्म अप्रसिद्धमपि पुंसां यशसे इति। अनन्यसाधारणम् अन्येषां साधारणं समानं न भवतीति अनन्यसाधारणम् एवशब्दः साधारणत्वलेशस्याप्यभावमाह। अन्यैः कदाचिदपि कर्तुमशक्यं कर्मेत्यर्थः। अप्रसिद्धं प्रसिद्धिरहितमपि पुंसां पुरुषाणां यशसे यशः सम्भावयितुं समर्थं भवतीत्यर्थः। अप्रसिद्धं यत्किञ्चित् कर्मापि तस्यैव सामर्थ्यमिति व्यवस्थिते सति पुंसां यशस्करं भवति। परमेश्वरचित्ताकर्षणलक्षणमिदं तु कर्मान्यैर्दुष्करं सुप्रसिद्धं चेति भवानतिमहतो यशसो भाजनं भविष्यत्येवेति भावः।।१९।।

सुराः समभ्यर्थयितार एते
कार्यं त्रयाणामपि विष्टपानाम्।
चापेन ते कर्म न चातिहिंस्र-
महो यथासि स्पृहणीयवीर्यः॥२०॥

प्रकाशिका

न केवलं भावियशोभाजनतया धन्यस्त्वं, किन्त्विदानीमपि धन्य एवेत्याह—

सुरा इति। सुराः स्वयं वरदाः। त्रयाणामपीति सङ्ख्याश सन्निकर्ष उपादीयमानोऽपिशब्दः सङ्ख्येयस्य सजातीयान्तरं व्यवच्छिनत्ति। नातिहिंस्रमिति तपोमात्रहिंसामनुजानाति। यथाशब्दो योग्यतायाम्। तस्माद् युक्तमेव स्पृहणीयशक्तिरसीत्यर्थः। क्षीरस्वामी तु 'खेदानुकम्पासन्तोषविस्मयामन्त्रणे वत' इति सन्तोष उदाहृतवान् 'बतासि स्पृहणीयवीर्य' इति पाठेन।।२०।।

विवरणम्

न केवलं भवतो भावियशोभाजनतया धन्यत्वम्, अपि तु इदानीमपि त्वं धन्यएवासीत्याह—

सुरा इति। एते सुराः समभ्यर्थयितारः। एते सगौरवं त्वन्मुखमेवावलोक्य परितो वर्तमानाः सुराः देवाः समभ्यर्थयितारः सम्यगभ्यर्थयितारः याचितारः। याचने सम्यक्त्वं गत्यन्तराभावात्। ये देवाः सर्वेषामपि लोकानां वरदाः, ते त्वामभ्यर्थयन्त इत्यर्थः। प्रयोजनं तु न केवलं देवानामेवेत्याह—त्रयाणामपि विष्टपानां कार्यमिति। त्रयाणामपीत्यपिशब्देन लोकान्तरव्यवच्छेद उक्तः। तारकासुरपरिभूताः सर्वेऽपि लोकास्त्वयैवानुग्राह्याः सञ्जाता इत्यर्थः। एवं सर्वलोकानुग्रहे क्रियमाणे प्राणिहिंसा—जनितोऽपि दोषस्तव न सम्भवतीत्याह—ते चापेन कर्म अतिहिंस्रं न चेति। ते तव चापेन धनुषा क्रियमाणं कर्म अतिहिंस्रम् अत्यन्तहिंसाशीलं न च। सर्वेषामपि चापेन क्रियमाणं कर्म शरीरनाशकत्वेन हिंस्रमेव भवति। तव तु तपोमात्रहिंसया नात्यन्तहिंस्रमिति भावः। फलितमाह—त्वं स्पृहणीयवीर्यः असि अहो बत इति। स्पृहणीयमभिलषणीयं वीर्यं यस्य स तथा। ममाप्येवंविधं वीर्यं भूयादिति सर्वैरप्यभिलषणीयवीर्योऽसीत्यर्थः। अभिनन्द्यवीर्योऽसीति वा। अहो इति विस्मये। बतेति सन्तोषे। 'अहो हि च विस्मये' इति, 'खेदानुकम्पासन्तोषविस्मयामन्त्रणे बत' इति च सिंहः। त्वद्वीर्यस्वरूपनिरूपणावस्थायां ममापि विस्मयसन्तोषौ जायेते इत्यर्थः। 'अहो यथासी'ति पाठे यथाशब्दो योग्यतायाम्। युक्तमेव स्पृहणीयवीर्योऽसीत्यर्थः।।२०।।

मधुश्च ते मन्मथ! साहचर्या-
दसावनुक्तोऽपि सहाय एव।
समीरणश्चोदयिता भवेति
व्यादिश्यते केन हुताशनस्य॥२१॥

प्रकाशिका

यच्चोक्तं 'सहायमेकं मधुमेव लब्ध्वा' (३.१०) इति, तदपि ते न प्रार्थ्यमित्याह—

मधुरिति। साहचर्यात् सख्यादित्यर्थः। समीरणः केन व्यादिश्यत इत्यन्वयः। अनयोक्तिभङ्ग्या वसन्तस्य नियोग इति पर्यायोक्तम्।।२१।।

विवरणम्

अपिच सर्वेषां सर्वेषु कर्मसु "भवता ममास्मिन् कर्मणि सहायेन भवितव्य-मित्यभ्यर्थिताः" सन्तोऽपि प्रत्युपकारलिप्सयैव बन्धवोऽपि सहायतां प्रतिपद्यन्ते। तव तु 'सहायमेकं मधुमेव लब्ध्वा' (३.१०) इत्यत्रोक्तो मधुरुक्तिमात्रमपि नापेक्षते। तस्माद् धन्य एवासीत्याह—

मधुरिति। मन्मथ! असौ मधुः च साहचर्याद् अनुक्तः अपि ते सहायः एव। मन्मथ! हे मदन! असौ तव समीप एव वर्तमानः मधुर्वसन्तः अपिशब्दार्थे चकारः। यस्त्वया पूर्वं पुरारिविजये सहायतया निर्दिष्टः, सोऽपीत्यर्थः। सहैव चरतीति सहचरः, तस्य भावः साहचर्यं, तस्मात् सख्यादित्यर्थः। अनुक्तोऽपि अनियुक्तोऽपि। अनेन साहचर्यस्य स्वाभाविकत्वमुक्तम्। तच्च वचनानपेक्षत्वे हेतुः। अत्र प्रतिवस्तूपमामाह—त्वं हुताशनस्य चोदयिता भव इति समीरणः केन व्यादिश्यते इति। हुताशनस्य अग्नेः चोदयिता प्रेरको भव। व्यादेशप्रकारश्चायम्। अत एवाह—इतीति। उक्तप्रकारेणेत्यर्थः। व्यादिश्यते नियुज्यते, न केनापीत्यर्थः। अत्रोक्तिभङ्ग्या वसन्तस्य नियोग एवोक्त इति पर्यायोक्तमलङ्कारः। तेन च प्रतिवस्तूपमायाः संसृष्टिः।।२१।।

तथेति शेषामिव भर्तुराज्ञा-
मादाय मूर्ध्ना मदनः प्रतस्थे।
ऐरावतास्फालनकर्कशेन
हस्तेन पस्पर्श तदङ्गमिन्द्रः॥२२॥

प्रकाशिका

नियुक्तस्य वृत्तान्तमाह—

तथेति। तथाशब्दोऽभ्युपगमे। शेषां माल्यादिदानम्। 'माल्याक्षतादिदाने स्त्री शेषे'ति केशवः। प्रतस्थे गन्तुमारभत। आस्फालनमुद्घर्षणार्थं गजाश्वानाम्। हस्तविशेषणं स्पर्शश्लाघ्यताङ्गम्। तदङ्गम्, अर्थात् प्रणामसमये।।२२।।

विवरणम्

अथ महेन्द्रेण तथा नियुक्तस्य मदनस्य प्रवृत्तिमाह—

तथेति। मदनः भर्तुः आज्ञां शेषामिव तथा इति मूर्ध्ना आदाय प्रतस्थे। मदनः कामदेवः भर्तुः स्वामिनः आज्ञां नियोगं शेषां माल्याक्षतादिदानम्। 'माल्याक्षतादिदाने स्त्री शेषा' इति केशवः। तामिव। तथेत्यभ्युपगमवाचकमव्ययम्। मूर्ध्ना नम्रेण शिरसा। आदाय स्वीकृत्य। प्रतस्थे गन्तुमारेभे। अत्राज्ञायाः शेषोपमया मदनस्य तस्यामादरातिशय उक्तः। मदनो महेन्द्राज्ञां प्रस्थानादिसमये बन्धुभिर्दीयमानं माल्याक्षतादिकमिव शिरसा समादाय प्रस्थानोद्यमं चकारेत्यर्थः। शेषां चाज्ञां चादायेति वा। अभ्युपगतनियोगं मदनं प्रति महेन्द्रस्यादरातिशयमाह—इन्द्रः तदङ्गं हस्तेन पस्पर्शेति। इन्द्रो देवेन्द्रः तदङ्गं तस्य मदनस्य अङ्गं शरीरं हस्तेन पस्पर्श हस्तेनैव स्पृष्टवान्। अर्थात् प्रणामसमय इति सिध्यति। महेन्द्रहस्तस्य विशेषमाह—ऐरावतास्फालनकर्कशेनेति। ऐरावतस्य आत्मनो वाहनभूतस्य गजस्य आस्फालनेन। गजाश्वानां युद्धारम्भादावुद्घर्षणार्थं यदाहननं तदिहास्फालनशब्देनोच्यते। तेन कर्कशेन कठिनेन। अनेन विशेषणेनात्रापि स्पर्शनस्योद्घर्षणार्थत्वं द्योत्यते।।२२।।

स माधवेनाभिमतेन सख्या
रत्या च साशङ्कमनुप्रयातः।
अङ्गव्ययप्रार्थितकर्मसिद्धिः
स्थाण्वाश्रमं हैमवतं जगाम॥२३॥

प्रकाशिका

स इति। अभिमतेनाभिमानविषयभूतेन। अस्मिन् सति किं मे दुर्लभमित्यभिमानः। साशङ्कं किं भविष्यतीति सभयम्। तच्च तस्याः परमेश्वरप्रभावज्ञत्वेन, तच्च पतिव्रतात्वात्। तत एव चानुयानम्, एवंविधेऽस्य जीवितसंशये नैनं जह्यामिति। अङ्गव्ययार्थं वस्तुतः शरीरनाशः प्रयोजनं यथा भवति तथा प्रार्थिता कर्मसिद्धिर्येन। अनेन तस्यानात्मज्ञतां कविः सोपहासमनुसन्धत्ते।।२३।।

विवरणम्

अथ प्रस्थितस्य मदनस्य हरपदप्राप्तिमाह—

स इति। सः हैमवतं स्थाण्वाश्रमं जगाम। सः मदनः हैमवतं हिमवत्सम्बन्धि, हिमवत्प्रस्थगतमित्यर्थः। स्थाणोः शिवस्य आश्रमं जगाम गतोऽभूत्। परमेश्वरपदप्राप्तौ मदनस्य सहायसमृद्धिं दर्शयति—अभिमतेन सख्या माधवेन अनुप्रयातः इति। अभिमतेन अभिमानविषयभूतेन। अस्मिन् सुहृदि मम सन्निधौ वर्तमाने किं मया दुष्करमित्यभिमानस्य पात्रभूतेनेति यावत्। सख्या बन्धुना माधवेन वसन्तेन अनुप्रयातः अनुगतः। पतिदेवता रतिश्च नैनं तत्याजेत्याह—रत्या चेति। अनुप्रयात इति योज्यम्। रतेरनुप्रयाणे हेतुमाह—साशङ्कमिति। अनुप्रयाणक्रियाविशेषणं चेदम्। आशङ्कासहितं यथा भवति तथा अनुप्रयात इत्यर्थः। अत्र पतिव्रतात्वात् परमेश्वरप्रभावज्ञानं, तेन च परमेश्वरतपोविघ्नमाचरन्नयं मे भर्ता कथं भविष्यतीत्याशङ्का, तया चानुप्रयाणम्। एवंविधे महति जीवितसंशये नैनमहं जह्याम्। यद्यसावसून् परित्यक्ष्यति, तर्हि तदैव मत्प्राणनाथमनुकर्तुमनुजानातु मां परमेश्वर इत्यादिचिन्ताकुलया रत्या च शनैः शनैरनुगत इत्यर्थः। अथ **कवीश्वरः** परमेश्वरतपोविघाताय प्रवृत्तस्य मदनस्याज्ञतां स्वयमेव सोपहासमनुसन्दधाति—अङ्गव्ययप्रार्थितकर्मसिद्धिरिति। अङ्गव्ययः शरीरनाशः, तदर्थमेव प्रार्थिता अभ्यर्थिता कर्मणः स्वव्यापारस्य सिद्धिः हरसमाधिभङ्गलक्षणं फलं येन स तथा। यः सकृदपि ध्यातः कीर्तितो वा जन्मसहस्रसञ्चितमपि पापमपहाय मुक्तिमेव प्रयच्छति, यो वा स्वपरिपन्थिनस्त्रिपुरादीनपि क्षणेन भस्मसादकरोत्, तस्य देवस्य समाधिभङ्गे प्रवृत्तस्य मदनस्य स्वशरीरनाशादन्यत् किं वा फलं भविष्यति। तस्मादङ्गव्ययार्थमेवास्य तत्समाधिभङ्गाकाङ्क्षा। अहो महानस्य मोहातिशय इति भावः।।२३।।

तस्मिन् वने संयमिनां मुनीनां
तपःसमाधिप्रतिकूलवृत्तिः।
सङ्कल्पयोनेरभिमानभूत-
मात्मानमादाय मधुर्जजृम्भे॥२४॥

प्रकाशिका

तत्र मधोर्वृत्तिमाह—

तस्मिन्निति। संयमिनां जितेन्द्रियाणाम्। तपसि समाधिरेकाग्रता। सङ्कल्पयोनेरभिमानभूतम्। अत्र पुराणवचनं—

सङ्कल्पप्रभवं कामं रतिं प्रीत्यभिमानिनीम्।
अभिमानात्मकं तस्य मधुं मदनविग्रहम्।।
आराधयेयुः क्षितिपाः सस्त्रीका रूपकाङ्क्षिणः।

इति। आत्मानमृतुविशेषात्मकं स्वभावमित्यर्थः। जजृम्भे पल्लवकुसुमादिस्वलिङ्गबाहुल्येन प्रकटोऽभूदित्यर्थः।।२४।।

विवरणम्

अथ कामप्रवृत्तेरुद्दीपनपूर्वकत्वाद् 'उद्दीपनानि माल्यर्तुचन्दनेन्दूदयादयः।' इति वसन्तस्याप्युद्दीपनत्वादादौ तत्प्रवृत्तिमाह तस्मिन्नित्यादिभिर्दशभिः श्लोकैः—

तस्मिन्निति। मधुः सङ्कल्पयोनेः अभिमानभूतम् आत्मानम् आदाय तस्मिन् वने जजृम्भे। मधुर्वसन्तः सङ्कल्पयोनेः कामस्य अभिमानभूतं, तस्मिन् सति किं मया दुष्करमित्यभिमानमेव मूर्तिमवलम्ब्यावस्थितमित्यर्थः। अत्र पुराणवचनं—

सङ्कल्पप्रभवं कामं रतिं प्रीत्यभिमानिनीम्।
अभिमानात्मकं तस्य मधुं मदनविग्रहम्।।
आराधयेयुः क्षितिपाः सस्त्रीका रूपकाङ्क्षिणः।

इति। आत्मानं स्वरूपम् आदाय स्वीकृत्य, ऋतुस्वभावमादायेत्यर्थः। तस्मिन् वने स्थाणुतपोवने। वनशब्देन वसन्तविजृम्भणाधिकरणत्वयोग्यतां दर्शयति। जजृम्भे मदनहृदयानुरूपं स्वरूपमादाय हरतपोवने कुसुमपल्लवकोकिलकूजितादिलिङ्गबाहुल्येन प्रकटोऽभूदित्यर्थः। मधोः स्वभावमाह—संयमिनां मुनीनां तपःसमाधिप्रतिकूलवृत्तिरिति। संयमो निगृहीतेन्द्रियत्वमस्त्येषामिति संयमिनः, तेषां जितेन्द्रियाणामित्यर्थः। मुनीनां महर्षीणां तपसि यः समाधिः चित्तैकाग्र्यं तस्य प्रतिकूला विरोधिनी वृत्तिर्यस्य स तथा। अनेन मधोर्मुनिसामान्यसमाधिभेदनसामर्थ्यप्रतिपादनेन परमेश्वराकर्षविषयः प्रयासो निष्फल एवेति व्यज्यते। अन्यथा मुनिशब्दमपहाय तपःसमाधिप्रतिकूलवृत्तिरित्येवोच्येत।।२४।।

कुबेरनाथां दिशमुष्णरश्मौ
गन्तुं प्रवृत्ते समयं विलङ्घ्य।
दिग् दक्षिणा गन्धवहं मुखेन
व्यलीकनिःश्वासमिवोत्ससर्ज॥२५॥

प्रकाशिका

तत्प्रकारमाह—

कुबेरनाथामिति। समयं गमनकालम्। मुखेन पुरोभागेन। व्यलीकमपराधः। अत्रोदीच्यां परपरिग्रहभूतप्रतिनायिकात्वम्, उष्णरश्मौ नायकत्वं, गमने नायकव्यापारविशेषः, नियतकालविलङ्घने संविद्विलङ्घनम्, अवाच्यां खण्डितनायिकात्वं चारोप्यत इति समासोक्तिः। तन्मूला चेयं गन्धवहे व्यलीकनिःश्वासोत्प्रेक्षा। मुखोपचारश्च तदङ्गम्। न चात्रोपमा युक्ता, नायिकात्वाद्यारोपस्याध्यवसायं प्रत्युनुकूलत्वाद्, अध्यवसायश्चोत्प्रेक्षेति।।२५।।

विवरणम्

अथ वसन्तागमनकोलाहलं सविस्तरं वक्तुमुपक्रान्तः प्रथमं मलयमारुतप्रवृत्तिं वर्णयति—

कुबेरेति। उष्णरश्मौ समयं विलङ्घ्य कुबेरनाथां दिशं गन्तुं प्रवृत्ते दक्षिणा दिग् मुखेन गन्धवहम् उत्ससर्ज। उष्णा रश्मयः किरणाः यस्य तस्मिन् आदित्ये समयं पूर्वव्यवस्थापितं गमनकालं विलङ्घ्य अक्रमेण वसन्तागमनादतिक्रम्य। कुबेरो वैश्रवणो नाथोऽधिपो यस्याः ताम् उत्तरां दिशं गन्तुं प्रवृत्ते गमनाय कृतसन्नाहे सति दक्षिणा दिग् मुखेन पुरोभागेन। गन्धं बहतीति गन्धवहो वायुः तम् उत्ससर्ज उत्सृष्टवती। अत्रोत्प्रेक्षते—व्यलीकनिःश्वासमिवेति। व्यलीकमपराधः। 'पीडार्थेऽपि व्यलीकं स्यादि'त्यमरः। अपिशब्दादपराधेऽपि तद्व्याख्या। प्रियतमकृतापराधनिमित्तं दीर्घनिःश्वासमिव। अत्र कुबेरनाथामिति विशेषणेन स्त्रीलिङ्गत्वेन च परपरिग्रहभूतप्रतिनायिकात्वमुदीच्यां प्रतीयते। समयं विलङ्घ्य गन्तुं प्रवृत्त इत्यनेन उष्णरश्मौ तथाविधनायकत्वम् अत एव दक्षिणस्यां दिशि खण्डितनायिकात्वं चेति समासोक्तिः। नायकपक्षे समयशब्दः संविद्वाचकः। 'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः। समासोक्तिमूला च गन्धवहे व्यलीकनिःश्वासोत्प्रेक्षा। मुखोपचारः पुनरङ्गमुत्प्रेक्षायाः। अत्रोत्प्रेक्षासमासोक्त्योः सङ्करः। 'विशेषणसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्ति'रिति तल्लक्षणम्।।२५।।

असूत सद्यः कुसुमान्यशोकः
स्कन्धात् प्रभृत्येव सपल्लवानि।
पादेन नापैक्षत सुन्दरीणां
सम्पर्कमाशिञ्जितनूपुरेण॥२६॥

प्रकाशिका

असूतेति। सद्यः अक्रमात्। स्कन्धात् प्रभृति, सर्वत इत्यर्थः। 'ततः प्रभृती'ति भाष्यकारवचनात् प्रभृतिशब्दयोगे पञ्चमी। सपल्लवानि, 'कुसुमजन्म ततो नवपल्लव' इति [रघु.९.२६] क्रमो नात्रासीदित्यर्थः। पादेनेति। अन्यदा ऋतोः क्रमादाप्या-य्यमानवलत्वेन सहकार्यपेक्षा स्यात्। इदानीं तु सद्य उपलब्धबलत्वे सा नासीदित्यर्थः। पादविशेषणेन इतिकर्तव्यताविशिष्टपादसम्पर्ककार्यत्वं पुष्पोद्गमस्य ध्वनितम्। अत्र पादसम्पर्कक्रियानिषेधेऽपि प्रसिद्धतत्कार्यभूतपुष्पोद्गमविभावनाद् विभावनात्रालङ्कारः।।२६।।

विवरणम्

अथाशोकपुष्पोद्गमं वर्णयति—

असूतेति। अशोकः सद्यः स्कन्धात् प्रभृत्येव कुसुमानि असूत। अशोकः अशोकतरुः सद्यः अक्रमं स्कन्धात् प्रभृति स्कन्धदेशादारभ्य, सर्वत इत्यर्थः। आदौ शाखाग्रे काचिन्मञ्जरी सञ्जाता, पुनश्च शाखान्तर इत्यादिक्रममतिक्रम्य स्कन्धदेशादारभ्य सर्वेष्वप्यवयवेषु युगपदेव कुसुमानि बभूवुरित्यर्थः। 'ततः प्रभृती'ति भाष्यकारवचनात् प्रभृतिशब्दयोगे स्कन्धादिति पञ्चमी। एवशब्देन कुसुमपल्लवरहितस्यांशस्याभाव उक्तः। कुसुमानि पुष्पाणि असूत उत्पादितवान्। अपिच 'कुसुमजन्म ततो नवपल्लव'[रघु.९.२६] इत्यादिषु प्रसिद्धः क्रमोऽपि तत्र नासीदित्याह—सपल्लवानीति पल्लवसहितानि। अशोकतरुः सद्य एव कुसुमपल्लवैराचितोऽभूदित्यर्थः। ऋतोरक्रमपरिपूर्तिः क्रमातिक्रमे हेतुरित्यवसेवयम्।

आलिङ्गनात् कुरवको बकुलो मुखशीधुना।
कामिनीनां पदाघातादशोकः पुष्प्यति द्रुतम्।।

इत्यादिवचनसिद्धः सहकारिनियमोऽपि वसन्ते मूर्तिमति स्वयमेवागते तत्र नासीदित्याह—सुन्दरीणां पादेन सम्पर्कं नापैक्षतेति। सुन्दरीणां सर्वावयवसुन्दरीणाम्। अनेनान्यासां तत्रानुपयोगित्वमुक्तम्। पादेन चरणेन सम्पर्कं संयोगं नापैक्षत नापेक्षते स्म। इतः पूर्वं चरणस्यापीतिकर्तव्यतांशोऽस्तीत्याह—आशिञ्जितनूपुरेणेति। आभीक्ष्ण्येन शिञ्जितं शब्दितं नूपुरं मञ्जीरं यस्य तेन। तत्कालविशेषणं चेदम्। अत्र कामिनीसम्पर्करूपप्रसिद्धकारणविरहेऽपि पुष्पोद्गमरूपकार्योत्पत्तिप्रतिपादनाद् विभावनालङ्कारः। सा चात्रानुक्तनिमित्ता।।२६।।

सख्युः प्रवालोद्गमचारुपत्रे
नीते समाप्तिं नवचूतबाणे।
निवेशयामास मधुर्द्विरेफान्
नामाक्षराणीव मनोभवस्य॥२७॥

प्रकाशिका

सख्युरिति। उद्गमशब्दो द्रव्यं लक्षयति, करिदन्तच्छेदकान्त इतिवत्। अक्लिष्टताप्रतीतिः फलम्। वाजरचनायां कृतायां नामाक्षरनिवेशनमिति लोकक्रमः। सख्युर्मनोभवस्येत्यन्वयः।।२७।।

विवरणम्

चूतपुष्पोद्गमं वर्णयति—

सख्युरिति। मधुः समाप्तिं नीते नवचूतबाणे द्विरेफान् निवेशयामास। मधुर्वसन्तः समाप्तिं सम्पूर्णतां नीते प्रापिते नवचूतबाणे नूतने चूतकुसुम एव बाणे शरे। अधिकरणसप्तमी चेयम्। द्विरेफान् मधुकरान् निवेशयामास निवेशितवान्। अत्रोत्प्रेक्षते—सख्युः मनोभवस्य नामाक्षराणीवेति। सख्युः निजपरमसखस्य मनोभवस्य कामदेवस्य नामाक्षराणि नामद्योतकान्यक्षराणीव। अक्षराणां मषीरूपितत्वेन वर्णसाम्यं सन्निवेशसाम्यं चोत्प्रेक्षाहेतुः। उद्दीपनत्वप्रतीतिः फलम्। चूतपुष्परूपस्य बाणस्य तत्किसलयरूपं पत्रमप्याह—प्रवालोद्गमचारुपत्रे इति। अत्रोद्गमशब्द उद्गमनक्रियावाचकोऽपि उद्गमनक्रियायाः पत्रत्वानुपपत्तेः कार्यकारणभावसम्बन्धादुद्गतं द्रव्यं लक्षयति। किसलयानां तत्कालोपपन्नत्वप्रतिपादनमुखेनातपादिभिरपरिक्लिष्टताप्रतीतिश्च फलम्। उद्गतं प्रवालमेव चारु सुन्दरं पत्रं यस्य तस्मिन्। अत्र किसलयानां सन्निवेशादिसाम्यात् पत्रत्वरूपणम्। उत्तेजनवाजरचनादिभिः सम्पूर्णतां नीते हि शरे नामाक्षराणि लिख्यन्त इति लोकप्रसिद्धः क्रमः समाप्तिं नीते इत्यनेनोक्तः।।२७।।

वर्णप्रकर्षे सति कर्णिकारं
दुनोति निर्गन्धतया स्म चेतः।
प्रायेण सामग्र्यविधौ गुणानां
पराङ्मुखी विश्वसृजः प्रवृत्तिः॥२८॥

प्रकाशिका

वर्णप्रकर्ष इति। अत्र कर्णिकारं तथात्युज्ज्वलमपि निर्गन्धमभूद्, यथा सहृदयैरदूयतेति वाक्यं विपरिणमनीयम्। अन्यथा अर्थान्तरन्यासघटना न स्यात्। तदानीं कर्णिकारस्वरूपरामणीयकं तथा यूनां हृदयहारि जातं, यथा तदनुसन्दधतां तेषां हन्त विधातृदौश्शील्यादेतद्रूपानुरूपस्य सौरभस्य लेशोऽपि नात्रासीदिति खेदोऽभवदिति तात्पर्यं, शृङ्गारोद्दीपनवर्णनस्य प्रकृतत्वात्।।२८।।

विवरणम्

कर्णिकारपुष्पोद्गमं वर्णयति—

वर्णेति। कर्णिकारं वर्णप्रकर्षे सति निर्गन्धतया चेत दुनोति स्म। कर्णिकारं कर्णिकारकुसुमं वर्णप्रकर्षे वर्णस्य प्रकर्षे उत्कर्षे कान्त्यतिशये सत्यपि निर्गन्धतया निर्गतो गन्धो यस्मात् तन्निर्गन्धं, तस्य भावस्तत्ता, तया सौरभ्याभावेन हेतुनेत्यर्थः। चेतः चित्तं दुनोति स्म अपीडयत्। सहृदयानामिति शेषः। नात्र काचिदनुपपत्तिरित्याह—विश्वसृजः प्रवृत्तिः गुणानां सामग्र्यविधौ प्रायेण पराङ्मुखीति। विश्वं सृजतीति विश्वसृग् ब्रह्मा, तस्य। प्रवृत्तिः व्यापारः गुणानां सामग्र्यविधौ सम्पूर्णताविधाने प्रायेण प्रायशः पराङ्मुखी विमुखी। अस्य वाक्यस्य कर्णिकारकुसुमानां निर्गन्धतया सहृदयहृदयपीडाविधाने तात्पर्यमिति प्रतिभाति। तच्चायुक्तम्। तथा सति प्रकृष्टशृङ्गारोद्दीपनवर्णनानुगुणत्वभङ्गप्रसङ्गात्। तस्मादेवमत्र तात्पर्यं वर्णनीयम्। कर्णिकारकुसुमं तथा नामात्युज्ज्वलं यूनां हृदयहारि जातं, यथा तेषां निर्गन्धतामवधार्य सहृदयहृदयैर्दूयत इति पूर्वार्धे वाक्यार्थः। तथा च सति सर्वपदार्थेषु। विधातृदौश्शील्यादेवमेव गुणसामग्र्याभाव इति नात्र काचिदनुपपत्तिरित्यर्थान्तरन्यासोऽपि सुघटो भविष्यति।।२८।।

बालेन्दुवक्राण्यविकासभावाद्
बभुः पलाशान्यतिलोहितानि।
सद्यो वसन्तेन समागतानां
नखक्षतानीव वनस्थलीनाम्।।२९।।

प्रकाशिका

बालेन्दुवक्राणीति। सद्यो नखक्षतानीत्यन्वयः, सद्यः समागतानामिति वा। प्रवासप्रत्यागमने नखक्षतविधानात्। अत्र समासोक्त्युत्प्रेक्षे।।२९।।

विवरणम्

पलाशकुसुमोद्गमं वर्णयति—

बालेति। पलाशानि बभुः। पलाशानि पलाशकुसुमानि बभुः शुशुभिरे। अत्रोत्प्रेक्षते—वसन्तेन सद्यः समागतानां वनस्थलीनां नखक्षतानीवेति। वसन्तेन सद्य एव समागतानां सङ्गतानाम्। प्रवासप्रत्यागमनसमये हि नखक्षतानि बहुलानि भवन्तीति सद्य इत्युक्तम्। वनस्थलीनां वनराजीनां नखक्षतानि नखव्रणानीव। सद्यो नखक्षतानीति वान्वयः। सद्यः समुत्पन्नानि नखक्षतानीवेत्यर्थः। तेषामेवातिलोहितत्वोपपत्तेः। पलाशकुसुमानां नखक्षतत्वोत्प्रेक्षायां हेतुमाह—बालेन्दुवक्राणीत्यादिना विशेषणद्वयेन। अविकासभावाद् बालेन्दुवक्राणीति। अविकासभावाद् विकासराहित्याद् बालचन्द्रवद्वक्राणि कुटिलानि। अविकसितानामेव वक्रत्वाद्, वक्राणामेव नखक्षतसादृश्यादविकासभावादित्युक्तम्। तथा अतिलोहितानि अत्यन्तरक्तवर्णानि। नखक्षतान्यपि बालेन्दुवक्राणि भवन्ति। अचिरोद्गतत्वे सत्यतिलोहितानि च भवन्ति। अत्र चिरकालसङ्गतनायिकानायकवृत्तान्तप्रतीतेः समासोक्तिरलङ्कारः। उत्प्रेक्षा च तदङ्गम्।।२९।।

लग्नद्विरेफाञ्जनभक्तिचित्रे
मुखे मधुश्रीस्तिलकं प्रकाश्य।
रागेण बालारुणकोमलेन
चूतप्रबालोष्ठमलञ्चकार।।३०।।

प्रकाशिका

लग्नेति। मुखे प्रारम्भे। तिलकः श्रीमत्संज्ञवृक्षविशेषः। अरुणः सूर्यः। अत्र मुखतिलकरागशब्दानां वदनविशेषकलाक्षावाचित्वेन लिङ्गविशेषेण च प्रसाधनप्रवृत्तनायिकाप्रतीतौ समासोक्तिः। तामेव च रूपकमुपस्करोति।।३०।।

विवरणम्

तिलककुसुमोद्गमं चूतपल्लवोद्भवं च युगपद् वर्णयति—

लग्नेति। मधुश्रीः मुखे तिलकं प्रकाश्य बालारुणकोमलेन रागेण चूतप्रवालोष्ठम् अलञ्चकार। मधुश्रीः वसन्तलक्ष्मीः मुख एव मुखे प्रारम्भे वदने च तिलकमेव तिलकं तिलककुसुमं विशेषकं च। 'तिलकः क्षुरकः श्रीमानि'ति, 'तमालपत्रतिलकचित्रकाणि विशेषकमि'ति चामरः। प्रकाश्य अतिशयेन सम्पाद्य। बालः अभिनवोदितः अरुणः सूर्यः। 'अरुणो भास्करेऽपि स्यादि'त्यमरः।

बालश्चासावरुणश्चेति बालारुणः, तद्वत्कोमलेन मनोहरेण रागेणैव रागेण रक्तवर्णेन लाक्षारसेन च। 'रक्तवर्णेऽनुरागे च रागो लाक्षारसेऽपि चे'ति **भोजः**। चूतस्य प्रवालं चूतप्रवालं, चूतप्रवालमेवोष्ठं चूतप्रवालोष्ठम् अलञ्चकार अलङ्कृतवती। मुखे तिलकयोग्यतां दर्शयति—लग्नद्विरेफाञ्जनभक्तिचित्रे इति। लग्नैः सक्तैः द्विरेफैः भ्रमरैरेवाञ्जनैः कृतया भक्त्यैव भक्त्या भागेन विन्यासेन च पत्रभङ्गेन च चित्रे आश्चर्यभूते। अत्र प्रवालादीनामोष्ठत्वादिरूपणानि शब्दैरेवोक्तानि। मधुश्रियः प्रसाधनप्रवृत्तनायिकात्वरूपणं पुनरर्थसामर्थ्यात् प्रतीयते इत्येकदेशविवर्तिरूपकमिदम्। 'श्रौता आर्थाश्च ते यस्मिन्नेकदेशविवर्ति तदि'[काव्यप्रकाशे]ति। अरुणाचलनाथस्तु—मुखतिलकरागशब्दानां वदनविशेषकलाक्षावाचित्वेन लिङ्गविशेषेण च प्रसाधनप्रवृत्तनायिकात्वप्रतीतौ समासोक्तिः। तामेव च रूपकमुपस्करोतीत्युक्तवान्। तत्कथमिति न ज्ञायते, एकदेशविवर्तिरूपकेणैव वसन्तलक्ष्म्या नायिकात्वप्रतीतौ सिद्धायां समासोक्त्या निरर्थकत्वात्। **एतदलङ्कारसर्वस्वे** प्रपञ्चितम्।।३०।।

मृगाः प्रियालद्रुममञ्जरीणां
रजःकणैर्विघ्नितदृष्टिपाताः।
मदोद्धताः प्रत्यनिलं विचेरु-
र्वनस्थलीर्मर्मरपत्रमोक्षाः॥३१॥

प्रकाशिका

मृगा इति। 'राजादनः प्रियालः स्यादि'ति सिंहः। मर्मरो मर्मरशब्दयुक्तः पत्रमोक्षो यासाम्। तदनन्तरं हि नवदलोद्गमः। मदोद्धतत्वात् प्रत्यनिलगमनम्।।३१।।

विवरणम्

इत्थं वसन्तागमनवेलायां स्थावराणां विकारं प्रतिपाद्य जङ्गमानां विकारमप्याह मृगा इत्यादिभिस्त्रिभिः श्लोकैः—

मृगा इति। मृगाः मदोद्धताः प्रत्यनिलं वनस्थलीः विचेरुः। मृगाः एणादयः मदोद्धताः मदेनोद्धताः अतिगर्विताः सन्तः। प्रत्यनिलमित्यव्ययीभावः। अनिलो वायुः। अनिलमभिमुखीकृत्येत्यर्थः। वनस्थलीः वनभूमीः। अत्यन्तसंयोगे द्वितीया। विचेरुः। विविधं चेरुः। अत्र मदोद्धतत्वमनिलाभिमुखप्रसरणे हेतुः। मदोद्धतानां मृगाणां स्वभावश्चायम्। अनिलाभिमुखगमनस्य फलमाह—प्रियालद्रुममञ्जरीणां रजःकणैः विघ्नितदृष्टिपाता इति। प्रियालसंज्ञो द्रुमः प्रियालद्रुमः। 'राजादनः प्रियालः

स्यादि’त्यमरः। तेषां मञ्जर्यः प्रियालद्रुममञ्जर्यः। तासां रजःकणौ रजसां रेणूनां कणौः लेशैः। ‘लवलेशकणाणवः’ इत्यमरः। विघ्निताः सञ्जातविघ्नाः दृष्टिपाता नेत्रप्रचाराः येषां ते तथा। रजःकणप्रतिहतावलोकनसामर्थ्या इत्यर्थः। मदोद्धतानां स्वनाश एव फलमिति भावः। वनस्थलीनां तत्कालविशेषणमाह—मर्मरपत्रमोक्षाः इति। मर्मरो मर्मरध्वनियुक्तः पत्राणां मोक्षो मोचनं यासां तास्तथा। ‘मर्मरः पर्णशब्दे स्यादि’ति भोजः। मृगाणां धावने पादाभिघातवशात् प्रसार्यमाणानां पर्णानां मर्मरध्वनिरत्र विवक्षितः। अथवा मर्मरः पत्रमोक्षो यासामिति विग्रहः। अत्र तु शुष्कतया वृक्षात् पततां पर्णानां ध्वनिर्विवक्षितः। वसन्ते हि पुराणानि पर्णानि पतन्ति, अभिनवानि चोत्पद्यन्ते। अत्र स्वभावोक्तिः।।३१।।

चूताङ्कुरास्वादकषायकण्ठः
पुंस्कोकिलो यन्मधुरं चुकूज।
मनस्विनीमानविघातदक्षं
तदेव जातं वचनं स्मरस्य॥३२॥

प्रकाशिका

चूताङ्कुरेति। कषायकण्ठो रक्तकण्ठः। रागश्च सुस्वरता। ‘कषायस्तुवर’ इत्युपक्रम्य ‘रक्त’ इति केशवः। यच्चुकूज कूजनं यदित्यर्थः। तत् कूजनं तथाविधं स्मरवचनमासीदित्यर्थः। तेन तस्योद्दीपनातिशय उक्तः। तथाहि—सार्थको निरर्थकादर्थक्रियाङ्गम्। स च विदग्धप्रयुक्तश्चित्तमावर्जयति। तत्रापि सुहृत्त्वेन विशेषः। विदग्धः सुहृच्च नान्योऽस्ति, यथायं कामिनां स्मरः। तस्यापि मानिनीमानशैथिल्याभिप्रायं वचः सुतरामुद्दीपनम्।।३२।।

विवरणम्

कोकिलकूजितं वर्णयति—

चूतेति। पुंस्कोकिलः मधुरं चुकूज यत् तदेव स्मरस्य मनस्विनीमानविघातदक्षं वचनं जातम्। पुमान् कोकिलः पुंस्कोकिलः। कूजनसामर्थ्यप्रतिपादनार्थं पुंस्त्वविशेषणम्। मधुरमिति कूजनक्रियाविशेषणम्। चुकूज कूजनं कृतवान् यत्, तदेव कूजनं स्मरस्य मदनस्य मनस्विनीनां प्रणयिनीनां मानस्याभिमानस्य विघाते उन्मूलने। अत्र मनस्विनीत्वं मानोत्पत्तौ हेतुः। दक्षं विदग्धं वचनं वाक्यं जातम्। वसन्तागमनवेलायां यत् कोकिलकूजनं जातं, तदेव प्रत्युपस्थितं तृतीयपुरुषार्थं मा परित्यजत, अलमभिमानविलम्बनेनेत्यादिरूपं मदनवचनमासीदित्यर्थः। अनेन

कोकिलालापस्योद्दीपनत्वं प्रतिपादितम्। निरर्थकस्यापि कोकिलालापस्य कामिजनबन्धुभूतस्य विदग्धतरस्य स्मरस्य प्रियतमाभिमानविघातदक्षवचनत्वेन रूपणाद्रूपकम्। अत्र स्वरमाधुर्यमुद्दीपनत्वे हेतुः। स्वरमाधुर्यहेतुमाह—चूताङ्कुरास्वादकषायकण्ठ इति। चूतानामङ्कुरस्याभिनवोद्भिन्नस्य पुष्पस्यास्वादेनादनेन कषायो रक्तः कण्ठो यस्य स तथा। 'कषायस्तुवरे' इत्यारभ्य 'रक्ते' इति केशवः। रक्तत्वं च सुस्वरता। सुस्वरकण्ठ इत्यर्थः। अनेन चूताङ्कुरास्वादनस्य गलान्तरोद्भूतदोषनिरासकत्वमुक्तम्।।३२।।

हिमव्यपायाद् विशदाधराणा-
मापाण्डरीभूतमुखच्छवीनाम्।
स्वेदोद्गमः किम्पुरुषाङ्गनानां
चक्रे पदं पत्रविशेषकेषु॥३३॥

प्रकाशिका

हिमेति। विशदाधराणाम्, अलक्तकार्पणविरहात्। स्वाभाविककान्तियुक्तानामेव मुखानामापाण्डरीभावः, कुङ्कुमविरहात्। स्वेदोद्गम आतपकृतः। पत्रेषु कपोलगतेषु। विशेषकेषु ललाटगतेषु। पदकरणमर्थादुच्छ्वासनम्।।३३।।

विवरणम्

हिमवच्छिखरवर्तिनीनां किम्पुरुषाद्यङ्गनानामपि तत्कालसुलभं विशेषं वर्णयति—

हिमेति। किम्पुरुषाङ्गनानां पत्रविशेषकेषु स्वेदोद्गमः पदं चक्रे। किम्पुरुषाङ्गनानां किन्नरस्त्रीणां पत्रेषु विशेषकेषु च कपोलगतेषु पत्रभङ्गेषु ललाटतटघटितेषु तिलकेषु च स्वेदोद्गमः उद्भूतस्वेदः पदं चक्रे स्थानं कृतवान्। आतपकृताः स्वेदबिन्दवः किन्नराङ्गनानां पत्रभङ्गतिलकेषु किञ्चिदुच्छूनतामजनयन्नित्यर्थः। स्वाभाविकमङ्गसौन्दर्यमपि तासां तदानीमभिव्यक्तमासीदिति विशेषणद्वयेन दर्शयति—हिमव्यपायादित्यादिना। हिमव्यपायाद् विशदाधराणां हिमस्य तुषारस्य व्यपायादपगमाद् विशदो निर्मलोऽधरो यासां तासाम्। शीतकाल एव हि स्त्रीणामधरेष्वलक्तकरसार्पणम्, अलक्तकस्योष्णस्वभावत्वात्। अलक्तकरसाभावात् स्वाभाविकेन रागेण मनोहराधराणामित्यर्थः। विशेषणान्तरमाह—आपाण्डरीभूतमुखच्छवीनामिति। अत्रापि हिमव्यपाय एव हेतुः। उष्णस्वभावकुङ्कुमार्पणाभावादापाण्डरीभूता मुखच्छविर्यासां तासाम्। मुखेऽपि स्वभाविकी शोभैव प्रकटाभूदिति भावः। अनेन श्लोकेन तासां तत्कालसुलभशोभातिशय उक्तः।।३३।।

तपस्विनः स्थाणुवनौकसस्ता-
माकालिकीं वीक्ष्य मधुप्रवृत्तिम्।
प्रयत्नसंस्तम्भितविक्रियाणां
कथञ्चिदीशा मनसां बभूवुः॥३४॥

प्रकाशिका

एवंविधामुद्दीपनसम्पदं कार्यमुखेन स्फारयति—

तपस्विन इति। मत्वर्थेनावासविशेषणेन च विकारानुपपत्तिः। आकालिकीं सद्यःसमुद्भवसमाप्तिकाम्। 'आकालिकडाद्यन्तवचने' (५.१.११४) इत्यकालशब्दस्याकालिकडादेशः। प्रयत्नः प्रत्याहारादिः। विक्रिया हर्षादिरतिर्वासनारूपा। यदाह—[कालिदासः शाकुन्तले ५.२]

रम्याणि वीक्ष्य मधुराँश्च निशम्य शब्दान्
पर्युत्सुकीभवति यत् सुखितोऽपि जन्तुः।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि॥

इति। सपरिग्रहाणां च तादात्विकी रतिः॥३४॥

विवरणम्

इत्थमुपवर्णितस्योद्दीपनस्य कामदेवाभिमते कार्ये प्रवृत्तिं प्रतिपादयति—

तपस्विन इति। स्थाणुवनौकसः तपस्विनः आकालिकीं तां मधुप्रवृत्तिं वीक्ष्य कथञ्चिद् मनसाम् ईशाः बभूवुः। स्थाणोः शिवस्य वनं तपोवनमेव ओको गृहं येषां ते तपस्विनः वानप्रस्थाः आकालिकीं सद्यस्समुद्भवसमाप्तिमतीम्। 'आकालिकडाद्यन्तवचने' (५.१.११४) इत्यकालशब्दस्याकालिकडादेशः। पूर्वव्यवस्थापितकालात् प्रागेव सञ्जातां सद्यो विनाशवतीं चेत्यर्थः। तां पूर्वप्रतिपादितां मधोर्वसन्तस्य प्रवृत्तिं विजृम्भणरूपं व्यापारं वीक्ष्य सम्यगवलोक्य कथञ्चिद् यथाकथञ्चिद् मनसामीशाः स्वामिनो बभूवुः। अत्र तपस्विन इति मतुबन्तेन स्थाणुवनौकस इति परमेश्वरसान्निध्यप्रतिपादनेन च मनोविक्रियाहेतुः प्रतिपादितः। आकालिकत्वादनिरूपितागतत्वेन तु मनोविकारोत्पत्तौ हेतुः प्रतिपादितः। अत एव कथञ्चिदीशा बभूवुरित्युक्तम्। मनोविकारप्रशमनप्रकारमाह—प्रयत्नसंस्तम्भितविक्रियाणामिति। प्रयत्नैः प्रत्याहारादिरूपैर्व्यापारैः संस्तम्भिता सम्यक् स्तम्भिता

विक्रिया वासनारूपेण वर्तमाना हर्षादिर्येषाम्। सपरिग्रहाणां तु तादात्विकी रतिः। हर्षादिरतीनां वासनारूपेण वर्तमानत्वमुक्तं शाकुन्तले—

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुकीभवति यत् सुखितोऽपि जन्तुः।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि।।

इति। महर्षयः कृतबहुविधप्रशस्ततपस्त्वात् परमेश्वरसान्निध्यवशाच्च प्राणायामप्रत्याहारादिभिरात्मनो मनोविकारं कथमपि निवारयामासुरित्यर्थः।।३४।।

तं देशमारोपितपुष्पचापे
रतिद्वितीये मदने प्रपन्ने।
काष्ठागतस्नेहरसानुविद्धं
द्वन्द्वानि भावं क्रियया विवव्रुः।।३५।।

प्रकाशिका

अथ मदनागमनस्य प्रभावं वर्णयति—

तमिति। आरोपितपुष्पचाप इति संरम्भः। रतिद्वितीय इति तस्याः प्रीत्यभिमानित्वाद् अस्य सहायसम्पत्। काष्ठामुत्कर्षं गतं काष्ठागतम्। 'द्वितीया श्रिता—' (२.१.२४) इत्यादिना समासः। तत्काल भावि चैतद्विशेषणम्। काष्ठागतत्वाच्च स्नेहो रसः रसनियतत्वात्, तेनानुविद्धम्। तद्विजृम्भानुरूपं द्वन्द्वानि जङ्गमस्थावराणि भावं सम्भोगेच्छाम्। क्रियया अनुभावरूपया।।३५।।

विवरणम्

इत्थं वसन्तागमनप्रभावमुक्त्वा मदनागमनप्रभावमेवाह—

तमिति। रतिद्वितीये मदने तं देशं प्रपन्ने द्वन्द्वानि भावं क्रियया विवव्रुः। रतिद्वितीये रतिरेव द्वितीया यस्य तस्मिन्। अनेन मदनस्य तस्यां प्रीत्यभिमानित्वात् सहायसम्पदुक्ता। भावमभिलाषं, सम्भोगेच्छामित्यर्थः। क्रियया इच्छायाः कार्यभूतेन व्यापारेण, आलिङ्गनादिभिरित्यर्थः। विवव्रुः प्रकाशयामासुः। मदनागमनानन्तरं सर्वाणि मिथुनान्यपि स्वात्मनि सञ्जातां सम्भोगेच्छां तत्कालभूतैर्व्यापारैः प्रकाशयामासुरित्यर्थः। मदनस्योद्योगमाह—आरोपितपुष्पचाप इति। आरोपितं सज्जीकृतं पुष्पमयं चापं शरासनं येन तस्मिन्। भावस्योत्कर्षमाह—काष्ठागतस्नेहर-

सानुविद्धमिति। काष्ठामुत्कर्षम्। 'काष्ठोत्कर्षे स्थितौ दिशी'त्यमरः। गतेन प्राप्तेन। 'द्वितीया श्रितातीत—'(२.१.२४)इत्यादिना समासः। तत्कालविशेषणं चेदम्। स्नेह एव रसनियतत्वाद्रसः स्नेहरसः, स्नेहातिशयो वा, तेनानुविद्धं विजृम्भितमित्यर्थः। द्वन्द्वानि मदनागमनवशात् परमकाष्ठामधिष्ठितं परस्परानुरागं तत्प्रकाशकैः कर्मभिः प्रकाशयाञ्चक्रुरित्यर्थ।।३५।।

मधु द्विरेफः कुसुमैकपात्रे
पपौ प्रियां स्वामनुवर्तमानः।
शृङ्गेण च स्पर्शनिमीलिताक्षीं
मृगीमकण्डूयत कृष्णसारः।।३६।।

प्रकाशिका

तत्प्रकारानाह—

मध्विति। प्रियामनुवर्तमान इति नागरिकवृत्तमप्यशिक्षितमेव प्रतिभातमित्यर्थः। 'पाययेयुरनुपिबेयुश्चे'ति दर्शनात्। कण्डूयनमनुवृत्तिप्रकर्षः। कण्ड्वा दुर्लक्षत्वात्।।३६।।

विवरणम्

अथ क्रियया भावप्रकाशनमेव प्रपञ्चयति चतुर्भिः श्लोकैः। तत्रादौ भ्रमरद्वन्द्वानां मृगद्वन्द्वानां च प्रकाशनप्रकारमाह—

मध्विति। द्विरेफः स्वां प्रियाम् अनुवर्तमानः कुसुमैकपात्रे मधु पपौ। द्विरेफो भ्रमरः स्वां प्रियाम् आत्मीयां बल्लभाम् अनुवर्तमानः अनुसरन् कुसुमैकपात्रे कुसुममये एकस्मिन् पात्रे साधारणे पात्रे मधु पपौ पीतवान्। अत्र नागरिकवृत्तं भ्रमरैरशिक्षितमपि मदनसान्निध्यवशादुद्बुद्धमभूदित्युक्तं भवति। नागरिका ह्येकस्मिन्नेव पात्रे सम्भृतं मद्यं वल्लभां पाययन्ति, स्वयं चानुपिबन्ति। 'पाययेयुरनुपिबेयुश्चे'ति वचनात्। कृष्णसार शृङ्गेण मृगीम् अकण्डूयत। कृष्णसारो मृगविशेषः। शृङ्गेण स्वेनैव विषाणेन मृगीं वल्लभाम् अकण्डूयत कण्डूयितवान्। कृष्णसारः स्वां वल्लभां कण्डूयनादिभिरनुवर्तितवानित्यर्थः। मृग्या अपि भावविशेषप्रकारमाह—संस्पर्शनिमीलिताक्षीमिति। संस्पर्शेन समीचीनेन स्पर्शनेन, स्पर्शसुखेनेति यावत्। निमीलिते अक्षिणी यया ताम्। अत्राक्षिनिमीलनं स्पर्शसुखस्यानुभावः।।३६।।

ददौ सरःपङ्कजरेणुगन्धि
गजाय गण्डूषजलं करेणुः।
अर्धोपयुक्तेन बिसेन जायां
सम्भावयामास रथाङ्गनामा।।३७।।

प्रकाशिका

ददाविति। गण्डूषजलं मुखान्तर्गतजलम्। अर्धोपयोग आस्वादपरीक्षार्थम्।।३७।।

विवरणम्

गजमिथुनानां चक्रवाकमिथुनानां च प्रवृत्तिमाह—

ददाविति। करेणुः गजाय गण्डूषजलं ददौ। करेणुः करिणी। 'करेणुरिभ्यां स्त्री नेभे' इत्यमरः। गजाय करिणे गण्डूषजलं मुखान्तर्गतजलं ददौ दत्तवती। गण्डूषजलस्य प्रियतमावदनसम्पर्कव्यतिरिक्तमपि गुणान्तरमाह—सरःपङ्कजरेणुगन्धीति। सरसि यानि पङ्कजानि तेषां रेणुः परागः तस्य गन्धोऽस्त्यस्मिन्निति तथा। यथा कामिनी सुरभिलकुसुमादिसंस्कृतं मुखासवं कामिने ददाति तद्वदित्यर्थः। यथाह माघः—[१०.१]

सज्जितानि सुरभीण्यथ यूनामुल्लसन्नयनवारिरुहाणि।
आययुः सुमधुराणि सुरायाः पात्रतां प्रियतमावदनानि।।

इति। रथाङ्गनामा अर्धोपयुक्तेन बिसेन जायां सम्भावयामास। रथाङ्गनामा चक्रवाकः। 'कोकश्चक्रश्चक्रवाको रथाङ्गाह्वयनामकः' इत्यमरः। अर्धोपयुक्तेन अर्धकवलितेन। अत्रार्धोपयुक्तत्वमास्वादपरीक्षार्थम्। तेन च स्वयमेवादौ किञ्चिदास्वाद्य तस्य स्वादिष्ठतामवगम्य प्रियतमायै ददावित्यर्थः प्रदर्शितः। बिसेन मृणालेन जायां प्रियतमां सम्भावयामास सम्मानितवान्। अत्र 'ताम्बूलीदलमर्धखण्डितमहं वाञ्छामी'त्यादिषु प्रसिद्धं मुखताम्बूलार्पणं प्रतीयते।।३७।।

गीतान्तरेषु श्रमवारिलेशैः
किञ्चित्समुच्छ्वासितपत्रलेखम्।
पुष्पासवाघूर्णितनेत्रशोभं
प्रियामुखं किम्पुरुषश्चुचुम्ब।।३८।।

प्रकाशिका

गीतान्तरेष्विति। गीतयोः प्रक्रान्तप्रक्रंस्यमानयोरन्तर इत्यर्थः। अवसरज्ञत्वं च द्योत्यते। पुष्पासवाघूर्णितयोर्नेत्रयोः शोभा यत्रेति विग्रहः। मुखस्य विशेषणाभ्यां विभावतापरिपोषः।।३८।।

विवरणम्

एवं हिमवच्छिखरवर्तिनां मृगपक्षिणां कामविकारमुक्त्वा किम्पुरुषादीनामप्याह—

गीतान्तरेष्विति। किम्पुरुषः गीतान्तरेषु प्रियामुखं चुचुम्ब। किम्पुरुषः किन्नरः गीतान्तेषु अतीतानागतयोर्गानयोरन्तरालेषु। अतीते कस्मिंश्चिद्गाने गानान्तरे चानागते सतीत्यर्थः। अनेनोद्दीपनविभाव उक्तः। अवसरज्ञत्वं च तस्य द्योत्यते। प्रियाया मुखं प्रियामुखं चुचुम्ब चुम्बितवान्। अत्र हि भावपरिपोषार्थं मुखस्य विशेषणद्वयम्। तत्राद्यमाह—श्रमवारिलेशैः किञ्चित्समुच्छ्वासितपत्रलेखमिति। श्रमवारीणां गानश्रमसञ्जातानां स्वेदजलानां लेशैः कणैः। किञ्चित्समुच्छ्वासितपत्रलेखं किञ्चित्समुच्छ्वासिता स्वेदजलसंसर्गादीषदुच्छ्वासिता उच्छूनतां प्रापिता पत्रलेखा पत्रभङ्गो यस्मिंस्तत् तथा। द्वितीयं विशेषणमाह—पुष्पासवाघूर्णितनेत्रशोभमिति। पुष्पासवेन माध्वीसुरया। 'गौली माध्वी च पैष्टी च विज्ञेया त्रिविधा सुरा' इत्यादिस्मृतिप्रसिद्धयेत्यर्थः। आघूर्णितयोः कलुषीकृतयोः नेत्रयोः शोभा यस्मिंस्तत्तथोक्तम्। अत्र माध्व्यास्तद्देशसुलभत्वात् सौरभ्यादिगुणविशिष्टत्वाच्च पुष्पशब्दस्योपयोगः।।३८।।

पर्याप्तपुष्पस्तबकस्तनाभ्यः
स्फुरत्प्रवालोष्ठमनोहराभ्यः।
लतावधूभ्यस्तरवोऽप्यवापु-
र्विनम्रशाखाभुजबन्धनानि॥३९॥

प्रकाशिका

पर्याप्तेति। पर्याप्तं पूर्णम्। प्रियसन्निधौ स्तनपूरणमधरस्फुरणं च नायिकाधर्मः। विनम्रम् अस्तब्धम्।।३९।।

विवरणम्

अथ स्थावराणामपि मदनोन्मादं दर्शयति—

पर्याप्तेति। तरवः अपि लतावधूभ्यः विनम्रशाखाभुजबन्धनानि अवापुः। तरवोऽपि स्थावरात्मका वृक्षा अपि। अन्ये तिष्ठन्त्वित्यर्थः। लतावधूभ्यः लताभ्य

एव वधूभ्यः स्त्रीभ्यः सकाशाद् विनम्रशाखाभुजबन्धनानि विनम्रैः विशेषेण नम्रैः अस्तब्धैः। द्विविधा हि लतानां शाखाः स्तब्धाः सन्नताश्च। तत्र स्तब्धैरालिङ्गनानुपपत्तेरेवमुक्तम्। तरुषु तरुषु लीनैरित्यर्थः। नायिकापक्षे तु अनेनालिङ्गनस्वभावोक्तिः। शाखाभिरेव भुजैः यानि बन्धनानि आलिङ्गनानि तानि अवापुः प्राप्तवन्तः। आलिङ्गनसौख्यमाह—पर्याप्तपुष्पस्तवकस्तनाभ्य इति। पर्याप्ताः सम्पूर्णाः पुष्पस्तबकाः कुसुमगुच्छा एव स्तनाः यासां ताभ्यः। किञ्च अधरार्पणमप्यासीदित्याह—स्फुरत्प्रवालोष्ठमनोहराभ्य इति। स्फुरद्भिः कम्पमानैः प्रवालैः पल्लवैरेवौष्ठैः मनोहराभ्यः। सन्निहिते हि प्रियतमे वधूनां स्तनपूर्तिरधरस्फुरणं च भवति। कामशास्त्रप्रसिद्धश्चायमर्थः।।३९।।

श्रुताप्सरोगीतिरपि क्षणेऽस्मिन्
हरः प्रसङ्ख्यानपरो बभूव।
आत्मेश्वराणां नहि जातु विघ्नाः
समाधिभेदप्रभवो भवन्ति।।४०।।

प्रकाशिका

अथ यथावसरमाधिकारिकं वृत्तमवतारयति—

श्रुतेति। अत्राप्सरसामुपस्थानं सकलदिविषत्साधारणं, न त्वन्यमुनिवत् समाधिभङ्गार्थम्। उक्तं च 'अप्सरसां मुखेभ्यः श्रुतमि'ति। अस्मिन् क्षणे एवंविधे सकलचेतनक्षोभसमये। प्रसङ्ख्यानं परमात्मानुसन्धानम्। चित्ताधिकारे पातञ्जलं—'तदेव रजोलेशमलापेतं स्वरूपप्रतिष्ठं सत्त्वपुरुषान्यथाख्यातिमात्रं धर्ममेघाख्यध्यानोपगमं भवति। तत् प्रसङ्ख्यानमित्याचक्षते ध्यायिन' इति। चित्तस्य धर्ममेघाख्यध्यानोपगमः प्रसङ्ख्यानम्। आत्मेश्वराणां वश्यात्मनाम्। समाधिरैकाग्रयम्।।४०।।

विवरणम्

इत्थमुपवर्णितं मधुमदनवृत्तं प्रकृते योजयति—

श्रुतेति। हरः अस्मिन् क्षणेऽपि प्रसङ्ख्यानपरः बभूव। हरः परमेश्वरः अस्मिन् क्षणे एवंविधसकलचेतनवर्गमनःक्षोभकरे समयेऽपि प्रसङ्ख्यानपरः। प्रसङ्ख्यानं परमात्मानुसन्धानम्। 'परमात्मानुसन्धानप्रसङ्ख्यानसमाधय' इति भोजः। एवंविधे वसन्तकोलाहले मन्मथे च स्वयमेवागते सति हरः किञ्चिदप्यस्खलितचित्तवृत्तिः परमात्मानुसन्धानान्न विररामेत्यर्थः। सेवार्थमागतानामप्सरसां स्तुतिमात्रमेव तदा हरेण

भक्तानुकम्पया श्रुतमित्याह—श्रुताप्सरोगीतिरिति। श्रुता: अप्सरसां सेवार्थमागतानाम् अप्सर:स्त्रीणां गीतयो गानानि येन। अत्राप्सरसां सेवार्थमेवागमनं नान्यमुनिसन्निधाविव चित्तक्षोभविधानार्थम्। भगवत्सेवाया: सर्वसुरसाधारणत्वादप्सरसामुपस्थानम्। अत एव 'अप्सरसां मुखेभ्य: श्रुतम्'ति पूर्वमुक्तम्। उक्तमर्थमर्थान्तरन्यासेन समर्थयते—विघ्ना: जातु आत्मेश्वराणां समाधिभेदप्रभवो न भवन्ति हि इति।. विघ्ना: विघ्नकारिणो रम्यपदार्था: जातु कदाचिदपि आत्मेश्वराणां आत्मन: मनस: ईश्वराणां स्वामिनां, स्ववशमनसामित्यर्थ:। समाधिभेदे चित्तैकाग्र्यभञ्जने प्रभव: समर्था: न भवन्ति। हि शब्द: प्रसिद्धौ। सकलचित्तक्षोभविधायिनोऽपि पदार्था: कदाचिदपि न धीराणां मनस: क्षोभमापादयन्तीति भाव:।।४०।।

लतागृहद्वारगतोऽथ नन्दी
वामप्रकोष्ठार्पितहेमवेत्र:।
मुखार्पितैकाङ्गुलिसंज्ञयैव
मा चापलायेति गणान् व्यनैषीत्।।४१।।

प्रकाशिका

अथात्मनिर्विशेषस्य देवामात्यस्य प्रतीहारपदे स्थितस्य भगवत: शैलादेस्तत्कालोचितं विधिमाह—

लतागृहेति। वामप्रकोष्ठेऽर्पणं दक्षिणाङ्गुल्या गणतर्जने व्यापृतत्वात्। अङ्गुलिस्तर्जनी। संज्ञा विनयसूचना। 'संज्ञा स्याच्चेतना नाम हस्ताद्यैश्चार्थसूचने'ति सिंह:। मा चापलाय चापलं कर्तुं मा भूतेति शेष:।।४१।।

विवरणम्

एवं मधुमदनवृत्तसम्भ्रान्तचित्तेषु जरायुजादिषु चतुर्विधेषु शरीरिवर्गेषु भगवत्प्रतिहारपदे वर्तमानस्य देवामात्यस्य नन्दिकेश्वरस्य तत्कालोचितां प्रवृत्तिमाह—

लतेति। अथ नन्दी लतागृहद्वारगत: गणान् चापलाय मा इति मुखार्पितैकाङ्गुलिसंज्ञया एव व्यनैषीत्। अथ सर्वभूतानामविनयवर्धनानन्तरं नन्दी नन्दिकेश्वर: लतैव गृहं लतागृहं तस्य द्वारं गत: सन् गणान् भूतगणान् चापलाय चापलं कर्तुं मा भूत इति शेष:। इतिशब्दो विनयप्रकारवचन:। मुखार्पितैकाङ्गुलिसंज्ञया मुखे वदने अर्पितया न्यस्तया एकयैवाङ्गुल्या, तर्जन्येत्यर्थ:। तया या संज्ञा अर्थसूचना। 'संज्ञा स्याच्चेतना नाम हस्ताद्यैश्चार्थसूचना' इति सिंह:। तयैव। एवकारो वचनादिव्यावृत्त्यर्थ:। तेन चास्य प्रभावातिशय: सूचित:। व्यनैषीत्

शिक्षितवान्। सर्वेऽपि काममविनयमाचरन्तु, वयं तु भगवत्परिचारकाः, ततो नास्माकमुचितोऽयमविनय इतीममर्थं स नासारोपितया तर्जन्यैव सूचितवानित्यर्थः। अथ नन्दिनस्तत्कालविशेषणमाह—वामप्रकोष्ठार्पितहेमवेत्र इति। वामे दक्षिणेतरस्मिन् प्रकोष्ठे मणिबन्धकूर्परमध्ये अर्पितं न्यस्तं हेमवेत्रं सुवर्णमयं वेत्रं यष्टिर्येन स तथा। अत्र दक्षिणहस्तस्य गणविनयव्यापृतत्वात् सुवर्णवेत्रस्य वामप्रकोष्ठार्पणमित्यवसेयम्।।४१।।

निष्कम्पवृक्षं निभृतद्विरेफं
मूकाण्डजं शान्तमृगप्रचारम्।
तच्छासनात् काननमेव सर्वं
चित्रार्पितारण्यमिवावतस्थे।।४२।।

प्रकाशिका

गणानां विनयनादेव जरायुजादिचतुर्विधभूतग्रामस्य विनयो जात इत्याह—

निष्कम्पेति। अत्र द्विरेफाः स्वेदजाः। 'स्वेदजाः कृमिदंशाद्या' इत्यमरः। अण्डजाः पक्षिणः। उपमया निष्पन्दतातिशय उक्तः। पारमेश्वर्या आज्ञाशक्तेरयं प्रभाव इति भावः।।४२।।

विवरणम्

एवं गणविनयनादेव चतुर्विधस्यापि भूतग्रामस्य विनयो जात इति परमेश्वरद्वारपालस्य नन्दिनः प्रभावातिशयमाह—

निष्कम्पेति। तच्छासनात् काननं सर्वमेव चित्रार्पितारण्यमिव अवतस्थे। तच्छासनात् तस्य नन्दिनः शासनात् काननं वनम्। सर्वमेव, न तु भूतगणमात्रं, नापि काननावस्थितजनमात्रमित्यर्थः। चित्रार्पितारण्यं चित्रे अर्पितं लिखितम् अरण्यं वनमिवावतस्थे अवस्थितमासीत्। अत्र जरायुजाण्डजस्वेदजोद्भिज्जभेदेन चतुर्विधेषु भूतग्रामेषु उद्भिज्जादीनां तच्छासनानुष्ठानस्य विस्मयकरत्वात् प्रथमं तत्प्रकारमाह—निष्कम्पवृक्षमिति। निष्कम्पा निश्चला वृक्षा यस्मिस्तत्तथा। वृक्षा अपि तदानीमचञ्चला जाता इत्यर्थः। अथ वृक्षाद्यपेक्षया किञ्चिदधिकज्ञानानां स्वेदजानां तच्छासनानुष्ठानप्रकारमाह—निभृतद्विरेफमिति। निभृता निश्चलाः द्विरेफा भ्रमरा यस्मिंस्तत्तथा। भ्रमरा अपि तदा स्वाभाविकं भ्रमणशीलत्वं तत्यजुरित्यर्थः। अत्र द्विरेफानां स्वेदजत्वं 'स्वेदजाः क्रिमिदंशाद्याः' इत्यमरसिंहवचनाद् द्रष्टव्यम्। स्वेदजापेक्षया अण्डजानां ज्ञानाधिक्यादनन्तरं तेषां नन्दिनियोगावस्थितिमाह—मूकाण्डजमिति। मूका निश्शब्दा

अण्डजाः पक्षिणो यस्मिंस्तत्तथा। अथ जरायुजा अपि तन्नियोग एव स्थिता इत्याह—शान्तमृगप्रचारमिति। शान्तो मृगाणां हरिणादीनां प्रचारः सञ्चारो यस्मिंस्तत्तथा। भूतग्रामाणामेवमेव चतुर्विधत्वमुक्तं भोजराजेन—

उद्भिज्जा वृक्षगुल्माद्याः पक्षिसर्पादयोऽण्डजाः।
स्वेदजाः क्रिमिदंशाद्या नृमृगाद्या जरायुजाः।।

इति। अत्राभिप्रायवेदिनां तच्छासनावस्थानं कैमुतिकन्यायादवगतमित्यपेक्षितमित्यवसेयम्। उपमया निष्कम्पत्वाद्यतिशयः प्रतिपादित इति महेश्वरप्रभावोऽनेन श्लोकेन दर्शितः।।४२।।

दृष्टिप्रतीपं परिहृत्य तस्य
कामः पुरश्शुक्रमिव प्रयाणे।
प्रान्तेषु संसक्तनमेरुशाखं
ध्यानास्पदं भूतपतेर्विवेश।।४३।।

प्रकाशिका

प्रकृतं प्रस्तौति—

दृष्टिप्रतीपमिति। प्रतीपमाभिमुख्यमित्यर्थः। प्रयाणे पुरश्शुक्रो निषिद्धः शास्त्रे। प्रान्तेषु संसक्तनमेरुशाखमिति आत्मनिगूहनार्थम्। ध्यानास्पदं प्रकृतं लतागृहम्। अत्र दृष्टिप्रतीपपरिहरणेन कामस्य देवसन्निकर्षाद्धतौजस्कत्वं द्योत्यते।।४३।।

विवरणम्

अथ प्रकृतं मदनस्य परमेश्वरसमाधिभङ्गव्यापारमेवानुसन्धत्ते—

दृष्टीति। कामः प्रयाणे पुरश्शुक्रमिव तस्य दृष्टिप्रतीपं परिहृत्य भूतपतेः ध्यानास्पदं विवेश। कामः कामदेवः प्रयाणे यात्रायां पुरश्शुक्रं पुरोभागस्थितं शुक्रमिव तस्य हरस्य। दृष्टिप्रतीपं दृष्टेः प्रतीपमाभिमुख्यमित्यर्थः। परिहृत्य त्यक्त्वा भूतपतेः गिरीशस्य। 'भूतेशः खण्डपरशुरि'त्यमरः। ध्यानार्थमास्पदं ध्यानास्पदम्। आस्पदं स्थानम्। 'लतागृहद्वारगतः'(३.४१) इत्यत्र प्रकृतं लतागृहमित्यर्थः। विवेश प्रविष्टोऽभूत्। प्रयाणे हि पुरश्शुक्रः प्रतिषिद्धो मुहूर्तशास्त्रे—

आग्नेयाद्यास्तारकाः साभिजित्काः प्रागाद्याशासंस्थिता सप्त सप्त।
यस्यां तिष्ठेत् भार्गवो दिश्यमुष्यां यात्रा पुंसां प्राणमानार्थहन्त्री।।

इति। यथा प्रयाणोद्युक्ता जनाः पुरोभागस्थितं शुक्रं वर्जयित्वैव गच्छन्ति,

तथासावपि हरस्य दृष्टिमार्गं परिहृत्यैव गतवान्। यथात्मानं हरो न पश्येत् तथा जगामेत्यर्थः। अनेन दृष्टिमार्गपरिहारकथनेन कामस्य हरसान्निध्यप्रतिहतशक्तित्वं सूचितम्। यथा पुरश्शुक्रपरिहाराभावे विनाशनिश्चयस्तथैवास्याप्येतदभिमुखप्रयाणेऽप्यभूदिति भावः। आत्मनिगूहनोपायोऽपि दैववशात्तत्र तस्यासीदित्याह— प्रान्तेषु संसक्तनमेरुशाखमिति। प्रान्तेषु परिसरेषु संसक्ता संश्लिष्टा नमेरूणां सुरपुन्नागानां शाखा यस्मिंस्तत्। क्षितितलपर्यन्तनिरन्तराश्लिष्टनमेरुविटपत्वात् तत्प्रदेशस्य दृष्टिमार्गपरिहारसौकर्य-मिति भावः।।४३।।

स देवदारुद्रुमवेदिकायां
शार्दूलचर्मव्यवधानवत्याम्।
आसीनमासन्नशरीरपात-
स्त्रियम्बकं संयमिनं ददर्श।।४४।।

प्रकाशिका

पुनरप्यस्यावसादकरं देवदर्शनं वर्णयति—

स इति। शार्दूलेति तदास्तृतायामित्यर्थः। आसन्नशरीरपात इति सोपहासम्। त्रियम्बकमिति यणादेशे प्राप्तेऽपि छन्दोभङ्गे छन्दोविचितिकारैरियङुवङादेशस्योक्तत्वादियङादेशः। संयमिनमित्यनवसरोपस्थानं दर्शयता आसन्नशरीरपाततत्वमुपपादितम्। अवसरे तु वक्ष्यति—'तस्यानुमेने' (७.९३) इत्यादि।।४४।।

विवरणम्

मदनस्य भगवद्दर्शनप्रकारमाह—

स इति। सः त्रियम्बकं ददर्श। सः कामदेवः त्रियम्बकं त्रिनेत्रम्। अम्बकं नेत्रम्। त्रियम्बकमित्यत्र यणादेशे प्राप्ते छन्दोभङ्गप्रसङ्गे सति छन्दोविचितिकारैरियङुवङादेशयोर्विहितत्वादियङादेशः। 'त्रियम्बकं नान्यमुपस्थितासावि'ति **भर्तृहरिप्रयो**गाच्च नायं दोषः। ददर्श दृष्टवान्। अत्र त्र्यम्बकशब्दप्रयोगेण 'तृतीयादक्ष्णः कृशानुः किल निष्पपात' (३.७१) इति वक्ष्यमाणोऽर्थः सूचितः। त्र्यम्बकस्य समाधियोग्यमवस्थानप्रकारमाह—देवदारुद्रुमवेदिकायाम् आसीनमिति। देवदारुर्वृक्षविशेषः। देवदारुरेव द्रुमो देवदारुद्रुमः, तस्य वेदिकायाम्। शिलादिभिर्बद्धे मूलप्रदेश इत्यर्थः। आसीनं स्थितम्। 'ईदासः'(७.२.८३) इति शानच ईकारादेशः। तस्यां समाधियोग्यमवस्थानमाह—शार्दूलचर्मव्यवधानवत्यामिति। शार्दूलो व्याघ्रः, तस्य चर्मणा व्यवधानवत्याम् आच्छादनसहितायाम्।

ऽ

शार्दूलचर्मातृतायामित्यर्थः। अथ कविस्तादृशपरमेश्वराभिभवोद्युक्तं मदनं सोपहासं विशिनष्टि—आसन्नशरीरपात इति। आसन्नः समीपवर्ती शरीरपात शरीरस्य पातो नाशो यस्य स तथोक्तः। अहो मदनस्यानात्मवेदित्वमिति भावः। आसन्नशरीरपातत्वोपपादकं त्र्यम्बकविशेषणमाह—संयमिनमिति। संयम इन्द्रियनिग्रहः सोऽस्यास्तीति संयमी, तम्। अनवसरोपस्थानादस्य शरीरनाश इति भावः। अवसरोपस्थानेनानुग्रहः पुनः 'तस्यानुमेने भगवान् विमन्युर्व्यापारमात्मन्यपि सायकानाम्' (७.९३) इत्यादिना वक्ष्यते।।४४।।

पर्यङ्कबन्धस्थिरपूर्वकाय-
मृज्वायतं सन्नमितोभयांसम्।
उत्तानपाणिद्वयसन्निवेशात्
प्रफुल्लराजीवमिवाङ्कमध्ये।।४५।।

प्रकाशिका

पर्यङ्केति। पर्यङ्को वीरासनं, तस्य बन्धेन स्थिरः पूर्वकायोऽधःकायो यस्य। अत्र वसिष्ठः—'एकं पादमथैकस्मिन् विन्यस्योरुणि संस्थितमि'त्यादि। ऋज्वायतत्वमर्थादूर्ध्वकाये। उत्तानपाणिद्वयसन्निवेशात् सन्नमितोभयांसत्वम्। अत्र योगसारवचनम्—

उत्तानिते करतले करमुत्तानितं परम्।
आधायाङ्कगतं कृत्वा ध्यायेद् यस्तत्र नान्तरम्।।

इति।।४५।।

विवरणम्

अथ मन्मयावसादकरं भगवतस्तपःप्रभावदुष्प्रेक्षत्वमेव विशेषणैः प्रपञ्चयति षड्भिः श्लोकैः। तत्र तपसामासनस्थैर्यमूलत्वादादावासनप्रकारमाह—

पर्यङ्केति। पर्यङ्कबन्धस्थिरपूर्वकायं पर्यङ्कस्य वीरासनस्य बन्धेन बन्धनेन स्थिरः निश्चलः पूर्वकायः अधःकायः कायस्याधोभागो यस्य। वीरासनबन्धनेन निश्चलशरीरपूर्वार्ध इत्यर्थः। यथाह वसिष्ठः—

एकं पादमथैकस्मिन् विन्यस्योरुणि संस्थितम्।
इतरस्मिंस्तथाचोरुं वीरासनमुदाहृतम्।।

इति। तं ददर्शेति पूर्वेणान्वयः। ऊर्ध्वकायावस्थानप्रकारमाह—ऋज्वायतमिति। ऋजु

अवक्रम् अत एवायतं दीर्घं च। अवक्रायतोर्ध्वकायमित्यर्थः। पाणिद्वयावस्थापनप्रकारमाह—उत्तानपाणिद्वयसन्निवेशाद् अङ्कमध्ये प्रफुल्लराजीवमिवेति। उत्तानस्य ऊर्ध्वमुखस्य पाणिद्वयस्य सन्निवेशाद् अवस्थापनाद्। अङ्कस्य मध्ये। प्रफुल्लराजीवं प्रफुल्लं विकसितं राजीवं पङ्कजं यस्य तम्। उत्तानयोः करतलयोरङ्कमध्यावस्थापितत्वाद् अङ्कमध्ये प्ररूढारविन्दमिव दृश्यमानमित्यर्थः। अत्र पाणिद्वयस्याङ्के सन्निवेशादेवांसयोः सन्नमितत्वमपि सम्भवतीति न तस्य शास्त्रीयत्वम्। पाणिद्वयस्याङ्कावस्थापनं तु **योगसार**वचनसिद्धम्। यथोक्तम्—'उत्तानिते करतले करमुत्तानितं परम्। आधायाङ्कगतं कृत्वा ध्यायेदि'त्यादि।।४५।।

भुजङ्गमोन्नद्धजटाकलापं
कर्णावसक्तद्विगुणाक्षसूत्रम्।
कण्ठप्रभाभ्यङ्गविशेषनीलां
मृगत्वचं ग्रन्थिमतीं दधानम्।।४६।।

प्रकाशिका

भुजङ्गमेति। अक्षसूत्रस्य द्विगुणनं शैथिल्यपरिहाराय। श्रवसि स्थापनं श्रवसः पवित्रतास्मृतेः। अभ्यङ्गो व्याप्तिः। ग्रन्थिरस्रंसनाय।।४६।।

विवरणम्

ध्यानोद्योगद्योतकमलङ्कारविशेषमाह—

भुजङ्गमेति। भुजङ्गमोन्नद्धजटाकलापं भुजङ्गमेन सर्पेण उन्नद्धः ऊर्ध्वं नद्धः जटाकलापः जटासमूहो येन तम्। योगमात्रव्यापृतस्य जपविरामादक्षमालार्पणप्रकारमाह—कर्णावसक्तद्विगुणाक्षसूत्रमिति। कर्णे अवसक्तं कर्णावसक्तम्। द्वौ गुणौ परिवृत्ती यस्य तद् द्विगुणम्। कर्णे **दक्षिण**कर्णे अवसक्तं स्थितं द्विगुणमक्षसूत्रम् अक्षमाला यस्य तम्। अक्षसूत्रस्य कर्णे निधानं कर्णस्य पवित्रतास्मृतेः। द्विगुणत्वं चाञ्चल्यपरिहारार्थम्। कटिप्रदेशस्यापि योगानुगुणं स्थिरत्वापादनप्रकारमाह—ग्रन्थिमतीं मृगत्वचं दधानमिति। ग्रन्थिः ग्रथनमस्या अस्तीति ग्रन्थिमती। अतिशायने मतुप्। तादृशीं मृगत्वचं मृगस्य त्वचं दधानं परिदधानम्। निबिडग्रथितं मृगचर्म वसानमित्यर्थ। अत्र निबिडग्रथनं मध्ये स्रंसपरिहारार्थम्। भगवत्परिधानभूताया मृगत्वचः शोभाधिक्यमाह—कण्ठप्रभाभ्यङ्गविशेषनीलामिति। कण्ठस्य प्रभाया अभ्यङ्गेन व्याप्त्या विशेषतो नीलाम्। गलगलितया बहलतरया गरलप्रभया विशेषतोऽपि श्यामलामित्यर्थः। मृगत्वचः स्वतो नीलत्वाद् विशेषनीलोक्तिः।।४६।।

किञ्चित्प्रकाशस्तिमितोग्रतारै-
र्भ्रूविक्रियायां विरतप्रसङ्गैः।
नेत्रैरविस्पन्दितपक्ष्ममालै-
र्लक्षीकृतघ्राणमधोमयूखैः॥४७॥

प्रकाशिका

किञ्चिदिति। विशेषणानि योगदृष्टिस्वभावाख्यानपराणि चित्तैकाग्रताद्योतकानि।।४७।।

विवरणम्

नेत्राणामपि योगानुगुणमवस्थानविशेषमाह—

किञ्चिदिति। नेत्रैः लक्षीकृतघ्राणम्। नेत्रैः त्रिभिर्लोचनैः। लक्षीकृतघ्राणं लक्षीकृतं लक्षतां प्रापितं घ्राणं नासाग्रं येन तम्। शरादिप्राप्यभूमिर्लक्षशब्दार्थः। अत्र तु प्राप्यभूमित्वगुणयोगाद् घ्राणे गौणः प्रयोगः। त्रिभिरपि लोचनैरश्रान्तमवलोक्यमाननासिकाग्रमित्यर्थः। अथ योगदृष्टिख्यापनपराणि चित्तैकाग्र्यद्योतकानि च नेत्रविशेषणान्याह—किञ्चिदित्यादिभिः। किञ्चित्प्रकाशस्तिमितोग्रतारैः। किञ्चन प्रकाशो यासां ताः किञ्चित्प्रकाशाः स्तिमिता निश्चलाः उग्रा दुर्निरीक्षाश्च ताराः कनीनिकाः येषां तैः। अत्र किञ्चित्प्रकाशत्वं नयनानामीषन्मीलनात्। तच्च योगस्वभावकृतम्। स्तिमितत्वं चित्तैकाग्र्यकृतम्। स्तिमितत्वादेवोग्रत्वम्। नेत्राणां स्तिमितत्वाद् भ्रुवोरपि स्तिमितत्वमाह—भ्रूविक्रियायां विरतप्रसङ्गैरिति। भ्रुवोर्विक्रियायां विकारे। विरतो निवृत्तः प्रसङ्गो व्यापारो येषां तैः। भ्रूविकारस्य नेत्रविकारपूर्वकत्वादेवमुक्तम्। नेत्रावयवानामपि निस्पन्दत्वमाह—अविस्पन्दितपक्ष्ममालैरिति। अविस्पन्दिता अचलिताः पक्ष्ममाला अक्षिरोमसमूहाः येषां तैः। नासाग्रमात्रावलोकप्रकारमाह—अधोमयूखैरिति। अधोभाग एव मयूखा रश्मयो येषां तैः। अनेन समाधेरचलत्वमुक्तम्।।४७।।

अवृष्टिसंरम्भमिवाम्बुवाह-
मपामिवाधारमनुत्तरङ्गम्।
अन्तश्चराणां मरुतां निरोधा-
न्निवातनिष्कम्पमिव प्रदीपम्॥४८॥

प्रकाशिका

अवृष्टीति। अत्राध ऊर्ध्वं तिर्यक् च वायोर्गतित्रयनिरोधादुपमानत्रयोपपत्तिः।।४८।।

विवरणम्

अथ योगाभ्यासयोग्यं प्राणादिवायूनां निरोधमुपमामुखेन दर्शयति—

अवृष्टीति। अन्तश्चराणां मरुतां निरोधाद् अवृष्टिसंरम्भम् अम्बुवाहमिव। अन्तश्चरन्तीत्यन्तश्चराः, तेषाम्। शरीरान्तर्वर्तिनामित्यर्थः। मरुतां प्राणादिवायूनां निरोधाद् नियमनाद्धेतोः। अवृष्टिसंरम्भम्। संरम्भ उद्योगः वृष्टिसंरम्भो यस्य नास्ति सोऽवृष्टिसंरम्भः, (तम्) वर्षोद्योगरहितमम्बुवाहं मेघमिव दृश्यमानम्। अनेनोपमानेन मरुतामधःप्रदेशप्रवृत्त्यभावः सूचितः। ऊर्ध्वप्रवृत्त्यभावमपि दर्शयति—अनुत्तरङ्गम् अपाम् आधारमिवेति। अनुत्तरङ्गम् उद्गतस्तरङ्गो यस्मात् स उत्तरङ्गः, उत्तरङ्गो न भवतीत्यनुत्तरङ्गः, अपां जलानाम् आधारमधिष्ठानं जलाशयमिवेत्यर्थः। 'जलाशयो जलाधार' इत्यमरः। अन्तश्चराणां मरुतां निरोधादिति अत्रापि योजनीयम्। तिर्यक्प्रवृत्त्यभावमपि प्रतिपादयति—निवातनिष्कम्पं प्रदीपमिवेति। निवातं वाताभावः। अर्थाभावेऽव्ययीभावः। तेन हेतुना निष्कम्पं निश्चलं प्रदीपमिव। अन्तश्चराणां मरुतां निरोध एवात्रापि हेतुः। कुम्भितपवनत्वेन कुत्रापि पवनप्रवृत्त्यभावान्निश्चिलशरीरमित्यर्थः।।४८।।

कपालनेत्रान्तरलब्धमार्गै-
ज्योतिःप्ररोहैरुदितैः शिरस्तः।
मृणालसूत्राधिकसौकुमार्यान्
बालस्य रश्मीन् ग्लपयन्तमिन्दोः॥४९॥

प्रकाशिका

कपालनेत्रान्तरेति। कपालं ब्रह्मशिरस्सम्बन्धि। वक्ष्यति च 'कपालमेवामलशेखरश्रीः' (७.३२) इति। तन्नेत्ररन्ध्रनिर्गतैर्ज्योतिःप्ररोहैरन्तराग्नेयमण्डलसमुद्गतैः। शिरस्तः ब्रह्मरन्ध्रात्। मृणालेत्याद्युत्प्रेक्षाप्राणकम्।।४९।।

विवरणम्

इत्थं प्रतिपादितस्वासनजयादिरूपस्य योगस्य सिद्धिं दर्शयति—

कपालेति। शिरस्तः उदितैः ज्योतिष्प्ररोहैः बालस्य इन्दोः रश्मीन् ग्लपयन्तम्। शिरस्तः ब्रह्मरन्ध्राद् उदितैः उद्गतैः ज्योतिष्प्ररोहैः ज्योतिषाम्

अन्तर्गताग्नेयमण्डलसमुद्गतानां तेजसां प्ररोहैः अङ्कुरैः बालस्य इन्दोः जटाकोटितटघटितस्य बालचन्द्रस्य रश्मीन् ग्लपयन्तं ग्लानिं प्रापयन्तम्। अयमभिप्रायः—योगिनो हि नियमितप्राणा आग्नेयमण्डलापरनामधेयं कुण्डलिनीशब्दाभिधेयमात्मतेजो मूलाधारादुत्थाप्य क्रमात् सुषुम्नान्तरं नाभिप्रदेशं हृदयं भ्रूमध्यं च नीत्वा द्वादशान्तस्थिते परमात्मनि योजयन्ति। परमेश्वरस्य तु तदानीं तेन तेजसा तन्मध्यवर्तिनो बालचन्द्रस्य प्रभासङ्कोचोऽपि सञ्जातः। बालचन्द्रे परमात्मसाम्यं च प्रतीयत इति। ज्योतिष्प्ररोहाणामूर्ध्वगमनाभ्युपायमभ्यूह्य कथयति—कपालनेत्रान्तरलब्धमार्गैरिति। कपालस्य ब्रह्मशिरःकपालस्य यन्नेत्रान्तरं नेत्ररन्ध्रं, तेन पथा लब्धमार्गैः। ब्रह्मशिरःकपालनेत्ररन्ध्रनिर्गतैरित्यर्थः। बालचन्द्ररश्मीनां ग्लानिप्राप्तौ हेतुमाह—मृणालसूत्राधिकसौकुमार्यानिति। मृणालस्य सूत्रं मृणालसूत्रं, तस्मादप्यधिकं सौकुमार्यं येषां तान्। प्रबलसन्निधौ दुर्बलं ग्लानिमेतीति हि प्रसिद्धमिति भावः।।४९।।

मनो नवद्वारनिषिद्धवृत्ति
हृदि व्यवस्थाप्य समाधिवश्यम्।
यमक्षरं क्षेत्रविदो विदुस्त-
मात्मानमात्मन्यवलोकयन्तम्।।५०।।

प्रकाशिका

मन इति। हृदि स्थानविशेषे। अत्र **वसिष्ठः**—

> यतो निर्याति विषयाद् यस्मिंश्चैव प्रलीयते।
> हृदयं तद् विजानीयान्मनसः स्थितिगोचरम्।।

इति। अत्रोपायमाह—समाधिवश्यमिति। अक्षरमनश्वरम्। क्षेत्रविदः क्षेत्रक्षेत्रज्ञविभागविद इत्यर्थः। आत्मानं परमात्मानम्। आत्मनि स्वस्मिन्। अत्र परमपावनस्य योगिदशापन्नपरमेश्वरस्वरूपस्य कविशक्त्या प्रत्यक्षायमाणत्वं कृतमित्येतदनुसन्धातृणां कार्यमात्ररसिकानां गुरुकटाक्षपातरहितानामपि सकलबन्धध्वंसो भवति। अयमेव चात्र कारुणिकस्य कवेरभिप्रायः।।५०।।

विवरणम्

योगसिद्धेः फलमाह—

मन इति। क्षेत्रविदः यम् अक्षरं विदुः मनः हृदि व्यवस्थाप्य तम् आत्मानम् आत्मनि अवलोकयन्तम्। क्षेत्रं शरीरं विदन्तीति क्षेत्रविदः। आत्मनो भिन्नत्वेन

शरीरमवगच्छन्त इत्यर्थः। क्षेत्रक्षेत्रज्ञविभागविद इति यावत्। यमक्षरं विदुः अनश्वरं जानन्ति। 'विदो लटो वा' (३.४.८३) इति झेरुसादेशः। अन्तःकरणम्। हृदि हृदये मनोनिवासस्थान इत्यर्थः। यथाह वसिष्ठः—

> यतो निर्याति विषयाद् यस्मिंश्चैव प्रलीयते।
> हृदयं तद् विजानीयान्मनसः स्थितिगोचरम्।।

इति। व्यवस्थाप्य स्थिरतया स्थापयित्वा। तम् आत्मानं परमात्मानमित्यर्थः। आत्मनि स्वस्मिन्, जीवात्मनीत्यर्थः। अवलोकयन्तं पश्यन्तम्। विषयेभ्यो मनो निवार्य जीवपरयोरैक्यमेवावगच्छन्तमिति भावः। तत्तदिन्द्रियानुसारेण विषयाननुधावतो मनसो निरोधप्रकारमाह—नवद्वारनिषिद्धवृत्तीति। शरीरस्य हि नवद्वाराणि सन्ति। यथाहुः—

> नयनश्रवणे द्वे द्वे नासिके वदनं तथा।
> पायूपस्थौ च देहेऽस्मिन् नवद्वाराणि देहिनाम्।।

इति। नवभ्योऽपि द्वारेभ्यो निषिद्धा वारिता वृत्तिर्यस्य तत्। मनोनिषेधोपायमाह—समाधिवश्यमिति। समाधिरैकाग्र्यं, तेन वश्यं विधेयम्। समाधिपरिशीलनमेव हि विषयेभ्यो मनोनिवारणस्योपायः। एवम्भूतं त्र्यम्बकं ददर्शेति पूर्वेणान्वयः। अत्र महाकविः परमकारुणिको योगिदशापन्नस्य परमेश्वरस्य परमपावनं स्वस्वरूपमनुसन्धातृणां कर्मबन्धपरिध्वंसार्थं कविशक्त्या प्रत्यक्षायमाणतया प्रदर्शितवानिति भाविकमलङ्कारः। 'अतीतानागतयोः प्रत्यक्षायमाणत्वं भाविकमि'[...]ति।।५०।।

> **स्मरस्तथाभूतमयुग्मनेत्रं**
> **पश्यन्नदूरान्मनसाप्यधृष्यम्।**
> **नालक्षयत् साध्वससन्नहस्तः**
> **स्रस्तं शरं चापमपि स्वहस्तात्।।५१।।**

प्रकाशिका

एवं परमामनभिभवनीयतामधितिष्ठति देवे कामस्यावस्थां वर्णयति—

स्मर इति। साध्वसं भयम्। तस्य चालम्बनं (तथाभूतत्वम्)। तथाभूतत्वात् सङ्कल्पेनाप्यधृष्यत्वम्। अदूरादिति स्फुटप्रत्यये हेतुः। नालक्षयदिति विषादाव्यभिचारिणी जडता। तथाभूतं पश्यन्नित्यनेन पूर्वं **दाक्षायणीसा**हचर्ये समग्रशृङ्गारास्पदत्वेन देवस्य स्वयमनुभूतत्वात् तथाभावः कदाचिदप्यतर्कितपूर्वः कामेनेति प्रतीयते।।५१।।

विवरणम्

एवं परमेश्वरस्य दुरभिभूत्वं प्रतिपाय तमेवमालोकयतो मदनस्य तदनुगुणामवस्थामाह—

स्मर इति। अयुग्मनेत्रम् अदूरात् तथाभूतं पश्यन् स्मरः स्वहस्तात् स्रस्तं शरं चापमपि न अलक्षयत्। अयुग्मनेत्रं त्र्यम्बकम् अदूरात् समीपे इत्यर्थः। 'दूरान्तिकार्थेभ्यो द्वितीया च' (२.३.३५) इति पञ्चमी। अनेन सम्यगवलोकनोपपत्तिर्दर्शिता। तथाभूतं पश्यन् अत्यन्तदुर्निरीक्षतया साक्षात्कुर्वन्। पूर्वं दाक्षायणीसाहचर्ये समग्रशृङ्गारास्पदत्वात् तथाभूतत्वेनानुभूतस्य भगवतस्तथाभावो मनसापि न स्मरेण सम्भावित इति भावः। स्मरः मदनः स्वहस्ताद् आत्मनः करात्। स्रस्तं गलितं शरं चापमपि। अपिशब्दः समुच्चये। नालक्षयत् न ज्ञातवान्। अत्र स्वहस्तस्रस्तस्याप्यज्ञातत्ववचनेन साध्वसस्योत्कर्ष उक्तः। तथाभूतत्वमेवोपपादयति—मनसाप्यधृष्यमिति। सङ्कल्पेनाप्यनभिभवनीयम्। अहमेनमभिभष्यामीति सङ्कल्पयितुमप्यशक्यमित्यर्थः। स्वहस्ताच्छरचापस्रंसे हेतुमाह—साध्वससन्नहस्त इति। साध्वसेन भयेन। 'भीतिर्भीः साध्वसं भयमि'त्यमरः। सन्नौ क्षीणौ हस्तौ यस्य स तथा। अत्र साध्वसस्यालम्बनं तथाभूतत्वम्।।५१।।

निर्वाणभूयिष्ठमथास्य वीर्यं
सन्धुक्षयन्तीव वपुर्गुणेन।
अनुप्रयाता वनदेवताभ्या-
मदृश्यत स्थावरराजकन्या॥५२॥

प्रकाशिका

अथ पूर्वप्रकृतं देवीकर्तृकं शुश्रूषालक्षणं प्रयोज्यस्योपावर्तनं स्वावसरेऽवतारयति—

निर्वाणभूयिष्ठमिति। आहिताग्न्यादिषु पाठात् पूर्वनिपातानियमः। निर्वाणसन्धुक्षणाभ्यामग्निसाम्यप्रतीतिः। वपुर्गुणेन रूपसम्पदा। वनदेवताभ्यामोषधिप्रस्थयोषिद्भ्यां सखीभ्याम्। यद्वक्ष्यति 'योषितो वनदेवताः' (६.३९) इति। अनेन 'सखीसमग्राम्' (१.५८) इत्येतदनुसंहितम्। ते च विजयामालिन्यौ प्रसिद्धे। दर्शनस्य तद्वीर्योद्दीपनत्वाददृश्यतेत्युक्तं, न त्वाजगामेति।।५२।।

विवरणम्

अथ प्रथमसर्गे प्रतिपादितं शुश्रूषादिलक्षणं प्रयोज्योपावर्तनं स्वावसरेऽवतारयति—

निर्वाणेति। अथ स्थावरराजकन्या अदृश्यत। अथ साध्वसप्राप्त्यनन्तरम्।

स्थावरराजकन्या स्थावराणां राजा हिमवान्, तस्य कन्या पार्वती। अदृश्यत दृष्टाभूत्। तद्दर्शनस्य मन्मथोद्दीपनत्वप्रदर्शनार्थमदृश्यतेत्युक्तं, नत्वभ्याययाविति। दर्शनं हि मन्मथकर्तृकं, तेन च तस्य कृतार्थताभिमानः, तेन च तस्य वीर्यसन्धुक्षणमिति क्रमः। अत एवोत्प्रेक्षते—निर्वाणभूयिष्ठमस्य वीर्यं वपुर्गुणेन सन्धुक्षयन्तीवेति। निर्वाणभूयिष्ठं नष्टप्रायम्। आहिताग्न्यादिषु पाठात् पूर्वनिपातनियमाभावः। कर्तरि निष्ठान्तश्चायं निर्वाणशब्दो 'निर्वाणोऽवाते' (८.२.५०) इति निपातितः। अस्य कामदेवस्य वीर्यं बलम्। 'वीर्यं बले प्रभावे च' इत्यमरः। वपुषो गुणेन सौन्दर्यातिशयेन सन्धुक्षयन्तीव वर्धयन्तीव। अत्र निर्वाणसन्धुक्षणशब्दाभ्यां मन्मथवीर्यस्याग्निसाम्यं प्रतीयते। तेन चात्यन्तदुस्सहत्वम्। 'सखीसमग्रां समादिदेशे'ति पूर्वोक्तमर्थमनुसन्दधान आह—वनदेवताभ्यामनुप्रयातेति। तत्रत्यानां योषितां वनदेवतात्वाद् वनदेवताभ्यामित्युक्तम्। वक्ष्यति च 'योषितो वनदेवताः' (कुमार.६.३९) इति। एते च विजया मालिनी चेति प्रसिद्धे देवीसख्यौ। अनुप्रयाता अनुगता।।५२।।

अशोकनिर्भर्त्सितपद्मराग-
माक्रुष्टहेमद्युतिकर्णिकारम्।
मुक्ताकलापीकृतसिन्दुवारं
वसन्तपुष्पाभरणं वहन्ती॥५३॥

प्रकाशिका

अशोकेति। मुक्ताकलापो हारः। वसन्तपुष्पमयमाभरणमाभरणजातमित्यर्थः।।५३।।

विवरणम्

अथ देवीदर्शनस्य मन्मथवीर्यसन्धुक्षणसामर्थ्यं प्रतिपादयितुं देवीविशेषणभूताश्चत्वारः श्लोकाः। तत्रादौ दूरतो दृश्यमानाया अपि देव्या बसन्तपुष्पाभरणानामुज्ज्वलतरत्वाद् दूरतोऽपि दर्शनोपपत्तेर्वसन्तपुष्पाभरणरमणीयत्वमाह—

अशोकेति। वसन्तपुष्पाभरणं वहन्ती। वसन्तपुष्पाभरणमिति जातावेकवचनम्। वसन्तपुष्पमयान्याभरणानि दधानेत्यर्थः। वसन्तपुष्पाभरणानामितराभरणव्यतिरेकं प्रतिपादयितुं वसन्तपुष्पाभरणं विशिनष्टि—अशोकेत्यादिना। तत्रादावशोककुसुमानामौज्ज्वल्यातिरेकात् तद्दर्शनं जातमिति पूर्वमशोकपुष्पाभरणं वर्णयति—अशोकनिर्भर्त्सितपद्मरागमिति। अशोकैः अशोककुसुमैः निर्भर्त्सिता

निन्दिताः पद्मरागाः पद्मरागमणयो येन तत्। अनेन देव्याः काञ्चीनूपुरादिप्रत्युप्तानामुत्तमतराणां पद्मरागाणामशोककुसुमेभ्यो न्यूनता प्रतिपादिता। काञ्चीनूपुरादीनामपि कर्णिकारकुसुमापेक्षया न्यूनतां प्रतिपादयति—आक्रुष्टहेमद्युतिकर्णिकारमिति। आक्रुष्टा निन्दिता हेम्नः सुवर्णस्य द्युतिः कान्तिर्यैस्तादृशा[नि] कर्णिकारपुष्पाणि यस्मिंस्तत्। अनेनाशोककुसुमापेक्षया कर्णिकारकुसुमानां न्यूनप्रभावत्त्वादशोकपुष्पदर्शनानन्तरमेव कर्णिकारपुष्पदर्शनमिति च प्रतिपादितम्। अत एवानन्तरमेव तदुपादानम्। अथ पुनरपि प्रत्यासत्तिबलात् सिन्दुवारकुसुमानामपि दर्शनं जातमित्याह—मुक्ताकलापीकृतसिन्दुवारमिति। मुक्ताकलापो हारः, मुक्ताकलापीकृतानि मुक्ताकलापतां प्रापितानि। सिन्दुवारकुसुमानि यस्मिन्। अत्राभूततद्भावप्रयोगेण सिन्दुवारपुष्पाणां मुक्ताकलापापेक्षया बहुगुणत्वाद् मुक्ताकलापमपहाय तत्स्थानप्रापणमुक्तमिति व्यतिरेकोपपत्तिः।।५३।।

आवर्जिता किञ्चिदिव स्तनाभ्यां
वासो वसाना तरुणार्करागम्।
सुजातपुष्पस्तबकावनम्रा
सञ्चारिणी पल्लविता लतेव।।५४।।

प्रकाशिका

आवर्जितेति। इवशब्दो वाक्यालङ्कारे। तरुणार्करागमिति वसन्ते स्त्रीणां रक्तं वासः। तदुक्तम् 'अरुणरागनिषेधिभिरंशुकैरि'[रघु.९.४३]ति।।५४।।

विवरणम्

अथ क्रमेण किञ्चिदासन्नत्वाद् विभाव्यमानस्तनजघनाद्यवयवविभागां देवीं विशिनष्टि—

आवर्जितेति। स्तनाभ्यां किञ्चिदिव आवर्जिता इति। स्तनाभ्यामावर्जनकर्तृभूताभ्यां स्तनभाराभ्यां किञ्चिद् ईषदिव। इवशब्दो वाक्यालङ्कारे। आवर्जिता आनमिता। स्तनभारगौरवादनवमितशरीरेत्यर्थः। पुनश्च क्रमेण वसनवर्णस्यापि विशेषावगमो जात इत्याह—तरुणार्करागं वासो वसाना इति। तरुणस्य अचिरोदितस्य अर्कस्य सूर्यस्य राग इव रागो यस्य तादृशं वासो वसाना परिदधाना। अत्रारुणाम्बरधारणं वसन्तोचितम्। यथोक्तं रघुवंशे—'अरुणरागनिषेधिभिरंशुकैः'(९.४३) इति। अत्रोत्प्रेक्षते—सुजातपुष्पस्तवकावनम्रा पल्लविता लता सञ्चारिणीवेति। सुजातेन मनोहरेण पुष्पस्तबकेन मञ्जर्या। अत्र स्तवकशब्देनैव

विवक्षितार्थसिद्धावपि मनोहारित्वातिशयप्रदर्शनार्थं पुष्पशब्दप्रयोगः। यदुक्तं काव्यप्रकाशकृता—'कर्णावतंसादिपदे कर्णादिध्वनिनिर्मितिः, सन्निधानादिबोधार्थमि'ति। अवनम्रा अवनमिता। पल्लविता सञ्जातपल्लवा। तारकादित्वादितच्। सञ्चारिणी सञ्चरणशीला लतेव। अत्र गौरीलतयोः स्तनस्तबकयो रक्तवासःपल्लवयोश्च परस्परसाम्यमुत्प्रेक्षाबीजम्।।५४।।

स्रस्तां नितम्बादवलम्बमाना
पुनः पुनः केसरदामकाञ्चीम्।
न्यासीकृतां स्थानविदा स्मरेण
द्वितीयमौर्वीमिव कार्मुकस्य॥५५॥

प्रकाशिका

स्रस्तामिति। स्रंसनं गमनवशात्। गमनप्रतिबन्धनिरासाय चावलम्बनम्। पुनश्शब्द उभयशेषः। स्थानविदा, अत्र निक्षिप्तमापदि सुलभं स्यादिति। 'मौर्वीं द्वितीयामिति युक्तमि'ति भोजादयः। अत्र युक्तिर्विस्तरभयादस्माभिर्न लिख्यते।।५५।।

विवरणम्

अथ तदपेक्षयापि किञ्चित् प्रत्यासन्नां विभाव्यमानव्यापारविशेषां देवीं विशिनष्टि—

स्रस्तामिति। नितम्बात् स्रस्तां केसरदामकाञ्चीं पुनः पुनः अवलम्बमाना। नितम्बाद् जघनप्रदेशात् स्रस्तां गमनवशाद् गलिताम्। केसरदामकाञ्चीं केसरमालामयीं काञ्चीं रशनाकलापम्। केसरो बकुलः। पुनश्शब्द उभयशेषः। गमनवशात् पुनः पुनर्गलितां केसरदामकाञ्चीं पुनः पुनरवलम्बमानेत्यर्थः। गमनप्रतिबन्धनिरासाय स्वयमेव स्वस्थानं नीत्वा करेण गृह्णतीति भावः। काञ्चीमुत्प्रेक्षते—स्थानविदा स्मरेण न्यासीकृतां कार्मुकस्य द्वितीयमौर्वीमिवेति। स्थानविदा स्थानं वेत्तीति स्थानवित् तेन। अत्र निक्षिप्तमापदि मया सुलभं भवेदिति निक्षेपस्थानज्ञेनेत्यर्थः। स्मरेण मदनेन न्यासीकृतां निक्षेपतां प्रापितां कार्मुकस्य चापस्य द्वितीयां मौर्वीं शिञ्जिनीमिव। चापभृतो हि युद्धमध्ये मौर्वीभङ्गमाशङ्क्य द्वितीयां काममपि मौर्वीमाप्तजने निक्षिपन्ति। अत्र द्वितीयमौर्वीमित्यत्रोत्प्रेक्षाविषयभूतस्य द्वितीयात्वस्य समासान्तर्गतत्वमयुक्तम्। तस्मा'न्मौर्वीं द्वितीयामि'त्येव युक्तः पाठ इति कैश्चिदुक्तम्। तदयुक्तम्। समासान्तर्गतत्वेऽपि कविशक्त्या द्वितीयात्वप्रतिपत्तेः सुलभत्वात्। न चात्र द्वितीयात्वमात्रमुत्प्रेक्ष्यम्, अपि तु स्मरेण

न्यासीकृतत्वं द्वितीयात्वं मौर्वीत्वं च। तत्र मौर्वीत्वोत्प्रेक्षयैव तदितरोत्प्रेक्षासिद्धिरिति मौर्वीत्वमेवात्र विधेयांश इति नाविमृष्टविधेयांशत्वदोषः।।५५।।

सुगन्धिनिःश्वासविवृद्धतृष्णं
बिम्बाधरासन्नचरं द्विरेफम्।
प्रतिक्षणं सम्भ्रमलोलदृष्टि-
र्लीलारविन्देन निवारयन्ती॥५६॥

प्रकाशिका

सुगन्धीति। बिम्बाधर इति 'बिम्बाधर इति वृत्तौ मध्यमपदलोपिन्याम्'-(५.२.१५) इति वामनः। बिम्बाकारोऽधर इति विग्रहः। शाकपार्थिवादित्वात् समासः। अन्यथाधरबिम्ब इति स्यात्। अनेन कुलकेन कविः प्रतिभामय्या स्वदृष्ट्या साक्षात्कृतं समग्रलोकोत्तरविभावतापात्रभूतं तत्कालसमुचितभूषणविलासविशेषितं देव्या वपुः सहृदयानां साक्षात्कारपदवीं स्वशक्त्या नीतवानिति भाविकमलङ्कारः। अत्रापि पूर्ववदभिप्रायः। कवेः।।५६।।

विवरणम्

अथ देवीगतानां सूक्ष्मतराणां व्यापाराणामपि विभाव्यमानत्वात् तद्विशिष्टां देवीं विशिनष्टि—

सुगन्धीति। बिम्बाधरासन्नचरं द्विरेफं प्रतिक्षणं लीलारविन्देन निवारयन्ती। बिम्बाधरासन्नचरम्। बिम्बाकारोऽधरो बिम्बाधरः। शाकपार्थिवादित्वात् समासः। तस्यासन्ने चरतीति तथा। द्विरेफं भ्रमरं प्रतिक्षणं क्षणे क्षणे। लीलारविन्देन लीलार्थमेव हस्ते गृहीतेन पद्मेन निवारयन्ती नितरां वारयन्ती। लीलारविन्दगन्धानुभवस्य प्रतिक्षणं विद्यमानत्वेऽपि भ्रमरस्य तत्परित्यागपूर्वकस्य बिम्बाधरसञ्चारस्य हेतुमाह—सुगन्धिनिःश्वासविवृद्धतृष्णमिति। शोभनो गन्धो यस्य सः सुगन्धिः। 'गन्धस्येदुत्पूतिसुसुरभिभ्यः(५.४.१३५)इतीत्। तादृशे निःश्वासे विवृद्धा तृष्णा यस्य तम्। भ्रमरबाधानुभावमाह—सम्भ्रमलोलदृष्टिरिति। सम्भ्रमेण लोला चञ्चला दृष्टिर्यस्याः सा तथा। अत्र किल कुलके महाकविः प्रतिभामय्या स्वदृष्ट्या लोकोत्तरसौन्दर्यसौकुमार्यादिभिः स्वत एव रमणीयं तत्कालोचितभूषाविलासादिभिश्च नितरां हृदयङ्गमं देवीशरीरं साक्षात्कृत्य स्वशक्त्या सहृदयानामपि साक्षात्कारपदवीं नीतवानिति भाविकमलङ्कारः। अत्रापि पूर्ववदेवानुसन्धातॄणामखिलक्लेशनाश एव महाकारुणिकस्य कवेरभिप्रायः।।५६।।

तां वीक्ष्य सर्वावयवानवद्यां
रतेरपि ह्रीतिमिवादधानाम्।
जितेन्द्रिये शूलिनि पुष्पकेतुः
स्वकर्मसिद्धिं पुनराशशंस॥५७॥

प्रकाशिका

इत आरम्भ प्रयोज्यस्य देवस्याभियोक्त्या देव्यास्तत्सहोत्थायिनः कामस्यतत्सख्यादीनां च वृत्तं यथास्वमवसरे तिलतण्डुलकन्यायेन वर्णयति। तत्र तावल्लब्धबलस्य कामस्य वृत्तमाह—

तामिति। ह्रीतिमादधानामिवेति रूपाभिमानमपहरन्तीमित्यर्थः। जितेन्द्रिये जितेन्द्रियेऽपीत्यर्थः। शूलिनीति तीक्ष्णदण्डत्वं द्योत्यते, पुष्पकेतुरिति सुकुमारोपकरणत्वम्। पुनश्शब्देनाशंसायाः पूर्वत्रुटितत्वमनुसंहितम्।।५७।।

विवरणम्

अथ तादृशदेवीदर्शनलब्धबलस्य कामस्यावस्थामाह—

तामिति। पुष्पकेतुः तां वीक्ष्य जितेन्द्रिये शूलिनि पुनः स्वकर्मसिद्धिम् आशशंस। पुष्पकेतुः पुष्पमेव केतुर्यस्य सः कामदेवः। अनेनात्मनः सुकुमारसाधनत्वमुक्तम्। तां पार्वतीं वीक्ष्य सम्यगवलोक्य। जितेन्द्रिये जितानीन्द्रियाणि येन तस्मिन्। उपरतेन्द्रियव्यापारेऽपीत्यर्थः। शूलिनीत्यनेन तीक्ष्णदण्डत्वादनभिभवनीयत्वं द्योत्यते। पुनश्शब्देनाशंसायाः पूर्वं भग्नत्वमनुसंहितम्। स्वकर्मसिद्धिं स्वस्य कर्मणः हरचित्तवशीकरणव्यापारस्य सिद्धिं फलप्राप्तिम् आशशंस श्रद्दधे। अत्र परस्मैपदित्वं चिन्त्यम्। तद्दर्शनेन स्वकर्मलाभाशंसायां हेतुमाह—सर्वावयवानवद्यामिति। सर्वेष्ववयवेष्वनवद्यामवद्यरहिताम्। निर्दोषामिति यावत्। अत एवोत्प्रेक्षते—रतेरपि ह्रीतिमादधानामिवेति। रतेः कामदेवेन सह तत्रागतायाः कामपत्न्याः। अपिशब्देनान्यासां का गतिरिति द्योत्यते। ह्रीतिं लज्जाम्। 'ह्री लज्जायामि'ति धातोः स्त्रियां क्तिन्। आदधानां विरचयन्तीमिव। रतिरपि तामवलोक्य किमपि व्रीलाकुला नूनं जातैवेत्यर्थः। तस्या रूपाभिमानदर्पं हरन्तीमिति भावः। शूलिनस्तीक्ष्णदण्डत्वेऽपि पुष्पकेतुः सुकुमारसाधनस्यात्मनस्तज्जयो नूनमनया भविष्यतीति कल्पितवानिति भावः।।५७।।

भविष्यतः पत्युरुमा च शम्भोः
समाससाद प्रतिहारभूमिम्।
योगात् स चान्तः परमात्मसंज्ञं
दृष्ट्वा परं ज्योतिरुपारराम॥५८॥

प्रकाशिका

अथ कथां संविदधाति—

भविष्यत इति। भविष्यतः पत्युरिति प्राप्तौ लज्जामन्थरत्वं द्योत्यते। प्रतिहारभूमिं द्वारदेशम्। योगादुपारराम, योगश्चित्तवृत्तिनिरोधः। चशब्दौ दैवाद् यौगपद्यं सूचयतः।।५८।।

विवरणम्

अथ कथामेवानुसन्दधान आह—

भविष्यत इति। उमा शम्भोः प्रतिहारभूमिं समाससाद च। सः परमात्मसंज्ञं परं ज्योतिः अन्तर्दृष्ट्वा योगादुपारराम च। उमा पार्वती शम्भोः शिवस्य प्रतिहारभूमिं द्वारप्रदेशं समाससाद प्राप्तवती। सः शम्भुः। परमात्मसंज्ञं परमात्मेति संज्ञा यस्य तादृशम्। परं ज्योतिः दृश्यप्रपञ्चोत्तीर्णं स्वयम्प्रकाशस्वरूपम् अन्तः हृदयकुहरे दृष्ट्वा साक्षात्कृत्य योगात् समाधेः उपारराम उपरतोऽभूत्। 'व्याङ्परिभ्यो रमः' (१.३.८३) इति परस्मैपदम्। परमात्मसाक्षात्कारपर्यन्तो हि योगः। अत्र चशब्दद्वयेन दैवादागतं यौगपद्यं द्योत्यते, प्रयोज्यस्योपावर्तनमित्यत्रोक्तमवसरोपस्थानं च। ननु 'अव्याक्षेपो भविष्यन्त्याः कार्यसिद्धेर्हि लक्षणम्'(१०.६)इति रघुवंश उक्तम्। अत्र पुनः कामदहनाद्यनर्थप्राप्तिरेव भाविनी। अत आह—पत्युः भविष्यत इति। भर्तृत्वेन भविष्यत इत्यर्थः। अनेन देवीप्राप्तेर्लब्धावसरत्वं द्योत्यते। अपि च मुखदर्शनमात्रं तदानीमेव भविष्यति। 'उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि' (कुमा.३.६७) इति वक्ष्यमाणत्वात्। समुच्चयोऽत्रालङ्कारः। गुणक्रियायौगपद्यं समुच्चय इति।।५८।।

ततो भुजङ्गाधिपतेः फणाभि-
रधः कथञ्चिद् धृतभूमिभागः।
शनैः कृतप्राणविमुक्तिरीशः
पर्यङ्कबन्धं निबिडं बिभेद॥५९॥

प्रकाशिका

योगावसानिकं विधिमाह—

तत इति। फणाभिरिति सर्वौघप्रसर उक्तः। कथञ्चित् कृच्छ्रात् शनैरिति शास्त्रसिद्धो रेचनाक्रमः।।५९।।

विवरणम्

अथ योगादुपरतस्य भगवतस्तदवसानकर्तव्यं विधिमाह—

तत इति। तत ईशः पर्यङ्कबन्धं बिभेद। ततः योगविरामानन्तरम् ईशः परमेश्वरः पर्यङ्कबन्धं वीरासनं बिभेद विसृष्टवान्। योगादुपरते त्रैलोक्यात्मके भगवति तच्छरीरगौरवमप्यनन्तेन कथमपि सोढमित्याह—भुजङ्गाधिपतेः फणाभिः अधः कथञ्चिद् धृतभूमिभाग इति। भुजङ्गानां नागानाम् अधिपतेः अनन्तस्य। फणाभिरिति बहुवचनेन सर्वासामपि स्वशक्तीनां तत्रैवोपयोगविधानमुक्तम्। अधः क्षितितलस्याधोभागे कथञ्चिद् यथाकथञ्चित्। धृतभूमिभागः, धृतः स्वावस्थानभूमिभागो यस्य स तथोक्तः। भगवति योगादुपरते तद्भारमसहमानेनानन्तेन सर्वा अपि फणास्तदधोभाग एवाधाय भूमिर्धृताभूदिति भावः। कुम्भेन क्रमेण पूरितानां प्राणवायूनां योगशास्त्रोक्तरेचनक्रमेण विमुक्तिमाह—शनैः कृतप्राणविमुक्तिरिति। शनैः योगशास्त्रोक्तक्रमेणेत्यर्थः। कृता प्राणानां शरीरवायूनां विमुक्तिः मोचनं येन स तथा। भगवद्बद्धस्य पर्यङ्कबन्धस्य योगशास्त्रानुगुणत्वमाह—निबिडमिति। अच्छिद्रमित्यर्थः। अच्छिद्रत्वं च योगशास्त्रसिद्धम्।।५९।।

तस्मै शशंस प्रणिपत्य नन्दी
शुश्रूषया शैलसुतामुपेताम्।
प्रवेशयामास च भर्तुरेनां
भ्रूक्षेपमात्रानुमतप्रवेशाम्॥६०॥

प्रकाशिका

अथ नायिकानायकयोः परस्परावलोकनं घटयितुमाह—

तस्मा इति। तस्मै लब्धावसराय। प्रणिपत्येति समुदाचारः। शुश्रूषयेत्यनौचित्यपरिहारः। अनुमतोऽनुज्ञातः। मात्रशब्देन सत्त्वजं माधुर्यमुक्तम्। 'श्लक्ष्णो विकारो माधुर्यं संक्षोभे सुमहत्यपी'ति।।६०।।

विवरणम्

अथ नायिकानायकयोः परस्परदर्शनोपायमाह—

तस्मा इति। नन्दी प्रणिपत्य शैलसुतां शुश्रूषया उपेतां तस्मै शशंस। नन्दी नन्दीश्वरः। प्रणिपत्येत्यनेन भृत्यानां समुदाचार उक्तः। शैलसुतां पार्वतीम्। शुश्रूषया प्रतिदिनं क्रियमाणया परिचर्यया हेतुभूतया। नात्र किञ्चिदनुचितत्वमस्तीति भावः। देवस्य सर्वसेव्यत्वात्। उपेतां प्राप्ताम्। तस्मै योगादुपरतत्वेन लब्धावसराय हराय शशंस निवेदितवान्। निवेदनानन्तरं हरानुज्ञापुरस्सरीं नन्दिनः प्रवृत्तिमाह—भर्तुः भ्रूक्षेपमात्रानुमतप्रवेशाम् एनां प्रवेशयामास चेति। भर्तुः स्वामिनो हरस्य। भ्रूक्षेपमात्रानुमतप्रवेशाम्। भ्रुवः क्षेपो भ्रूक्षेपः। क्षेपश्चालनम्। एकस्या भ्रुवश्चालनमात्रेणेत्यर्थः। अनेन सत्त्वजं माधुर्यमुक्तम्। 'श्लक्ष्णो विकारो माधुर्यं संक्षोभे सुमहत्यपी'त्युक्तत्वात्। अनुमतः अनुज्ञातः प्रवेशः समीपप्राप्तिर्यस्याः ताम्। एनां पार्वतीं प्रवेशयामास अन्तर्भागं प्रापयामास च। एककर्तृकयोः शंसनप्रवेशनक्रिययोः समुच्चयेऽत्र चशब्दः॥६०॥

तस्याः सखीभ्यां प्रणिपत्य पूर्वं
स्वहस्तलूनः शिशिरात्ययस्य।
व्यकीर्यत त्र्यम्बकपादमूले
पुष्पोच्चयः पल्लवभङ्गभिन्नः॥६१॥

प्रकाशिका

देव्या देवोपस्थाने क्रममाह—

तस्या इति। पूर्वं देवीप्रणामात् प्रागित्यर्थः। स्वहस्तलून इति सौष्ठवार्थम्। शिशिरात्ययस्य वसन्तस्य। मूले निकटे। भिन्नो मिश्रः। प्राक् पुष्पविकिरणमाभ्यामीश्वरभावज्ञानार्थमिति **दक्षिणावर्तः**। देव्याः शालीनतापनयनार्थत्वं तु युक्तम्॥६१॥

विवरणम्

नायकदर्शनानन्तरं सञ्जातसात्त्विकविकाराया देव्या लज्जापनोदार्थमादौ तत्सखीभ्यामेव परमेश्वरसेवा कृतेत्याह—

तस्या इति। तस्याः पूर्वं सखीभ्यां शिशिरात्ययस्य पुष्पोच्चयः त्र्यम्बकपादमूले प्रणिपत्य व्यकीर्यत। तस्याः देव्याः पूर्वम्। 'अन्यारादितरर्ते

दिक्शब्द—' (२.३.२९)इत्यादिना पञ्चमी। देवीप्रणामात् प्रागित्यर्थः। सखीभ्यां विजयामालिनीभ्यां शिशिरात्ययस्य वसन्तस्य। पुष्पोच्चयः। पुष्पाणामुच्चयः समूहः। वसन्तकुसुमराशिरित्यर्थः। त्र्यम्बकपादमूले त्र्यम्बकस्य हरस्य पादमूले पादयोर्मूले निकटे। प्रणिपत्य नमस्कृत्य। व्यकीर्यत विक्षिप्तोऽभूत्। पुष्पोच्चयस्य सौष्ठवद्योतकं विशेषणमाह—स्वहस्तलून इति। आत्मनो हस्ताभ्यामेव लूनः अवचितः, परमेश्वरभक्त्या स्वयमेव शिक्षापूर्वपल्लवभङ्गाः, पल्लवभङ्गैर्भिन्नो मिश्रः पल्लवभङ्गभिन्नः। स्वयमेवाहृतैः पल्लवैरुपेत इत्यर्थः।।६१।।

उमापि नीलालकमध्यशोभि
विस्त्रंसयन्ती नवकर्णिकारम्।
चकार कर्णच्युतपल्लवेन
मूर्ध्ना प्रणामं वृषभध्वजाय॥६२॥

प्रकाशिका

अत एवाह—

उमेति। अत्र विशेषणानि रत्युद्दीपनाभिप्रायेणोपात्तानीति परिकरः प्रकृतां प्रणामक्रियामुपस्करोति।।६२।।

विवरणम्

अथ देव्याः प्रणाममाह—

उमापीति। उमापि मूर्ध्ना वृषभध्वजाय प्रणामं चकार। उमा पार्वती। अपिशब्दः पूर्वोक्तसखीप्रणामसमुच्चयार्थः। वृषभध्वजाय परमेश्वराय प्रणामं प्रणमनं चकार कृतवती। प्रणामसमये देव्याः प्रह्वत्वमाह—नीलालकमध्यशोभि नवकर्णिकारं विस्त्रंसयन्तीति। नीलानां कृष्णवर्णानामलकानां मध्ये शोभितुं शीलमस्येति तथा। नवकर्णिकारं नवमभिनवं कर्णिकारं कर्णिकारकुसुमम्। विस्त्रंसयन्ती अत्यन्तनम्रशिरस्तया निपातयन्ती। अनेनात्यन्तप्रवणत्वमुक्तम्। अत्र नीलशब्दनवशब्दाभ्यामलककर्णिकारकुसुमयोः परभागलाभातिशयः सूचितः। कर्णावतंसपल्लवोऽपि प्रणामसमये गलित इत्याह—कर्णच्युतपल्लवेनेति। कर्णात् च्युतः गलितः पल्लवः कर्णावतंसपल्लवो यस्य तेन मूर्ध्ना। अत्र प्रणामक्रियायां लालित्यापादकानि विशेषणानि रत्युद्दीपनपरतया प्रयुक्तानीति परिकरोऽलङ्कारः।।६२।।

अनन्यभाजं पतिमाप्नुहीति
सा भव्यमेवाभिहिता भवेन।
न हीश्वरव्याहृतयः कदाचित्
पुष्णन्ति पाके विपरीतमर्थम्॥६३॥

प्रकाशिका

प्रत्यभिवादनप्रकारमाह—

अनन्येति। अन्यां न भजतीत्यनन्यभाक्। सर्वनाम्नो वृत्तिमात्रे पूर्वपदस्य पुंवद्भावः। भव्यमेव, न केवलमाचारसिद्धम्। भव्यं भावि। भावित्वमेवोपपादयति—न हीति। ईश्वरव्याहृतयः आगमप्रभृतयः। कदाचिदिति स्वतः प्रमाण्यं द्योतयति। पुष्णन्तीत्यनेन कारकत्वमप्यस्तीति द्योतयति। पाके परिणामे।।६३।।

विवरणम्

देव्या प्रणतस्य देवस्याशीर्वादप्रकारमाह—

अनन्येति। भवेन सा अनन्यभाजं पतिम् आप्नुहि इति भव्यमेव अभिहिता। भवेन रुद्रेण। 'भवो भीमः स्थाणू रुद्र' इत्यमरः। सा पार्वती। अनन्यभाजम्। अन्यां स्त्रियं न भजत इत्यनन्यभाक्। अन्यशब्दस्य सर्वनामत्वात् पुंवद्भावः। पतिं भर्तारम्। भार्यान्तररहितं भर्तारमित्यर्थः। सपत्नीसद्भावो हि स्त्रीणां परं दुःखकारणमिति भावः। आप्नुहि प्राप्नुहि। इतिशब्दः प्रकारवचनः। भव्यं भावि। न केवलं कन्यकाजनप्रणामेष्वाचारसिद्धत्वादेवमुक्तं, किन्तु भाव्यर्थकथनमेवेत्येवकारस्यार्थः। अभिहिता उक्ता। भावित्वमेवोपपादयति—ईश्वरव्याहृतयः लोके कदाचिद् विपरीतमर्थं न पुष्णन्ति हीति। ईश्वराणां महात्मनां व्याहृतयः उक्तयः लोके लोकत्रये कदाचित् कालत्रयेऽपि विपरीतमन्यथाभूतम् अर्थं न पुष्णन्ति, न प्राप्नुवन्ति। ईश्वराणां वचनं देशान्तरे कालान्तरेऽवस्थान्तरे वा न व्यभिचरतीत्यर्थः। तत्प्रतिबन्धकं दुरितं निरस्यापि कार्यं साधयत्येवेति पुष्णन्तीत्यनेन द्योत्यते। 'पुष पुष्टावि'ति धातुः। हिशब्दः प्रसिद्धौ। प्रसिद्धिश्च श्रुतिस्मृतिषु। 'पाक' इति पाठे परिणाम इत्यर्थः।।६३।।

कामस्तु बाणावसरं प्रतीक्ष्य
पतङ्गवद्वह्निमुखं विविक्षुः।
उमासमक्षं हरबद्धलक्षः
शरासनज्यां मुहुराममर्श॥६४॥

प्रकाशिका

तस्मिन्नवसरे कामस्योद्यमाह—

काम इति। तुशब्दोऽवस्थान्तरद्योतकः। बाणावसरं परिचयविशेषमित्यर्थः। पतङ्गवत् शलभवत्। वह्निमुखं विविक्षुः महासाहसं कर्तुकाम इत्यर्थः। इतोऽपि किञ्चित् प्रसृतं परिचयं प्रतिपाल्य प्रहरिष्याम्येनमिति व्यवसित इत्यर्थः। उमासमक्षं देव्याः समक्षं यथा भवति। इदं देवीप्रोत्साहनार्थम्। हरे बद्धलक्षो दत्तदृष्टिरित्यर्थः। ज्यापरामर्शनं शरसन्धानपूर्वरङ्गः।।६४।। द्र.अत्रास्माकं टिप्पणं कालिदासग्रन्थावल्याम्।

विवरणम्

अथ लब्धावसरस्य मदनस्योद्योगमाह—

कामस्त्विति। कामः तु बाणावसरं प्रतीक्ष्य उमासमक्षं शरासनज्यां मुहुः आममर्श। कामः कामदेवः। तुशब्दोऽवस्थान्तरद्योतनार्थः। बाणावसरं बाणस्यावसरे नायिकानायकयोः परस्परपरिचयविशेषरूपं प्रहरणावकाशं प्रतीक्ष्य प्रतिपाल्य। उमासमक्षमित्यामर्शनक्रियाविशेषणम्। उमायाः पार्वत्याः समक्षं प्रत्यक्षं यथा भवति तथा। ज्यापरामर्शनस्योमासमक्षत्वमहमस्मि ते सहाय इति देवीप्रोत्साहनार्थम्। शरासनज्यां शरासनस्य चापस्य ज्यां शिञ्जिनीम्। मुहुः पुनः पुनः आममर्श आमृष्टवान्। ज्यापरामर्शश्च धन्विनां शरसन्धानस्य पूर्वरङ्गतया प्रसिद्धः। अथ कामस्य साहसोद्योगं कविः सोपहासमाह—पतङ्गवद्वह्निमुखं विविक्षुरिति। पतङ्गवच्छलभ इव। वह्निमुखं वह्नेर्मुखं, भोक्तुकामस्य व्यात्तवदनस्य वह्नेरग्नेर्मुखं वदनकुहरमेव। विविक्षुः प्रवेष्टुकामः। अतिसाहसमेव कर्तुकाम इत्यर्थः। ज्यापरामर्शसमयोचितं स्वभावमाह—हरबद्धलक्ष इति। हरे परमेश्वर एव बद्धलक्षः, बद्धदृष्टिरित्यर्थः। शरनिपाताधिकरणं परमेश्वरमेव सावधानमवलोकयन्निति भावः। नायिकानायकयोरितोऽपि किञ्चिदुपचिते सति परिचये सहसैव प्रहरिष्याम्येनमिति शरसन्धानं कर्तुमुद्युक्तस्तस्थावित्यर्थः।।६४।।

अथोपनिन्ये गिरिशाय गौरी
तपस्विने ताम्ररुचा करेण।
विशोषितां भानुमतो मयूखै-
र्मन्दाकिनीपुष्करबीजमालाम्॥६५॥

प्रकाशिका

परिचयस्य कारणान्तरमाह—

अथेति। उपनिन्ये उपजहार। तपस्विन इत्युपायनविशेषौचित्यार्थम्। ताम्ररुचेत्युद्दीपनाभिप्रायम्। मन्दाकिनीसम्बन्धात् श्लाघ्यत्वम्॥६५॥

विवरणम्

दैवात् परिचयस्य कारणान्तरमपि तदैव जातमित्याह—

अथेति। अथ गौरी तपस्विने गिरिशाय ताम्ररुचा करेण मन्दाकिनीपुष्करबीजमालाम् उपनिन्ये। अथ प्रणामानन्तरं गौरी पार्वती। तपस्विन इत्यनेन तादृशोपायनविशेषौचित्यं द्योत्यते। गिरिशाय हराय। ताम्ररुचा ताम्रा रक्ता रुक् शोभा यस्य तादृशेन करेण। उद्दीपनाभिप्रायमेतद्विशेषणम्। मन्दाकिनीपुष्करबीजमालां, मन्दाकिन्यां गङ्गायां यानि पुष्कराणि पद्मानि तेषां बीजैः कृतां मालाम्। पद्माक्षमालामित्यर्थः। मन्दाकिनीशब्देन पद्माक्षाणां सुलक्षत्वमुक्तं, मन्दाकिन्या हिमवच्छिखरवर्तित्वात्। मन्दाकिनीसम्बन्धेन पद्माक्षाणां पावनत्वाधिक्यं च द्योत्यते। उपनिन्ये उपजहार। पद्माक्षस्य धारणमात्रमेवातः परं कर्तव्यं, संस्कारस्तु सर्वोऽपि कृत एवेत्याह—भानुमतः मयूखैः विशोषितामिति। भानवो रश्मयोऽस्य सन्तीति भानुमानित्यादित्य उच्यते। तस्य मयूखैः रश्मिभिः। विशोषितां विशेषेण शोषितां कृतशोषणाम्। भगवदुपायनार्थं स्वयमेवादाय शोषितामित्यर्थः॥६५॥

प्रतिग्रहीतुं प्रणयिप्रियत्वात्
त्रिलोचनस्तामुपचक्रमे च।
सम्मोहनं नाम च पुष्पधन्वा
धनुष्यमोघं समधत्त बाणम्॥६६॥

प्रकाशिका

परिचयस्य प्रसरमाह—

प्रतिग्रहीतुमिति। प्रणयिनः प्रार्थयितारः प्रिया यस्य। दाक्षिण्यादित्यर्थः। तां पुष्करबीजमालाम्। नाम प्रसिद्धौ। अत्र यौगपद्येन कामस्य क्षिप्रकारित्वमुक्तम्॥६६॥

विवरणम्

परिचयस्य ततोऽपि किञ्चिदाधिक्यमाह—

प्रतिग्रहीतुमिति। त्रिलोचनः प्रणयिप्रियत्वात् तां प्रतिग्रहीतुम् उपचक्रमे च। पुष्पधन्वा धनुषि सम्मोहनं नाम बाणं समधत्त च। त्रीणि लोचनानि सन्त्यस्येति त्रिलोचनः शिवः। प्रणयिनः प्रार्थयितारः। 'प्रणयः स्नेहयाच्ञयोरि'ति भोजः। ते

प्रिया यस्य तस्य भावस्तत्त्वं तस्माद्धेतोः, दाक्षिण्यादित्यर्थः। तां पद्माक्षमालां। प्रतिग्रहीतुम् उपचक्रमे आरब्धवान्। पुष्पधन्वा कामः धनुषि चापे सम्मोहनं नाम सम्मोहनमिति प्रसिद्धम्।

द्रावणः क्षोभणश्चैव वशीकरण इत्यपि।
आकर्षणश्च कामस्य बाणः सम्मोहनोऽपरः।।

इत्युक्तत्वात्। बाणं शरं समधत्त संयोजयामास च। अत्र चकारद्वयेन यौगपद्यमुक्तम्। तेन च कामस्य क्षिप्रकारित्वं ध्वन्यते। सम्मोहनबाणस्य यथार्थनामकत्वमाह— अमोघमिति। सफलमित्यर्थः। सर्वत्र दृष्टसद्यःफलमिति भावः। अत्र समुच्चयोऽलङ्कारः।।६६।।

हरस्तु किञ्चित्परिवृत्तधैर्य-
श्चन्द्रोदयारम्भ इवाम्बुराशिः।
उमामुखे बिम्बफलाधरोष्ठे
व्यापारयामास विलोचनानि।।६७।।

प्रकाशिका

तत्फलमाह—

हर इति। तुशब्दोऽवस्थाविशेषद्योतकः। किञ्चिदिति अगाधसत्त्वत्वात्। उपमानेऽपि किञ्चिद्धैर्यपरिवृत्तिरुदयारम्भशब्देनोपदर्शिता। बिम्बफलाधरोष्ठ इति विभावोपस्कारः। विलोचनव्यापारेण नैसर्गिक्या रतेरुदयावस्था द्योत्यते। न च औत्सुक्यावेगचापलहर्षादेर्व्यभिचारिणोऽपि साधारणः।।६७।।

विवरणम्

तादृशबाणसन्धानस्य फलमाह—

हर इति। हरः तु उमामुखे विलोचनानि व्यापारयामास। हरः त्रिलोचनः। तुशब्दः पूर्वावस्थातो व्यतिरेकं द्योतयति। उमामुखे उमायाः पार्वत्या मुखे। विलोचनानि त्रीण्यपि लोचनानि। व्यापारयामास प्रवर्तयामास। उमामुखे विलोचनव्यापारस्य हेतुमाह—किञ्चित्परिवृत्तधैर्य इति। किञ्चित्परिवृत्तम् ईषदन्यथाभूतं, गमितं, धैर्यं यस्य स तथा। हरधैर्यस्यापि तदानीं किञ्चिदन्यथात्वं जातमिति भावः। महासत्त्वत्वादीषत्परिवृत्तत्वम्। अत्रोपमामाह—चन्द्रोदयारम्भे अम्बुराशिरिवेति। चन्द्रोदयस्यारम्भे अम्बुराशिः समुद्र इव। अत्राप्युदयारम्भशब्देन उपमानभूतस्य समुद्रस्यापि किञ्चिद्धैर्यपरिवृत्तिरुपदर्शिता। देवस्य देव्यां सञ्जातं भावविशेषं

प्रकाशयन्नुमामुखं विशिनष्टि—बिम्बफलाधरोष्ठ इति। बिम्बस्य लताविशेषस्य फलं बिम्बफलं, तदिव रक्तवर्णोऽधरोष्ठो यस्य तस्मिन्। अनेन विलोचनव्यापारयोग्यत्वमुक्तम्। अत्र देवस्य तादृशे वदने विलोचनव्यापारेण स्वाभाविक्या रतेरुद्बोधावस्था दर्शिता। स तु विलोचनव्यापारः रतेर्व्यभिचारिणामौत्सुक्यावेगचापलहर्षादीनामप्युपलक्षणम्।।६७।।

विवृण्वती शैलसुतापि भाव-
मङ्गैः कुचद्बालकदम्बकल्पैः।
साचिक्रियाचारुतरेण तस्थौ
मुखेन पर्यस्तविलोचनेन॥६८॥

प्रकाशिका

हरदृष्टिपाते देव्या दशां वर्णयति—

विवृण्वतीति। शैलसुतापीति, न केवलं देवो विवृण्वन् विलोचनानि व्यापारितवान्। कुचन्तो मीलन्तः। मीलत्पुष्पबालकदम्बकल्पैरित्यर्थः। रोमाञ्चितत्वाच्च तत्सादृश्यम्। स्तनवाचिनः कुचशब्दस्यापि कुचतीति निर्वाहः, कुड्मलसन्निवेशत्वात्। साचिक्रिया त्र्यश्रीकरणम्। तच्च लज्जाकार्यम्। 'तिर्यगर्थे साचि तिरोऽपी'ति सिंहः। पर्यस्तं विवर्तितम्। अनेनान्योन्यदृष्टिसमागम उक्तः।।६८।।

विवरणम्

देवस्य तादृशदृष्टिपाते देव्याः समवस्थां वर्णयति—

विवृण्वतीति। शैलसुता अपि अङ्गैः भावं विवृण्वती तस्थौ। शैलसुता पार्वती। न केवलं देव एव भावं व्यवृणोत्, किन्तु शैलसुतापीत्यपिशब्दार्थः। अङ्गैः शरीरावयवैः भावमभिलाषं विवृण्वती प्रकाशयन्ती तस्थौ अतिष्ठत्। अङ्गानां भावविवरणप्रकारं दर्शयति—कुचद्बालकदम्बकल्पैरिति। कुचन्तः सङ्कुचन्तः। सङ्कुचत्पुष्पा इत्यर्थः। निमीलत्पुष्पबालकदम्बसदृशैरित्यर्थः। कदम्बो वृक्षविशेषः। अङ्गानां रोमाञ्चितत्वादत्र तत्सादृश्यम्। कदम्बकुसुमानि हि रोमतुल्यदलानि। तेषां निमीलनावस्थाप्रदर्शनेन रोमाञ्चस्य निबिडत्वमुक्तम्। बालशब्देन देव्या यौवनावस्था दर्शिता। तेन मनोहारित्वातिशयः। अन्योन्यदृष्टिसमागमोऽपि जात इत्याह—पर्यस्तविलोचनेन मुखेन उपलक्षिता इति। पर्यस्तविलोचनेन पर्यस्तं विवर्तितं विलोचनं नेत्रं यस्य तादृशेन मुखेन उपलक्षिता। भगवद्दृष्टिपातसञ्जातया लज्जया विवर्तितनयनमुखांरविन्देत्यर्थः। तादृशस्य वदनस्य पुनरपि लज्जाद्योतकं

विशेषणमाह—साचिक्रियाचारुतरेणेति। साचिक्रिया त्र्यश्रीकरणम्। 'तिर्यगर्थे साचि तिरोऽपी'ति सिंहः। त्र्यश्रीकरणं च लज्जाकार्यम्। तेन चारुतरेण अत्यन्तचारुणा। अत्र देव्याः शङ्करे पूर्वमुत्पन्ना रतिः साभिलाषावलोकनवसन्तादिभिरुद्दीप्यमाना रोमाञ्चोत्कण्ठादिभिः सात्त्विकव्यभिचार्यादिभिरनुबध्यत इत्यवसेयम्।।६८।।

अथेन्द्रियक्षोभमयुग्मनेत्रः
पुनर्वशित्वाद् बलवन्निगृह्य।
हेतुं स्वचेतोविकृतेर्दिदृक्षु-
र्दिशामुपान्तेषु ससर्ज दृष्टिम्।।६९।।

प्रकाशिका

अथ बलवद्भावान्तरोदयेन सत्त्वनिधौ देवे रतेः प्रशमं दर्शयति—

अथेति। पुनरिति प्रत्याहरणमुक्तम्। वशित्वादिति। जितेन्द्रियो हि प्रमादादुत्पथगामीन्यपीन्द्रियाणि नियन्तुं शक्नोति, शान्तरसवासनाया अप्रमुषितत्वादित्यर्थः। बलवत् सुष्ठु। स्वशब्देन हेतोरनल्पत्वं द्योत्यते। उपान्तेषु मुखेषु। अत्रेन्द्रियक्षोभनियमनेन शान्तव्यभिचारिण्या मतेरुदयः प्रतीयते। दिदृक्षुरिति तद्व्यभिचार्यौत्सुक्यम्। दृष्टिसर्जनमनुभावः।।६९।।

विवरणम्

अथ सत्त्वनिधौ भगवति झटिति शान्तरसव्यभिचारिण्याः परमार्थविमर्शनरूपाया मतेराविर्भावे सति तस्याः प्राबल्यात् तादृश्या अपि रतेः प्रशमं दर्शयति—

अथेति। अथ अयुग्मनेत्रः वशित्वाद् इन्द्रियक्षोभं पुनः बलवद् निगृह्य स्वचेतोविकृतेः हेतुं दिदृक्षुः दिशाम् उपान्तेषु दृष्टिं ससर्ज। अथ तत्तादृशस्य प्रशमस्य तादृशावस्थाप्राप्त्यनन्तरम्। अयुग्मनेत्रः त्रिलोचनः। द्व्यादयो युग्मसङ्ख्या युग्मशब्देनोच्यन्ते। युग्मसङ्ख्याकनेत्रो न भवतीत्ययुग्मनेत्रः। वशित्वाद् जितेन्द्रियत्वात्। प्रमादादुत्पथगामिनामिन्द्रियाणां निग्रहे वशिनामेव हि सामर्थ्यमित्यर्थः। शान्तरसस्यात्यन्तप्रमुषितत्वाभावादिति भावः। इन्द्रियक्षोभम् इन्द्रियाणां चक्षुरादीनां क्षोभं विकारम्। पुनश्शब्देन प्रत्याहरणमुक्तम्। पुनरपीत्यर्थः। बलवदिति निग्रहक्रियाविशेषणम्। बलवत् सुष्ठु यथा भवति तथा निगृह्य नियम्य। क्षोभवासनामपि परिहृत्येत्यर्थः। स्वचेतोविकृतेः स्वस्य चेतसः मनसः विकृतेः विकारस्य। अत्र स्वशब्देन बलवता कारणेन विनानुपपत्तिरुक्ता। हेतुं कारणं दिदृक्षुः द्रष्टुमिच्छुः दिशामुपान्तेषु मुखेषु दृष्टिं नेत्रं ससर्ज विससर्ज। अत्र

शान्तरसव्यभिचारिण्या मतेरुदय इन्द्रियक्षोभनियमने हेतुः। क्षोभकारणदर्शनौत्सुक्यं तादृश्या मतेर्व्यभिचारि। दृष्टिविसर्गस्तस्या अनुभाव इति विवेकः।।६९।।

स दक्षिणापाङ्गनिविष्टमुष्टिं
नतांसमाकुञ्चितसव्यपादम्।
ददर्श चक्रीकृतचारुचापं
प्रहर्तुमभ्युद्यतमात्मयोनिम्।।७०।।

प्रकाशिका

स इति। चक्रीकृतं मण्डलीकृतम्। इदमालीढाख्यं स्थानम्। 'आलीढं तु ततोऽग्रतः, दक्षिणे वाममाकुञ्च्य प्रत्यालीढं विपर्यय' इति यादवः। प्रहर्तुमभ्युद्यतं स्पष्टापकारमित्यर्थः। अत्रालीढस्थानस्वभावोक्तिर्देवक्रोधस्य वक्ष्यमाणस्यालम्बनविभावतां पुष्णाति।।७०।।

विवरणम्

दृष्टिविसर्गस्य फलमाह—

स इति। सः आत्मयोनिं ददर्श। सः अयुग्मनेत्रः आत्मयोनिं कामदेवं ददर्श दृष्टवान्। अयमेव चेतोविकृतिहेतुरिति दर्शनमात्रेणैव ज्ञातुं शक्यमिति द्योतयितुमात्मयोनेर्विशेषणान्याह—दक्षिणापाङ्गनिविष्टमुष्टिमित्यादिभिः। दक्षिणे अपाङ्गे नेत्रकोणे सञ्चरचापमौर्वीविकर्षणवशान्निविष्टा स्थिता मुष्टिर्यस्य तम्। नतांसे विनष्टदक्षिणांसम्। आकुञ्चितसव्यजानुम् आकुञ्चितः वक्रीकृतः सव्यजानुः वामपादजानुर्येन तम्। अनेनालीढाख्यो धन्विनामवस्थानविशेष उक्तः।

स्थानानि धन्विनां पञ्च तत्र वैशाखमस्त्रियाम्।
त्रिवितस्त्यन्तरौ पादौ मण्डलं तोरणाकृती।।
अन्वर्थं स्यात् समपदमालीढं तु ततोऽग्रतः।
दक्षिणे वाममाकुञ्च्य प्रत्यालीढं विपर्यये।।

इति **यादवः**। उक्तं च रघुवंशे—'अतिष्ठदालीढविशेषशोभिना' (३.५२) इति। इयमालीढस्वभावोक्तिर्वक्ष्यमाणस्य देवकोपस्यालम्बनविभावः। चापस्याप्यवस्थामाह—चक्रीकृतचारुचापमिति। चक्रीकृतं मण्डलीकृतं चारु सुन्दरं चापं येन तम्। अनेन प्रहारस्य दृढपातित्वं सूचितम्। एभिर्विशेषणैः, सिद्धमर्थमेवाह—प्रहर्तुमभ्युद्यतमिति। प्रहर्तुमात्मनि बाणप्रयोगं कर्तुम् अभ्युद्यतमुद्युक्तम्। अनेन स्पष्टापकारत्वमुक्तम्।।७०।।

तपःपरामर्शविवृद्धमन्यो-
र्भ्रूभङ्गदुष्प्रेक्षमुखस्य तस्य।
स्फुरन्नुदर्चिः सहसा तृतीया-
दक्ष्णः कृशानुः किल निष्पपात॥७१॥

प्रकाशिका

अत एवाह—

तप इति। परामर्शो धर्षणम्। भ्रूभङ्गेत्यादि रौद्रव्यभिचारिण औग्र्यस्यानुभावप्रपञ्चनम्। कृशानुरिति, यः कल्पान्तेषु विश्वं संहरति। यथाह मुरारिः—

> नीललोहितललाटलाञ्छने लोचने जयति कोऽपि पावकः।
> रक्षितस्य जगदन्तहेतवे यस्य संज्वलनमात्मभूरभूत्॥
>
> (अङ्क.७.श्लो.३१)

इति। किलैतिह्ये॥७१॥

विवरणम्

भगवतस्तत्तादृशमदनदर्शनजं क्रोधं तत्फलं चाह—

तप इति। तपःपरामर्शविवृद्धमन्योः तस्य तृतीयादक्ष्णः कृशानुः सहसा निष्पपात किल। तपःपरामर्शविवृद्धमन्योः तपसः परामर्शेन धर्षणेन हेतुना विवृद्धः मन्युः क्रोधो यस्य। तृतीयादक्ष्णः ललाटलोचनात् कृशानुः अग्निः। यः किल कल्पान्ते सकलमपि लोकं भस्मसात्करिष्यति। यदाह मुरारिः—

> नीललोहितललाटलाञ्छने लोचने जयति कोऽपि पावकः।
> रक्षितस्य जगदन्तहेतवे यस्य संज्वलनमात्मभूरभूत्॥

इति। सहसा झटिति निष्पपात निर्जगाम। मदनमभिमुखीकृत्येति शेषः। किलैतिह्ये। अनेन निजवचनस्य मूलभूतं प्रमाणं दर्शयति। रौद्ररसव्यभिचारिणः क्रौर्यस्यानुभावं प्रपञ्चयति—भ्रूभङ्गेत्यादिना भ्रूभङ्गदुष्प्रेक्षमुखस्य भ्रूभङ्गेन भ्रूकुट्या दुष्प्रेक्षं दुर्दर्शं मुखं यस्य तस्य। कृशानुनिष्पतनस्यावस्थां दर्शयति—स्फुरन्निति। प्रकाशमानः, आदौ तावत् तृतीयलोचने किञ्चित्प्रकाशमानो दृष्ट इत्यर्थः। द्वितीयावस्थां दर्शयति—उदर्चिरिति। उद्गतज्वालः, तदनन्तरं जाज्वल्यमानो दृष्ट इत्यर्थः। अत्र स्फुरन् उदर्चिः निष्पपातेति पदत्रयेण कृशानुस्वभावसिद्धः क्रमो विवक्षित इत्यवसेयम्॥७१॥

कोपं प्रभो! संहर संहरेति
यावद् गिरः खे मरुतां चरन्ति।
तावत् स वह्निर्भवनेत्रजन्मा
भस्मावशेषं मदनं चकार॥७२॥

प्रकाशिका

तत्फलमाह—

कोपमिति। संहर प्रार्थने लोट्। सम्भ्रमे द्विर्वचनम्। मरुतां कामं नियुज्य प्रतिपालयताम्। यावच्चरन्तीति लटो निर्वाहो रघुवंशप्रकाशिकायां 'यावदादिशति' (११.३) इत्यत्र दर्शितः। तत्समकालमेव स दग्ध इत्यर्थः। भवनेत्रजन्मेति तत्समर्थत्वं द्योत्यते। अनेन परमेश्वरप्रतिकूलस्य देवानामुद्यमस्य भङ्गो दर्शितः।।७२।।

विवरणम्

कृशानुनिष्पतनस्य फलमाह—

कोपमिति। प्रभो! त्वं कोपं संहर संहर इति मरुतां गिर यावत् खे चरन्ति तावद् भवनेत्रजन्मा वह्निः मदनं भस्मावशेषं चकार। प्रभो! हे त्रैलोक्याधिपते! हरप्रभावदर्शनेन सञ्जातपरमार्थबोधानामत एव विगलिताभिमानानां देवानामियमुक्तिः। संहरेति प्रार्थनायां लोट्। द्विर्वचनं तु सम्भ्रमं प्रतिपादयति। इतिशब्दः प्रकारवाची। मरुतां कामं नियुज्य निजमनीषितलाभदर्शनार्थं हरसमीपे वर्तमानानां देवानाम्। गिरः वाचः यावद् यस्मिन् काले खे आकाशे चरन्ति। अत्र लट्प्रयोगस्यायं निर्वाहः 'तदादौ च' इति भोजसूत्रम्। तस्य चायं वृतिग्रन्थः—तदादौ चोपपदे भूतार्थे लड् भवतीति। वृत्तौ चायमेव श्लोक उदाहरणत्वेन दर्शितः, 'अथाह वर्णी—' (स.५.श्लो.६५) इति च। माधवस्त्वेवमाह—यावत्तावच्छब्दौ क्रिययोस्तुल्यकालतामाहतुः। गिरां चरणे वर्तमाने सति वह्निः काममदहदित्यर्थः। नहि मरुतां वचनेषु चरत्सु वह्निः काममदहदिति प्रयोगे कोऽपि दोष इति। वाक्प्रचारसमकालमेव मदनो दग्धोऽभूदित्यर्थ। भवनेत्रजन्मा भवस्य शम्भोर्नेत्राज्जन्म यस्य सः। वह्निः मदनं भस्मावशेषं भस्मैवावशेषम् अवशिष्टं यस्य तथाविधम्। चकार कृतवान्। अत्र भवनेत्रजन्मेत्यनेन दहनसामर्थ्यं द्योत्यते। देवानां परमेश्वरप्रतिकूलः समुद्यमोऽपि भग्नोऽभूदिति अनेनैव श्लोकेन दर्शितः। पुनश्च भग्नैर्देवैः सेनानीप्रसूत्यै भगवानभ्यर्थितोऽभूदित्यवसेयम्। अत एव षष्ठे सर्गे हर एव वक्ष्यति—

सोऽहं तृष्णातुरैर्वृष्टिं विद्युत्वानिव चातकैः।
अरिविप्रकृतैर्देवैः प्रसूतिं प्रति याचितः।। (६.२७)

इति।।२७।।

तीव्राभिषङ्गप्रभवेण वृत्तिं
मोहेन संस्तम्भयतेन्द्रियाणाम्।
अज्ञातभर्तृव्यसना मुहूर्तं
कृतोपकारेव रतिर्बभूव॥७३॥

प्रकाशिका

अथ 'रौद्रात्तु करुणो रस' इति न्यायेन देवगतस्य तथाविधस्य रौद्रस्य कार्यत्वेनोत्तरसर्गे वर्णयिष्यमाणं करुणमुपक्षिपति—

तीव्रेवति। अभिषङ्गो दुःखम्। मोहोऽत्र प्रलयः सात्त्विको भावः करुणव्यभिचारी। स च नष्टसंज्ञत्वम्। व्यसनं विपत्। मोहेन कृतोपकारेवेत्यन्वयः।।७३।।

विवरणम्

अथ परमेश्वरगतस्य तत्तादृशस्य रौद्ररसस्य 'रौद्रात् तु करुणो रस' इति न्यायेन कार्यभूतमुत्तरसर्गे वर्णयिष्यमाणं करुणमुपक्षिपति—

तीव्रेति। रतिः मुहूर्तं मोहेन कृतोपकारा बभूव इव। रतिः कामभार्या। मुहूर्तं कञ्चित्कालमित्यर्थः। मोहेन करुणव्यभिचारिणा प्रलयाख्येन सात्त्विकेन भावेन कर्त्रा।

स्तम्भप्रलयरोमाञ्चाः स्वेदो वैवर्ण्यवेपथू।
अश्रु वैस्वर्यमित्यष्टौ स्तम्भोऽस्मिन्निष्क्रियाङ्गता।।
प्रलयो नष्टसंज्ञत्वं शेषाः स्युर्व्यक्तलक्षणाः।। (४.५,६)

इति दशरूपके। कृतोपकारा कृत उपकारो यस्याः तथाविधा बभूवेव। मोहस्य कारणमाह—तीव्राभिषङ्गप्रभवेणेति। तीव्रो दुस्सहः अभिषङ्गो दुःखम्। 'अभिषङ्गस्तु कथ्यते, आक्रोशशापाभिभवसङ्गेष्वाह तु सज्जनः। दुःखे पराभवे त्वाह सिंह' इति केशवः। तस्मात् प्रभव उद्भवो यस्य तेन। मोहस्य स्वरूपमाह—इन्द्रियाणां वृत्तिं संस्तम्भयतेति। इन्द्रियाणां सान्तःकरणानां चक्षुरादीनां वृत्तिं स्वस्वविषयव्यापारम्। संस्तम्भयता सम्यक् स्तम्भयता। अत एवाज्ञातभर्तृव्यसना अज्ञातमनवगतं भर्तुः कान्तस्य व्यसनं विपत्तिर्यया सा तथा। अयमेव कृतोपकारत्वोत्प्रेक्षायां हेतुः।।७३।।

तमाशु विघ्नं तपसस्तपस्वी
वनस्पतिं वज्र इवावरुज्य।
स्त्रीसन्निकर्षं परिहर्तुमिच्छ-
न्नन्तर्दधे भूतपतिः सभूतः॥७४॥

प्रकाशिका

अथ दाह्याभावात् प्रशान्तरोषस्य देवस्य पुनरपि शान्ते विश्रान्तिमाह—

तमिति। आशु इति शान्तस्यादूरविच्छेदः प्रकाश्यते। तत्र हेतुःतपस्वीति। नित्ययोगे मतुप्। तथा च पुराणेषु श्रूयते देवः। वज्रोऽशनिः। उपमानेन तत्स्वभावत्वं द्योत्यते। स्त्रीसन्निकर्षं परिहर्तुम्। 'अङ्गारसदृशी नारी घृतकुंभसमः पुमानि'ति न्यायेन देवीप्रत्यासत्तिजं स्वचित्तविकारं देव्या वैलक्ष्यविषादादेः कामपत्न्याः शोकस्य चानुसन्धानं च परिहर्तुमित्यर्थः। अन्तर्दधे अन्तर्धानेन तद्देशवासमजहात्। सभूतः सगणः। एतत् सर्वपरिच्छदोपलक्षणं, सर्वस्यापि स्वेच्छापरिकल्पितत्वात्।।७४।।

विवरणम्

अथ मदने दग्धे दाह्यस्यान्यस्याभावात् स्वयमेव शान्ते रोषे देवस्य पुनरपि प्रकृते शान्ते विश्रान्तिमाह—

तमिति। भूतपतिः तपसः विघ्नं तं वज्रः वनस्पतिमिव आशु अवरुज्य स्त्रीसन्निकर्षं परिहर्तुमिच्छन् सभूतोऽन्तर्दधे। भूतानां पतिः भूतपतिः। 'भूतेशः खण्डपरशुः' इत्यमरः। तपसः विघ्नं शरीरमवलम्ब्यावस्थितं तपोविघ्नम्। तं कामदेवम्। वज्रोऽशनिः। 'ह्लादिनी वज्रमस्त्री स्यात् कुलिशम्' इत्यमरः। वनस्पतिं वृक्षमिव। अनेनोपमानेन आशुशब्दोक्तमर्थमनुस्मारयति। आशु शीघ्रम्। अनेन शान्तरसस्यादूरविच्छेदः प्रकाश्यते। अवरुज्य अवभज्य। स्त्रियाः सन्निकर्षः स्त्रीसन्निकर्षः तम्। परिहर्तुं हातुम् इच्छन्। 'अङ्गारसदृशी नारी घृतकुम्भसमः पुमान्' इति न्यायेन देवीसन्निकर्षेण ममावश्यं चित्तविकारो भविष्यति, देव्या वैलक्ष्यविषादादिदर्शनेन कामपत्न्याः शोकानुसन्धानदर्शनेन च तपसो महान् विघ्नो भविष्यतीत्याशङ्क्येत्यर्थः। सभूतः भूतगणसहितः सन् अन्तर्दधे तिरोऽधात्। तद्देशावासमजहादित्यर्थः। अत्र भूतशब्दः सर्वपरिच्छदानामुपलक्षणम्। तेषामपि स्वेच्छामात्रपरिकल्पितत्वादिच्छाभावे तिरोधानम्। एवम्भूतं तपोविघ्नं सद्य एव विनाश्य तत्क्षणमेव शान्तरसावलम्बने हेतुमाह—तपस्वीति। नित्ययोगे मतुप्। पुराणप्रसिद्धश्चायमर्थः 'शिवो योगरतः शश्वद्' इत्यादि।।७४।।

शैलात्मजापि पितुरुच्छिरसोऽभिलाषं
व्यर्थं समीक्ष्य ललितं वपुरात्मनश्च।
सख्योः समक्षमिति चाधिकजातलज्जा
शून्या जगाम भवनाभिमुखी कथञ्चित्॥७५॥

प्रकाशिका

अथ नायिकाया वृत्तान्तमपि तावदुपसंहरति—

शैलात्मजेति। अपीति, न केवलं देवः। पितुरिति, न तथात्माभिलाषभङ्ग इति भावः। अत्र हेतुः—उच्छिरसः अभिमानिनः अभिलाषं देवोपावर्तनविषयम्। ललितं वपुरिति, व्यर्थमित्यनुषङ्गः। समक्षम् अक्ष्णोः समीपे। 'अव्ययम्—' (२.१.६) इत्यादिना समासः। 'तृतीया—' (२.४.८४) इत्यादिना अम्भावः। इतिशब्दः सखीसाक्षात्कारस्य लज्जाधिक्ये हेतुत्वद्योतकः। शून्येति, चेतसः शून्यत्वं चिन्ताया अनुभावः। चिन्तालज्जे चानिष्टोपालम्भजस्य शोकस्य व्यभिचारिण्यौ, स च पूर्वानुरागस्य। कथञ्चिदिति लज्जाकार्यम्।।७५।।

विवरणम्

नायिकायाः शुश्रूषावृत्तान्तमप्युपसंहरति—

शैलात्मजेति। शैलत्मजा अपि उच्छिरसः पितुः अभिलाषमात्मनो ललितं वपुश्च व्यर्थं समीक्ष्य कथञ्चिद् भवनाभिमुखी जगाम। शैलात्मजा पार्वती। न केवलं देवस्तद्देशवासमजहाद् अपितु शैलात्मजापीत्यपिशब्दार्थः। उच्छिरसो मानिनः। अनेनाभिलाषभङ्गस्यात्यन्तदुःसहत्वमुक्तम्। अत एव पितुरभिलाषमित्युक्तं न पुनरात्मनोऽभिलाषमिति। पितुरभिलाषश्च देवोपावर्तनविषय एव। आत्मनो ललितं सुन्दरं वपुः शरीरं च व्यर्थं निरुपयोगं समीक्ष्य सम्यगवधार्य। कथञ्चित् कृच्छ्रेण। एतच्च लज्जाया अनुभावः। भवनाभिमुखी भवनं प्रत्यभिमुखी जगाम। भवनमभिमुखीकृत्य प्रतस्थ इत्यर्थः। विशेषतोऽपि लज्जाया आधिक्यमाह—सख्योः समक्षमिति अधिकजातलज्जा चेति। सख्योर्विजयामालिन्योः। समक्षम् अक्ष्णोः समीपे। प्रत्यक्षमित्यर्थः। 'अव्ययं विभक्ति—' (२.१.६) इत्यादिना समासः। 'तृतीयासप्तम्योर्बहुलम्' (२.४.८४) इत्यम्भावः। इतिशब्दः सखीसाक्षात्कारस्य लज्जाधिक्ये हेतुत्वं द्योतयति। अधिकजातलज्जा अत्यन्तं जाता लज्जा यस्याः सा तथोक्ता। सौभाग्यभङ्गस्यान्यदर्शनमेवात्यन्तलज्जावहं, किं पुनः सखीदर्शनमिति भावः। इत्थमभिप्रवृद्धस्य मनोरथस्यात्यन्तभङ्गे जाते सति सञ्जातायाश्चिन्ताया अनुभावमाह—शून्येति। शून्यहृदयेत्यर्थः। आत्मानमप्यजानानेति भावः। अत्र

शोकः पूर्वानुरागहेतुकः, चिन्तालज्जे च शोकस्य व्यभिचारिण्यौ। एतच्च सर्वं पञ्चमसर्गादौ देवीवृत्तान्तप्रस्तावे स्फुटीकरिष्यति।।७५।।

सपदि मुकुलिताक्षीं रुद्रसंरम्भभीत्या
दुहितरमनुकम्प्यामद्रिरादाय दोर्भ्याम्।
सुरगज इव बिभ्रत् पद्मिनीं दन्तलग्नां
प्रतिपथगतिरासीद् वेगदीर्घीकृताभ्रः।।७६।।

प्रकाशिका

अत्र देव्याः शोच्यतां परिहरति—

सपदीति। सपद्यादायेत्यन्वयः। संरम्भः क्रोधः। मुकुलिताक्षीं 'बहुव्रीहौ सक्थ्यक्ष्णोः—' (५.४.११३) इति षच्। 'षिद्गौरादिभ्यश्च' (४.१.४१) इति ङीष्। दुहितरमिति निसर्गवात्सल्यम्। अनुकम्प्यामिति तदवस्थोचितम्। दोर्भ्यामादायेत्यनुभावः। उपमानेनानुरूपता द्योत्यते। पन्थानं प्रतिगता प्रतिपथा। 'अत्यादयः क्रान्ता—' (वा.२.२.१८) इत्यादिना समासः। 'ऋक्पूरब्धूः—' (५.४.७४) इत्यादिना समासान्तः। येनागतस्तेनैव पथा गतवानित्यर्थः। अत्र प्रतिपथं वेगेन गमनं हिमवतो वैलक्ष्यद्योतकम्। अत्र दीर्घीकरणं महाबलत्व-महावर्ष्मत्वयोः। अत्रैतत्पर्यन्त इतिवृत्ते देवस्य दाक्षायणीविषयाया रतेस्तद्देहत्यागात् करुणेन विच्छेदः। तस्य च नैसर्गिकतत्त्वज्ञानपरिपोषितेन निर्वेदात्मना शान्तेन प्रशमः। पुनश्च देहान्तरं गताया देव्यास्तदुद्दीपनसेवाकृतिदर्शनोदिताया वासनास्तिताायाः प्राक्तन्या रतेः 'प्रणयिप्रियत्वात्' (कु.३.६६) इति दर्शितदाक्षिण्यात्मना दयावीरेण शान्तं व्यवधाय 'हरस्तु किञ्चित्' (कु.३.६७) इत्यादिना किञ्चिदाविर्भावमुपगताया प्रबलवासनाव्यभिचारिण्या 'अथेन्द्रियक्षोभम्' (कु.३.६९) इत्यादिना दर्शितया मत्याभिभवः। तस्याश्च स्मरविषयेण रौद्रेणाभिभवः। तस्मिंश्च दाह्याभावात् प्रशान्ते 'तमाशुविघ्नम्' (कु.३.७४) इत्यादिना पुनःशान्ते विश्रान्तिरित्यवसेयम्।।७६।।

।। इत्यरुणगिरिनाथविरचितायां कुमारसम्भवप्रकाशिकायां
तृतीयः सर्गः।।३।।

विवरणम्

अथ पुत्र्यास्तादृशीं दशामवलोकयतो भग्नमनोरथस्य हिमवतस्तत्कालोचितां प्रवृत्तिं दर्शयति—

सपदीति। अद्रिः दोर्भ्यां दुहितरं सपदि आदाय प्रतिपथगतिः आसीत्। अद्रिः

हिमवान् दोर्भ्यां स्वहस्ताभ्यां दुहितरं पुत्रीम्। अनेन निसर्गवात्सल्यास्पदत्वमुक्तम्। एतच्च सपद्यादानप्रयोजकम्। दोर्भ्यामादानं वात्सल्यस्यानुभावः प्रतिपथगतिः पन्थानं प्रतिगता प्रतिपथा। 'अत्यादयः क्रान्ताद्यर्थे द्वितीयता' इति समासः। 'ऋक्पूरब्धूः—' इत्यादिना समासान्तः। प्रतिपथा गतिर्यस्य स प्रतिपथगतिः। येन तथा पूर्वमागतस्तेनैव गतवानित्यर्थः। एतच्च वेगेन प्रतिपथगमनं वैलक्ष्यद्योतकम्। अत्रोपमामाह—सुरगजः पद्मिनीं दन्तलग्नां बिभ्रदिवेति। सुरगज ऐरावतः पद्मिनीं पद्मम्। दन्तलग्नां दन्तयोर्लग्नां सतीम्। बिभ्रद् दधानः सन्निव। यथा सुरगजः पद्मिनीं दन्ताभ्यां बिभ्रद् यथागतं गच्छति, तथा हिमवान् पुत्रीं दोर्भ्यामादायेत्यर्थः। अनेनोपमानेनानुरूपता द्योत्यते। देव्याः पारवश्यमाह—रुद्रसंरम्भभीत्या मुकुलिताक्षीमिति। रुद्रस्य संरम्भो रुद्रसंरम्भः। संरम्भः क्रोधः। 'संरम्भौ क्रोधसम्भ्रमौ' इति भोजः। तस्माद् भीत्या भयेन हेतुना। मुकुलिताक्षीं मुकुलिते निमीलिते अक्षिणी नेत्रे यस्याः सा तथा। 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गत् षच्' 'षिद्गौरादिभ्यश्च' इति ङीष्। पद्मिन्यपि जलाशयादुद्धृता मुकुलिता भवति। देव्यास्तादृशलालनयोग्यत्वमाह—अनुकम्प्यामिति। दयनीयाम्। गमनप्रकारमाह—वेगदीर्घीकृताभ्र इति। वेगेन सत्वरप्रयाणजेन दीर्घीकृतमभ्रं मेघो येन स तथा। अभ्युन्नताङ्गसङ्घट्टनाद् दीर्घीकृतगगनासक्तमेघमण्डल इत्यर्थः। एतच्च विशेषणं सुरगजेऽपि योजनीयम्। अनेन विशेषणेन महाबलत्वं महाशरीरत्वं च द्योत्यते। अत्र देवगता दाक्षायणीविषया या रतिस्तद्देहत्यागेन करुणेन विच्छिन्ना तत्त्वज्ञानोपबृंहिता शान्तरसे विश्रान्तिमुपयाता, सैवात्र देहान्तरमवलम्ब्योपगताया देव्या दर्शनादिभिः समुन्मिषिता। 'हरस्तु किञ्चित् परिवृत्तधैर्य' इत्यादिना तदुन्मेषो दर्शितश्च। ततः सापि चिरकालपरिचितेन शान्तेनाभिभूता। 'अथेन्द्रियक्षोभम्' इत्यादिना तदभिभवावस्थैव दर्शिता च। पुनश्च तस्यापि रौद्ररसेनाभिभवः। तस्य तु मदने दग्धे दाह्याभावात् पुनरपि शान्ते विश्रान्तिः। 'तमाशुविघ्नं तपस' इत्यादिना तस्य शान्ते विश्रान्तिर्दर्शिता च। पुनश्च देव्यास्तपश्चरणानन्तरं प्राचीना रतिरेवोन्मेषमुपयास्ततीत्यवसेयम्।।७६।।

'श्रीमासोत्सवचम्पु'काव्यरचनादक्षस्य नारायण-
क्ष्मादेवस्य कृतौ गिरीशगिरिजाभक्तिप्रवृद्धोदये।
व्याख्यानेऽत्र कुमारसम्भवपदार्थालोचनप्रक्रिया-
निष्णाते स्म तृतीय एति विरतिं सर्गो निसर्गोज्ज्वलः।।

।। इति श्रीकृष्णशिष्यस्य नारायणस्य कृतौ कुमारसम्भवविवरणे
तृतीय सर्गः।।३।।

●

।। अथ चतुर्थः सर्गः ।।

अथ मोहपरायणा सती
विवशा कामवधूर्विबोधिता।
विधिना प्रतिपादयिष्यता
नववैधव्यमसह्यवेदनम्॥१॥

प्रकाशिका

अथोपक्षिप्तं करुणं वर्णयति। स च प्रतिपक्षगतत्वेन नायकोत्कर्षावह इति प्रसिद्धम्।

अथेति। अथ शब्दः प्रकरणान्तरोपक्रमे। परायणं परमाश्रयः। 'परायणमभिप्रेते तत्परे परमाश्रय' इति यादवः। सती भवन्ती। अनेन मोहस्येष्टत्वं गम्यते। विवशा विबोधितेति विबोधनस्यानिष्टत्वम्। नवत्वमसह्यत्वे हेतुः। प्रतिपादयिष्यतेति एवं साध्यवसायस्य विधेरनिच्छन्त्यामेव तस्यां विबोधनं घटत एवेति भावः।।१।।

विवरणम्

अथ पूर्वसर्गोपक्षिप्तः प्रतिपक्षगतत्वेन नायकोत्कर्षप्रतिपादकः करुणरसश्चतुर्थे-नानेन सर्गेण वर्ण्यते। तत्र हरे तिरोहिते गतायां च देव्यां कामदहनप्रस्तावमोहमुपगता रतिः किमकरोदित्याकाङ्क्षायामाह—

अथेति। अथ मोहपरायणा सती कामवधूः विधिना विबोधिता। अथशब्दः प्रकरणान्तरोपक्रमे वर्तते। मोहपरायणा मोह एव परायणं परमाश्रयो यस्याः सा तथा। 'परायणमभिप्रेते तत्परे परमाश्रये' इति यादवः। मोहैकशरणेत्यर्थः। सती भवन्ती। अनेन मोहस्येष्टत्वं प्रतिपादितम्। कामवधूः कामस्य वधूर्भार्या रतिः। विधिना दैवेन। विबोधिता बोधं प्रापिता। दैववशादुपलब्धचेतनाभूदित्यर्थः। अनेन प्रबोधनस्यानिष्टत्वमुक्तम्। तर्हि किमर्थमसौ निजानभिमतं प्रबोधमुररीचकार। अत आह—विवशेति। परवशा विधिपराधीनेत्यर्थः। तर्हि किं विधिरनिच्छन्त्यै तस्यै बोधं विततारेत्यत्राह—असह्यवेदनं नववैधव्यं प्रतिपादयिष्यता। नवमभिनवं वैधव्यम्। नवत्वमसह्यवेदनत्वे हेतुः। गते हि काले वेदना सह्या भवति। प्रतिपादयिष्यतेति। लृटः शत्रादेशः। 'विश्राणनं वितरणं स्पर्शनं प्रतिपादनमि'**त्यमरः**। दातुमारब्धेनेत्यर्थः। इत्थं साध्यवसायस्य विधेस्तस्या अनिष्टस्यापि बोधस्य विधानं कर्तव्यमेवेत्यर्थः।।१।।

अवधानपरे चकार सा
प्रलयान्तोन्मिषिते विलोचने।
न विवेद तयोरतृप्तयोः
प्रियमत्यन्तविलुप्तदर्शनम्॥२॥

प्रकाशिका

विबोधनस्य कार्यमाह—

अवधानेति। अवधानपरे प्रियदर्शनं प्रत्यवहिते इत्यर्थः। प्रलयान्तोन्मिषितत्वाच्च तच्छेषानुवृत्त्या यत्नावधेयत्वम्। कथमत्यन्तास्तमितस्य दर्शनमित्याह—न विवेदेति। अनेन भर्गलोचनाग्निनिर्गमनसमय एव मोहमुपगतेति गम्यते। अतृप्तयोर्दर्शनोत्सुकयोः। 'तद्विपर्यासे च' इति भोजसूत्रेण सप्तमी। तत्र च 'क्रियार्हस्य कारकत्व' इति 'क्रियानर्हस्य चाकारकत्व' इति च सूत्रद्वयगतोऽर्थः तच्छब्देन परामृश्यते। अत्र च दर्शनार्हयोर्दृशोः स्थितयोः दर्शनविलोपात् क्रियार्हस्याकारकत्वम्। अत्र प्रलयशेषानुवृत्तिरौत्सुक्यस्य चोदयः।।२।।

विवरणम्

अथ विबोधस्य कार्यं दर्शयति—

अवधानेति। सा प्रलयान्तोन्मिषिते विलोचने अवधानपरे चकार। सा रतिः। प्रलयान्तोन्मिषिते। प्रलयो मोहः। 'प्रलयो नष्टचेष्टते'त्यमरः। तस्यान्ते अवसाने उन्मिषिते कृतोन्मेषे। अनेन मोहशेषानुवृत्तिर्दर्शिता। अत एव विलोचनयोर्यत्नतः सावधानत्वविधानम्। विलोचने चक्षुषी। अवधाने सावधानत्वे परे तत्परे। प्रियदर्शनसावधाने इत्यर्थः। बोधनानन्तरं प्रियतममेव सावधानमवलोकितवतीति भावः। कथमत्यन्तास्तमितस्य प्रियस्य दर्शनोपपत्तिरत आह—प्रियं तयोः अतृप्तयोः अत्यन्तविलुप्तदर्शनं न विवेदेति। सेति तच्छब्दः पूर्वार्धगत एव कर्तृत्वेनात्राप्यनुषज्यते। प्रियं कान्तम्। तयोः विलोचनयोः। अतृप्तयोः, तृप्ते न भवत इत्यतृप्ते। दर्शनोत्सुकयोः सतोरेवेत्यर्थः। अत्र सप्तमीविधानाभावात् तत्र 'तद्विपर्यासे चे'ति भोजसूत्रेण सप्तमी द्रष्टव्या। अस्य सूत्रस्यायमर्थः—'क्रियार्हस्य कारकत्वे' 'क्रियानर्हस्य चाकारकत्वे' इति च सूत्रद्वयेन या सप्तमी विहिता, सा तयोर्विपर्यासे च भवति। क्रियार्हस्याकारकत्वे क्रियानर्हस्य च कारकत्वे च भवतीत्यर्थः। अत्र दर्शनार्हयोर्दृशोः सतोरपि दर्शनविलोपात् क्रियार्हस्याकारकत्वम्। अत्यन्तविलुप्तदर्शनम्, अत्यन्तं विलुप्तं नष्टं दर्शनं यस्य तथाविधम्। न विवेद न ज्ञातवती। हरकोपानलोद्गमनसमय एव मोहमुपगतत्वादात्मकान्तं मृतं न विवेदेति भावः। अस्मिन् वाक्ये मोहशेषानुवृत्तिरौत्सुक्योदयश्च दर्शितः।।२।।

अयि जीवितनाथ! जीवसी-
त्यभिधायोत्थितया तया पुरः।
ददृशे पुरुषाकृति क्षितौ
हरकोपानलभस्म केवलम्॥३॥

प्रकाशिका

अवधानस्य कार्यमाह—

अयीति। 'अयि प्रश्ने सानुनय' इति हलायुधः। पुरुषाकृतिरिति पाठः। तद्विशेपणं हरकोपानलभस्मेति। हरकोपानले भस्मीभूता। केवलमिति, न कश्चिदप्यभस्मीभूतस्तदवयवस्तत्परिच्छदो वेत्यर्थः। एतद् विभावोद्बोधपरं वाक्यम्।।३।।

विवरणम्

विलोचनयोरवधानपरत्वविधानस्य फलमाह—

अयीति। जीवितनाथ! त्वं जीवसि। अयीति सानुनयप्रश्नविषयमव्ययम्। 'अयि सानुनये प्रश्ने' इति हलायुधः। जीवसि कच्चिदित्यर्थः। इत्यभिधाय उक्त्वा उत्थितया कृतोत्थानया। पुरुषाकृतिमात्रदर्शनं जीवनसन्देहे हेतुः। अत एव सत्वरमुत्थानम्। तया रत्या। अग्रे क्षितौ भूमौ पुरुषाकृतिः पुरुषस्याकृतिराकारः ददृशे दृष्टाभूत्। अयमभिप्रायः—हरकोपानलनिष्पतनानन्तरमेव मोहमुपगता रतिः ईषन्मोहविगमानन्तररं प्रियशरीरसंस्थानं पूर्ववदेवावलोक्य सत्वरमुत्थाय तत्समीपमुपगम्य पुरस्तादेव पुरुषाकृतिं ददर्शेति। कीदृशी पुनः सा पुरुषाकृतिरित्यत्राह—केवलं हरकोपानलभस्मेति। केवलं तच्छरीरावयवेषु तत्परिच्छदेषु वा न कश्चिदंशस्तत्राभस्मसाद्भूतो दृष्टोऽभूदित्यर्थः। हरकोपानलभस्म। हरस्य कोपो हरकोपः हरकोपश्चासावनलश्चेति हरकोपानलः तस्य भस्म। सम्यगवलोकनानन्तरं हरकोपानलभस्मैव दृष्टमभूदिति भावः। पुरुषाकृतीत्येव केचित् पठन्ति। तन्मते पुरुषाकृति हरकोपानलभस्म ददृशे इत्यन्वयः। अनेन श्लोकेन करुणस्य विभावोद्बोधो दर्शितः।।३।।

अथ सा पुनरेव विह्वला
वसुधालिङ्गनधूसरस्तनी।
विललाप विकीर्णमूर्धजा
समदुःखामिव कुर्वती स्थलीम्॥४॥

प्रकाशिका

अथ तद्विबोधोद्बोधितस्य करुणस्यानुभावव्यभिचारादिकं प्रपञ्चयति—

अथेति। अथ अत्यन्तनाशावगमानन्तरमित्यर्थः। अत एव पुनरेव विलापः। एवशब्दः पौनर्वचनिकः। विह्वलता च ग्लानिः। तस्या अनुभावो वसुधालिङ्गनं मूर्धजविकिरणं च। निर्दयमङ्गैर्वलनात् स्थल्यास्तथाकरणोत्प्रेक्षा।।४।।

विवरणम्

भस्ममात्रावलोकनोद्बोधितस्य करुणस्यानुभावव्यभिचार्यादिकं प्रपञ्चयति—

अथेति। अथ सा पुन एव विह्वला विललाप। अथ प्रियतमस्यात्यन्तिकविनाशावगमनानन्तरम्। सा रतिः। पुनरेव पुनरपीत्यर्थः। विह्वला परवशा सती। ग्लानिमुपगम्येति भावः। विललाप परिदेवनमकरोत्। 'विलापः परिदेवनमि'त्यमरः। आत्मनः शरीरावयवेष्वपि निर्दयत्वमाह—वसुधालिङ्गनधूसरस्तनीति। वसुधाया भूमेः आलिङ्गनेन धूसरौ धूसरवर्णौ स्तनौ यस्याः सा तया। अनेन एवमुत्थितायाः परमार्थावगमनानन्तरमवनतशरीरतया भूमौ पतनं द्योत्यते। इदं च ग्लानेरनुभावः। अनुभावान्तरमप्याह—विकीर्णमूर्धजेति। विकीर्णाः विक्षिप्ताः मूर्धजाः केशा यस्याः सा तथा। इत्थंभूतव्यापारायास्तस्याः उत्प्रेक्षां दर्शयति। स्थलीं समदुःखां कुर्वतीवेति। स्थलीं पृथिवीम्। समदुःखां समं समानं दुःखं यस्यास्तथाविधां कुर्वतीव। निर्दयं पृथिव्यां परिवर्तनादिभिः स्थल्यास्तथाकरणोत्प्रेक्षा पश्यतां पक्षिमृगवनचरादीनामपि दुःखोत्पादनाद् वनस्थलीमप्यात्मसमानदुःखां कुर्वाणेवेत्यर्थः।।४।।

उपमानमभूद् विलासिनां
करणं यत् तव कान्तिमत्तया।
तदिदं गतमीदृशीं दशां
न च दीर्ये कठिनाः खलु स्त्रियः।।५।।

प्रकाशिका

विलापप्रकारानाह—

उपमानमिति। उपमानं नाम प्रसिद्धतद्धर्मकं वस्तु। विलासिनाम्।

धीरसञ्चारिणी दृष्टिर्गतिर्गोवृषभाञ्चिता।
स्मितपूर्वमथालापो विलास इति कीर्तितः।।

इति [दशरूपके] विलासलक्षणम्। करणं मात्रम्। चस्त्वर्थे। खलुर्जिज्ञासायाम्।

'निषेधवाक्यालङ्कारजिज्ञासानुनये खल्वि'ति सिंहः। अतः सर्वाः स्त्रियः कठिना इति ज्ञातव्यमित्यर्थः। अत्र निर्वेदः। उन्मादस्त्वेषु वाक्येषु भूयसा द्रष्टव्यः।।५।।

विवरणम्

विलापप्रकारानेव प्रपञ्चयति उपमानमित्यादिभिः—

उपमानमिति। तव यत् करणं कान्तिमत्तया विलासिनाम् उपमानम् अभूत्, तद् इदम् ईदृशीम् दशां गतम्, अहं च न दीर्ये। तव यत् करणं शरीरम्। 'करणं साधकतमक्षेत्रगात्रेन्द्रियेष्वपी'त्यमरः। कान्तिमत्तया। कान्तिरस्त्यस्मिन्निति कान्तिमत्। अतिशायने मतुप्। तस्य भावस्तत्ता। विलासिनाम्।

धीरसञ्चारिणी दृष्टिर्गतिर्गोवृषभाञ्चिता।
स्मितपूर्वमथालापो विलास इति कीर्तितः।।

इति विलासलक्षणम्। 'विलासो भूषणालापगतिकर्मसु चारुता' इति च। तद्वतां पुरुषाणाम्। उपमीयतेऽनेनेत्युपमानम्। प्रसिद्धसाधर्म्यं वस्त्वित्यर्थः। कामस्य शरीरमिवास्य शरीरं चारुतरमित्यादिवचनेष्विति भावः। तदिदं शरीरमीदृशीं दशामवस्थाम्। भस्मसाद्भावमित्यर्थः। गतं प्राप्तमासीत्। तुशब्दार्थे चकारः। दीर्य इति कर्मकर्तरि प्रयोगः। अहं तु न दीर्ये विदारणं न गच्छामि। यतोऽहं तादृशे त्वयीदृशीं दशां गतेऽपि न दीर्ये, तत एव शङ्के इत्याह—स्त्रियः कठिनाः खल्विति। खलुशब्दो जिज्ञासायाम्। 'निषेधवाक्यालङ्कारजिज्ञासानुनये स्त्रीत्वात् कठिनतैव मम विदारणाभावे हेतुरिति भावः। अनेन वाक्येनात्मनिर्वेदो दर्शितः। उन्मादस्त्वस्मिन् प्रकरणे प्रायेण द्रष्टव्यः।।५।।

क्व नु मां त्वदधीनजीवितां
विनिकीर्य क्षणभिन्नसौहृदः।
नलिनीं क्षतसेतुबन्धनो
जलसङ्घात इवासि विद्रुतः।।६।।

प्रकाशिका

क्वेति। विनिकीर्यापास्य। उपमानेन गत्वरत्वं द्योत्यते।।६।।

विवरणम्

प्रणयिनीं मां परित्यज्य क्व नु खलु गतोऽसीत्यनुगमनाकाङ्क्षया सोन्मादमाह—

क्वेति। त्वदधीनजीवितां मां विनिकीर्य क्व नु विद्रुतः असि। त्वदधीनजीवितां तवैवाधीनं जीवितं जीवनं यस्यास्ताम्। मत्प्राणनाथत्वं तवैवेति भावः।

विनिकीर्य। 'कृ विक्षेप' इति धातुः। अपास्येत्यर्थः। क्व नु विद्रुतोऽसि कस्मिन् प्रदेशे विद्रुतवानसि। अत्रानुरूपामुपमां दर्शयति—जलसङ्घातो नलिनीमिवेति। जलस्य सङ्घातो जलसङ्घातः। सङ्घातः समूहः। नलिनीं पद्मिनीमिव। विनिकीर्येति अत्रापि योज्यम्। यथा जलसङ्घातः नलिनीमितस्ततो विक्षिप्य त्वरितं गच्छति, तद्वदित्यर्थः। प्रियतमस्य सत्वरगमने हेतुमाशङ्कते—क्षणभिन्नसौहृद इति। क्षणेन भिन्नं नष्टं सौहृदं बन्धुत्वं यस्य स तथा। स्नेहभङ्गाभावे हि जिगमिषायां सत्यामपि पुनः पुनरापृच्छ्य मन्दमेव गच्छति। जलसङ्घातस्य गमने हेतुमाह—क्षतसेतुबन्धनामिति। क्षतं भग्नं सेतोर्बन्धनं यस्यास्ताम्। अत्र सौहृदसेत्वोः परस्परसाम्यं प्रतीयते। नलिन्या जीवितमपि जलसङ्घाताधीनम्। एकत्र सञ्चितो जलसङ्घातोऽपि सेतुभङ्गानन्तरं सत्वरं गच्छति, गमनानन्तरं च कुत्र गत इति न ज्ञायते।।६।।

कृतवानसि विप्रियं न मे
प्रतिकूलं न च ते मया कृतम्।
किमकारणमेव दर्शनं
विलपन्त्यै रतये न दीयते।।७।।

प्रकाशिका

अथवा न गतोऽसीत्याह—

कृतवानिति। उभयं ह्यमिलने हेतुरिति भावः। अत आह—अकारणमिति। रतय इति परत्वनिर्देशः स्ववाल्लभ्यादिद्योतकः। विलपन्त्यै इति, परिहासस्यापि नायमवसर इत्यर्थः। अनयोरुपालम्भनवाक्ययोरीर्ष्या।।७।।

विवरणम्

अथवा प्रणयिनीं मां परित्यज्य गतोऽसीति यन्मया कथितं (तद)युक्तमेव, अत्र विश्लेषमात्रेऽपि हेत्वभावादित्याह—

कृतवानिति। त्वं मे विप्रियं न कृतवान् असि। विप्रियमप्रियं कर्म कदाचिदपि न कृतवानसि। त्वया ममानिष्टं कर्म स्वप्नेऽपि नाचरितमित्यर्थः। नापि मया तवानिष्टं कर्म कृतमित्याह—मया ते प्रतिकूलं च न कृतमिति। प्रतिकूलमनिष्टम्। उभयमेव हि द्वन्द्वानां परस्परविश्लेषकारणमिति भावः। तस्मात् तयोरप्येकस्याभावे त्वरितमेव दर्शनं दातव्यमित्याह—किमकारणमेव रतये दर्शनं न दीयत इति। किं कस्माद्धेद्वेतोः। अकारणं पूर्वोक्तेन कारणद्वयेन विनैवेत्यर्थः। रतय इति नामग्रहणेनात्मनः प्राचीनं प्रेमविषयत्वमनुस्मारयतीत्यर्थान्तरसङ्क्रमितवाच्यध्वनिः।

दर्शनं न दीयते दृष्टिगोचरो न भवसीत्यर्थः। ननु परिहासार्थमेवास्त्वित्यत्राह—विलपन्त्यै इति। विलापं कुर्वत्यै। परिहासस्यापि नायमवसर इति भावः।।७।।

स्मरसि स्मर! मेखलागुणै-
रुत गोत्रस्खलितेषु बन्धनम्।
च्युतकेसरदूषितेक्षणा-
न्यवतंसोत्पलताडनानि वा॥८॥

प्रकाशिका

अथ कारणमाशङ्कते—

स्मरसीति। उत विकल्पे। च्युतेति विशेषणं गोत्रस्खलनकारिणि मुखे दण्ड इति द्योतनाय। अत्रोह।।८।।

विवरणम्

इत्थं निरस्तेऽपि गमने दर्शनाभावात् पुनरपि गमनमेवावधार्थ गमने हेतुमाशङ्कते—

स्मरसीति। स्मर! त्वं गोत्रस्खलितेषु मेखलागुणैः बन्धनम् उत अवतंसोत्पलताडनानि वा स्मरसि। हे स्मर! गोत्रस्खलितेषु गोत्रस्य नाम्नः स्खलितेषु स्खलनेषु। सपत्नीनामाक्षरग्रहणेष्वित्यर्थः। मेखलाभिरेव गुणैः पाशैः। उतशब्दो विकल्पे। 'विकल्पे किं किमूत चे'त्यमरः। बन्धनं वेत्यर्थः। अवतंसोत्पलताडनानि अवतंसेन कर्णपूरेण उत्पलेन कुवलयेन यानि ताडनानि तानि वा स्मरसि। 'पुंस्युत्तंसावतंसौ द्वौ कर्णपूरेऽपि शेखरे' इत्यमरः। यस्मादेवं दर्शनदानाभावः, तस्मात् तयोरन्यतरस्य स्मरणमाशङ्क इत्यर्थः। गोत्रस्खलनकारिणि मुख एव दण्ड इति द्योतयन्नवतंसोत्पलताडनानि विशिनष्टि—च्युतकेसरदूषितेक्षणानीति। च्युतैः पतितैः अवतंसोत्पलस्य केसरैः दूषिते पीडिते ईक्षणे नेत्रे यैस्तानि। मुखे हि ताडने कृते नेत्रयोरवतंसोत्पलकेसरदूषितत्वं भवतीति भावः। रहस्यन्यवधूनामाक्षरग्रहणे सति मया कृतयोरेतादृशयोरपराधयोरन्यतरस्य स्मरणेनैव त्वमिदानीं मत्समीपं नोपयासीत्यूहः।।८।।

हृदये वससीति मत्प्रियं
यदवोचस्तदवैमि कैतवम्।
उपचारपदं न चेदिदं
त्वमनङ्गः कथमक्षता रतिः॥९॥

प्रकाशिका

अथवा प्रागपि निःस्नेह एवासीत्याह— .

हृदय इति। कैतवं धूर्तालापम्। पदं वाक्यम्। अत्रोहपुरस्सरेर्ष्या।।९।।

विवरणम्

अथवा हेतुसद्भावे एव द्वन्द्वानां परस्परविश्लेष इति यदुक्तं, तत् स्निग्धानामेव। त्वं तु पूर्वमपि मयि निःस्नेह एवेत्याह—

हृदय इति। त्वं हृदये वससीति मत्प्रियं यदवोचः, तदहं कैतवम् अवैमि। हे रते! त्वं मे हृदये वससि मनसि स्थितिं करोषि इत्येवंरूपं मत्प्रियं मम प्रियमिष्टं यदवोचः अवादीः, तदहं कैतवं धूर्तालापमेवावैमि अवगच्छामि। कथमवगच्छसीत्यत्राह—इदमुपचारपदं न चेत्, त्वमनङ्गः रतिः अक्षता कथम्। इदं हृदये वससीत्यादिरूपं वचनम्। उपचारपदमुपचारवाक्यम्। पदशब्दस्यात्र वाक्यमर्थः। 'न पदं पदमित्याहुर्वाक्यं हि पदमुच्यते' इति न्यायात्। उपचार सम्मानं, सम्मानवाक्यमित्यर्थः। न चेत् तर्हि त्वमनङ्गः अशरीरोऽभूः, रतिः पुनरक्षता क्षतरहिता जाता, इदं कथं कथञ्चिदित्यर्थः। अयमभिप्रायः—यद्यहं ते हृदये वसामि तर्हि त्वयि भस्मसाद्भूतेऽपि मम क्षणमात्रेणापि रहितत्वं नोपपद्यते। तस्मान्मत्प्रसादार्थं प्रयुक्तमेव ते तादृशं वचनमिति अत्रोहस्तत्पुरस्सरेर्ष्या च द्योत्यते।।९।।

परलोकनवप्रवासिनः
प्रतिपत्स्ये पदवीमहं तव।
विधिना जन एष वञ्चित-
स्त्वदधीनं खलु देहिनां सुखम्।।१०।।

प्रकाशिका

सस्नेहया त्वया किं कृतमित्याह—

परलोकेति। नवशब्दः पदव्यन्वेषणसौकर्यार्थः। तदानीमेव किं नागतासीत्याह—विधिनेति। मोहं विदधतेति शेषः। भोगसाधनेषु सत्सु किं तवास्मदनुगमनेनेत्याह—त्वदधीनमिति। खलुर्वाक्यालङ्कारे। देहिनां, न केवलं ममैकस्याः। अत्र मरणव्यवसायो मरणम्।।१०।।

विवरणम्

अस्त्वहं निःस्नेहः, सस्नेहा त्वं तु किं करिष्यसीत्यत्राह—

परलोकेति। अहं परलोकनवप्रवासिनः तव पदवीं प्रतिपत्स्ये। परलोकनवप्रवासिनः परलोकमुद्दिश्य नवं यथा भवति तथा प्रवासं कर्तुं शीलमस्येति तथा। प्रवासो देशान्तरगमनम्। एतस्माल्लोकात् सद्य एव परलोकं गतस्येत्यर्थः। चिरप्रवासिनो हिं पदवी दुरवबोधा स्यात्, नवप्रवासिनस्तु पथिकजनानुयोगादिभिः सुबोधेति नवशब्दस्य ग्रहणम्। पदवीं मार्गं प्रतिपत्स्ये प्राप्स्यामि। मृतं त्वामनुमरिष्यामि सद्य एवेत्यर्थः। तर्हि त्वं तदानीं किं न मृतासीत्यत्राह—एष जनो विधिना वञ्चित इति। एष जनः अहमित्यर्थः। विधिना दैवेन वञ्चितः कृतवञ्चनो जातः। तदानीं मे मोहं विदधतेति शेषः। ननु सुखसाधनेष्वन्नपानादिषु सत्सु किं तवानेन मरणव्यवसायेनेत्यत्राह—देहिनां सुखं त्वदधीनं खलु इति। देहिनां शरीरिणां सुखं त्वदधीनं त्वदायत्तम्। खलुशब्दः प्रसिद्धौ। न केवलं त्वदधीनजीविताया ममैव, अपितु सर्वेषामपि सुखं त्वदधीनमिति प्रसिद्धमेवेत्यर्थः। अत्र मरणाख्यो व्यभिचारी। मरणं तु मरणव्यवसाय एवेति दशरूपके।।१०।।

रजनीतिमिरावगुण्ठिते
पुरमार्गे घनशब्दविक्लवाः।
वसतिं प्रिय! कामिनां प्रिया-
स्त्वदृते प्रापयितुं क ईश्वरः॥११॥

प्रकाशिका

सुखस्य तदधीनत्वमुपपादयति—

रजनीति। प्रियेति पदच्छेदः।।११।।

विवरणम्

अथ सुखस्य तदधीनत्वमुपपादयन्ती तत्पराक्रमानन्यसाध्याननुस्मृत्य विलपति रजनीत्यादिना श्लोकद्वयेन—

रजनीति। प्रिय! ~~त्वदृते कः पुरमार्गे रजनीतिमिरावगुण्ठिते प्रियाः~~ त्वदृते कः पुरमार्गे रजनीतिमिरावगुण्ठिते प्रियाः कामिनां वसतिं प्रापयितुम् ईश्वरः। प्रिय! हे कान्त! अनया सम्बुद्ध्या त्वया विना कथमहं जीवामीति व्यज्यते। त्वदृते त्वां विना। कः न कोऽपीत्यर्थः। पुरमार्गे पुरे यो मार्गस्तस्मिन्। रजनीतिमिरावगुण्ठिते। रजन्यां रात्रौ यानि तिमिराणि तमांसि तैरवगुण्ठिते आवृते सति। अनेनाभिसारिकावृत्तस्यावसरः कामपीडाविरहितानां दुर्गमत्वं च द्योत्यते। प्रियाः कामिनीः कामिनां प्रियाणां वसतिं गृहं प्रापयितुं नेतुम्। अस्य गत्यर्थण्यन्तत्वाद् द्विकर्मकत्वम्। ईश्वरः समर्थो भवति। त्वमेव समर्थ इत्यर्थः। न केवलं पुरमार्गस्य तिमिरावृतत्वमात्रं

भयजनकम्, अन्यदपीत्याह—घनशब्दविक्लवा इति। घनस्य मेघवस्य शब्देन विक्लवाः परवशाः। घनागमनसमये निरस्तमाना इति च व्यज्यते। तिमिरावृतत्वाद् भयजनकेषु पुरमार्गेषु भयजनकेषु घनशब्देषु श्रूयमाणेषु च कामिनीनां कामुकगृहप्राप्तौ त्वत्सामर्थ्यमेकमेव निमित्तमिति भावः।।११।।

नयनान्यरुणानि घूर्णयन्
वचनानि स्खलयन् पदे पदे।
असति त्वयि वारुणीमदः
प्रमदानामधुना विडम्बना।।१२।।

प्रकाशिका

नयनानीति। अधुना इत आरभ्य। विडम्बना हास्यावलम्बनम्। भावशून्यत्वादित्यर्थः। अनयोः पद्ययोस्तत्पराक्रमस्मृतिः।।१२।।

विवरणम्

ननु वारुणीमद एव प्रियाः प्रिववसतिं, किं मवेत्यत्राह—

नयनानीति। त्वयि असति वारुणीमदः प्रमदानाम् अधुना विडम्बना। त्वयि असति अत्यन्तास्तमिते सति। वारुणीमदः। वारुणी मद्यं, तज्जनितो मदः। 'सम्मोहानन्दसम्भेदो मदिरादिकृतो मद' इति मदलक्षणम्। प्रमदानां स्त्रीणां विडम्बना हासकारणं, भावशून्यत्वादिति भावः। मदिरामदस्वभावकथनेन हासकारणत्वमेवाभिव्यनक्ति—नयनानीत्यादिना विशेषणद्वयेन। तत्र मदिरापानानन्तरमेव जायमानं स्वभावमादौ वर्णयति—अरुणानि नयनानि घूर्णयन्निति। अरुणानि मद्यपानेन जनितरागाणि नयनानि विलोचनानि घूर्णयन् भ्रामयन्। अथ तदनन्तरं जायमानं स्वभावमाह—पदे पदे वचनानि स्खलयन्निति। पदे पदे प्रतिपदं वचनानि वाक्यानि स्खलयन् स्खलितानि कुर्वन्। मदिरामदो हि प्रथमं नयनशोणिमानमातनोति, पुनश्च स्खलितपदानि वचनानि जनयति। नहि तयोरुभयोरपि भावशून्यत्वे तद्दर्शिनां हासादन्यत् किमपि सम्भवतीति भावः।।१२।।

अवगम्य कथीकृतं वपुः
प्रियबन्धोस्तव निष्फलोदयः।
बहुलेऽपि गते निशाकर-
स्तनुतां दुःखमनङ्ग! मोक्ष्यति।।१३।।

प्रकाशिका

विशेषतः त्वत्सुहृदः शोच्याः संवृत्ता इत्याह—

अवगम्येति। कथीकृतमिति कथावशेषीकृतम्। बहुले कृष्णपक्षे। दुःखं कृच्छ्रात्। अत्रोहः।।१३।।

विवरणम्

हन्त तव बन्धवोऽपि सम्प्रति शोचनीयाः संवृत्ता इत्याह—

अवगम्येति। अनङ्ग! निशाकरः तव वपुः कथीकृतम् अवगम्य बहुले गते अपि दुःखं तनुतां मोक्ष्यति। हे अनङ्ग!, इदानीं त्वमेवं संवृत्त इत्यर्थः। निशाकरः चन्द्रः तव वपुः शरीरम्। कथीकृतम्। कथाशब्दादभूततद्भावे च्विप्रत्ययः। कथावशेषीकृतमित्यर्थः। अत एवानङ्गेति सम्बुद्धिरुक्ता। अवगम्य ज्ञात्वा। बहुले कृष्णपक्षे। 'बहुलः कृष्णपक्षेऽपी'ति भोजः। गते अतीतेऽपि। अपिशब्दः कृष्णपक्षात्यये तनुतापरित्यागाभावस्य विरोधमाह। दुःखं कृच्छ्रात् तनुतां कार्श्यम्। 'स्त्रियां तनुः शरीरे स्यात् कृशे भद्रे तनुस्त्रिष्वि'ति नानार्थकोशः। मोक्ष्यति त्यक्ष्यति। त्वद्विनाशजनिताद् दुःखात् प्रक्षीणशरीरश्चन्द्रः पूर्वपक्षेऽपि कृच्छ्रेणैव शरीरपुष्टिं प्राप्स्यतीत्यर्थः। त्वद्विनाशस्य दुःखकारणत्वमाह—प्रियबन्धोरिति। प्रियाः बन्धवो यस्य तस्य। प्रियस्य इष्टस्य बन्धोरिति वा विग्रहः। अयं च दुःखे प्रथमो हेतुः। द्वितीयं हेतुमाह—निष्फलोदय इति। निष्फलः अफलः उदयो यस्य स तथा। चन्द्रोदयस्य कामिनीकामुकसम्भोगसौख्यं हि फलम्। न च तत् कामेन विना सम्भवतीति निशाकरस्य निष्फलोदयत्वमिति दुःखनिमित्तकं शरीरकार्श्यमिति भावः। नहि दुःखनिमित्तं शरीरकार्श्यं बहुलावसानेऽपि नश्यतीति कृच्छ्रेण कार्श्यपरित्यागोपपत्तिरूह्या।।१३।।

हरितारुणचारुबन्धनः
कलपुंस्कोकिलशब्दसूचितः।
वद सम्प्रति कस्य बाणतां
नवचूतप्रसवो गमिष्यति।।१४।।

प्रकाशिका

न केवलं त्वत्सुहृदां, किञ्च त्वत्परिच्छदानामपि नियता शोच्यतेत्याह—

हरितारुणेति। हरितारुणचारुबन्धनत्वं बाणस्यापि धर्मः। **दक्षिणावर्तस्तु**—सूचिक इति पाठमादृत्य सूचिर्वेधनशल्यमित्याह।।१४।।

विवरणम्

न केवलं त्वत्सुहृदामेव शोच्यत्वं, त्वत्परिच्छदानामपीति श्लोकद्वयेनोच्यते। तत्रादौ बाणानां प्राधान्यात् तेषां शोच्यत्वमाह—

हरितेति। नवचूतप्रसवः सम्प्रति कस्य बाणतां गमिष्यति वद। नवचूतप्रसवः। नवोऽभिनवः चूतप्रसवः चूतपुष्पम्। सम्प्रति एतस्मात् कालादारभ्येत्यर्थः। कस्य बाणतां शरत्वं गमिष्यति प्राप्स्यति वद ब्रूहि। चूतप्रसवोऽद्यप्रभृति निरुपयोगः संवृत्त इति भावः। उद्दीपनत्वातिशयं द्योतयितुं नवशब्दः। नवचूतप्रसवस्य बाणधर्मयोगमाह—हरितारुणचारुबन्धन इति। नवत्वाद्धरितमीषन्नीलमरुणं रक्तवर्णं चारु मनोहरं च बन्धनं वृन्तं यस्य स तथा। बाणोऽपि शिल्पिभिः कृतैर्हरितैररुणैश्च बन्धनैर्युक्तो भवति। चूतपुष्पाणां दर्शनेन विनाप्युद्दीपनत्वमाह—कलपुंस्कोकिलशब्दसूचित इति। कलेन मधुरेण पुँस्कोकिलशब्देन पुँस्कोकिलानां स्वनेन सूचितः ज्ञापितः। नहि चूताङ्कुरास्वादनेन विना कोकिलालापस्य कलत्वं भवति। तदुक्तं 'चूताङ्कुरास्वादकषायकण्ठः पुंस्कोकिलो यन्मधुरं चुकूज'(कुमा. ३.३२) इति। कलतरकोकिलालापश्रवणानुमितोदय इत्यर्थः। धन्विनां बाणमोक्षोऽपि तल्लिङ्गभूतेन हुङ्कारेणानुमीयते। कूजनसामर्थ्यप्रतीत्यर्थं पुंस्त्वविशेषणं सैनिकत्वप्रतीत्यर्थं च।।१४।।

अलिपङ्क्तिरनेकशस्त्वया
गुणकृत्ये धनुषो नियोजिता।
विरुतैः करुणस्वरैरियं
गुरुशोकामनुरोदितीव माम्॥१५॥

प्रकाशिका

अलिपङ्क्तिरिति। अनेकशः अनेकेषु। 'मङ्गलार्थेऽयमिष्यत' इति वचनात्। करुणं दयनीयम्। उत्प्रेक्षया शोच्यता गम्यते।।१५।।

विवरणम्

धनुर्गुणस्यापि शोच्यतामाह—

अलीति। त्वया अनेकशः धनुषः गुणकृत्ये नियोजिता अलिपङ्क्तिः करुणस्वरैः विरुतैः गुरुशोकां माम् अनुरोदिति इव। त्वया भवता अनेकशः बहुशः। बहुषु कार्येष्वित्यर्थः। धनुषः कौसुमस्य चापस्य। गुणकृत्ये गुणस्य मौर्व्याः कृत्ये कार्ये। धनुरारोपण इत्यर्थः। नियोजिता समर्पिता। मौर्वीत्वं प्रापितेत्यर्थः।

अनेन प्राचीनानेकोपयोगकथनेन भविष्यतो निरुपयोगत्वस्यात्यन्तदु:खहेतुत्वमुक्तम्। अलिपङ्क्ति: अलीनां भ्रमराणां पङ्क्ति:। करुणस्वरै: करुणो दयनीय: स्वरो येषां तादृशै:। विरुतै: झङ्कारै:। शोकहर्षादौ हि स्वरभेद: प्रसिद्ध: 'द्विधा भिन्ना: शिखण्डिभि:'(रघु.१.३९) इत्यादिषु। गुरुशोकाम्। गुरुरधिक: शोको दु:खं यस्यास्तादृशीम्। मामनुरोदितीव रुदत्या ममानुरोदनं करोतीव। 'रुदादिभ्य: सार्वधातुके' (७.२.७६) इतीडागम:।

> दर्शनात् क्लिष्टजन्तूनां धर्मशीलस्य चेतस:।
> आर्द्रता करुणा तस्या विषय: करुणस्त्रिषु।।

इति भोज:। उत्प्रेक्षयालिपङ्क्ते: शोच्यता सूच्यते।।१५।।

> **प्रतिपद्य मनोहरं वपु:**
> **पुनरप्यादिश तावदुत्थित:।**
> **रतिदूतपदेषु कोकिलान्**
> **मधुरालापनिसर्गपण्डितान्॥१६॥**

प्रकाशिका

तन्मादेवं कुर्या इत्याह—

प्रतिपद्येति। तायत् प्रथमम्। उत्थिन उद्युक्त:। रत्यर्था दूता रतिदूता:। अत्रौत्सुक्यम्।।१६।।

विवरणम्

यदि मद्विनाशादेवम्भूता मम बन्धव: तर्हि किं मया कर्तव्यमित्यत्राह—

प्रतिपद्येति। त्वं तावद् मनोहरं वपु: प्रतिपद्य उत्थित: पुन: अपि कोकिलान् रतिदूतपदेषु आदिश। तावत् प्रथमम्। आदौ तव बन्धूनां मध्ये कोकिलानां शुचमपनय, पुन: क्रमेणान्येषामपीति भाव:। मनोहरं रमणीयं वपु: शरीरम्। प्रतिपद्य, भस्मरूपं वपुरवहाय पूर्ववदतिरमणीयं शरीरमेवोपादायेत्यर्थ:। उत्थित: उद्युक्त: सन्। नैवमौदासीन्यं कुर्या इत्यर्थ:। पुनरपि, पूर्ववदित ऊर्ध्वमप्यादिशेत्यर्थ:। कोकिलान् परभृतान् रतिदूतपदेषु रत्यर्था दूता रतिदूता: तेषां पदेषु स्थानेषु। कामिनीकामुकयो: परस्परं घटनरूपेषु कार्येष्वित्यर्थ:। तत्र हि कोकिलानामेव सामर्थ्यम्। यथोक्तं रघुवंशे—

> त्यजत मानमलं बत विग्रहैर्न पुनरेति गतं चतुरं वय:।
> परभृताभिरितीव निवेदिते स्मरमते रमते स्म वधूजन:।।(९.४७)

इति। आदिश नियुङ्क्ष्व। आदौ कोकिलानां शुचमपनीय तेष्वपि स्वकृत्ये योजितेषु त्वरितगतयस्ते जगतामपि शुचमपनयन्तीति आदौ कोकिलानाज्ञापयेत्युक्तम्। दूतकार्ये कोकिलानां सामर्थ्यं दर्शयति—मधुरालापनिसर्गपण्डितानिति। मधुरेषु मनोहरेष्वालापेषु निसर्गतः स्वभावत एव पण्डितान् विदग्धान्। अलं तव वचनप्रकारशिक्षाविषयैः प्रयासैरिति भावः। अनेन वाक्येनैत्सुक्यं प्रकाशितम्।।१६।।

शिरसा प्रणिपत्य याचिता-
न्युपगूढानि सवेपथूनि च।
सुरतानि च तानि ते रहः
स्मर! संस्मृत्य न शान्तिरस्ति मे॥१७॥

प्रकाशिका

शिरसेति। प्रथमं कुपितायाः शिरसा प्रणिपत्य याचनं, ततः प्रसन्नाया उपगूहनं, ततो रागोद्बोधे सुरतमिति क्रमेण स्मृतिः। तानीत्यनुभूतपरामर्शिना तच्छब्देनाव्यपेश्यत्वं, बहुवचनेन बहुप्रकारत्वं च द्योत्यते। शान्तिरनुत्सुकता। तस्याश्च कृदभिहितत्वेनान्याङ्गत्वात् स्मरणस्य भिन्नकर्तृकत्वभ्रमः स्यात्। संस्मृत्य न शाम्यामीत्यर्थः।।१७।।

विवरणम्

इत्थं बहुप्रकारान् प्रलापान् विधाय निजप्रलापमनर्थकमवधार्यपुनः पूर्वानुभूतानतिमधुरानवाङ्मनसगोचरान् कामानुभावानेव संस्मृत्य प्रलपति—

शिरसेति। स्मर! ते शिरसा प्रणिपत्य याचितानि सवेपथूनि उपगूढानि च रहः तानि सुरतानि च संस्मृत्य मे शान्तिः नास्ति। स्मर! हे मदन!। यस्य सान्निध्यमात्रेणापि जन्तूनां मनोविकारः सम्पद्यते, तेन स्वयमेव कृतानां सुरतादीनाम् अवाङ्मनसगोचरत्वोपपत्तिरनया सम्बुद्ध्या व्यज्यते। कुपितां मामनुनेतुं शिरसा प्रणिपत्य साष्टाङ्गं नमस्कृत्य। त्वया कृतानि यानि याचितानि याचनानि। भावे निष्ठा। प्रसीद, सदयं मामवलोकयेत्यादीनि प्रार्थनानीत्यर्थः। तथा सवेपथूनि वेपथुः सात्त्विकविकाररूपः शरीरकम्पः तेन सहितान्युपगूढानि उपगूहनानि। अत्रापि भावे प्रत्ययः। रहः रहसि तानि सुरतानि त्वयैव कृतानि तानि पूर्वानुभूतान्यनिर्देश्यानि च। बहुवचनेन कामशास्त्रप्रसिद्धानां करणभेदानामुपादानम्। चकारः समुच्चयार्थः। संस्मृत्य सम्यक् स्मृत्वा। प्रथमं कुपितां मामनुनेतुं प्रणिपत्य याचनं, तदनन्तरं प्रसन्नायां मयि सरागमालिङ्गनं, ततश्च रागस्य समुद्बोधे सति बहुविधानि सुरतानीति स्मरणक्रमोऽत्र विवक्षितः। एवमेतादृशानुभवपात्रीकृताया मम शान्तिरनुत्सुकता

नास्ति कथञ्चिदपि न भवति। अत्र शान्त्याः कृदभिहितत्वेन क्रियान्तराङ्गत्वात् स्मरणस्य भिन्नकर्तृकत्वभ्रमः। संस्मृत्य न शाम्यामीत्यर्थः। यदाह महिमा—

कर्तुरुपाधितयोक्ता कृद्वाच्यतया गतान्यगुणतां वा।
त्त्वो भिन्नकर्तृकत्वभ्रमाय भवति क्रियावचश्च तयोः।।

[व्यक्तिविवेके पृ. ३७]इति। संस्मृत्य स्थिताया ममेति वा योजना।।१७।।

रचितं रतिपण्डित! त्वया
नवमङ्गेषु ममेदमार्तवम्।
ध्रियते कुसुमप्रसाधनं
तव तच्चारु वपुर्न दृश्यते॥१८॥

प्रकाशिका

रचितमिति। आर्तवमृतुप्रभवम्। ध्रियते अवतिष्ठते। अत्र विषादः।।१८।।

विवरणम्

अथ स्वशरीरगतानि कुसुमाभरणान्यवलोक्य सविषादमाह—

रचितमिति। रतिपण्डित! त्वया मम अङ्गेषु रचितं नवम् आर्तवम् इदं कुसुमप्रसाधनं ध्रियते, तव चारु तद् वपुः न दृश्यते। हे रतिपण्डित! रतिषु सुरतेषु पण्डित! विदग्ध!। त्वत्कृतानां कर्मणां कथं विस्मरणं स्यादित्यनया सम्बुद्ध्या व्यज्यते। त्वया स्वहस्तेनैव ममाङ्गेषु रचितं न्यस्तम्। शिरोलङ्कारकर्णावतंसादितां प्रापितमित्यर्थः। नवम् अभिनवम्। अत्र कुसुमाभरणानामभिनवत्वकथनेन क्षणादेव त्वमीदृशीं दशां गतोऽसीति व्यज्यते। आर्तवम् ऋतुप्रभवं, वसन्तपुष्पाभरणमित्यर्थः। इदं दृश्यमानं कुसुमप्रसाधनं कुसुममयं प्रसाधनमलङ्कारः। ध्रियते ममाङ्गेष्वेवावतिष्ठते। ‘धृङ् अवस्थाने’ इति धातोरिदं रूपम्। चारु सुन्दरम्। तत् प्रसाधनकर्तृत्वेन मयेदानीमेवानुभूतं वपुः शरीरं न दृश्यते। हा हतास्मीति शेषः।।१८।।

विबुधैरपि यत् सुदारुणै-
रसमाप्ते परिकर्मणि स्मृतः।
तदिमं कुरु दक्षिणेतरं
चरणं निर्मितरागमेत्य मे॥१९॥

प्रकाशिका

विबुधैरिति। विबुधानां सौम्यत्वस्योचितत्वाद् अपिशब्दः। परिकर्मणि प्रसाधने। तत्तस्मात्। दक्षिणेतरमिति, तस्य स्त्रीणां सम्भोगसाधनत्वात्। यथा मेघसन्देशे—'वामश्चास्याः कररुहपदैरि'[९४]त्यादि। अत्रौत्सुक्यम्।।१९।।

विवरणम्

अथार्थरचितस्य चरणालक्तकरञ्जनपरिपूरणस्यावश्यकत्वात् त्वरिततरमागच्छेति सौत्सुक्यमाह—

विबुधैरिति। विबुधैः सुदारुणैः परिकर्मणि असमाप्ते स्मृतः यत् यत् त्वम् एत्य मे दक्षिणेतरम् इमं चरणं निर्मितरागं कुरु। विबुधैर्देवैः। विबुधानां सौम्यत्वस्यैवोचितत्वादपिशब्दो विरोधमाह। विबुधत्वे सत्यपि सुदारुणैरत्यन्त-दारुणैः। विबुधानां दारुणत्वमसाध्ये कर्मणि नियोगार्थं (स्मरणात्।) तस्यापि स्मरणस्य प्रसाधनान्तराले कृतत्वात् सुदारुणत्वम्। तथाविधैः सद्भिः। परिकर्मणि प्रसाधने असमाप्ते समाप्तिमप्रापिते सति स्मृतः चिन्तितोऽसीति यत्, तत् तस्माद्धेतोः त्वमेत्यागत्य दक्षिणेतरं वामम्। इममलक्तकशून्यत्वेन शोच्यतया दृश्यमानं चरणं पादम्। निर्मितरागं निर्मितो विहितः रागः अलक्तकरसो यस्मिंस्तथाविधम्। कुरु विधेहि। अयमभिप्रायः—स्नेहातिशयात् स्वहस्तेनैव मम चरणद्वयमलक्तकरसेन रञ्जयितुं प्रवृत्तस्त्वं दक्षिणचरणरञ्जनानन्तरमेव देवकृतात् स्मरणाद् गतोऽसीति यत्, तस्माद् द्रुततरमागत्य वामचरणमलक्तकरसेन रञ्जयेति। प्रियतमकृतस्य वामचरणस्पर्शस्य विशेषतः स्त्रीणां सुखकरत्वं प्रसिद्धम्। यथोक्तं मेघसन्देशे—'वामश्चास्याः कररुहपदैरि'[९४]त्यादि।।१९।।

अहमेत्य पतङ्गवर्त्मना
पुनरङ्काश्रयिणी भवामि ते।
चतुरैः सुरकामिनीजनैः
प्रिय! यावन्न विलोभ्यसे दिवि।।२०।।

प्रकाशिका

अथवैतत् कर्तव्यमित्याह—

अहमिति। पतङ्गवर्त्मना अग्निप्रवेशेनेत्यर्थः। भवामि, वर्तमानसामीप्ये लट्। यावन्न विलोभ्यसे वञ्च्यसे, तावदियमागतास्मीत्यर्थः। अत्र सपत्नीशङ्का। ननु दिव्यत्वाद् दिवीत्यनुपपन्नम्। मरणादृतेऽपि शक्यश्च प्राप्तुम्। न। दिव्यानामपि शरीरत्यागानन्तरं गतयो भिन्नाः। तस्मात् सालोक्यमनुमरणलभ्यमेव।।२०।।

विवरणम्

अथवा वृथा प्रलापैरलं, भर्तुरनुमरणमेव युक्तमिति सपत्नीशङ्कया सहाह—

अहमिति। प्रिय! त्वं यावद् दिवि सुरकामिनीजनैः न विलोभ्यसे, तावद् अहं पतङ्गवर्त्मना एत्य पुनः ते अङ्काश्रयिणी भवामि। हे प्रिय! त्वं यावद् दिवि स्वर्गे सुरकामिनीजनैः स्वर्गस्त्रीभिः न विलोभ्यसे यावन्नात्मवशं नीयसे, तावदहं पतङ्गवर्त्मना पतङ्गानां शलभानां वर्त्मना मार्गेण, अग्निप्रवेशेनेत्यर्थः। एत्य त्वत्समीपं प्राप्य। पुनः पुनरपि ते तव। अङ्काश्रयिणी अङ्कमुत्सङ्गमाश्रयितुं शीलमस्या इति तथा। भवामीति 'वर्तमानसामीप्ये वर्तमानवद्वे' (३.३.१३१)ति लट्। चिरपरिचये सति सुरसुन्दर्यस्त्वां वशीकरिष्यन्ति, तस्मात् पूर्वमेवाङ्काश्रयिणी भवामीत्यर्थः। नन्वस्ति किं सुरसुन्दरीणां तादृशं सामर्थ्यमित्यत्राह—चतुरैरिति। पुंसां चित्ताकर्षणविचक्षणैरित्यर्थः। नन्वत्र श्लोके दिवीति यदुक्तं तदनुपपन्नं, पूर्वमपि मदनस्य दिव्यत्वात्। नाप्यनुमरणे प्रयोजनमपि पश्यामः, आत्मनो दिव्यत्वेन मरणं विनापि स्वर्गप्राप्त्युपपत्तेः। उच्यते। दिव्यानामपि शरीरत्यागानन्तरं स्वर्ग एवावस्थानमिति नियमो नास्त्येव। तस्मात् सुरकार्यमुद्दिश्य कृतशरीरत्यागस्य स्वर्गप्राप्तिरेवोचितेति सम्भावनामात्रेणैव दिवीत्युक्तम्। नापि दिव्यानामपि भर्तृलोकप्राप्तिरनुमरणेन विना सम्भवति, स्मृतिपुराणादिषु भर्तृलोकप्राप्तेरनुमरणमात्रोपायत्वेन प्रतिपादनादित्यलमनेन।।२०।।

मदनेन विनाकृता रतिः
क्षणमात्रं किल जीवतीति मे।
वचनीयमिदं व्यवस्थितं
रमण! त्वामनुयामि यद्यपि॥२१॥

प्रकाशिका

दोषस्तु तथाकरणेऽपि नापैतीत्याह—

मदनेनेति। इतिशब्दो हेतौ, न तु वचनीयप्रकारवाची। तत्त्वे जीवेदिति स्यात्। व्यवस्थितं शिलालिखितं जातम्। अत्र लज्जा।।२१।।

विवरणम्

हन्त ममानुमरणेन भर्तृलोकप्राप्तौ सिद्धायामपि क्षणमात्रजीवननिमित्तो लोकापवाद-दोषः कदाचिदपि नापैतीति सलज्जमाह—

मदनेनेति। रमण! अहं त्वामनुयामि यद्यपि, रतिः मदनेन विनाकृता क्षणमात्रं जीवति किल इतीदं वचनीयं मे व्यवस्थितम्। रमण! हे कान्त! अहमनुमरणेन यद्यपि त्वामनुयामि सद्य एवानुगमिष्यामि। वर्तमानसामीप्ये लट्। तथापि रतिः मदनेन कामदेवेन। विनाकृतेत्येकं पदम्। विरहितेत्यर्थः। तथाभूता सती। क्षणमात्रं कञ्चित्कालमपि जीवति किल। किलशब्दः प्रसिद्धौ। इतिशब्दो हेतौ, न तु वचनीयप्रकारवाची। तथा सती जीविता किलेति प्रयोगः स्यात्। केचित्तु जीवितेत्येव पठन्ति। जीवतीत्येतस्माद्धेतोरुत्पन्नमित्यर्थः। वचनीयं लोकापवादः। मे व्यवस्थितं, शिलातललिखितं जातमित्यर्थः।।२१।।

क्रियतां कथमन्त्यमण्डनं
परलोकत्वरितस्य ते मया।
सममेव गतोऽस्यतर्कितां
गतिमङ्गेन च जीवितेन च॥२२॥

प्रकाशिका

अनुम्रियमाणापि पतिमात्मानं च मण्डयति। ततश्च यत् ते मण्डनं प्राप्तकालं, तदपि मे दुर्लभमित्याह—

क्रियतामिति। प्राप्तकाले लोट्। अशक्यत्वे हेतुमाह—सममिति। समं युगपत्। लोके हि जीवितापायेऽपि कञ्चित् कालमङ्गमवतिष्ठते, इह तु न तथेत्यर्थ। दक्षिणावर्तस्तु स्वयमेवेति पाठमादृतवान्। तन्न चतुरश्रम्। अन्त्यमण्डनस्याशक्यत्वं ह्युपपाद्यम्। तत्र च स्वयङ्गमनस्य नोपयोगः। अत्रापि विषादः।।२२।।

विवरणम्

भर्तारमनुमर्तुमुद्यता हि पतिव्रताः पतिमात्मानं च कुसुमचन्दनादिभिरलङ्कुर्वन्तीति नियमाद् यत् ते मण्डनं प्राप्तकालं, तदपि मे विधिवैपरीत्याद् दुर्लभमभूदिति सविषादमाह—

क्रियतामिति। परलोकत्वरितस्य ते अन्त्यमण्डनं मया कथं क्रियताम्। परलोकत्वरितस्य परलोकमुद्दिश्य गन्तुं त्वरितस्य, इहलोकं परित्यज्य त्वरितमेव परलोकं गतस्येत्यर्थः। ते तव। अन्त्यमण्डनं, प्रेतशरीरालङ्करणमित्यर्थः। मया कथं क्रियतां, न कथञ्चिदित्यर्थः। क्रियतामिति प्राप्तकाले लोट्। अनुमरणकाल एव हि तस्यापि काल इति भावः। अन्त्यमण्डनाशक्यत्वे हेतुमाह—त्वम् अङ्गेन च जीवितेन च सममेवातर्कितां गतिं गतः असीति। अङ्गेन शरीरेण जीवितेन च समं

सहैव अतर्कितामनिरूपितां गतिम्। प्रत्यक्षाद्यविषयां पदवीमित्यर्थः। गतः प्राप्तोऽसि। सर्वेषां हि मृतानां जन्तूनां शरीरमात्रं तत्रैव तिष्ठति। त्वं तु शरीरप्राणाभ्यां सहैव विनष्टोऽसि। ततः कथमन्त्यमण्डनावकाश इति भावः।।२२।।

ऋजुतां नयतः स्मरामि ते
शरमुत्सङ्गनिषण्णधन्वनः।
मधुना सह सस्मितां कथां
नयनोपान्तविलोकितं च तत्।।२३।।

प्रकाशिका

ऋजुतामिति। तां कथां तद्विलोकनं च स्मरामीत्यन्वयः। नयत इति हेतौ शता। तदा कथाप्यन्यैवेति भावः। दक्षिणावर्तस्तु कथामित्यत्र स्मरामीत्यनुषङ्गमाह। न तच्छ्रद्धेयम्। पूर्वमन्यान्वये सत्यनुषङ्गः। न च पूर्वं ते स्मरामीत्यन्वयः। न हि तथान्वयप्रतीतिः स्वारसिकी। विभक्तिप्रक्रमदोषश्च स्यात्। न च सुहृत्संकथा कटाक्षवीक्षणं च शरर्जुतानयनानुषङ्गिके तेन समकक्ष्यतां नेये। तयोरेव हि स्वानुभवसिद्धविविधविलासास्पदत्वेन स्मर्यमाणयोः करुणोद्दीपकत्वं विवक्षितं, तथा स्मरणं च तच्छब्देन दर्शितम्। अत्रापि स्मृतिः।।२३।।

विवरणम्

इत्थमनुमरणे कल्पितेऽपि पूर्वानुभूतानतिमनोहरान् भावविशेषान् वचनविशेषानपि संस्मृत्य प्रलपन्ती त्वरितमनुमरणमेव द्रढयति—

ऋजुतामिति। अहं शरम् ऋजुतां नयतः उत्सङ्गनिषण्णधन्वनः ते मधुना सह सस्मितां कथां तद् नयनोपान्तविलोकितं च स्मरामि। शरं बाणम् ऋजुतामार्जवम् नयतः प्रापयतः। हेतौ शता। शरर्जुतानयनाद्धेतोः उत्सङ्गनिषण्णधन्वनः उत्सङ्गे अङ्के निषण्णं स्थितं धनुर्यस्य तस्य। ते तव मधुना अत्यन्तबन्धुभूतेन मूर्तिमता वसन्तेन सह सस्मितां मन्दस्मितसहितां कथां सँल्लापम्। तत् तादृशम्। अत्र पूर्वानुभूतपरामर्शिना तच्छब्देनानिर्देश्यत्वमुक्तम्। नयनोपान्तविलोकितं नयनस्योपान्तेन नेत्रकोणेनेति यावत्। चकारः समुच्चयार्थः। स्मरामि चिन्तयामि। शरस्य वक्रतामपनेतुमङ्के चापं निधायात्यन्तसावधानत्वयोग्ये तस्मिन्नपि काले मधुना सम्भाषणं कुर्वतस्तन्मध्ये च सस्नेहं नेत्रोपान्तेन मामवलोकयतश्च तव तादृशान् भावान् कथमहं विस्मरामि। अविस्मृता च कथं न त्वरितमेवानुमरिष्यामीति भावः।।२३।।

क्व नु ते हृदयङ्गमः सखा
कुसुमायोजितकार्मुको मधुः।
न खलूग्ररुषा पिनाकिना
गमितः सोऽपि सुहृद्गतां गतिम्॥२४॥

प्रकाशिका

क्वेति। हृदयङ्गमः 'गमश्च' (३.२.४७) इति खश्। कुसुमैरायोजितं सम्पादितं कार्मुकं येन। खलुर्जिज्ञासायाम्। अत्र हेतुबलाद् गमने सम्भाव्ये तदभावसम्भावनं तद्दर्शनस्येष्टत्वात्। त्वद्गतामिति वक्तव्ये सुहृद्गतामिति वचनं सुहृद्गतां गतिमसावपि गच्छत्विति पिनाकिमननस्य हेतुतासंभावनां द्योतयितुम्। तत्र चानुकूलमुग्ररुषेति विशेषणम्। अत्र सुहृद्दर्शनौत्सुक्यं पिनाकिन्यसूया च।।२४।।

विवरणम्

अथ 'मधुना सह सस्मितां कथाम्' (कुमा.४.२३)इति प्रसङ्गागतं प्रियतमबन्धुभूतं मधुमुद्दिश्यापि प्रलपति—

क्वेति। ते हृदयङ्गमः सखा मधुः क्व नु। ते तव। हृदयङ्गमः हृदयं गच्छतीति हृदयङ्गमः। 'गमश्च' (३.२.४७) इति खच्। हृदय एव वर्तमानः, अतिप्रिय इत्यर्थः। तथाभूतः सखा मधुर्वसन्तः क्व नु। नुशब्दो वितर्के। इदानीं कुत्र वा गत इत्यर्थः। प्रियतमविरहिताहं यदि तमपि द्रक्ष्यामि, तर्हि मे दुःखं किञ्चिदपि शाम्येदित्यर्थः। न केवलं सखित्वादेव हृदयङ्गमत्वम्, अपितु उपकर्तृत्वाच्चेत्याह—कुसुमायोजितकार्मुक इति। सुकुमैः पुष्पैरायोजितं सम्पादितं कार्मुकं चापं येन स तथा। अदर्शने स्नेहादपायमेवाशङ्क्याह—सोऽपि पिनाकिना सुहृद्गतां गतिं न गमितः खलु। सोऽपि। न केवलं मत्प्रियतमः, अपितु तत्सखोऽपीत्यपिशब्दार्थः। पिनाकिना। पिनाकोऽस्यास्तीति पिनाकी। अनेन साधनसम्पत्तिरुक्ता। सुहृद्गतां सुहृदा बन्धुना गतां प्राप्ताम्। गतिं पदवीम्। न, गमितः प्रापितः। खलुशब्दो जिज्ञासायाम्। अत्र हेतुवशात् सुहृन्मार्गप्राप्तिप्रापणे सम्भाव्येऽपि तदप्रापणसम्भावनं तद्दर्शनौत्सुक्यादिति द्रष्टव्यम्। प्रकरणवशादत्र त्वद्गतां गतिमित्येव वक्तव्ये सुहृद्गतां गतिमिति वचनं पिंनाकिनस्तद्विनाशने हेतुसद्भावं प्रदर्शयितुम्। अत एवाह—उग्ररुषेति। अत्युग्रकोपेन। अत्युग्रकोपो हि रिपुजनमुन्मूल्यापि तद्बन्धूननुन्मूल्य न विरमति। अत्र पूर्वार्धेन सुहृद्दर्शनौत्सुक्यमुत्तरार्धेन पिनाकिन्यसूया च ध्वन्यते।।२४।।

अथ तैः परिदेविताक्षरै-
र्हृदये दिग्धफलैरिवार्पितः।
रतिमभ्युपपत्तुमातुरां
मधुरात्मानमदर्शयत् पुरः॥२५॥

प्रकाशिका

अथैवं कृतप्रस्तावस्य मधोर्वृत्तमाह—

अथेति। तैरिति तथाभूतैरित्यर्थः। परिदेविताक्षरैर्विलापवाक्यैरित्यर्थः। अक्षरग्रहणमर्थात् प्रागेव चित्तद्रुतिहेतुतां द्योतयितुम्। विषाक्ते दिग्धलिप्तका'विति सिंहः। अभ्यवषत्तिरनुग्रहः। स चात्राश्वासनम्। आतुराया दूरावलोकनाक्षमत्वात् पुरोदर्शनम्।।२५।।

विवरणम्

इत्थं कृतप्रस्तावस्य मधोः प्रवृत्तिं दर्शयति—

अथेति। अथ मधुः आतुरां रतिम् अभ्युपपत्तुम् आत्मानं पुरः अदर्शयत्। अथ एवम्भूतविलापान्तरं मधुर्वसन्तः आतुरां भर्तृवियोगेन दुःखितां रतिं कामवधूम् अभ्युपपत्तुमनुग्रहीतुम्। 'अभ्युपपत्तिरनुग्रहः' इत्यमरः। अनुग्रहश्चार्थादाश्वासनं विवक्षितम्। आश्वासयितुमिति यावत्। आत्मानं स्वशरीरं पुरः अग्रे एव अदर्शयद् दर्शयामास। आतुराया रतेः दूरावलोकनसामर्थ्याभावादग्र एवाविर्भावः। अभ्युपपत्तौ हेतुं प्रदर्शयति—तैः परिदेविताक्षरैः हृदयेऽर्पितः इति। तैः तथाभूतैः, अनिर्देश्यैरित्यर्थः। परिदेविताक्षरैः विलापवाक्यैः। 'विलापः परिदेवनमि'त्यमरः। भावे निष्ठा। अक्षरग्रहणेनार्थावबोधात् पूर्वमेव हृदयद्रवहेतुत्वं द्योत्यते। हृदये हृदि। अर्पितः आहत इत्यर्थः। अर्दित इति वा पाठः। परिदेविताक्षराणामसह्यत्वमुत्प्रेक्षया दर्शयति—दिग्धफलैरिवेति। दिग्धैर्विषलिप्तैः। 'विषाक्ते दिग्धलिप्तकावि'ति सिंहः। फलैः शरमुखैः। 'फलं शरमुखेऽपि चे'ति भोजः। विषाक्तैः शरमुखैरिवात्यन्तदुस्सहैरित्यर्थः। हृदयार्पितं हि शल्यमत्यन्तपीड़ाकरं भवति, तत्रापि विषाक्तमिदं हृदयं दहत्येवेति भावः।।२५।।

तमवेक्ष्य रुरोद सा भृशं
स्तनसम्बाधमुरो जघान च।
स्वजनस्य हि दुःखमग्रतो
विवृतद्वारमिवोपजायते॥२६॥

प्रकाशिका

तमिति। भृशं पूर्वस्मात्। स्तनसम्बाधमिति 'परिक्लिश्यमाने च' (३.४.५५) इति णमुल्।।२६।।

विवरणम्

वसन्तदर्शनानन्तरं रतेर्दुःखाधिक्यनाह—

तमिति। सा तमवेक्ष्य भृशं रुरोद। सा रतिः तं वसन्तम् अवेक्ष्य दृष्ट्वा। भृशमत्यन्तं, पूर्वस्मादधिकमित्यर्थः। रुरोद रोदनं चकार। दुःखाधिक्यमेव प्रकटयति—स्तनसम्बाधमुरो जघान चेति। स्तनसम्बाधमिति 'परिक्लिश्यमाने च'(३.४.५५)इति णमुल्।। स्तनौ बाधित्वेत्यर्थः। उरः वक्षःप्रदेशं जघान कराभ्यामाहतवती। स्तनयोर्बाधा यथा भवति तथा वक्षःस्थलमाजघानेत्यर्थः। उक्तमर्थमर्थान्तरन्यासेन समर्थयते—दुःखं स्वजनस्य अग्रतः विवृतद्वारमिव उपजायते हीति। दुःखं दुःखसामान्यम्। स्वजनस्य स्वस्यात्मीयस्य जनस्य, बन्धोरित्यर्थः। अग्रतः अग्रे। विवृतद्वारं विवृतं विघटितं द्वारं यस्य तत्तथा। उपजायते भवति। **सर्वं हि दुःखं बन्धुजनस्याग्रे विवृतद्वारमिव भवतीत्यर्थः**। अन्तर्भागे निरुद्धं हि वस्तु यथा द्वारे विघटिते सति निरन्तरं निर्गच्छति, तथा मनस्स्थितं दुःखमपि बन्धुजनस्याग्रे प्रलापाश्रुसन्तानादिरूपेण बहिः प्रसरत्येवेति भावः। हिशब्दः प्रसिद्धौ।।२६।।

इति चैनमुवाच दुःखिता
सुहृदं पश्य वसन्त! किं स्थितम्।
तदिदं कणशो विकीर्यते
पवनैर्भस्म कपोतकर्बुरम्।।२७।।

प्रकाशिका

इतीति। दुःखिता, दुःखोन्मादादित्यर्थः। स्थितं स्थानम्। किं तिष्ठसीत्यर्थः। पश्येत्युक्तं, स नात्र दृश्यत इत्याह—तदिदमिति। तच्छब्दः सुहृदं परामृशति, प्रतिनिर्दिश्यमानलिङ्गं च भजते। कणशः अल्पार्थे शस्। पवनैरिति बहुवचनेन स इदानीमेव सर्वः संवृत्त इति द्योत्यते। कर्बुरं शबलम्। एतद् दर्शनसौकर्यार्थम्। यावन्न निश्शेषं प्रकीर्यते, तावद् भस्मापि पश्येति भावः। अत्र दैन्यम्।।२७।।

विवरणम्

उज्जृम्भितदुःखाया रतेः प्रवृत्तिमाह—

इतीति। दुःखिता सा एनमित्युवाच च। दुःखिता सती सा रतिः एनं वसन्तम् इति वक्ष्यमाणप्रकारेण उवाच उक्तवती च। दुःखोन्मादवशादित्थमुवाच चेत्यर्थः। वचनप्रकारानेवाह—सुहृदमित्यादिना। वसन्त! त्वं सुहृदं पश्य। हे वसन्त! त्वं सुहृदं बन्धुभूतं पश्य। सुहृद्दर्शनं त्वरितमेव कर्तव्यम्। नायं कालक्षेपस्यावसर इत्याह—स्थितं किमिति। स्थितमवस्थानम्। भावे निष्ठा। किं किमर्थमवस्थानेन कालविलम्बनं करोषीत्यर्थः। कालक्षेपं मा कुर्वित्यभिप्रायः। स्थित इति पाठे किमर्थं तूष्णीं स्थितो भवसीत्यर्थः। ननु मे सखा न तु दृश्यते। अतः कथं पश्येत्युक्तमित्यत्राह—तदिदं भस्म पवनैः कणशः प्रकीर्यते इति। अत्र तदिति तच्छब्देन प्रतिनिर्दिश्यमानलिङ्गः सुहृत् परामृश्यते। 'शैत्यं हि यत् सा प्रकृतिर्जलस्ये'[रघु.५.५४]त्यादिवत्। इदं दृश्यमानं भस्म पवनैर्वायुभिः। अत्र बहुवचनेन भस्मनोऽप्यत्यन्तविनाशकालः प्राप्त इति द्योत्यते। कणशः अल्पार्थे शस्। 'लवलेशकणाणव' इति सिंहः। प्रकीर्यते इतस्ततः प्रक्षिप्यते। तव सुहृदयं भस्मभावमुपगतो वायुभिः परमाणुतां नीत्वा परितो विकीर्यते। तदपि क्षणमात्रं पश्येत्यर्थः। इदानीं तु दर्शनं सुकरमेवेत्याह—कपोतकर्बुरमिति। कपोतवत् कर्बुरं शबलम्। 'चित्रकिर्मीरकल्माषशबलैताश्च कर्बुर' इत्यमरः। कपोतवन्नानावर्णमित्यर्थः। अनेन श्लोकेन दैन्यं प्रकाशितम्।।२७।।

अयि सम्प्रति देहि दर्शनं
स्मर! पर्युत्सुक एष माधवः।
दयितास्वनवस्थितं नृणां
न खलु प्रेम चलं सुहृज्जने॥२८॥

प्रकाशिका

अयीति। सम्प्रति को विशेष इत्याह—पर्युत्सुक इति। पूर्वमपि त्वं पर्युत्सुकेत्याह—दयितास्विति। तस्मान्मय्यनपेक्षा सम्भवति, न त्वस्मिन् सुहृदीति वाक्यशेषः। अत्रापीर्ष्यौत्सुक्ये।।२८।।

विवरणम्

अस्तु ते मत्प्रलापेऽनादरः, वसन्ताय तु दर्शनं देयमेवेत्यौत्सुक्यदैन्याभ्यां सह रमणं प्रत्याह—

अयीति। अयि स्मर! सम्प्रति दर्शनं देहि। अयि स्मर! हे मदन! सम्प्रति इदानीम्। दर्शनं देहि, त्वरितमागच्छेत्यर्थः। ननु सम्प्रति को विशेषः। अत आह—

एष माधवः पर्युत्सुक इति। एषः दृश्यमानः माधवः वसन्तः। पर्युत्सुकः, त्वद्दर्शनसाभिलाष इत्यर्थः। भवतीति शेषः। यस्मादेष माधवस्त्वद्दर्शनलालसो वर्तते, तस्माद् दर्शनं देहीत्यर्थः। ननु पूर्वमेव त्वं पर्युत्सुकैव। माधवे को विशेष इत्यत्राह—नृणां दयितासु प्रेम अनवस्थितं, सुहृज्जने चलं न खल्विति। नृणां पुरुषाणां दयितासु कान्तासु प्रेम स्नेहः अनवस्थितम् अस्थिरम्। सुहृज्जने बन्धुजने। प्रेमशब्दोऽत्राप्यनुषज्यते। चलं चञ्चलम् न खलु, स्थिरमेवेत्यर्थः। यस्मात् पुम्भिः स्त्रीषु कृता मैत्री चञ्चला, बन्धुजनेषु कृता मैत्री तु स्थिरैव, तस्मान्मय्युपेक्षा सम्भवेदपि, न त्वस्मिन् सुहृदीति भावः।।२८।।

अमुना ननु पार्श्ववर्तिना
जगदाज्ञां ससुरासुरं तव।
बिसतन्तुगुणस्य कारितं
धनुषः पेलवपुष्पपत्रिणः।।२९।।

प्रकाशिका

सुहृत्त्वेऽपि विशेषमाह—

अमुनेति। ननुरवधारणे। पार्श्ववर्तिना सचिवेन सतेत्यर्थः। तव धनुष आज्ञां कारितमित्यर्थः। 'हृक्रोरन्यतरस्याम्' (१.४.५३) इति जगतः कर्मसंज्ञा। विशेषणाभ्यां धनुषो दौर्बल्यमुक्तम्।।२९।।

विवरणम्

नन्वन्येऽपि चन्द्रादयः सुहृदो मम सन्त्येव। अस्मिन् वसन्ते को विशेष इत्याशङ्क्याह—

अमुनेति। पार्श्ववर्तिना अमुना ननु ससुरासुरं जगत् तव धनुषः आज्ञां कारितन्ननु। पार्श्ववर्तिना। पार्श्वे वर्तितुं शीलमस्येति तथा। सचिवपदवीमनुवर्तमानेनेत्यर्थः। अमुना वसन्तेन। ननुशब्दोऽवधारणे। ससुरासुरं सुरैरसुरैश्च सह वर्तमानम्। क्षुद्रत्वादितरेषामनुपादानम्। त्वदीयचापाज्ञानुष्ठाने सुरेष्वसुरेषु वा मनुजेषु तिर्यग्योनिषु वा न कश्चिद् विशेष इति भावः। जगद् जगद्वासिनो जनाः। 'हृक्रोरन्यतरस्याम्' (१.४.५३) इति जगतः कर्मसंज्ञा। तव धनुषः पुष्पमयत्वादतिमृदुनोऽपीति भावः। आज्ञां नियोगं कारितमनुष्ठापितम्। ससुरासुरः सकलोऽपि लोकः पुष्पमयत्वादतिपेलवस्यापि तव धनुषो निदेशवर्ती जात इति

यत्, तदस्यैव मधोः साचिव्यबलादित्यर्थः। न केवलं तव धनुषो दौर्बल्यम्, अपितु मौर्व्या अपीत्याह—बिसतन्तुगुणस्येति। बिसस्य मृणालस्य तन्तुरेव गुणो मौर्वी यस्य तस्यापीत्यर्थः। अलीनामिव बिसतन्तूनामपि गुणत्वप्रसिद्धेरेवमुक्तम्। शराणामपि दौर्बल्यमाह—पेलवपुष्पपत्रिण इति। पेलवानि पुष्पाण्येव पत्रिणः शरा यस्य तादृशस्यापि ते धनुषो निदेशवर्ती ससुरासुरो लोकः, न तु तेषु यः कश्चिदिति यत्, तस्यैत्साचिव्यमात्रहेतुत्वादवश्यमस्मै दर्शनं दातव्यमेवेति भावः।।२९।।

गत एव न ते निवर्तते
स सखा दीप इवानिलाहतः।
अहमस्य दशेव पश्य मा-
मविषह्यव्यसनप्रधूपिताम्॥३०॥

प्रकाशिका

अथादर्शननिर्वेदादाह—

गत इति। दशा वर्तिः। किं दशासादृश्यमित्याह—पश्येति। दशापक्षे असह्यविक्षेपेण प्रधूपिताम्। अन्यत्र प्रधूपनमनौज्ज्वल्यम्। अत्रात्मनिर्वेदः।।३०।।

विवरणम्

इत्थमभिहितेऽप्यकृतनिवर्तने निजरमणे स्वात्मन्यवज्ञां प्रतिहर्शयन्ती वसन्तं प्रत्याह—

गत इति। ते सखा सः गत एव। ते तव सखा सः कामदेवः गत एव। आत्यन्तिकादर्शनं प्राप्त एवेत्यर्थः। कुत एतदवगतमित्यत्राह—न निवर्तते इति। यस्मादेवंविधे बन्धुजने दर्शनोत्सुके सत्यपि न निवर्तते, तस्मादित्यर्थः। अत्रोपमामाह—अनिलाहतः दीपः इवेति। अनिलेन वायुना आहतः अभिहतः दीपः प्रदीप इव। यथानिलाहतो दीपः पुनर्न निवर्तते, तथायमपीत्यर्थः। आत्मानमप्युममिनोति—अहमस्य दशा इवेति। अहमस्य कामदेवदीपस्य दशा वर्तिरिव। भवामीति शेषः। न ह्यनिलाहते दीपे वर्तिरपि तेन सह गच्छति। आत्मनो दशासाम्यमपि प्रकटयति—अविषह्यव्यसनप्रधूपितां मां पश्येति। अविषह्येणासह्येण व्यसनेन दुःखेन प्रधूपितां प्रकर्षेण धूपितामनुज्ज्वलाम् अन्तर्ज्वलच्छोकाग्निधूमयुक्तामिति वा। दशापक्षे तु अविषह्येणानिलकृतेन व्यसनेन विक्षेपेण प्रधूपितामित्यर्थः। तादृशीं मां पश्य अवलोकय।।३०।।

विधिना कृतमर्धवैशसं
ननु मां कामवधे विमुञ्चता।
अनपायिनि संश्रयद्रुमे
गजभग्ने पतनाय वल्लरी।।३१।।

प्रकाशिका

तेन सहैव किं न गतासीत्याह—

विधिनेति। 'शसु हिंसायामि'ति धातोः पचाद्यच्। विशसो हिंसकः। तस्य कृत्यं वैशसम्। विमुञ्चतेति हेतौ शता। समग्रवैशसं लाभ एवेति भावः। आत्मावशेषादुपकारिणि विधौ किमसूयेत्याह—अनपायिनीति। कदाचिदप्यविरहिणि। पतनाय। 'तुमर्थाच्च भाववचनात्'(२.३.१५) इति चतुर्थी। खलो विधिः किमेतदपि न जानातीति भावः। अत्र विधिं प्रत्यसूया।।३१।।

विवरणम्

ननु किमर्थं तर्हि परलोकगतेन प्रियतमेन सह तदानीमेव न गतासीत्यत्राह—

विधिनेति। कामवधे मां विमुञ्चता विधिना अर्थवैशसं कृतं ननु। कामवधे कामस्य कामदेवस्य वधे दहने क्रियमाणे सति। मां विमुञ्चता वधाद् विसृजता। हेतौ शता। विधिना दैवेन। अर्धवैशसमर्धहिंसा। 'शसु हिंसायामि'त्यस्माद्धातोः पचाद्यचि कृते विशस इति पदं सिध्यति। विशसो हिंसकः। 'नृशंसो विशसः क्रूर' इति **भोजः**। विशस्य कर्म वैशसं हिंसा। ननुरवधारणे। कामवधे मम विमोचनाद्धेतोर्दैवेनार्धहिंसा कृतैवेत्यर्थः। पुरुषस्यार्धं हि पत्नी। न चार्धहतदेहेन किञ्चिदपि प्रयोजनमस्ति। तस्मात् समस्तहिंसैव वरीयसीति भावः। नन्वात्मरक्षणादुपकार एव विधिना कृतः। ततः कथमर्धवैशसं कृतमित्युक्तम्। तत्राह— अनपायिनि संश्रयद्रुमे गजभग्ने वल्लरी पतनायेति। अनपायिनि कदाचिदप्यविरहिणि संश्रयद्रुमे आश्रयभूते द्रुमे। उपघ्नतरावित्यर्थः। गजमग्ने गजेन भग्ने भङ्गं प्रापिते सति। वल्लरी लता। पतनाय। 'तुमर्थाच्च भाववचनात्'(२.३.१५) इति चतुर्थी। पतनं कर्तुमेव समर्था भवतीत्यर्थः। न ह्याश्रयद्रुमे भग्ने सति लतया किञ्चिदपि प्रयोजनमस्ति। तस्मात् तद्वन्मां कामवधे विमुञ्चता विधिना अर्धवैशसमेव कृतमिति भावः। अत्र विधिं प्रत्यसूया प्रकाशिता।।३१।।

तदिदं क्रियतामनन्तरं
भवता बन्धुजनप्रयोजनम्।
विधुरां ज्वलनातिसर्जना-
दनु मां प्रापय पत्युरन्तिकम्॥३२॥

प्रकाशिका

इतः मरं मरणव्यवसायगर्भा उक्तयः—

तदिति। तत् तस्माद्, यस्मादर्धवैशसं दुस्सहतरम्। अनन्तरमवसरप्राप्तम्। विधुरामित्यनुकम्प्यत्वे हेतुः। अतिसर्गो दानम्। अनुपश्चात्। प्रियवियोगविधुराणां सुहृद्वधूनां तत्सकाशप्रापणं हि सुहृदामुचितमिति भावः।।३२।।

विवरणम्

अथानुमरणमेव निश्चित्य तदुपकरणसम्पादनाद्यर्थं माधवं प्रत्याह तदित्यादिभिः सप्तभिः श्लोकैः। तत्र सङ्क्षेपोक्तिरनेन श्लोकेन क्रियते—

तदिति। तद् भवता अनन्तरं बन्धुजनप्रयोजनमिदं क्रियताम्। तद् यस्मादर्धवैशसमसह्यतरं तस्मादित्यर्थः। भवता प्रियतमसहायत्वान्मम बन्धुभूतेन त्वया। अनन्तरमविलम्बितमेव। अनेनावसरप्राप्तिरुक्ता। बन्धुजनप्रयोजनं बन्धुभूतजनस्य मम प्रयोजनभूतम् इदं वक्ष्यमाणं क्रियतामनुष्ठीयताम्। इदंशब्दनिर्दिष्टमेवार्थं सङ्क्षिप्य दर्शयति—त्वं विधुरां मां ज्वलनातिसर्जनात् पत्युरन्तिकमनु प्रापयेति। बिधुरां भर्तृवियोगदुःखिताम्। इदमनुकम्प्यत्वे हेतुः। ज्वलनातिसर्जनाद् ज्वलनेऽग्नौ यदतिसर्जनं दानं तस्माद्धेतोः। 'विश्राणनं वितरणं दानं स्यादतिसर्जनमि'ति भोजः। पत्युः भर्तृः अन्तिकं समीपम् अनु पश्चात् प्रापय नय। विधिवैपरीत्यात् सहगमनाभावेऽप्यग्निप्रवेशोपकरणं सम्पाद्य पश्चादपि भर्तुरन्तिकं मां प्रापय। प्रियवियोगविधुराणां सुहृद्वधूनां प्रियतमसकाशप्रापणमेव हि सुहृदामुचितमिति भावः।।३२।।

शशिना सह याति कौमुदी
सह मेघेन तडित् प्रलीयते।
प्रमदाः पतिवर्त्मगा इति
प्रतिपन्नं हि विचेतनैरपि॥३३॥

प्रकाशिका

एतदेव ममाप्युचितमित्याह—

शशिनेति। विचेतनैः करणशून्यैः। शशिप्रभृत्यचेतनवृत्तान्तेनाप्येतत् प्रत्येतुं शक्यमित्यर्थः। **दक्षिणावर्तस्तु**—पृथग्जनैरिति पाठमादृतवान्।।३३।।

विवरणम्

प्रमदाः पतिवर्त्मगाः इति विचेतनैरपि प्रतिपन्नं हि। प्रमदाः स्त्रियः। पतिवर्त्मगाः पत्युर्भर्तुर्वर्त्म मार्गं गच्छन्तीति यथा। इतिशब्दः प्रकारवाची। अयं प्रकारो विचेतनैः विगता चेतना ज्ञानं येभ्यस्तैरपि। 'प्रतिपज्ज्ञप्तिचेतना' इत्यमरः। सचेतनेषु का कथा इत्यपिशब्दार्थः। प्रतिपन्नमङ्गीकृतम्। विचेतनानामपि भर्तृमार्गप्राप्तिमेव दर्शयति—शशिनेत्यादिना। कौमुदी शशिना सह याति। कौमुदी चन्द्रिका। 'चन्द्रिका कौमुदी ज्योत्स्ना' इत्यमरः। शशिना चन्द्रेण सह याति गच्छति। नहि चन्द्रे गते चन्द्रिका क्षणमात्रमपि तत्र तिष्ठति, किन्तु चन्द्रगतं लोकान्तरमेव गच्छतीत्यर्थः। अनेन गते सत्यनुगमनमुक्तम्। मृते सत्यनुमरणं चाह—तडिन्मेघेन सह प्रलीयते इति। तडिद् विद्युत्। 'तडित् सौदामनी विद्युदि'त्यमरः। मेघेन सहैव प्रलीयते प्रकर्षेण लीना भवति। मेघे विनष्टे तडिदपि विनश्यत्येवेत्यर्थः। इत्थमचेतनैश्चन्द्रिकादिभिरपि प्रतिपन्नं भर्तृलोकगमनं कथं सचेतनाहं न करिष्यामीत्यर्थः।।३३।।

अमुनैव कषायितस्तनी
सुभगेन प्रियगात्रभस्मना।
नवपल्लवसंस्तरे यथा
रचयिष्यामि तनुं विभावसौ।।३४।।

प्रकाशिका

इदानीमेव चेदपरो लाभ इत्याह—

अमुनेति। एवशब्दो मण्डनान्तरापेक्षाव्यवच्छेदकः। कषायितो भावितः। 'कषायस्तुवर'इत्युपक्रम्य 'भावनायां चे'ति केशवः। रचयिष्यामि निधास्यामि। अत्र नवपल्लवसंस्तरोपमानेन विभावसोः परमप्रीतिविषयत्वं ध्वन्यते।।३४।।

विवरणम्

तस्मादवश्यकर्तव्यः शरीरत्यागो यदीदानीमेव क्रियते, तर्हि न मे भर्तृलोकप्राप्तिरेव लाभः, अपितु लाभान्तरमप्यस्तीत्याह—

अमुनेति। अहममुना प्रियगात्रभस्मनैव कषायितस्तनी विभावसौ तनुं रचयिष्यामि। अमुना पुरोवर्तिना। वायुभिर्नीयमानतया दृश्यमानेनेत्यर्थः। अनेनास्य कालान्तरानवस्थानमिदानीमादानसौकर्यं च द्योत्यते। प्रियस्य गात्रं प्रियगात्रं, तस्य भस्म प्रियगात्रभस्म, तेन। एवशब्दो मण्डनान्तरान्वेपणं परिहरति। कषायितस्तनी। कषायितौ भावितौ, अनुलिप्तावित्यर्थः, स्तनौ यथा तथाभूता सती। 'निर्यासे भावनायां च कषायस्तुवरे रसे' इति भोजः। अत्र प्रियगात्रभस्मनैवानुलिप्तस्तनीत्यनेन प्रियालिङ्गनप्रतिविधिर्दर्शितः। प्रियमालिङ्ग्य हि चितायां शयितव्यम्। विभावसौ वह्नौ। 'सूर्यवह्नी विभावसू' इत्यमरः। तनुं शरीरं रचमिष्यामि निधास्यामीत्यर्थः। अत्रोपमामाह—नवपल्लवसंस्तरे यथा इति। नवपल्लवसंस्तरे नवैः पल्लवैः कृते संस्तरे शय्यायाम्। यथाशब्दोऽयमुपमाद्योतकः। अग्निपल्लवयोरारुण्यमुपमाहेतुः। अनेनोपमानेनात्रापि प्राचीनसम्भोगसौख्यं द्योत्यते। विभावसोः परमप्रीतिविषयत्वं च ध्वन्यते। अत्र पल्लवानां नवत्वविशेषणेनात्यन्तसौकुमार्यमुक्तम्। प्रियगात्रभस्मनो मण्डनान्तरेभ्यो व्यतिरेकं दर्शयति—सुभगेनेति। सुभगत्वं मनोहरत्वं, तच्च प्रियगात्रकार्यत्वात्।।३४।।

कुसुमास्तरणे सहायतां
बहुशः सौम्य! गतस्त्वमावयोः।
कुरु सम्प्रति तावदाशु मे
विनिपाताञ्जलियाचितां चिताम्।।३५।।

प्रकाशिका

कथमेतन्नृशंसं कुर्यामित्याह—

कुसुमेति। तावच्छब्दः क्रमद्योतकः। क्रमश्चावसरः। इदमिदानीं प्राप्तावसरमित्यर्थः। विनिपाताञ्जलिरन्त्याञ्जलिरित्यर्थः। तेन याचनस्याप्रत्याख्येयत्वमुक्तम्। सम्पदि सहायेन विपद्यपि तथा भाव्यमित्यर्थः।।३५।।

विवरणम्

नन्वस्तु मृतभर्तृकाणां वधूनां भर्तृसमीपप्रस्थानोपकरणविधानमेव सर्वत्र बन्धुजनप्रयोजनं, तथाप्यहं कथमेतादृशं नृशंसं कर्म कुर्यामित्यत्राह—

कुसुमेति। सौम्य! त्वं कुसुमास्तरणे आवयोः बहुशः सहायतां गतः। हे सौम्य! प्रियदर्शन!। 'रुचिरः सुभगः सौम्य' इति भोजः। कुसुममये आस्तरणे

शय्यायाम् आवयोः भर्तुर्मम च बहुशोऽनेकशः सहायतां सहायत्वं गतः प्राप्तोऽसि। सुरतोपकरणभूतानामुद्दीपनानां विधानादिति शेषः। अनेन वाक्येन वसन्तस्य सम्पदि सहायत्वमुक्तम्। अत एव विपद्यपि सहायेन भवितव्यमित्याह—त्वं सम्प्रति तावन्मे विनिपाताञ्जलियाचितां चितामाशु कुरु। सम्प्रति इदानीम्, आपत्समयेऽपि। तावच्छब्दः क्रमार्थः। क्रमश्चात्रावसरप्राप्तिः। अवसरप्राप्तमिदं कुर्या इत्यर्थः। मे मम। विनिपाताञ्जलियाचिताम्। विनिपातो मरणं तत्समये कृतोऽञ्जलिर्विनिपाताञ्जलिः। अन्त्याञ्जलिरित्यर्थः। तेन याचिताम्। अनेन याचनस्याप्रत्याख्येयत्वमुक्तम्। चितां, 'देहदाहाय काष्ठानां सञ्चयः साग्निकश्चिता'। तां कुरु विधेहि। यस्त्वमावयोः सुरतावसरे तदुपकरणविधानेन सहायता-मुपगतोऽभूः, तेन त्वया मरणावसरे तदुपकरणविधानेनापि सहायकेन भवितव्यमेव। यतः सम्पन्मात्रसहायत्वं खलस्वभाव इति भावः।।३५।।

तदनु ज्वलनं मदर्पितं
त्वरयेर्दक्षिणवातवीजनैः।
विदितं खलु ते यथा स्मरः
क्षणमप्युत्सहते न मद् विना॥३६॥

प्रकाशिका

अन्यदपीत्याह—

तदन्विति। त्वरणे हेतुमाह—विदितमिति। खलुरनुनये। उत्सहते व्याप्रियते, शयनासनादिष्विति शेषः। मदिति पञ्चमी।।३६।।

विवरणम्

अन्यच्च किञ्चित् कर्तव्यमस्तीत्याह—

तदन्विति। तदनु त्वं मदर्पितं ज्वलनं दक्षिणवातवीजनैः ज्वलयेः। तदनु चिताविधानानन्तरम्। मदर्पितं मय्यर्पितं न्यस्तम्। अर्पणेऽपि स्वस्यैव कर्तृत्वम्। 'स्वयमेवार्पयेदग्निमि'ति वचनात्। ज्वलनमग्निम्। दक्षिणवातवीजनैः दक्षिणस्य मलयाचलोद्भूतस्य वातस्यानिलस्य वीजनैः सञ्चारणैः। ज्वलयेः ज्वलितं विधेहि। त्वरयेरिति पाठे ज्वलनं कृतत्वरं विधेहीत्यर्थः। नन्वग्निः शुष्केन्धनसंयोगे सति क्रमेण स्वयमेव ज्वलिष्यति। किमिति त्वरयेत्यत्राह—स्मरः मां विना यथा क्षणमपि नोत्सहते, तथा ते विदितं खल्विति। स्मरो मदनो मां विना मया विना।

'पृथग्विनानानाभि—'(२.३.३२)इति योगविभागाद् द्वितीया। मद्विनेत्येव वा पाठः। 'पृथग्विने'त्यादिना पञ्चमी। मया विना यथा क्षणमात्रमपि नोत्सहते शयनासनादिषु न व्याप्रियते, तथा ते त्वया। विदितमिति वर्तमाने क्तः। 'क्तस्य च वर्तमाने'(२.३.६७) इति षष्ठी। खलुशब्दोऽनुनये। 'निषेधवाक्यालङ्कार-जिज्ञासानुनये खल्वि'त्यमरः।।३६।।

इति चापि विधाय दीयतां
सलिलस्याञ्जलिरेक एव नौ।
अविभज्य परत्र यन्मया
सहितः पास्यति ते स बान्धवः।।३७।।

प्रकाशिका

यच्च तेऽवश्यकर्तव्यं जलाञ्जलिदानं, तदप्येतत् कृत्वैव कर्तव्यमित्याह—

इतीति। चापिः समुच्चये। इति चापि विधाय एवं च कृत्वा। अञ्जलिदाने विशेषमाह—एक एवेति। नावावयोः। अत्र हेतुमाह—अविभज्येति। अत्रानुमरणात् सहभावः। एकस्यैव दानादविभाग इत्युभयमप्यभिमतं कामस्य यस्मादित्यर्थः।।३७।।

विवरणम्

तवावश्यकर्तव्यं जलाञ्जलिदानमपि मदुक्तमेतत् सर्वं कृत्वैव कर्तव्यमित्याह—

इति चेति। इति चापि विधाय सलिलस्य अञ्जलिः नौ एक एव दीयताम्। इतिशब्दः पूर्वोक्तप्रकारवाची। चापिशब्दाभ्यां पूर्वोक्तसकलकर्तव्यसमुच्चयः क्रियते। पूर्वोक्तक्रमेण सर्वमपि विधायेत्यर्थः। सलिलस्याञ्जलिः प्रेततर्पणजलाञ्जलिः। नौ आवाभ्याम्। अस्मिञ्जलाञ्जलिदाने विशेषमाह—एक एवेति। नान्येषामिव पृथग् दातव्यमित्यर्थ। दीयतामिति कर्मणि लोट्। आवयोरेकजलाञ्जलिदाने हेतुमाह—ते स बान्धवः परत्र मया सहितः अविभज्य पास्यति यत्। ते तव सः परलोकप्राप्तेरपरोक्षः बान्धवो बन्धुः। स्वार्थेऽण्प्रत्ययः। परत्र परलोके मया सहितः। अत्रानुमरणं सहभावे हेतुः। अविभज्य विभागमकृत्वा। जलाञ्जलेरेकत्वादविभागः। पास्यति पानं करिष्यति। यस्मात् तव बन्धोरविभज्यमानं सहैव पानं चाभिमतं, यस्माच्च तत्रानुमरणमेकजलाञ्जलिदानमेव चोपायः, तस्मादनुमरणोपायकरणमेकजलाञ्जलिदानं चावश्यं कर्तव्यमेवेति भावः।।३७।।

परलोकविधौ च माधव!
स्मरमुद्दिश्य विलोलपल्लवाः।
निवपेः सहकारमञ्जरीः
प्रियचूतप्रसवो हि ते सखा॥३८॥

प्रकाशिका

अन्यच्चेत्याह—

परलोकेति। परलोकविधौ प्रेतकृत्य इत्यर्थः।।३८।।

विवरणम्

प्रेतकार्ये विशेषान्तरमप्याह—

परलोकेति। माधव! परलोकविधौ स्मरमुद्दिश्य सहकारमञ्जरीः निवपेः च। माधव! हे वसन्त! परलोकविधौ परलोके विधिः परलोकविधिः तस्मिन्। प्रेतकृत्य इत्यर्थः। स्मरमुद्दिश्य कामदेवोद्देशेन। सहकारमञ्जरीः सहकारस्य चूतस्य मञ्जरीः स्तबकान्। निवपेः। 'पितृदानं निवापः स्यादि'त्यमरः। निवापाञ्जलौ कुसुमस्थाने दद्या इत्यर्थः। न केवलं कुसुममात्रम्, अपितु पल्लवांश्चेत्याह—विलोलपल्लवा इति। विलोलाश्चञ्चलाः पल्लवा यासु ताः। प्रेतकार्ये सहकारप्राधान्ये हेतुमाह—ते सखा प्रियचूतप्रसवो हीति। ते सखा कामदेवः। प्रिया इष्टाः चूतस्य सहकारस्य प्रसवाः पुष्पाणि यस्य स तथा। हि शब्दो यस्मादर्थे। पूर्वं यत् प्रियं, तदेव हि परत्र देयमिति भावः।।३८।।

इति देहविमुक्तये स्थिरां
रतिमाकाशभवा सरस्वती।
शफरीं ह्रदशोषविह्वलां
प्रथमा वृष्टिरिवान्वकम्पत॥३९॥

प्रकाशिका

अथ मरणव्यवसायनिवृत्तेर्वक्ष्यमाणाया हेतुमवतारयति—

इतीति। स्थिरां व्यवसिताम्। प्रथमेति, द्वितीयादीनां प्राणप्रदत्वसाम्याभावात्। अन्वकम्पत् अकृपायत्।।३९।।

विवरणम्

इत्थं विलप्य स्थिरमरणव्यवसायायां मदनप्रियतमायां तद्व्यवसायनिराकरणकारणभूतं किमप्यद्भुतमुद्भूतमित्याह—

इतीति। इति देहविमुक्तये स्थिरां रतिम् आकाशभवा सरस्वती अन्वकम्पत। इति उक्तेन प्रकारेण। देहविमुक्तये देहस्य शरीरस्य विमुक्तये परित्यागाय। स्थिरां कृतनिश्चयाम्। रतिं कामवधूम्। आकाशभवा आकाशाद्भव उद्भवो यस्यास्तादृशी। सरस्वती वाणी। 'गीर्वाग्वाणी सरस्वती'त्यमरः। अन्वकम्पत अनुकम्पां कृतवती। अनुगृहीतवतीत्यर्थः। अत्राकाशभवेत्यनेन दिव्यत्वमुक्तम्। तस्य च रतेः सत्यत्वप्रतीतिः फलम्। वृष्टिसाम्यं चानेन प्रतिपादितं, वृष्टेरप्याकाशभवत्वात्। अत्रोपमां दर्शयति—ह्रदशोषविह्वलां शफरीं प्रथमा वृष्टिरिवेति। ह्रदशोषविह्वलां ह्रदस्य जलाशयस्य शोषेण ग्रीष्मकृतेन शोषणेन विह्वलां परवशाम्। शफरीं मत्स्यविशेषस्त्रियम्। प्रथमा ग्रीष्मावसानसमुद्भवा। द्वितीयादीनां प्राणप्रदत्वसाम्याभावात् प्रथमशब्दोपादानम्। उपमेये तु माधववचनापेक्षया प्रथमपदम्। यथा प्रथमा वृष्टिराकाशदेशादतर्कितापाता सती ह्रदविनाशविधुरां शफरीमनुगृह्णाति, तथा भर्तृविनाशविधुरां रतिं सरस्वती चानुगृहीतवतीत्यर्थः।।३९।।

कुसुमायुधपत्नि! दुर्लभ-
स्तव भर्ता न चिराद् भविष्यति।
शृणु येन स कर्मणा गतः
शलभत्वं हरलोचनार्चिषि।।४०।।

प्रकाशिका

सरस्वतीप्रकारमाह—

कुसुमेति। दुर्लभो न भविष्यतीत्यन्वयः। कदा न भविष्यतीत्याह—चिरादिति। दवीयसि काल इत्यर्थः। नचिरादित्येकपदत्वे विवक्षिते विरुद्धार्थप्रतीतिः। कथमेतत् प्रत्येमीत्याह—शृण्विति।।४०।।

विवरणम्

तस्याः सरस्वत्याः प्रकारमेवाह—

कुसुमायुधेति। कुसुमायुधपत्नि! तव भर्ता चिराद् दुर्लभः न भविष्यति। कुसुमायुधपत्नि! कुसुममायुधं यस्य तस्य पत्नी कुसुमायुधपत्नी, तस्याः सम्बुद्धिः

कुसुमायुधपत्नीति। तव अनुमरणोद्यतायास्ते। भर्ता कान्तः। चिरात् केषुचित् कालेष्वतीतेष्वित्यर्थः। दुर्लभः दुःखेन लभ्यो न भविष्यति। सुलभ एव भविष्यतीत्यर्थः। ननु भविष्यतीत्युक्तिमात्रेण को निश्चय इत्याशङ्क्य नाशहेतुमुत्पत्तिहेतुं च प्रतिपादयितुकामो नाशहेतुमादाववतारयति—शृण्वित्यादिना। सः येन कर्मणा परलोचनार्चिषि शलभत्वं गतः तत् शृणु। स कामः। येन कर्मणा यादृशेन कर्मणा। हरलोचनार्चिषि। हरस्य लोचनं हरलोचनं, हरलोचने विद्यमानमर्चिः हरलोचनार्चिः। अर्चिस्तेजः। हरलोचनाग्नावित्यर्थः। शलभत्वं पतङ्गभावम्। गतः प्राप्तः तत् कर्म शृणु। यस्य कर्मणः परिपाकवशान्मदनो भस्मसाद्भूतः तत् कर्माकर्णयेत्यर्थः।।४०।।

अभिलाषमुदिरितेन्द्रियः
स्वसुतायामकरोत् प्रजापतिः।
अथ तेन निगृह्य विक्रिया-
मभिशप्तः फलमेतदन्वभूत्।।४१।।

प्रकाशिका

तत् कर्माह—

अभिलाषमिति। उदीरितेति णिचा कामस्य प्रयोजकत्वमुक्तम्। तस्य कर्मणः कथमीदृशफलप्रसावकत्वं जातमित्याह—अथेति। विक्रियां निगृह्येति, तदनिग्रहे शापानुपपत्तेः। एतदिति हरलोचनार्चिषि शलभत्वम्।।४१।।

विवरणम्

तदेव कर्माह—

अभिलाषमिति। प्रजापतिः स्वसुतायाम् अभिलाषम् अकरोत्। प्रजापतिर्ब्रह्मा। स्वसुतायां स्वस्य सुतायां सरस्वत्याम्। अभिलाषमुपभोगेच्छाम् अकरोत् कृतवान्। ब्रह्मा सृष्टिसमये सरस्वतीं निर्माय तद्रूपलावण्यदर्शनमोहितस्तदुपभोगाकाङ्क्षां व्यधादित्यर्थः। नन्वत्र कामस्य कोऽपराध इत्यत्राह—उदीरितेन्द्रिय इति। उदीरितानि सङ्क्षोभितानीन्द्रियाणि यस्य स तथा। अत्रोदीरितेति। णिचा कामस्य प्रयोजकत्वमव्यभिचारादर्थत एवायातीति शब्दतः प्रयोगाभावः। नहि कामेन विना कश्चिदपीन्द्रियसङ्क्षोभकृद् भवति। अयमेव कामस्यापराध इति भावः। ननु तादृशं कर्म कथमीदृशं फलमजनयदित्यत आह—अथ तेन विक्रियां निगृह्य अभिशप्त एतत् फलमन्वभूदिति। अथ इन्द्रियक्षोभानन्तरं तेन प्रजापतिना विक्रियात

इन्द्रियविकारं निगृह्य परिहृत्य। इन्द्रियक्षोभसमये शापानुपपत्तेस्तन्निग्रहकथनम्। अभिशप्तः हरकोपाग्निस्त्वां दहत्विति शप्त इत्यर्थः। तथाभूतः सन् एतद् हरकोपानलदाहरूपमिदं फलम् अन्वभूदनुभूतवान्।।४१।।

परिणेष्यति पार्वतीं यदा
तपसा तत्प्रवणीकृतो हरः।
उपलब्धसुखस्तदा स्मरं
वपुषा स्वेन समग्रयिष्यति।।४२।।

प्रकाशिका

अस्तु तावद्, एतत्प्रत्यापत्तेस्तु को हेतुरित्याह—

परिणेष्यतीति। तपसेति प्रवणीकरणस्य निरुपायत्वशङ्कां विधुनोति। उपलब्धसुखः ज्ञातानुकूल्यः। अनुकूल एवेदानीमस्माकमिति जानन्नित्यर्थः। इति चाहेत्युत्तरश्लोकार्थे वाक्यपरिसमाप्तिः।।४२।।

विवरणम्

मदनस्य प्रत्यापत्तावपि हेतुमाह—

परिणेष्यतीति। हरः पार्वतीं तपसा तत्प्रवणीकृतः यदा परिणेष्यति तदा उपलब्धसुखः स्मरं स्वेन वपुषा समग्रयिष्यति। हरो महादेवः। तपसा पार्वतीकृतेन बहुप्रकारेण तपसा कर्तृभूतेन। तत्प्रवणीकृतः तस्याः पार्वत्याः प्रवणीकृतः प्रह्वीकृतः। पार्वतीपरत्वं प्रापित इत्यर्थः। 'प्रवणस्तत्परे नम्र' इति **शाश्वतः**। नहि तपसा किञ्चिदप्यसाध्यम्। अनेनैवम्भूतं हरं प्रह्वीकर्तुं साधनसम्पत्तिरुक्ता। पार्वतीतपोवर्णनरूपस्योत्तरसर्गार्थस्य बिन्दूपक्षेपोऽपि कृतः। यदा परिणेष्यति उदूढां करिष्यति। 'तथा परिणयोद्वाहोपयमाः पाणिपीडनमि'त्यमरः। तदा उपलब्धसुखः उपलब्धं ज्ञातं सुखमानुकूल्यं येन तथाभूतः सन्। अस्माकमनुगुण एवायं मदन इत्यवगम्येत्यर्थः। स्मरं कामदेवम्। स्वेन वपुषा त्वया पूर्वमनुभूतेन शरीरेणैवेत्यर्थः। यथा दर्शनानन्तरं भवती भर्तारं प्रत्यभिज्ञास्यति, तथैवेत्यभिप्रायः। समग्रयिष्यति सम्पूर्णं करिष्यति। यदा परमेश्वरः पार्वतीकृतैस्तपोभिरुद्बुद्धाभिलाषस्तां परिणेष्यति, तदा कामोऽयमस्माकमनुकूल एवेत्यवधार्य जगदीश्वरः प्राचीनेनैव शरीरेण मदनं योजयिष्यतीत्यर्थः। 'इति चाहे'त्युत्तरश्लोकस्य पूर्वार्ध एवास्य वाक्यस्य परिसमाप्तिः।।४२।।

इति चाह स धर्मचारिणि!
स्मरशापान्तभवाम् सरस्वतीम्।
अशनेरमृतस्य चोभयो-
र्वशिनश्चाम्बुधराश्च योनयः॥४३॥

प्रकाशिका

इतीति। इति चाह इत्याह, न केवलं शप्तवान्। स इति प्रजापतिः। धर्मचारिणि! पतिव्रते!। त्वत्प्रभावे किं न संभाव्यमिति भावः। स्मरशापान्तभवां स्मरशापप्रदानावसानसंभूताम्। अनेन वशिनामनुग्रहस्वभावत्वादप्रायत्निकत्वमनुग्रहवाचोऽस्या द्योत्यते। एवञ्च विशेषणदानस्यापेक्षिततत्वादव्यभिचारिणोऽपि कर्मण उदापानम्। प्रजापतिः शप्त्वा पश्चात् परिणेष्यतीत्यादिवाक्यरूपां सरस्वतीं चाहेत्यर्थः। तथाकुपितस्य प्रसादमर्थान्तरन्यासेनोपपादयति—अशनेरिति। अशन्यमृतशब्दौ कोपप्रसादयोरपि लक्षकौ। वशिनां कोपप्रभवत्वं चोक्तं शाकुन्तले—

शमप्रदानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः।
स्पर्शानुकूला इव सूर्यकान्तास्तदन्यतेजोभिभवाद् वमन्ति।। (२.७)

इति। अत्राम्बुधरवृत्तान्तस्य वशिवृत्तान्तदृष्टान्तत्वेनोपादानात् तत्समकक्ष्यतेति दीपकमिदम्। तेन चार्थान्तरन्यासस्य सङ्करः। दक्षिणावर्तस्तु—स्मरशापान्तभवा सरस्वतीति पाठमादृत्य व्याख्यातवान्। तन्नास्माकं हृदयमावर्जयति।।४३।।

विवरणम्

वाक्यपरिसमाप्तिमेव दर्शयति—

इति चेति। धर्मचारिणि! सः इति सरस्वतीम् आह च। धर्मचारिणि! हे पतिव्रते!। त्वत्पातिव्रत्यमाहात्म्यात् सर्वमपि सम्भाव्यमेवेति भावः। सः प्रजापतिः। इति परिणेष्यतीत्यादिपूर्वोक्तप्रकारात्। सरस्वतीं वाणीम् आह उक्तवान्। अस्त्यादिपदवत् तिङ्प्रतिरूपकमव्ययमिदम्। चशब्दः पूर्वोक्तशापरूपसरस्वतीसमुच्चयार्थः। [रघु.५.५४] 'उष्णत्वमग्न्यातपसम्प्रयोगाच्छैत्यं हि यत् सा प्रकृतिर्जलस्ये'ति न्यायेन वशिनामनुग्रहस्वभावत्वमेव दर्शयति—स्मरशापान्तभवामिति। स्मरविषयस्य शापस्यान्ते भवतीति स्मरशापान्तभवा, तादृशीं सरस्वतीं, न तु शापमोक्षं देहीति स्मरप्रार्थनानन्तरभवाम्। अनेन वशिनां प्रसादस्य स्वाभाविकत्वं दर्शितम्। शापप्रदानानन्तरं कृपालोः परमेष्ठिनो मुखात् परिणेष्यतीत्यादिरूपा सरस्वती च स्वयमेव निर्गतेत्यर्थः। नन्वेवं कुपितस्य

प्रजापतेस्तदनन्तरमेव तादृशप्रसादोदयः कथमुपपद्यत इतीमामाशङ्कामर्थान्तरन्यासेन परिहरति—अशनेः अमृतस्य चोभयोः वशिनः अम्बुधराश्च योनयः इति। अशनेः वैद्युताग्नेः अमृतस्य जलस्य च उभयोरपि वशिनो जितेन्द्रियाः अम्बुधरा मेघाश्च योनयः उद्भवस्थानानि। अत्र वशिपक्षे तावदशन्यमृतशब्दौ दुःखानन्दकारणत्वात् कोपप्रसादयोर्लक्षकौ। वशिनां कोपप्रभवत्वं चोक्तं शाकुन्तले—

> शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः।
> स्पर्शानुकूला इव सूर्यकान्तास्तदन्यतेजोभिभवाद् वमन्ति।।

इति। अत्र वशिवृत्तान्तदृष्टान्तत्वेनाप्रकृतोऽम्बुधरवृत्तान्त उपात्त इति दीपकमलङ्कारः।

> सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम्।
> सैव क्रियासु वह्वीषु कारकस्येति दीपकम्।।

इति तस्य [काव्यप्रकाशे] लक्षणम्। तेन चार्थान्तरन्यासस्य सङ्करः।।४३।।

तदिदं परिरक्ष शोभने!
भवितव्यप्रियमङ्गमं वपुः।
अपि वीतजला तपात्यये
पुनरोघेन हि युज्यते नदी।।४४।।

प्रकाशिका

अथ कर्तव्यमवतारयति—

तदिति। तत् तस्माद्, यस्माद् भावी तस्य देहलाभः। इदमिति समग्रगुणास्पदत्वं द्योतयति। शोभन इत्यामन्त्रणं 'मदनेन विनाकृता'(४.२१)इत्युक्तं वचनीयमप्येवं शीलवत्यां त्वयि निरवकाशमिति द्योतयति। भवितव्यप्रियसङ्गमम् उक्तादेव हेतोरवश्यंभाविप्रियसङ्गमम्। अवश्यंभाविनं प्रियसङ्गमोत्सवं मा हासीरिति भावः। प्रियसङ्गमस्य भावित्वमुपपादयति—अपीति। वीतजलापीत्यन्वयः। तपात्यय इत्यनेन प्रकृतेऽपि कालस्य घटयितृत्वं द्योत्यते। एतच्च न प्रतिवस्तु, प्रथमं बिम्बभूतस्य वस्तुनोऽनुपन्यासात्। नापि सादृश्येनाप्रस्तुतप्रशंसा, हिशब्देनोपपादकस्योक्तत्वात्। तस्मात् कैश्चिदभ्युपगतः सादृश्येनार्थान्तरन्यासोऽयम्।।४४।।

विवरणम्

इत्थं मदनस्य प्रत्यापत्तिमुपपाद्य कर्तव्यमेवाह—

तदिति। शोभने! तत् त्वम् इदं वपुः परिरक्ष। शोभने! हे समग्रगुणसम्पन्ने!

अनेनामन्त्रणेन 'मदनेन विनाकृता रतिः' इति श्लोकेन त्वया पूर्वोक्तं वचनीयमप्येतादृशगुणविशिष्टायां त्वयि निरवकाशमेवेति द्योत्यते। तद्, यस्मात् त्वत्प्रियतमस्य देहलाभोऽवश्यम्भावी, तस्मादित्यर्थः। इदं समग्रगुणास्पदत्वेन दृश्यमानम्। वपुः शरीरम्। परिरक्ष परितः समन्ताद्रक्ष। शीतोपचारादिभिः सुरक्षितमेव कुरु। सहसा देहत्यागेन प्रियसङ्गमोत्सवं मा परित्यजेत्यर्थः। परिरक्षणीयत्वे हेतुमाह—भवितव्यप्रियसङ्गममिति। भवितव्यः अवश्यम्भावी प्रियसङ्गमः प्रियेण भर्त्रा सङ्गमो यस्य तादृशम्। प्रियसङ्गमस्यावश्यम्भावित्वमेवोपपादयति—वीतजलापि नदी तपात्यये पुनः ओघेन युज्यते हि। वीतजला वीतानि विशेषणेतानि गतानि जलानि यस्या सा तथाभूतापि नदी। तपात्यये ग्रीष्मकालावसाने। 'उष्ण ऊष्मागमस्तप' इत्यमरः। अनेन प्रियवियोगस्येव प्रियसङ्गमस्यापि कालस्यैव हेतुत्वं द्योत्यते। पुनः पुनरपीत्यर्थः। ओघेन प्रवाहेण, न तु जलमात्रेणेत्यर्थः। अनेन पूर्वकृतानामनुभवानामपि पूर्ववदेव प्रत्यापत्तिः सूचिता। युज्यते संयुक्ता भवति। हिशब्दः उपपादकत्वद्योतकः प्रसिद्धिवाची। सादृश्यनिमित्तोऽर्थान्तरन्यासोऽत्रालङ्कारः। स तु कैश्चिदेवाचार्यैरभ्युपगतः, न तु सर्वैः। ननु प्रतिवस्तूपमास्तु। मैवम्। प्रथमं बिम्बभूतस्य वस्त्वन्तरस्यानुपादानात्। नापि सादृश्येनाप्रस्तुतप्रशंसा, उपपादकस्य हिशब्दस्योपादानात्। तस्मात् सादृश्येनार्थान्तरन्यास एवायम्।।४४।।

इत्थं रतेः किमपि भूतमदृश्यरूपं
मन्दीचकार मरणव्यवसायबुद्धिम्।
तत्प्रत्ययाच्च कुसुमायुधबन्धुरेना-
माश्वासयत् समभिवृद्धरसैर्वचोभिः।।४५।।

प्रकाशिका

उपसंहरति—

इत्थमिति। किमपि भूतमदृश्यरूपमित्यनेनाकाशभाषिते कः प्रत्यय इत्यसंभावनां निराकरोति। अत एव वक्ष्यति—तत्प्रत्ययाच्चेति। मन्दीचकार, न तु निश्शेषमपानुदत्। अपनुन्ना तु सा बुद्धिरन्यथेत्याह—तत्प्रत्ययादिति। चस्त्वर्थे। समभिवृद्धरसैः सौहार्दस्यन्दिभिः।।४५।।

विवरणम्

आकाशवाणीमुपसंहरति—

इत्थमिति। अदृश्यरूपं किमपि भूतं रतेः मरणव्यवसायबुद्धिम् इत्थं

मन्दीचकार। अदृश्यरूपमदृश्यं रूपं शरीरं यस्य तत्तथा। किमपि अनिर्देश्यम्। अनेनाकाशभाषितस्यापि विश्वसनीयता प्रतिपादिता। अत एव तत्प्रत्ययाच्चेत्युत्तरार्धे वक्ष्यति। भूतं दैवविशेषः। इदमपि विश्वसनीयत्वे हेतुः। रतेः कामदेवभार्यायाः। मरणव्यवसायबुद्धिं मरणे देहत्यागे व्यवसायो निश्चयो यस्यास्तादृशीं बुद्धिम्। मरणविषयां निश्चयबुद्धिं वा। मन्दीचकार अल्पीचकार, न तु निश्शेषमपाचकार। निश्शेषापहरणं तु माधववचनादासीदित्याह—कुसुमायुधबन्धुश्च तत्प्रत्ययाद् वचोभिरेनामाश्वासयदिति। कुसुमायुधबन्धुः कुसुमायुधस्य कामदेवस्य बन्धुभूतो वसन्तः। चकारस्तुशब्दार्थे। कुसुमायुधबन्धुस्त्वित्यर्थः। तत्प्रत्ययात् तस्मिन् भूतवचसि प्रत्ययाद् विश्वासात्। 'प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुष्वि'त्यमरः। वचोभिर्वाग्भिः। बहुवचनेन बचसो बहुप्रकारत्वमुक्तम्। कृपालोः परमेश्वरस्यानुचराणां केषाञ्चिद् वचनमेवेदम्। मा वृथा शरीरं विनाशय। अवश्यं प्रियसङ्गमो मरणेन विना भविष्यत्येवेत्यादिरूपैरिति भावः। वसन्तवचसामाश्वासकारित्वमाह—समभिवृद्धरसैरिति। सम्यगभिवृद्धो रसोऽनुरागो येषु तैः। 'शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः' इति सिंहः। सान्द्रसौहार्दस्यन्दिभिरित्यर्थः। सौहार्दे हेतुः कुसुमायुधबन्धुत्वम्। अत्र कुसुमायुधबन्धुत्वम्। अत्र कुसुमायुधशब्देन कुसुमसम्पादके वसन्ते बान्धवहेतुरपि सूचितः। सुहृद्वचो हि विपदि विश्वास्यमिति भावः।।४५।।

अथ मदनवधूरुपप्लवान्तं
व्यसनकृशा प्रतिपालयाम्बभूव।
शशिन इव दिवातनस्य रेखा
किरणपरिक्षयधूसरा दिनान्तम्।।४६।।

प्रकाशिका

प्रकरणमुपसंहरति—

अथेति। अथशब्दोऽवस्थान्तरद्योतकः। अवस्थान्तरं च करुणस्य सप्रत्याशत्वम्। अत एव च प्रतिपालनम्। उपप्लवान्तं शायावसानकालमित्यर्थः। रेखात्वादेवोपमाने कार्श्यम्, कार्श्यसाहचर्याच्चोपमेये धूसरत्वं प्रतीयते। अत्र सर्गे स्थायी करुणः। तत्र भूयसां भवानां वारिधौ कल्लोलानामिवोन्मज्जनं निमज्जनं च दर्शितम्।।४६।।

।। इत्यरुणगिरिनाथविरचितायां कुमारसम्भवप्रकाशिकायां
चतुर्थः सर्गः।।४।।

विवरणम्

रतिप्रलापप्रकरणमुपसंहरति—

अथेति। अथ मदनवधूः व्यसनकृशा उपप्लवान्तं प्रतिपालयाम्बभूव। अथशब्दोऽयमवस्थान्तरारम्भं द्योतयते। करुणस्य प्रत्यापत्त्याशया विप्रलम्भत्वप्राप्तिश्चात्रावस्थान्तरम्। आकाशवाणीमाधववचसोरानन्तर्यवाची वायमथशब्दः। मदनवधूः मदनस्य वधूः रतिः। व्यसनकृशा व्यसनैः दुखशतैः कृशा कृशशरीरा सती। उपप्लवस्योपद्रवस्य। अन्तमवसानकालम्। शापावसानसमयमित्यर्थः। प्रतिपालयाम्बभूव प्रतीक्षाञ्चक्रे। अत्रोपमामाह—दिवातनस्य शशिनः रेखा किरणपरिक्षयधूसरा दिनान्तमिवेति। दिवातनस्य अहनि वर्तमानस्य। शशिनश्चन्द्रस्य। रेखा कलेत्यर्थः। किरणपरिक्षयधूसरा किरणानां रश्मीनां परिक्षयेण नाशेन हेतुना धूसरा धूसरवर्णा सती दिनान्तमिव। यथा चन्द्रस्य प्रतिपत्कला विवर्णा कृशा च सती स्वतेजोवृद्धिकरं दिनान्तं प्रतिपालयति, तथेयमपि भर्तुः शापावसानसमयमित्यर्थः। प्रदोषमिति वा पाठः। अत्र रेखाशब्दप्रयोगेण उपमाने कार्श्यं प्रतीयते, कार्श्यसाहचर्यादुपमेये धूसरत्वं च। अत्र रतेस्तादृशचन्द्रकलोपमानेन प्रियसङ्गमानन्तरभाविनी क्रमेण वृद्धिश्च ध्वन्यते।।४६।।

सर्गेऽस्मिन् करुणो रसः स्थिरतरो भावास्तु वारान्निधौ
कल्लोला इव तत्र तत्र बहवः सम्मज्जनोन्मज्जने।
कुर्वाणा विलसन्ति हन्त नितरां दीना मदीया पुन-
र्बुद्धिस्तस्य तथापि देशिककृपानावैव पारं गता।।

आश्लेषाशतकादिपद्यरचनादक्षस्य नारायण-
क्ष्मादेवस्य कृतौ गिरीशगिरिजाभक्तिप्रवृद्धोदये।
व्याख्यानेऽत्र कुमारसम्भवपदार्थालोचनप्रक्रिया-
निष्णाते स्म चतुर्थ एति विरतिं सर्गो निसर्गोज्ज्वलः।।

।। इति श्रीकृष्णशिष्यनाराणस्य कृतौ कुमारसम्भवविवरणे
चतुर्थः सर्गः।।४।।

●

।। अथ पञ्चमः सर्गः ।।

तथा समक्षं दहता मनोभवं
पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्वती
प्रियेषु सौभाग्यफला हि चारुता॥१॥

प्रकाशिका

इत्थं प्रासङ्गिकं परिसमाप्याधिकारिकं वृतं स्वावसरेऽवतारयति—

तथेति। तथाशब्दो रतिवृत्तान्तविच्छन्नस्य कामदाहप्रकारस्य परामर्शकः। समक्षमिति मनोरथस्यात्यन्तभग्नत्वं द्योतयति। रूपं सौन्दर्यम्। हृदयेन निनिन्देति, प्रागपि रूपाभिमानस्योदात्तनायिकायां गूढत्वात्। 'स्थिरो निगूढाहङ्कारो धीरोदात्तो दृढव्रत' इति वचनात्। प्रियेष्विति विषयसप्तमी। सौभाग्यं स्पृहणीयता।।१।।

विवरणम्

इत्थं कामदहनप्रसङ्गागतं रतिप्रलापवृत्तमुपसंहृत्याधिकारिकं वृत्तमेव स्वावसरेऽवतारयितुं पञ्चमः सर्गोऽयमारभ्यते। तत्र कामदहनान्तरं पित्रा गृहं प्रापिता देवी किमकरोदित्याकाङ्क्षायामाह—

तथेति। मनोभवं तथा समक्षं दहता पिनाकिना भग्नमनोरथा सती पार्वती हृदयेन रूपं निनिन्द। तथाशब्दोऽयं रतिप्रलापवृत्तान्तकथनविच्छिन्नं कामदहनप्रकारं कथानुसन्धानार्थं परामृशति। समक्षमिति दहनक्रियाविशेषणम्। आत्मन प्रत्यक्षं यथा भवति तथा दहतेत्यर्थः। अनेन मनोरथभङ्गस्यात्यन्तिकत्वं सूचितम्। दहता भस्मावशेषतामेव प्रापयता। अनेन दैववशात् पुनरपि जीविष्यतीत्याशाया अप्यभाव उक्तः। भग्नो भङ्गं प्रापितो मनोरथो हरजायात्वप्राप्त्यादिलक्षणः चित्तवृत्तिविशेषो यस्याः तथाभूता। सती भवन्ती पार्वती रूपं सौन्दर्यं हृदयेन निनिन्द मनसा निन्दितवती। अयमभिप्रायः—पूर्वं तावत् 'प्रेम्णा शरीरार्धहरां हरस्य'(१.५०) इति नारदवचनानन्तरं देव्याः पुरारिविषयो यो मनोरथोऽङ्कुरितः, पुनश्च परिचर्यायां तत्स्वरूपदर्शनेन यश्च संवर्धितः, तदनन्तरम् 'उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि'(कुमा.३.६७) इत्यत्र यो वा प्रत्यासन्नफलतया कल्पितः, स सर्वोऽपि कामदहनदर्शनानन्तरं भग्नः, पुनश्च किमनया

काननचन्द्रिकाकल्पया मे रूपसम्पदेति निजमेव रूपं मनसा निन्दितवतीति। मनसा निनिन्देत्यस्यायमर्थः—'स्थिरो निगूढाहङ्कारो धीरोदात्त' इत्युदात्तनायकलक्षणमुदात्तनायिकायामपि योजनीयम्। अतो देव्या उदात्तनायिकात्वाद् रूपाभिमानस्य स्वतो निगूढतरत्वान्निन्दनमपि मनसैव, न तु वचसेति। अनया रूपनिन्दया देवस्यारूपहार्यत्वं प्रतिपादितम्। अत एव बक्ष्यति—'अरूपहार्यं मदनस्य निग्रहात्'(कुमा.५.५३) इति। निन्दायामुपपत्तिकथनेन निन्दाप्रकार-मेवाह—चारुता प्रियेषु सौभाग्यफला हि इति। प्रियेष्विति विषयसप्तमी। सौभाग्यं स्पृहणीयत्वं फलं यस्याः सा तथा। चारुतायाः प्रियविषयसौभाग्यमेकमेव हि फलं, तदभावे किं रूपसम्पदेति भावः। 'शैलात्मजापि पितुरुच्छिरसोऽभिलाषं व्यर्थं समीक्ष्य ललितं वपुरात्मनश्च' (कुमा.३.७५) इति तृतीयसर्गान्ते प्रकृतो भावोऽनेनोत्थापितः। प्रथमसर्गान्तप्रकृतस्य प्रयोज्योपार्वतनविधेरुपसंहारोऽप्यत्र दर्शितः।।१।।

इयेष सा कर्तुमवन्ध्यकामतां
समाधिमास्थाय तपोभिरात्मनः।
अवाप्यते तत् कथमन्यथा द्वयं
तथाविधं प्रेम पतिश्च तादृशः॥२॥

प्रकाशिका

इत्थं पूर्वप्रस्तुतं प्रयोज्योपावर्तनविधेर्वैफल्यमनुसन्धाय तत्प्रसङ्गेनालौकिकयोर्नायकयोरलौकिकमन्यदेव प्रयोज्यस्योपावर्तनमवतारयति—

इयेषेति। समाधिं भग्नस्य मनोरथस्य पुनस्समाधानम्। आस्थाय अवलम्ब्य। तपोभिरिति, तेषामतिदुरापेऽपि साधनत्वात्। यथाह मनुः—

यद् दुष्करं यद् दुरापं यद् दुर्गं यच्च दुस्तरम्।
तत् सर्वं तपसा प्राप्यं तपो हि दुरतिक्रमम्।।

इति। तथाविधं शरीरार्धप्रदम्। तादृशोऽनन्यनारीकः। उक्तञ्च 'प्रेम्णा शरीरार्धहरा हरस्य' (कुमा.१.५०) इति, 'अनन्यभाजं पतिमाप्नुहि' (कुमा.३.६३) इति च। अनेनोत्साहात्मनो वीरस्य वर्णयिष्यमाणस्योपक्षेपः।।२।।

विवरणम्

अथ लोकोत्तीर्णयोर्नायकयोस्तथाविधमेव प्रयोज्योपावर्तनविधिमवतारयति—

इयेषेति। सा समाधिम् आस्थाय तपोभिः आत्मनः अवन्ध्यकामतां कर्तुम् इयेष। या भग्नमनोरथा सा पार्वती समाधिं भग्नमनोरथप्रतिसन्धानम् आस्थाय

अवलम्ब्य। भग्नमनोरथानां प्रवृत्त्यनुपपत्तेरित्थमुक्तम्। तपोभिरिति बहुवचनेन वक्ष्यमाणानां बहुविधानां तपसामुपादानम्। मनोरथप्राप्तिपर्यन्तैरित्यर्थः। अत्यन्तदुरापेऽर्थे तपसामेव साधनत्वमुक्तं मनुना—

यद् दुष्करं यद् दुरापं यद् दुर्गं यच्च दुस्तरम्।
तत् सर्वं तपसा प्राप्यं तपो हि दुरतिक्रमम्।।

इति। अत्रात्मशब्दस्यार्थप्रकरणाभ्यां सिद्धत्वेऽप्यात्मनो नित्यत्वात् तपोभिः शरीरं परित्यज्य जन्मान्तरेष्वपि स्वमनीषितं साधयिष्याम्येवेति स्थिरनिश्चयत्वं प्रतिपादयितुमुपादानम्। यथोक्तं भागवते 'यर्ह्यम्बुजाक्ष? न लभेय भवत्प्रसादं जह्यामसून् व्रतकृशान् शतजन्मभिः स्यात्' (१०.५२.४३) इति। अवन्ध्यः सफलः कामोऽभिलाषो यस्याः तस्या भावस्तत्ता, ताम्। इयेष इच्छां कृतवती। 'इषु इच्छायामि'ति धातुः। लौकिकस्य प्रयोज्योपावर्तनविधेस्तादृशफलजनकत्वाभावादयं प्रयोज्योपावर्तनविधिरेव तस्या युक्ततर इत्याह—अन्यथा तद् द्वयं कथमवाप्यते इति। अन्यथा लौकिकोपावर्तनमात्रेण। तद् वक्ष्यमाणं द्वयं कथमवाप्यते लभ्यते, न कथञ्चिदित्यर्थः। किं तद् द्वयमित्यत्राह—तथाविधं प्रेम तादृशः पतिश्चेति। तथाविधं 'प्रेम्णा शरीरार्धहराम्' [कुमा.१.५०] इति नारदवचनात् स्वशरीरार्धप्रदम्। प्रेम स्नेहः। 'प्रेमा ना प्रियता हार्दं प्रेम स्नेहः' इति सिंह। तादृशः 'अनन्यभाजं पतिमाप्नुहि' इति [कुमा.३.६३] भगवद्वचनाद् अनन्यनारीरतिः। नारदभगवद्वचनयोः कदाचिदप्यन्यथाभावानुपपत्तेः लौकिकस्योपावर्तनविधेस्तत्साधनत्वाभावाच्च देव्यास्तपश्चरणाभिलाष एव युक्ततर इति भावः। अनेन श्लोकेनोत्साहात्मकस्य वीरस्य वक्ष्यमाणस्योपक्षेपः कृतः।।२।।

निशम्य चैनां तपसे कृतोद्यमां
सुतां गिरीशं प्रति सक्तमानसाम्।
उवाच मेना परिरभ्य वक्षसा
निवारयन्ती महतो मुनिव्रतात्।।३।।

प्रकाशिका

अथ त्रिभिः श्लोकैरुदात्तगुणं कार्यसाधनं च व्यवसायस्थैर्यमाह—

निशम्येति। निशम्य, सखीभ्य इति शेषः। तपसे कृतोद्यमामिति विषादः। गिरीशं प्रति सक्तमानसामिति अनुरूपाभिनिवेशिनी दिष्ट्या मे वत्सेति हर्षः। तदुभयानुभावश्च गाढालिङ्गनम्। तर्हि विषादानुरूपो निषेधो हर्षानुरूपा वानुज्ञा

वचनस्य विषय इत्याह—निवारयन्तीति। किं सर्वथा निवारणमित्याह—महत इति। कष्टात् तपस इत्यर्थः। दक्षिणावर्तस्तु—व्रतस्य मेनाया अनीप्सितत्वाद् 'वारणार्थानामीप्सितः' (१.४.२७)इत्यपादानत्वं न स्यात्। निवारयन्ती अपगमयन्तीति व्याचष्ट।।३।।

विवरणम्

ननु नेच्छामात्रं फलपर्यन्तस्य तपसो हेतुः, अपि तु स्थिरव्यवसायत्वमपीत्युदात्तगुणभूतं कार्यसाधनक्षमं च देव्याः स्थिरव्यवसायत्वं वर्णयितुमुपक्रमते—

निशम्येति। मेना एनां सुतां तपसे कृतोद्यमां गिरीशं प्रति सक्तमानसां च निशम्य वक्षसा परिरभ्य महतः मुनिव्रताद् निवारयन्ती उवाच। तपसे तपश्चरितुम्। कृत उद्यमो यया ताम्। अत्र हेतुमाह—गिरीशं प्रति सक्तमानसामिति। सक्तं मानसं यस्याः ताम्। गिरीशासक्तचित्तामित्यर्थः। पूर्वं सुतायाः तपश्चरणोद्यमः श्रुतः। पुनश्च तद्धेतुजिज्ञासायां गिरीशासक्तचित्तत्वं श्रुतमिति क्रमोऽप्यत्र विवक्षित एव। निशम्य सखीमुखादिति शेषः। वक्षसा परिरभ्य उरसा गाढमालिङ्ग्य। इदं च गाढालिङ्गनं शरीरक्लेशकरतपश्चरणोद्यमश्रवणजनितस्य शोकस्य, गिरीशासक्तचित्तत्वश्रवणजनितस्य अनुरूपाभिनिवेशिनी दिष्ट्या मे वत्सेति मोदस्य चानुभावः। विषादहर्षयोरनुगुणनिषेधमाह—महत इत्यादिना। अत्यन्तदुश्चरान्मुनीनां व्रतात् तपसः प्रतिषेधं कुर्वती सती उवाच। सुताया गम्यमानया चरणक्रियया मुनिव्रतमीप्सितमिति मुनिव्रतशब्दाद् 'वारणार्थानामीप्सितः' इति पञ्चमी। अत्र कैश्चिन्मुनिव्रतस्य मेनाया अनीप्सितत्वादपादानत्वानुपपत्तिराशङ्किता। तन्मन्दम्। भाष्यादौ कर्तुरित्यनुवृत्तेरप्रदर्शितत्वात्।।३।।

मनीषितायार्च गृहेषु देवता-
स्तपः क्व वत्से! क्व च तावकं वपुः।
पदं सहेत भ्रमरस्य पेलवं
शिरीषपुष्पं न पुनः पतत्रिणः।।४।।

प्रकाशिका

मनीषितायेति। अर्चेति 'आ धृषाद् वे'ति विकल्पितणिचो रूपम्। देवता इन्द्राण्याद्याः। तर्हि तप एव ननु श्रेयस्करमित्याह—तप इति। चशब्दसहायाभ्यां क्वशब्दाभ्यामैकाधिकरण्यमाक्षिप्यते। तपश्चेदं वपुश्च साध्यत्वेन साधनत्वेन च कर्तृभूतायां त्वयि नान्वयमुपेत इत्यर्थः। आक्षेपमुपपादयति—पदमिति।।४।।

विवरणम्

क्लेशेन विनापि मनीषितसिद्धिप्रदं कर्मान्तरमुपदर्शयति—

मनीषितायेति। वत्से! त्वं मनीषिताय गृहेषु देवताः अर्च। वत्से! बाले!। अनवा सम्बुध्या मृदुशरीरत्वादत्यन्तदुश्चरे तपस्यनधिकार उक्तः। मनीषिताय इष्टमर्थं लब्धुम्। गृहेषु देवता प्रतिमारूपेण वर्तमानाः सौभाग्यप्रदा इन्द्राण्याद्याः। अर्च पूजय। 'अर्च पूजायामि'त्यस्य धातोः 'आ धृषाद् वे'ति णिचो विकल्पितत्वादर्चेति रूपम्। ननु तर्हि श्रेयस्करं तप एव किमर्थमुपेक्ष्यत इत्यत्राह—तपः क्व तावकं वपुश्च क्व इति। कठिनशरीरैर्मुनिभिरेव कर्तुं शक्यं तपः क्व कुत्र वर्तते। तावकं त्वदीयम्। अत्यन्तकोमलं वपुश्च क्व अत्यन्तकठिनशरीरसाध्यस्य तपसः प्रकृत्या कोमलस्य तव शरीरस्य च परस्परान्वयो दुर्घट एवेति भावः। परस्परान्वयाभावमेवोपपादयति—पेलवं शिरीषपुष्पं भ्रमरस्य पदं सहेत पतत्रिणः पुनः न इति। पेलवं प्रकृत्या मृदु। भ्रमरस्य भ्रमणस्वभावस्य भृङ्गस्य। इदमपि सहने हेतुः। 'भ्रमु अनवस्थाने' इति धातुः। 'अर्तिकमिभ्रमिचमि—' (उ॰३.१३२) इत्यादिना अरच्। चिरावस्थाने तदपि दुःसहमेवेति भावः। पदं पादविन्यासम्। सहेत इति सम्भावनायां लिङ्। पतत्रिणः पक्षिणः। पदमिति अत्रापि योज्यं, सहेतेति च। यथा भ्रमरावस्थानक्षमं शिरीषपुष्पं पिकाद्यवस्थानं न सहते, तथा कोमलतरं तव शरीरं कठिनशरीरसाध्यं तपश्चरितुमक्षममेवेति भावः। अत्र पूर्वार्धे विषमालङ्कारः। 'क्वचिद् यदतिवैषम्यान्न श्लेषो घटनामियाद्' [काव्यप्रकाशे] इति। उत्तरार्धे तु सादृश्यनिमित्तोऽर्थान्तरन्यासः। तयोश्च संसृष्टिः।।४।।

इति स्थिरेच्छामनुशासती सुतां
शशाक मेना न नियन्तुमुद्यमात्।
क ईप्सितार्थस्थिरनिश्चयं मनः
पयश्च निम्नाभिमुखं प्रतीपयेत्।।५।।

प्रकाशिका

इतीति। इत्यनुशासती हेतौ शता। अनुशासनेन हेतुनेत्यर्थः। तथापि किन्न शशाकेत्याह—स्थिरेच्छामिति। अस्य हेतोः साध्येन व्याप्तिमाह—क इति। प्रतीपयेत् प्रतिलोमं कुर्यात्। अत्रापि दीपकार्थान्तरन्यासयोः सङ्करः।।५।।

विवरणम्

इत्थं प्रवृत्तस्य जननीवचनस्य स्थिरव्यवसायायां देव्यां वैफल्यमाह—

इतीति। मेना सुताम् इति अनुशासती उद्यमाद् नियन्तुं न शशाक। सुताम् आत्मनः पुत्रीम्। इदमनुशासने हेतुः। इति पूर्वोक्तप्रकारेण। अनुशासतीति हेतौ शता। अनुशासनेन हेतुनापीत्यर्थः। उद्यमाद् मुनिव्रतोद्योगाद् नियन्तुं निवर्तयितुं न शक्ताभूत्। अत्र हेतुमाह—स्थिरेच्छामिति। स्थिरव्यवसायामित्यर्थः। अस्य हेतोः साध्येन व्याप्तिं दर्शयति—ईप्सितार्थस्थिरनिश्चयं मनः निम्नाभिमुखं पयश्च कः प्रतीपयेदिति। ईप्सिते अभीष्टे अर्थे वस्तुनि स्थिरः अचञ्चलः निश्चयो यस्य तादृशं मनः, निम्नप्रदेशं प्रत्यभिमुखं कृतप्रवाहं पयः जलं च कः प्रतीपयेत् प्रतिनिवर्तयेत्, न कोऽपीत्यर्थः। अत्र दीपकार्थान्तरन्यासयोः सङ्करः।।५।।

कदाचिदासन्नसखीमुखेन सा
मनोरथज्ञं पितरं मनस्विनी।
अयाचतारण्यनिवासमात्मनः
फलोदयान्ताय तपःसमाधये।।६।।

प्रकाशिका

उत्साहस्य द्वितीयामवस्थां वर्णयति—

कदाचिदिति। कदाचिद् अवसरे लब्ध इत्यर्थः। आसन्नेत्युभयत्र विस्रम्भ उक्तः। उभयत्र विस्रब्धं हि मित्रमर्थकारि। मनोरथज्ञं मनोरथश्चेद् दुर्वार इति जानानम्। मनस्विनी स्थिरचित्ता। अत एवाह—फलोदयान्ताय। फलोदय एवावसानमस्य तपस इति निश्चित्येत्यर्थः। तपस्समाधये तपस्यैकाग्र्याय। तच्च न गृहवासे सिध्येदिति भावः।।६।।

विवरणम्

एवम् अङ्कुरितस्योत्साहस्य क्रमेण वृद्धिं वर्णयितुं द्वितीयामवस्थामाह—

कदाचिदिति। सा कदाचित् पितरं फलोदयान्ताय तपःसमाधये आत्मनः अरण्यनिवासम् आसन्नसखीमुखेन अयाचत। कदाचित् प्रश्नावसरे लब्धे। फलोदये फलप्राप्तावेव अन्तोऽवसानं यस्य तादृशाय। तपसि यः समाधिः चित्तैकाग्र्यं तस्मै। यद्यपि कादाचित्कं मनःसमाधानं गृहावस्थानेऽपि सम्भवेत्, तथापि फलोदयपर्यन्ते तपसि मनःसमाधानमरण्यनिवास एव सुलभमिति भावः। अरण्ये कानने निवासम्। आसन्नायाः समीपवर्तिन्याः सख्या मुखेन। या पितृनियोगादनवरतम् आत्मनः समीपे वर्तते, सैवात्रासन्नसखीत्युच्यते। तेन तस्याः उभयत्र विस्रम्भ उक्तः। उभयत्र विस्रब्धो हि बन्धुरर्थसाधको भवति। अयाचत याचितवती। पितुरभिलाषसाधकत्वे

हेतुमाह—मनोरथज्ञमिति। मनोरथं जानातीति तथा। मनोरथस्वरूपस्य सर्वलोकदुर्वारत्वं जानानमित्यर्थः। देव्याः फलोदयान्ते तपसि सामर्थ्यमाह—मनस्विनीति। स्थिरचित्तेत्यर्थः।

महाकार्ये कृतोद्योगो विघ्नैराहतमानसः।
प्रारब्धं न त्यजति यः स मनस्वीति कथ्यते।।

इति वचनात्।।६।।

अथानुरूपाभिनिवेशतोषिणा
कृताभ्यनुज्ञा गुरुणा गरीयसा।
प्रजासु पश्चात् प्रथितं तदाख्यया
जगाम गौरीशिखरं शिखण्डिमत्।।७।।

प्रकाशिका

तृतीयामाह—

अथेति। अथशब्दो वनवासोपक्रमद्योतकः। गरीयसा धीरेण। एतच्च तथातोषे हेतुः, तोषश्चानुज्ञायां, सा च गमने, कन्यानां पितृपरतन्त्रत्वात्। प्रजासु जनेषु। तदाख्यया गौरीशिखरमित्याख्यया। शिखण्डिमदिति दुष्टसत्त्वाभाव उक्तः। एवमुत्तरोत्तरमुत्साहस्य प्रकर्षावस्था द्रष्टव्या।।७।।

विवरणम्

पितृनियोगपुरस्सरं तपोनुरूपदेशप्राप्तिमाह—

अथेति। अथ सा गुरुणा कृताभ्यनुज्ञा गौरीशिखरं जगाम। अथ याचनानन्तरम्। वनवासोपक्रमद्योतको वायमथशब्दः। गुरुणा पित्रा। कृता विहिता अभ्यनुज्ञा नियोगो यस्याः सा तथा। इदं तु गमने हेतुः, कन्यकानां पितृपरतन्त्रत्वात्। 'पिता रक्षति कौमार' इति वचनात्। गौरीशिखरं हिमवच्छृङ्गविशेषं जगाम। अनुज्ञायां हेतुमाह—अनुरूपाभिनिवेशतोषिणेति। अनुरूपे आत्मानुरूपे वरे विषये योऽभिनिवेशः अभिलाषोत्कर्षः तेन तोषितुं सन्तोषितुं शीलमस्येति तथा। तथातोषे हेतुमाह—गरीयसेति। धीरेणेत्यर्थः। महान्तो ह्यनुरूपाभिनिवेशेन तुष्यन्ति, नाप्यरण्यनिवासाद् बिभ्यति। गौरीशिखरशब्दस्यान्वर्थतां दर्शयति—पश्चात् तदाख्यया प्रजासु प्रथितमिति। पश्चाद् गौरीनिवासानन्तरं तदाख्यया गौरीशिखरमित्याख्यया नाम्ना प्रजासु जनेषु प्रथितं

प्रसिद्धम्। गौरीचिरनिवासेनैव हेतुना जनैः गौर्याः शिखरमिति व्युत्पत्त्या गौरीशिखरमिति गीयमानमित्यर्थः। गौरीशिखरस्य विशेषतो रमणीयत्वमाह—शिखण्डिमदिति। शिखण्डिनो बर्हिणः। भूम्नि मतुप्। बहुबर्हियुक्तमित्यर्थ। अनेन केकालापमयूरनृत्तादिषु विकारहेतुषु सत्स्वपि देव्या धीरत्वात् तपोलोपशङ्काया अभावः सूचितः। 'विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः।' (कुमा. १.५९) इतिवत्। तपःसौकर्यार्थं दुष्टसत्त्वानामभावोऽप्यनेनैव ध्वन्यते। नहि शार्दूलाद्यधिष्ठिते देशे शिखण्डिनस्तद्भयान्नि-वसन्ति।।७।।

विमुच्य सा हारमहार्यनिश्चया
विलोलयष्टिप्रविलुप्तचन्दनम्।
बबन्ध बालारुणबभ्रु वल्कलं
पयोधरोत्सेधविशीर्णसंहति॥८॥

प्रकाशिका

अथ तपस उपक्रमं षड्भिः श्लोकैर्वर्णयति—

विमुच्येति। अहार्यनिश्चयेति तथादुःस्पर्शवल्कलबन्धनकालभाविविशेषणम्। यष्टिशब्देन यष्ट्याकारो हारप्रदेश(विषेष) उच्यते। विलुप्तं हृतम्। बभ्रुत्वेन दुःस्पर्शत्वहेतु-भूतमप्रशान्तकषायत्वं नवत्वं द्योत्यते। पयोधरोत्सेधे तदाभोग-पिधानाय विस्तारितत्वाद् विशीर्णा संहतिः समूहो यस्य। दक्षिणावर्तस्तु—संहतिः श्लक्ष्णत्वमित्याह। श्रूयते च तपस्विकन्यानामपि शाकुन्तलादौ स्तनावरणवल्कलम्। बालारुणबभ्रुत्वं हृतस्तनचन्दनत्वेन हारस्यापि समानम्।।८।।

विवरणम्

अथ षड्भिः श्लोकैः तपस उपक्रमो वर्ण्यते। तत्रादौ तपश्चरणाङ्गभूतं वल्कलबन्धनमाह—

विमुच्येति। सा हारं विमुच्य वल्कलं बबन्ध। हारं परित्यज्य स्तनावरणार्थं वल्कलं वक्षसि बद्धवती। इदं तु परिधानवल्कलस्याप्युपलक्षणम्। मनोहरहार-परित्यागे दुःस्पर्शवल्कलबन्धने च हेतुमाह—अहार्यनिश्चयेति। अहार्यः अनिवार्यः निश्चयोऽध्यवसायो यस्याः सा तथा। तथाविधहारपरित्यागस्यान्यदुष्करत्वं द्योतयितुं हारस्य मनोहारित्वमाह—विलोलयष्टिप्रविलुप्तचन्दनमिति। यष्टिशब्देन अत्र यष्ट्याकारो हार**प्रदेश**(विशेष) उच्यते। विलोलया चञ्चलया यष्ट्या प्रविलुप्तं हृतं चन्दनं येन तत् तथा। कुचतटहरिचन्दनाङ्कितमित्यर्थः। कुचाभोगे वल्कल-

स्यानौचित्यं द्योतयितुं वल्कलस्य दुस्स्पर्शत्वमाह—बालारुणबभ्रु इति। बालारुणो बालार्कः तद्वद् बभ्रु पिङ्गलवर्णम्। 'बभ्रु स्यात् पिङ्गले त्रिषु' इत्यमरः। अनेन वल्कलस्य नवत्वं द्योत्यते। तेन चाप्रशान्तकषायत्वादत्यन्तदुःस्पर्शत्वम्। इदं च विशेषणं हारस्यापि समानं, तस्यापि स्तनाङ्गरागारुणितत्वात्। तादृशमपि वल्कलं तादृशे स्तनाभोगे गाढं निबद्धमित्याह—पयोधरोत्सेधविशीर्णसंहतीति। पयोधरयोः स्तनयोरुत्सेधेन वर्धनेन विशीर्णा विश्लेषं प्राप्ता संहतिरवयवसमूहो यस्य तत् तथा। पयोधरयोरतिमहत्त्वेन तदाभोगपिधानार्थं वल्कलस्यात्यन्तविस्तारितत्वात् तदवयवानां परस्परविश्लेषोऽपि तदा जात इति भावः। अथवा यौवनारम्भेण प्रतिक्षणं विजृम्भमाणे पयोधरे सति तत्सङ्घर्षवशात् परस्परविश्लिष्टावयवसमूहमिति। उक्तं च शाकुन्तले पयोधरयोस्तथा वर्धनं 'पओहरवित्थारइत्तअं अत्तणो जोव्वणं उवाळह' [१.१७.४] इति। अनेन तादृशयौवनेऽत्यन्तमसम्भावितं तपस्येकाग्रचित्तत्वं प्रतिपाद्यते, तेन च प्रस्तुतस्योत्साहस्योत्कर्षः। अत एवोक्तम्—अहार्यनिश्चयेति। अत्र परिवृत्तिरलङ्कारः। 'परिवृत्तिर्विनिमयो योऽर्थानां स्यात् समासमैः' [काव्यप्रकाशे] इति।।८।।

यथा प्रसिद्धैर्मधुरं शिरोरुहै-
र्जटाभिरप्येवमभूत् तदाननम्।
न षट्पदश्रेणिभिरेव पङ्कजं
सशैवलासङ्गमपि प्रकाशते।।९।।

प्रकाशिका

यथेति। प्रसिद्धैश्चूर्णादिभिर्भूषितैः। 'प्रसिद्धौ ख्यातभूषिताावि'ति सिंहः। यथा मधुरमित्यन्वयः। तत्र प्रतिवस्तुना 'किमिव हि मधुराणां मण्डनं नाकृतीनामि'ति [शाकु.१.१८]न्याय उद्भावितः। अनयोः परिवृत्तिरलङ्कारः।।९।।

विवरणम्

तपोनुरूपं जटाधारणमपि भङ्ग्यन्तरेणाह—

यथेति। तदाननं प्रसिद्धैः शिरोरुहैः यथा मधुरम् अभूद्, जटाभिरपि एवम्। तस्या आननं मुखं प्रसिद्धैः भूषितैः। 'प्रसिद्धौ ख्यातभूषितावि'त्यमरः। चूर्णकुसुमाद्यलङ्कृतैरित्यर्थ। शिरोरुहैः केशैः मधुरं मनोहरम्। 'स्वादुप्रियौ तु मधुरावि'त्यमरः। एवंशब्दस्तथाशब्दार्थे। यथा तपःसमयात् पूर्वं तदाननं भूषितैः केशैः मधुरमभूत्, पुनर्जटाभिरपि तथा मधुरमभूदित्यर्थः। 'किमिव हि मधुराणां

मण्डनं नाकृतीनाम्’[शाकु.१.१८] इति न्यायेन। अस्मिन्नर्थे प्रतिवस्तूपमां दर्शयति—पङ्कजं षट्पदश्रेणिभिरेव न, सशैवलासङ्गमपि प्रकाशते इति। षट्पदानां श्रेणिभिः समूहैरेव न केवलं प्रकाशते, अपितु सशैवलासङ्गमपि। शैवलैरासङ्गः सम्पर्कः शैवलासङ्गः, तत्सहितं सशैवलासङ्गं, तथाभूतं सदपि प्रकाशते शोभते। ‘काशृ दीप्तौ’ इति धातुः। अत्रापि पूर्वार्धे परिवृत्तिर्द्रष्टव्या।।९।।

प्रतिक्षणं सा कृतरोमविक्रियां
व्रताय मौञ्जीं त्रिगुणां बभार याम्।
अकारि तत्पूर्वनिबद्धया तया
सरागमस्या रशनागुणास्पदम्॥१०॥

प्रकाशिका

प्रतिक्षणमिति। प्रतिक्षणं रोमाञ्चकरणं मौञ्ज्यास्त्रिगुणत्वेन दुस्सहतरत्वात्। व्रतायेत्यावश्यकत्वमुक्तम्। तत्पूर्वनिबद्धत्वं रागहेतुः। रशनागुणास्पदशब्देन रशनापरिवृत्तिर्द्योत्यते।।१०।।

विवरणम्

व्रतायावश्यकर्तव्यं मौञ्जीबन्धनमप्याह—

प्रतिक्षणमिति। सा त्रिगुणां यां मौञ्जीं व्रताय बभार तत्पूर्वनिबद्धया तया अस्याः रशनागुणास्पदं सरागम् अकारि। त्रयो गुणा आवृत्तयो यस्यास्ताम्। यां मौञ्जीं मुञ्जलतया कृतां मेखलां व्रताय बभार। तत्पूर्वमिति बन्धनक्रियाविशेषणम्। तदेव बन्धनं पूर्वं यथा भवति तथा नितरां बद्धया। इदम्पूर्वनिबद्धयेत्यर्थः। इदं सरागत्वविधाने हेतुः। तया मौञ्ज्या अस्याः पार्वत्याः रशनागुणास्पदं काञ्चीगुणस्थानम्। सरागमकारि राग आरुण्यं, तद्युक्तं कृतम्। प्रतिक्षणं कृतरोमविक्रियां, त्रिगुणत्वेनात्यन्तदुःसहत्वात् क्षणे क्षणे विहितरोमाञ्चामित्यर्थः। अत्र रशनागुणास्पदशब्देन रशनां परित्यज्य तत्स्थाने मौञ्जीबन्धनं द्योत्यत इति परिवृत्तिर्ध्वन्यते। अत्र सरागादिशब्दशक्त्यार्थान्तरमपि व्यज्यते। यथा कश्चित् कामी कयाचिन्नायिकया पूर्वं चिरसङ्गतः सन् अपूर्वया त्र्यधिकगुणयान्यया सङ्गतः सुतरां रक्तो भवति, तत्संयोगे प्रतिक्षणमुद्भूतरोमाञ्चोऽपि भवति, तथास्याः कटिप्रदेशो रशनया चिरसङ्गतः सन् त्रिगुणया तत्पूर्वनिबद्धया विहितरोमाञ्चया मौञ्ज्या नितरां सरागो विहित इति।।१०।।

निसृष्टरागादधरान्निवर्तितः
स्तनाङ्गरागारुणिताच्च कन्दुकात्।
कुशाङ्कुरादानपरिक्षताङ्गुलिः
कृतोऽक्षसूत्रप्रणयी तया करः॥११॥

प्रकाशिका

निसृष्टेति। निसृष्टस्त्यक्तः रागो लाक्षादिः। कन्दुकस्य पतनसमये स्तनयोरुपरि स्थापितत्वादङ्गरागारुणितत्वम्। अत्र पर्यायः परिवृत्तितुल्यफलः।।११।।

विवरणम्

कुशादानमक्षमालाधारणं चाह—

निसृष्टेति। तया करः निसृष्टरागाद् अधरात् स्तनाङ्गरागारुणितात् कन्दुकाच्च निवर्तितः कुशाङ्कुरादानपरिक्षताङ्गुलिः अक्षसूत्रप्रणयी कृतः। निसृष्टस्त्यक्तो रागो लाक्षादिर्यस्मात्। इदं करनिवर्तने हेतुः। स्तनतटघटितैरङ्गरागैः कुङ्कुमाद्यनुलेपनैररुणिताद् अरुणीकृतात् कन्दुकाच्च निवर्तितो वारितः। कन्दुकस्य पतनसमये स्तनयोरुपरि स्थापितत्वात् तस्य तदङ्गरागारुणितत्वम्। एतच्च कन्दुकसेवास्वभावादवसेयम्। कुशानां दर्भाणाम् अङ्कुराः कुशाङ्कुराः। 'अङ्कुरोऽभिनवोद्भिदी'-त्यमरः। तेषां परिस्तरणाद्यर्थमादानेन परिक्षताः परितः समन्तात् क्षता अङ्गुलयो यस्य स तथा। कुशानां क्रूरस्पर्शत्वमङ्गुलिपरिक्षतौ हेतुः। अङ्कुरशब्दोपादानादत्यन्तक्रूरस्पर्शत्वं सूचितम्। अक्षसूत्रमक्षमाला। प्रणयः स्नेहः परिचयो वा। 'प्रणयः स्यात् परिचये याच्ञायां सौहृदेऽपि च' इति वैजयन्ती। अक्षसूत्रे प्रणयोऽस्यास्तीत्यक्षसूत्रप्रणयी। पार्वती तपस्समये निजकरमधररञ्जनकन्दुकाघातरूपात् कार्यद्वयान्निवार्य कुशाङ्कुरादानाक्षमालापरिवर्तनरूपकार्यद्वयपरमकरोदित्यर्थः। अत्रैकस्यैव करस्याधरादौ दर्भाङ्कुरादौ च क्रमेण वर्तनात् पर्यायोऽलङ्कारः। 'एकमनेकस्मिन्ननेकमेकस्मिन् वा क्रमेण पर्यायः' [अठं.स.] इति। फलतस्तु परिवृत्तिरेव, पर्यायस्यात्र वैचित्र्यविशेषाभावात्।।११।।

महार्हशय्यापरिवर्तनच्युतैः
स्वकेशपुष्पैरपि या स्म दूयते।
अशेत सा बाहुलतोपधायिनी
निषेदुषी स्थण्डिल एव केवले॥१२॥

प्रकाशिका

महार्हेति। महार्हशब्देन हंसतूलगर्भत्वमुक्तम्। स्वकेशपुष्पैः अर्थादङ्गानि मृद्नद्भिः। बाहुलतामुपधानं कुर्वती। निषेदुषी दिवस उपविष्टा। स्थण्डिले भूमौ। केवले अनास्तृते। अत्र **याज्ञवल्क्यः**—

स्वंप्याद् भूमौ शुची रात्रौ दिवसं प्रपदै(नियमै)र्नयेत्।
स्थानासनविहारैर्वा योगाभ्यासेन वा तथा।।(३.५१)

इति।।१२।।

विवरणम्

अथ—

स्वप्याद् भूमौ शुची रात्रौ दिवसं नियमैर्नयेत्।
स्थानासनविहारैर्वा योगाभ्यासेन वा तथा।।

इति याज्ञवल्क्यवचनसिद्धत्वाद् व्रतिनामवश्यकर्तव्यं भूमिशयनमाह—

महार्हेति। या महार्हशय्यापरिवर्तनच्युतैः स्वकेशपुष्पैः अपि दूयते स्म, सा केवले स्थण्डिल एव निषेदुषी अशेत। महार्हायाम् अनर्घदुकूलनिर्मितायामतिमृदुलतूलगर्भायां च शय्यायां यत् परिवर्तनं परितो वर्तनं, कादाचित्कं विवलनमित्यर्थः, तेन च्युतैः पतितैः। स्वकेशपुष्पैः, स्वस्य केशे यानि पुष्पाणि प्रसाधिकाजनैः सौरभ्यातिशयोद्भावनार्थं निक्षिप्तानि, तैः। शय्यायां पतित्वा शरीरं स्पृशद्भिरित्यर्थात् सिध्यति। किं पुनः पृथिवीगतैः पाषाणप्रमुखैः कठिनद्रव्यैरित्यपिशब्दार्थः। दूयते स्म सुकुमारशरीरत्वात् परितापं प्रापत्। सा केवले अनास्तृते। उत्तरच्छदमात्रेणापि रहित इत्यर्थः। स्थण्डिले भूमौ। न कदाचिच्छय्यायामपीत्येवकारार्थः। निषेदुषी दिवसेष्विति शेषः। दिवसेषु स्थण्डिल एवावस्थिता सती निशायां तत्रैवाशेतेत्यर्थः। भूतलशयने तदुचितमुपधानमप्याह—बाहुलतोपधायिनीति। प्रशस्तो बाहुर्बाहुलता, तामुपदधातीति 'व्रते' (३.२.८०) इति णिनिः। 'आतो युक् चिण्कृतोः' (७.३.३३) इति युक्। अत्र शय्यापरिवृत्तिः।।१२।।

पुनर्ग्रहीतुं नियमस्थया तया
द्वयीषु निक्षेप इवार्पितं द्वयम्।
लतासु तन्वीषु विलासचेष्टितं
विलोलदृष्टिर्हरिणाङ्गनासु च॥१३॥

प्रकाशिका

पुनरिति। पुनर्ग्रहीतुम् अर्थात् प्रियसङ्गमसमये। नियमस्थयेति विलासत्यागे हेतुः। द्वयीषु इति पाठः। निक्षेपशब्दोऽत्र द्रव्यपरः। द्वयं निक्षेपत्वेनार्पितमिवेत्यर्थः। अत्र तुल्ययोगिता।।१३।।

विवरणम्

विलासादीनां विराममाह—

पुनरिति। नियमस्थया तया पुनः ग्रहीतुं द्वयीषु द्वयं निक्षेपः अर्पितमिव। नियमाः शौचादयः। 'नियमाः शौचसन्तोषतपोयज्ञहुतादयः' इति भोजः। तेषु तिष्ठन्त्या। इदं विलासादेरन्यत्र निक्षेपे हेतुः। पुनः अर्थात् प्रियसङ्गमसमये। ग्रहीतुं स्वीकर्तुम्। द्वयीषु वक्ष्यमाणासु वस्तुद्वयीषु। द्वयं वक्ष्यमाणं वस्तुद्वयम्। अभीष्टकाले समादातुं सत्यवादिनि भ्रमादिरहिते विश्वसनीये जने धनस्य न्यासो निक्षेप इत्युच्यते। निक्षिप्यतेऽसाविति व्युत्पत्त्या तद्धनं च निक्षेपशब्दार्थः। अत्र तु निक्षेपशब्दो द्रव्यपरः, निक्षेपक्रियायाः अर्पणक्रियान्वयानुपपत्तेः। अर्पितमिव निक्षेपरूपेण न्यस्तमिवेत्युत्प्रेक्षा। किं तद् द्वयं, कासु वा द्वयीष्वित्याशङ्कायामाह—विलासचेष्टितं तन्वीषु लतासु विलोलदृष्टिः हरिणाङ्गनासु चेति। विलासेन यच्चेष्टितं व्यापारः, तत् तन्वीषु कृशासु लतासु मालत्यादिषु अर्पितम्। विलोला चञ्चला दृष्टिः हरिणाङ्गनासु मृगीषु च अर्पिता। तपस्समये निश्चलशरीरायां नासाग्रदत्तलोचनायां च देव्यां विलासविलोलविलोचनयोरदर्शनं लतासु मृगीषु च तद्दर्शनं चात्रोत्प्रेक्षाहेतुः।।१३।।

अतन्द्रिता सा स्वयमेव वृक्षकान्
घटस्तनप्रस्नविनी व्यवर्धयत्।
गुहोऽपि येषां प्रथमाप्तजन्मनां
न पुत्रवात्सल्यमपाकरिष्यति।।१४।।

प्रकाशिका

अथ द्वाभ्यां मुनिवृत्तिं वर्णयति—

अतन्द्रितेति। तन्द्रा आलस्यम्, अनलसेत्यर्थः। वृक्षकान् अल्पार्थे कः। स्वयमेवेति 'स्वयं दासास्तपस्विन' इति न्यायाद्, नान्यैः। गुहोऽपीति, विश्वस्यापि पितरौ शिवौ येनैव पुत्रिणौ, सोऽपीत्यर्थः। अत्र हेतुः प्रथमाप्तजन्मत्वम्। प्रथममेव वात्सल्यस्य रूढमूलत्वादित्यर्थः। अत्र विरोधोऽलङ्कारः।।१४।।

विवरणम्

इत्थमुपक्रान्ततपसो देव्याः समाधेरुपरमे तत्कालोचितां मुनिवृत्तिं वर्णयति—

अतन्द्रितेति। सा अतन्द्रिता स्वयमेव वृक्षकान् व्यवर्धयत्। अतन्द्रिता अनलसेत्यर्थः। स्वयमेव, न तु परिजनैः। 'स्वयं दासास्तपस्विन' इति न्यायादिति भावः। वृक्षकान्, वृक्षशब्दादल्पार्थे कः। बालवृक्षानित्यर्थः। व्यवर्धयद् विशेषेण अवर्धयत्। स्वयमेव बीजावापपुरःसरमुत्तमवृक्षानुत्पाद्य घटोदकेन सिञ्चतीताननितरामवर्धयदित्यर्थः। बालवर्धनोपायभूतं जलाहरणं भङ्ग्यन्तरेणाह—घटस्तनप्रस्नविनीति। घट एव स्तनः घटस्तनः, तस्य प्रस्नवः क्षरत् क्षीरं, तद्वती। अत्र स्तनप्रस्नवशब्दौ वक्ष्यमाणपुत्रवात्सल्यस्फुरणार्थौ। एवम्भूतेषु वृक्षेषु देव्या वात्सल्यातिशयं भङ्ग्यन्तरेणाह—गुहः अपि येषां पुत्रवात्सल्यं न अपाकरिष्यतीति। गुहोऽपि, त्रैलोक्यपितरावपि पार्वतीपरमेश्वरौ येनैव पुत्रवत्त्वाभिमानमुद्वहतः, स सुब्रह्मण्योऽपीत्यर्थः। येषां वृक्षाणाम्। सम्बन्धषष्ठी चेयम्। पुत्रवात्सल्यं पुत्रा ममैत इति देव्या वात्सल्यम्। पुत्रेषूचितं वात्सल्यमित्यर्थः। न अपाकरिष्यति स्वोद्भवानन्तरं न निराकरिष्यति। तत्र हेतुमाह—प्रथमाप्तजन्मनामिति। गुहोद्भवात् पूर्वमेवाप्तं प्राप्तं जन्म यैस्तेषाम्। देव्यास्तद्विषयस्य वात्सल्यस्य नितरां रूढत्वादित्यर्थः। नहि रूढमूलो महद्भिरपि चाल्यत इति भावः। अत्र वात्सल्यापाकरणाभावो गुहं प्रति विरुद्ध इति विरोधोऽलङ्कारः।।१४।।

अरण्यबीजाञ्जलिदानलालिता-
स्तथा च तस्यां हरिणा विशश्वसुः।
यथा तदीयैर्नयनैः कुतूहलात्
पुरः सखीनाममिमीत लोचने॥१५॥

प्रकाशिका

अरण्येति। अरण्यबीजं नीवारादि। कुतूहलात् कियदन्तरमिति ज्ञातुमौत्सुक्यात्। लोचने अर्थादात्मीये।।१५।।

विवरणम्

सर्वभूतदयापरायां वनमात्रनिवासिन्यां देव्यां मृगाणामपि विश्वासातिशयमाह—

अरण्येति। हरिणाः तस्यां तथा च विशश्वसुः। हरिणाः मृगाः। तथा वक्ष्यमाणप्रकारेण। चशब्दोऽवधारणे, तथैव। विशश्वसुः विश्वासं जग्मुः। तथाशब्दोक्तां विश्वासस्य परमकाष्ठामेव प्रदर्शयति—यथा कुतूहलात् सखीनां पुरः

तदीयैः नयनैः लोचने अमिमीतेति। यथा यादृशे विश्वासे सतीर्थः। पार्वतीत्यर्थात् सिध्यति। कुतूहलाद् मद्विलोचनहरिणविलोचनयोः कियदन्तरमिति ज्ञातुं बालस्वभावमात्रजनितादौत्सुक्यात्। सखीनां पुरः, न तु रहसि। अनेन विश्वासाधिक्यमुक्तम्। लोचने आत्मीये इति शेषः। अमिमीत मानं कुर्यात्, तथा विशश्वसुरिति पूर्वेणान्वयः। विश्वासाधिक्ये हेतुमाह—अरण्यबीजाञ्जलिदानलालिता इति। अरण्यभवानां बीजानां नीवारादीनाम् अञ्जलयः अरण्यबीजाञ्जलयः। अञ्जलयः करसम्पुटानि। अञ्जलिपरिमितानामारण्यबीजानां दानेन लालिता इत्यर्थः। अत्राञ्जलिशब्दस्योपादानमौदार्यं प्रतिपादयितुम्। यावता विश्वासेनात्मीयं नयनं मृगनयनस्योपरि निधाय मध्ये मध्ये कियदन्तरमनयोरिति सखीजनं पृष्ट्वा मानं कर्तुं शक्यते, नीवारादिदानलालितानां मृगाणां देव्यां तावान् विश्वासो बभूवेति विश्वासाधिक्यमेवात्र प्रतिपाद्यं, न तु मानमपि। यदि देव्याः कदाचिदेवम्भूतमानापेक्षा भवेत्, तर्हि तदपि कर्तुं शक्यमेवेति भावः। मृगपोषणमपि मुनीनां स्वभावः। यथोक्तं रघुवंशे—'तदङ्कशय्याच्युतनाभिनाला कच्चिन्मृगीणामनघा प्रसूतिः।' (५.७) इति।।१५।।

कृताभिषेकां हुतजातवेदसं
त्वगुत्तरासङ्गवतीमधीतिनीम्।
दिदृक्षवस्तामृषयोऽभ्युपागमन्
न धर्मवृद्धेषु वयः समीक्ष्यते॥१६॥

प्रकाशिका

मुनिवृत्तेः प्रभावमाह—

कृतेति। त्वग् वल्कलम्। उत्तरासङ्गः उत्तरीयम्। अधीतिनीमिति अनयाधीतमित्यर्थे 'इष्टादिभ्यश्च' (५.२.८८) इतीनिः। कृताध्ययनामित्यर्थः। अत्र विशेषणानि दिदृक्षाभिप्रायाणीति परिकरः। ननु बालैर्वृद्धा उपस्थेया इत्याह—न धर्मवृद्धेष्विति। तद्धि मुख्यं वृद्धत्वमिति भावः।।१६।।

विवरणम्

इत्थमनुष्ठिताया मुनिवृत्ते प्रभावातिशयमाह—

कृताभिषेकामिति। मुनयः तां दिदृक्षवः अभ्युपागमन्। मुनयः कृतबहुकालतपसो महर्षयः। तां पार्वतीं दिदृक्षवः द्रष्टुमिच्छवः। इदं च तत्त्वजिज्ञासुत्वादीनामप्युपलक्षणम्। अभ्युपागमन् अभिमुखीकृत्य तत्समीपं प्राप्ताः। तत्त्वजिज्ञासया

तत्समीपमुपगम्यावसरं प्रतीक्षमाणास्तदभिमुखं स्थिता इत्यर्थः। अनेन गुणानुरागात् सदैव तत्रावस्थानमपि दर्शितम्। दिदृक्षाभिप्रायाणि विशेषणान्याह—कृताभिषेकामित्यादिना। कृतः अभिषेकः त्रिषवणस्नानं यया ताम्। अनेन शरीरशुद्धिरुक्ता। सर्ववैदिकर्मणां स्नानमूलत्वात् स्नानस्य प्रथममुपादानम्।

अस्नात्वा नाचरेत् कर्म जपहोमादि किञ्चन।
स्नानमूलाः क्रियाः सर्वाः श्रुतिस्मृत्युदिता नृणाम्।।

इति स्मृतेः। स्नानानन्तरं सायम्प्रातरवश्यकर्तव्यस्य होमस्याप्यनुष्ठानमाह—हुतजातवेदसमिति। हुतो जातवेदा अग्निर्यया ताम्। अयं तु तपश्चरणाङ्गभूतो नैमित्तिको होमः, न तु नित्यः, तस्य विवाहानन्तरमेव विहितत्वात्। अनेनान्तःकरणशुद्धिरुक्ता। वनस्थोचितकर्मानुष्ठानमाह—त्वगुत्तरासङ्गवतीमिति। त्वग् वल्कलम्। उत्तरासङ्ग उत्तरीयम्। वल्कलोत्तरीयवतीमित्यर्थः। इदं तु परिधानवल्कस्याप्युपलक्षणम्। अनेन सङ्गनिवृत्तिद्वारेणान्तःकरणशुद्धिरेव प्रतिपाद्यते। रागद्वेषौ हि मानसमाविलयतः। 'मुमुक्षवोऽप्यधीयीरन् दुरितक्षयकाम्यया' इत्यादिवचनसिद्धं दुरितक्षयप्रयोजनमध्ययनमाह—अधीतिनीमिति। कृताध्ययनामित्यर्थः। अनयाधीतमिति 'इष्टादिभ्यश्च' (५.२.८८) इतीनिप्रत्ययः। अनेन दुरितक्षयद्वारेणात्मशुद्धिरुक्ता। एतैश्च विशेषणैर्देव्या दर्शनमात्रस्यापि पापक्षयहेतुत्वमुक्तमिति विशेषणानां दिदृक्षाभिप्रायत्वात् परिकरोऽलङ्कारः। ननु बालैर्वृद्धा एव सेव्याः, अत्र तु विपरीतमेव दृश्यत इत्यत्राह—धर्मवृद्धेषु वयः न समीक्ष्यत इति। धर्मवृद्धेषु शीलवृद्धेषु। वेदोक्तार्थानुष्ठानतत्परेष्वित्यर्थः। चतुर्विधं हि वृद्धत्वम्। तत्र वैराग्येणैकं वृद्धत्वम्। यथोक्तं स्कान्दपुराणे—'वैराग्येणापि वृद्धस्ते सूनुः पर्वतकन्यके!' इति। ज्ञानशीलवयोभिस्त्रीणि। यथोक्तं रामायणे—'ज्ञानवृद्धैर्वयोवृद्धैः शीलवृद्धैश्च सज्जनैः, कथयन्नास्त वै नित्यम्' इति। येषु त्रिविधं वृद्धत्वम् एकैकं वा, तेषु वयो न समीक्ष्यते न निरूप्यते। वयोवृद्धत्वस्याप्राधान्यादिति भावः। देव्यां तु शीलवृद्धत्वमेव सर्वैरपि विशेषणैः प्राधान्येनोपात्तम्। त्वगुत्तरासङ्गवतीमित्यनेन वैराग्यवृद्धत्वम्, अधीतिनीमित्यनेन ज्ञानवृद्धत्वमप्यर्थादुपात्तमिति मन्तव्यम्।।१६।।

विरोधिसत्त्वोज्झितपूर्वमत्सरं
द्रुमैरभीष्टप्रसवार्चितातिथि।
नवोटजाभ्यन्तरसम्भृतानलं
तपोवनं तत्र बभूव पावनम्॥१७॥

प्रकाशिका

विरोधीति। पूर्वशब्देनानादित्वमुच्यते। अभीष्टैः, यद्यदिच्छति तेन तेनेत्यर्थः। प्रसवैः फलपुष्पैः। तत्र गौरीशिखरे। पावनं दर्शनादपीत्यर्थः। एवं गुणानुरागादागच्छत्स्वावसथं मुनिषु न केवलं देव्या आश्रममात्रम्, अपित्वेवंगुणविशिष्टं तपोवनमेव तत्रासीदित्यर्थः।।१७।।

विवरणम्

तादृशदेवीनिवासभूतस्य तपोवनस्यापि प्रभावातिशयमाह—

विरोधीति। तत्र पावनं तपोवनं बभूव। तत्र गौरीशिखरे। पावनं दर्शनमात्रेणापि शुद्धिकरमित्यर्थः। तपोवनं न देव्या आश्रममात्रम्, अपितु एवम्भूतगुणविशिष्टत्वात् तपोवनमेव बभूवेति भावः। तपोवनोचितानि विशेषणान्याह—विरोधिसत्त्वोज्झितपूर्वमत्सरमित्यादिना। विरोधिभिः जात्या वैरिभिः सत्त्वैः गजसिंहादिजन्तुभिः उज्झितः त्यक्तः पूर्वमत्सरः अनादिवैरं यस्मिंस्तत्तथा। 'स्पृशति कलभः सैंहीं दंष्ट्रां मृणालधिया मुहुरि'त्यादितपोवनवृत्तान्तोऽत्र द्रष्टव्यः। गुणानुरागादागच्छतां मुनीनामातिथ्यवेलायां यद्यदभीष्टं तत्तत् सर्वं तपोवनपादपेष्वासीदित्याह—द्रुमैरभीष्टप्रसवार्चितानिथीति। द्रुमैः देवीतपोवनोद्भवैर्वृक्षैः। अत्रार्चने देव्या एव कर्तृत्वेऽपि वृक्षाणां कर्तृत्वेनोपादानं तत्तदवसरे तत्तद्द्रव्योत्पादनेन वृक्षाणामेव प्राधान्यद्योतनार्थम्। अभीष्टैरिष्टैः कटुतिक्तमधुरादिषु द्रव्यविशेषेषु यादृशान्यतिथीनामत्यन्तमिष्टानि, घर्मादिकालविशेषेषु यादृशान्याकाङ्क्षितानि च, तादृशैः प्रसवैः फलपुष्पैः। 'प्रसवः पुष्पफलयोरि'ति भोजः। तैरर्चिताः पूजिता अतिथयः आगन्तुका यस्मिंस्तत् तथा। सायम्प्रातरवश्यकर्तव्यस्य होमस्य साधनभूतोऽग्निरपि तपश्चरणातिथिसत्कारादिकार्यान्तरव्याकुलयापि देव्या सावधानतया सम्भृतोऽभूदित्याह—नवोटजाभ्यन्तरसम्भृतानलमिति। नवस्याभिनवस्य उटजस्य पर्णशालायाः। 'पर्णशालोटजोऽस्त्रियामि'ति सिंहः। अभ्यन्तरे अन्तराले। 'अभ्यन्तरं त्वन्तरालम्' इति सिंहः। अन्तर्भाग इत्यर्थः। सम्भृतः सम्यग्रक्षितः अनलः अग्निर्यस्मिंस्तत्तथा। वर्षादिभयनिवृत्त्यर्थं नवत्वमुपात्तम्। सम्भृतानलत्वमपि तपोवनानां साधारणो धर्मः। पावनत्वोपपादने हेतुश्च 'गावो विप्रास्तथाग्निश्च यस्मिन् देशे प्रतिष्ठिताः, तं देशं पावनं विद्याद्' इति वचनात्।।१७।।

यदा फलं सर्वसमा समाधिना
न तावता लभ्यममंस्त वाञ्छितम्।
तदानपेक्ष्य स्वशरीरमार्दवं
तपो महत् सा चरितुं प्रचक्रमे।।१८।।

प्रकाशिका

अथोत्साहस्य परां काष्ठां वर्णयितुमुपक्रमते—

यदेति। तावता तन्मात्रेण, तपोमात्रेणेत्यर्थः। आनुषङ्गिकस्य फलान्तरस्य प्रभावादेर्लाभाद् वाञ्छितमिति विशेषणम्। स्वशरीरानपेक्षणे हेतुः सर्वसमेति। सर्वत्र प्रियाप्रियेषु समा निर्विशेषचित्ता।।१८।।

विवरणम्

अथेत्थमुपवर्णितस्योत्साहात्मकस्य वीरस्य परां काष्ठां वर्णयितुमुपक्रमते—

यदेति। यदा सा तावता समाधिना काङ्क्षितं फलं लभ्यं न अमंस्त, तदा स्वशरीरमार्दवम् अनपेक्ष्य महत् तपः चरितुं प्रचक्रमे। तावता तावन्मात्रेण। पूर्वोक्तपरिमाणेनेत्यर्थः। समाधिना तपसा काङ्क्षितं वाञ्छितं हरवशीकरणरूपं फलम्। आनुषङ्गिकाणां प्रभावादीनां फलान्तराणां तावन्मात्रेणैव तपसा लब्धत्वात् काङ्क्षितमिति विशेषणं प्रयुक्तम्। लभ्यं लब्धुं शक्यं न अमंस्त न कल्पितवती। तदा असाध्यत्वावगमसमनन्तरम्। स्वस्य शरीरस्य यन्मार्दवं शिरीषकुसुमादप्यधिकं सौकुमार्यं, तदपि अनपेक्ष्य अविचार्य महत् कठिनशरीरैरप्यत्यन्तदुश्चरं तपः चरितुं कर्तुं प्रचक्रमे आरेभे। शरीरमार्दवानपेक्षणे हेतुमाह—सर्वसमेति। सर्वत्र शीतोष्ण-प्रियाप्रियादिषु द्वन्द्वेषु समा तुल्यबुद्धिः। यदि काङ्क्षितं फलं दुर्लभं भवेत्, तर्हि किं ममानेन देहेनेति निश्चित्य क्रूरे तपसि सावधानचित्ता सा बभूवेत्यर्थः।।१८।।

क्लमं ययौ कन्दुकसेवयापि या
तया मुनीनां चरितं व्यगाह्यत।
ध्रुवं वपुः काञ्चनपद्मधर्मि य-
न्मृदु प्रकृत्या च ससारमेव च।।१९।।

प्रकाशिका

तथाविधया तया न केवलं तपः प्रक्रान्तम्, अपित्ववगाढं चेति सविस्मयमाह—

क्लममिति। अत्रेदमूह्यमित्याह—ध्रुवमिति। यद् वपुः काञ्चनपद्मधर्मि, तत् प्रकृत्या मृद्वपि ध्रुवं ससारमेवेत्यन्वयः। काञ्चनपद्मधर्मित्वस्य हेतोः ससारत्वेन साध्येन व्याप्तिर्दर्शिता। अर्थान्तरन्यासप्रकारश्चायम्।।१९।।

विवरणम्

न केवलं देवी दुश्चरे तपसि निश्चलं मनश्चकार, अपितु तपस्समुद्रावगाहनमेव कृतवतीति सविस्मयमाह—

क्लममिति। या कन्दुकसेवया अपि क्लमं ययौ तया मुनीनां चरितं व्यगाह्यत। कन्दुकसेवया कौतुकमात्रारब्धया कन्दुकस्य सेवया कन्दुकाघातेनापि क्लमं ययौ शरीरसादमगात्, तया मुनीनां कठिनशरीराणां महर्षीणां चरितम् अत्यन्तदुश्चरतपश्चरणरूपो व्यापारः व्यगाह्यत अवजगाहे। यदत्र देव्या मृदुशरीरयापि स्थिरव्यवसायतया दुश्चरे तपसि प्रवृत्तं, तेनेदमिदानीं व्यवस्थितमित्याह—यद्वपुः काञ्चनपद्मधर्मि तत् प्रकृत्या मृदु अपि ध्रुवं ससारमेवेति। काञ्चनपद्मधर्मोऽस्यास्तीति काञ्चनपद्मधर्मि। काञ्चनमयं पद्मं काञ्चनपद्मम्। तच्च स्वर्गापगादिसमुद्भवम्। तस्य धर्मश्च मनोहरत्वम्। मनोहरं वपुः प्रकृत्या स्वभावतो मृदुत्वेन प्रतीयमानमपि नूनं ससारं शक्तिमदेव। अत्र काञ्चनपद्मधर्मित्वस्य हेतोः ससारत्वेन साध्येन व्याप्तिः प्रदर्शितेत्यर्थान्तरन्यासप्रकारभेद एवायम्।।१९।।

शुचौ चतुर्ण्णां ज्वलतां शुचिस्मिता
हविर्भुजां मध्यगता सुमध्यमा।
विजित्य नेत्रप्रतिघातिनीं प्रभा-
मनन्यदृष्टिः सवितारमैक्षत॥२०॥

प्रकाशिका

अथ तपःप्रकारानाह—

शुचाविति। शुचिर्ग्रीष्मः। विजित्य न्यग्भाव्य। प्रभाम् अर्थात् सवितुः। अनन्यदृष्टिर्निश्चलदृष्टिः। सवितात्र पञ्चमोऽग्निरिति पञ्चतपस्त्वमुक्तम्।।२०।।

विवरणम्

अथ तपःप्रकारा एव कथ्यन्ते। तत्रादौ ग्रीष्मकृतं तपःप्रकारं दर्शयति—

शुचाविति। सा शुचौ ज्वलतां चतुर्णां हविर्भुजां मध्यगता नेत्रप्रतिघातिनीं प्रभां विजित्य अनन्यदृष्टिः सवितारम् ऐक्षत। शुचौ, शुचिशब्देनात्रावयवावयविनोः सम्बन्धनियमाद् ग्रीष्मो लभ्यते। शुचिमासे लब्धप्रतिष्ठस्य ग्रीष्मस्य तापाधिक्यप्रतीतिश्च फलम्। ज्वलतामिति वर्तमानप्रयोगेण निरन्तरज्वलनमुक्तम्। तेन तापाधिक्यं ध्वन्यते। चतुर्णां पुरतः पृष्ठे पार्श्वयोश्च स्थापितानाम्। हविर्भुजामग्नीनां मध्यगता मध्यभागं गता सती। नेत्रप्रतिघातिनीम् अवेक्षकाणां नेत्राणि प्रतिहन्तुं शीलमस्या इति तथा। तादृशीं प्रभां रश्मिम्, अर्थात् सवितुरिति सिध्यति। विजित्य सतताभ्यासेन न्यग्भाव्य। अनन्यदृष्टिः निश्चलदृष्टिरित्यर्थः। उदयादारभ्यास्तमयपर्यन्तमन्यत् किमप्यनवलोकयन्ती सती। सवितारं सूर्यम् ऐक्षत विलो-

कितवती। अनेन पञ्चतपस्त्वमुक्तम्। 'ग्रीष्मे पञ्चाग्निमध्यस्थ' इति तल्लक्षणम्। तत्र चत्वारोऽग्नयः। पञ्चमस्त्वग्निः सूर्य एव। यथोक्तं माघेन—

> तेजस्विमध्ये तेजस्वी दवीयानपि गण्यते।
> पञ्चमः पञ्चतपसस्तपनो जातवेदसाम्।। (२.५१)

इति। स्थिरव्यवसायत्वात् तदवस्थायास्तस्याः पीडाभावमाह—शुचिस्मितेति। शुचि निर्मलं स्मितं मन्दस्मितं यस्याः सा तथा। स्वाभाविकं शुचिस्मितत्वं तदानीमपि तथैवावस्थितमित्यर्थः। पीडायाः सम्भावनां दर्शयति—सुमध्यमेति। कृशावलग्नेत्यर्थः। सा कथमेतादृशीं पीडां सहेत, अहो स्थिरव्यवसायत्वमस्या इति भावः। अनेन कारणसामग्र्ये सत्यपि कार्यानुत्पत्तिर्ध्वन्यते।।२०।।

तथाभितप्तं सवितुर्गभस्तिभि-
र्मुखं तदीयं कमलश्रियं दधौ।
अपाङ्गयोः केवलमस्य दीर्घयोः
शनैः शनैः श्यामिकया कृतं पदम्।।२१।।

प्रकाशिका

तत्र विषादाद्यभावमाह—

तथेति। तथा तेन निश्चलनिरीक्षणप्रकारेण। कमलश्रियं दधौ उज्ज्वलमेवाभवत्। अपाङ्गेति ससारत्वादाननेऽवकाशमलभमाना श्यामिका मृदुतरमपाङ्गमेवाश्रितवतीत्यर्थः। तच्च शोभावहमेवेति भावः।।२१।।

विवरणम्

तादृशे तपसि वर्तमानाया देव्या न केवलं पीडाभावो जातः, अपितु प्रसादहेतुकमौज्ज्वल्यमेवाभूदित्याह—

तथेति। सवितुः गभस्तिभिः तथा अभितप्तं तदीयं मुखं कमलश्रियं दधौ। सवितुः सूर्यस्य गभस्तिभिः रश्मिभिः तथा पूर्वोक्तप्रकारेण अभितप्तं नितरां तप्तं तदीयं मुखं देव्या वदनं कमलस्य पद्मस्य श्रियं शोभाम्। 'श्रीरिन्दिरायां शोभायाम्' इत्यजयः। दधौ दधार। यथा कमलं सूर्यरश्मिसंयोगे नितरां शोभते, तथास्या वदनमपीति भावः। न केवलं मनोहरत्वात् तद्वदनस्य कमलसाम्यम्, अपितु सूर्यरश्मिसंयोगे नितरामौज्ज्वल्याच्चेत्यर्थः। वदने निरवकाशा श्यामिका पुनस्तदीयमपाङ्गमेवाससादेत्याह—श्यामिकया केवलम् अस्य अपाङ्गयोः शनैश्शनैः पदं कृतम् इति। श्यामिकया कालिम्ना। केवलशब्देन ससारे वदने निरवकाशत्व-

मुक्तम्। अस्य वदनस्य अपाङ्गयोः कटाक्षयोः। तयोरतिमृदुत्वादिति भावः। अपाङ्गयोर्मुखसम्बन्धित्ववचनेन यथा कश्चित् प्रबले निजशत्रौ अवकाशमलभमानस्तदीयं कञ्चन पीडयितुमारभते, तथा श्यामिकापि वदनेऽवकाशमलभमाना तदीयत्वादपाङ्गयोर्निजशक्तिं प्रकटयामासेति प्रत्यनीकालङ्कारो व्यज्यते। 'प्रतिपक्षप्रतीकाराशक्तौ तदीयतिरस्कारः प्रत्यनीकमि'ति [अलंकारसर्वस्वसूत्रम्] सूत्रम्। तयोरपि न झटिति पदं कृतमित्याह—शनैश्शनैरिति। द्विर्वचनेनातिमान्द्यमुक्तम्। तेन च मृदुतरयोरनयोरपि ससारत्वं ध्वन्यते। पदम् अवस्थानं कृतम्। अपाङ्गयोस्तु सापि श्यामिका शोभावहैव। श्यामिकायास्तदपाङ्गयोर्विशेषेण शोभावहत्वमाह—दीर्घयोरिति। अनेन 'गुणिनां गुणहानिराहिता या रिपुणा सैव गुणान्तरं प्रसूते' इति न्यायो व्यज्यते।।२१।।

अयाचितोपस्थितमम्बु केवलं
रसात्मकस्योडुपतेश्च रश्मयः।
बभूव तस्याः खलु पारणाविधि-
र्न वृक्षवृत्तिव्यतिरिक्तसाधनम्॥२२॥

प्रकाशिका

तत्र शरीरयात्रामाह—

अयाचितेति। अयाचितोपस्थितमम्बु मेघजलम्। रसोऽमृतम्। पारणाविधिः 'पार समाप्तावित्यस्मात् 'ण्यासश्रन्थो युच्' (३.३.१०७) स्त्रियाम्। व्रतसमाप्तिविधिरित्यर्थः। तथा चोपोषितभोजनं लक्ष्यते। वृक्षाणां वृत्तिर्जीविका तादृशी वृत्तिः। तपोविशेषोऽत्र वृक्षवृत्तिशब्देनोच्यते।।२२।।

विवरणम्

तदवस्थाया देव्याः शरीरयात्राप्रकारमाह—

अयाचितेति। तस्याः खलु केवलम् अयाचितोपस्थितम् अम्बु रसात्मकस्य उडुपतेः रश्मयः च पारणाविधिः बभूव। खलुशब्दो वाक्यालङ्कारे। केवलशब्दः साधनान्तरव्यवच्छेदार्थः। अयाचितमेवोपस्थितं प्राप्तम् अयाचितोपस्थितं, तादृशमम्बु मेघजलम्। रसात्मकस्य अमृतस्वरूपस्य। अनेन तद्रश्मीनां पारणाविधिसाधकत्वमुक्तम्। उडुपतेश्चन्द्रस्य रश्मयः किरणाः। चशब्दस्तदुभयसमुच्चयार्थः। पारणाविधिः 'पार समाप्तावि'त्यस्माद् धातोः 'ण्यासश्रन्थो युच्' इति युचि कृते स्त्रियां पारणारूपसिद्धिः। सैव विधिः व्रतसमाप्तिरित्यर्थः। तेन चोपोषितभोजनं

लक्ष्यते। घर्मकालपर्यन्तमुपोषितताया देव्यास्तदवसानसुलभानि मेघजलानि, दिवसावसानपर्यन्तमुपोषितायास्तु निशायां निशाकररश्मयश्च पारणाविधिर्बभूवेत्यर्थः। किं बहुनेत्याह—वृक्षवृत्तिव्यतिरिक्तसाधनं न इति। वृक्षाणां वृत्तिर्जीविका, ततो व्यतिरिक्तम् अधिकं यत् साधनं फलमूलादि, तत्र पारणाविधिर्बभूवेत्यर्थः। अनेनातिदुश्चरो वृक्षवृत्तिरूपस्तपोविशेषो दर्शित। अनेन श्लोकेन सर्वर्तुषु देव्याः शरीरयात्राविधिरुक्त इति नात्र मेघजलवर्णने काचिदनुपपत्तिः।।२२।।[साधन इति मल्लिनाथः]

निकामतप्ता द्विविधेन वह्निना
नभश्चरेणेन्धनसम्भृतेन सा।
तपात्यये वारिभिरुक्षिता नवै-
र्भुवा सहोष्माणममुञ्चदूर्ध्वगम्॥२३॥

प्रकाशिका

निकामेति। नभश्चरो वह्निरादित्यः। नवैर्वर्षारम्भभाविभिः। तस्मात् प्रागुक्तं मेघाम्बु वार्षिकमनुसन्धेयम्। ऊष्माणं वाष्पम्। 'ग्रीष्मोष्णवाष्पा ऊष्माणः' इति सिंहः। ऊर्ध्वगमूर्ध्वदेशलक्ष्यमित्यर्थः।।२३।।

विवरणम्

इत्थमुपवर्णितं ग्रीष्मकालकृतं तपो वर्षारम्भवृत्तान्तकथनेनोपसंहरति—

निकामेति। नभश्चरेण इन्धनसम्भृतेन च द्विविधेन वह्निना निकामतप्ता तपात्यये नवैः वारिभिः उक्षिता सा भुवा सह ऊर्ध्वगम् ऊष्माणम् अमुञ्चत्। नभसि आकाशे चरतीति नभश्चरो वह्निरादित्यः। पञ्चतपसि पञ्चमाग्नित्वेन प्रसिद्धत्वादादित्यस्य वह्नित्वनिर्देशः। तापाधिक्यप्रतीतिश्च फलम्। इन्धनैः सम्भृतो वर्धितो वह्निरिन्धनसंभृतः। इत्थं द्विविधेन वह्निना भृशं तप्ता सती पुनश्च तपात्यये ग्रीष्मावसाने नवैर्वर्षारम्भसम्भूतैः वारिभिः जलैः उक्षिता सिक्ता च सती सा भुवा सर्वंसहया सह। ऊर्ध्वगम् ऊर्ध्वं गच्छतीत्यूर्ध्वगः, तम्। ऊर्ध्वदेशे धूमाकारेण लक्ष्यमित्यर्थः। ऊष्माणं वाष्पम्। 'ग्रीष्मोष्णवाष्पा ऊष्माण' इत्यमरः। अमुञ्चद् मुक्तवती। ग्रीष्मकाले तप्ता वर्षारम्भे जलैरुक्षिता च सती पृथिवी यथा वाष्पं मुञ्चति, तथेयमपीत्यर्थः। तत्र निकामतप्तत्वं हेतुः। तेन च शरीरे ममत्वबुद्धिविरहो द्योत्यते, तेन च तपस्येकाग्रत्वम्। अत्र सहोक्तिरलङ्कारः। 'सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम्' इति[काव्यप्रकाशे]।।२३।।

स्थिताः क्षणं पक्ष्मसु ताडिताधराः
पयोधरोत्सङ्गनिपातचूर्णिताः।
वलीषु तस्याः स्खलिताः प्रपेदिरे
चिरेण नाभिं प्रथमोदबिन्दवः॥२४॥

प्रकाशिका

इयत्पर्यन्तं ग्रैष्मं तप उक्त्वा वार्षिकं तदाह—

स्थिता इति। अत्र पक्ष्मसु स्थिता इति तेषां घनत्वात्, ताडिताधरा इति पल्लवसाम्यात्, पयोधरोत्सङ्गनिपातचूर्णिता इति तत्काठिन्याद्, वलीषु स्खलिता इति तद्वैषम्यादित्यनुसन्धेयम्। व्यवधानबाहुल्याच्च चिरेण प्राप्तिः। नाभेः प्राप्तत्वं निम्नत्वात्। प्रथमानामेवैवंभावात् प्रथमशब्दः।।२४।।

विवरणम्

इत्थं ग्रीष्मकालकृतं तप उपवर्ण्य वार्षिकं तपो वर्णयितुमुपक्रमते—

स्थिता इति। प्रथमोदबिन्दवः चिरेण तस्याः नाभिं प्रपेदिरे। प्रथमाः वर्षारम्भसमयभाविनः। उदबिन्दवः 'मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च' (६.३.६०) इत्युदकशब्दस्योदादेशः। उदकविन्दव इत्यर्थः। चिरेण महता कालेन। तस्याः नाभिं प्रपेदिरे प्राप्ताः। अत्र नाभेः प्राप्यभूमित्वनिर्देशात् तस्याः नितान्तगम्भीरत्वं द्योत्यते, तेन च नाभेः सौष्ठवम्। एवमेव सर्वावयवानामपि सौष्ठवप्रतिपादनमुखेन जलबिन्दूनां नाभेश्चिरकालप्राप्तौ हेतुमाह चतुर्भिर्विशेषणैः। तत्र शिरसि पतितानां जलबिन्दूनां नयनप्राप्त्यनन्तरं तत्र क्षणावस्थानमाह—पक्ष्मसु क्षणं स्थिता इति। अक्षिरोमसु क्षणकालमवस्थिताः। अनेन पक्ष्मणां निबिडत्वमुक्तम्। तच्च सौष्ठवद्योतकम्। पुनश्च क्रमेणाधरप्राप्तिमाह—ताडिताधरा इति। पयोधरयोः कुचयोः उत्सङ्गे उपरिभागे यो निपातः पतनं, तेन चूर्णिताः चूर्णतां प्राप्ताः। पयोधरोत्सेध-निपातेति पाठे पयोधरोत्सेधः पयोधराभोगः। अत्युच्चस्थानादतिकठिनस्तनतटनिपातेन परमाणुतां प्राप्ता इत्यर्थः। पुनश्च सम्भूय अधोगमनारम्भे वलीषु स्खलिताः। वलीषु वलित्रये स्खलिताः स्खलनं प्राप्ताः। अनेन वलीनां सोपानवद् विषमत्व-मुक्तम्। अनेन क्रमप्राप्तिवर्णनेन अक्ष्यादितत्तदवयवस्थितानां जलबिन्दूनां क्लेशकरत्वाद् अवश्यंभाविनः करपरिमार्जनस्याभावो द्योत्यते, तेन तु चित्तैकाग्र्यम्। आतपादिशोषिते शरीरे प्रथमबिन्दूनामेव तथाप्राप्त्युपपत्तेः प्रथमशब्दप्रयोगः।।२४।।

शिलाशयां तामनिकेतवासिनीं
निरन्तरास्वन्तरवातवृष्टिषु।
व्यलोकयन्नुन्मिषितैस्तडिन्मयै-
र्महातपःसाक्ष्य इव स्थिताः क्षपाः।।२५।।

प्रकाशिका

शिलाशयामिति। निरन्तरासु निविडधारासु। अन्तरे वाता यासां ता अन्तरवाता वृष्टयः। उन्मिषितैरक्षिपक्ष्मोद्घाटनैः। साक्ष्ये साक्षित्वे। समक्षदर्शी साक्षी। साक्ष्यं च 'आदित्यचन्द्रावनलोऽनिलश्च' इत्यागमसिद्धम्। व्यलोकयन्निवेत्यन्वयः। एवंविधे महातपसि यत् क्षपाणां साक्ष्यं, तत् तडिदुन्मेषैः स्फुटमिवासीदित्यर्थः।।२५।।

विवरणम्

अथ वार्षिकं तपःप्रकारमेवाह—

शिलाशयामिति। महातपस्साक्ष्ये स्थिता क्षपाः अन्तरवातवृष्टिषु निरन्तरासु शिलाशयाम् अनिकेतवासिनीं तं तडिन्मयैः उन्मिषितैः व्यालोकयन्निव। महत् तपो महातपः। 'आन्महतः—' (६.३.४६) इत्यादिनात्वम्। तत्र साक्ष्यं साक्षित्वम्। 'समक्षदर्शी साक्षी स्यादि'ति भोजः। तस्मिन् स्थिताः क्षपाः रात्रयः। रात्र्यादीनां कर्मसाक्षित्वमुक्तं महाभारते—

आदित्यचन्द्रावनलोऽनिलश्च द्यौर्भूमिरापो हृदयं यमश्च।
अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम्।।

इति। अन्तरवातवृष्टिषु अन्तरे सकलजलधारापतनानामन्तराले वाता यासां तादृशीषु वृष्टिषु। अनवरतप्रवृत्तमारुतास्वित्यर्थः। अनेन अत्यन्तासह्यत्वमुक्तम्। निरन्तरासु अन्तररहितासु। धाराणां निबिडत्वादनुपलक्ष्यपरस्परविभागास्वित्यर्थ। सन्ततप्रवृत्तास्विति वा। शिलायां शेते इति शिलाशया, ताम्। अनिकेतवासिनीं निकेते गृहे वस्तुं शीलमस्या इति निकेतवासिनी, तथाभूता न भवतीति अनिकेतवासिनी, ताम्। पर्णशालामात्रेणापि रहिते शिलाप्रदेश एव स्थित्वा देव्याः प्रावृषि तपश्चरणम्। निशासु यादृच्छिकं शयनमपि तत्रैवेत्यर्थः। अनेन विलोकनसौकर्यं ध्वन्यते। तथाभूतां तां तडिन्मयैः विद्युद्रूपैः उन्मिषितैः अक्षिपक्ष्मोद्घाटनैः व्यलोकयन् अवलोकयामासुरिव। एवंभूते महातपसि यदागमप्रसिद्धं साक्षित्वं क्षपाणां, तत् तत्कालसुलभैस्तडिदुन्मेषमयैरवलोकनव्यापारैः स्फुटतामगमदिवेत्यर्थः।।२५।।

निनाय चात्यन्तहिमोत्किरानिलाः
सहस्यरात्रीरुदवासतत्परा ।
परस्पराक्रन्दिनि चक्रवाकयोः
पुरो वियुक्ते मिथुने कृपावती॥२६॥

प्रकाशिका

अथ शैशिरं तप आह—

निनायेति। सहस्यरात्रीश्चेत्यन्वयः। हिममुत्किरतीति हिमोत्किरः। 'इगुपध—' (३.१.१३५) इत्यादिना कः। सहस्यमासेन शिशिरर्तुरुपलक्ष्यते। उदवास उदकवासः। उदकस्य 'पेषंवासवाहनधिषु च' (६.३.५८) इत्युदादेशः। अत्र मनुः—'आर्द्रवासास्तु हेमन्ते क्रमशो वर्धयंस्तपः'(६.२३) इति। चक्रवाकविषयया कृपया स्वायासापरिगणनं द्योत्यते। कृपा च तपसोऽङ्गम्।।२६।।

विवरणम्

अथ शरदः शीतोष्णसमकालत्वाद् हेमन्तस्य शैत्याधिक्याभावाच्च तत्कालकृतस्य तपसो विस्मयकरत्वाभावात् तदुपेक्ष्य शिशिरकालकृतं तपःप्रकारमाह—

निनायेति। सा उदवासतत्परा सहस्यरात्रीः च निनाय। उदवासे उदकवासे। 'पेषंवासवाहनधिषु च' इत्युदकशब्दस्योदादेशः। तत्परा तात्पर्यवती सती सहस्यरात्रीः। **सहस्यो हेमन्तान्त्यमासः**। तेन शिशिरर्तुरुपलक्ष्यते। हेमन्ते जलाधिवासविधानाभावात्। यथाह मनुः—'आर्द्रवासास्तु हेमन्ते क्रमशो वर्धयंस्तपः' इति। शिशिरकालरात्रीरित्यर्थः। रात्रौ शैत्याधिक्याद् अत्यन्तदुस्सहत्वप्रतिपादनाय रात्रिपदोपादानम्। चकारः पूर्वोक्तसकलकालसमुच्चयार्थः। निनाय अत्यवाहयत्। ननु कोऽत्र विस्मय इत्यत्राह—अत्यन्तहिमोत्किरानिला इति। अत्यन्तं हिमम् उत्किरन्ति विक्षिपन्तीति अत्यन्तहिमोत्किराः। 'इगुपधज्ञाप्रीकिरः कः' इति कः। तादृशा अनिला वायवो यासु तास्तथा। अथ देव्याः तपसोऽङ्गभूतं कृपालुत्वं वर्णयति—पुरः वियुक्ते चक्रवाकयोः मिथुने कृपावतीति। पुरः जले वर्तमानाया आत्मनः पुरोभाग एव। अनेन कृपोद्बोधहेतुभूते दर्शने सौकर्यमुक्तम्। वियुक्ते परस्परवियोगं प्राप्ते चक्रवाकयोः मिथुने द्वन्द्वे। 'स्त्रीपुंसौ मिथुनं द्वन्द्वमि'त्यमरः। लोकप्रसिद्धश्च रात्रौ चक्रवाकयोर्वियोगः। कृपावती दयावती। अत्र चक्रवाकविषयायाः कृपायाः प्रतिपादनेन निजायासापरिगणनं द्योत्यते। दयापरत्वं च तपस्विनां प्रसिद्धम्। दयाया उद्बोधकं हेतुमाह—परस्पराक्रन्दिनीति। परस्परं चक्रवाकी चक्रवाकं चक्रवाकस्तु

चक्रवाकीम् इत्यन्योन्यम् आक्रन्दितुम् आभीक्ष्ण्येन क्रन्दितुं शीलमस्येति तथा।।२६।।

मुखेन सा पद्मसुगन्धिना निशि
प्रवेपमानाधरपत्रशोभिना।
तुषारवृष्टिक्षतपद्मसम्पदां
सरोजसन्तानमिवाकरोदपाम्।।२७।।

प्रकाशिका

मुखेनेति। अधरस्य पत्ररूपणान्मुखस्य पद्मरूपणमार्थमित्येकदेशविवर्तीदं रूपकम्। सरोजसन्तानं सरोजाविच्छेदम्। अत्र शिशिरकृतं पत्राकृतेरधरस्य प्रवेपनम्। मुखस्य सुगन्धित्वं प्रसिद्धम्। कान्तिमत्त्वं च सरोजसन्तानकरणोत्प्रेक्षाहेतुः।।२७।।

विवरणम्

इत्थमुग्रे तपसि वर्तमानाया अपि देव्या वदनं उज्ज्वलमेवाभूदितीममर्थं भङ्ग्यन्तरेणाह—

मुखेनेति। सा निशि पद्मसुगन्धिना मुखेन तुषारवृष्टिक्षतपद्मसम्पदाम् अपां सरोजसन्तानम् अकरोद् इव। सा उदवासतत्परत्वाद् उदके मुखमात्रदृश्या पार्वती। निशि शिशिररात्रौ। अनेन सरोजसन्तानकरणयोग्यता दर्शिता। पद्मसुगन्धिना पद्मवत् सुगन्धिना। शोभनो गन्धो यस्य तत् सुगन्धि। 'गन्धस्येदुत्पूतिसुसुरभिभ्यः' (५.४.१३५)इतीत्। मुखस्य सुगन्धित्वं प्रसिद्धं 'पद्मिनी पद्मगन्धा स्यादि'त्यादिषु। उक्तञ्च रामायणे—'निश्वास इव सीताया वाति वायुर्मनोरमः।' इति। तुषारवृष्ट्या हिमजलवर्षेण क्षता नष्टा पद्मसम्पत् पङ्कजसमृद्धिः यासां तादृशीनाम्। अपां जलानाम्। सरोजसन्तानं सरोजानां सन्तानम् अविच्छेदम् अकरोत् कृतवतीव। तुषारवर्षादितरेषु सरोजेषु विनष्टेषु देव्या वदनसरोजमेव तदा शिशिररात्रौ जले दृष्टमासीत्। तेन च देवी कृपावशादपां सरोजसन्ततिविच्छेदाभावार्थमेकं सरोजं निजमुखेनैव कृतवतीवेति जनानामुत्प्रेक्षा जातेति भावः। मुखस्य सरोजसाम्यमेव स्फुटयति—प्रवेपमानाधरपत्रशोभिनेति। प्रवेपमानेन शीतवशात् प्रकर्षेण वेपमानेन अधरेणैव पत्रेण दलेन शोभितुं शीलमस्येति तथा। सरोजपत्रं हि वातवशात् कम्प्रं भवति। अत एव 'अत्यन्तहिमोत्किरानिला' इत्युक्तम्। अत्र कम्प्रदलत्वं कम्प्रस्वरूपत्वं सुगन्धित्वं च सरोजसन्तानोत्प्रेक्षानिमित्तम्। अधरस्य पत्ररूपणान्मुखस्य पद्मरूपणमर्थादायातमित्येकदेशविवर्ति रूपकमिदम्।।२७।।

स्वयंविशीर्णद्रुमपर्णवृत्तिता
परा हि काष्ठा तपसस्तया पुनः।
तदप्यपाकीर्णमतः प्रियंवदा
वदन्त्यपर्णेति च तां पुराविदः॥२८॥

प्रकाशिका

तपोन्तरमाह—

स्वयमिति। काष्ठा उत्कर्षः। अत्र मनुः—'कालपक्वैः स्वयंशीर्णैर्वैखानसमते स्थितः'' (६.२१) इति। तदपि तादृशं पर्णमपि अपाकीर्णं त्यक्तम्। प्रियंवदा इति पाठः। अपर्णा अपास्तपर्णा। चशब्दः पार्वत्याद्यवेक्षः।।२८।।

विवरणम्

अथात्यन्तदुश्चरं तपोन्तरमाह—

स्वयमिति। स्वयंविशीर्णद्रुमपर्णवृत्तिता हि तपसः परा काष्ठा। तया पुनः तद् अपि अपाकीर्णम्। अत पुराविदः ताम् अपर्णा इति च वदन्ति। कालपाकवशात् स्वयमेव विशीर्णैः पतितैः द्रुमाणां वृक्षाणां पर्णैः पत्रैः वृत्तिर्जीविका यत्र तपसि, तस्य भावस्तत्ता। सा हि तपसः परा काष्ठा। हिशब्दः प्रसिद्धौ। प्रसिद्धिश्च 'कालपक्वैः स्वयंशीर्णैः वैखानसमते स्थितः' इत्यादिषु मन्वादिवचनेषु च द्रष्टव्या। परा उत्कृष्टा, उत्कर्षान्तररहितेत्यर्थः। काष्ठा उत्कर्षः। 'काष्ठोत्कर्षे स्थितौ दिशी'त्यमरः। तया पुनः। पुनश्शब्दो विशेषमाह। तत् स्वयंविशीर्णद्रुमपर्णमपि अपाकीर्णं त्यक्तम्। अतः पर्णत्यागादेव हेतोः। पुराविदः पूर्ववृत्तान्तवेदिनः। पर्णमस्या नास्तीत्यनया व्युत्पत्त्या तामपर्णेति च वदन्तीत्यर्थः। आभिजात्यादिश्लाघिबन्धुजनोदीरितपार्वत्यादिनामसमुच्चयार्थश्च शब्दः। अपर्णेति वादिनां पुराविदां पार्वतीत्यादिवादिभ्यो बन्धुजनेभ्यो विशेषमाह—प्रियंवदा इति। प्रियम् इष्टं वदन्तीति तथा। आत्मनैव कृतस्यात्यन्तदुश्चरस्य तपसः स्तुतेस्तेषां विशेषतः प्रियंवदत्वमिति भावः। प्रियंवदामिति वा पाठः। 'प्रियवशे वदः खच्' (३.२.३८) 'अरुर्द्विषद-जन्तस्य मुम्' (६.३.६७)।।२८।।

मृणालिकापेलवमेवमादिभि-
र्व्रतैस्तदङ्गं ग्लपयन्त्यहर्निशम्।
तपः शरीरैः कठिनैरुपार्जितं
तपस्विनां दूरमधश्चकार सा॥२९॥

प्रकाशिका

अथ तपोनिष्पत्तिमाह—

मृणालिकेति। एवमादिभिरेवंप्रकारैः। कठिनैः शरीरैरुपार्जितं तप इत्यन्वयः।।२९।।

विवरणम्

अथैवं क्रियमाणस्य तपसः सिद्धिमाह—

मृणालिकेति। मृणालिकापेलवं तद् अङ्गम् एवमादिभिः व्रतैः अहर्निशं ग्लपयन्ती सा तपस्विनां कठिनैः शरीरैः उपार्जितं तपः दूरम् अधश्चकार। मृणालिका बालमृणाली। अल्पार्थे कः। तद्वत् पेलवं मृदु। अनेन हिमजलसम्पर्काद्यसहनत्वमुक्तम्। तद् लोकोत्तरम्। अनेन प्रथमसर्गप्रपञ्चितं सकलमपि सौकुमार्यमनुस्मारितम्। अङ्गं शरीरम्। एवमादिभिः पूर्वोक्तप्रकारैः व्रतैर्नियमैः। अहश्च निशा च अहर्निशम्। समित्कुशमितिवदेकवद्भावो नपुंसकत्वं च। अत्यन्तसंयोगे द्वितीया। सर्वदैवेत्यर्थः। ग्लपयन्ती शोषयन्ती। तपस्विनां महर्षीणाम्। कठिनैः जन्मतःप्रभृति परिचयवशादातपादिसंसर्गसहैः शरीरैः। उपार्जितं सञ्चितम्। तपः दूरमधश्चकार ईषत्साधर्म्येणापि रहितं यथा भवति तथात्यन्तमधःकृतवती। अनेन तपस्सिद्धिकथनेन तपोवर्णनमुपसंहृतमित्यवसेयम्।।२९।।

अथाजिनाषाढधरः प्रगल्भवाग्
ज्वलन्निव ब्रह्ममयेन वर्चसा।
विवेश कश्चिज्जटिलस्तपोवनं
शरीरबन्धः प्रथमाश्रमो यथा॥३०॥

प्रकाशिका

अथैवंविधतपःसमुद्बोधितदयाशक्तिसन्धुक्षितनैसर्गिकानुरागस्य तदुभयपरायत्तस्य सतो भवस्य परमैन्द्रजालिकस्य छद्मना स्वयमभियोगवृत्तान्तप्रकारं प्रपञ्चयति—

अथेति। आषाढो व्रतिनां दण्डः। अनेन ब्रह्मचर्यं सूच्यते। प्रगल्भवाक् कः कोऽत्र भोः! क्व वर्तते सा तथातपोनिष्ठा पर्वतराजपुत्रीत्यादि प्रगल्भं भाषमाण इत्यर्थः। दक्षिणावर्तस्तु—संस्कृतवागिति व्याख्यायात्र श्रुतिं च प्रमाणमाह। ब्रह्म वेदः। ब्रह्ममयेन अध्ययनप्रकर्षजनितेनेत्यर्थः। कश्चिदिति लेशतोऽपि प्रत्यभिज्ञासम्भावनां निराकरोति। जटिलो जटावान्। ब्रह्मचारिणोऽपि जटाधारणमस्ति। अत्र मनुः—'मुण्डो वा जटिलो वा स्यादथवा स्याच्छिखाजटः' (२.२१९) इति। शरीरं

बध्नातीति शरीरबन्धः। 'कर्मण्यण्' (३.२.१)। मूर्तिमानित्यर्थः। प्रथमाश्रमो ब्रह्मचर्यम्। अस्योपक्रमस्य व्याजोपहितत्वं स्वयमेवाग्रे प्रकटीकरिष्यति। व्याजश्च देव्या भावपरीक्षार्थम्।।३०।।

विवरणम्

अथैवं कृतबहुविधतपःप्रकर्षसन्धुक्षितप्राक्तननैसर्गिकानुरागस्य,

आयासितानामशरीरबाणैर्नितम्बिनीनां परिदेवितानि।
आत्मार्थमाकर्णयतां हि यूनां समागमो नाम सुखान्तरायः।।

इति न्यायेन 'न कामवृत्तिर्वचनीयमीक्षते'[कुमा.५.८२] इत्यादिवचनानि श्रोतुकामस्य भगवतः परमेश्वरस्य व्याजेनाभियोगप्रकारं वर्णयितुमुपक्रमते—

अथेति। अथ कश्चित् तपोवनं विवेश। अथ तपस्सिद्ध्यनन्तरम्। अनेन फलप्राप्तेरासन्नत्वमुक्तम्। कश्चित् कदाचिदप्यदृष्टचरत्वात् प्रत्यभिज्ञागन्धेनापि रहित इत्यर्थः। अनेन अपरिचितत्वकथनेन देवीवृत्तान्तानामज्ञातत्वात् करिष्यमाणानां प्रश्नानां सावकाशत्वमुक्तम्। तपोवनं, देव्या इत्यर्थात् सिध्यति। तपसे वनं तपोवनम्। विवेश प्रविष्टोऽभूत्। अदृष्टचरत्वेन नामगोत्राषाढधर इति। धरतीति धरः। 'धृञ् धारण' इत्यस्माद् धातोः पचाद्यच्। अजिनाषाढयोर्धर इति विग्रहः। अजिनं कृष्णाजिनम्। आषाढः पलाशदण्डः। 'पालाशो दण्ड आषाढ' इत्यमरः। अनेन ब्राह्मणत्वमपि विज्ञातं, ब्राह्मणानामेव पलाशदण्डविधानात्। अभ्यागमनवेलायामात्मनिवेदनप्रकारमाह—प्रगल्भवागिति। प्रगल्भा प्रागल्भ्ययुक्ता वाग् वाणी यस्य स तथा। कः कोऽत्र भोः! क्व वर्तते सा तपसि निष्णाता शैलाधिराजतनयेत्यादि प्रगल्भं भाषमाण इत्यर्थः। प्रगल्भशब्देनात्र वचसो लोकोत्तरत्वमुक्तम्। रूपस्यापि लोकोत्तरत्वमाह—ब्रह्ममयेन वर्चसा ज्वलन्निवेति। ब्रह्ममयेन, ब्रह्म वेदः। तेन अध्ययनं लक्ष्यते। अध्ययनमयेन वेदाध्ययनप्रकर्षजनितेनेत्यर्थः। वर्चसा तेजसा ज्वलन्निव दीप्यमान इव। परितः प्रसर्पन्त्या शरीरसुषमया जाज्वल्यमान इवेति भावः। शोभाधिक्यमुत्प्रेक्षाहेतुः। भगवतो ब्रह्मचारित्वावलम्बनेऽपि प्राक्तनं जटाधरत्वं तथैवावस्थितमित्याह—जटिल इति। जटावानित्यर्थः। ब्रह्मचारिणामपि जटाधरत्वमुक्तं मनुना—'मुण्डो वा जटिलो वा स्यादथवा स्याच्छिखाधरः' इति। तद्गुणानां पृथक् पृथग् वर्णनस्य दुष्करत्वात् समासतो वर्णयति—प्रथमाश्रमः शरीरबन्धः यथा इति। प्रथमाश्रमो ब्रह्मचर्याश्रमः। 'ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः' (मनुस्मृति.६.८७) इत्यादिषु स्मृतिषु ब्रह्मचर्याश्रमस्यैव प्राथम्याद् अवलम्बनक्रमे प्राथम्याच्च। शरीरं बध्नातीति शरीरबन्धः। 'कर्मण्यण्'। यथाशब्दोऽयमुत्प्रेक्षाद्योतकः। ब्रह्मचर्याश्रमः स्वयमेव मूर्तिमानिव लक्ष्यमाण इत्यर्थः। लोकोत्तर-

प्रभावमुत्प्रेक्षाहेतुः। अत्र भगवतो देवीहृदयगतस्य निगूढस्याप्यभिप्रायस्य श्रोतुकामत्वाद् ब्रह्मचारित्वावलम्बनम्। युवजनदर्शने हि लज्जया सर्वं न भाषते। अवज्ञया वचनाभावं परिहर्तुं तेजस्वित्वावलम्बनमित्यवसेयम्।।३०।।

तमातिथेयी बहुमानपूर्वया
सपर्यया प्रत्युदियाय पार्वती।
भवन्ति साम्येऽभिनिविष्टचेतसां
वपुर्विशेषेष्वतिगौरवाः क्रियाः॥३१॥

प्रकाशिका

तद्विषये देव्याः प्रतिपत्तिमाह—

तमिति। आतिथेयी अतिथिषु साध्वी। 'पथ्यतिथिवसतिस्वपतेर्ढञ्' (४.४.१०४) इति ढञ्। बहुमानः श्रद्धा। अतिगौरवाः 'स्वती पूजायामि'ति समासः।।३१।।

विवरणम्

अथ देव्यास्तद्विषयां प्रतिपत्तिमाह—

तमिति। पार्वती बहुमानपूर्वया सपर्यया तं प्रत्युदियाय। अत्र पार्वतीत्यनेन महाकुलोद्भूतत्वादस्यास्तथाविधातिथिसत्कारप्रावीण्यं ध्वन्यते। बहुमानः श्रद्धा पूर्वं यस्याः तादृश्या। सपर्यया पूजया। 'पूजार्हणा सपर्या च' इति भोजः। तं ब्रह्मचारिणम्। प्रत्युदियाय प्रत्युज्जगाम। सपर्यया प्रत्युद्गमनानन्तरमेव पूजाविधानम्। युक्तं चैतदस्या इत्याह—आतिथेयीति। अतिथिषु साध्वी। 'पथ्यतिथिवसतिस्वपतेर्ढञ्'। 'टिड्ढाणञ्—' (४.१.१५) इत्यादिना ङीप्। उक्तमर्थमर्थान्तरन्यासेन समर्थयते—साम्ये अभिनिविष्टचेतसां वपुर्विशेषेषु अतिगौरवाः क्रिया भवन्तीति। साम्ये समत्वे अभिनिविष्टं स्थिरं चेतो येषां तेषाम्। रागद्वेषराहित्यात् समबुद्धीनामित्यर्थः। अनेन विशेषावगमे हेतुरुक्तः।

रागाञ्जनमिदमक्ष्णोर्व्यञ्जयति प्रायशो गुणान् विषये।
द्वेषाञ्जनं तु दोषाननुभयसक्तिर्व्यनक्ति भूतार्थम्।।

इत्युक्तत्वात्। वपुर्विशेषेषु शरीरविशेषेषु। तेजोविशेषयुक्तेषु शरीरेष्वित्यर्थः। अतिगौरवाः अत्यन्तगौरवोपेताः। 'स्वती पूजायाम्' इति समासः। क्रियाः पूजाविधयः। भवन्ति उपपद्यन्त इत्यर्थः।

यद्यद् विभूतिमत् सत्त्वं श्रीमदूर्जितमेव वा।
तत्तदेवावगच्छ त्वं मम तेजोंशसम्भवम्।।

इति [गीतासु] भगवद्वचनाद् महाजनानां महाजनेषु भगवद्बुध्या पूजाविधावत्यन्तगौरवोपेताः क्रियाः सम्भवन्त्येवेत्यर्थः।।३१।।

विधिप्रयुक्तां प्रतिगृह्य सत्क्रियां
परिश्रमं नाम विनीय च क्षणम्।
उमां स पश्यन्नृजुनैव चक्षुषा
प्रचक्रमे वक्तुमनुज्झितक्रमः।।३२।।

प्रकाशिका

विधीति। विधितः शास्त्रतः। नामापरमार्थे। अनेनास्य सर्वस्यैव वर्णिवृत्तान्तस्य व्याजोपगूहितत्वं सूचितम्। ऋजुना विलासशून्यत्वादवक्रेण। एतदाकारगुप्तिरवहित्थं भावः। क्रमोऽर्थाद् वचनविषयः। स च प्रकटीभविष्यति।।३२।।

विवरणम्

अथ देवीसत्कृतस्य ब्रह्मचारिणो वृत्तमाह—

विधीति। सः विधिप्रयुक्तां सत्क्रियां प्रतिगृह्य क्षणं परिश्रमं विनीय च नाम ऋजुना एव चक्षुषा उमां पश्यन् वक्तुं प्रचक्रमे। सः ब्रह्मचारी विधितः शास्त्रतः प्रयुक्तां विहितां सत्क्रियां पूजां प्रतिगृह्य परिगृह्य क्षणं कञ्चित्कालं परिश्रमम् अध्वपरिश्रमं विनीय अपनीय। चकारः पूर्वोक्तसत्क्रियापरिग्रहसमुच्चये। नामशब्दः किलशब्दवदपरमार्थार्थवाची। अविद्यमानाध्वपरिश्रमापनयं कञ्चित्कालम् अभिनीयेत्यर्थः। ऋजुना विलासशून्यत्वादवक्रेण। एवशब्दो विलासस्यात्यन्ताभावमाह। चक्षुषा नेत्राभ्याम्। जातावेकवचनम्। उमां पार्वतीं पश्यन्। विलासशून्येन चक्षुषा दर्शनमतिप्रवृद्धरागगोपनार्थम्। रागस्वभावानभिज्ञानां बालानां स्वभावोऽनेन प्रकटीकृतः। उक्तं च श्रीकृष्णविलासे—

परमास्त पुरेव मुग्धभावं प्रथयन्नेव स सन्निधौ जनानाम्।
विजनेषु विलासिनीषु तस्य व्यसृजन्नार्जवमीक्षणोक्तिहासाः।।

इति। तथाभूतः सन् वक्तुं प्रचक्रमे आरब्धवान्। नापि रागाधिक्यादात्मनः समीहितमेवार्थवादौ पृष्टवानित्याह—अनुज्झितक्रम इति। अनुज्झितः अपरित्यक्तः क्रमो वचनक्रमो येन स तथा। कुशलप्रश्नमारभ्य तपश्चरणकारणप्रश्नपर्यन्तो वक्ष्यमाणो वचनविन्यासक्रमोऽत्र क्रमशब्देन विवक्षितः।।३२।।

अपि क्रियार्थं सुलभं समित्कुशं
जलान्यपि स्नानविधिक्षमाणि ते।
अपि स्वशक्त्या तपसि प्रवर्तसे
शरीरमाद्यं खलु धर्मसाधनम्।।३३।।

प्रकाशिका

तत्र तावत् कुशलं पृच्छति—

अपीति। समित्कुशमिति 'सर्वो द्वन्द्वो विभाषैकवद् भवती'त्येकवद्भावः। क्षमाणि योग्यानि। स्वशक्त्या तपसि प्रवर्तनस्यापि प्रष्टव्यतां तपसि तस्य समिदादिवदङ्गत्वेनोपपादयति—शरीरमिति।।३३।।

विवरणम्

तत्र तावन्मुनिजनेषूचितं कुशलं पृच्छति त्रिभिः श्लोकैः। तत्रादौ तपस्साधनसम्पत्तिं पृच्छति—

अपीति। क्रियार्थं समित्कुशं सुलभम् अपि। होमादिक्रियैवार्थः प्रयोजनं यस्य यत्। समिधः कुशाश्च समित्कुशम्। कुशाः दर्भाः। 'सर्वो द्वन्द्वो विभाषैकवद् भवती'त्येकवद्भावः। 'स नपुंसकम्' (२.४.१७) इति नपुंसकत्वम्। सुखेन लभ्यत इति सुलभम्। 'ईषद्दुस्सुषु कृच्छ्राकृच्छ्रार्थेषु खल्' (३.३.१२६) इति खल्। अपिशब्दः प्रश्ने। 'अपिः समुच्चये प्रश्ने' इति भोजः। तव तपोवन इति शेषः। तव तपोवने होमाद्यङ्गभूतानि समित्कुशादीनि सुलभानि कच्चिदित्यर्थः। समिदादीनि तपसः सन्निपत्योपकारकाण्यङ्गानि। अथारादुपकारकाणामङ्गानामपि सम्पत्तिं पृच्छति—जलानि ते स्नानविधिक्षमाणि अपि। जलानि तव आश्रमे वर्तमानानीति शेषः। ते अत्यन्तनिर्मलशरीरायाः तव। स्नानमेव विधिः स्नानविधिः, तस्मिन् क्षमाणि योग्यानि कच्चित्। तव आश्रमे वर्तमानानि जलानि बहूनि निर्मलानि च कच्चिदित्यर्थः। 'शक्ते योग्येऽपि च क्षमः' इति **वररुचिः**। अथ सर्वस्यापि कर्मणः प्रधानभूतस्य शरीररूपस्याङ्गस्य अक्लेशकरे तपसि प्रवृत्तिं पृच्छति—स्वशक्त्या तपसि प्रवर्तसे अपि इति। आत्मशक्त्यनुसारेण तपसि प्रवर्तसे कच्चित्। तपसि शरीरस्यापि समिदादिवदङ्गत्वप्रतिपादनमुखेन स्वशक्त्या तपसि प्रवृत्तेरपि प्रष्टव्यतामुपपादयति—शरीरं खलु आद्यं धर्मसाधनमिति। खलुशब्दः प्रसिद्धौ। आद्यमित्यनेन समिदादिव्यतिरेकं दर्शयति। धर्मस्य साधनं धर्मसाधनम्। यथा समिदादीनामङ्गत्वं श्रुतिस्मृतिप्रसिद्धं, तथा शरीरस्य प्रधानाङ्गत्वमपि लोके भित्तिचित्रन्यायेन प्रसिद्धमेवेति भावः। शीर्यत इति हि शरीरमुच्यते। तस्माद्

रक्षणाभावे तत् सद्य एव शीर्येत। न च तदभावे तपश्चरितुं शक्यमिति तपसि तच्छक्त्यनुसरणमपि प्रष्टव्यमेवेत्यभिप्रायः।।३३।।

अपि त्वदावर्जितवारिसम्भृतं
प्रवालमासामनुबन्धि वीरुधाम्।
चिरोज्झितालक्तकपाटलेन ते
तुलां यदारोहति दन्तवाससा।।३४।।

प्रकाशिका

अपीति। अनुबन्धि अविच्छिन्नम्। दन्तान् वस्ते छादयतीति दन्तवासः। तुलाशब्दयोगेऽपि तृतीया रघुवंशप्रकाशिकायां समर्थिता 'नभसा निभृतेन्दुना तुलामुदितार्केण समारुरोह तद्'(८.१५)इत्यत्र। उत्तरार्धे चाटुः। एवमुत्तरत्रापि।।३४।।

विवरणम्

अथ देवीसंवर्धितानामाश्रमलतानामपि कुशलं पृच्छति—

अपीति। आसां वीरुधां प्रवालम् अनुबन्धि अपि। आसाम् आश्रमपर्यन्ते दृश्यमानानां वीरुधां लतानाम्। 'लता प्रताननी वीरुदि'त्यमरः। प्रवालं किसलयम् अनुबन्धि अविच्छिन्नं कच्चित्। 'सम्बन्धे सन्ततासक्तावनुबन्धः प्रकीर्तितः' इति भोजः। एतासु लतासु दृश्यमानमिदं किसलयमविच्छेदेन सर्वदा जायते कच्चिदित्यर्थः। प्रवालानामनुबन्धित्वे हेतुमाह—त्वदावर्जितवारिसम्भृतम् इति। लतासु अत्यन्तस्निग्धया त्वया आवर्जितैः आहृतैः वारिभिः सम्भृतं सम्पादितम्। अथ लताप्रवालानां रमणीयत्वप्रतिपादनव्याजेन देवीचित्तावर्जनार्थं यथार्थत्वादतिमनोहरं प्रियवचनं प्रस्तौति—यत् ते दन्तवाससा तुलाम् आरोहति इति। यत् प्रवालं ते तव दन्तवाससा ओष्ठेन। 'ओष्ठाधरौ तु रदनच्छदौ दशनवाससी' इत्यमरः। दन्तान् वस्ते आच्छादयतीति कर्मण्यण्। तुलां सादृश्यम् आरोहति प्राप्नोति। ननु 'तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्' (२.३.७२) इति सूत्रेण तुलाशब्दयोगे तृतीयाप्रतिषेधात् कथं दन्तवाससा तुलामित्युच्यते। अत्र भोजः—सदृशपदार्थवाची सादृश्यमात्रवाची चेति द्वौ तुलाशब्दौ। तयोः सदृशपदार्थवाचकतुलाशब्दयोग एव तृतीयाप्रतिषेधः। अत एव कृष्णस्य तुला नास्तीत्युदाहृतम्। कृष्णेन सदृशः कोऽपि नास्तीत्यर्थः। सादृश्यमात्रवाचकतुलाशब्दयोगे तु तृतीयापीष्यत एव। अतोऽत्रत्यस्य तुलाशब्दस्य सादृश्यमात्रवाचकत्वाद् नोक्तदोषानुषङ्गः। अत्रोपमानभूतस्य प्रवालस्य उपमेयभूतेनाधरेण सादृश्यप्रतिपादनाद् अधरस्य रागाधिक्यं सूचितम्। न

चैतद्रागाधिक्यमलक्तकयोगजमित्याह—चिरोज्झितालक्तकपाटलेनेति। चिरोज्झितं चिरकालत्यक्तं तपःप्रारम्भसमय एव परित्यक्तम् अलक्तकं लाक्षारसो येन तथाभूतेन सतापि पाटलेन रक्तवर्णेन। अलक्तकलेशस्याप्यभावं द्योतयितुं चिरशब्दः प्रयुक्तः। त्वत्परिवर्धिता लताः त्वदधरसदृशानि पल्लवानि किं निरन्तरेण प्रसुवत इति भावः।।३४।।

अपि प्रसन्नं हरिणेषु ते मनः
करस्थदर्भप्रणयापराधिषु।
य उत्पलाक्षेपचलैर्विलोचनै-
स्तवाक्षिसादृश्यमिव प्रयुञ्जते॥३५॥

प्रकाशिका

अपीति। करस्थदर्भप्रणयापराधिष्वपीत्यर्थः। क्रियार्थं करस्थानां दर्भाणां प्रार्थनमनिष्टं भवेदिति भावः। उत्पलेति वाताक्षिप्यमाणोत्पलवच्चलैरित्यर्थः। अक्षिसादृश्यमक्ष्यनुकारम्। अक्षिणी अनुकुर्वत इवेत्यर्थः।।३५।।

विवरणम्

अथ तपस्विजनानाम् अवश्यकर्तव्यम् अत्यन्तासाध्यं च कोपजयं पृच्छति—

अपीति। ते मनः हरिणेषु प्रसन्नम् अपि। ते तव मनः चित्तं हरिणेषु मृगेषु। विषयसप्तमी चेयम्। हरिणविषये प्रसन्नं कश्चिदित्यर्थः। स्वतो मनोहरेषु निरपराधेषु देव्या प्रसादाभावे हेतुमाशङ्कते—करस्थदर्भप्रणयापराधिषु इति। करस्थानां होमादिकार्यनिर्वर्तनार्थं देवीकरस्थितानां दर्भाणां प्रणयात् प्रार्थनाद्धेतोः अपराधिषु अपराधवत्सु। न ह्यवश्यकर्तव्यकर्मनिर्वर्तनार्थम्। आत्मना प्रयत्नानीतानां दर्भाणां प्रार्थनया जात कोपः शक्यपरिहारो भवति। तथापि किं ते मनो हरिणेषु प्रसन्नं भवति। अयमेव हि महामुनीनां स्वभावः, यत् सापराधेऽपि जने दयावत्त्वमिति भावः। अथ मृगाणां मनोहरत्वप्रतिपादनव्याजेन पूर्ववद् देवीचित्तावर्जनार्थं याथार्थ्यमनोहरं प्रियवचनमाह—ये उत्पलाक्षेपचलैः विलोचनैः तव अक्षिसादृश्यं प्रयुञ्जते इव इति। ये मृगाः। आक्षेपशब्दोऽत्र द्रव्यपरः। आक्षिप्यमाणम् उत्पलम् उत्पलाक्षेपः, तद्वच्चलैः चञ्चलैः विलोचनैः अक्षिसादृश्यम् अक्ष्यनुकरणं प्रयुञ्जत इव। प्रयुञ्जाना इव दृश्यन्त इत्यर्थः। यथा हीनगुणाः केचन महाजनैः सादृश्यमात्रमपि लब्धुं प्रयत्नेन तान् व्यापारवेषादिभिरनुकुर्वन्ति, तथेति भावः।।३५।।

यदुच्यते पार्वति! पापवृत्तये
न रूपमित्यव्यभिचारि तद् वचः।
तथाहि ते शीलमुदारदर्शने!
तपस्विनामप्युपदेशतां गतम्॥३६॥

प्रकाशिका

एव सर्वत्र मुनिजनोचितं कुशलं पृष्ट्वा परमधूर्तस्तदनुप्रवेशार्थमर्थ्यानि प्रियवचनानि प्रयुङ्क्ते—

यदिति। पार्वतीत्याभिजनं सम्बोधनम्। पापवृत्तये पापाचरणाय। रूपं नाम शीलानुसारीति यदुच्यते, तत् सत्यमित्यर्थः। त्वय्येव तावदेतत् पश्येत्याह—तथाहीति। शीलं सद्वृत्तम्। 'शीलं स्वभावे सद्वृत्ते' इति सिंहः। अत्र श्रुत्योपपादकत्वं प्रकृतगतमर्थादप्रकृते पर्यवस्यतीत्यर्थान्तरन्यासप्रकार एवायम्।।३६।।

विवरणम्

इत्थं तपस्विजनोचितं कुशलं पृष्ट्वा पुनरपि तदनुप्रवेशार्थमर्थ्यानि प्रियवचनानि तत्कृततपःप्रशंसामुखेन प्रयुङ्क्ते त्रिभिः श्लोकैः। तत्रादावेकदेशवर्णनद्वारेण प्रकृतमङ्गवर्णनमेव समस्ताङ्गवर्णनेन प्रपञ्चयति—

यदुच्यत इति। पार्वति! रूपं पापवृत्तये न इति यद् उच्यते, तद् वचः अव्यभिचारि। अत्र पार्वतीति देवीचित्तावर्जनार्थमाभिजात्यप्रतिपादनपरं सम्बोधनम्। रूपं सौन्दर्यम्। 'अथ रूपं नपुंसकम्, स्वभावाकृतिसौन्दर्यवपुष्षु श्लोकशब्दयोरि'ति केशवः। पापवृत्तये पापाचाराय न भवतीति यदुच्यते। सामुद्रिकसारदर्शिभिरिति शेषः। तद् वचः अव्यभिचारि। व्यभिचारोऽन्यथाभावः। व्यभिचरितुं शीलमस्येति व्यभिचारि। ततोऽन्यदव्यभिचारि। रूपं शीलानुसारीति सामुद्रिकवचनं सत्यमेवेत्यर्थः। ननु कुत एतदवगतमितीमामाशङ्कां देवीदृष्टान्तेनैव परिहरति—उदारदर्शने! तथाहि ते शीलं तपस्विनाम् अपि उपदेशतां गतम् इति। उदारम् उत्कृष्टं दर्शनं यस्याः। हे रूपवतीत्यर्थः। तथाभावादेव हि हेतोः तव शीलं सद्वृत्तम्। 'शीलं स्वभावे सद्वृत्ते' इति सिंहः। तपस्विनां मुनीनामपि। न केवलमितरजनानामित्यपिशब्दार्थः। उपदेशताम् उपदेशत्वं गतं प्राप्तम्। 'वेदो धर्ममूलं तद्विदां च स्मृतिशीले' इत्यादिषु स्मृतिषु सदाचारस्यापि वेदवदेव प्रामाण्यस्य प्रतिपादितत्वादिति भावः। रूपवत्यास्तव शीलं महर्षीणामप्येवं कर्तव्यमित्युपदेशरूपत्वं प्राप्तमिति यत्, तस्माद् रूपं शीलानुसारीति वचनं सत्यमेवेत्यर्थः। उक्तं च नैषधकाव्ये रूपस्य शीलानुसारित्वं—

न तुलाविषये तवाकृतिर्न वचोवर्त्मनि ते सुशीलता।
त्वदुदाहरणाकृतौ गुणा इति सामुद्रिकसारमुद्रणा।।(२.५१)

इति। अत्र श्रुत्या प्रकृतगतमप्युपपादनमर्थादप्रकृते पर्यवस्यतीत्यर्थान्तरन्यासस्यैवायं प्रकारभेदः।।३६।।

विकीर्णसप्तर्षिबलिप्रभासिभि-
स्तथा न गाङ्गैः सलिलैर्दिवश्च्युतैः।
यथा त्वदीयैश्चरितैरनाविलै-
र्महीधरः पावित एष सान्वयः॥३७॥

प्रकाशिका

विकीर्णेति। बलिः परमेश्वरार्चनम्। तेन तदुपयुक्तं कुसुमादिकं लक्ष्यते। दिवश्च्युतैर्दिव्यैरित्यर्थः। सलिलस्य विशेषणाभ्यामुत्कर्षः प्रत्याय्यते। अनाविलैरसङ्कीर्णैः।।३७।।

विवरणम्

अथ देवीकृतस्य तपसः कुलशुद्धिपर्यन्तत्वमाह—

विकीर्णेति। एषः महीधरः त्वदीयैः चरितैः यथा सान्वयः पावितः, दिवः च्युतैः गाङ्गैः सलिलैः तथा न। एष इति पुरोवर्तिनं महीधरं सगौरवं सहस्ताभिनयं निर्दिशति। महीधरः हिमवान् त्वदीयैः त्वत्सम्बन्धिभिः चरितैः आचारैः सान्वयः पितृपितामहमातृमातामहादिवंशपरम्परासहितः सन् पावितः शुद्धिं प्रापितः। दिवः स्वर्गात् च्युतैः पतितैः। दिव्यैरित्यर्थः। अनेन पावनत्वापादनसामर्थ्यातिशय उक्तः। गाङ्गैः गङ्गासम्बन्धिभिः सलिलैः तथा न तादृशप्रकारेण न पावितोऽभूत्। 'गङ्गा गङ्गेति यन्नाम योजनानां शतेष्वपि। कीर्तितं हन्ति पापानि' इत्यादिषु स्मृतिषु कीर्तनमात्रस्यापि पावनत्वेन प्रसिद्धाया गङ्गाया जलसम्बन्धजनितं पावनत्वमपि हिमवतः एतादृशाचारविशिष्टत्वत्पितृभावजनितात् पावनत्वादत्यन्तपरिहीणमिति भावः। स्वतः पावनानामपि गङ्गाजलानां पावनान्तरसम्बन्धात् पावनत्वाधिक्यमाह— विकीर्णसप्तर्षिबलिप्रभासिभिरिति। विकीर्णैः विक्षिप्तैः सप्तर्षीणां बलिभिः। बलिशब्देनात्र तदुपयुक्तानि कुसुमादीनि लक्ष्यन्ते। तेषां पावनत्वाधिक्यप्रतीतिश्च फलम्। साध्यसाधनभावः सम्बन्धः। परमेश्वरार्चनोपयुक्तैः कुसुमादिभिरित्यर्थः। तैः प्रभासितुं शोभितुं शीलमेषामिति तथा। चरितानां पावनत्वाधिक्ये हेतुमाह— अनाविलैरिति। असङ्कीर्णैः, दुराचारलेशेनापि रहितैरित्यर्थः। गङ्गाजलानां तु कदाचिदाविलत्वमपि सम्भाव्यत इति व्यतिरेकध्वनिः।।३७।।

अनेन धर्मः सविशेषमद्य मे
त्रिवर्गसारः प्रतिभाति भामिनि!।
त्वया मनोनिर्विषयार्थकामया
यदेक एव प्रतिगृह्य सेव्यते॥३८॥

प्रकाशिका

अनेनेति। सविशेषं पूर्वस्मात्। सारः श्रेष्ठः। भामिनि! दैवसम्पन्ने!। मनसो निर्विषयौ अविषयौ अर्थकामौ यस्याः। प्रतिगृह्य आदृत्य। दक्षिणावर्तस्तु—भामिनि! कोपने! तपसा यं कञ्चित् कामयमानेव लक्ष्यसे। ततः कामाद् धर्मबलप्रशंसया मा स्म कुप्येत्युपालम्भगर्भं सम्बोधनमिति व्याचष्ट। तदभिप्रायत्वे मनोनिर्विषयार्थकामत्वं त्वपरमार्थं स्यादिति वाक्यमेवेदमुपालम्भपर्यवसायि स्यात्। तथाशङ्कनीयत्वं न विस्रम्भणीयत्वम्। ततश्चोत्तरवाक्येषु च प्रत्ययो न भवेत्।।३८।।

विवरणम्

अथ धर्मस्यैव त्रिवर्गसारत्वं श्रुतिस्मृतिप्रसिद्धमपि त्वत्सेवितत्वादद्य मादृशानामपि प्रतीतिगोचरत्वमापन्नं 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः' इति न्यायादित्याह—

अनेनेति। भामिनि! अनेन मे अद्य धर्मः त्रिवर्गसारः सविशेषं प्रतिभाति। भामिनि! हे दैवसम्पन्ने!। 'भाम दैवानुकूल्यं च सौभाग्यं चापि कथ्यते' इति पुराणकविः। अनेन एतस्माद् वक्ष्यमाणात् कारणाद् मे मम त्रिवर्गसारः। धर्मार्थकामानां त्रयाणां वर्गस्त्रिवर्गः। 'त्रिवर्गो धर्मकामार्थैः' इत्यमरः। तत्र सारः श्रेष्ठः। 'सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु' इत्यमरः। इतिशब्दोऽत्रार्थात् सिध्यति। त्रिवर्गसार इति प्रतिभातीत्यर्थः। सविशेषमिति प्रतिभानक्रियाविशेषणम्। पूर्वस्मात् कालाद् विशेषसहितं यथा भवति तथा। प्रतिभाति मनसि स्फुरति। धर्मस्त्रिवर्गसार इत्यद्य मया सम्यङ् निश्चितमित्यर्थः। अनेनेत्युक्तमर्थमेव प्रदर्शयति—त्वया एक एव प्रतिगृह्य सेव्यते यद् इति। त्वया सारज्ञया एकः धर्म एव प्रतिगृह्य आदृत्य। सेव्यते, कर्तव्यत्वबुध्या सेव्यत इत्यर्थः। कामलोभादिहेत्वन्तरसहितस्य सदाचारस्याप्रामाण्यात् प्रतिगृह्येत्युक्तम्। अत्र सेव्यत इति वर्तमाननिर्देशेन यौवनारम्भसमयेऽद्याप्यस्खलितासीति द्योत्यते। अर्थकामयोरनादरमप्याह—मनोनिर्विषयार्थकामया इति। मनसो निर्विषयौ अविषयौ अर्थकामौ अर्थश्च कामश्च यस्याः तया। अर्थकामपराङ्मुखचित्तयेत्यर्थः। यस्मात् त्वया यौवनोचितान् कामान् पितृगृहगतान्यतिसुलभानि धनान्यप्यनादृत्य धर्म एव साभिप्रायं सेव्यते,

तस्माद् धर्मार्थकामानां मध्ये धर्मस्यैव प्राधान्यमिति सम्प्रति मे निश्चयो जात इति भाव:।।३८।।

प्रयुक्तसत्कारविशेषमात्मना
न मां परं सा प्रतिपत्तुमर्हसि।
यदा सतां सन्नतगात्रि! सङ्गतं
मनीषिभिः साप्तपदीनमुच्यते।।३९।।

प्रकाशिका

किञ्चित् प्रष्टुकाम आत्मनो योग्यतां तत्र समर्थयति—

प्रयुक्तेति। आत्मना त्वयेत्यर्थ:। परमनात्मीयम्। सा प्रतिपत्तुमर्हसीति पाठ:। सा त्वमित्यर्थ:। परत्वेन न प्रतिपत्तव्योऽहमित्यर्थ:। अत्र हेतु:—यदेति। यदा यस्मात् साप्तपदीनं सप्तपदोच्चारणजन्यम्। 'साप्तपदीनं सख्यम्' (५.२.२२) इति निपातनात् साधुत्वम्। सतां सङ्गतमेव सख्यमित्युच्यत इत्यर्थ:।।३९।।

विवरणम्

यथार्थस्तुतिभिरेवमादिभि: देव्याश्चित्तमावर्ज्यान्यदत्यन्तनिगूढं किमपि प्रष्टुकामस्तत्रात्मनो योग्यतामुपपादयति—

प्रयुक्तेति। सा त्वम् आत्मना प्रयुक्तसत्कारविशेषं मां परं प्रतिपत्तुं न अर्हसि। सा या पूर्वोक्तसकलगुणविशिष्टा। आत्मना त्वयैवेत्यर्थ:। प्रयुक्त: कृत: सत्कारविशेष: सम्मानविशेषो यस्मिंस्तथाविधम्। मा मां परम् अनात्मीयं प्रतिपत्तुं कल्पयितुं नार्हसि। यतस्त्वत्कृतै: सत्कारविशेषैरेवाहं त्वदीयो जात:, तस्मान्न परत्वेन कल्पनीय:, अपितु त्वत्परिवारजनत्वेनैव कल्पनीय इति भाव:। ननु कथमतिथिसत्कारमात्रादेवात्मीयत्वप्राप्तिरत आह—सन्नतगात्रि! मनीषिभि: सतां सङ्गतं साप्तपदीनम् उच्यते यदा इति। सन्नतं सुन्दरं गात्रं यस्या:। 'नतं चारु सन्नतमि'ति भोज:। मनीषिभि: विद्वद्भि:। अनेन तद्वाक्यस्य श्रद्धेयत्वमुक्तम्। सतां सज्जनानां सङ्गतं सङ्गमनम्। परस्परसङ्गममात्रमित्यर्थ। भावे निष्ठा। सप्तपदोच्चारणजन्यमिति व्युत्पत्त्या साप्तपदीनमिति सख्यमुच्यते। 'साप्तपदीनं सख्यम्' (५.२.२२) इति निपातनात् साधुत्वम्। यदेति यस्मादर्थे। यत: सज्जनानां परस्परं सङ्गमात्रादेव सख्यं भवतीति मनीषिभिरुच्यते, तत: त्वत्कृतसत्कारविशेषोऽहं त्वदीय एवेति भाव:। त्वत्कृतै: सेवाविशेषैरहं त्वदीय एव जात इति निगूढोऽर्थ:।।३९।।

अतोऽत्र किञ्चिद् भवतीं बहुक्षमां
द्विजातिभावादुपपन्नचापलः।
अयं जनः प्रष्टुमनास्तपोधने!
न चेद् रहस्यं प्रतिबोधयिष्यसि।।४०।।

प्रकाशिका

किमिदमद्योपन्यस्तमित्याह—

अत इति। प्रष्टुमनाः, किंविषयः प्रश्न इत्याह—अत्रेति। अत्र तपसि। एवं प्रथमदर्शनक्षण एव कार्यप्रश्नश्चापल्यपर्यवसायी स्यादित्याशङ्क्याभ्युपगमेनोत्तरमाह—द्विजातीति। ब्राह्मणस्य स्वभावोऽयमिति भावः। स चात्र न बाधक इत्याह—बहुक्षमामिति। न चात्र मे निर्बन्धः, यत् क्षमाशीलामपि कोपयेदित्याह—न चेदिति। प्रतिबोधयिष्यसि, स्वयमेवेति शेषः। अनेनाप्यनिर्बन्धः। निर्बन्धे तु प्रतिबोधयेति स्यात्।।४०।।

विवरणम्

कुशलप्रश्नादावसङ्गतस्यास्य सख्यप्रतिपादनस्य फलमाह—

अत इति। अतः अयं जनः अत्र भवतीं किञ्चित् प्रष्टुमनाः। अतः एतस्मात् सख्याद्धेतोः। अयं जन इति पदद्वयमहमित्येतस्मिन्नर्थे। यदाह भोजः—'सेदंशब्दं जनपदमस्मदर्थे प्रयुञ्जते' इति। प्रश्नस्य विषयं दर्शयति—अत्रेति। अत्र तपसि विषये। किञ्चिद्, न तु बहु। अनेन विनयं दर्शयति। प्रष्टुमनाः प्रष्टुं मनो यस्य स तथा। 'तुं काममनसोरपि' इति तुमो मकारलोपः। भवतीति शेषः। सख्यात् सञ्जातविस्रम्भोऽहं तपोविषये किमपि भवतीं प्रष्टुकामोऽस्मीत्यर्थः। न चायमनवसरे प्रश्नस्त्वां कोपयिष्यतीत्याह—बहुक्षमामिति! बह्वी क्षमा यस्याः ताम्। क्षमाभावे कथमेतादृशतपःप्रवृत्त्युपपत्तिरिति भावः। नन्वस्तु बहुक्षमावत्त्वं, तथापि कथं प्रथमदर्शन एव कार्यप्रश्नः क्रियते, कृतो वा प्रश्नः कथं चापलपर्यसायी न स्यादितीमामाशङ्कां चापलाभ्युपगमेन परिहरति—द्विजातिभावादुपपन्नचापल इति। द्विजातिभावाद् ब्राह्मणत्वाद् उपपन्नं युक्तं चापलं चपलकर्म यस्य स तथा। नन्वतिप्ररूढेऽपि सख्ये रहस्यप्रकाशनं बहुदोषावहं, 'मन्त्रं सुरक्षितमपिच्छिन्द्यादाप्तपरम्परा' इति न्यायाद्, अत आह—तपोधने! त्वं रहस्यं न चेत् प्रतिबोधयिष्यसि इति। तपोधने! तप एव धनं यस्याः। रहस्यम् अप्रकाश्यम्। मया प्रष्टुमिष्टमिदं कार्यमिति शेषः। प्रतिबोधयिष्यसि ज्ञापयिष्यसि। स्वयमेवेति शेषः। नात्र मे निर्बन्ध इति भावः। सति हि निर्बन्धे प्रतिबोधयेति लोट्प्रयोग एव भवेत्। निर्बन्धो हि

क्षमावन्तमपि कोपयति। यथोक्तं रघुवंशे—'निर्बन्धसञ्जातरुषा' (५.२१) इति। सख्ये महत्यपि अत्यन्तगोपनीयस्यार्थस्य वक्तुमशक्यत्वादहं तु न भवतीं निर्बध्नामि। अतिरहस्यं न चेत् त्वमेवं प्रतिबोधयिष्यसीत्यर्थः।।४०।।

कुले प्रसूतिः प्रथमस्य वेधस-
स्त्रिलोकसौन्दर्यमिवार्जितं वपुः।
अमृग्यमैश्वर्यसुखं नवं वय-
स्तपःफलं स्यात् किमतः परं वद॥४१॥

प्रकाशिका

किमत्र प्रश्नेन प्रतिवचनेन वा। त्वयैव तावदूहितुं शक्यमित्याशङ्क्य जिज्ञासितस्योहागोचरत्वं दर्शयति—

कुल इति। प्रथमस्य हिरण्यगर्भस्य। 'यज्ञाङ्गार्थं मया सृष्टो हिमवानचलेश्वर' इति ब्रह्मवचनात्। आर्जितमेकत्र सञ्चितम्। किं क्षेपे। तपःफलं तपसा लभ्यं वाञ्छितम्। एभ्योऽन्यत् तपसोऽस्य फलं न संभाव्यते, अस्ति चेद् वदेत्यर्थः।।४१।।

विवरणम्

ननु किं प्रश्नप्रतिवचनाभ्यां, भवतैव तावदूह्यतामितीमामाशङ्कां स्वजिज्ञासितस्यार्थस्योहागोचरत्वं दर्शयन्नपाकरोति त्रिभिः श्लोकैः। तत्रादौ देव्या ऐहिकफलाकाङ्क्षानिराकरणद्वारेण स्वजिज्ञासितस्यार्थस्योहागोचरत्वमाह—

कुल इति। तत्र तावत् स्वत एवाभिजात्ययुक्तायास्तवेदं तपश्चरणं न विश्वामित्रादिवदाभिजात्यकामनयेत्याह—प्रथमस्य वेधसः कुले प्रसूतिः इति। प्रथमस्य वेधसः ब्रह्मणः। मरीच्यादीनां सर्गशेषविधायित्वान्न प्राथम्यमिति भावः। कुले वंशे प्रसूतिः उद्भवः। तवेति शेषः। 'यज्ञाङ्गार्थं मया सृष्टो हिमवानचलेश्वरः' इति ब्रह्मवचनादचलेश्वरस्य ब्रह्मपुत्रत्वम्। ततश्च तत्पुत्रास्तत्कुलजातत्वम्। नापि सर्वस्त्रीजनसाधारण्या सौन्दर्याकाङ्क्षया, सौन्दर्यस्य भवत्यां लोकोत्तरतया विद्यमानत्वादित्याह—वपुः त्रिलोकसौन्दर्यम् आर्जितम् इवेति। त्रिलोकसौन्दर्यं लोकत्रये विद्यमानं सौन्दर्यम् अर्जितम् एकत्र सञ्चितमिव। पञ्चभूतरूपमुपादानमपहाय लोकत्रये विद्यमानं सौन्दर्यसारमात्रमुपादाय तेनैव निर्मितमिति प्रतीयमानमित्यर्थः। अतः परं का सौन्दर्याकाङ्क्षेति भावः। नापि सकलजनप्रार्थनीयधनाकाङ्क्षया, धनस्यापि त्वयि निरवधिकत्वादित्याह—ऐश्वर्यसुखम् अमृग्यम् इति।

ऐश्वर्येण धनेन यत् सुखं दानोपभोगादिलक्षणं, तदपि अमृग्यमचिन्त्यम्। जनानां मनसोऽप्यगोचरमित्यर्थः। तथाच वक्ष्यति—

अलकामतिबाह्येव वसतिं वसुसम्पदाम्।
स्वर्गाभिष्यन्दवमनं कृत्वेवोपनिवेशितम्।। (कुमा.६.३७)

इति। नन्वकामनया तपश्चरणमेव परो धर्मः, तस्यैव मुक्तिसाधनत्वात्। किं कामनान्तरविचारणयेतीमामाशङ्कां 'वार्द्धके मुनिवृत्तीनाम्' (रघु.१.८) इत्यादिवचनविरोधाद् यौवने तस्यानाशङ्कनीयत्वेन परिहरति—वयः नवम् इति। वयः यौवनम्। नवं प्रारब्धमात्रमित्यर्थः। अथवा यौवनापेक्षया तपश्चरणमेवानेन वाक्येन निराक्रियते। तस्माद् युक्तमूहागोचरत्वमित्याह—अतः परं किं तपःफलं स्याद् वद इति। अतः परम् अस्मदुपन्यस्तादाभिजात्यादेरन्यत्। किं क्षेपे, न किमपीत्यर्थः। वद, अस्य तपसः फलभूतमन्यत् किमपि न मे विचारमार्गमारोहति, अस्ति चेद् वदेत्यर्थः।।४१।।

भवत्यनिष्टादपि नाम दुःसहा-
न्मनस्विनीनां प्रतिपत्तिरीदृशी।
विचारमार्गप्रहितेन चेतसा
न दृश्यते तच्च तलोदरि! त्वयि।।४२।।

प्रकाशिका

अथ स्वयमेवान्यत् सम्भाव्य निराकरोति—

भवतीति। 'अनिष्टाद् भर्तृकृतादित्यर्थ इति **दक्षिणावर्तः**। तत्र साधुः। कन्यकात्वावगमपुरस्सरत्वादुक्तेः। अन्यथा 'अथोपयन्तारमलं समाधिना' (५.४५) इति निरवकाशं स्यात्। तस्मादनिष्टादिति सामान्यम्। अनिष्टादपि, न केवलं शङ्कितादिष्टाभावात्। भवनस्य सम्भावनायां नामशब्दः। प्रतिपत्तिः प्रवृत्तिः। तलोदरि! निम्नोदरीत्यर्थः। **दक्षिणावर्तस्तु**—एतदपि सौन्दर्यवाचि भर्त्रपराधनिवारणपरमित्यर्थ इति व्याचष्ट। वयं तु स्तुतिमात्रपरमिति। तच्चानिष्टं विचार्यमाणम् अनुपपन्नमेव भवतीत्यर्थः।।४२।।

विवरणम्

नन्वनिष्टावाप्त्या बाल्येऽपि तपश्चरणं सम्भवत्येव यथा ध्रुवादीनामित्याशङ्क्य परिहरति—

भवतीति। दुःसहाद् अनिष्टाद् अपि मनस्विनीनाम् ईदृशी प्रतिपत्तिः भवति

नाम। दुःसहात् सोढुमशक्याद् अनिष्टाद् अप्रियाद्धेतोः। अनभिभवनीयेन केनचित् कृतादिति शेषः। न पूर्वोक्तादिष्टानवाप्तेः, अपितु अनिष्टावाप्तेरपीत्यपिशब्दार्थः। मनस्विनीनां स्थिरचित्तानामित्यर्थः। ईदृशी त्वयीदानीं दृश्यमानप्रकारा। प्रतिपत्तिः प्रवृत्तिः। 'प्रतिपत्तिस्तु गौरवे, प्राप्तौ प्रवृत्तौ' इति केशवः। नामशब्दः सम्भावनायाम्। परैः सम्पादितादनिष्टादपि मानिनीनामत्यन्तदुश्चरणसम्भावनास्त्येवेत्यर्थः। तथापि त्वयि तदनुपपन्नमित्याह—तलोदरि! तच्च विचारमार्गप्रहितेन चेतसा त्वयि न दृश्यते इति। तलोदरि! निम्नोदरि!। करतलं हि किञ्चन निम्नं भवति। कृशोदरीत्यर्थः। अनेनापि तदनुप्रवेशार्थं स्तुतिः सामुद्रिकोक्तो वक्ष्यमाणो गुणश्च सूच्यते। तद् अनिष्टम्। चकारः पूर्वप्रतिपादितेष्टानवाप्तिसमुच्चयार्थः। न केवलम् इष्टानवाप्तिस्त्वय्यनुपपन्ना, अपितु अनिष्टप्राप्तिश्चेत्यर्थः। विचारस्य मार्गो विचारमार्गः, तदनुसारेण प्रहितेन प्रेरितेन। चेतसा मनसा। त्वयि अनन्तरश्लोकवक्ष्यमाणगुणविशिष्टायां भवत्याम्। न दृश्यते न प्रतीयते। यद्यपि स्त्रीसामान्ये तदुपपत्तिरस्त्येव, तथापि त्वयि नानिष्टस्य लेशोऽप्युपपद्यत इति भावः।।४२।।

अलभ्यशोकाभिभवेयमाकृति-
र्विमानना सुभ्रु! कुतः पितुर्गृहे।
पराभिमर्शो न तवास्ति कः करं
प्रसारयेत् पन्नगरत्नसूतये॥४३॥

प्रकाशिका

अनुपपत्तौ हेतुत्रयमाह—

अलभ्येति। इयमिति। ईदृशसमग्रसामुद्रगुणा। अत्र कथं शोकाभिभवो लभ्यते, न सम्भाव्यत इत्यर्थः। अयं तावदेको हेतुः। अन्यमप्याह—विमाननेति। पितृगृहे, न तु भर्तृगृहे। पित्रादिबन्धुमध्यवर्तिन्या इत्यर्थः। कुतः कस्माद् जनात्। परेणाभिमर्शो बलात्कारेण स्पर्शः। नास्ति न तु स्यात्। एतत् प्रतिवस्तुनोपपादयति—कः करमिति। पन्नगरत्नसूतये पन्नगशिरोरत्नचालनाय। 'षू प्रेरणे' इति धातुः। अनेन हिमवत्प्रतापस्यालङ्घ्यत्वमुक्तम्। स्वमहाभाग्याद् बन्धुमध्यगत्वात् परानभिभवनीयत्वाच्च तवानिष्टमनुपपन्नमेवेति समर्थितम्। दक्षिणावर्तस्तु—अलभ्यौ शोकाभिभवौ यस्या इति विग्रहमुक्त्वा विमाननेत्यादिना शोकस्य, पराभिमर्शेत्यादिना अभिभवस्य चालभ्यत्वमुक्तमित्याह। तत् तु निपुणैर्विवेचनीयम्। यत् तु तेन 'सुभ्रूशब्दस्य उवङ्स्थानत्वाद् 'नेयङुवङ्स्थानावस्त्री' (१.४.४) इति नदीसंज्ञाप्रतिषेधे सम्बुद्धौ 'अम्बार्थनद्योर्ह्रस्वः' (७.३.१०७) इति ह्रस्वो न

स्यादित्यनुपपत्तिं शङ्कित्वा पाठान्तरं दर्शितं, तत्र वामनः परिहारं दत्तवान् 'ऊकारान्तादप्यूङ् प्रवृत्तेः' (५.२.४८) इति। सूत्रस्य चास्य वृत्तिः—उत ऊङ् विहित ऊकारान्तादपि क्वचिद् भवति, आचार्यप्रवृत्तेः। कासौ प्रवृत्तिः, 'अप्राणिजातेश्चारज्ज्वादीनाम्' (वा.४.१.६६) इति। अलावूः कर्कन्धूरित्युदाहरणम्। तेन 'सुभ्रु! किं सम्भ्रमेण' इत्यत्र सुभ्रूशब्दादूङ् सिद्धो भवति। ऊङि त्वसति सभ्रूरिति स्यादिति। एवं चोङोऽस्य भ्रूशब्दसम्बन्ध्युवर्णत्वाभावाद् 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' (६.४.७७) इत्युवङादेशस्याभावाद् न तत्स्थानत्वम्। ततश्च न नदीसंज्ञाप्रतिषेध इत्यवसेयम्।।४३।।

विवरणम्

अनिष्टप्राप्त्यनुपपत्तिमेव विचारमार्गानुसारिणा हेतुत्रयेण प्रतिपादयति—

अलभ्येति। तव इयम् आकृतिः अलभ्यशोकाभिभवा। इयं सामुद्रिकोक्तसकलगुणपरिपूर्णतया दृश्यमाना। आकृतिः आकारः। शरीरसंस्थानविशेष इत्यर्थः। लब्धुं ज्ञातुं न शक्यत इत्यलभ्यः। असम्भावनीय इत्यर्थः। अलभ्यः शोकेन दुःखेन अभिभवः परिभवो यस्याः सा तथा। नहि सामुद्रिकोक्तसकललक्षणपरिपूर्णे जने अनिष्टप्राप्तिः सम्भाव्यत इति भावः। ननु तपश्चरणनिमित्तभावमनुभवता येनकेनचिदवमानविशेषेण ध्रुवस्येव गुणवतामपि तपश्चरणं भवेत्, भवति च तेनैवोत्कर्षातिशयप्राप्तिरित्यत्र द्वितीयं हेतुमवतारयति—सुभ्रु! पितृगृहे विमानना कुतः इति। शोभना भ्रूः यस्याः, तस्याः सम्बुद्धिरियम्। ननु सुभ्रूशब्दस्य सम्बुद्धौ कथं ह्रस्वान्तत्वं, सुभ्रूशब्दस्य उवङ्स्थानत्वात्। 'नेयङुवङ्स्थानावस्त्री' इति हि नदीसंज्ञा प्रतिषिद्धा। तस्माद् 'अम्बार्थनद्योर्ह्रस्वः' इति ह्रस्वो न स्यादिति। उच्यते। 'ऊकारान्तादप्यूङ् प्रवृत्तेः' इति वामनसूत्रम्। अस्यार्थः। 'ऊङुतः'(४.१.६६) इति विहित ऊङ्प्रत्ययः क्वचिदूकारान्तादपि भवति। कुत इत्यत्राह—प्रवृत्तेरिति। आचार्यप्रवृत्तेरित्यर्थः। 'अप्राणिजातेश्चारज्ज्वादीनाम्' इति वार्त्तिककारवचनादिति भावः। तत्र पुनः अलावूः कर्कन्धूः इत्याद्युदाहरणम्। अत्र सुभ्रूशब्दाद् अप्राणिजातेरित्यादिना ऊङि सति 'अचि श्नुधातुभ्रुवाम्—' इत्यादिनोवङादेशस्याभावान्नदीसंज्ञापि न स्यात्। अस्य भ्रूशब्दसम्बन्ध्युवर्णत्वाभावात्। ततश्च 'अम्बार्थनद्योर्ह्रस्वः' इति ह्रस्वे सति एङ्ह्रस्वात् सम्बुद्धेः' (६.१.६९) इति सुलोपः। ततश्च हे सुभ्रु! इति पदं सिध्यति। ऊङि त्वसति सुभ्रूरित्येव। हे सुभ्रु! हे सुन्दरि!। अनया सम्बुध्या देव्याः सर्वजनेषु कारुण्यार्द्रहृदयत्वं ध्वन्यते। हृदयगतं ह्यक्षिभ्रुवादावभिव्यक्तं भवति। तदुक्तं नैषधकाव्ये—'इतीयमक्षिभ्रुवविभ्रमेङ्गितस्फुटामनिच्छां विवरीतुमुत्सुका' (९.१) इति। कारुण्यार्द्रहृदयत्वेन च देवीं प्रति जनानामनुरागातिशयः प्रतिपादितो भवति। यथोक्तं रघुवंशे—

अहमेव मतो महीपतेरिति सर्वः प्रकृतिष्वचिन्तयत्।
उदधेरिव निम्नगाशतेष्वभवन्नास्य विमानना क्वचित्।। (८.८)

इति। तस्माद् देवीस्वरूपणावस्थायामेव विमाननाहेतोरभाव इति भावः। पुनरपि विशेषमाह—पितुर्गृह इति। त्वयि अत्यन्तस्निग्धस्य हिमवतो भवने विमानना अवमानः कुतः कस्माद् भवति। भर्तृगृहवर्तिनीनां सपत्न्यादिसकाशादनिष्टं सम्भाव्येतापि, न तु सकलबन्धुजनपरिपूर्णपितृगृहवर्तिनीनाम्। पितुस्त्वयि अत्यन्तस्निग्धत्वं च प्रसिद्धम्। नन्वत्र पराभिभवो हेतुरस्तु इत्याशङ्क्य तृतीयं हेतुमाह—तव पराभिमर्शो नास्तीति। तव तथाविधप्रतापयुक्तस्य पर्वतचक्रवर्तिनः पुत्र्यास्ते। परेणाभिमर्शः बलात्कारेण स्पर्शः नास्ति न सम्भाव्यते। पराभिमर्शाभावमेव प्रतिवस्तूपमयोपपादयति—कः पन्नगरत्नसूतये करं प्रसारयेदिति। कः, न कोऽपीत्यर्थः। पन्नगरत्नसूतये पन्नगस्य रत्नं फणामणिः, तस्य सूतये चालनाय। 'षूङ् प्रेरण' इति धातोः क्तिन्प्रत्ययान्तमिदं पदम्। करं हस्तं प्रसारयेत् प्रसृतं कुर्यात्। यथा जिजीविषुः पुमान् पन्नगफणामणिसमाहरणाय करं न प्रसारयति, तथैव त्वां बलात्कारेण स्प्रष्टुमपीति भावः। करप्रसारणमात्रमपि न कुर्यात्, किं पुनः स्पर्शनमिति भावः। अनेन हिमवत्प्रतापस्यात्यन्तदुर्लङ्घ्यत्वमुक्तम्। अभिलाषे सत्यपि प्रतापादस्पृश्यत्वं प्रतिवस्तुना ध्वन्यते। अत्र देव्या महाभाग्ययोगित्वं बन्धुजनमध्यवर्तित्वं पितृगौरवात् परानभिभवनीयत्वं चेति त्रयो हेतवोऽनिष्टप्राप्त्यभावे प्रतिपादिताः। तस्मान्न तवेदं तपश्चरणमनिष्टप्राप्तिहेतुकमिति भावः।।४३।।

किमित्यपास्याभरणानि यौवने
धृतं त्वया वार्द्धकशोभि वल्कलम्।
वद प्रदोषे विनिकीर्णतारका
विभावरी यद्यरुणाय कल्पते॥४४॥

प्रकाशिका

तदेवमिष्टानवाप्तेरनिष्टावाप्तेश्चासम्भवेन वयोननुरूपं तपः किंहेतुकमित्याह—

किमिति। किं प्रश्ने। इतिर्हेतौ। किं मया कृतमित्याह—वल्कलं धृतमिति। ननु निरभिसन्धिकं तप एव पुरुषार्थः पर इत्याह—यौवन इति। अस्य वयसो नोचितं तप इति भावः। तद्योग्यं च त्वया त्यक्तमित्याह—आभरणान्यपास्येति। अन्यच्च तपोयोग्यं वय इति दर्शयति—वार्धकशोभीति। एवमनुचितपरिग्रहस्त्वया न कर्तव्य इत्यर्थः। अत्र प्रतिवस्तु—वदेति। विनिकीर्णतारका, भूत्वेति शेषः। विनिकीर्णमपास्तम्। अरुणाय अरुणं गन्तुम्। 'क्रियार्थ—' (२.३.१४) इत्यादिना

चतुर्थी। कल्पते अर्हतीत्यर्थः। यद्येवं भवति, ततो वदेत्यर्थः। तथा न कल्पते, तेन च न वदिष्यसीति शेषः।।४४।।

विवरणम्

यस्मादिदं तपश्चरणमिष्टावाप्त्यर्थं न भवति, नाप्यनिष्टपरिहारार्थं, तस्माद् निरभिसन्धिकतपश्चरणमात्रमेवात्रावशिष्यते। तत्तु पूर्वमेव किञ्चिदाशङ्क्य परिहृतमपीदानीमुपपत्तिकथनद्वारेण स्वावसरे दूरतो निराकरोति—

किमिति। त्वया यौवने आभरणानि अपास्य किम् इति वल्कलं धृतम्। त्वया लोकवृत्तज्ञया पूर्वोक्तसकलगुणविशिष्टया च। अनेन प्राप्तव्यान्तरनिरपेक्षत्वमुक्तम्। नापि निरभिसन्धिकं वल्कलधारणं च तव युक्तमित्याह—यौवन इति। अस्य वयसो नोचितं वल्कलधारणमिति भावः। यौवनोचितान्याभरणानि च त्वया परित्यक्ता-नीत्याह—आभरणानि अपास्येति। मुक्ताकलापादीनि परित्यज्य। किंशब्द प्रश्ने। इतिशब्दो हेतौ। कस्माद्धेतोरित्यर्थः। न केवलमस्य वयसो योग्यान्याभरणानि परित्यक्तानि, अनुचितपरिग्रहश्च कृत इत्याह—वल्कलं धृतमिति। वल्कलधारणयोग्यं कालान्तरमपि दर्शयति—वार्द्धकशोभीति। वार्द्धके वृद्धत्वे शोभितुं शीलमस्येति तथा। एवमनुचितपरिग्रहः किमर्थं त्वया कृत इति प्रश्नस्य नैवं त्वया कर्तव्यमित्येवार्थः। अत एवाकर्तव्यत्वमेव प्रतिवस्तुनोपपादयति—विभावरी प्रदोषे विनिकीर्णतारका अरुणाय कल्पते यदि वद। विभावरी रात्रिः प्रदोषे सन्ध्यायाम्। 'प्रदोषो रजनीमुखमि'ति सिंहः। विनिकीर्णतारका, भूत्वेति शेषः। विनिकीर्णा अपास्ताः तारका नक्षत्राणि यया सा तथा। अत्र आभरणप्रतिवस्तुतया तारकाणां निर्देशः। अरुणाय अरुणं गन्तुम्। 'क्रियार्थे'त्यादिना चतुर्थी। वल्कलप्रतिवस्तुत्वेनारुणस्योपादानम्, उभयोरप्यारुण्यात्। कल्पते, अर्हतीत्यर्थः। यदि विभावरी प्रदोषसमय एव परित्यक्ततारका भूत्वा अरुणं गन्तुमर्हति, तर्हि वदेत्यर्थः। यस्मात् तथा नार्हति, तस्माद् न वदिष्यसीत्यर्थः।।४४।।

दिवं यदि प्रार्थयसे वृथा श्रमः
पितुः प्रदेशास्तव देवभूमयः।
अथोपयन्तारमलं समाधिना
न रत्नमन्विच्छति मृग्यते हि तत्।।४५।।

प्रकाशिका

अथ पुनरपि नायिकाया हृदिस्थं वास्तवं कारणमुद्घाटयितुकामः शङ्कावकाशपीडनाय मध्येऽन्यत् कारणमाशङ्क्य परिहरति—

दिवमिति। श्रमस्तपः। तद्वृथात्वे हेतुमाह—पितुरिति। दुरवापत्वेन व्याप्ता प्रार्थनेति भावः। अथ वास्तवमुद्घाटयति—अथेति। अथशब्दः प्रश्ने। 'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथे'ति सिंहः। अलं समाधिना, तथापि तपो न कर्तव्यमित्यर्थः। कुत इत्याह—न रत्नमिति। अत्र हेतुः—मृग्यते हि तदिति। सर्वेणापीति शेषः। अत्र रत्नशब्दस्य स्वजातिश्रेष्ठवाचित्वेऽर्थान्तरन्यासोऽयं, पाषाणविशेषवाचित्वे तु न तावत् प्रतिवस्तु, तत्रासम्भवलेशस्याप्यसहनात्। अत्र च रत्नकर्तृकत्वमन्वेषणस्यासम्भवीति तन्निषेधोऽपि तादृगेव। तस्मात् सादृश्यादियमप्रस्तुतप्रशंसा। तस्यां त्वसम्भवेऽपि प्रतीयमानार्थाध्यारोपेण वाक्ययोजना घटते। अप्रस्तुतेन चार्थेन प्रस्तुतगतं सर्वप्रार्थनीयत्वहेतुकमप्रार्थयितृत्वं द्योत्यते। तच्च स्वविरुद्धं प्रार्थनं बाधमानं सत् तद्धेतुकस्य तपसो निषेधमुक्तमुपपादयति।।४५।।

विवरणम्

अथ देव्या हृदयगतमेवार्थं प्रष्टुकामोऽपि शङ्कालेशमपि परिजिहीर्षुरन्यत् किमपि मध्ये तपःकारणमाशङ्क्य परिहरति—

दिवमिति। त्वं दिवं प्रार्थयसे यदि श्रमः वृथा। दिवं स्वर्गं प्रार्थयसे अपेक्षसे यदि, तर्हि श्रमः तपः। 'श्रमु तपसि स्वेदे च' इत्यस्माद् धातोर्भावे घञ्। मान्तत्वाद् वृद्ध्यभावः। 'अभ्यासे शस्त्रविद्यादौ वेदे तपसि च श्रमः' इति भोजः। वृथा निरर्थकः। 'वृथा निरर्थकाविध्योरि'त्यमरः। ननु प्रतिज्ञामात्रेण नार्थसिद्धिरितीमामाशङ्कां हेतूपन्यासेन परिहरति—तव पितुः प्रदेशाः देवभूमयः इति। तव पितुः हिमवतः प्रदेशाः देवभूमयः स्वर्गाः। नहि स्वर्गस्थितानां स्वर्गप्राप्त्यपेक्षा सम्भवतीति भावः। इत्थं तपसः फलान्तरशून्यत्वं प्रतिपाद्य नायिकाया हृदयनिगूढं वास्तवमेव तपःकारणं किञ्चिदुद्घाटयति—अथ उपयन्तारम् इति। प्रार्थयस इति शेषः। अथशब्दः प्रश्ने। 'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ'इति सिंहः। उपयन्तारं भर्तारम्। त्वं भर्तारं किं प्रार्थयस इत्यर्थः। यद्यपि भर्तृकामनया तपश्चरणं सर्वकन्याजनसाधारणं, तथापि त्वयि तु तन्नोपपद्यत इत्याह—समाधिना अलम् इति। समाधिना तपसा। अलंशब्दो वारणार्थे। 'अलं भूषणपर्याप्तिशक्तिवारणवाचकमि'ति सिंहः। तपो न कर्तव्यमित्यर्थः। कुतो न कर्तव्यमित्यत्राह—रत्नं न अन्विच्छति इति। नान्विच्छति अन्वेषणं न करोति। नहि रत्नमात्मधारणयोग्यं जनमन्विष्य पर्यटतीत्यर्थः। तत्र हेतुमाह—तद् मृग्यते हि इति। तद् रत्नं मृग्यते अन्विष्यते। हिशब्दोऽवधारणे। मृग्यत एवेत्यर्थः। यथा सर्वप्रार्थनीयं रत्नमात्मधारणयोग्यपुरुषमन्विष्य पर्यटतीत्यसम्भाव्यं, तथा कान्तप्रार्थनया तवेदं तपश्चरणमपीति भावः। अत्र सर्वप्रार्थनीयरत्नकर्तृकान्वेषणप्रतिषेधेन तत्सदृशो

देवीकर्तृकवरप्रार्थनाप्रतिषेधः प्रतीयत इति सादृश्यादप्रस्तुतप्रशंसेयम्। रत्नशब्दस्य स्वजातिश्रेष्ठवाचित्वे पुनरर्थान्तरन्यासः।।४५।।

निवेदितं निःश्वसितेन सोष्मणा
मनस्तु मे संशयमेव गाहते।
न दृश्यते प्रार्थयितव्य एव ते
भविष्यति प्रार्थितदुर्लभः कथम्।।४६।।

प्रकाशिका

अथेत्थं परमार्थप्रसङ्गेन जातविक्रियामुपलभ्य तमेव परमार्थं किञ्चिद् विशदयति—

निवेदितमिति। सोष्मणा इष्टानवाप्तिसन्तापोष्णेन। यन्मया वरप्रार्थनमत्र प्रतिक्षिप्तं, तदेव तपःकारणमिति सोष्मणा निःश्वसितेन निवेदितमित्यर्थः। अथ तत्त्वतस्तन्मुखेन श्रोतुकामः कामुकः पुनरपि संशये प्रतिक्षिपति—मनस्त्विति। तुशब्दो मनस उपपत्त्यनुसन्धानविशेषं द्योतयति। संशयमेव गाहते, उपपत्त्यनुसरणेनेति शेषः। अत्र संशयशब्दो वितर्कमाह, यो निश्चयासन्नः। उपपत्तिमाह—प्रार्थितदुर्लभ इति। यत् सर्वप्रार्थ्यं वस्तु, तेनापि यत् प्रार्थ्यते, तत् तस्य दुर्लभं नैव भवेदित्यर्थः।।४६।।

विवरणम्

इत्थं निजहृदयवर्तिनः परमार्थसतो वस्तुनः प्रसङ्गेन सञ्जातदीर्घनिःश्वासादिविक्रियां नायिकामुपलभ्य तमेव परमार्थं किमपि प्रकाशयति—

निवेदितमिति। सोष्मणा निःश्वसितेन निवेदितम्। ऊष्मणा सहितः सोष्मा। इष्टानवाप्तिसन्तापोष्णेनेत्यर्थः। निःश्वसितेन दीर्घनिःश्वासेन। निवेदितं ज्ञापितम्। वरप्रार्थनमिति शेषः। आशङ्क्य मया परिहृतं वरप्रार्थनमेव तपःकारणमिति तवान्तस्तापोष्णेन दीर्घनिःश्वासेन निवेदितमासीदित्यर्थः। अथात्मविषयमभिलाषं तन्मुखेनैव श्रोतुकामः परिनिश्चितमेवार्थं संशयविषयतामेव नयति—मे मनस्तु संशयमेव गाहते इति। मे उपपन्नानुपपन्नार्थविवेचनकुशलस्य मम। मनः चित्तम्। तुशब्दोऽन्यचित्तेभ्यो व्यतिरेकं द्योतयति। नहि विवेककुशला दृष्टमप्यनुपपन्नमर्थं तथैवेति निश्चिन्वन्ति। संशयमनुपपत्तिम्। एवशब्द उपपत्तिलेशस्याप्यभावमाह। गाहते प्राप्नोति। सन्तापोष्णदीर्घश्वासानुमानेन वरप्रार्थनमेव तपःकारणमिति सम्यगवगतमपि तत्रोपपत्तिलेशस्याप्यभावाद् मनो मे निश्चयं नोपलभत इत्यर्थः। तामेवानुपपत्तिमाह—ते प्रार्थयितव्य एव न दृश्यते, कथं प्रार्थितदुर्लभः भविष्यति

इति। ते सर्वप्रार्थनीयायास्तव। प्रार्थयितव्यः प्रार्थयितुं योग्यः कश्चित्, पुरुष इति शेषः। त्वदपेक्षयाधिकगुणो हि पुरुषस्त्वया प्रार्थयितव्यः। तादृशस्य लोकत्रयेऽप्यभावादियमुक्तिः। प्रार्थयितव्य एव नास्ति, किं पुनः प्रार्थितदुर्लभ इत्येवशब्दार्थः। न दृश्यते, लोकत्रय इति शेषः। प्रार्थितश्चासौ दुर्लभश्चेति प्रार्थितदुर्लभः। प्रार्थितत्वे सति दुर्लभ इत्यर्थः। सर्वप्रार्थनीयया त्वया प्रार्थयितव्यः कश्चित् पुरुषो लोकत्रये नोपलभ्यते। अपि च यदि कदाचित् कश्चित् त्वया प्रार्थितो भवेत्, तर्हि तस्य भाग्यातिशय एव तत्र हेतुरिति कुतस्तस्य प्रार्थितदुर्लभत्वम्। ततो न तदर्थं तव तपश्चरणोपपत्तिरिति भावः।।४६।।

अहो स्थिरः कोऽपि तवेप्सितो युवा
चिराय कर्णोत्पलशून्यतां गते।
उपेक्षते यः श्लथबन्धिनीर्जटाः
कपोलदेशे कलमाग्रपिङ्गलाः।।४७।।

प्रकाशिका

अथ सोष्मणो विनिःश्वसितस्यैव बलवत्तां मन्यमानस्तं वरमुपालभते—

अहो इति। स्थिरशब्देन स्थैर्यगुणवाचिनापि यद्वृत्तमाहात्म्यात् पाषाणप्रख्येऽस्य जडत्वे पर्यवस्यता केवलोपालम्भकक्ष्या समारूढा। कोऽपि, ईश्वरो वा भवत्वित्यर्थः। युवा युवत्वाभिमानवञ्चितः। श्लथबन्धत्वं विरहखेदात्। ततश्च कपोललम्बित्वम्। ततश्चालकसमाधिः। तथा सेतुकाव्ये—'लंबालअमलिअपह्मलकबोला' इति। कलमाग्रं कलमकणिशम्।।४७।।

विवरणम्

इत्थमुपपत्त्यभावेन परिहृतमपि वरप्रार्थनया तपश्चरणं प्रत्यक्षप्रमाणासिस्य दीर्घनिःश्वासस्यैव प्रावल्याद् यथार्थमेवावधार्य तथा प्रार्थ्यमानं वरमुपालभते—अहो इत्यादिभिस्त्रिभिः श्लोकैः।

अहो इति। तव ईप्सितः युवा कः अपि स्थिरः अहो। तव त्वया। 'क्तस्य च वर्तमाने' (२.३.७) इति षष्ठी। ईप्सितः इष्यमाणः। वर्तमाने क्तः। युवा युवत्वाभिमानवञ्चित इत्यर्थः। कः अपि यः कश्चनापि, साक्षादीश्वरो वा भवत्वित्यर्थः। स्थिरः जड इत्यर्थः। यद्यपि स्थिरशब्दोऽयं स्थैर्यगुणशालिनि द्रव्यविशेषे प्रसिद्धः, तथापि वक्ष्यमाणवाक्यप्रागल्भ्यात् पाषाणप्रख्ये जडत्वे पर्यवस्यति। अनेनायमुपालम्भयोग्योऽपीति ध्वन्यते। 'अहो हीति च विस्मये'

इत्यमरः। जडत्वे हेतुमाह—यः कपोलदेशे इमाः जटाः उपेक्षते इति। यः युवा कपोलदेशे गण्डप्रदेशे। लम्बमाना इति शेषः। इमाः प्रत्यक्षेणैव लक्ष्यमाणाः। जटा उपेक्षते सरभसमागत्य स्वकराभ्यामेव न बध्नाति। कपोललम्बने हेतुमाह—श्लथबन्धिनीरिति। श्लथो विश्लथो बन्धो बन्धनमासामस्तीति श्लथबन्धिन्यः, ताः। अत्र विरहपीडया केशेष्वनादरः श्लथबन्धत्वे हेतुः, श्लथबन्धत्वं तु कपोललम्बने, कपोललम्बनाच्च विरहविधुरप्रोषितनायिकालकसमाधिरिति क्रमोऽत्र प्रतिपादितः। प्रियवियोगेष्वलकानां कपोललम्बनत्वमुक्तं रघुवंशे—'शच्याश्चिरं पाण्डुकपोललम्बनान्मन्दारशून्यानलकांश्चकार।' (६.२३) इति। न केवलं तदुपेक्षया कपोलयोरनुचितपरिग्रहो जातः, अपितु उचितपरित्यागोऽपीत्याह—चिराय कर्णोत्पलशून्यतां गते इति। चिराय चिरकालम्। 'चिराय चिररात्राय चिरस्याद्याश्चिरार्थका' इति सिंहः। कर्णयोराभरणत्वेन कल्पितमुत्पलं कर्णोत्पलं, तेन शून्यतां शून्यत्वम्। गते प्राप्ते। तपःप्रारम्भसमय एव कर्णोत्पलपरित्यागादेवमुक्तम्। कर्णालङ्काराणां कपोलमात्रशोभावहत्वात् कपोलयोरेव कर्णोत्पलशून्यत्वमपि। अनेन कपोलविशेषणेनापि विरहवेदनासमाधिः। त्वयि तु तदुपेक्षिता अपि जटाः 'किमिव हि मधुराणां मण्डनं नाकृतीनामि'ति [अ.शा.१.१८] न्यायेन मण्डनान्तरत्वेनैव पर्यवसिता इत्याह—कलमाग्रपिङ्गला इति। कलमाग्रं शालिशूकं, तद्वत् पिङ्गलाः रक्तवर्णाः। अनेन सुकुमारकेसरशिरीषकुसुमादिरूपकर्णाभरणत्वप्राप्तिर्जटानां दर्शिता।।४७।।

मुनिव्रतैस्त्वामतिमात्रकर्शितां
दिवाकरप्लुष्टविभूषणास्पदाम्।
शशाङ्करेखामिव पश्यतो दिवा
सचेतसः कस्य मनो न दीर्यते।।४८।।

प्रकाशिका

एतदेवोपपादयति—

मुनिव्रतैरिति। पूर्वमेव कृशत्वादतिमात्रशब्दः। दिवाकरेति। दिवाकरप्लुष्टत्वं विभूषणस्थानानामेव यदुक्तं, तत्र तेषां विभूषणधारणकाले वातातपसंसर्गाभावान्मार्दवातिशयो हेतुः। शशाङ्करेखापक्षे विभूषणास्पदं त्रैलोक्यालङ्करणकृत्यम्। 'प्रतिष्ठा कृत्यमास्पदमि'ति सिंहवचनादुभयार्थ आस्पदशब्दः। सचेतस इति। सचेताश्चेद् दीर्येत, न चासौ दीर्यते, तस्मात् पाषाणप्रख्य एवासाविति स्थितम्।।४८।।

विवरणम्

पाषाणादिवदचेतन एवायं त्वदीप्सितो वर इति यदुक्तं तदेवोपपादयति—

मुनिव्रतैरिति। मुनिव्रतैः अतिमात्रकर्शितां त्वां पश्यतः सचेतसः कस्य मनः न दीर्यते। मुनीनां व्रतैर्नियमैः तपोभिरित्यर्थः। अतिमात्रकर्शिताम् अतिमात्रम् अत्यर्थं कर्शितां कृशत्वं प्रापिताम्। पूर्वमेव कृशत्वादतिमात्रकर्शितत्वम्। त्वाम् एवम्भूतगुणविशिष्टाम्। पश्यतः अवलोकयतः सचेतसः चेतसा सहितस्य। सचेतनस्येत्यर्थः। कस्य मनो न दीर्यते स्वयमेव विदीर्णं न भवति। दीर्यत इति कर्मकर्तरि प्रयोगः। एवम्भूतां त्वां पश्यतां सर्वेषामपि मनो दीर्यत एवेत्यर्थः। सचेताश्चेत् तस्य मनो दीर्येत, नास्य मनो दीर्यते, तस्मात् पाषाणसदृश एवायमित्यर्थः। अत्र उपमामाह—दिवा शशाङ्करेखामिव इति। दिवा अहनि। शशाङ्कस्य चन्द्रस्य रेखां कलाम्। अत्यन्तकार्श्यं द्योतयितुं रेखाशब्दः। मुनिव्रतप्रतिवस्तुतया दिवाशब्दः। पश्यतो मन इति अत्रापि योज्यम्। दिवा शशाङ्करेखां पश्यतो मन इवेत्यर्थः। निशायामतिमनोरमां शशाङ्करेखाम् अहनि परिधूसरां पश्यन् को वा हन्तेदानीमेतादृशी जातेयमिति न दूयत इत्यर्थः। उपमानोपमेययोः साधारणं धर्ममाह—दिवाकराप्लुष्टविभूषणास्पदामिति। दिवाकरेण आदित्येन आप्लुष्टानि दग्धप्रायाणि विभूषणास्पदानि विभूषणानां कटकाङ्गदाद्याभरणानामास्पदानि स्थानानि यस्याः ताम्। तपसा सर्वेषामवयवानां कार्श्यमात्रं जातं, विभूषणस्थानानां पुनः आभरणधारणकाले वातातपादिसंसर्गाभावेनात्यन्तमार्दवात् पुनः तत्संसर्गे जाते दग्धप्रायत्वमेवापन्नमिति भावः। शशाङ्करेखापक्षे तु दिवाकरेण आप्लुष्टं परित्यक्तं विभूषणास्पदं त्रैलोक्यालङ्कारकृत्यं यस्याः इति योज्यम्। 'प्रतिष्ठा कृत्यमास्पदम्' इत्यमरसिंहवचनादास्पदशब्दस्योभयार्थत्वं द्रष्टव्यम्। दिवाकराप्लुष्टशशाङ्करेखां पश्यन् पुरुषः तत्समीचीनताविधानस्याशंक्यत्वात् तत्रोपेक्षां करोतीति युक्तम्। स्वाधीनानुग्रहः त्वदीप्सितः पुरुषः पुनः अखिलजगत्प्रार्थनीयां त्वामात्मप्रार्थनमात्रेणैतादृशीं पश्यन्नप्युपेक्षत इति यत्, तदचेतनत्वप्रयुक्तमेवेति युक्तमेवास्य पाषाणादिप्रख्यत्वमिति भावः।।४८।।

अवैमि सौभाग्यमदेन वञ्चितं
तव प्रियं यश्चतुरावलोकिनः।
करोति लक्षं रविमस्य चक्षुषो
न वक्त्रमात्मीयमरालपक्ष्मणः।।४९।।

प्रकाशिका

तमेव प्रकारान्तरेणोपालभते—

अवैमीति। मत्सौभाग्यस्य दुर्लङ्घत्वात् सर्वथा मामेवासावभ्युपयास्यतीति सौभाग्यमदः, तेन वञ्चितम्। वञ्चनं च यद्वृत्तेन दर्शितम्। अरालं कुटिलम्।।४९।।

विवरणम्

अथ तमेव वरं प्रकारान्तरेणोपालभते—

अवैमीति। अहं तव प्रियं सौभाग्यमदेन वञ्चितम् अवैमि। तव प्रियं त्वया प्रियत्वेन सङ्कल्पितं पुरुषमित्यर्थः। सौभाग्यमदेन, सुभगत्वेन यो मदः तेन। मदीयस्य सौभाग्यस्य लोकोत्तरत्वादियं सर्वथापि मामेवाभिसरिष्यतीत्यभिमानेनेत्यर्थः। वञ्चितं कृतवञ्चनम् अवैमि कल्पयामि। ननु कुतो वञ्चितत्वमित्यत्राह—यः अस्य चक्षुषः रविं लक्षं करोति आत्मीयं वक्त्रं न इति। यः प्रियः अस्य लोकोत्तरत्वेन दृश्यमानस्य चक्षुषः नेत्रस्य रविम् आदित्यं लक्षं प्राप्यभूमिं करोति विदधाति। आत्मीयं निजं वक्त्रं वदनं न। लक्षं करोतीति शेषः। यद्यसौ सौभाग्यमदगर्वितो नाभविष्यत्, तर्हि लोकोत्तरगुणमेतद् भवदीयं नेत्रमनवरतं तन्मुखावलोकनपरमेवाभविष्यत्। इदानीं तु तपःसिध्द्यर्थं रविमात्रावलोकनपरमासीदित्यर्थः। क्रियाचातुर्यप्रतिपादने चक्षुषो विशेषं दर्शयति—चतुरावलोकिन इति। चतुरं सुन्दरं यथा भवति तथा अवलोकितुं शीलमस्येति तथा। स्वरूपचातुर्यतोऽपि विशेषमाह—अरालपक्ष्मण इति। अरालानि कुटिलानि पक्ष्माणि अक्षिरोमाणि यस्य तस्य।।४९।।

कियच्चिरं श्राम्यसि गौरि! विद्यते
ममापि पूर्वाश्रमसञ्चितं तपः।
तदर्धभागेन लभस्व काङ्क्षितं
वरं तमिच्छामि च साधु वेदितुम्।।५०।।

प्रकाशिका

प्रसङ्गाद् वरमुपालभ्य कर्तव्यमवधारयन् वरं पृच्छति—

कियदिति। कियत् किंपरिमाणम्। चिरं चिरकालम्। 'कालाध्वनोः—' (२.३.५) इत्यादिना द्वितीया। पूर्वाश्रमो ब्रह्मचर्यम्। अर्धभागेन समप्रविभागरूपांशेन। साधु सम्यक्। अत्र प्रकरणे त्रिभिः श्लोकैस्तपस उचितः कुशलप्रश्नः,

ततस्त्रिभिः जिज्ञासासमर्थनं, तत एकेन स्वजिज्ञासितकथनं, तत एकेन वास्तवोद्घाटनं, तत एकेन तत्स्थिरीकरणं, ततः प्रसङ्गागतस्त्रिभिर्वरोपालम्भः, तत एकेन कार्योपसंहारपुरस्सरः प्रश्न इत्यनुज्झितक्रमत्वमनुसन्धेयम्।।५०।।

विवरणम्

इत्थं चाटुशतैरावर्जितचित्तां देवीं प्रति प्रष्टव्यमेवार्थं पृष्ट्वा वचनमुपसंहरति—

कियदिति। गौरि! त्वं कियच्चिरं श्राम्यसि। गौरि! हे पार्वति! कियत् किंपरिमाणं चिरं चिरकालम्। 'कालाध्वनोरि'ति द्वितीया। श्राम्यसि तपः करोषि। 'श्रमु तपसि खेदे च' इति धातुः। अलमनेन श्रमेणेति भावः। ननु श्रमाभावे कथमभिमतसिद्धिः, अत आह—ममापि पूर्वाश्रमसञ्चितं तपः विद्यते इति। ममापि, न केवलं तवैवेत्यर्थः। पूर्वाश्रमसञ्चितं पूर्वाश्रमे ब्रह्मचार्याश्रमे सञ्चितम् आर्जितं तपः। विद्यते भवतीत्यर्थः। नन्वस्तु नाम, प्रकृते तु किमायातमित्यत्राह—तदर्धभागेन काङ्क्षितं लभस्व इति। तदर्धभागेन तस्य तपसः अर्धभागेन समप्रविभागरूपेणांशेन। काङ्क्षितमीप्सितम्। वरमिति शेषः। लभस्व प्राप्नुहि अलं तव परिश्रमेण। अस्मदर्जितस्य तपसोऽर्धभागेनापि त्वदीप्सितं वरं प्राप्नुहीत्यर्थः। ननु तर्हि को विलम्बः, अत आह—अहं तं वरं साधु वेदितुम् इच्छामि च इति। तं त्वया मनसा सञ्चिन्त्यमानम्। वरं भर्तारं साधु सम्यग् वेदितुं ज्ञातुम् इच्छामि अभिलषामि च। चकार समुच्चये। पूर्वं दीर्घनिःश्वासानुमानेन सामान्यतो विदितं वरं विशेषतः प्रतिपत्तुमिच्छामीत्यर्थः। अत्र निगूढोऽर्थः—तपश्शब्देनात्र तपस्साधनभूतं शरीरं लक्ष्यते। साध्यसाधनभावश्च सम्बन्धः। 'शरीरमाद्यं खलु धर्मसाधनम्'-[कुमा.५.३३] इत्युक्तत्वात्। शरीरस्य दिव्यत्वप्रतीतिः तपश्शब्देनोपादानस्य फलम्। पूर्वाश्रम-सञ्चितं पूर्वं जगत्सर्गादौ अश्रमेण अनायासेन, मायामात्रेणेत्यर्थः। सञ्चितं सम्पादितं यत् तपःशरीरं तस्यार्धभागेन काङ्क्षितं लभस्व। हे गौरि! अलं तवानेन परिश्रमेण। मम तपःशरीरार्धभागमेव ते दास्यामि। तं वरं शरीरार्धप्रदं भर्तारं वक्ष्यमाणपूर्वपक्षयुक्तिपरिहारक्रमेण ज्ञातुमिच्छामि च। पूर्वपक्षसिद्धान्तक्रमेण व्याख्यायमानमेव हि सर्वं मनोहरं भवतीति साधुशब्दप्रयोगः।।५०।।

इति प्रविश्याभिहिता द्विजन्मना
मनोगतं सा न शशाक शंसितुम्।
अथो वयस्यां परिपार्श्ववर्तिनीं
निवर्तितानञ्जननेत्रमैक्षत।।५१।।

प्रकाशिका

एवं प्रतारणाकुशलेन परममायिना प्रतारिताया देव्या वृत्तान्तमाह—

इतीति। प्रविश्यानुप्रविश्य। इदमकथनस्याशक्यत्वे हेतुः। न शशाक, लज्जयेति शेषः। अथो इति शंसनस्याशक्यत्वावधारणानन्तरमित्यर्थः। निवर्तितानञ्जननेत्रं, पूर्वं द्विजाभिमुखस्थितत्वान्निवर्तितेन लोचनेन सखीं स्वमनोरथशंसनाय चोदितवतीत्यर्थः।।५१।।

विवरणम्

इत्थं कपटवटुना वञ्चिताया देव्यास्तदनुगुणां प्रवृत्तिमाह—

इतीति। द्विजन्मना प्रविश्य इति अभिहिता सा मनोगतं शंसितुं न शशाक। द्विजन्मना ब्राह्मणेन। 'मातुरग्रेऽभिजायन्ते द्वितीयं मौञ्जिबन्धनात्' (याज्ञ.१.३९) इति स्मृत्यनुसारेण द्वे जन्मनी यस्य विद्येते स द्विजन्मा। अनेन ब्राह्मणप्रार्थितस्यार्थस्यानतिक्रमणीयत्वाद् वचनस्यावश्यकत्वमुक्तम्। न केवलमदृष्टवशादेव वचनस्यावश्यकत्वं, दृष्टवशादपीत्याह—प्रविश्येति। अनुप्रविश्य, पूर्वोक्तेन वचनविन्यासक्रमेणान्तः प्रविश्येत्यर्थः।

> यस्य यस्य हि यो भावस्तेन तेन च तं नरम्।
> अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत्।।

इति न्यायेन कपटवटुना वशीकृतत्वमनेन दर्शितम्। अभिहिता उक्ता। ब्राह्मणत्वेन बन्धुत्वेन चाकथनस्याशक्यत्वेन वचनस्यावश्यकत्वे सत्यपि सा पार्वतीं मनोगतमर्थं शंसितुं कथयितुं न शशाक। लज्जयेति। शेषः। देव्यास्तात्कालिकमुपायान्तरं दर्शयति—अथो सा परिपार्श्ववर्तिनीं वयस्यां विवर्तितानञ्जननेत्रम् ऐक्षत इति। अथो शंसनस्याशक्यत्वावश्यकत्वयोरवधारणानन्तरम्। 'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ' इत्यमरः। परिपार्श्ववर्तिनीं समीपचारिणीम्। अत्र ताच्छील्यार्थेन प्रत्ययेन सर्वदा समीपवर्तनमुक्तम्। तेन च वयस्याया देवीहृदयगतसर्वाभिप्रायविज्ञानं देव्यास्तदीयवचनकौशलावधारणं च दर्शितम्। वयस्यां सखीम्। विवर्तितानञ्जननेत्रम्, ईक्षणक्रियाविशेषणञ्चेदम्। पूर्वमभिमुखस्थितब्रह्मचारिमुखवर्तित्वात् तस्माद् विवर्तिते परावर्जिते अनञ्जने आदौ विरहपीडया पश्चात् तपश्चरणेन चाञ्जनरहिते नेत्रे यथा भवतस्तथा। ऐक्षत ईक्षितवती। अनञ्जनशब्देनात्र पीडाधिक्यप्रतिपादनद्वारेण सर्वा अपि मत्पीडा वक्तव्या इत्यर्थो ध्वन्यते। ब्रह्मचारिमुखाद् नेत्रमाकृष्य सखीमुखावलोकनमात्रेण तां निजमनोरथशंसनाय चोदितवतीत्यर्थः।।५१।।

सखी तदीया तमुवाच वाञ्छितं
निबोध साधो! तव चेत् कुतूहलम्।
यदर्थमम्भोजमिवोष्णवारणं
कृतं तपःसाधनमेतया वपुः।।५२।।

प्रकाशिका

सखीति। साधो! इति साधुष्वकथनीयं नास्तीति द्योत्यते। कुतूहलं चेदिति कथितेऽपि कुतूहलनिवृत्तिरेव फलमिति द्योतयति। वाञ्छितस्य दुरधिगमत्वं दर्शयता यच्छब्दवाक्यार्थेन कुतूहलस्योपपद्यमानतापि द्योत्यते। अस्मिन्नर्थे कुतूहलं च तवोपपन्नं, साधुभावादवञ्चनीयश्चासि, तस्माद् वाञ्छितं वक्ष्यमाणं विदित्वास्मन्मतज्ञो निष्कुतूहलश्च भवेत्यर्थः। एतद्वाक्यं नैकृतिके तस्मिन्नार्जवसुलभं विस्रम्भं द्योतयद् विस्रम्भभाषितानां घटकतया कविनोपात्तम्।।५२।।

विवरणम्

अथ देव्या वचनाय चोदिताया वयस्यायाः प्रवृत्तिं दर्शयति दशभिः श्लोकैः। तत्रादौ कपटवटोर्वञ्चनाचुञ्चुतामजानती वक्ष्यमाणानां विस्रम्भभाषितानामुपपत्तिं दर्शयति—

सखीति। तदीया सखी तम् उवाच। तदीया पार्वतीसम्बन्धिनी सखी वयस्या। 'आलिः सखी वयस्या चे'त्यमरः। तमपरमार्थब्रह्मचारिणम् उवाच उक्तवती। उक्तिप्रकारमेवाह—साधो! तव कुतूहलं चेद् वाञ्छितं निबोध इति। हे साधो! समचित्त! नहि साधुषु किञ्चिदप्यकथनीयमस्तीति भावः। नापि साधुर्वञ्चनीय इति च द्योत्यते। तव साधुत्वादवञ्चनीयस्य ते। कुतूहलं कौतुकम्। 'कौतूहलं कौतुकं च कुतुकं च कुतूहलमि'त्यमरः। कौतुकमस्ति चेन्निबोध नितरामवगच्छ, सर्वमपि कथयामीत्यर्थः। अत्र कुतूहलमस्ति चेद् निबोधेत्यनेन कुतूहलनिवृत्तिमात्रमेवावधारणस्य फलमिति दर्शयति। सर्वमवधार्य वयमिव त्वमपि दुःखभाजनमात्रं भवेत्यर्थ। बोद्धव्यमेवार्थं संक्षिप्य दर्शयति—यदर्थम् एतया वपुः तपस्साधनं कृतमिति। यदर्थं यादृशवाञ्छितसिद्ध्यर्थम्। एतया अत्यन्तपेलवगात्र्या अनया। वपुः मृदुतरमात्मशरीरम्। अत्यन्तकठिनशरीरसाध्यस्य तपसः साधनत्वेन कृतं विहितम्। तं वाञ्छितं निबोधेति पूर्वेण योजना। अनेन वाक्येन वाञ्छितस्यार्थस्यात्यन्तदुस्साधनत्वमुक्तम्। श्रवणकुतूहलस्योपपत्तिश्च द्योत्यते। एतादृशे तपस्येतादृशस्य शरीरस्यायोग्यतामुपमया समर्थयते—अम्भोजम् उष्णवारणम् इव। अम्भोजं तामरसम्। उष्णवारणम् आतपत्रम् इव। यथा दर्शनावघ्राणादिभिरुपभोक्तव्यमत्यन्त-

पेलवमम्भोरुहमातपत्रत्वेन विधीयते, तथैवेदमपीत्यर्थः। पीडाया अत्यन्तदुस्सहत्वमेवात्र हेतुरिति भावः।।५२।।

इयं महेन्द्रप्रभृतीनधिश्रिय-
श्चतुर्दिगीशानवमत्य भामिनी।
अरूपहार्यं मदनस्य निग्रहात्
पिनाकपाणिं पतिमाप्तुमिच्छति।।५३।।

प्रकाशिका

तान्याह—

इयमिति। अवमत्येत्यनेन तेषामतिसुलभत्वं द्योत्यते। भामिनी कोपना। इन्द्रादीनां वरत्वकथने कुप्यतीति भावः। अरूपहार्यमित्यनेन तपस एव तत्र साधनत्वं द्योतयति। पिनाकपाणिमिति वीराभिलाषिण्यो हि कन्यका इति भावः।।५३।।

विवरणम्

अथ तान्येव विस्रम्भकथनान्याहावशिष्टैः श्लोकैः। तत्रादौ हृदयगतं वरमेवोद्दिशति—

इयमिति। इयं महेन्द्रप्रभृतीन् चतुर्दिगीशान् अवमत्य पिनाकपाणिं पतिम् आप्तुम् इच्छति। इयम् अतिसुकुमारतया दृश्यमाना, अनेन सहस्राक्षाद्युपयोगयोग्यता निरस्ता। महेन्द्रप्रभृतीन् इन्द्रयमवरुणकुबेरान्, किं पुनरन्यानिति भावः। तेषाम् आधिपत्यतोऽपि त्रिलोकनाथात् पिनाकपाणेः अत्यन्तहीनतां दर्शयति—चतुर्दिगीशानिति। पूर्वादीनां चतुर्णां दिशां क्रमादीशान् स्वामिनः। अवमत्य धिक्कृत्य, अत्यन्तसुलभांस्तान् परित्यज्येत्यर्थः। पिनाक इति हरधनुषो नाम। 'पिनाकोऽजगवं धनुरि'त्यमरः। पिनाकः पाणौ यस्य तम्। वीरकामिन्यो हि नितम्बिन्य इति भावः। अनेनास्यास्तत्प्रार्थनैव युक्ततरेति द्योत्यते। वीराग्रेसर एवायं न पाषाणादिवद् जड इति चानेनैव द्योत्यते। पतिं भर्तारं, पिनाकपाणिं पतित्वेन प्राप्तुमिच्छतीत्यर्थः। महेन्द्रप्रभृतीनां सर्वलोकप्रार्थनीयत्वमाह—अधिश्रिय इति। अधिगता प्राप्ता श्री ऐश्वर्यं यैः तान्। देवीं विशिनष्टि—भामिनीति। 'कोपना सैव भामिनी'त्यमरः। कोपशीलेत्यर्थः। अनेन महेन्द्रादीनां वरत्वकथनमात्रेऽपि कोपशीलत्वमुक्तम्। ननु किं पिनाकपाणिप्राप्त्यर्थं तपश्चरणक्लेशेन, रूपसम्पदा सर्वलोकप्रार्थनीया खल्वेषा। उक्तं च—'न रत्नमन्विच्छति मृग्यते हि तत्' (५.४५)

इति। तत्र परिहारमाह—मदनस्य निग्रहाद् अरूपहार्यम् इति। मदनस्य कामदेवस्य। निग्रहाद् हननात्। रूपेण सौन्दर्येण हार्यः हर्तुं वशीकर्तुं शक्यो रूपहार्यः, रूपहार्यो न भवतीत्यरूपहार्यः, तम्। कामदहनदर्शनानन्तरं भगवतो रूपहार्यत्वाभावमवधार्य तत्प्राप्तावुपायान्तरमपश्यन्ती तपश्चरणमेव तत्रोपायत्वेन निश्चितवतीत्यर्थ।।५३।।

असह्यहुङ्कारनिवर्तितः पुरा
पुरारिमप्राप्तमुखः शिलीमुखः।
इमां हृदि व्यायतपातमक्षिणोद्
विशीर्णमूर्तेरपि पुष्पधन्वनः।।५४।।

प्रकाशिका

कथं प्रतिकूलेऽपि प्रेमेत्याशङ्क्य तदेव हि प्रेमकारणमित्याह—

असह्येति। व्यायतपातं दीर्घतरपातम्। अक्षिणोदबाधत। दुर्बले हि सर्वः प्रगल्भत इति भावः।।५४।।

विवरणम्

अथ वक्ष्यमाणानां मदनवेदनानामतिमहतीनां दग्धे मदनेऽप्युपपत्तिं दर्शयति—

असह्येति। विशीर्णमूर्तेः अपि पुष्पधन्वनः शिलीमुखः पुरा असह्यहुङ्कारनिवर्तितः पुरारिम् अप्राप्तमुखः इमां हृदि व्यायतपातम् अक्षिणोत्। विशीर्णा दग्धा मूर्तिः शरीरं यस्य तस्यापि। अपिशब्दः शिलीमुखप्रवृत्तावनुपपत्तिं वक्ति। पुष्पधन्वनः पुष्पमेव धनुः यस्य तस्य कामदेवस्य। शिलीमुखः शरः। 'अलिबाणौ शिलीमुखावि'त्यमरः। पुरा कामदहनावस्थायाम्। असह्येन सोढुमशक्येन हुङ्कारेण कोपोद्रेकजनितेन शब्दविशेषेण करणभूतेन निवर्तितः व्यावर्तितः। पुरारिणेति शेषः। अत एव पुरारिम् अप्राप्तमुखः, पुराणामरिः पुरारिः। अनेन हरस्यानभिभवनीयत्वमुक्तम्। अप्राप्तं मुखमग्रं यस्य तथाभूतः सन्। इमां स्त्रीत्वेन बाल्यावस्थया च दुर्बलां पार्वतीम्। हृदि हृदये। अनेन मर्मस्थलपात उक्तः। येन च वेदनाधिक्यं ध्वन्यते। व्यायतपातमिति क्रियाविशेषणम्। व्यायतः विशेषेण आयतः दीर्घः चिरकालावस्थायी पातः पतनं यथा भवति तथा अक्षिणोत्। 'क्षिणु हिंसायामि'ति धातुः। अत्यन्तमबाधतेत्यर्थः। शरमोक्षानन्तरं हरकोपकृशानुना मदने दग्धे हरमेव लक्षीकृत्य सरभसमभिपतन् मदनवाणो भगवता हुङ्कारमात्रेण निवर्तितः सन् भगवत्परिचर्यार्थं तत्पार्श्ववर्तिनीं दुर्बलामनाथामिमामबाधत। दुर्बलेषु के नाम न प्रगल्भन्त इति भावः।।५४।।

तदा प्रभृत्युन्मदना पितुर्गृहे
ललाटिकाचन्दनधूसरालका।
न जातु बाला लभते स्म निर्वृतिं
तुषारसङ्घातशिलातलेष्वपि॥५५॥

प्रकाशिका

अथ चतुर्भिः श्लोकैः पूर्वानुरागचेष्टां वर्णयति—

तदा प्रभृतीति। 'प्रभृतिशब्दयोगे पञ्चमी दृष्टा। सप्तमीप्रयोगस्तु मृग्य' इति दक्षिणावर्तः। उन्मदना उद्भूतमदना। ललाटिका ललाटाभरणम्। 'कर्णललाटात् कन्नलङ्कारे'(४.३.६५)इति कन्। दक्षिणावर्तस्तु—अनेनानूढत्वमुक्तम्। ऊढानां तु तिलकमलङ्कारः। वक्ष्यति च 'विवाहदीक्षातिलकं चकार' (७.२४) इतीत्याह। तदसत्। ऊढाया अपि विरहतापप्रशमाय चन्दनेन ललाटिकैवालङ्कारः, न तु तिलकः, तस्य ललाटव्यापित्वाभावात्। निर्वृतिं ज्वरप्रशमम्। सङ्घातः स्त्यानभावः।।५५।।

विवरणम्

अथ चतुर्भिः श्लोकैः पूर्वानुरागचेष्टाः प्रतिपाद्यन्ते। तत्रादौ शरपातानन्तरभवं मदनव्याधिमेवाह—

तदेति। बाला तदा प्रभृति पितुः गृहे तुषारसङ्घातशिलातलेषु अपि जातु निर्वृतिं न लभते स्म। बाला ततः पूर्वं कदाचिदपि अननुभूतमदनवेदना स्वतो दुर्बला चेत्यर्थः। तदाप्रभृति शरपातानन्तरकालादारभ्य। पितुः गृहे हिमवत्प्रदेशे। अनेनानवरतप्रवृत्तहिमजलवर्षशीतलस्वभावत्वं सर्वप्रदेशानामुक्तम्। तेन च तत्रापि निर्वृतिलाभाभावाद् मदनवेदनायाः प्रभूतत्वं सूचितम्। स्वतः शीतलेष्वपि हिमवत्प्रदेशेषु शीतलिम्नः परमकाष्ठाधिष्ठितान् प्रदेशविशेषानाह—तुषारेति। तुषाराणां सङ्घातः तुषारसङ्घातः। तुषारो हिमम्। सङ्घातः समूहः। तुषारसङ्घाताश्च ताः शिलाश्चेति तुषारसङ्घातशिलाः, तासां तलेषु प्रदेशेषु। अपिशब्दः तत् निर्वृतिलाभाभावस्यानुपपत्तिमाह। अत्र बहुवचनेन यदा तदङ्गसङ्गादेका शिला शीतलतां जहाति, तदा शिलान्तरे शेत इति क्रमेण सकलशिलातलशयनं द्योत्यते। जातु क्षणकालमपि। निर्वृतिं ज्वरप्रशमम्। न लभते स्म नोपगतवती। निर्वृतिलाभाभावे हेतुमाह—उन्मदनेति। उद्धूतमदना, अत्र मदनशब्दो मदनवेदनां लक्षयति। शीतोपचाराणामपि निरर्थकत्वमाह—ललाटिकेति। ललाटिकाचन्दनधूसरालका। ललाटिका ललाटालङ्कारः 'कर्णललाटात् कन्नलङ्कारे' (४.३.६५) इति कन्। टाप्।

'प्रत्ययस्थादि—'(७.३.४४)त्यादिना अकारस्येकारादेशः। ललाटालङ्कारभूतं चन्दनं ललाटिकाचन्दनं, मदनज्वरशान्तये ललाटे शीतोपचारार्थं निक्षिप्तं चन्दनमित्यर्थः। तेन धूसराणि ललाटतटघटनमात्रेणैव झटिति भस्मभावमुपगतेन चन्दनेन धूसरवर्णान्यलकानि यस्याः सा तथा।।५५।।

उपात्तवर्णे चरिते पिनाकिनः
सबाष्पकण्ठस्खलितैः पदैरियम्।
अनेकशः किन्नरराजकन्यका
वनान्तसङ्गीतसखीररोदयत्।।५६।।

प्रकाशिका

उपात्तवर्ण इति। वर्णो गीतिक्रमः,

शुक्लादौ ब्राह्मणादौ च शोभायामक्षरे तथा।
गीतिक्रमे स्थितौ वेषे वर्णशब्द उदीरितः।।

इति हलायुधः। चरिते त्रिपुरदाहादौ। वनान्तेति वनान्तेषु संगीताभ्यासार्थं कृतसख्या इत्यर्थः। एकान्ते पिनाकिचरितश्रवणतृष्णया वनान्तगमनम्। अरोदयत् स्वदुःखानुवेधवशात्।।५६।।

विवरणम्

विलापमाह—

उपात्तेति। इयं पिनाकिनः चरिते उपात्तवर्णे सबाष्पकण्ठस्खलितैः पदैः वनान्तसङ्गीतसखीः किन्नरराजकन्यकाः अनेकशः अरोदयत्। इयं तव पुरतो वर्तमाना। पिनाकिनः हरस्य, अत्र पिनाकिपदोपादानेन हरस्य वीराग्रेसरत्वं ध्वन्यते। तेन च त्रिपुरदहनगजासुरावमर्दनादिचरितानामानन्त्याद् गीतिक्रमसौकर्यं ध्वन्यते। चरिते त्रिपुरदहनादौ। उपात्तवर्णे उपात्तो वर्णो गीतिक्रमो यस्मिंस्तथाभूते सति।

शुक्लादौ ब्राह्मणादौ च शोभायामक्षरे व्रते।
गीतिक्रमे स्तुतौ वेषे वर्णशब्दः स्मृतो बुधैः।।

इति हलायुधः। सबाष्पकण्ठस्खलितैः 'बाष्पः कण्ठाद्याश्रयो दुःखवेगः' इति भोजः। तत्सहिते कण्ठे स्खलितैः स्खलनं प्राप्तैः गद्गदप्रतिहतैरित्यर्थः। पदैः पदमात्रमपि न प्रसरति, किं पुनः गीतिक्रम इति भावः। वनान्तसङ्गीतसखीः वनान्ते यत् सङ्गीतं तत्र सखीः, वनान्ते सङ्गीताभ्यासार्थं कृतसख्या इत्यर्थः। किन्नरराजकन्यकाः

किन्नराणां किम्पुरुषाणां राजानः किन्नरराजाः, तेषां कन्यकाः किन्नराणां स्वरमाधुर्याधिक्यात् किन्नरपदोपादानम्। यथा रघुवंशे—

वृत्तं रामस्य वाल्मीकेः कृतिस्तौ किन्नरस्वरौ।
किं तद् येन मनो हर्तुमलं स्यातां न शृण्वताम्।। (१५.६४)

इति। राजपुत्र्या देव्या राजपुत्रीभिरेव सख्यस्यौचित्याद्राजपदोपादानम्। अनेकशः मुहुर्मुहुः। अरोदयत् रोदनं कारितवती। आत्मशोकानुवेधवशादिति शेषः। अयमभिप्रायः—यदा तावदियमेकान्ते पिनाकिचरितश्रवणतृष्णया वनान्तमुपगम्य सङ्गीताभ्यासव्याजेन काश्चन मनोहरस्वराः किन्नरराजकन्यकाः समानीय प्रसङ्गार्थमादौ स्वयमेव त्रिपुरदहनादिरूपं हरचरितं किमपि गातुमारभते, तदैव तत्स्वरूपस्मरणोद्बुद्धया द्विगुणया विरहवेदनया वाष्पगद्गदं रुदती निजशोकदर्शनसञ्जातशोकातिरेकास्ताः सर्वा एव मुहुर्मुहुररोदयत्। पिनाकिचरितं तु न किञ्चिदपि श्रुतवती। अहो विपरीतस्तत्राप्यस्या विधिरिति।।५६।।

त्रिभागशेषासु निशासु च क्षणं
निमील्य नेत्रे सहसा व्यबुध्यत।
क्व नीलकण्ठ! व्रजसीत्यलक्षवा-
गसत्यकण्ठार्पितबाहुबन्धना।।५७।।

प्रकाशिका

त्रिभागशेषास्विति। त्रिभागस्तृतीयो भागः। त्रिभागशेषास्विति निद्राया दुर्लभत्वं द्योत्यते। क्षणं निमील्येति स्वप्नावसर उक्तः। अलक्षत्वादिना स्वप्ने प्रत्यक्षभ्रमो द्योत्यते। क्व व्रजसीत्यनेन उपगूढस्य पलायनोद्यमस्त्रासहेतुः प्रतीयते। त्रासाच्च सहसा विबोधः।।५७।।

विवरणम्

निद्रापरिक्षयमीषन्निद्रासमये स्वप्नसमागमं चाह—

त्रिभागेति। इयमिति पूर्वश्लोकादत्रापि कर्तृत्वेनानुषज्यते। इयं निशासु त्रिभागशेषासु क्षणं नेत्रे निमील्य नीलकण्ठ! त्वं क्व व्रजसि इति सहसा व्यबुध्यत। निशासु रात्रिषु। त्रिभागशेषासु तृतीयो भागस्त्रिभागः, अंशवाचिना शब्देन सह समस्यमानः सङ्ख्याशब्दः पूरणप्रत्ययेन विनापि पूरणप्रत्ययोपेतपदवाच्यमर्थमेव ब्रवीतीत्यवगन्तव्यम्। शतांशः सहस्रांशः इत्यादिप्रयोगदर्शनात्। यथा च 'तस्मिन्नात्मचतुर्भागे'(१६.९६) इति रघुवंशे। तृतीयो भागः शेषोऽवशिष्टो यासु

तादृशीषु सतीषु, अनेन तत्पर्यन्तं निद्रालेशस्याप्यभावः सूचितः। क्षणं क्षणकालम्, अनेन तत्काले निद्रावसर उक्तः। नेत्रे लोचने। निमील्य स्वप्नावस्थयेति शेषः। नीलकण्ठेति सम्बुध्या कालकूटकवलनादिलोकोपकारनिरतस्य तव अनागसमनाथां च मां परित्यज्य गमनमनुचितमिति ध्वन्यते। क्व व्रजसि क्व गच्छसि, इत्यनेन क्षणमुपगूढमात्रस्य पलायनोद्युक्ततया स्वप्नदर्शनं ध्वन्यते। अतिपराधीनत्वभावनाजनितः संस्कारस्तथा स्वप्नदर्शने हेतुरित्यस्माकमूहः। पलायनोद्यमाच्च त्रासः, त्रासाच्च सहसाबोध इत्यादयश्च सूच्यन्ते। इतिशब्दादूर्ध्वमुक्त्वेति शब्दश्च द्रष्टव्यः, क्व नीलकण्ठेत्यादिशब्दमुक्त्वेत्यर्थः। अत्र निद्राया अतिमान्द्यात् स्वप्नजागरावस्थयोः परस्परसङ्करात् स्वप्ने प्रत्यक्षत्वभ्रमः। तेन च परमार्थसत एव वचसः प्रवृत्तिरिति द्रष्टव्यम्। सहसा व्यबुध्यत शीघ्रमेव प्रबुद्धाभूत्। स्वप्नावस्थाया विरतौ वाङ्मात्रमेवावशिष्टं, प्रियस्तु न तत्र दृष्टोऽभूदित्याह—अलक्षवागिति। लक्षशब्दश्चात्र यमुद्दिश्य वचसः प्रवृत्तिः, तं लक्षयति। अलक्षा लक्षेण रहिता वाग् यस्याः सा तथोक्ता। आलिङ्ग्यस्याप्य-भावमाह—असत्यकण्ठार्पितबाहुबन्धनेति। असत्ये अपरमार्थे सदसद्विलक्षणे कण्ठे इत्यर्थः। शुक्तिकारजतादिषु मिथ्याज्ञानेषु सदसद्विलक्षणं रजतादिकं विषयः इत्यद्वैतवादिनां मतं, तदनुसारेणेयमुक्तिः। अन्यथा पुनरलक्षवागितिवदकण्ठार्पित-बाहुबन्धनेत्येव प्रयोगः स्यात्। अर्पितं न्यस्तं बाहुबन्धनम् आलिङ्गनं यया सा तथा। स्वप्नसमागमावस्थायामपि पराधीन एवास्या प्रियः। कष्टमस्याः विधिवैपरीत्यमिति भावः।।५७।।

सदा बुधैः सर्वगतस्त्वमुच्यसे
न वेत्सि भावस्थमिमं कथं जनम्।
इति स्वहस्तोल्लिखितश्च मुग्धया
रहस्युपालभ्यत चन्द्रशेखरः।।५८।।

प्रकाशिका

एवं स्वप्ने सन्दर्शनमुक्त्वा चित्रेऽप्याह—

सदेति। सदा सर्वगत इति कालतो देशतश्चानवच्छेदकथनेनापह्नवावकाशं निराकरोति। भावोऽभिलाषः। स्वहस्तेनोल्लिखितश्चित्रे निवेशितः। रहसीति अस्मास्वदृश्यमानासु पश्यन्तीष्वित्यर्थः। अत्रापि प्रत्यक्षभ्रमः। अत्र चतुर्ष्वपि श्लोकेषु व्याधिविलापजागरोन्मादाः क्रमाद् दर्शिताः प्राधान्येन, भावाश्चान्येऽपि गुणत्वेन।।५८।।

विवरणम्

अथ चित्रदर्शनमुन्मादावस्थां चाह—

सदेति। त्वं बुधैः सदा सर्वगतः उच्यसे। चित्रनिवेशिते भगवत्युन्मादावस्थया प्रत्यक्षभ्रमेणात्र त्वंपदप्रयोगपूर्वको व्यवहारः। बुधैः विद्वद्भिर्मन्वादिभिः। अनेन तद्वचनस्य वेदमूलत्वादन्यथात्वशङ्कां निवर्तयति। सदा सर्वदा सर्वेषु कालेषु। अनेन कालतः परिच्छिन्नत्वं निरस्तम्। सर्वगतः सर्वत्र गतः। अनेन देशतः परिच्छिन्नत्वं निरस्तम्। उच्यसे कथ्यसे। त्वं देशकालानवच्छिन्न इति मन्वादिभिः स्मर्यसे इत्यर्थः। नन्वस्तु नाम मे देशकालानवच्छिन्नत्वं, प्रकृते तु को विरोधः, अत आह—त्वं भावस्थम् इमं जनं कथं न वेत्सि इति। भावस्थम्। भावोऽभिलाषः, तत्र तिष्ठतीति भावस्थः। 'सुपि स्थः' (३.२.४) इति कः। अभिलाषस्य समुद्राकारेण वर्धमानत्वात् तस्मिन्नेव स्थितमित्यर्थः। इमं जनं मां कथं न वेत्सि न जानासि। जानास्येवेत्यर्थः। देशकालाभ्यामनवच्छिन्नस्य तव मदभिलाषाज्ञानादुपेक्षणमिति वक्तुं न युक्तम्। तस्माद् निर्दयत्वादेवोपेक्षणमिति भावः। चित्रार्पिते भगवति प्रत्यक्षत्वभ्रमादयमुपालम्भ इति वदन्ती देव्या देवविषयस्य भावस्य परमकाष्ठाधिष्ठितत्वमाह—मुग्धया स्वहस्तोल्लिखितः चन्द्रशेखरः रहसि इति उपालभ्यत च इति। मुग्धया मोहमुपगतया। मोहो विपरीतग्रहः। चित्रस्थितेऽपि चन्द्रशेखरे सञ्जातपरमार्थचन्द्रशेखरबुद्ध्येत्यर्थः। स्वहस्तोल्लिखितः आदरातिशयात् स्वहस्तेनैव चित्रे निवेशितः। स्वरूपदर्शनाभिलाषातिशयादिति शेषः। चन्द्रः शेखरः शिरोलङ्कारो यस्य स तथा। अनेन भगवत्स्वरूपस्य दर्शनीयत्वमुक्तम्। तेन च दर्शनौत्सुक्याधिक्यं सूच्यते। रहसि विजने। अस्माभिरपीयमवस्था निगूढतरमेव दृष्टेत्यर्थः। इतिशब्दः 'सदा बुधैरि'त्यादिपूर्वोक्तक्रमविवक्षया प्रयुक्तः। उपालभ्यत निन्दितोऽभूत्। अनेनोन्मादावस्था दर्शिता। मूर्छावस्था तु बहुशः सञ्जातापि स्नेहाधिक्येन वक्तुमप्यशक्यत्वात् प्रियवयस्ययोपेक्षितेत्यवगन्तव्यम्।।५८।।

यदा हि तस्याधिगमे जगत्पते-
रपश्यदन्यं न विधिं विचिन्वती।
तदा सहास्माभिरनुज्ञया गुरो-
रियं प्रपन्ना तपसे तपोवनम्।।५९।।

प्रकाशिका

अथैवंविधनिष्प्रतीकारमदनोन्मादितायास्तपसि प्रवृत्तिमाह—

यदेति। अधिगमे 'निमित्तात् कर्मयोगे' (वा.२.३.३६) इति सप्तमी।

विचिन्वती चेतसा। विचयनम् अस्माभिः सह। गुरोरनुज्ञयेति विमृश्यकारित्वं द्योत्यते।।५९।।

विवरणम्

अथैवंविधया निष्प्रतीकारया मदनवेदनया समुन्मथिताया अपि देव्या धैर्यावलम्बपुरस्सरीं तपसि प्रवृत्तिमाह—

यदेति। इयं यदा हि जगत्पतेः तस्य अधिगमे विचिन्वती अन्यं विधिं न अपश्यत्, तदा गुरोः अनुज्ञया अस्माभिः सह तपसे तपोवनं प्रपन्ना। इयं पार्वती यदा यस्मिन् काले। हिशब्दो वाक्यालङ्कारे। जगत्पतिः त्रैलोक्यनाथश्च। अनेन तपोव्यतिरिक्तस्योपायान्तरस्याभावो द्योत्यते। तस्य चन्द्रशेखरस्य अधिगमे पतित्वेन प्राप्तौ। 'निमित्तात् कर्मसंयोग' इति सप्तमी। विचिन्वती सकलशास्त्रावगमपरिशुद्धेन निजेनैव चेतसा विचयनमन्वेषणं कुर्वती। अन्यं विधिं तपोव्यतिरिक्तं विधानान्तरम्। न अपश्यद् न दृष्टवती। तदा विधानान्तरादर्शनकाले गुरोः पितुः अनुज्ञया अनुवादेन। हेतौ तृतीया। गुरुनियोगपुरस्सरमित्यर्थः। अस्माभिः प्रियसखीभिः सहैव गन्तव्यम्, इत्थं च तपः कर्तव्यमित्यादिर्गुरोरनुज्ञा अनेन दर्शिता। अनेन विमृश्यकारित्वं ध्वनितम्। तपसे तपश्चरितुम्। तपोवनं तदुचितं प्रदेशम्। प्रपन्ना प्राप्ता।।५९।।

द्रुमेषु सख्या कृतजन्मसु स्वयं
फलं तपःसाक्षिषु बद्धमेष्वपि।
न च प्ररोहाभिमुखोऽपि दृश्यते
मनोरथोऽस्याः शशिमौलिसंश्रयः।।६०।।

प्रकाशिका

अथ तपसश्चिरप्रवृत्तत्वं फलादर्शनं च सनिर्वेदमाह—

द्रुमेष्विति। सख्या स्वयं कृतजन्मसु रोषितेषु। अत एव तुल्यकालत्वात् तपःसाक्षिषु। बन्धो निष्पत्तिः एवं प्रकृतव्यतिरेकविवक्षया प्रतियोगिनमुक्त्वा प्रकृतमाह—न चेति। चस्त्वर्थे। मनोरथस्त्वित्यर्थः। मनोरथः समागमलक्षणं कार्यम्। प्ररोहशब्दः प्रक्रान्तद्रुमसमाधिना। प्ररोहाभिमुखोऽपि, तिष्ठतु तावद् द्विपत्राद्यवस्था। प्ररोहाभिमुख्यं च बीजस्य किञ्चिदुच्छूनता। अद्यापि मनोरथोऽस्या बीजावस्थ एवेत्यर्थः।।६०।।

विवरणम्

इत्थं चोद्यस्योत्तरं सहेतुकं प्रतिपाद्यातिदुश्चरेऽपि तपसि चिरकालप्रवृत्तत्वं तत्फलादर्शनं च स्वयमेव विस्रम्भातिशयात् सनिर्वेदमाह—

द्रुमेष्विति। सख्या स्वयं कृतजन्मसु तपस्साक्षिषु एषु द्रुमेषु फलं बद्धम् अपि। सख्या अस्माकं प्रियवयस्यया। अनेन सौहार्दातिशय सूचितः। कृतं विहितं जन्म उत्पत्तिर्येषां तेषु। स्वयमेव बीजावापजलाहरणादिपुरस्सरं वनवासारम्भसमकालमेव रोपितेष्वित्यर्थः। अत एव तपस्समकालीनत्वात् तपसः साक्षिभूतेषु। एतावन्तं कालमियमेवमेव तपश्चचारेति जनान् बोधयत्स्वित्यर्थः। एषु उटजाङ्कणे परितो दृश्यमानेषु। अनेन तवापि प्रत्यक्षेयमतिमहती कालान्तरप्राप्तिरिति दर्शयति। द्रुमेषु वृक्षेषु फलं बद्धं सञ्जातम्। न केवलं पुष्पनिष्पत्तिः, अपितु फलनिष्पत्तिरपि जातेत्यपिशब्दार्थः। तपस्समारम्भकाले सख्या समुत्पादितेषु वृक्षेषु फलोत्पत्तिरपि जाता। अहो महानतीत काल इति भावः। इत्थं वृक्षाणां प्रकृतान्मनोरथाद् व्यतिरेकविवक्षया फलनिष्पत्तिमुक्त्वा प्रकृतस्य मनोरथस्य तु प्राचीनावस्थैवेत्याह— अस्या शशिमौलिसंश्रयः मनोरथश्च प्ररोहाभिमुखः अपि न दृश्यते इति। अस्याः अतिमहता तपसा कृशशरीरतया दृश्यमानायाः। अनेन तवापि प्रत्यक्षेयमस्याः समवस्थेति दर्शितम्। शशिमौलिः चन्द्रशेखरः संश्रयः आश्रयो यस्य तादृशो मनोरथः। मनोरथशब्देनात्र हरसमागमलक्षणं तत्कार्यं लक्ष्यते। चकारस्तुशब्दार्थे। मनोरथस्त्वित्यर्थः। प्ररोहशब्दो लोके वृक्षाद्यङ्कुरोत्पत्तौ प्रसिद्धः। अत्र तु प्रक्रान्तद्रुमसमाधिसिद्ध्यर्थं प्रयुक्तः। प्ररोहं प्रत्यभिमुखः प्ररोहाभिमुखः। उद्भवोन्मुख इत्यर्थः। प्ररोहाभिमुखत्वं च बीजस्य किञ्चिदुच्छूनतयावस्थानम्। तदपि न दृश्यते। तिष्ठतु तावदङ्कुरावस्था द्विपत्राद्यवस्थादयश्चेत्यपिशब्दार्थः। अनेन सम्भोगरूपस्य फलस्यात्यन्तविप्रकृष्टत्वमुक्तम्।।६०।।

न वेद्मि स प्रार्थितदुर्लभः सदा
सखीभिरस्रान्तरवीक्षितामिमाम्।
तपःकृशामभ्यवपत्स्यते सखीं
वृषेव सीतां तदवग्रहक्षताम्।।६१।।

प्रकाशिका

एषा च चिन्तास्माकमेव, न त्वस्याः। एषा त्वतिधैर्यादद्यापि विषादादिभिर्न स्पृश्यते। आरम्भतुल्यावस्थैव भवतीत्यभिप्रायेण स्वावस्थां दर्शयति—

नेति। प्रार्थितो दुर्लभश्चेति प्रार्थितदुर्लभः। प्रार्थनायां दुर्लभ इति

सासूयकथनम्। अस्रान्तरे अस्रस्य परिपतनोद्गमयोरन्तराल इत्यर्थः। अनेनास्रस्य निर्विच्छेदत्वं द्योत्यते। अभ्यवपत्स्यते अनुग्रहीष्यति। वृषा इन्द्रः। सीतां हलक्षतां भूमिम्। 'सीता लाङ्गलपद्धतिरि'ति हलायुधः। तच्छब्देन वृषा परामृश्यते। इन्द्रवर्षविघातशोषितामित्यर्थः।।६१।।

विवरणम्

सखीनामस्माकमेवैषा चिन्ता। इयं पुनरतिधैर्याद्द्यापि विषादैर्नाभिभूयते इत्यभिप्रायेणातिदीनां निजावस्थामाह—

नेति। प्रार्थितदुर्लभः सः कदा तपःकृशां सखीभिः अस्रान्तरवीक्षिताम् इमां सखीम् अभ्यवपत्स्यते, न वेद्मि। प्रार्थितदुर्लभः प्रार्थितश्चासौ दुर्लभश्चेति प्रार्थितदुर्लभः। सर्वप्रार्थनीययास्मत्प्रियवयस्यया प्रकर्षेण अर्थितोऽपि दुर्लभ इति सासूयं वचनमिदम्। सः हरः। 'भविष्यति प्रार्थितदुर्लभ कथम्' (कु.५.४६) इत्यादिवचनस्योत्तरमेतत्। कदा कस्मिन् काले। अनुग्रहकालस्त्विदानीमेवातिक्रान्तः। इतः परं किमस्मत्प्रियवयस्ययासौ कारयिष्यतीति भावः। अत एव सखीभिः अस्मदादिभिः। अस्रान्तरवीक्षिताम् अस्राणामन्तरे निपतनोद्गमयोरन्तराले। अनवरतप्रवृत्तानामश्रुबिन्दूनाम् अतिक्षणिकयोर्निपतनोद्गमनकर्मणोर्मध्ये एकस्मिन् बिन्दौ पतिते सत्यन्यस्योद्गमनात् पूर्वमित्यर्थः। अनेनाश्रूणामविच्छिन्नता ध्वन्यते। वीक्षितां दृष्टाम् इमां सखीम् अभ्यवपत्स्यते अनुग्रहीष्यति। 'अभ्यवपत्तिरनुग्रह' इत्यमरः। इतिशब्दोऽत्र द्रष्टव्यः। न वेद्मि न जानामि। कदा अनुग्रहीष्यतीति न जानामीत्यर्थः। अनुग्रहे सन्देह एवास्माकमिति भावः। अत्रानुरूपामुपमां दर्शयति— वृषा तदवग्रहक्षतां सीतामिव इति। वृषा वासवः। तच्छब्देन वृषैव परामृश्यते। तस्यावग्रहः तदवग्रहः। तेन क्षतां शोषिताम्। इन्द्रकृतेन वर्षप्रतिबन्धेन शोषितामित्यर्थः। सीतां हलक्षतां भूमिमिव। 'सीता लाङ्गलपद्धतिरि'त्यमरः। वर्षकारित्वमिव वर्षप्रतिबन्धकत्वमपि प्रसिद्धं मघोनः। यदुक्तं शुकसन्देशे—

वीरः स्वे यो व्यतनुत पदे वृष्टिहीने किलाज्ञां
मोघां मेघोदरभिदुरया बाणवृष्ट्या मघोनः।।(पू.भा.२७)

इति। यथा प्रार्थितोऽपि दुर्लभप्रसादो वृषा निजप्रसादमात्रलभ्यस्य वर्षस्य विनाशेन शोषितां सस्यैकशरणैर्जनैः अस्रान्तरवीक्षितां वर्षैकनिमित्तसस्याद्यभावेन कृशतया लक्ष्यमाणां लाङ्गलक्षतत्वात् प्रत्यासन्नबीजवापकालां वसुन्धरां प्रसादाभिमुखः सन् सम्यगनुगृह्णाति, तथेमां कदा परमेश्वरोऽनुग्रहीष्यतीति भावः। तथाभूतवसुन्धरोपमया देव्या अस्माकमेव दुःखाभिभवः, न तु देव्या इति ध्वन्यते। तथा हलक्षता भूमिः इन्द्रप्रसादमात्रशरणा, तथैवेयं परमेश्वरमात्रशरणा। वयं तु देवीमात्रशरणा इति चानेन वाक्येन द्योत्यते।।६१।।

अगूढसद्भावमितीङ्गितज्ञया
निवेदितो नैष्ठिकसुन्दरस्तया।
अपीदमेवं परिहास इत्युमा-
मपृच्छदव्यञ्जितहर्षलक्षणः।।६२।।

प्रकाशिका

एवमत्यार्जवादतिविवृतरहस्यम् अतिकातरं च सखीवचनमाकर्णितवतः प्रभोर्वृत्तमाह—

अगूढेति। सद्भावः परमार्थः। दक्षिणावर्तस्तु—तद्भावमिति पाठमादृत्य तच्छब्देन गौरीपरामर्श इत्याह। अगूहने हेतुमाह—इङ्गितज्ञयेति। तच्चेङ्गितं निवर्तितानञ्जननेत्रेक्षणम्। नैष्ठिकश्चासौ सुन्दरश्चेति समासः। नैष्ठिक उपकुर्वाणश्चेति द्विविधो ब्रह्मचारी। तयोर्यावज्जीवब्रह्मचारी नैष्ठिकः। सुन्दरशब्देन कामुकत्वं लक्ष्यते। परस्परविरुद्धमिदं नैष्ठिकत्वं सुन्दरत्वं चेति चित्रमिदं देव एव सम्भाव्यमिति भावः। अपिः प्रश्ने। इदं सखीवचनम्। एवमित्थम्। परिहासः केलिः। 'द्रवकेलिपरीहासा' इति सिंहः। अव्यञ्जतं गूहितं हर्षलक्षणं रोमाञ्चादि येन। अयं च प्रश्नो देवीमुखेन श्रोतुमौत्सुक्यात्।।६२।।

विवरणम्

इत्थमत्यार्जवादतिविवृतरहस्यवृत्तान्तमतिकरुणं च सखीवचनमाकर्णितवतोऽपि तमेव वृत्तान्तं तन्मुखेनैव श्रोतुकामस्य कामुकस्य भगवतो वृत्तमाह—

अगूढेति। इङ्गितज्ञया तथा अगूढसद्भावम् इति। निवेदितः नैष्ठिकसुन्दरः इदम् एवम् अपि परिहासः इति उमाम् अपृच्छत्। इङ्गितमभिप्रायं जानातीतीङ्गितज्ञा, तया। 'निवर्तितानञ्जननेत्रमैक्षत' (कु.५.५१) इत्यत्र देव्या हृदयगतमभिप्रायमवगच्छन्त्येत्यर्थः। इदं परमार्थस्यागूहने हेतुः। तया सख्या। अगूढसद्भावमिति निवेदनक्रियाविशेषणम्। अगूढो विवृतः सद्भावः परमार्थो यथा भवति तथा निवेदित इत्यर्थः। इति पूर्वोक्तप्रकारेण निवेदितः ज्ञापितः नैष्ठिकसुन्दरः। नैष्ठिको नैष्ठिकब्रह्मचारी। उपकुर्वाणो नैष्ठिकश्चेति द्विविधो ब्रह्मचारी। तत्र गृहस्थाद्याश्रमेष्वपि य उपकरोति स उपकुर्वाणः। यस्तु ब्रह्मचार्याश्रममात्रेण निष्ठां प्राप्नोति स नैष्ठिकः।

नैष्ठिको ब्रह्मचारी तु वसेदाचार्यसन्निधौ।
तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि वा।। (याज्ञव.स्मृ.१.४९)

इत्यादिस्मृत्यनुसारेण यावज्जीवं ब्रह्मचर्याश्रम एव स्थित इत्यर्थः। नैष्ठिकश्चासौ

सुन्दरश्चेति नैष्ठिकसुन्दरः। सुन्दरशब्देनात्र कामुकत्वं लक्ष्यते। परस्परविरुद्धं नैष्ठिकत्वं सुन्दरत्वं च परमेश्वर एवोपपद्यते। को वासाविति तासां विचारोऽनेन ध्वन्यते। इदं सखीवचनम् एवम्। अपिशब्दः प्रश्ने। परिहासः। 'द्रवकेलिपरीहासा' इति सिंहः। अपिशब्दोऽत्रापि द्रष्टव्यः। इति उक्तप्रकारेण उमां पृष्टवान्। तया एवं निवेदितो ब्रह्मचारी किमिदं सखीवचनम् एवं भूतार्थमेव आहोस्वित् परिहास इत्युमां पृष्टवानित्यर्थः। भवत्या रूपसम्पदं श्मशाननिलयस्य हरस्य स्वरूपं च विचारयतो मम परिहासमात्रपरमिदं वचनमिति प्रतिभातीति प्रश्नाभिप्रायः। इदं च वक्ष्यमाणानां हरनिन्दानामुपोद्घातत्वेन कृतम्। ननु कथमात्मविषयमभिलाषमतिविस्तरेण श्रुतवतः कामुकस्य हर्षानुत्पत्तिः। हर्षोत्पत्तौ वा कथं न रोमाञ्चाद्यनुदयः, तदुदये वा कथं न तासां शङ्काङ्कुराविर्भाव इतीमामाशङ्कां परिहरति—अव्यञ्जितहर्षलक्षण इति। अव्यञ्जितानि गूहितानि हर्षस्य लक्षणानि रोमाञ्चादिचिह्नानि येन स तथा। हर्षस्तूत्पन्नः। तत्कार्याणि रोमाञ्चादीन्यप्युत्पन्नानि। परममायिनः कपटवटोः तद्गोपने कः प्रयास इति भावः।।६२।।

अथाग्रहस्ते मुकुलीकृताङ्गुलौ
समर्पयन्ती स्फटिकाक्षमालिकाम्।
कथञ्चिदद्रेस्तनया मिताक्षरं
चिरव्यवस्थापितवागभाषत॥६३॥

प्रकाशिका

अथावश्यवक्तव्यत्वेन कथञ्चित् तत्रोद्यममाह—

अथेति। अग्रहस्तेऽक्षमालार्पणं जपविरामद्योतकम्। तस्य मुकुलीकृताङ्गुलित्वमर्षणसौकर्याय। चिरव्यवस्थापितवाग् व्रतार्थं चिरसंयतवाक्। ततश्च कथञ्चिद् वचनम्। मितभाषित्वं तूत्तमनायिकाधर्मः।।६३।।

विवरणम्

अथ शापभयादवश्यकर्तव्ये वचने सति लज्जापरतन्त्राया अपि देव्याः परिहासशङ्कानिरासार्थं कथञ्चिद् वचनोद्योगमाह—

अथेति। अथ अद्रेः तनया मिताक्षरं कथञ्चिद् अभाषत। अथ प्रश्नानन्तरम् अद्रेस्तनया पार्वती। मिताक्षरमिति भाषणक्रियाविशेषणम्। अक्षरशब्दः शब्दवाची। मितानि परिमितानि अक्षराणि शब्दा यथा भवन्ति तथाभाषत। शब्दानामेवात्र परिमितत्वं नार्थस्येति भावः। मितभाषितत्वम् उत्तमनायिकाधर्मः। कथञ्चित्

कथमपि। मौनव्रतपरित्यागभीत्या लज्जापारतन्त्र्याच्चेति भावः। अभाषत उक्तवती। जपमध्ये वचनस्य विशेषतोऽप्ययुक्तत्वाद् वाग्विसर्गार्थं जपविरामोद्योगमाह—अग्रहस्ते स्फटिकाक्षमालिकां समर्पयन्ती इति। अग्रहस्ते हस्ताग्रे। स्फटिकाक्षमालिकां स्फटिकमयीमक्षमालिकां जपमालाम्। समर्पयन्ती सम्यगर्षयन्ती। अर्पणप्रकारमेवाह—मुकुलीकृताङ्गुलाविति। मुकुलीकृताः मुकुलाकारतां प्रापिताः अङ्गुलयो यस्मिंस्तस्मिन्। अत्र स्वभावोक्तिः। अनेनाग्रहस्तविशेषणेन अक्षमालार्पणसौकर्यं द्योत्यते, तात्कालिकं हरमनोहरणं च। व्रतारम्भसमयादारभ्य तत्कालपर्यन्तं देव्या वाग्विसर्गाभावमाह—चिरव्यवस्थापितवागिति। चिरं चिरकालं व्यवस्थापिता संयता वाग् यया सा तथा।।६३।।

यथा श्रुतं वेदविदां वर! त्वया
जनोऽयमुच्चैःपदलङ्घनोत्सुकः/नोन्मुखः।
तपः किलेदं तदवाप्तिसाधनं
मनोरथानामगतिर्न विद्यते॥६४॥

प्रकाशिका

तत्प्रकारमाह—

यथेति। श्रुतमिति 'यदा हि तस्याधिगमे' (कु.५.५९) इत्यादिवाक्यम्। वेदविदां वरेति अस्यार्थस्य परमस्पृहणीयत्वं तपसश्चदुरवापसाधनत्वं च जानासीति द्योतयति। उच्चैःपदशब्देन परमेश्वरो विवक्षितः। लङ्घनं प्राप्तिः। किल अपरमार्थे, परप्रतीत्यपेक्षः। यथा त्वया सखीमुखाच्छ्रुतं, तथायं जनः सर्वोत्तरवस्तुप्राप्त्युत्सुकः, तपश्चेदं तत्साधनमित्यर्थः। कथमयमलोकगोचरस्ते संरम्भ इत्याह—मनोरथानामिति। अगतिरगोचरः।।६४।।

विवरणम्

वचनप्रकारमेवाह—

यथेति। वेदविदां वर! त्वया यथा श्रुतं, तथा अयं जनः उच्चैःपदलङ्घनोन्मुखः। वेदं वेदार्थं विदन्तीति वेदविदः तेषां वर! श्रेष्ठ!। अनया सम्बुध्या मदभिलषितस्यार्थस्य परमस्पृहणीयत्वं तपसो दुष्प्रापार्थसाधनसामर्थ्यं च त्वमेव जानासीति द्योत्यते। तस्मात् किञ्चिदेवात्र वक्तव्यमित्यर्थः। त्वया यथा श्रुतं, सखीमुखादिति शेषः। तथायं जनः उच्चैः पदलङ्घनोन्मुखः। उच्चैःपदम् उन्नतं पदम्। तच्चात्र परमेश्वरवधूपदं विवक्षितम्। तस्य लङ्घनं प्राप्तिः। तत्र उन्मुखः उद्युक्तः। भवतीति शेषः। ननु अत्यन्तदुर्लभमेव मन्दभाग्यया त्वया तादृशं

स्थानमित्यत्राह—इदं तपः तदवाप्तिसाधनं किल इति। इदं मया क्रियमाणम्। तपः तदवाप्तिसाधनं तस्य परमेश्वरवधूपदस्य प्राप्तौ साधनम्। किलशब्दोऽपरमार्थे। अनेनैव तपसा साधयिष्यामीति मे मनोरथः। नानेन तपसास्यास्तादृशार्थप्राप्तिर्भविष्यतीतीदानीं सर्वे जना मन्यन्त इति परप्रतीत्यनुसारेणायं किलशब्दः। ननु कथमत्यन्तदुःसाधेऽर्थे तव तादृशो मनोरथ इतीमामाशङ्कामर्थान्तरन्यासेन परिहरति—मनोरथनाम् अगतिः न विद्यते इति। मनोरथानां मनोराज्यानाम् अगतिः अविषयः न विद्यते न लभ्यते। नहि लोके मनोरथानामविषयः कश्चिदप्यर्थो विद्यत इत्यर्थः। अत्यन्तमन्दभाग्यायास्तव कथं तादृशपदप्राप्त्युपपत्तिः। नाप्यत्यन्तदुःसाधत्वेन निश्चितमर्थमुद्दिश्य कश्चिदपि लोके प्रवर्तते। तस्मात् परिहासपरमेवेदं सखीवचनमिति खलु भवता विवक्षितम्। तदनुपपन्नमेव, मनोरथस्य सर्वविषयत्वोपपत्तेरित्यर्थान्तरन्यासस्याभिप्रायः।।६४।।

अथाह वर्णी विदितो महेश्वर-
स्तदर्थिनी त्वं पुर एव वर्तसे।
अमङ्गलाभ्यासरतिं विचिन्त्य तं
तवानुवृत्तिं न तु कर्तुमुत्सहे।।६५।।

प्रकाशिका

अथैव देवीमुखेन उपलब्धवृत्तान्तस्य देवस्य पुनरपि 'क्रुद्धसुप्तमत्तानां भावज्ञानमि'ति वचनादेनां कोपयित्वा भावं परीक्षिष्ये। कोपकषायितायाश्च मुखविकारानतिमधुरान् द्रक्ष्यामीति मन्यमानस्य विटवर्गचूडामणेर्वृत्तमाह—

अथेति। अथशब्दस्य तदादित्वादाहेति लट्। 'तदादौ चे'ति भोजसूत्रम्। वर्णी ब्रह्मचारी। महेश्वरो विदितः ज्ञायमानः। तमहं जानामीत्यर्थः। पुर एव मद्दर्शनात् प्रागेवारभ्य। 'आदिरग्रं पुरः पूर्वं प्रथमं प्राक् पुरा स्मृतमि'ति हलायुधः। यदि मम त्वद्दर्शनं प्रागेवाभविष्यत् तर्हि तदर्थिनी त्वं नाभविष्य इति भावः। अमङ्गलानि चिताभस्मादीनि, तेषामभ्यासे रतिः प्रीतिर्यस्य। अहं तु तच्छीलं विचिन्त्यामङ्गलोत्सुकायास्तवानुवृत्तिं न चिकीर्षामीत्यर्थः।।६५।।

विवरणम्

इत्थं निजविषयमभिलाषं देवीमुखादेव सम्यगवगतवतोऽपि 'क्रुद्धसुप्तमत्तानां भावज्ञानमि'ति वचनाद् भावपरीक्षायाः कोपे सत्येवात्र सुकरत्वात् कोपेन विवृतभावामेनां पुनरपि परीक्षिष्ये। कोपकषायितायाश्चास्या मुखविकारानतिमनोहरानवलोकयिष्यामीति मन्वानस्य विटवर्गचूडामणेः कपटबटोः प्रवृत्तिमाह—

अथेति। अथ वर्णी आह। अथ देवीवचनादेव परमार्थज्ञानानन्तरम्। वर्णी ब्रह्मचारी आह। अथशब्दस्य तदादित्वात् 'तदादौ चे'ति भोजसूत्रानुसारेणाथशब्दयोगाद् भूतार्थे लट्। उक्तवानित्यर्थः। उक्तिप्रकारमेवाह—विदित इत्यादिना। महेश्वरः विदितः। विदित इति वर्तमाने कर्मणि क्तः। महेश्वरमहं जानामीत्यर्थः। त्वं पुरः एव तदर्थिनी वर्तसे। पुर एव अस्मद्दर्शनात् प्रागेवारभ्य। 'आदिरग्रं पुरः पूर्वं प्रथमं प्राक् पुरा स्मृतमि'ति हलायुधः। यदि तव मद्दर्शनं प्रागेवाभविष्यत्, तर्हि त्वं तदर्थिनी च नाभविष्य इति भावः। तदर्थिनी, तच्छब्देनात्र महेश्वरः परामृश्यते। तमर्थयितुं प्रार्थयितुं शीलमस्या इति तथा। अहो ते मन्दभाग्यत्वमिति भावः। यद्यपि मया पूर्वं 'तदर्धभागेन लभस्व काङ्क्षितम्' (कु.५.५०) इत्युक्तं, तथाप्यहमस्मिन्नर्थे तव चित्रवृत्तिमनुसर्तुं न शक्नोमीत्याह—अहम् अमङ्गलाभ्यासरतिं तं विचिन्त्य तव अनुवृत्तिं कर्तुं न तु उत्सहे। अमङ्गलानां चिताभस्मादीनाम् अभ्यासे निरन्तरानुलेपनादौ रतिः श्रद्धा यस्य। तं विचिन्त्य पुनः पुनर्निरूप्य। तवानुवृत्तिम् अनुसरणं कर्तुम्। तुशब्दोऽवधारणे। नैवोत्सहे नैव शक्नोमि। यद्यपि इष्टानुसरणमेव सख्यानुरूपं, तथाप्यमङ्गलाभ्यासरतेस्तस्य सर्वमङ्गलायास्तव च परस्परसङ्घटनयोग्यताविरहात् तत्स्वरूपपरमार्थवेदी नाहमस्मिन् विषये तवानुसरणं वाङ्मात्रेणापि कर्तुं शक्नोमीत्यर्थः। महति सङ्कटे पतिष्यतां बन्धूनां ततो निवारणमेव हि सख्यस्य महत् फलमिति भावः।।६५।।

अवस्तुनिर्बन्धपरे! कथं नु ते
करोऽयमामुक्तविवाहकौतुकः।
करेण शम्भोर्वलयीकृताहिना
सहिष्यते तत्प्रथमावलम्बनम्।।६६।।

प्रकाशिका

अननुवृत्तिं प्रपञ्चयति—

अवस्त्विति। अवस्तुनिर्बन्धोऽसाराभिनिवेशः। करविशेषणाभ्यां परस्परानुरूपत्वमुक्तम्। तत्प्रथमशब्देन दुस्सहत्वमुपपादितम्। पाणिग्रहणमेव तावदतिदुस्सहमित्यर्थः।।६६।।

विवरणम्

परस्परसङ्घटनयोग्यताविरहादनुवृत्तेरयोग्यत्वमेव प्रपञ्चयति सप्तभिः श्लोकैः। तत्रादौ विवाहसमय एव तावदग्निसाक्षिकं पाणिग्रहणमेवातिदुःसहम्। तिष्ठतु तावदन्यत् सर्वमित्याह—

अवस्त्विति। अवस्तुनिर्बन्धपरे! ते अयं करः शम्भोः करेण तत्प्रथमावलम्बनं कथं सहिष्यते। अवस्तुनिर्बन्धपरे! अवस्तुनि असारे यो निर्बन्धोऽभिनिवेशः तस्मिन् तत्परे। अनया सम्बुद्ध्यास्य निर्बन्धस्यात्यन्तमनुचितत्वमुक्तम्। त्वदपेक्षयात्यन्तमसार एवायं महेश्वर इति भावः। ते तव अयम् अतिसुकुमारतया दृश्यमानः करः। अनेन करस्य स्वरूपतो रमणीयत्वमुक्तम्। शम्भोः करेण तत्प्रथमावलम्बनं तदेव प्रथममादिमं यस्य तादृशमवलम्बनं ग्रहणम्। समन्त्रमाद्यं पाणिग्रहणमित्यर्थः। कालातिपाते सति परिचयवशात् कथञ्चिदपि सह्यं भवतु नाम, न पुनः प्रथमग्रहणमिति भावः। कथं सहिष्यते न कथञ्चिदित्यर्थः। अत्रासहने करस्यैव कर्तृत्वप्रतिपादनेन त्वत्करस्तत्करदर्शनमात्रेण स्वयमेव भीत्या सहसा निवर्तिष्यत इति प्रतिपादितम्। तेन चात्यन्तभयानकत्वं सूचितम्। तस्मादलं तव तत्प्राप्तिप्रयासेनेति भावः। देवीकरस्य विवाहसमये विशेषतो रमणीयत्वमाह—आमुक्तविवाहकौतुक इति। आमुक्तम् अर्पितं विवाहकौतुकं विवाहार्थं कौतुकं यस्मिन्। कौतुकबन्धनं गृह्यप्रसिद्धम्। तस्य मनोहरत्वमुक्तं रघुवंशे—'अथ तस्य विवाहकौतुकं ललितं बिभ्रत एव पार्थिवः' (८.१) इति। शम्भोः करस्य भयानकत्वमाह—बलयीकृताहिना इति। बलयीकृताः बलयतां प्रापिताः अहयः सर्पा यस्मिंस्तेन। अनेन वेषतो भीषणत्वमुक्तम्। इदमसहनत्वे हेतुः। तस्मात् तत्प्राप्तिप्रयासस्त्वया न कर्तव्य इत्यर्थः।।६६।।

त्वमेव तावत् परिचिन्तय स्वतः
कदाचिदेते यदि योगमर्हतः।
बधूदुकूलं क्व च हंसलक्षणं
क्व चाजिनं शोणितबिन्दुवर्षि तत्।।६७।।

प्रकाशिका

अथान्यदप्येवमेवेत्याह—

त्वमिति। त्वमेव तावत् परिचिन्तय। तिष्ठत्वितरदृष्टिरिति शेषः। तावत् सम्भ्रमे। 'यावत्तावन्ननु पुरा अङ्ग ही हन्त सीमिति, सम्भ्रामार्था' इति भोजः। स्वतः कदाचिदिति पाठः। स्वतो निसर्गतः कदाचिदापत्कालेऽपि। एते इति बुद्धिस्थे। 'यदिः पक्षान्तरेऽपि चे'ति सिंहः। अयोगितां च दर्शयति—वधूदुकूलमिति। हंसलक्षणं रोचनादिलिखितहंसमिथुनसनाथपर्यन्तम्। 'क्व चाजिनं शोणितबिन्दुवर्पि तदि'ति पाठः। अत्र स्वरूपतो विशेषणतश्च सम्पादितेन वैषम्येण दुकूलाजिनयोः प्रस्तुतमिथुनविषये श्लेषो न घटत इति 'क्वचिद् यदतिवैषम्यान्न श्लेषो

घटनामियादि'ति [काव्यप्रकाशे] विषमालङ्कारः। वधूशब्देन विवाहकाल एव भाविनीयमयोग्यतेति सूचितम्।।६७।।

विवरणम्

इत्थम् अतिदुःसहत्वात् प्रथमं करग्रहणस्याशक्यत्वमुक्तम्। अथ विवाहारम्भ एव यन्मङ्गलार्थं विहितं वसनपरिधानं, तत्र वसनयोः परस्परविरुद्धतामाह—

त्वमेवेति। एते कदाचित् स्वतः योगम् अर्हतः यदि, त्वमेव तावत् परिचिन्तय। एते बुद्धिस्थे वक्ष्यमाणे वस्तुनी। कदाचित् आपत्कालेऽपि। लोकत्रये त्वदुचितपुरुषान्तररहितेऽपीत्यर्थः। स्वतः निसर्गतः। अनेन रागतः प्रवृत्तिरुक्ता। योगं परस्परघटनम्। अर्हतः तत्र योग्यतां प्राप्नुतः। यदिशब्दः पक्षान्तरे। तावच्छब्दः सम्भ्रमार्थः। 'यावत्तावन्ननु पुरा अङ्ग ही हन्त सीमिति, सम्भ्रमार्थे' इति भोजः। परिचिन्तय समन्ताद् विचारय। वक्ष्यमाणे दुकूलाजिने परस्परघटनयोग्ये इति यदि ते पक्षस्तर्हि तिष्ठतु तावदस्मादृशां बन्धुजनानां दृष्टिः, त्वमेव ससम्भ्रमं विचारयेत्यर्थः। कार्यातिपाते विचारस्य निष्फत्वात् तावदित्युक्तम्। प्रकृतं वैषम्यमेव स्वरूपतो विशेषणतश्च प्रतिपादयति—हंसलक्षणं बधूदुकूलं च क्व शोणितबिन्दुवर्षि तद् अजिनं च क्व इति। हंसलक्षणं हंसा राजहंसा लक्षणं चिह्नं यस्य तादृशम्। गोरोचनादिलिखितहंसमिथुनसनाथपर्यन्तभागमित्यर्थ। वध्वा दुकूलं वधूदुकूलम्। वधूर्नवोढा। 'वधूः स्त्रीमात्रभार्ययोः, नवोढयोषास्नुषयोरि'ति केशवः। अत्र वधूशब्दप्रयोगेण विवाहसमयभाविनीयमयोग्यतेति सूचितम्। शोणितस्य बिन्दून् कणान् वर्षितुं शीलमस्येति तथा। विवाहकाले नवीनवसनपरिग्रहस्यावश्यकत्वात्। तत्कालविशेषणं चेदं, कालान्तरे पुनरजिनस्य शुष्कतया शोणितबिन्दुवर्षशीलाभावात्। अजिनं चर्म च क्व। अतिमहदनयोरन्तरमिति भावः। अत्र दुकूलाजिनयोः परस्परसङ्घटनयोग्यताविरहाद् विषमालङ्कारः।।६७।।

चतुष्कपुष्पप्रकरावकीर्णयोः
परोऽपि को नाम तवानुमन्यते।
अलक्तकाङ्कानि पदानि पादयो-
र्विकीर्णकेशासु परेतभूमिषु॥६८॥

प्रकाशिका

अथ परिणीतायास्तद्गृहगमनेऽप्यनौचित्यं दर्शयति—

चतुष्केति। चतुष्कं मण्डपविशेष। वक्ष्यति च—'नार्यश्चतुष्काभिमुखीमनैषुः'-

(७.९)इति। चतुष्कगतपुष्पप्रकरन्यस्तयोरित्यर्थः। परोऽपि, तिष्ठतु मादृशो जन इत्यर्थः। पदान्यवस्थानानि। 'पदं व्यवसितिस्थानत्राणलक्ष्माङ्घ्रिवस्तुषु' इति सिंहः। परेतभूमिषु श्मशानेषु। ता हि तस्य गृहा इति भावः।।६८।।

विवरणम्

विवाहानन्तरं भर्तृगृहप्राप्तावप्यनौचित्यमाह—

चतुष्केति। परः अपि कः नाम तव पादयोः पदानि परेतभूमिषु अनुमन्यते। परोऽपि शत्रुरपि। तिष्ठतु तावदस्मादृशो बन्धुजन इति भावः। को नाम, न कोऽपीत्यर्थः। तव पादयोः स्वत एव सुकुमारयोश्चरणयोः। पदानि स्थानानि। 'पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुष्वि'त्यमरः। परेतभूमिषु श्मशानेषु। कर्तुमिति शेषः। अनुमन्यते अनुमननं करोति, अनुवदतीत्यर्थः। श्मशाननिलयो हि हरः। ततस्तव सुकुमारयोरेतयोः पादयोरवस्थानं श्मशानभूमिषु भविष्यति। तत् तु शत्रुजनोऽपि नानुमन्यते। किं पुनरत्यन्तबन्धुभूतोऽहम्। तस्मादहं न तवानुवृत्तिं कर्तुमुत्सहे इति भावः। देवीपादयोः पूर्वावस्थानप्रदेशस्य भविष्यदवस्थानप्रदेशानां श्मशानभूमीनां च परस्परमत्यन्तविलक्षणस्वरूपत्वं प्रतिपादयति—चतुष्केत्यादिना। तत्र तावद् देवीपादविशेषणद्वारेण पूर्वावस्थानप्रदेशस्य मनोहरत्वमाह—चतुष्कपुष्पप्रकरावकीर्णयोरिति। चतुष्कं मण्डलविशेषः। 'चतुष्कं सचतुस्तम्भं विवाहे स्नानमण्डपमि'ति भोजः। तद्गते पुष्पप्रकरे कुसुमसमूहे अवकीर्णयोः न्यस्तयोः। स्वत एवात्यन्तनिर्मलेषु स्थलेषु मृदुतराणि कुसुमानि विकीर्य तत्र न्यस्तयोरित्यर्थः। अङ्घ्रिविन्यासप्रतिबिम्बानामपि रमणीयत्वमाह—अलक्तकाङ्कानीति। अलक्तको लाक्षारसोऽङ्को येषु। अनेन तेषां श्मशानभूमिष्वयोग्यत्वमुक्तम्। श्मशानविशेषणेनैव भविष्यदवस्थानप्रदेशस्यात्यन्तनिन्द्यत्वमाह—विकीर्णकेशास्विति। विकीर्णा विक्षिप्ताः केशाः प्रेतकेशा यासु। अत्र पूर्वोत्तरावस्थानप्रदेशयोः स्वरूपतो विशेषणतश्चातिवैषम्यं प्रतिपादितम्।।६८।।

अयुक्तरूपं किमतः परं वद
त्रिनेत्रवक्षःसुलभं तवापि यत्।
स्तनद्वयेऽस्मिन् हरिचन्दनाङ्किते
पदं चिताभस्मरजः करिष्यति॥६९॥

प्रकाशिका

तथा तव तदङ्गसङ्गोऽप्यतिबीभत्स इत्याह—

अयुक्तेति। प्रशंसायां रूपप्। अयुक्तेषु प्रशस्तमित्यर्थः। त्रिनेत्रवक्षस्सुलभम्,

एतदेव हि तत्र सुलभमिति भावः। तवापि एवं भुवनलोभनीयाया अपीत्यर्थः। पदं स्थानम्।।६९।।

विवरणम्

भर्तृगृहप्रवेशानन्तरभावी तदङ्गसङ्गोऽपि तवातिवीभत्स इत्याह—

अयुक्तेति। त्रिनेत्रवक्षःसुलभं चिताभस्मरजः तव अपि अस्मिन् स्तनद्वये पदं करिष्यति यद्, अतः परं किम् अयुक्तरूपं वद। त्रिनेत्रस्य हरस्य वक्षसि सुलभं सुखेन लभ्यम्। नहि तस्य वक्षस्यन्यत्किमपि लभ्यमस्तीत्यर्थः। चितायां यद् भस्म तस्य रजः चूर्णम्। तवापि लोकत्रयलोभनीयाया अपीत्यर्थः। अस्मिन् अत्यन्तकोमले स्तनयोर्द्वये। पदं स्थानं करिष्यतीति यद्, अतः परम् अस्माद् अन्यत् किम् अयुक्तरूपम्। प्रशंसायां रूपप्। अत्यन्तमयुक्तमित्यर्थः। स्तनतटाधिष्ठायोग्यमेवार्थमाह—हरिचनन्दनाङ्कित इति। हरिचन्दनं रक्तचन्दनम्। अथवा कल्पवृक्ष एव। 'सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनमि'त्यमरः। तेन अङ्किते मुद्रिते। कल्पवृक्षपङ्कानामपि वक्षसि धारणमुक्तं शाकुन्तले—'आमृष्टवक्षोहरिचन्दनाङ्के'ति-[७.१]। अनेनेन्द्रादीनामेव त्वत्पतित्वमुचितमिति ध्वन्यते। हरिचन्दनपङ्कसङ्गमयोग्ये तव स्तनद्वये हरालिङ्गनसङ्क्रान्तं चिताभस्म पदं करिष्यतीति यत् तस्मादन्यत्किमयुक्तम्। न किमपीत्यर्थः।।६९।।

इयं च तेऽन्या पुरतो विडम्बना
यदूढया वारणराजभार्यया।
विलोक्य वृद्धोक्षमधिष्ठितं त्वया
महाजनः स्मेरमुखो भविष्यति॥७०॥

प्रकाशिका

एवं दाम्पत्यनिर्वाहदशायामनौचित्यं दिङ्मात्रेण प्रदर्श्य स्मरणं नाटयन् प्रागेव कथनीयं किञ्चिन्मया विस्मृतमित्याह—

इयमिति। इदंशब्देन बुद्धिस्थं विडम्बनास्वरूपं परामृश्यते। अन्या प्रागुक्तेभ्यो विलक्षणा। 'अन्यस्त्वसदृशे भिन्न' इति सिंहः। पुरतो भर्तृगृहगमनारम्भ एवेत्यर्थः। अनेन सम्भ्रमादात्मनो वचने क्रमव्युत्क्रमं सूचयति। विडम्बना हासकारणमित्यर्थः। अत्र कार्यरूपं हेतुमाह—यदित्यादिना वाक्येन। यस्मादेवं भविष्यति, तस्माद् विडम्बनया भवितव्यमित्यर्थः। विडम्बनास्वरूपं तु ऊढयेत्यादिनानुवादभागेनार्थतो दर्शितम्। ऊढया बाल्यात् प्रभृति पितृगृह इत्यर्थः। वारणराजभार्यया करिणीम-

तल्लिकया। वृद्धोक्षमिति। सोऽपि कियच्चिरकालजीवीति केनापि न ज्ञायत इति भावः। निपातनाच्च साधुत्वम्। अधिष्ठितमारूढम्। महाजन ओषधिप्रस्थवास्तव्यः। दक्षिणावर्तस्तु—'ऊढया परिणीतया वारणराजहार्ययेति पाठः। विवाहानन्तरं गजराजवाह्ययेत्यर्थ' इत्याह।।७०।।

विवरणम्

इत्थं विवाहसम्भोगाद्यारम्भसम्भाविनीमनौचितीं दिङ्मात्रेण दर्शयित्वा प्रागेव वक्तव्यं किमपि वस्तु मया विस्मृतमिति स्मरणमभिनीयाह—

इयं चेति। ते पुरतः इयं च अन्या विडम्बना। पुरतः पूर्वम्। पतिगृहप्रस्थानवेलायामेवेत्यर्थः। अनेन पूर्वमेव वक्तव्यमिदं मया विस्मृतमिति व्यज्यते। अतिकष्टानामनिष्टानां वचनस्यावश्यकत्वात् तेषामहमहमिकया परिस्फुरणमस्य परिहासमात्रफलस्य विस्मरणे हेतुरिति च विडम्बनापदेन ध्वन्यते। इयमित्यनेन बुद्ध्यारूढं वक्ष्यमाणं विडम्बनास्वरूपं परामृष्टम्। चशब्दः पूर्वोक्तसमुच्चयार्थः। अन्या पूर्वोक्तेभ्यो विलक्षणा। 'अन्यस्त्वसदृशे भिन्ने' इत्यमरः। विडम्बना हासकारणम्। अस्य हासकारणस्य हासरूपेण कार्येण हेतुना हासकारणोत्पत्तिमेव द्रढयति—वारणराजभार्यया ऊढया त्वया वृद्धोक्षमधिष्ठितं विलोक्य महाजनः स्मेरमुखः भविष्यति। वारणानां राजा वारणराजः। न तु सामान्यवारणः। तस्य भार्या करिणीमतल्लिका। न सामान्यकरिणी तया। पितृगृहावस्थाने बाल्यात् प्रभृति विवाहावसानपर्यन्तमूढया। त्वया तादृशवाहनयोग्यया। वृद्धोक्षं वृद्धश्चासावुक्षा चेति वृद्धोक्षः। स तु कियच्चिरकालजीवीति केनापि न ज्ञायत इत्यर्थः। अत्र वृद्धोक्षपदस्य 'अचतुरा'दिसूत्रेण निपातनात् साधुत्वम्। स्वत एव उक्षा, तत्रापि वृद्धः। पूर्वं तु करिणीश्रेष्ठेति पूर्वोत्तरवाहनयोरत्यन्तवैलक्षण्यमनेन ध्वन्यते। अधिष्ठितम् आरूढं विलोक्य दृष्ट्वा महाजनः ओषधिप्रस्थवास्तव्यो लोकः। तेषामन्यथैव पूर्वं परिचयात् सद्य एव तदन्यथात्वदर्शने परिहासस्यावश्यम्भावात् स्मेरमुखः स्मेरं मुखं यस्य स तथा भविष्यति। यद् यस्माद् ओषधिप्रस्थवास्तव्यो जनः स्मेरमुखो भविष्यति, तस्मात् करिणीवाहनोचितायास्तव वृद्धोक्षाधिरूढत्वरूपं हासकारणं भविष्यत्येवेत्यर्थः।।७०।।

द्वयं गतं सम्प्रति शोचनीयतां
समागमप्रार्थनया पिनाकिनः।
कला च सा कान्तिमती कलात्मन-
स्त्वमस्य लोकस्य च नेत्रकौमुदी॥७१॥

प्रकाशिका

किं बहुना, त्वमीदृग्गुणापि सम्प्रति शोचनीया संवृत्तेत्याह—

द्वयमिति। द्वयमित्यादिवाक्येन सामान्येनोपक्रम्य किं च किं चेत्याकाङ्क्षायां कला चेत्यादिना विशेषेणोपसंहारः। सम्प्रतीति पूर्वं त्वेकमेव शोचनीयतां गतमिति वक्तुं शक्यम्, इदानीं तु द्वयमपीत्यर्थः। समागमप्रार्थनया कृतया क्रियमाणया च। तत्र कृतया कला क्रियमाणया च त्वमित्यर्थः। सेति तच्छब्देन प्रसिद्धतमार्थः परामृश्यते। सा कला या प्रसिद्धेति स्फुटत्वेन प्रतीतेः। दक्षिणावर्तस्तु—'सेत्यनेन पूर्वकालशोचनीयत्वं सूचितमि'त्याह। सा कला चेति त्वं चेति चान्वयः। विशेषणाभ्यां तुल्यकक्ष्यत्वमुक्तम्। तुल्यकक्ष्यतया च बुद्धिस्थाया द्वयमित्युपक्रमः।।७१।।

विवरणम्

एवम्भूतानि बहूनि वक्तव्यान्यतः परमपि सन्त्येव। किमनेन दुरुपन्यासक्लेशेन। सर्वथापि त्वं शोचनीया संवृत्तेत्याह—

द्वयमिति। पिनाकिनः समागमप्रार्थनया सम्प्रति द्वयं शोचनीयतां गतम्। पिनाकिनः पिनाकिशब्दश्रवणमात्रेण तवायं वीराग्रेसरत्वभ्रम इति भावः। यच्चात्र कैश्चित् पिनाकिपदप्रयोगो न दोषप्रकरणोपयोगी, तस्मात् कपालिन इत्येव वक्तव्यमित्युक्तं, तदप्यनेन परिहृतम्। 'अत्रिमुनिलोचनदूषिकायां पीयूषदीधितिरिति ग्रथितोऽनुराग' इत्यत्र पीयूषदीधितिपदप्रयोगवदत्रापि पिनाकिपदप्रयोगोपपत्तेरुक्तत्वात्। समागमः सङ्गमः। समागमाय प्रार्थना समागमप्रार्थना, तया। सम्प्रति इदानीं द्वयं वक्ष्यमाणं वस्तुद्वयं शोचनीयतां शोच्यत्वं गतं प्राप्तम्। किं तर्हि तद् द्वयमित्यत्राह—कलात्मनः कान्तिमती सा कला च अस्य लोकस्य नेत्रकौमुदी त्वं च इति। कलात्मनः कला एव आत्मा स्वरूपं यस्य तस्य चन्द्रस्य। लळयोरविशेषात् कलात्मन इति च प्रतिभाति। अनेन स्वरूपतो मनोहरत्वम् उक्तम्। कान्तिमतीति प्रशंसायां भूम्नि च मतुप्। मनोहरबहुतरकान्तियुक्तेत्यर्थः। अनेन विशेषतो मनोहरत्वं प्रतिपादितम्। सा लोकप्रसिद्धा। कला षोडशो भागः। 'कला तु षोडशो भाग' इत्यमरः। अस्य लोकस्य लोकत्रयवासिनो जनस्य। नेत्राणां कौमुदी चन्द्रिका। 'चन्द्रिका कौमुदी'त्यमरः। कौमुदीव दर्शनमात्रेण नेत्रानन्दकारिणीत्यर्थः। अत्रापि त्वमित्यनेन स्वरूपतो रमणीयत्वं, नेत्रकौमुदीत्यनेन विशेषतो रमणीयत्वं च प्रतिपादितम्। अनेनोभयोरपि गुणसाम्यप्रतिपादनेन पूर्वमेव द्वयमिति तुल्यतयोपक्रमस्य बुद्धिस्थेन गुणसाम्येन युक्तत्वमुपपादितम्। इतः पूर्वं चिताभस्मकपालादिमध्यवर्ति शशिकलात्मकं वस्त्वेकमेव शोचनीयतां गतमिति

सम्प्रतीत्यनेनोक्तम्। पिनाकिनः समागमप्रार्थनैव द्वयोरपि शोचनीयत्वप्राप्तौ हेतुः। पूर्वकृतया प्रार्थनयैकम्, अन्यत्पुनरिदानीं क्रियमाणयेत्येव भेदः।।७१।।

वपुर्विरूपाक्षमलक्ष्यजन्मता
दिगम्बरत्वेन निवेदितं वसु।
वरेषु यद् बालमृगाक्षि! मुग्यते
तदस्ति किं व्यस्तमपि त्रिलोचने॥७२॥

प्रकाशिका

एतदेवोपपादयति—

वपुरिति। अलक्ष्यं देशकालजात्यादिभिर्जन्म यस्य तस्य भावस्तत्ता। अस्तीति शेषः। वरेषु जातामृषु। यदिति गुणजातं परामृश्यते। बालमृगाक्षीति विरूपाक्षानर्हत्वं द्योत्यते। मृग्यते अर्थात् कन्याबन्धुभिः। तदिति रूपाभिजनसमृद्धिलक्षणसम्पन्नत्वम्। व्यस्तमेकैकमित्यर्थः। त्रिलोचनशब्देन लक्षणशून्यत्वमुक्तम्। 'हानिवदाधिक्यमप्यङ्गानां विकार' इति वचनात्।।७२।।

विवरणम्

शोचनीयत्वमेव हेतुभिरुपपादयति—

वपुरिति। बालमृगाक्षि! वरेषु यद् मृग्यते, त्रिलोचने तद् व्यस्तमपि किमस्ति। बालो मृगो बालमृगः। बालमृगस्य अक्षिणी इव अक्षिणी यस्याः सा तथा। अक्ष्णोः शोभाधिक्यप्रतिपादनार्थं बालपदोपादानम्। अनेन विरूपाक्षानर्हत्वं द्योत्यते। वरेषु भर्तृषु। यत् सौन्दर्यादिकं गुणजातम्। मृग्यते अन्विष्यते। वधूभिः तद्बन्धुभिश्चेति शेषः। त्रिलोचने हरे तद् गुणजातं व्यस्तं विभक्तम् एकैकमपि अस्ति किम्।

कन्या कामयते रूपं माता वित्तं पिता श्रुतम्।
बान्धवाः कुलमिच्छन्ति मृष्टान्नमितरे जनाः।।

इत्यादिवचनानुसारेण सौन्दर्याभिजात्यमहालक्षणलक्षिततत्वादीनि यानि गुणजातानि बधूभिस्तद्बन्धुभिश्च विवाहसमयात् प्रागेवान्विष्यन्ते, तेष्वेकमपि किं त्रिलोचने विद्यते। एकस्यैकदेशोऽपि नास्तीत्यर्थः। नास्तित्वमेवोपपादयति—वपुरित्यादिना। वपुः विरूपाक्षं, शरीरं ललाटे लोचनसद्भावाद् विकृतलोचनम्। भवतीति शेषः। अलक्ष्यजन्मता, अस्तीति शेषः। देशकालजात्यादिभिरलक्ष्यं लक्षयितुं ज्ञातुमशक्यं जन्म यस्य तस्य भावस्तत्ता। अयं कस्मिन् देशे जातः, कस्मिन् वा काले, कस्यां वा जातौ, को वास्य पिता, का वा मातेति केनापि न ज्ञायत इत्यर्थः। प्रसिद्ध-

तत्रब्राह्मणादिदेशजातानामेव हि सम्बन्धयोग्यता। तथा कस्मिन् काले जन्मास्येति वृद्धैरपि न ज्ञायते। अनेन वृद्धेभ्योऽपि वृद्धतरत्वमुक्तम्। तेन च तरुणीरमणीयत्वं निरस्तम्। यथाहुः—'डिण्डीरपिण्डपरिपाण्डरगण्डमुण्डं चण्डालवत् परिहरन्ति नरं तरुण्यः' इति। 'ऊनषोडशवर्षा स्त्री पूर्णविंशेन सङ्गता, उत्तमं जनयेत् पुत्रम्' इत्यादिवचनविरोधजनिता बहुविधा दोषाश्चानेनैव सूचिताः। तथा जात्या कीदृशोऽयमिति निर्णयाभावेऽपि न कैश्चिदपि कन्या दीयते। न च मातापितृगतया जात्यास्यापि जातिः परिच्छेत्तव्या। अस्य मातापित्रोरप्यलक्षितत्वात्। ननु वृद्धत्वादयः सर्वेऽपि दोषा वसुमत्तया परिह्रियन्ते। यथोक्तं—

स कुलीनः स विद्वांश्च स युवा स विचक्षणः।
स एव सुभगो यस्तु धनधान्यसमृद्धिमान्।।

इति। तस्माद् वसुमत्तायां सत्यां किमन्यैर्गुणैरितीमामाशङ्कां वसुमत्त्वनिरासेन परिहरति—दिगम्बरत्वेन वसु निवेदितमिति। दिगेवाम्बरं यस्य स दिगम्बरः। तस्य भावस्तत्त्वं, तेन। वसु धनम्। 'देवभेदेऽनले रश्मौ वसू रत्ने धने वसु' इत्यमरः। निवेदितं ज्ञापितम्। अनर्घवसना हि धनिनः। निर्धनास्तु जीर्णवसनाः। अस्य तु जीर्णवसनस्याप्यभावेन वसुमत्ता दूरं निरस्ता। तस्मादस्येदृशी धनसम्पत्तिरिति तद्गतं दिगम्बरत्वमेव निवेदयतीति किमस्माकमस्य वसुमत्तानिरासप्रयासेनेति भावः। त्रिलोचनशब्देनात्र लक्षणशून्यत्वमुक्तम्। न्यूनाङ्गत्वस्येवाधिकाङ्गत्वस्यापि सामुद्रिकवेदिभिरङ्गदोषपक्षे निक्षिप्तत्वात्। यथोक्तं—'हानिवदाधिक्यमप्यङ्गानां विकारः' इति।।७२।।

निवर्तयास्मादसदीप्सितान्मनः
क्व तद्विधस्त्वं क्व च पुण्यलक्षणा।
अपेक्ष्यते साधुजनेन वैदिकी
श्मशानशूलस्य न यूपसत्क्रिया।।७३।।

प्रकाशिका

अथ कर्तव्यमवधारयति—

निवर्तयेति। तद्विधस्तादृशः। अपेक्ष्यते इष्यते। वैदिकीति सत्क्रियाया अलौकिकत्वद्योतकेन विशेषणेन देव्या अपि विशिष्टोपयोगयोग्यत्वं द्योत्यते। श्मशानशूलस्य वध्यारोपणशूलस्य।।७३।।

विवरणम्

यद्यसावेवंविधस्तर्हि किं मया कर्तव्यमित्याकाङ्क्षायां कर्तव्यमुपदिश्य वचनमुपसंहरनि—

निवर्तयेति। त्वम् अस्माद् असदीप्सिताद् मनः निवर्तय इति। अस्माद् इदानीं क्रियमाणात्। असदीप्सिताद् असतः अकुशलोदर्कादीप्सितादभिलाषात्। मनः चित्तं निवर्तय व्यावृत्तं कुरु। विरूपाक्षविषयमभिलाषं तव चिरकालपरिवर्धितमपि मदुक्तयुक्तिपुरस्सरमस्याकुशलोदर्कत्वं परिनिश्चित्य शनैश्शनैर्निवर्तयेत्यर्थः। मनसो निवर्तनीयत्वमेव बधूवरयोः परस्परानन्वयमुखेन दर्शयति—तद्विधः क्व पुण्यलक्षणा त्वं च क्व इति। तद्विधः तादृशः। पूर्वोक्तसकलदोषाधिष्ठानभूत इत्यर्थः। पुण्यानि शुभानि लक्षणानि चिह्नानि यस्याः सा तथा। सामुद्रिकोक्तसकलवधूलक्षणपरिपूर्णेत्यर्थः। युवयोर्महानेव विशेष इति भावः। अनन्वयमेव द्रढयति—साधुजनेन वैदिकी यूपसत्क्रिया श्मशानशूलस्य न अपेक्ष्यते इति। साधुजनेन सज्जनेन वैदिकी वेदविहिता। यूपसत्क्रिया यूपो यज्ञस्तम्भः, तद्विषया सत्क्रिया सती क्रिया तक्षणादिरूपो यूपसंस्कारः। श्मशानशूलस्य बध्यारोपणशूलस्य। न अपेक्ष्यते नेष्यते। यथा वैदिकत्वादलौकिकी यूपसत्क्रिया विशिष्टयज्ञोपयोगयोग्ययूपयोग्या, न वध्यारोपणशूलयोग्या, तथा पुण्यलक्षणत्वान्महाभाग्यगुणयोगिनी त्वमपि स्वर्गादिभोगयोग्यतादृशगुणविशिष्टपुरुषयोग्यैव, न श्मशानाश्रयहरयोग्येत्यर्थः। अत्र साधुजनेन नापेक्ष्यत इत्यनेन 'तवानुवृत्तिं न तु कर्तुसुत्सहे' (५.६५) इति पूर्वोक्तमेवार्थमुपसंहृतवानित्यवसेयम्। अत्र सादृश्यनिमित्ताप्रस्तुतप्रशंसा।।७३।।

इति द्विजातौ प्रतिकूलवादिनि
प्रवेपमानाधरलक्ष्यकोपया।
निकुञ्चितभ्रूलतमाहिते तया
विलोचने तिर्यगुपान्तलोहिते।।७४।।

प्रकाशिका

देव्या वृत्तोन्तमाह—

इतीति। द्विजाताविति तस्य शापाद्यविषयत्वद्योतनात् कोपस्यात्मदाहकत्वं द्योत्यते। प्रवेपमानाधरलक्ष्यकोपयेत्यादिना कामुकस्य मनोरथसिद्धिरुक्ता। निकुञ्चितमाभुग्नम्। तिर्यगाहिते पार्श्वापवृत्ते कृते।।७४।।

विवरणम्

इत्थमपरमार्थब्रह्मचारिणा सपरिहासमभिहिताया देव्या वृत्तमाह—

इतीति। द्विजातौ इति प्रतिकूलवादिनि तया विलोचने तिर्यग् आहिते। द्विजातौ ब्राह्मणे। अनेनास्य बटोः शापाद्ययोग्यत्वं प्रतिपादितम्। यथोक्तं भागवते भगवतैव—'विप्रं कृतागसमपि नैव द्रुह्यत मामकाः!' (१०.६४.४१) इति। अनेनास्य शापाद्यविषयत्वप्रतिपादनेन कोपस्यात्मदाहमात्रफलपर्यवसानं ध्वन्यते। अत एवाधरस्पन्दादीनां बहुविधानां कोपचिह्नानामुद्भवः। इति शब्देन विदितो महेश्वरः' (५.६५) इत्यादि पूर्वोक्तं हरनिन्दावचनं विवक्षितम्। प्रतिकूलं वदितुं शीलमस्येति तथा। तया पार्वत्या विलोचने आत्मनो नयने। तिर्यगित्याधानक्रियाविशेषणं, तिरश्चीने यथा भवति तथा आहिते विहिते। ब्राह्मणे प्रतिकूलवादिनि सति पार्वती तस्य शापाद्यनर्हत्वादात्मनो नयनद्वयं कोपवशात् तन्मुखान्निवर्त्य तिर्यक्प्रसारितकनीनिकं चकारेत्यर्थः। एतदपि कोपचिह्नं ब्रह्मचारिविषयानादरद्योतकं च। पुनरपि कोपसूचकं क्रियाविशेषणमाह—निकुञ्चितभ्रूलतमिति। निकुञ्चिते आभुग्ने भ्रूलते प्रशस्ते भ्रुवौ (यस्मिन् कर्मणि तद्) यथा भवति तथा। अनेन भ्रूभङ्गप्रतिपादनेन कामुकस्य मनोरथसिद्धिरुक्ता। कोपस्यानुभावान्तरमप्याह—प्रवेपमानाधरलक्ष्यकोपयेति। प्रवेपमाने प्रकर्षेण वेपमाने कम्पमाने अधरे लक्ष्यः लक्षयितुं शक्यः कोपो यस्यास्तया। पुनरप्यनुभावान्तरमाह—उपान्तलोहिते इति। उपान्ते अपाङ्गे लोहिते रक्ते। अनेन नेत्रविशेषणेनापि कामुकस्य मनोरथस्फूर्तिर्ध्वन्यते।।७४।।

उवाच चैनं परमार्थतो हरं
न वेत्सि नूनं यत एवमात्थ माम्।
अलोकसामान्यमचिन्त्यहेतुकं
द्विषन्ति मन्दाश्चरितं महात्मनाम्।।७५।।

प्रकाशिका

द्विजातित्वादेव प्रतिवचो देयमित्याह—

उवाचेति। नूनं निश्चये। कथं न वेद्मीत्याह—यत इति। एवमिति द्वेषगर्भम्। उपपादयति—अलोकेति। सामान्यं साधारणम्। मन्दा मूढाः। स्वमान्द्याज्ज्ञातुमशक्येन लोकोत्तरेण महच्चरितेन द्वेषपविषयत्वं व्याप्तमित्यर्थः।।७५।।

विवरणम्

यद्यपि द्विजातित्वादसौ न शापादिविषयस्तथापि प्रतिवचनविषयो भवत्येवेति मन्वानाया देव्याः प्रतिवचनप्रस्तावमाह—

उवाचेति। एनम् उवाच च। एनं ब्रह्मचारिणम् उवाच च उक्तवती च। न केवलं कोपचिह्नैरेव तन्मनोरथं पूरयामास, अपि तु वाचा चेति चशब्दार्थः। तत्र ब्रह्मचारिणा पूर्वाभिहितानां हरनिन्दावचनानां परिहारोऽपि वक्तव्यः। तत्रादौ यत्तावदुक्तं 'विदितो महेश्वरः' (५.६५) इति, तदेव परिहरति—त्वं हरं परमार्थत न वेत्सि नूनमिति। हरं महेश्वरं। परमार्थतः तत्त्वतः न वेत्सि न जानासि। नूनंशब्दो निश्चयार्थः। त्वं हरमापातत एव जानासि, न तु परमार्थत इत्यर्थः। नन्वहं कथं न जानामीत्यत्राह—त्वं माम् एवम् आत्थ यतः इति। मां तत्स्वरूपस्य दुर्ज्ञेयत्वमवगच्छन्तीं मां प्रतीत्यर्थः। 'अमङ्गलाभ्यासरतिम्' (५.६५) इत्यादिपूर्वोक्तप्रकारं हरनिन्दावचनमेवंशब्दार्थः। आत्थेति 'ब्रुवः पञ्चानामादित आहो ब्रुवः' (३.४.८४) इति लटि ब्रुव आहादेश। यतः यस्मात्कारणात्। यस्मान्मामेवमात्थ, तस्मात् त्वं तत्स्वरूपं परमार्थतो न जानासीत्यर्थः। ननु कथमेवम्भूतेन निन्दावचनेन स्वरूपाज्ञानानुमानमित्याशङ्क्य महाजननिन्दायास्तत्स्वरूपाज्ञानेन व्याप्ति दर्शयति—मन्दाः महात्मनां चरितं द्विषन्ति इति। मन्दाः मूढाः। परमार्थज्ञानहीना इत्यर्थः। महात्मनां महाजनानां चरितं व्यापारं द्विषन्ति। निन्दन्तीत्यर्थः। निन्दायामुपपत्तिमाह—अलोकसामान्यमिति। लोकेषु सामान्यं साधारणं न भवतीत्यलोकसामान्यम्। लोकोत्तरमित्यर्थः। अत एवाह—अचिन्त्यहेतुकमिति। अचिन्त्यः चिन्तयितुमशक्यो हेतुर्यस्य तत्तथा। महतामेवम्भूतस्यानुष्ठानस्य किं प्रयोजनमिति कैश्चिदपि ज्ञातुमशक्यमित्यर्थः। अवाङ्मनसगोचरं महतां चरितम्। तस्मात् तदेकदेशदर्शनेन महाजननिन्दावचनं तत्स्वरूपाज्ञानादेवेत्यर्थः। तस्माद् 'विदितो महेश्वर' इति वचनमनुपपन्नमेवेति भावः।।७५।।

विपत्प्रतीकारपरेण मङ्गलं
निषेव्यते भूतिसमुत्सुकेन वा।
जगच्छरण्यस्य निराशिषः सतः
किमाभिराशोपहतात्मवृत्तिभिः।।७६।।

प्रकाशिका

कस्तर्हि तस्य परमार्थ इत्याह—

विपदिति। इष्टार्जनानिष्टपरिहारार्थे मङ्गलाचरणमित्यर्थः। तदुभयमप्यस्य नापेक्षितमित्याह—जगदिति। निराशिषः प्राप्तीच्छारहितस्य। आशा हानोपादानेच्छा, तयोपहतान्तःकरणानां प्रवृत्तिभिर्मङ्गलाचरणरूपाभिस्तादृशस्य किं प्रयोजनमित्यर्थः। जगच्छरण्यत्वेन विपदभाव उक्तः। निराशिष्ट्वेनाभव्याभाव उक्तः। अनेनामङ्गलाचरणदोषो देवस्य परिहृतः।।७६।।

विवरणम्

यत्पुनरमङ्गलाभ्यासरतिम् (५.६५) इत्युक्तं, तदस्य युक्तमित्याह—

विपदिति। विपत्प्रतीकारपरेण भूतिसमुत्सुकेन वा मङ्गलं निषेव्यते। विपदाम् आपदां प्रतीकारः प्रतिक्रिया तस्मिन् परेण तत्परेण। भूतिः सम्पत् तस्यां समत्सुकेन सम्यग् उत्सुकेन सश्रद्धेन। वाशब्दो विकल्पे। मङ्गलं सत्कर्म निषेव्यते नितरां सेव्यते। इष्टानिष्टप्राप्तिपरिहारकामो हि मङ्गलाचरणेऽधिकारीत्यर्थः। अस्य तु तदुभयकामनाविरहाद् मङ्गलाचरणं निष्प्रयोजनमेवेत्याह—जगच्छरण्यस्य निराशिषः सतः आभिः आशोपहतात्मवृत्तिभिः किम् इति। जगतां लोकत्रयवासिनां जनानां शरण्यस्य त्वमेव रक्षितेति शरणत्वेन प्राप्तुं योग्यस्य। 'शरणं गृहरक्षित्रोरि'त्यमरः। अनेन विपदभाव उक्तः। आशीरभिलाषः। 'अशीरुरगदंष्ट्रायां शुभवाक्याभिलापयोरि'ति वैजयन्ती। निरभिलापस्येत्यर्थः। अनेनावाप्तव्यस्य कस्यचिदप्यभाव उक्तः। सतः एवम्भूतस्य सतः। आभिः जन्मजरामरणादिरूपविपदम्भोधिनिमग्नैर्जनैः क्रियमाणत्वेन दृश्यमानाभिरित्यर्थः। अत एव आशोपहतात्मवृत्तिभिः आशया हानोपादानेच्छया उपहता दूषिताः आत्मानः अन्तःकरणानि येषाम्। 'आत्मा देहमनोबुद्धिक्षेत्रज्ञपरमात्मसु' इति भोजः। तेषां वृत्तिभिः मङ्गलाचरणरूपैर्व्यापारैः। किं, न किमपि प्रयोजनमित्यर्थः। निराशस्य भगवतः प्राप्तव्यपरिहार्ययोरभावात् किं मङ्गलाचरणैरिति भावः।।७६।।

अकिञ्चनः सन् प्रभवः स सम्पदां
त्रिलोकनाथः पितृसद्मगोचरः।
स भीमरूपः शिव इत्युदीर्यते
न सन्ति याथार्थ्यविदः पिनाकिनः।।७७।।

प्रकाशिका

अकिञ्चन इति। किञ्चन द्रव्यं यस्य नास्ति सोऽकिञ्चनः। सम्पदामिन्द्रादिसम्बन्धिनीनाम्। पितृसद्म गोचरो यस्य। अनेन 'अवस्तुनिर्बन्ध'(५.६६) इति परिहृतम्।।७७।।

विवरणम्

अथ परमेश्वरस्वापरिच्छेद्यत्वप्रतिपादनेनावस्तुनिर्बन्धपरत्वमात्मनः परिहरति—

अकिञ्चन इति। पिनाकिनः याथार्थ्यविदः न सन्ति। पिनाकिनः वीराग्रेसरस्य हरस्य। नाहमसाराभिनिवेशपरेति भावः। याथार्थ्यं परमार्थं विदन्तीति याथार्थ्यविदः।

न सन्ति न भवन्ति। लोकत्रय इति शेषः। त्रैलोक्ये कः पुमान् पिनाकिनं वस्तुत्वावस्तुत्वाभ्यां परिच्छिनत्तीत्यर्थः। 'नायं गुणः कर्म न सन्न चासद्' इत्यादि-भागवतवचनादिति भावः। अपरिच्छेद्यत्वमेव प्रपञ्चयति—अकिञ्चन इत्यादिना। अकिञ्चनः सन् सः सम्पदां प्रभव इति उदीर्यते। किञ्चन द्रव्यं यस्य नास्ति सोऽकिञ्चनः। दरिद्र इत्यर्थः। तथाभूतः सन्नपि भवन्नपि। सम्पदाम् इन्द्रादिसम्बद्धानामैश्वर्याणाम्। प्रभवः उद्भवस्थानमिति। उदीर्यते, पुराणादिष्विति शेषः। कर्मिणां कर्मफलप्रदो हर इति पुराणादिप्रसिद्धिरनेन वाक्येन दर्शितेत्यवसेयम्। 'दिगम्बरत्वेन निवेदितं वसु' (५.७२) इत्यप्यनेनैव परिहृतम्। यथा दिगम्बरत्वेन दरिद्रत्वानुमानं, तथा बहुधनप्रदत्वेन धनाढ्यत्वानुमानस्यापि शक्यत्वात्। तस्मादपरिच्छेद्य एव पिनाकीति भावः। 'अलक्तकाङ्कानि पदानि' (५.६८) इति यदुक्तं तत् परिहरति—त्रिलोकनाथः सः पितृसद्मगोचरः इति। त्रयाणां लोकानां नाथः त्रिलोकनाथः तथाभूतः सन्नपि। सः हरः पितृसद्मगोचर इत्युदीर्यते। पितृणां सद्म पितृसद्म श्मशानं, स एव गोचरो विषयो यस्य स तथा। श्मशाननिलय इत्यर्थः। त्रिलोकनाथो वा श्मशाननिलयो वा हर इति को वा परिच्छिन्द्यादिति भावः। 'करेण शम्भोः' (५.६६) इत्यादि यदुक्तं, तन्मनसि निधायाह—भीमरूपः स शिव इति। भीमं भयङ्करं विषधराभरणादिभिः स्वरूपतश्च भयानकं रूपं यस्य, तथाभूतः सन्नपि शिव इत्युदीर्यते शान्तस्वरूप इति कीर्त्यते। मायामात्रनिर्मितं हि भगवतः शरीरम्। तस्माद् भीमरूपो वा शिवो वेति को वा जानीयादिति भावः।।७७।।

विभूषणोद्भासि पिनद्धभोगि वा
गजाजिनालम्बि दुकूलधारि वा।
कपालि वा स्यादथवेन्दुशेखरं
न विश्वमूर्त्तेरवधार्यते वपुः॥७८॥

प्रकाशिका

विभूषणोद्भासीति। कपालि ब्रह्मशिरःकपालधारि। तदुक्तं—

जगत्सिसृक्षासमयेषु वेधसां प्रणामलोलानि शिरांसि, पादयोः।
जगद्विरामेषु कपालशेषतां गतानि तिष्ठन्ति जटासु धूर्जटेः।।

इति। विश्वमूर्तेः सर्वात्मनः। लौकिकालौकिकयोः सौम्यासौम्ययोर्वा कतरेणालङ्कृतं वपुरिति नियमेन न ज्ञातुं शक्यत इत्यर्थ। अनेन 'त्वमेव तावत् परिचिन्तय' (५.६७) इत्यादि परिहृतम्।।७८।।

विवरणम्

अपि च परमेश्वरस्य शरीरावलम्बनमपि भक्तानुग्रहार्थमेव। तस्मादलौकिकेन वा लौकिकेन वा सौम्येन वा असौम्येन या केनालङ्कारेणालङ्कृतं कीदृशं वा वपुरिति नियमेन न ज्ञातुं शक्यमित्याह—

विभूषणेति। विश्वमूर्तेः वपुः न अवधार्यते। विश्वमेव मूर्तिः यस्य तस्य। त्रैलोक्यात्मकस्येत्यर्थः। अनेन प्रपञ्चस्य परमेश्वरविवर्तत्वमुक्तम्। वपुः शरीरम्। नावधार्यते कीदृशमिति वा केनालङ्कृतमिति वा न ज्ञायत इत्यर्थः। अनेन 'वपुर्विरूपाक्षम्' (५.७२) इत्यपि परिहृतम्। वपुषो विरूपाक्षत्वेनैव व्यवस्थानुपपत्तेरुक्तत्वाद् भूषणानामप्यनियतत्वमाह—विभूषणेत्यादिना। विभूषणोद्भासि पिनद्धभोगि वा स्यात्। विभूषणैः कटकमकुटादिभिरलङ्कारैः उद्भासितुं शोभितुं शीलमस्येति तथा। पिनद्धा बद्धाः भोगिनः सर्पा यस्मिंस्तादृशं वा वपुः स्यात्। वाशब्दो विकल्पे। विभूषणोद्भासित्वेन पिनद्‌धभोगित्वेन वा न निश्चेतुं शक्यमित्यर्थः। अनेन 'करेण शम्भोः' (५.६६) इत्याद्येव स्पष्टतया परिहृतमित्यवसेयम्। तथा गजाजिनालम्बि दुकूलधारि वा। गजस्याजिनं चर्म आलम्बितुं परिधातुं शीलमस्येति तथा। दुकूलं धर्तुं शीलमस्येति दुकूलधारि। अलौकिकेन गजाजिनेन वा लौकिकेन दुकूलेन वालङ्कृतं भगवतो वपुरिति तत्त्वतो ज्ञातुं को वा समर्थ इत्यर्थः। अनेन 'वधूदुकूलं क्व च हंसलक्षणम्' (५.६७) इत्यादि परिहृतम्। कपालि वा अथवा इन्दुशेखरम्। कपालि ब्रह्मशिरःकपालधारि। तदुक्तं—

जगत्सिसृक्षासमयेषु वेधसां प्रणामलोलानि शिरांसि पादयोः।
जगद्विरामेषु कपालशेषतां गतानि तिष्ठन्ति जटासु धूर्जटेः।।

इति। इन्दुः शेखरः शिरोलङ्कारो यस्य तादृशं वा स्यात्। अनेनानुक्तः कपालधारित्वदोषोऽपि स्वेनैवाशङ्क्य परिहृतो वेदितव्यः।।७८।।

तदङ्गसंसर्गमवाप्य कल्पते
ध्रुवं चिताभस्मरजोऽपि शुद्धये।
तथाहि नृत्ताभिनयक्रियाच्युतं
विलुप्यते मौलिभिरम्बरौकसाम्।।७९।।

प्रकाशिका

तदङ्गेति। कल्पते समर्थं भवति। विलुप्यते ह्रियते। अम्बरौकसां देवानाम्। अनेन 'अयुक्तरूपं किमतः परम्' (५.६९) इत्यादि परिहृतम्।।७९।।

विवरणम्

'स्तनद्वयेऽस्मिन् हरिचन्दनाङ्किते' (५.६९) इत्यादि यदुक्तं, तत् परिहरति—

तदङ्गेति। चिताभस्मरजः अपि तदङ्गसंस्पर्शम् अवाप्य शुद्धये कल्पते ध्रुवम्। चितायां श्मशाने यद् भस्म तस्य रजः। तस्य परमेश्वरस्य अङ्गस्य शरीरस्य संस्पर्शम् अवाप्य संप्राप्य। शुद्धये शुद्धिं कर्तुं कल्पते समर्थं भवति। 'कृपू सामर्थ्य' इति धातुः। शुद्धिकरं भवतीत्यर्थः। ध्रुवं नात्र सन्देहः। कथं न सन्देहः, अत आह—तथाहि नृत्ताभिनयक्रियाच्युतम् अम्बरौकसां मौलिभिः विलुप्यते इति। तथाहीत्युपपादकं वाक्यम्। तत्र प्रकारवाची तथाशब्दः शुद्धिसम्पादनसामर्थ्यं पूर्ववाक्योक्तं परामृशति। हिशब्दो हेतौ। 'हि हेताववधारणे' इत्यमरः। तथाभावाद्धेतोरित्यर्थः। नृत्ते नर्तने योऽभिनयः। रामादिस्वरूपमाभिमुख्येन नयतीत्यभिनयः। स एव तत्स्वरूपव्यञ्जकत्वाद् व्यञ्जक इति चोच्यते। 'व्यञ्जकाभिनयौ समौ' इत्यमरः। तस्य क्रिया करणं, तेन च्युतं पतितम्। चिताभस्मरज इति अत्राप्यनुषज्यते। अम्बरमेव ओकः गृहं येषां तेषां देवानाम्। मौलिभिः किरीटैः कर्तृभिः। 'चूडा किरीटं केशाश्च संयता मौलयस्त्रय' इत्यमरः। विलुप्यते ह्रियते। प्रणामसमय इति शेषः। यदि चिताभस्मरजः परमेश्वरशरीरस्पर्शलाभात् पावनं नाभविष्यत्, तर्हि तस्य नृत्तसमये पतितमेतदमराः किरीटैर्नाहरिष्यन्नित्यर्थः। तस्मात् तदङ्गसंसर्गपावनं यच्चिताभस्म स्वत एव प्राप्तुमशक्यत्वाद् दिविषदो नृत्ताभिनयक्रियाच्युतमाकाङ्क्षन्ति, तस्य तदङ्गसंसर्गेणैव प्राप्तौ भविष्यन्त्यां या मम भाग्यसम्पत् तामियत्तया परिच्छेतुं न बृहस्पतेरपि बुद्धिः प्रभवतीति भावः।।७९।।

असम्पदस्तस्य वृषेण गच्छतः
प्रभिन्नदिग्वारणवाहनो वृषा।
करोति पादावुपनम्य मौलिना
विनिद्रमन्दाररजोरुणाङ्गुली॥८०॥

प्रकाशिका

असम्पद इति। 'प्रभिन्नो गर्जितो मत्त' इति सिंहः। उपनम्येति पाठः। अनेन 'इयञ्च तेऽन्या' (५.७०) इत्यादि परिहृतम्।।८०।।

विवरणम्

'विलोक्य वृद्धोक्षमधिष्ठितम्' (५.७०) इत्यादि यदुक्तं, तत् परिहरति—

असम्पद इति। वृषा उपगम्य असम्पदः वृषेण गच्छतः तस्य पादौ मौलिना विनिद्रमन्दाररजोरुणाङ्गुली करोति इति। वृषा इन्द्रः। उपगम्य स्वस्थानात् तत्समीपं प्राप्य। अनेन भक्त्यतिशयः सूचितः। सम्पदस्य नास्तीत्यसम्पत्, तस्य। अत एव वृषेण उक्ष्णा वाहनेन गच्छतः तस्य परमेश्वरस्य पादौ चरणौ। मौलिना तत्पादप्रणतेन किरीटेन। विनिद्राणां विकसितानां मन्दाराणां कल्पवृक्षपुष्पाणां रजोभिः रेणुभिररुणा रक्तवर्णा अङ्गुलयो ययोः तादृशौ। करोति विदधाति। वाञ्छितार्थप्रदानां कल्पवृक्षाणां महेन्द्रेण शिरसि धृतानि कुसुमानि यस्य पदाङ्गुलीररुणीकुर्वन्ति, तस्य वृषेण सञ्चरणं न सम्पदभावादिति भावः। किमर्थं तर्हि वृषेण सञ्चरणमिति चोद्यं पुनः 'अलोकसामान्यमचिन्त्यहेतुकम्' (५.७५) इत्यनेनैव परिहृतमित्यवगन्तव्यम्। परमार्थतस्तु परमेश्वरस्य चरितानि विषयतृष्णा न कर्तव्येति लोकशिक्षार्थमेव। तदुक्तमाचार्यैः—[शिवमहिम्नःस्तवे]

महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः
कपालं चेतीयत् तव वरद! तन्त्रोपकरणम्।
सुरास्तां तां सिद्धिं दधति तु भवद्भ्रूप्रणिहितां
नहि स्वात्मारामं विषयमृगतृष्णा भ्रमयति।।

इति। कीदृशस्तर्हि हरापेक्षया महेन्द्र इत्यत्राह—प्रभिन्नदिग्वारणवाहन इति। प्रभिन्नो मत्तः। 'प्रभिन्नो गर्जितो मत्त' इत्यमरः। दिग्वारणो दिग्गजः एरावतो वाहनं यस्य स तथा। स्वत एव गजः, तत्रापि दिग्गजः, पुनश्च मत्त इति वृद्धोक्षमत्तदिग्गजयोर्यद्यपि महदन्तरं; तथापि दिग्वारणवाहनो वृषा वृषवाहनस्य चरणौ नमति। ततो न वृषवाहनत्वं परिहासास्पदम्।।८०।।

विवक्षता दोषमपि च्युतात्मना
त्वयैकमीशं प्रति साधु भाषितम्।
यमामनन्त्यात्मभुवोऽपि कारणं
कथं स लक्ष्यप्रभवो भविष्यति।।८१।।

प्रकाशिका

एवं त्वदुक्तं सर्वमसमीचीनम्। किञ्चित्तु घुणाक्षरन्यायेन समीचीनमापतितमित्याह—

विवक्षतेति। च्युतात्मना स्खलितबुद्धिना। एकशब्दस्य सामान्यवाचिनोऽपि विशेषे पर्यवसानं, हेतुरूपोत्तरवाक्यवलात्। कथमिति, त्वदुक्तमलक्ष्यजन्मत्वमेवोपपन्नमित्यर्थः।।८१।।

विवरणम्

यद्यपि 'विदितो महेश्वरः' (५.६५) इत्यादि भवदुक्तं वाक्यं सर्वमप्यसमञ्जसं जातम्। किञ्चित्तु तत्र घुणाक्षरन्यायेन समञ्जसमापन्नमित्याह—

विवक्षतेति। दोषं विवक्षता अपि त्वया ईशं प्रति एकं साधु भाषितम्। दोषमेव वस्तुमिच्छतापि त्वया परमेश्वरमुद्दिश्य एकं वस्तु सम्यगुक्तम्। दोषविवक्षायामपि गुणवचने हेतुमाह—च्युतात्मनेति। च्युतः स्खलित आत्मा बुद्धिर्यस्य तेन। तव बुद्धिमान्द्यमेवात्र हेतुरिति भावः। एकमेव साधु भाषितमित्यत्र यद्यप्येकशब्दः सामान्यवाची, तथाप्युत्तरवाक्यबलादलक्ष्यजन्मत्वे विशेषे पर्यवस्यति। कथमेकस्य वचसः साधुत्वमित्यत्राह—यम् आत्मभुवः अपि कारणमामनन्ति, स कथं लक्ष्यप्रभवः भविष्यति इति। यं परमेश्वरम् आत्मभुवः ब्रह्मणः। यश्चराचरात्मकमिदं विश्वं सृजति, तस्यापीत्यपिशब्दार्थः। कारणं स्रष्टारम्। आमनन्ति। 'म्ना अभ्यासे' इति धातुः। श्रुतयो वदन्तीत्यर्थः। अनेन तदर्थस्यान्यभवाशङ्का निरस्ता। लक्ष्यः प्रमाणगोचरः प्रभवो जन्म यस्य तथाविधः। कथं भविष्यति न कथमपीत्यर्थः। जगत्सर्गात् पूर्वमेवोत्पन्नो हि ब्रह्मा जगतस्तदुपज्ञत्वात्। तथाविधस्य ब्रह्मणोऽपि कारणभूतस्य भगवतः प्रभवः केन लक्ष्यते। तस्माद् भवदुक्तमलक्ष्यजन्मत्वमेव तस्योचितम्। तच्च सर्वकारणस्यास्य गुण एवेति भावः।।८१।।

अलं विवादेन यथा श्रुतस्त्वया
तथाविधस्तावदशेषमस्तु सः।
ममात्र भावैकरसं मनः स्थिरं
न कामवृत्तिर्वचनीयमीक्षते॥८२॥

प्रकाशिका

अथ पुनरपि तत्प्रतिवचनवैरस्यमाशङ्क्य वाग्विवादं निषेधति—

अलमिति। तथाविधस्तथाप्रकारः। तावदवधारणे। तथाविध एवेत्यर्थः। अशेषमिति क्रियाविशेषणम्। साकल्येनास्त्वित्यर्थः। अत्र अस्मिन्। भावोऽभिलाषः, तत्रैकरसं पक्षपाति। कामवृत्तिः कामस्वभाव इत्यर्थः।।८२।।

विवरणम्

इत्थं देवी तदुक्तं देवगतमखिलमपि दोषं परमार्थनिवेदनेन परिहृत्य पुनरपि तद्वचनोद्योगमाशङ्क्य बहुप्रलापस्य तपोविरोधित्वात् तद्वचनस्य द्वारमेवावृणोति—

अलमिति। विवादेन अलम्। विरुद्धो वादो विवादः तेन। अलं पर्याप्तम्।

विवादो मास्त्वित्यर्थः। ननु वादस्य स्वरूपनिर्णयफलत्वात् तस्य चाद्याप्यभावात् कथं वादनिषेधः, अत आह—सः त्वया तथा श्रुतः अशेषं तथाविधः तावदस्तु इति। त्वया वेदविदां वरेण। अनेन तदुक्तस्य प्रामाण्योपपत्तिरनूदिता। यथा येन प्रकारेण। श्रुतः शास्त्रादिति शेषः। अशेषमिति क्रियाविशेषणम्। साकल्येनास्त्वित्यर्थः। तथाविधः तथाप्रकारः। तावच्छब्दोऽवधारणे। तथाविध एवास्त्वित्यर्थः। परमेश्वरस्त्वदुक्तप्रकार एव साकल्येन भवतु, विवादेनालमिति भावः। ननु यदि भवत्या मदुक्तप्रकारत्वमेव निरूपाक्षस्यानूदितं, तर्हि तत्प्राप्तिमात्रफलात् तपसो विरम्यतामत आह—मम मनः अत्र स्थिरम् इति। अत्र परमेश्वरे स्थिरं निश्चलम्। दोषशतश्रवणैरप्यचञ्चलमित्यर्थः। तत्र हेतुमाह—भावैकरसमिति। भावोऽभिलाषः, तत्रैकरसं पक्षपाति। हरविषयाभिलाषमात्रतत्परमित्यर्थः। भावैकरसं मनः स्थिरमिति पाठः। भावैकरसस्थिरम् इति पाठे भावैकरसम् अत एव स्थिरं चेति विग्रहः। ननु कथमत्यन्तनिन्द्ये जने तवाभिलाषः, अत आह—कामवृत्तिः वचनीयं न ईक्षते इति। कामस्य वृत्तिः कामस्वभाव इत्यर्थः। वचनीयं दोषं नेक्षते न विचिन्तयति।

रागाञ्जनमिदमक्ष्णोर्व्यञ्जयति प्रायशो गुणान् विषये।
दोषाञ्जनं तु दोषाननुभयसक्तिर्व्यनक्ति भूतार्थम्।।

इति न्यायादिति भावः।।८२।।

निवार्यतामालि! किमप्यसौ वटुः
पुनर्विवक्षुः स्फुरितोत्तराधरः।
न केवलं यो महतो विभाषते
शृणोति तस्मादपि यः स पापभाक्।।८३।।

प्रकाशिका

एवमुक्तेऽपि तस्मिन् वचनोद्यमं दृष्ट्वा सखीमाह—

निवार्यतामिति। वटुः। यथाप्रतिपन्नग्रथनशीलः। 'पट वट ग्रथन' इति चौरादिकाद्धातोः वटयतेरौणादिक उप्रत्ययः। वटुर्वाचाट इत्यर्थः। स्फुरितं स्फुरणं, तदुत्तरं तद्भूयिष्ठमधरं यस्य। एतद्विवक्षुत्वे लिङ्गम्। अत्र हेतुः—न केवलमिति। विभाषते परिवदति।

गुरोर्यत्र परीवादो निन्दा चापि प्रयुज्यते।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः।।

इति वचनादियमुक्तिः।।८३।।

विवरणम्

इत्थमनूदितेष्वपि सकलेषु दोषेषु कपटवटौ पुनरपि वचनोद्योगं दृष्ट्वा कोपाविष्टा सखीमाह—

निवार्यतामिति। आलि! असौ वटुः निवार्यताम्। आलि! हे सखि!। 'आलिः सखी वयस्या चे'त्यमरः। असौ दृश्यमानः वटुः यथाप्रतिपन्नार्थग्रथनशीलः। 'पट वट ग्रथन' इति चौरादिकाद्धातोः वटयतेरौणादिक उप्रत्ययः। वाचाट इत्यर्थः। अत एव निवार्यताम् आश्रमाद्बहिर्भागे निस्सार्यताम्। नाहमस्य दर्शनं सहे इति भावः। नन्वसावत्र तिष्ठतु, किमनेन तवेत्यत्राह—पुनः किमपि विवक्षुः इति। पुनः पुनरपि। मया तदुक्तदोषेऽङ्गी कृतेऽपीत्यर्थः। अथवा पूर्वं बहवो दोषा उक्ताः पुनरपीत्यर्थः। विवक्षुः वक्तुमिच्छुः। ननु विवक्षुत्वे किं प्रमाणमित्यत्राह—स्फुरितोत्तराधर इति। स्फुरितं स्फुरणं, तदुत्तरं तद्भूयिष्ठम् अधरं यस्य स तथा। यस्मादस्याधरः स्फुरति, तस्माद् विवक्षुरेवायमिति भावः। ननु प्रलपत्वसौ वाचालः, को दोष इत्याशङ्क्याह—यः महतः अपभाषते केवलं स न, यः तस्माच्छृणोति सः अपि पापभाग् इति। यः महतः महाजनान् अपभाषते परिवदति। न केवलम् स एव पापभाग्, अपितु यस्तस्माच्छृणोति महाजननिन्दकात् पुरुषाद् महाजननिन्दावचनं शृणोति, सोऽपि पापभाक्। पापं भजतीति पापभाग् भवतीति शेषः। यथा वक्तुस्तथा श्रोतुरपि पापभात्त्वमस्त्येवेत्यर्थः।

गुरोर्यत्र परीवादो निन्दा बापि प्रवर्तते।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः।। (मनु. २.२००)

इति वचनादिति भावः। स तस्मादपि पापभागिति वा योजना। वक्त्रपेक्षया श्रोतुः पापाधिक्यमस्तीत्यर्थः। ननु कथं श्रोतुः पापाधिक्यम्। श्रूयताम्। श्रोतरि श्रवणोत्सुके सति वक्ता सविस्तरं वदतीति लोकस्वभावः। नेत्रवक्त्रविकारादिभिः श्रोतुः कोपावगमे सति ततोऽधिकं न वदतीति दुर्जनानां स्वभावः। तस्माच्छ्रोतुरपि वचनस्य कारयितृत्वमवश्यं भवत्येवेति कारयितृत्वश्रोतृत्वजनितयोर्दोषयोः सम्भूय सम्भवाद् दोषाधिक्योपपत्तिः।।८३।।

इतो गमिष्याम्यथवेति वादिनी
चचाल सा च स्तनभिन्नवल्कला।
स्वरूपमास्थाय च तां कृतस्मितः
समाललम्बे वृषराजकेतनः॥८४॥

प्रकाशिका

अत एवाह—

इत इति। चचाल गन्तुमारेभे। स्तनेति गमनरभसात् स्तनच्युतगात्रिकावल्कला। समाललम्बे जग्राह। कृतस्मित इत्यनेन प्रकृतस्य प्रकरणार्थस्य नर्मपरत्वमुज्जीवितम्। चशब्दाभ्यां क्रियायौगपद्यलक्षणः समुच्चयालङ्कारः। वृषराजकेतन इत्यनेन भगवत्परिजनपरिच्छदादेरपि तत्राविर्भावो ध्वनितः।।८४।।

विवरणम्

इत्थं कोपाधिक्याद् ब्राह्मणनिरासाय सखीं नियुक्तवत्याः पुनरीषत्कोपप्रशमे सति 'गन्तव्यं वा ततोऽन्यत' इति स्मृत्यनुसारिणीं देव्याः परमार्थस्मरणपुरस्सरीं प्रवृत्तिमाह—

इत इति। अथवा अहम् इतः गमिष्यामि इति वादिनी सा चचाल च। वृषराजकेतनः स्वरूपम् आस्थाय कृतस्मितः तां समाललम्बे च। अथवेति पक्षान्तरे। तच्चात्र—

सर्वव्याख्याविकल्पानां द्वयमेव प्रयोजनम्।
पूर्वत्रापरितोषो वा विषयव्याप्तिरेव वा।।

इति वचनानुसारेण पूर्वश्लोकोक्तब्राह्मणनिरासापरितोषसूचकम्। इतः अस्मात् प्रदेशाद् गमिष्यामि इति वादिनी। 'बहुलमाभीक्ष्ण्ये' (३.२.८१) इति णिनिः। इत्थं पुनः पुनर्वदन्तीत्यर्थः। किं ममानेन ब्राह्मणनिरासप्रयासेन। अहमेव परमेश्वरपरिवादपरस्यास्य वटोः सकाशाद् दूरतो गमिष्यामीति पुनः पुनरुक्त्वेत्यर्थः। सा पार्वती चचाल त्वरितं गन्तुमारेभे च। वृषाणां राजा वृषराजः केतनं ध्वजचिह्नं यस्य स तथा। अनेन भगवत्परिजनपरिच्छदानां पूर्वपदेन तत्राविर्भावो ध्वन्यते। स्वरूपमास्थाय वटुवेषं परित्यज्य आत्मनो रूपमवलम्ब्येत्यर्थः। कृतं स्मितं मन्दस्मितं येन तथाभूतः सन्। अनेन प्रकृतस्य प्रकरणार्थस्य नर्मपरत्वप्रतिपादनेन कोपप्रशमनं ध्वनितम्। तां पार्वतीं समाललम्बे जग्राह च। अत्र चशब्दाभ्यां क्रियायौगपद्य-लक्षणः समुच्चयालङ्कारः प्रतिपाद्यते। देव्याः प्रयाणे सरभसत्वमाह—स्तनभिन्न-वल्कलेति। स्तनाद् भिन्नं च्युतं वल्कलं यस्याः सा तथा। गमनसंरम्भवशात् स्तनगलितस्तनावरणवल्कलेत्यर्थः।।८४।।

तं वीक्ष्य वेपथुमती सरसाङ्गयष्टि-
निक्षेप एव पदमुद्धृतमुद्वहन्ती।
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ॥८५॥

प्रकाशिका

एवमतर्कितोपनतदर्शने देवे देव्या वृत्तमाह—

तमिति। सरसं स्वेदार्द्रम्। निक्षेप इति निमित्तसप्तमी। पदं चरणम्। सिन्धुर्नदी। उद्धृतमेवेत्यन्वयः। अत उक्तं—न ययौ न तस्थाविति। गमनायोद्धृतस्य पदस्य पुरतो नियमनाभावाद् यानस्य निवृत्तिः, तत्रैवानवस्थापनाच्च स्थानस्येत्यवसेयम्। अत्र नायिकागतानां सात्त्विकानां सम्भोगभाविनां भवानां पूर्वं 'विवृण्वती शैलसुतापि भावम्' (३.६८) इत्यादिना दर्शितोदयानां पुनः स्वावसरे समुन्मीलनं कृतम्। व्रीलाहर्षादीनां च व्यभिचारिणां तथा नायकगतानां' च 'हरस्तु किञ्चित् परिवृत्तधैर्यः' (३.६७) इत्यादिना सूचितानां पुनः 'अव्यञ्जितहर्षलक्षणः' (५.६२) इत्यादिभिः पदैः सूचनमात्रं कृतम्। एवमेभिरुत्तम्भितपरस्परास्थाबन्धलक्षणः सम्भोगशृङ्गार इतः प्रभृति क्रमात् प्रकर्षपदवीमधिगच्छन्ननुसन्धेयः।।८५।।

विवरणम्

इत्थमचिन्तितोपनते साक्षादेव दृष्टे मनोरथप्रियतमे देव्या वृत्तमाह—

तमिति। शैलाधिराजतनया तं वीक्ष्य न ययौ न तस्थौ। शैलानामधिराजश्चक्रवर्ती, तस्य तनया। तं परमेश्वरं वीक्ष्य साक्षादेवावलोक्य न ययौ। 'इतो गमिष्याम्यथवेति वादिनी चचाल'(५.८४)इति यद् गमनमारब्धं, तन्न कृतवती। प्रियतमावलोकनकौतुकहर्षादिवशादिति शेषः। नापि यथासुखमेव तमवलोकयन्ती तस्थावित्याह—न तस्थाविति। नापि तत्रैवावस्थानं वितेने। लज्जयेति शेषः। ननु कथं गमनावस्थानयोरुभयोरपि युगपदेव निषेधोपपत्तिरत आह—पदं निक्षेपे उद्धृतमेव उद्वहन्तीति। पदं पादम्। निक्षेप इति निमित्तसप्तमी। प्रदेशान्तरे निधानं निक्षेपः। पूर्वं गमनारम्भे प्रदेशान्तरार्पणार्थं यत् पदमुद्धृतं, तत् तथैवोद्वहन्तीत्यर्थ। अत्र पुरतो निधानाभावाद् गमननिषेधः, पूर्वस्थाने निधानाभावात् स्थितिनिषेध इत्यवसेयम्। अनेन स्तम्भो नाम सात्त्विकविकार उक्तः। 'स्तम्भोऽस्मिन् निष्क्रियाङ्गता' (दशरूपकम्.४.५) इति। सात्त्विकान्तराणामप्युत्पत्तिमाह—वेपथुमतीत्यादिना। वेपथुः शरीरकम्पः तद्वती। सरसाङ्गयष्टिः सरसा स्वेदार्द्रा अङ्गयष्टिः प्रशस्तमङ्गं यस्याः सा तथा। न ययौ न तस्थाविति यदुक्तं, तत्रोपमां दर्शयति—मार्गाचलव्यतिकराकुलिता सिन्धुः इव इति। मार्गे प्रवाहमार्गे योऽचलव्यतिकरः नदीपर्यन्तवर्तिना तत्प्रवाहबिलुप्तमूलेन अतर्कितपतनेन शैलेन सम्पर्कः, तेनाकुलिता परवशीकृता। सिन्धुः नदीव। सापि हि न गच्छति, नापि गमनोद्यमाद् विरमति। अत्र प्रकरणे नायिकामतानां 'विवृण्वती शैलसुतापि भावम्' इत्यनेन दर्शितोदयानां व्रीलाहर्षादीनां व्यभिचारिणां समुन्मीलनं स्वावसरे कृतम्।

'हरस्तु किञ्चित्परिवृत्तधैर्यः' इत्यादिना दर्शितोदयानां नायकगतानां सात्त्विकानां व्यभिचारिणां च भावानाम् 'अव्यञ्जितहर्षलक्षण' इत्यादिना समुन्मीलनं च कृतमिति द्रष्टव्यम्। ततश्च परस्परानुरागनिश्चयोत्तम्भितः परस्परास्थानबन्धनः सम्भोगशृङ्गारः क्रमादितः परं प्रकर्षपदवीमारोहतीत्यवसेयम्।।८५।।

अद्यप्रभृत्यनवमाङ्गि! तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ।
अह्नाय सा नियमजं क्लममुत्ससर्ज
क्लेशः फलेन हि पुनर्नवतां पिधत्ते॥८६॥

प्रकाशिका

अथ प्रकृतस्य प्रयोज्योपावर्तनविधेः फलयोगं दर्शयति—

अद्येति। तपोभिः क्रीतो दास इत्यन्वयः। अह्नाय शीघ्रम्। क्लमक्लेशौ पर्यायौ। फलं जनयन् क्लेशः स्वस्य प्रत्यग्रतां पिधत्ते छादयति। प्रमुषितो भवतीत्यर्थः।।८६।।

इत्यरुणगिरिनाथविरचितायां कुमारसम्भवप्रकाशिकायां
पञ्चमः सर्गः।

विवरणम्

अथ प्रकृतन्यापि महतः प्रयोज्योपावर्तनविधेस्तदुचितं फलयोगं दर्शयति—

अद्येति। अनवमाङ्गि! अहम् अद्यप्रभृति तव तपोभिः क्रीतः दासः भस्मि। चन्द्रमौलौ इति वादिनि सा नियमजं क्लमम् अह्नाय उत्ससर्ज। अनवमम् उत्कृष्टम् अङ्गं यस्याः तस्याः सम्बुद्धिः अनवमाङ्गीति। अद्यप्रभृति एतस्माद् दिवसादारभ्य। अनेन दास्यस्य निरवधिकत्वमुक्तम्। ननु कुलक्रमागता धनक्रीताश्चेति द्विविधा दासाः। तदनुभयाभावे कथं दासत्वम्, अत आह—तपोभिः क्रीत इति। क्रीतः स्वीकृतः। 'डुक्रीञ् द्रव्यविनिमये' इत्यस्माद्धातोः क्तः। अत्र तपसो मूल्यत्वेनोपादानम्। क्रीतदासा हीतरदासापेक्षया नितरामात्मायत्ता भवन्तीत्यभिप्रायः। चन्द्रमौलौ इति वादिनि सति सा। नियमजं नियमो व्रतं तस्माज्जातं नियमजम्। क्लमं क्लेशम् अह्नाय सद्यः। 'द्राग् झटित्यञ्जसाह्नाय' इत्यमरः। उत्ससर्ज अत्याक्षीत्। उक्तमर्थमर्थान्तरन्यासेनोपपादयति—क्लेशः पुनः फलेन नवतां पिधत्ते हि इति। क्लेशः सर्वकर्मानुष्ठानजनिता पीडा। पुनः फलोत्पत्त्यनन्तरम्। फलेन उत्पन्नेनेति शेषः। नवतां प्रत्यग्रतां पिधत्ते आच्छादयति, हिशब्दः प्रसिद्धौ। प्रत्यग्रं

हि दुःखं सदैव चेतसि स्फुरति। कालान्तरप्राप्तौ तु प्रमुषितं भवति। फलोत्पत्त्यनन्तरं तु बहुकालप्राप्त्यभावेऽपि न चेतसि स्फुरति। लोकप्रसिद्धश्चायमर्थ इति भावः।।८६।।

सर्गः पञ्चम एष वञ्चनपटोर्मायावटोश्चेष्टि-
तैरुन्मीलत्कमनीयकोमलरसो लोकोत्तरार्थोदयः।
बुद्धिर्मे पुनराकुला भणितिरप्यत्यन्तहीना तथा-
प्यस्मद्देशिकगौरवादहमिमां व्याख्यामिहाख्यातवान्।।
श्रीमद्भागवतप्रबन्धरचनादक्षस्य नारायण-
क्ष्मादेवस्य कृतौ गिरीशगिरिजाभक्तिप्रवृद्धोदये।
व्याख्यानेऽत्र कुमारसंम्भवपदार्थालोचनप्रक्रिया-
निष्णाते बत पञ्चमोऽयमगमत् सर्गो निसर्गोज्ज्वलः।।

।। इति श्रीकृष्णशिष्यस्य नाराणयस्य कृतौ कुमारसम्भवविवरणे
पञ्चमः सर्गः।।५।।

●

।। अथ षष्ठः सर्गः ।।

अथ विश्वात्मने गौरी सन्दिदेश मिथः सखीम्।
दाता मे भूभृतां नाथः प्रमाणीक्रियतामिति॥१॥

प्रकाशिका

अथ 'अङ्कावतारस्त्वङ्कान्ते पातोऽङ्कस्याविभागतः' इत्यङ्कावतारन्यायेन सर्गान्तरमवतारयति—

अथेति। अथशब्दो हिमवद्विषयस्य कन्याप्रार्थनालक्षणस्य भगवद्व्यापारस्योपक्रमद्योतकः। विश्वात्मने सर्वभूतहृदयस्थं जानानायेत्यर्थः। मिथो रहसि। मे इति कर्मणि षष्ठी। भूभृतां नाथो निर्णयहेतुः क्रियतामित्यर्थः।।१।।

विवरणम्

इत्थमुपवर्णितस्य नायकयोः परस्परानुरागस्य समागमलक्षणं फलयोगं दर्शयितुं तदुपोद्घातभूतः षष्ठः सर्गोऽयमङ्कावतारन्यायेनावतार्यते। पूर्वाङ्कावसानप्रकृतानां पात्राणामविभागेनैवापरस्मिन्नङ्के प्रवेशोऽङ्कावतारः। यथोक्तं दशरूपके—'अङ्कावतारस्त्वङ्कान्ते पातोऽङ्कस्याविभागतः' (१.६२) इति। अत्र तु पूर्वसर्गान्तरप्रकृतयोर्नायकयोर्नायिकासखीनां चाविभागेनैवावस्थानप्रतिपादनादङ्कावतारन्यायः। तत्र देवे मनोरथानुरूपं प्रसन्ने सति देवी किमकरोदित्याकाङ्क्षायामाह—

अथेति। अथ गौरी मिथः विश्वात्मने सखीं सन्दिदेश। अथ 'अद्यप्रभृति' (५.८६) इत्यादिवाक्यैर्भगवत्प्रसादनिश्चयानन्तरम्। हिमवद्विषयस्य कन्याप्रार्थनारूपस्य भगवद्व्यापारस्योपक्रमद्योतको वायमथशब्दः। गौरी पार्वती। मिथः रहसि। पूर्वावस्थितात् प्रदेशाद् विजनं किञ्चन प्रदेशान्तरमाश्रित्येत्यर्थः। विश्वात्मने त्रैलोक्यात्मकाय सर्वभूतहृदयगतं सर्वमप्यर्थं यथावज्जानानायेत्यर्थः। अनेन सन्देशस्य लोकस्वभावसिद्धतत्कालौचित्यमात्रपरत्वं व्यज्यते। सखीम् आत्मनः प्रियवयस्याम्। अनेन सन्देशहरणयोग्यत्वमुक्तम्। सन्दिदेश सन्दिष्टवती। सन्देशप्रकारमाह—भूभृतां नाथः मे दाता प्रमाणीक्रियताम् इति। भूभृतां नाथो हिमवान्। मे इति कर्मणि षष्ठी। दाता दानकर्ता सन्। प्रमाणशब्देनात्र प्रत्यक्षादिप्रमाणगतमर्थनिर्णायकत्वं लक्ष्यते। मद्दानरूपस्यार्थस्य हिमवानेव निर्णयहेतुर्विधातव्य इत्यर्थः। प्रमाणीक्रियतामित्यभूततद्भावे च्विः। यद्यपि दाननिर्णय इदानीमेव संवृत्तः, तथापि हिमवत्कृत एव मत्प्रदाननिर्णय इति लोकप्रतीतिमात्रं क्रियताम्। तथैव हि

कुलवधूविवाहक्रमानुसरणं भवेदिति भावः। इतिः प्रकारवाची। उक्तप्रकारेण सन्दिदेशेति पूर्वेणान्वयः।।१।।

तया व्याहृतसन्देशा सा बभौ निभृता प्रिये।
चूतयष्टिरिवाभाष्ये मधौ परभृतोन्मुखी॥२॥

प्रकाशिका

तयेति। निभृता निर्वचना। प्रिय इति विषयसप्तमी। आभाष्ये आलपनार्हे। परभृता कोकिला। अत्रोपमानरूपोऽर्थः **प्रौढोक्तिमात्रनिष्पन्नशरीरो** द्रष्टव्यः।।२।।

विवरणम्

इत्थं देव्या सन्दिष्टा सखी तत्सन्दिष्टमर्थं भगवते व्यजिज्ञपदितीममर्थं भङ्ग्यन्तरेणाह—

तयेति। तया प्रिये व्याहृतसन्देशा सा बभौ। तया सख्या। प्रिय इति विषयसप्तमी। प्रिये विषय इत्यर्थः। व्याहृतसन्देशा व्याहृतः कथितः सन्देशो यस्याः सा तथा। अत्र व्याहरणे सखी कर्त्री। अन्तर्भूतण्यर्थो वा। व्याहारित इत्यर्थः। अत्र सख्याः करणत्वम्। 'हृक्रोरन्यतरस्याम्' (१.४.५३) इति कर्मसज्ञाभावपक्षे करणसंज्ञा। सख्या व्याहारितः सन्देशो यया इति विग्रहः। सा पार्वती बभौ शुशुभे। अत्रोपमामाह—मधौ आभाष्ये परभृतोन्मुखी चूतयष्टिः इव। मधौ वसन्ते आभाष्ये आलपनार्हे सति। परभृतोन्मुखी परभृता कोकिला तां प्रत्युन्मुखी अभिमुखी। आत्मना कर्तव्यं प्रियालापं तया कारयितुमित्यर्थात् सिध्यति। चूतयष्टिः चूतलतेव। यथा चूतलता चिरप्रार्थिते वसन्ते कान्ते समागते सति तत्कालोचितं तद्विषयं प्रियालापं किञ्चिदप्यनाचरन्ती कुसुमपल्लवादिभिः प्रसादचिह्नैरात्मनः प्रसादं प्रकाशयन्ती तद्विषयं प्रियालापं कोकिलाभिमुखी भूत्वा तयैव कारयति, तथेयमपीत्यर्थः। उपमया स्वमुखतो वचनादपि सखीमुखेन वचनस्य मनोहारित्वातिशयो ध्वन्यते। उपमानोपमेययोः साधारणं धर्ममाह—निभृतेति। निर्वचना किञ्चिदप्यनालपन्तीत्यर्थः। अत्रोपमानरूपोऽर्थः प्रौढोक्तिमात्रनिष्पन्नशरीरो द्रष्टव्यः।।२।।

स तथेति प्रतिज्ञाय विसृज्य कथमप्युमाम्।
ऋषीञ्ज्योतिर्मयान् सप्त सस्मार स्मरशासनः॥३॥

प्रकाशिका

स इति। इतिशब्दस्तथाशब्दस्य प्रतिज्ञाप्रकारत्वं द्योतयति। कथमपीति,

विरहासहत्वात्। ज्योतिर्मयान् ज्योतिःस्वरूपान्। स्मरणमत्र तैरयमर्थो निर्वोढव्य इत्येवंरूपम्। वरबन्धवो हि कन्यावरणेऽधिकारिणः। बन्धवश्च देवस्य सन्तः। सदाचारप्रवर्तकाश्च ते लोकस्य। वक्ष्यति च देवस्तदेव—'भवत्प्रणीतमाचारमामनन्ति हि साधवः' (६.३१) इति।।३।।

विवरणम्

प्रियासन्देशश्रवणानन्तरं देवस्य तदुचितां प्रवृत्तिमाह—

स इति। स्मरशासनः तथा इति प्रतिज्ञाय उमां कथमपि विसृज्य सप्त ऋषीन् सम्मार। सः य एवं सन्दिष्ट इत्यर्थः। स्मरं कामदेवं शास्ति अनुशास्तीति स्मरशासनः। अत्र स्मरशासन इत्युक्तं, न तु स्मरनाशन इति। अनेन देवस्य कामदहनव्यापारो न द्वेषाद्, नाप्यात्मनः कामानुभवपराङ्मुखत्वाद्, नापि देवीवैमुख्याद्, एवं महाजनविरोधस्त्वया न कर्तव्य इत्यनुशासनार्थमेवेति द्योत्यते। तथाशब्दः प्रतिज्ञाप्रकारवाची। तथाशब्दस्य प्रतिज्ञाप्रकारवाचित्वं द्योतयितुमितिशब्दः। प्रतिज्ञाय प्रतिज्ञां कृत्वा। उमां पार्वतीम्। कथमपि कथञ्चिद्, विरहासहत्वादिति भावः। विसृज्य तत्समीपं परित्यज्येत्यर्थः। सप्त सप्तसङ्ख्याभाजः ऋषीन् महर्षीन्। मरीच्यादीन् सप्तर्षीनित्यर्थः। सम्मार स्मृतवान्। अयमभिप्रायः—पूर्वश्लोकोक्तप्रकारेण देव्या सन्दिष्टो देवस्तत्सन्दिष्टमर्थं तत्प्रसादानुरूपमेव तथैवेत्यभिधाय लोके वरबन्धूनामेव कन्यावरणेऽधिकारात् सदाचारप्रवर्तकानामेव सतां देवबन्धुत्वात् सप्तर्षीणां स सदाचारप्रवर्तकत्वस्य 'भवत्प्रणीतमाचारमामनन्ति हि साधवः' (६.३१) इत्यत्र देवेनैव हि वक्ष्यमाणत्वाद् अत्यन्तबन्धुभूतैः सप्तर्षिभिरेवायमर्थो मया निर्वर्तयितुं शक्य इत्यवधार्य सद्यः सम्प्राप्तये मनसा तान् सञ्चिन्तयामासेति। सप्तर्षीणां प्रभावातिशयमाह—ज्योतिर्मयानिति। तेजःस्वरूपानित्यर्थः। ग्रहस्वरूपानिति वा। अत्र पराशरसंहिता—

कलया चरन्ति राशिषु दिवि ये सप्तर्षयो मरीच्याद्याः।
सूर्यादयश्च ये ते खचराः सर्वे ग्रहाः प्रोक्ताः।। इति।।३।।

ते प्रभामण्डलैर्व्योम द्योतयन्तस्तपोधनाः।
सारुन्धतीकाः सपदि प्रादुरासन् पुरः प्रभोः।।४।।

प्रकाशिका

स्मृतानां च तेषां देवोपस्थानं वर्णयति—

त इति। प्रभामण्डलैरित्यादिविशेषणं तपःप्रकर्षद्योतकम्। तथाविधस्य तपसो धनत्वकथनं तेषां भगवत्कैङ्कर्यसमुचितत्वं द्योतयति। सारुन्धतीका इत्युत्तरत्र तस्या

अपि कार्यान्वयस्य वक्ष्यमाणत्वादुक्तम्। अरुन्धती वसिष्ठपत्नी। तस्या एव ग्रहणेन तत्पातिव्रत्यं मुन्यन्तरपत्नीभ्यो दूराधिकमिति द्योतयति। अत्रायमितिहासः—पुरा किल सप्तर्षिपत्नीकामुकमग्निं स्वाहा तासां रूपेण रमयितुमुपक्रान्ता नाशकदरुन्धत्या रूपमनुकर्तुम्। ततश्चान्ये मुनयः स्वाः पत्नीस्तत्यजुरिति। सपदि अविलम्बितम्। प्रभोरित्यविलम्बनौचित्यं द्योतयति।।४।।

विवरणम्

देवेन स्मृतानां तेषां तदुपस्थानप्रकारमाह—

त इति। तेप्रभामण्डलैर्व्योम द्योतयन्त इति। मण्डलाकाराभिः प्रभाभिराकाशदेशं प्रकाशयन्तः। अनेन तेषां तपःप्रकर्षो द्योत्यते। उपरिष्टादरुन्धत्या अपि कार्यान्वयस्य वक्ष्यमाणत्वात् तस्या अपि देवोपस्थानमाह—सारुन्धतीका इति। अरुन्धत्या वसिष्ठपत्न्या सहिताः। अत्र वसिष्ठपत्नीमात्रस्यागमनवर्णनं तत्पातिव्रत्यस्यान्यपत्नीपातिव्रत्येभ्यो व्यतिरेकं द्योतयितुम्। एवं हि पुराणप्रसिद्धिः—

सप्तर्षीणां पुरा पत्नीरकामयत पावकः।
विज्ञातवृत्ता स्वाहाथ तासां रूपेण पावकम्।
रमयामास रुचिरं न शशाक मनागपि।
यत्नैररुन्धतीरूपं ग्रहीतुं मुनयस्ततः।
अन्ये तु तत्यजुः पत्नीः।। इति।।४।।

आप्लुतास्तीरमन्दारकुसुमोत्किरवीचिषु।
आकाशगङ्गास्त्रोतस्सु दिङ्नागमदगन्धिषु।।५।।

प्रकाशिका

आप्लुता इति। आप्लुताः स्नाताः। उत्किरतीत्युत्किरः। परमेश्वरोपस्थाने पूतैर्भाव्यमिति स्नानमुक्तम्। स्त्रोतोविशेषणे तपस्वित्वेऽपि तेषां भोगयोग्यतां द्योतयतः। एवमुत्तरश्लोकेष्वप्यवसेयम्। वक्ष्यति च—'तपसामुपभुञ्जानाः फलान्यपि तपस्विनः' (६.१०) इति।।५।।

विवरणम्

अथ षड्भिः श्लोकैस्त एव वर्ण्यन्ते। तत्रादौ तेषां परमेश्वरोपस्थानयोग्यं पूतत्वं प्रतिपादयितुं स्नानं वर्णयति—

आप्लुता इति। आकाशगङ्गास्त्रोतस्सु आप्लुताः। आकाशगङ्गायाः स्त्रोतःसु प्रवाहेषु आप्लुताः स्नाताः। आकाशगङ्गास्त्रोतसां विशेषतो मनोहरत्वमाह—

तीरमन्दारकुसुमोत्किरवीचिषु। तीरे कूले ये मन्दाराः कल्पवृक्षाः तेषां कुसुमानि पुष्पाणि उत्किरन्ति ऊर्ध्वं किरन्ति विक्षिपन्तीति तीरमन्दारकुसुमोत्किराः, तथाभूता वीचयस्तरङ्गा येषु तेषु। तीरप्रदेशरूढानां कल्पवृक्षाणां वातवशाज्जलेषु पतितानि पुष्पाणि वीचीभिरूर्ध्वं विक्षिपत्स्वित्यर्थः। पुनरपि मनोहरत्वमाह—दिङ्नागमदगन्धिष्विति। दिङ्नागानां दिग्गजानां मदस्य मदजलस्य गन्धोऽत्रास्तीति तथा। आभ्यां विशेषणाभ्यामाकाशगङ्गास्रोतसां सौरभ्योत्कर्ष उक्तः। तेन च तत्र नित्यमाप्लुतानां मुनीनां तपस्वित्वेऽपि भोगयोगः सूचितः। एवमुत्तरश्लोकेऽपि द्रष्टव्यम्। अत एव वर्णनान्ते वक्ष्यति—'तपसामुपभुञ्जानाः फलान्यपि तपस्विनः(६.१०)' इति।।५।।

मुक्तायज्ञोपवीतानि बिभ्रतो हेमवल्कलाः।
रत्नाक्षसूत्राः प्रव्रज्यां कल्पवृक्षा इवाश्रिताः।।६।।

प्रकाशिका

मुक्तेति। प्रव्रज्याशब्देनात्र वानप्रस्थाश्रम उच्यते।।६।।

विवरणम्

अथ तदीयानां तपस्विजनोचितानां परिकराणामपि तपसस्तत्फलोपभोगस्य च साधारणत्वमाह—

मुक्तेति। मुक्तायज्ञोपवीतानि बिभ्रतः। मौक्तिकमयानि यज्ञोपवीतानि ब्रह्मसूत्राणि बिभ्रतः दधतः। तथा हेमवल्कलाः हेममयानि वल्कलानि येषां ते तथा। तथा रत्नाक्षसूत्राः रत्नमयमक्षसूत्रं रुद्राक्षमाला येषां ते तथा। तद्देशभवानां वृक्षाणां तत्फलादीनां च सुवर्णरत्नादिमयत्वादित्थमुक्तम्। अत एवोत्प्रेक्षते—कल्पवृक्षाः प्रव्रज्याम् आश्रिता इवेति। कल्पवृक्षा मन्दारादयः प्रव्रज्यां वानप्रस्थाश्रमम् आश्रिताः प्राप्ता इव। कल्पवृक्षाणां सकलरत्नफलत्वं प्रसिद्धम्। उक्तं च नैषधकाव्ये—

> एषां गिरेः सकलरत्नफलस्तरुर्यः
> प्राग्दुग्धभूमिसुरभेरिव पञ्चशाखः।
> मुक्ताफलं फलनसाह्वयनाम तन्व-
> न्नाभाति बिन्दुभिरिवच्छुरितः पयोभिः? पयोधेः।। (११.१०) इति।।६।।

अधःप्रस्थापिताश्वेन समावर्जितकेतुना।
सहस्ररश्मिना शश्वत् सप्रणाममुदीक्षिताः।।७।।

प्रकाशिका

अध इति। अश्वानाम् अधःप्रस्थापनं केतुसमावर्जनं च सप्तर्षिपदस्य

दूरोन्नतत्वेऽपि हिमवत्प्रस्थावतरणवशादासत्त्या तत्कालभाविन्येत्यवसेयम्। सप्रणाममिति, तेषां लोकगुरुत्वात्।।७।।

विवरणम्

अथ सप्तर्षिमार्गस्य सूर्यमार्गाद् दूरोन्नतत्वेऽपि हिमवत्प्रस्थावतरणवशादत्यासन्नेषु सप्तर्षिषु सूर्यस्य तत्कालोचितां प्रवृत्तिमाह—

अथ इति। सहस्त्ररश्मिना शश्वत् सप्रणामम् उदीक्षिताः। सहस्त्ररश्मिना सूर्येण शश्वत् पुनः। 'मुहुर्भूयः पुनः शश्वद्' इत्यमरः। सप्रणाममिति उदीक्षणक्रियाविशेषणम्। प्रणामसहितं यथा तथोदीक्षिताः ऊर्ध्वमीक्षिताः। सप्तर्षिमार्गस्य सूर्यमार्गादत्युन्नतत्वाद् अवतरणसमयादारभ्योद्वीक्षिता इत्यर्थः। अथ रथसमीपवर्तिषु तेषु रथप्रयाणेऽपि विशेषमाह—अध इत्यादिना विशेषणद्वयेन। अधःप्रस्थापिताश्वेन पूर्वव्यवस्थितान्मार्गात् किञ्चिदधोभागे प्रस्थापिताः प्रस्थानं कारिताः अश्वा निजस्यन्दनवाजिनो येन तेन। तथा समावर्जितकेतुना सम्यगावर्जितः आनमितः केतुर्ध्वजो येन तेन। रथप्रयाणसमये तद्देहध्वजाहतिभयादानमितध्वजेनेत्यर्थः। सूर्येण केतुसमावर्जनपूर्वकं सप्तर्षिमार्गं दूरतः परिहृत्य मुहुर्मुहुः प्रणम्य सगौरवमीक्षिता इत्यर्थः। अत्र सर्वलोकपूर्वस्यापि सूर्यस्य तत्सेवाप्रतिपादनेन सप्तर्षीणां सप्तलोकगुरुत्वमुक्तम्।।७।।

आसक्तबाहुलतया सार्धमुद्धृतया भुवा।
महावराहदंष्ट्रायां विश्रान्ताः प्रलयापदि।।८।।

प्रकाशिका

आसक्तेति। सार्धं विश्रान्ता इत्यन्वयः। अनेन श्रीवराहपुराणगतमाख्यानं सूचितम्। तत्तु विस्तरभयान्नात्र लिखितम्। अनेन तेषां नित्यत्वमुक्तम्।।८।।

विवरणम्

नित्यत्वमप्याह—

आसक्तेति। प्रलयापदि महावराहदंष्ट्रायाम् उद्धृतया आसक्तबाहुलतया भुवा सार्धं विश्रान्ताः। प्रलयः कल्पान्तः। 'संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि' इत्यमरः। प्रलय एवापत्। सर्वलोकक्षयकारित्वात्। महावराह आदिवराहस्तस्य दंष्ट्रायाम् उद्धृतया उत्क्षिप्तया। महावराहेणेत्यर्थात्। आसक्ते सम्यक् सक्ते बाहुलते प्रशस्तौ बाहू यस्यास्तया। महावराहदंष्ट्रायामेवेत्यर्थात्। स्त्रीजनसुलभेन भयेनेति शेषः। भुवा पृथिव्या सार्धं विश्रान्ताः सुखासीनाः। सकललोकसंहारकारिणि

कल्पान्ते समुपस्थिते जलमात्रावशिष्टेषु चतुर्विधेष्ववयविद्रव्येषु विपन्नया स्त्रीजनसुलभेन भयेन हस्ताभ्यां महावराहदंष्ट्राद्वयमवष्टभ्यावस्थितया स्त्रीरूपधारिण्या धरण्या सह महावराहदंष्ट्रायां सुखासीना इत्यर्थः। श्रीवराहपुराणप्रसिद्धश्चायमर्थः।।८।।

सर्गशेषप्रणयनाद् विश्वयोनेरनन्तरम्।
पुरातनाः पुराविद्भिर्धातार इति कीर्तिताः॥९॥

प्रकाशिका

सर्गेति। तेषां मरीच्यादिप्रजापतिष्वन्तर्भावात् शेषसर्गप्रणेतृत्वमुक्तम्।।९।।

विवरणम्

इत्थं तेषां प्रलयकालेऽप्यवस्थानमुक्त्वा तदन्तरभाविनो जगत्सर्गस्यापि कर्तृत्वमाह—

सर्गेति। विश्वयोनेः अनन्तरं सर्गशेषप्रणयनात् पुराविद्भिः धातारः इति कीर्तिताः। विश्वयोनेस्त्रैलोक्योद्भवस्थानस्य ब्रह्मणः। अनन्तरं पश्चात्। सर्गशेषप्रणयनात् सर्गशेषस्य सृष्टिशेषस्य प्रणयनाद् विधानात्। पुराविद्भिः पुरातनवृत्तान्तवेदिभिर्व्यासादिभिः। धातारः ब्रह्माणः। इतिशब्दः कीर्तनप्रकारवाची। कीर्तिताः कथिताः। ब्रह्मणो जगदेकदेशसर्गानन्तरमवशिष्टस्य सर्गस्य विधानाद् व्यासादिभिः पुराणादिषु ब्रह्मशब्देनैव निर्दिष्टा इत्यर्थः। अत एव पुरातनाः प्राचीनाः। प्रपञ्चोत्पत्तेः प्रागपि सन्त इत्यर्थः। मरीच्यादीनां सर्गशेषविधायित्वं पुराणप्रसिद्धम्।।९।।

प्राक्तनानां विशुद्धानां परिपाकमुपेयुषाम्।
तपसामुपभुञ्जानाः फलान्यपि तपस्विनः॥१०॥

प्रकाशिका

प्राक्तनानामिति। परिपाकमुपेयुषामित्यवर्जनीयत्वं भोगस्येत्युक्तम्। तपस्विनो नित्यं तप आर्जयन्तः। लोके हि तपआर्जनफलभोगकालौ भिन्नाविति लोकतो व्यतिरेको विरोधेन ध्वन्यते। शाकुन्तलेऽप्ययमभिप्रायः प्रकाशितः कविना 'प्राणानामनिलेन वृत्तिरुचिते(७.१२)'त्यादिना।।१०।।

विवरणम्

तेषां लोकतो व्यतिरेकमाह—

प्राक्तनानामिति। प्राक्तनानां तपसां फलानि उपभुञ्जानाः अपि तपस्विनः। प्राक्तनानां पूर्वकृतानामित्यर्थः। तपसां फलानि सप्तर्षिलोकप्राप्तितदुचितभोगानुभ-

वादीनि। उपभुञ्जाना अनुभवन्तः। 'भुजोऽनवने' (१.३.६६) इत्यात्मनेपदित्वात् शानच्। अत्र वर्तमाननिर्देशेन निरन्तरोपभोग उक्तः। अपिशब्दो विरोधवाची। नहि लोके तपःसमार्जनसमये फलोपभोगः, नापि फलोपभोगसमये तपःसमार्जनमिति लोकव्यतिरिक्तमेषां चरितमिति भावः। तपस्विन इति नित्ययोगे मतुप्। निरन्तरेण तपः समार्जयन्त इत्यर्थः। एते हि निरन्तरमेव तपः समार्जयन्ति, निरन्तरमेव तत्फलं चोपभुञ्जते। अहो विचित्रमेषां चरितमिति भावः। शाकुन्तलेऽप्ययमेवार्थो महाकविना प्रदर्शितः—

प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तोये काञ्चनपद्मरेणुकपिशे पुण्याभिषेकक्रिया।
ध्यानं रत्नशिलातलेषु विबुधस्त्रीसन्निधौ संयमो
यत् काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी।।

(अङ्क.७.श्लो.१२)

इति। फलोपभोगतपःसमार्जनयोर्यौगपद्ये हेतुमाह—विशुद्धानामिति। अशुभकर्मसंसर्गलेशेनापि रहितानामित्यर्थः। नहि दुराचारसंपृक्ततपःफलोपभोगे मनःशाम्यतीति भावः। फलोपभोगस्यावर्जनीयत्वमाह—परिपाकमपेयुषामिति। परिपाकं पक्वताम् उपेयुषां प्राप्तवताम्। प्राचीनानां तपःफलानां पक्वतया स्वयमेव प्राप्तत्वादेव तेषां तदुपभोगः, न तु शक्तिवशादिति भावः। अत्र तपःफलानुभवतपश्चरणलक्षणयोः क्रिययोर्युगपद् विरोधाद् विरोधालङ्कारः। 'विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद् वचः' इति[काव्यप्रकाशे]। तेषां महाप्रभावत्वेन विरोधपरिहारः।।१०।।

तेषां मध्यगता साध्वी पत्युः पादार्पितेक्षणा।
साक्षादिव तपःसिद्धिर्बभासे बह्वरुन्धती॥११॥

प्रकाशिका

विशेषत आह—

तेषामिति। तपस्सिद्धिरर्थात् पत्युरेव। बहु भूयिष्ठम्। अत्र साक्षात्त्वाक्षिप्तमूर्त्तत्वविशिष्टायास्तपस्सिद्धेरुत्प्रेक्षया किमप्यरुन्धत्या लोकोत्तरत्वं द्योत्यते।।११।।

विवरणम्

इत्थं सामान्यतः सर्वानपि वर्णयित्वा पुनरुन्धतीं विशेषतो वर्णयति—

तेषामिति। तेषां मध्यगता अरुन्धती बहु बभासे। तेषां सप्तर्षीणां मध्यप्रदेशं गता। अयं शोभाधिक्यप्रतीतौ हेतुः। अरुन्धती वसिष्ठपत्नी। बहु सप्तर्षिभ्योऽ-

भ्यधिकतरं बभासे शोभते स्म। अत एवोत्प्रेक्षते—तपःसिद्धिः साक्षाद् इवेति। चिरकालार्जितस्य तपसः सिद्धिः फलं साक्षात् प्रत्यक्षेव। पत्युरित्यर्थात् सिध्यति। पत्युश्चिरकालार्जितस्य तपसः परिपाकावस्थैव प्रत्यक्षतयालक्ष्यतेवेत्यर्थः। अनयोत्प्रेक्षया लोकोत्तरत्वमरुन्धत्याः प्रतिपाद्यते। तथाविधायामुत्प्रेक्षायां हेतुमाह—साध्वीति। 'सती साध्वी पतिव्रता' इत्यमरः। पातिव्रत्यनिष्ठामाह—पत्युः पादार्पितेक्षणेति। पत्युः वसिष्ठस्य। पादार्पिते पादयोरर्पिते न्यस्ते ईक्षणे नेत्रे यया सा तथा। भर्तृपदारविन्दादन्यत् किमप्यनवलोकयन्तीत्यर्थः।।११।।

तामगौरवभेदेन मुनींश्चापश्यदीश्वरः।
स्त्री पुमानित्यनास्थैषा वृत्तं हि महितं सताम्॥१२॥

प्रकाशिका

तामिति। अगौरवभेदेन गौरवभेदमकृत्वा। अर्थान्तरं स्त्री पुमानिति। इतिर्हेतौ। स्त्रीत्वं पुंस्त्वं वा सतां न प्रतिपत्तिविशेषहेतुरित्यर्थः। कस्तर्हि तद्धेतुरित्याह—वृत्तं हीति। महितं पूजितम्। गौरवविषय इत्यर्थः।।१२।।

विवरणम्

इत्थं सारुन्धतीकानां देवर्षीणामागमनं वर्णयित्वा देवस्य तद्विषयां प्रवृत्तिं वर्णयति—

तामिति। ईश्वरः तां मुनीन् च अगौरवभेदेन अपश्यत्। ईश्वर इत्यनेन तत्कटाक्षस्य दुर्लभत्वं द्योत्यते। ताम् अरुन्धतीम्। मुनीन् सप्तर्षीन्। चशब्द उभयसमुच्चयार्थः। अनेन गौरवभेदाभावो ध्वन्यते। अगौरवभेदेन गौरवभेदमकृत्वा। गौरवे विषये स्त्रीत्वपुरुषत्वनिमित्तो यः परस्परभेदः, तेन विनैवापश्यत्। अत्रार्थान्तरन्यासमाह—सतां स्त्री पुमान् इति एषा अनास्था इति। सतां सज्जनानाम्। प्रतिपत्तिविशेष इत्यर्थात् सिध्यति। इतिशब्दो हेतौ। एषा लोकप्रसिद्धा। एतच्छब्दोऽयमास्थाविशेषणतया योजनीयः। अनास्था आस्था न भवति। स्त्रीत्वहेतोः पुंस्त्वहेतोश्च यः प्रतिपत्तिविशेषः सर्वलोकप्रसिद्धः, तस्मिन् महतामनादर एव भवतीति भावः। कस्तर्हि महतां प्रतिपत्तिविशेषहेतुरित्यत्राह—वृत्तं हि महितम् इति। वृत्तं चरित्रं महितं पूजितम्। गौरवे विषय इति शेष। गौरवे विषये वृत्तस्यैव पूजितत्वात् तन्निमित्त एव महतां प्रतिपत्तिविशेषः। वृत्तं चात्र सप्तर्षीणामरुन्धत्याश्च समानमेवेति युक्तमगौरवभेदेनावलोकनमिति भावः।।१२।।

तद्दर्शनादभूच्छम्भोर्भूयान् दारक्रियादरः।
क्रियाणां खलु धर्म्याणां सत्पत्न्यो मूलसाधनम्॥१३॥

प्रकाशिका

तद्दर्शनादिति। भूयान् बहुतरः। कथमरुन्धतीदर्शनाद् दारचिकीर्षातिशय इत्याह—क्रियाणामिति। मूलसाधनं प्रथमसाधनम्। अनेन देवप्रवृत्तेर्धर्मप्रधानत्वमुक्तम्।।१३।।

विवरणम्

अरुन्धतीदर्शने भगवतो मनोवृत्तिमाह—

तद्दर्शनादिति। शम्भोः तद्दर्शनाद् दारक्रियादरः भूयान् अभूत्। तस्या अरुन्धत्या दर्शनात्। दारक्रियादरः दारक्रिया विवाहः तस्यामादरो बहुमानः। भूयान् पूर्वस्मादधिकतरोऽभूत्। तत्र हेतुमाह—धर्म्याणां क्रियाणां सत्पत्न्यः खलु मूलसाधनम् इति। धर्मादनपेतानाम्। 'धर्मपथ्यर्थन्यायादनपेते' (४.४.९२) इति यत्। क्रियाणां कर्मणाम्। सत्पत्न्यः पतिव्रताः। 'सती साध्वी पतिव्रता' इति सिंहः। पत्न्यः भार्याः। खलुशब्दः प्रसिद्धौ। मूलसाधनं प्रथमं साधनम्। अग्निहोत्रादिकर्मणामेव धर्मत्वात् तेषु च सपत्नीकानामेवाधिकाराद् भगवतो दारपरिग्रहाभिलाषः सत्पत्नीदर्शनानन्तरं पूर्वस्मादधिकोऽभूदिति युक्तमेवेत्यर्थः। अनेन भगवत्प्रवृत्तीनां धर्मप्रधानत्वमुक्तम्।।१३।।

धर्मेणापि पदं शर्वे कारिते पार्वतीं प्रति।
पूर्वापराधभीतस्य कामस्योच्छ्वसितं मनः।।१४।।

प्रकाशिका

अत एवाह—

धर्मेणेति। गृहस्थधर्मेण हेतुनेत्यर्थः। पदं व्यवसायः। अपिरत्र स्वोपपदविपरीतं सम्भावयति। कामेन हेतुना दारक्रियायां पदकारणं हि स्वतः कामस्योच्छ्वासहेतुः संभाव्यः। इह तु धर्मेणापि तत्कारणमपराधप्रमोषहेतुत्वात् तदुच्छ्वासहेतुरासी-दित्यर्थः।।१४।।

विवरणम्

तस्मिन्नवसरे भगवता दग्धशरीरस्य कामस्य मनोवृत्तिमाह—

धर्मेणेति। शर्वे धर्मेण अपि पार्वतीं प्रति पदं कारिते पूर्वापराधभीतस्य कामस्य मनः उच्छ्वसितम्। शर्वे परमेश्वरे धर्मेण गृहस्थधर्मेण। पदकरणे हेतुभूतत्वात् प्रयोजककर्ता। अपिशब्दो मुख्याभावे प्रतिनिधेरपि कार्यकरत्वं द्योतयति। पार्वतीं प्रति पार्वतीमुद्दिश्य पदं व्यवसायं कारिते प्रयोजिते सति।

पूर्वापराधभीतस्य पूर्वमात्मना कृतात् तपोविघातरूपादपराधाद्धेतोर्भीतस्य। कामस्य कामदेवस्य मनः चित्तम् उच्छ्वसितम् आश्वस्तम् अभूदित्यर्थः। अयमभिप्रायः—कामदेवो हि पूर्वं शूलिनस्तपोविघातानन्तरं तेन देहे दग्धेऽपि किमतः परमसौ करिष्यतीति चिन्तया व्याकुलोऽभूत्। तदानीं तु भगवति पार्वतीवरणायोद्यते सति मास्तु देवस्य भोगेच्छया पार्वतीं प्रति मनोवृत्तिः, धर्मेच्छयैवास्तु। तथाहि नायमित परं मां प्रति कोपं करिष्यति। किञ्च गृहस्थधर्मो भोगेनापि सनाथ एव। ततश्च कदाचिन्मदनुग्रहमप्यसौ करिष्यत्येवेति सञ्चिन्त्य किञ्चिदाश्वस्तोऽ-भूदिति।।१४।।

अथ ते मुनयः सर्वे पूजयित्वा जगद्गुरुम्।
इदमूचुरनूचानाः प्रीतिकण्टकितत्वचः॥१५॥

प्रकाशिका

प्रसङ्गादिदमुक्त्वा प्रकृतमाह—

अथेति। सर्वे, न त्वेक इतरैस्तत्र नियुक्तः, यथोत्तरत्र हिमवत्संवाद इत्यर्थः। तत्र हि कार्यनिवेदनमात्रपरत्वाद् गाम्भीर्याच्च एकस्यैव वक्तृत्वमुपपन्नम्। इह तु सकलसत्त्वोत्पत्तिप्रविलयहेतौ षट्त्रिंशत्तत्त्वातीते वाङ्मनसागोचरे परमस्वादौ तपःप्रभृतिसकलस्वानुष्ठानफलभूते परमेश्वरे साक्षाद्भावमुपेयुषि प्रहर्षविस्मृतान्तः-करणानामहमहमिकया भक्त्यनुभावरूपा वाचः परस्परानपेक्षाणामपि सर्वेषामेकरूपाः प्रासरन्निति युक्तम्। जगद्गुरुमित्यनेन पूजायास्तदुचितो विशेषो ध्वनितः। 'अनूचानः प्रवचने साङ्गेऽधीती'ति सिंहः। अनेन विशेषणेन परमेश्वरयाथार्थ्यविदां तेषां तद्दर्शने प्रीतिरूपपन्नेति दर्शयता वक्ष्यमाणायाः स्तुतेर्वेदार्थत्वं द्योत्यते। कण्टको रोमाञ्चः।।१५।।

विवरणम्

इत्थं प्रसङ्गगतमर्थमुक्त्वा प्रकृतमेवाह—

अथेति। अथ ते मुनयः सप्तर्षयः सर्वे। न पुनरितरेषामनुमत्या तेष्वेक एव। हिमवत्संवादे वक्ष्यति—

अथाङ्गिरसमग्रण्यमुदाहरणवस्तुषु।
ऋषयश्चोदयामासुः प्रत्युवाच स भूधरम्।। (६.६५)

इति। तत्र हि कार्यनिवेदनमात्र एव तात्पर्यम्। इह तु श्रुत्यन्तमात्रगम्ये परमानन्दमये परमेश्वरे साक्षाद्भावमुपगते युक्तमेव भक्तिपरवशान्तःकरणानां मुनीनां सम्भूय वचनमिति भावः। अत एवाह—जगद्गुरुमिति। जगतां गुरुं नियन्तारम्। अत एवोक्तं—पूजयित्वेति। नमस्कारादिना कालोचितां पूजां कृत्वेत्यर्थः। इदं

वक्ष्यमाणम्। अनेन भिन्नवक्तृत्वेऽपि वचसामेकरूपत्वमुक्तम्। अत्र च तेषां तपःप्रभावः परमेश्वरप्रभावश्च हेतुरिति च ध्वन्यते। ऊचुः उक्तवन्तः। तेषां परमेश्वरयाथार्थ्यावगमे हेतुमुक्त्वा स्तुतिवचनानामुपपत्तिमाह—अनूचाना इति। अनूचानाः साङ्गवेदाध्येतारः। 'अनूचानः प्रवचने साङ्गेऽधीती गुरोस्तु यः' इति सिंहः। अनूचानो य आचार्यः। परमेश्वरदर्शनस्यानुभावमाह—प्रीतिकण्टकितत्वच इति। प्रीत्या परमेश्वरस्वरूपदर्शनोद्भूतया मुदा सञ्जातकण्टका त्वग् येषां तथा। अत्र त्वक्पदप्रयोगेण कण्टकस्य सर्वाङ्गीणत्वमुक्तम्। तारकादित्वादितच्। कण्टको रोमाञ्चः। 'सूच्यग्रे क्षुद्रशत्रौ च रोमहर्षे च कण्टकः' इति सिंहः।।१५।।

यद् ब्रह्म सम्यगाम्नातं यदग्नौ विधिना हुतम्।
यच्च तप्तं तपस्तस्य विपक्वं फलमद्य नः॥१६॥

प्रकाशिका

तत्प्रकारमाह—

यदिति। ब्रह्म वेदः। सम्यग् आचार्यशुश्रूषादिपुरस्सरम्। आम्नातमधीतम्। हुतं हवनम्। तप्तमार्जितम्। तपःकर्मकस्तपतिरार्जने वर्तते। तच्छब्दवाक्यैः क्रमाद् ब्रह्मचर्याद्याश्रमत्रयधर्मानुष्ठानमुक्तम्। तस्य फलं विपक्वमिति पूर्ववाक्यैः प्रत्येकं संबन्धः। विपाकं भोगयोग्यं जातम्। अद्येति वहोः कालादिति शेषः।।१६।।

विवरणम्

इदंशब्दोक्तान् प्रकारानेवाह नवभिः श्लोकैः। तत्रादावात्मानुष्ठितानामाश्रमत्रयधर्माणामिदानीं सफलत्वं जातमित्याहुर्मुनयः—

यदिति। ब्रह्म सम्यगाम्नातं यद् अग्नौ विधिना हुतं यत् तपः तप्तं च यद् नः अद्य तस्य फलं विपक्वम्। ब्रह्म वेदः। 'बृहत्त्वाद् बृंहणत्वाद् वा ब्रह्म वेदोऽभिधीयत' इति स्मृतेः। सम्यग् गुरुशुश्रूषादिपूर्वकम्। आत्मातम् अधीतमिति यत्। अनेन ब्रह्मचर्याश्रमधर्मानुष्ठानमुक्तम्। अग्नौ पावके विधिना मन्त्रार्थस्मरणादिपूर्वकम्। हुतं होमः। भावे निष्ठा। विधिना हवनं च यदित्यर्थः। हविरिति कर्माध्याहृत्य योजनीयमिति माधवः। तत्र कर्मणि निष्ठा। अनेन गृहस्थधर्मानुष्ठानमुक्तम्। तपः तप्तम् आर्जितम्। तपःकर्मकस्तपतिरार्जने वर्तते। चशब्द आश्रमत्रधर्मसमुच्चयार्थः। स च सर्वत्र योजनीयः। अनेन वानप्रस्थधर्मानुष्ठानमुक्तम्। नः अस्माकम्। अद्य बहोः कालादिति शेषः। तस्येति तच्छब्दः पूर्वोक्तयच्छब्दत्रयप्रतियोगित्वेनोपात्तः। फलं विपक्वम्। विशेषेण पक्वं पचेर्निष्ठा। 'पचो वः' (८.२.५२) इति वत्वम्। उपभोगयोग्यं जातमित्यर्थः। सर्वेषामपि कर्मणां

परब्रह्मसाक्षात्कार एव हि फलं, स्वर्गाद्यवान्तरफलश्रवणं तु प्ररोचनार्थमित्यर्थः।।१६।।

यदध्यक्षेण जगतां वयमारोपितास्त्वया।
मनोरथस्याप्यपथं मनोविषयमात्मनः॥१७॥

प्रकाशिका

कथं विपक्वमित्याह—

यदिति। अध्यक्षेण प्रवृत्तिनिवृत्तिनियमहेतुना। मनोविषयं मनःप्रदेशम्। आरोपणापेक्षया विषयशब्दः। आरोपणेन मनसो दूरोन्नतत्वं द्योत्यते। मनोरथस्याप्यपथमिति पाठः।।१७।।

विवरणम्

कथं विपक्वत्वमित्यत्राहुः—

यदिति। जगताम् अध्यक्षेण त्वया वयम् आत्मनः मनोविषयम् आरोपिताः यत्। जगतां स्थावरजङ्गमात्मकस्य प्रपञ्चस्य। अध्यक्षेण प्रवृत्तिनिवृत्तिहेतुभूतेन। त्वया जगन्नियामकत्वात् प्रपञ्चोत्तीर्णेन। वयं प्रपञ्चान्तर्गतत्वान्नियम्याः। आत्मनो मनोविषयं तव मनःप्रदेशम्। आरोपणापेक्षया विषयशब्दप्रयोगः। आरोपिताः मनसो दूरोन्नतत्वाद् दुरारोहत्वं द्योतयितुमारोपिता इत्युक्तम्। यद् यस्मात् कारणात्। यस्माद् भगवता वयं स्मृताः, तस्मादस्माकमाश्रमत्रयानुष्ठितानां धर्माणां फलमद्योपभोगक्षमं जातमित्यर्थः। भगवन्मनःप्रदेशस्य दुरारोहत्वमेवाह—मनोरथस्य अपि अपथम् इति। मनोरथस्य मनोराज्यस्य। अत्र मनसो रथत्वरूपणेन तद्गतेरनिवारितप्रसरत्वं ध्वन्यते। उक्तं च—'मनोरथानामगतिर्न विद्यते' (५.६४) इति। अत एवापिशब्दप्रयोगः। अपथं, पन्था न भवतीति अपथम् 'ऋक्पूर'—(५.३.७४) इत्यादिना समासान्तः। सर्वत्राप्यनिवारितगतेर्मनोरथस्याप्यगोचरमित्यर्थः।।१७।।

यस्य चेतसि वर्तेथाः स तावत् कृतिनां वरः।
किं पुनर्ब्रह्मयोनेर्यस्तव चेतसि वर्तते॥१८॥

प्रकाशिका

किमियता कृतार्थतेत्याह—

यस्येति। वर्तेथाः संभावनायां लिङ्। तावत् प्रागेव। यस्य चेतसि वर्तनं संभाव्येत, स वर्तनात् प्रागेव धन्याग्रेसर इत्यर्थः। किं पुनः सुतराम्। ब्रह्मयोनेः प्रजापतिजनकस्य। तव चेतसि वर्तते त्वयाङ्गीकृत इत्यर्थ।।१८।।

विवरणम्

ननु कथमेतावता भवतां कृतार्थत्वमित्यत्राहुः—

यस्येति। त्वं यस्य चेतसि वर्तेथाः सः तावत् कृतिनां वरः। त्वं यस्य जन्तोः चेतसि हृदये वर्तेथाः। तावत् प्रथमम्। त्वद्वर्तनात् प्रागेवेत्यर्थः। यस्य जन्तोश्चेतसि त्रैलोक्यनाथस्य भगवतो वर्तनं कारणपौष्कल्यसंभवात् सम्भाव्यते, स जन्तुः त्वद्वर्तनात् पूर्वमेव कृतिनां वर इत्यर्थः। त्वद्वर्तनयोग्यत्वसम्भवादिति भावः। अस्माकं धन्यत्वं तु वचसामप्यगोचर इत्याहुः—यः ब्रह्मयोनेः तव चेतसि वर्तते, सः किं पुनः। ब्रह्मयोनेः प्रजापतेरपि जनकस्येत्यर्थः। अथवा ब्रह्म वेदः। शास्त्रयोनेरित्यर्थः। तव चेतसि वर्तते, सः किं पुनः। तस्मान्ममैते नियोगकारिण इति भवता स्मृतानामस्माकं धन्यत्वं कीदृशीं काष्ठामधिष्ठितमिति वेधसोऽपि जिह्वा न वक्तुं पारयतीत्यर्थः।।१८।।

नित्यमर्काच्च सोमाच्च परमध्यास्महे पदम्।
अद्य तूच्चैस्तरां ताभ्यां स्मरणानुग्रहात् तव॥१९॥

प्रकाशिका

ननु यूयं प्रागेव धन्या इत्याशङ्क्य विशेषमाह—

नित्यमिति। परमुपरितनम्। उच्चैस्तरामित्यनुषज्यमानपदविशेषणम्। स्मरणं च तदनुग्रहश्चेति समासः।।१९।।

विवरणम्

ननु यूयं पूर्वमपि धन्या एवेत्याशङ्क्येदानीं विशेषतो धन्यत्वमाहुः—

नित्यमिति। वयम् अर्काच्च सोमाच्च परं पदं नित्यम् अध्यास्महे। अर्कादादित्यात् सोमाच्चन्द्राच्च परम् उपरि पदं स्थानम्। 'अधिशीङ्स्थासां कर्म'(१.४.४६) इति कर्मसंज्ञा। नित्यं नियमेन अध्यास्महे अधिरुह्यास्महे। 'आस उपवेशने' इति धातुः। इत्थं पूर्वावस्थामनूद्य विशेषमेवाहुः—अद्य तु तव स्मरणानुग्रहात् ताभ्याम् उच्चैस्तराम्। पदमध्यास्मह इति अत्राप्यनुषज्यते। तुशब्दोऽद्यतनं विशेषमाह। तव त्रैलोक्याधिपतेः। स्मरणं च तदनुग्रहश्चेति विग्रहः। तस्माद्धेतोः ताभ्याम् अर्कसोमाभ्याम् उच्चैस्तराम् अत्युन्नतम्। तरबन्तादुच्चैस्तरशब्दात् 'किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे' (५.४.११) इत्यामुप्रत्ययः। आमः स्वरादिषु पाठात् तदन्यस्याव्ययत्वादुच्चैस्तरामित्यव्ययम्। अत एव पदविशेषणत्वम्। यद्यपि वयं चन्द्रार्कमार्गोत्तीर्णे मार्गे पूर्वमेव वर्तामहे, तथापीदानीं तव स्मरणरूपादनुग्रहात् ततोऽप्यधिकोन्नते पदे वर्तामह इत्यर्थः।।१९।।

त्वत्संभावितमात्मानं बहु मन्यामहे वयम्।
प्रायः प्रत्ययमाधत्ते स्वगुणेषूत्तमादरः॥२०॥

प्रकाशिका

किञ्चेत्याह—

त्वदिति। आत्मानमिति प्रत्येकप्रतीत्यपेक्षयैकवचनम्। बहु गुणभूयिष्ठमित्यर्थः। मननविशेषणं चैतत्। प्रत्ययं विश्वासम्। प्राय इति तद्विशेषणम्। भूयांसं प्रत्ययमित्यर्थः।।२०।।

विवरणम्

विशेषान्तरमाहुः—

त्वदिति। वयं त्वत्सम्भावितम् आत्मानं बहु मन्यामहे। त्वया सम्भावितं कृतसम्मानम्। आत्मानमिति प्रत्येकप्रतीत्यपेक्षयैकवचनम्। बह्विति मनुक्रियाविशेषणम्। गुणभूयिष्ठमित्यर्थः। त्वया कृतसम्मानानस्मान् वयं बहुमन्यामह इत्यर्थः। अत्रार्थान्तरन्यासमाहुः—उत्तमादरः स्वगुणेषु प्रायः प्रत्ययम् आधत्ते। उत्तमादरः उत्तमानामुत्कृष्टानां जनानामादरः बहुमानः। स्वगुणेषु स्वस्य गुणेषु। प्राय इति प्रत्ययविशेषणम्। भूयांसमित्यर्थः। 'प्रायो वयसि बाहुल्ये तुल्यानशनमृत्युषु' इति यादवः। प्रत्ययं विश्वासम् आधत्ते विदधाति। महाजनानां बहुमानः स्वगुणेषु महान्तं विश्वासमादधातीत्यर्थः।

आ परितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः।।

[अभि.शाकु.१.२] इति न्यायोऽनेन दर्शितः।।२०।।

या नः प्रीतिर्विरूपाक्ष! तव निध्यानसंभवा।
सा किमावेद्यते तुभ्यमन्तरात्मासि देहिनाम्॥२१॥

प्रकाशिका

येति। तव निध्यानसंभवेति पाठः। त्वदनुध्यानेति पाठे 'स्मरणानुग्रहात् तव' (६.१९) इति पुनरुक्तं स्यात्। अन्तरात्मा साक्षिमात्रं कोऽप्यात्मा। अत्र मनुः—

योऽस्यात्मन कारयिता तं क्षेत्रज्ञं प्रचक्षते।
यः करोति तु कर्माणि स भूतान्मोच्यते बुधैः।।

जीवसंज्ञोऽन्तरात्मा च सहजः सर्वदेहिनाम्।
यन्न वेदयते सर्वं सुखं दुःखं च जन्मसु।।

(१२.१२,१३) इति।।२१।।

विवरणम्

अथ भगवत्स्वरूपसाक्षात्कारसम्भवां प्रीतिं निवेदयन्ति—

येति। विरूपाक्ष! नः तव निध्यानसम्भवा प्रीतिः या सा तुभ्यं किम् आवेद्यते। निरूपाक्ष! हे त्रिलोचन! नः अस्माकम्। तव निध्यानसम्भवा प्रीतिः। तवेति कर्मणि षष्ठी। निध्यानं दर्शनम् 'निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणमि'ति सिंहः। तव निध्यानात् स्वरूपसाक्षात्कारात् सम्भवः उद्भवो यस्याः तादृशी या प्रीतिः, सा तुभ्यं किमावेद्यते। किंशब्दो हेतुप्रश्ने। कस्माद्धेतोः, न कस्मादपीत्यर्थः। ननु परगतायाः प्रीतेः परेणावगन्तुशक्यत्वात् कथमनिवेदनीयत्वमित्यत्राहुः—त्वं देहिनाम् अन्तरात्मा असि इति। देहिनां शरीरिणाम् अन्तरात्मा परमात्मा। असि कर्मसाक्षी भवसीत्यर्थ। अत्र मनुः—

योऽस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते।
यः करोति तु कर्माणि स भूतोत्मोच्यते बुधैः।।

जीवसंज्ञोऽन्तरात्मा च सहजः सर्वदेहिनाम्।
यन्न वेदयते सर्वं सुखं दुःखं च जन्मसु।।

इति। नहि सकलशरीरिणामखिलकर्मसाक्षिभूतेन भवता अस्माकं हृदयगतं न विज्ञातमिति सम्भवति। विज्ञातस्यार्थस्य तु पुनर्वचनमनर्थकमेवेति भावः।।२१।।

साक्षाद् दृष्टोऽसि न पुनर्विद्मस्त्वां वयमञ्जसा।
प्रसीद कथयात्मानं न धियां पथि वर्तसे।।२२।।

प्रकाशिका

साक्षादिति। पुनश्शब्देन विशेषवाचिना तथापिशब्दस्य विषयोऽपहतः। तदभावे हि स प्रयोक्तव्यः स्यात्। अञ्जसा तत्त्वतः। प्रसीद, प्रसादायत्तमेव ह्यात्मनः कथनमिति भावः। साक्षाद् दृष्टस्यापि तत्त्वतोऽपरिज्ञाने हेतुमाह—न धियामिति।।२२।।

विवरणम्

इत्थं भगवद्दर्शने जातेऽपि स्वरूपपरिज्ञानाभावाद् भगवत्स्वरूपमेव सम्यगवगन्तुं प्रार्थयन्ते—

साक्षादिति। साक्षाद् दृष्टः असि। साक्षात् प्रत्यक्षेणैव दृष्टोऽसि। अस्माभिरिति शेषः। सर्वेषामागमगम्यो भवानिदानीमस्माभिः प्रत्यक्षप्रमाणेनैवावगतोऽसीत्यर्थः। तथापि साक्षात्कारस्य फलं तत्त्वतः परिज्ञानं नाभूदित्याहुः—वयं पुनः त्वाम् अञ्जसा न विद्मः। पुनशशब्दो विशेषवाची। वयन्त्वित्यर्थः। अयमेव तथापीतिशब्दस्यार्थमपि द्योतयतीति तत्प्रयोगाभावः। अञ्जसा तत्त्वतः न विद्मः न जानीमः। यद्यपि भवान् अद्य कृपया नः साक्षात्कारपदवीमुपगतः, वयं तु तथापि त्वां परमार्थतो नावगच्छाम इत्यर्थः। अत एव प्रार्थयन्ते—त्वं प्रसीद इति। त्वम् अस्मद्विषयं प्रसादं विधेहीत्यर्थः। ननु किमतः परं भवतां प्रसन्नेन मया कर्तव्यमित्यत्राहुः—त्वम् आत्मानं कथय इति। आत्मानं परमार्थरूपं भवत्स्वरूपम्। कथय निवेदय। ननु साक्षात्कारे जाते किमतः परं कथनीयमवशिष्यत इत्यत्राहुः—त्वं धियां पथि न वर्तसे इति। धियां बुद्धीनाम्। 'बुद्धिर्मनीषा धिषणा धीः' इत्यमरः। पथि मार्गे। न वर्तसे न विषयो भवसीत्यर्थः। ज्ञानविषयत्वे ज्ञेयत्वप्रसङ्गाद् दृश्यमानमिदं न भवतः परमार्थभूतं स्वरूपं, किन्तु मायाशबलमेवेति भावः॥२२॥

किं येन सृजसि व्यक्तमुत येन बिभर्षि यत्।
अथो यस्तस्य संहर्ता भागः कतम एष ते॥२३॥

प्रकाशिका

ननु साक्षाद् दृष्टोऽस्मि, ईश्वरश्चास्मि विदितः, तत् किमत्रापरिज्ञातं तत्त्वमित्याह—

किमिति। किंशब्दो विकल्पे। 'विकल्पे किं किमूत चे'ति सिंहः। येन वा सृजसीत्यर्थः। प्रथमविकल्पकरणं स्थाणुर्वा पुरुषो वेतिवद् वोद्धव्यम्। तथा मेघसन्देशेऽपि—'सा बलिव्याकुला वा'(८३) इति। व्यक्तं प्रपञ्चम्। अथो विकल्पे। भागोंऽशः। अनेनांशिरूपमन्यदेव सकलतत्त्वातीतमगोचरं सर्वकरणा-नामस्तीति ध्वन्यते। तेष्वेष कतम इत्यर्थः॥२३॥

विवरणम्

अत एव पुनरपि तत्त्वजिज्ञासया पृच्छन्ति—

किमिति। ते एषः भागः कतमः। एषः अस्माभिः प्रत्यक्षीक्रियमाणः भागः अंशः कतमः। 'वा बहूनां जातिपरिप्रश्ने डतमच्' (५.३.९३)। अस्माभिस्तव बहवो भागाः श्रूयन्ते, तेषु कतमोऽयं भागः। तानेव भागानाहुः—त्वं येन व्यक्तं सृजसि सः किम्। येन भागेन व्यक्तं प्रपञ्चं सृजसि। किंशब्दो विकल्पे। 'विकल्पे किं किमूत च' इति सिंहः। आद्येऽपि विकल्पशिरसि विकल्पवाचकपदप्रयोगः स्थाणुर्वा पुरुषो वेत्यादिवद् द्रष्टव्यः। येन तद् बिभर्षि सः उत। तद् व्यक्तं बिभर्षि

रक्षसि। उतशब्दो विकल्पे। येन प्रपञ्चं रक्षसि, स वायं भागः। यः तस्य संहर्ता सः अथो। अथो विकल्पे। अस्माभिर्दृश्यमानस्तवायं भागः प्रपञ्चस्य स्रष्टा वा तस्य रक्षिता वा संहर्ता वेत्यर्थः। अत्र सर्वत्र भागपदप्रयोगाद् भागी परमार्थभूतः सत्त्वरजस्तमोभिरस्पृष्टः कश्चिदस्त्येवेति व्यज्यते। तादृशस्य परमार्थभूतस्यावगमविषयोऽयमस्माकं प्रश्न इति च ध्वन्यते।।२३।।

अथवा सुमहत्येषा प्रार्थना देव! तिष्ठतु।
चिन्तितोपस्थिताँस्तावच्छाधि नः करवाम किम्॥२४॥

प्रकाशिका

अथाप्रासङ्गिकदुरवापार्थप्रार्थनानिषेधपुरस्सरं प्रकृतं बुभुत्समाना निदेशं प्रार्थयन्ते—

अथवेति। सुमहती दुरवापेत्यर्थः। अत एव तिष्ठतु, नायमवसरस्तस्या इत्यर्थः। किं करवाम किमस्माभिः कर्तव्यं, तच्छाधि तदाज्ञापयेत्यर्थः। चिन्तितेत्यनेन कर्तव्यस्य सत्ता द्योत्यते। उपस्थितानिति निदेशयोग्यत्वम्। अत्र मुनीनां देवविषया प्रीतिर्भावध्वनिरिति व्यपदिश्यते। सा च देवस्य सप्रसादावलोकनादिभिरुद्दीपनैरुद्दीप्यमाना हर्षधृतिमतिगर्वचपलतौत्सुक्यसंभ्रमैर्व्यभिचारिभिरुपचीयमाना वागारम्भानुभावेनाभिव्यज्यते।।२४।।

विवरणम्

अथ भगवद्दर्शनकौतुकोन्मादप्रवृत्तालपनप्रसङ्गागतां दुरवगमार्थप्रार्थनां प्रतिषेधन्तो निदेशानुग्रहमेव प्रार्थयन्ते—

अथवेति। देव! अथवा सुमहती एषा प्रार्थना तिष्ठतु। हे देव! अथवेति पक्षान्तरे। सुमहती अतिमहती। दुरवापेत्यर्थः। एषा अस्माभिरिदानीं कृता। प्रार्थना प्रकृष्टा याचना तिष्ठतु। नायमस्या अवसरः। अस्मत्सेवया भगवदुपागमनसमय एवेयं प्रार्थना युक्तेत्यर्थः। तर्हि कस्यायमवसर इत्यत्राहुः—त्वं तावत् चिन्तितोपस्थितान् न शाधि। तावत् प्रथमम्। चिन्तितान् अत एवोपस्थितान् प्राप्तान्। अत्र चिन्तितानित्यनेन कर्तव्यांशस्य अस्तित्वमुक्तम्, उपस्थितानित्यनेन निदेशयोग्यत्वम्। नः अस्मान् शाधि। 'शासु अनुशिष्टावि'ति धातुः। नियुङ्क्ष्वेत्यर्थः। इत्थं सामान्यतः प्रार्थितं नियोगमेव विशेषतोऽवधारयितुमर्थयन्ते—वयं किं करवाम इति। कीदृशोऽर्थविशेषोऽस्माभिः कर्तव्य इत्यर्थः। तच्छाधीति पूर्वेण योजनम्। अत्र प्रकरणे मुनीनां देवविषया प्रीतिर्दर्शिता। सैव भाव इति व्यपदिश्यते। रतिर्देवादिविषया व्यभिचारी तथाञ्जितः। भावः प्रोक्तः' (काव्यप्र.४.३५) इति। तस्य च देवस्य कटाक्षमन्दस्मितादिभिः प्रसादावधारण-

मुद्दीपनम्। हर्षधृतिमतिगर्वचपलतौत्सुक्यसंभ्रमास्तु व्यभिचारिणः। वागारम्भादिरूपाश्चानुभावाः। एतैर्देवविषयो रत्याख्यो भावः सुतरामभिव्यज्यते। तत्रास्माकमेवंभूतं भगवद्दर्शनं जातमिति हर्षः। भगवत्प्रसादावगमेन पूर्णार्थता धृतिः। भगवत्स्वरूपयाथार्थ्यावगमाद् बुद्धेः कृतार्थता मतिः। इदानीमस्मत्सदृशः को वास्तीति गर्वः। भक्तिपरवशत्वाच्चपलता। निदेशानुग्रहे कालाक्षमत्वमौत्सुक्यम्। किमिदानीं तिरोधानात् पूर्वमेव सम्यगवलोकनीयं भगवत्स्वरूपम्, उत भगवानेव स्तोतव्यः, उत नमस्कार्य इत्यादेरहमहमिकया प्रतीतेः सम्भ्रमः।।२४।।

अथ मौलिगतस्येन्दोर्विशदैर्दशनांशुभिः।
उपचिन्वन् प्रभां तन्वीं प्रत्याह परमेश्वरः॥२५॥

प्रकाशिका

अथ देवस्योपसन्नमुनिमण्डलविषयं प्रस्तुतार्थे निदेशमवतारयति—

अथेति। मौलिगतस्येति संश्रितपोषणपरत्वं सर्वत्रास्यास्तीति द्योतयति। उपचिन्वन्निति 'वृद्धिः समानैः सर्वेषामि'ति न्यायात्। तन्वीमिति दशनांश्वपेक्षयोक्तम्।।२५।।

विवरणम्

इत्थमुपरते मुनिवचसि भगवतो मुनिविषयं प्रकृतोपयोगसुभगं नियोगमवतारयितुमुपक्रमते—

अथेति। अथ परमेश्वरः प्रत्याह। अथ शाधीति मुनिवचनानन्तरम्। प्रत्याहेति अथशब्दयोगात् पूर्ववद् भूते लट्। तेभ्यः प्रतिवचनं दत्तवान्। देवस्य स्मितपूर्वाभिभाषित्वं भङ्ग्यन्तरेण दर्शयति—विशदैर्दशनांशुभिः मौलिगतस्य इन्दोः तन्वीं प्रभाम् उपचिन्वन् इति। विशदैः निर्मलैः। अनेन इन्दुप्रभोपचये दशनांशूनां सामर्थ्यं दर्शितम्। 'वृद्धिः समानैः सर्वेषामि'ति न्यायात्। दशनानां दन्तानाम् अंशुभिः प्रभाभिः। मन्दस्मितोद्भूतैरिति शेषः। मौलिं जटासंयतं केशं गतस्य प्राप्तस्य। 'चूडा किरीटं केशाश्च संयता मौलयस्त्रय' इत्यमरः। इन्दोर्जटागतत्वोक्त्या परमेश्वराश्रितत्वमुक्तम्। तेन च प्रसादातिशयान्मन्दहासाधिक्यं ध्वन्यते। इन्दुप्रभायास्तन्वीत्वप्रतिपादनेन पोषणयोग्यत्वं सूचितम्। प्रभां रश्मिम् उपचिन्वन् वर्धयन्। मन्दस्मितोद्गतैर्दन्तप्रभासन्तानैः कोटीरभारघटितस्य बालचन्द्रस्य प्रभां वर्धयन् प्रत्युवाचेत्यर्थः।।२५।।

विदितं वो यथा स्वार्था न मे काश्चित् प्रवृत्तयः।
ननु मूर्तिभिरष्टाभिरित्थंभूतोऽस्मि सूचितः॥२६॥

प्रकाशिका

निदेशक्रममाह—

विदितमिति। वो विदितमिति तत्त्वदृष्ट्या। यूयमेवावधृतपरमार्था इति भावः। किं विदितमित्यत्राह—यथेति। काश्चिदपि मे प्रवृत्तयो यथा न स्वार्थास्तथा वो विदितमित्यर्थः। अत्र स्वार्थत्वनिषेधात् प्रवृत्तीनां परार्थत्वमर्थप्राप्तं, 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तत' इति न्यायात्। ननुरवधारणे। अष्टाभिः खात्मेन्दुवह्निमरुदर्कमहीपयोरूपाभिः इत्थंभूतः अस्वार्थप्रवृत्तिः सूचितः प्रकाशितः। लोकेऽपीति शेषः। प्रत्यक्षैः पृथिव्यादिरूपैः प्रसिद्धास्वार्थधारणादिव्यापारैरप्रत्यक्षमपि मे रूपं परार्थस्वव्यापारं स्थूलदृष्टिभिरप्यनुमातुं शक्यमित्यर्थः। एतच्च वाक्यं वक्ष्यमाणस्य कन्यावरणनिदेशहेतोस्त्रिदशप्रार्थनाहेतुकस्य दाराहरणाभिलाषस्य स्वार्थत्वाभावेऽपि परार्थत्वेनोपपद्यमानतां दर्शयितुम्।।२६।।

विवरणम्

अथ क्रमेण निदेशप्रकारमेव दर्शयति विदितमित्यादिभिरष्टभिः श्लोकैः। तत्रादावात्मनो भार्यापरिग्रहस्य परोपकारार्थतां प्रतिपादयिष्यन् सर्वासामपि निजप्रवृत्तीनां परोपकारार्थतां दर्शयति—

विदितमिति। मे काश्चित् प्रवृत्तयः यथा न स्वार्थाः, तथा वः विदितम्। मे काश्चिदपि प्रवृत्तयः व्यापाराः यथा येन प्रकारेण न स्वार्थाः न आत्मार्थाः, तथा तेन प्रकारेण वः। 'क्तस्य च वर्तमाने'(२.३.६७) इति कर्तरि षष्ठी। युष्माभिरित्यर्थः। विदितं वर्तमाने क्तः। सर्वेषामपि मे व्यापाराणां यथा न स्वार्थत्वं, तथा तपःप्रभावादवगतपरमार्थैर्युष्माभिरवगम्यत एवेत्यर्थः। अत्र प्रवृत्तीनां स्वार्थत्वनिषेधस्य परार्थत्वविधिरेव फलं, 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति न्यायात्। अस्मत्प्रवृत्तीनां परार्थमात्रपरायणत्वं स्थूलदृष्टिभिरन्यैरवगन्तुं शक्यमेवेत्याह—अष्टाभिर्मूर्तिभिः इत्थंभूतः ननु सूचितः अस्मि इति। अष्टाभिः।

भूमिरापोऽनलो वायुरात्मा व्योम रविः शशी।
इतीमाः सर्वलोकानां प्रत्यक्षाः शिवमूर्तयः।।

इति शैवागमप्रसिद्धाभिः मूर्तिभिः शरीरैः सूचने कर्तृभूतैः। इत्थम्भूतः इमं प्रकारं प्राप्तः। 'भू प्राप्तावि'ति धातुः। परार्थव्यापारतां प्राप्त इत्यर्थः। ननुरवधारणे। इत्थंभूत एवेत्यर्थः। सूचितः प्रकाशितः। लोकेऽपीति शेषः। प्रत्यक्षाणां पृथिव्यादीनां मम रूपाणां परार्थत्वदर्शनादप्रत्यक्षमागमैकगम्यं रूपमपि परार्थमात्रपरमिति सर्वैरप्यनुमातुं शक्यमेवेति भावः। पृथिव्यादीनां धारणादिव्यापारस्य परार्थमात्रपरत्वं प्रसिद्धमेव। अत्रागमगम्यं प्रत्यक्षगम्यं चेति द्विविधं मे स्वरूपमिति

निजस्वरूपकथनात् 'प्रसीद कथयात्मानम्' (६.२२) इति मुनिभिः प्रार्थितं निजस्वरूपकथनमप्यर्थाद् भगवता कृतमित्यवसेयम्।।२६।।

सोऽहं तृष्णातुरैर्वृष्टिं विद्युत्वानिव चातकैः।
अरिविप्रकृतैर्देवैः प्रसूतिं प्रति याचितः॥२७॥

प्रकाशिका

अथ ततः किमित्याह—

स इति। सः, य एवं परार्थैकप्रवृत्तिः। विद्युत्वान्। 'झयः' (८.२.१०) इति मतुपो वत्वम्। चातकैरित्यनेन तेषामनन्यशरणत्वं द्योत्यते। याचित इत्यनेन कामदाहानन्तरमिन्द्रादिभिर्याचित इत्यवसेयम्।।२७।।

विवरणम्

नन्वस्तु भवत्प्रवृत्तीनां परार्थैकपरत्वम्। प्रकृते किमायातमित्यत्राह—

स इति। सः अहम् अरिविप्रकृतैः देवैः प्रसूतिं प्रति याचितः। य एवं परार्थमात्रनिरतः सोऽहम्। अरिणा शत्रुभूतेन तारकेण विप्रकृतैः पीडितैः देवैरिन्द्राद्यैः प्रसूतिं प्रति पुत्रोत्पादनमुद्दिश्य याचितः अपेक्षितः। अनेन कामदहनान्तरं भग्नमनोरथैरवगतपरमार्थैर्देवैर्भगवानभ्यर्थितोऽभूदित्येषा कथा द्योत्यते। अत्रोपमामाह—तृष्णातुरैः चातकैः विद्युत्वान् वृष्टिम् इव इति। तृष्णया दाहेन आतुरैः परवशैः चातकैः बकोटैः। विद्युदस्यास्तीति विद्युत्वान् मेघः। 'झयः' इति मतुपो मकारस्य वत्वम्। वृष्टिं वर्षमिव। यथा तृष्णातुराश्चातकाः मेघं वृष्टिं याचन्ते, तथा शत्रुपीडितास्त्रिदशाः मां प्रति पुत्रोत्पत्तिमभ्यर्थितवन्त इत्यर्थः। अत्र अरिविप्रकृतत्वस्य तृष्णातुरत्वस्य च बिम्बप्रतिबिम्बत्वेनोपादानम्। चातकदृष्टान्तेन देवानामनन्यशरणत्वं द्योत्यते, तेन च तत्प्रार्थनस्यालङ्घनीयत्वम्।।२७।।

अत आहर्तुमिच्छामि पार्वतीमात्मजन्मने।
उत्पादाय हविर्भोक्तुर्यजमान इवारणिम्॥२८॥

प्रकाशिका

अत इति। आहर्तुं परिणेतुम्। आत्मजन्मने पुत्राय। क्वचित्तु षष्ठ्यन्तः पाठः। अरण्युपमानेन 'उभे एव क्षमे वोढुम्' (२.६०) इत्यादिनोक्तं तस्या एव तद्योग्यत्वं दर्शयति। अत्रेन्दादियाचनमेव परिणयनेच्छायाः कारणत्वेनोपन्यस्तं, न तु देव्यास्तपः, यतस्ते मुनयस्तत्त्वतः शिवयोः शैलीं जानन्ति। तौ हि न कदाचिदपि परस्परविरहितौ। ततश्च न वस्तुतः समागमार्थं तपो देव्याः, किन्तु लोके

स्त्रीधर्मसंशिक्षणार्थं कुले प्रसूतया स्त्रिया सर्वात्मना स्वानुरूपः पतिर्लब्धव्य इति। यथा परार्थैकव्यापारः शिवः, तथा तच्छक्तिरपीति।।२८।।

विवरणम्

अस्त्वेवं, ततः किमित्यत्राह—

अत इति। अतः अहम् आत्मजन्मने पार्वतीम् आहर्तुम् इच्छामि। अतः अलङ्घनीयत्रिदशप्रार्थनाद्धेतोः। नन्वत्र महता प्रबन्धेन प्रतिपादितं देव्यास्तपश्चरणमुपेक्ष्य त्रिदशप्रार्थनमेव किमर्थ देवेन परिणयेच्छाकारणत्वेनोपन्यस्तम्। सप्तर्षीमां च तद्दर्शित्वादिति ब्रूमः। ते हि शिवयोः स्वरूपं परमार्थतो जानन्ति। नहि तौ कदाचिदपि परस्परवियुक्तौ। ततो न देव्याः समागमप्रार्थनया तपश्चरणम्। किन्तु महाकुलप्रसूताभिः कन्यकाभिरेवमात्मानुरूपो वरः प्राप्तव्य इति स्त्रीधर्मसंशिक्षणार्थमेवेति युक्तं परमेश्वरस्य मुनीन् प्रति देवीतपश्चरणानुपन्यास इत्यलमनेन। आत्मजन्मा पुत्रः। आत्मजन्मानमुत्पादयितुमित्यर्थः। षष्ठ्यन्तपाठे उत्पादायेति योज्यम्। पार्वतीमित्यनेन संबन्धयोग्यत्वमुक्तम्। आहर्तुं परिणेतुम् इच्छामि। अत्रोपमामाह—यजमानः हविर्भोक्तुः उत्पादाय अरणिमिवेति। यजमानो यागकर्ता हविषो भोक्तुरग्नेः उत्पादाय उत्पादनाय। अरणिर्नाम अग्निहोत्रादिष्वग्निनिर्मन्थनार्थं निर्मितं दारु। अग्न्युत्पादनार्थं यथा यजमानोऽरणिमिच्छति, तथा अहं पुत्रोत्पादनार्थं पार्वतीं परिणेतुमिच्छामीत्यर्थः। अत्र आत्मनो यजमानोपमानेन धर्मप्रवणत्वं सूचितम्। आत्मजन्मनो वह्न्युपमानेन तस्य लोकोत्तरप्रतापत्वं सूचितम्। पार्वत्या अरण्युपमानेन 'उभे एव क्षमे वोढुमुभयोर्वीर्यमाहितम्'(२.६०) इत्यादिनोक्तं पार्वत्या एवात्मवीर्यधारणयोग्यत्वं व्यज्यते।।२८।।

तामस्मदर्थे युष्माभिर्याचितव्यो हिमालयः।
विक्रियायै न कल्पन्ते सम्बन्धाः सदनुष्ठिताः॥२९॥

प्रकाशिका

तत्र किमस्माभिः कर्तव्यमित्यत्राह—

तामिति। अस्मदर्थे 'निमित्तात् कमसंयोगे' (वा.२.३.३६) इति सप्तमी। विक्रियायै विकारं कर्तुम्। विकारो दोषः। सदनुष्ठिताः सद्भिरनुष्ठापिताः। ण्यर्थोऽत्रान्तर्भूतः। अत्र प्रैषार्थस्तव्यप्रत्ययः। एवं परार्थवृत्तिरहं त्रिदशाभ्यर्थनया परिणिनीषुः कन्यावरणे युष्मान् नियुञ्ज्यामित्यर्थः।।२९।।

विवरणम्

आहरणे किमस्याभिः कर्तव्यमित्यत्राह—

तामिति। युष्माभिः अस्मदर्थे हिमालयः तां याचितव्यः। युष्माभिः तत्तादृशतपःप्रभावयुक्तैः। तत एव हि सम्बन्धस्य सज्जनकारितत्वं सम्भवतीति भावः। अस्मदर्थे इति 'निमित्तात् कर्मसंयोग' इति सप्तमी। अस्मत्प्रयोजननिमित्तमित्यर्थः। हिमालयः हिमवान् अनभिहितकर्म(२.३.१)तां पार्वतीम्। याचितव्यः अर्थनीयः। प्रैषार्थोऽत्र तव्यप्रत्ययः। इत्थं परार्थप्रवृत्तिरहं सुजनप्रार्थनया विवाहं कर्तुकामः कन्यावरणे युष्मान् नियुञ्ज्यामित्यर्थः। ननु अस्माभिरेवेदं कर्तव्यमिति को नियम इत्यत्राह—सदनुष्ठिताः सम्बन्धाः विक्रियायै न कल्पन्ते। सद्भिः सज्जनैरनुष्ठिता अनुष्ठापिताः। अन्तर्भूतण्यर्थोऽयं प्रयोगः। सम्बन्धाः विवाहादयः विक्रियायै विकारं दोषं कर्तुं न कल्पन्ते न समर्था भवन्ति। 'कृपू सामर्थ्ये' इति धातुः। सज्जनैः कारिता विवाहदयो न कदाचिदपि दोषमुत्पादयन्तीत्यर्थः। अर्थान्तरन्यासश्चायम्।।२९।।

उन्नतेन स्थितिमता धुरमुद्वहता भुवः।
तेन योजितसम्बन्धं वित्त मामप्यवञ्चितम्॥३०॥

प्रकाशिका

ननु याचितव्य इति किं देवेनोच्यते, स एव हि कृतार्थः स्याद्, यदि कन्यां देवः स्वीकुर्यात्। देवस्य तु कियदेतदित्याह—

उन्नतेनेति। उन्नतिः कुलादिना। स्थितिः स्थैर्यम्। योजितसम्बन्धम्। युष्माभिरिति शेषः। वित्त जानीध्वम्। मामपि, न केवलं हिमवन्तं मया योजितसंबन्धम्।।३०।।

विवरणम्

ननु यदि भगवता हिमवतः सुता परिगृह्यते, तर्हि स एव कृतार्थः स्यात्, किमर्थं याचितव्य इत्युक्तम् अत आह—

उन्नतेनेति। तेन योजितसम्बन्धं माम् अपि अवञ्चितं वित्त। तेन हिमवता योजितो विहितः सम्बन्धो यस्य तम्। युष्माभिरिति शेषः। मामपि, न केवलं मया योजितसम्बन्धं हिमवन्तमेव। अत एव तेन योजितसम्बन्धं मामपि इत्यपिशब्दार्थः। वञ्चितो न भवतीत्यवञ्चितः तं, कृतार्थमित्यर्थः। वित्त जानीध्वम्। ननु कथं तेन योजितसम्बन्धस्य भगवतः कृतार्थत्वम् इत्यत्र तद्गुणानाह त्रिभिर्विशेषणैः। तत्र हिमवतो देवतात्मकं स्थावरात्मकं च रूपद्वयमस्ति। तत्रोभयत्रापि श्लिष्टं विशेषणत्रयम्। तत्र विवाहेषु उभयकुलशुद्धेरेव प्राधान्यादादौ कुलशुद्धिमाह—उन्नतेनेति। जात्याचारादिभिरुत्कृष्टेनेत्यर्थः, प्रांशुना च। स्थिरव्यवसायत्वमाह—

स्थितिमतेति। स्थितिः स्थैर्यं तद्वता स्थिरबुद्धिनेत्यर्थः, अनेन कार्याकार्यविवेककुशलत्वमुक्तम्, अचञ्चलस्वरूपेण च। महाराजत्वमाह—भुवः धुरम् उद्वहता इति। अत्र विशेषानुपादानाद् भूमण्डलस्य न तदेकदेशस्येत्यर्थः। धुरं रक्षाव्यापारम्। उद्वहता दधानेन, सार्वभौमेनेत्यर्थः, भूमेरुद्धरणव्यापारमुद्वहता च। कुलपर्वतैरेव हि पृथिवी ध्रियते।।३०।।

एवं वाच्यः स कन्यार्थमिति वो नोपदिश्यते।
भवत्प्रणीतमाचारमामनन्ति हि साधवः॥३१॥

प्रकाशिका

स कथं याचितव्य इत्याह—

एवमिति। वो युष्मभ्यम्। भवत्प्रणीतं युष्मत्कृतबन्धनम्। आचारं लौकिकवैदिकम्। स्मृत्यात्मना निबद्धमाचारं लोके साधवोऽधीयत इत्यर्थः।।३१।।

विवरणम्

नन्वस्माभिः कथं हिमवान् कन्यां याचितव्यः इत्यत्राह—

एवमिति। सः कन्यार्थम् एवं वाच्यः इति वः न उपंदिश्यते। सः हिमवान्। कन्यार्थं कन्याप्रयोजनम्। वचनक्रियाविशेषणं चैतत्। एवमिति वचनस्वरूपनिर्देशः। वाच्यः वक्तुं योग्यः। इतिशब्दः उपदेशप्रकारवाची। वः युष्मभ्यम्। नोपदिश्यते। मयेति शेषः। उपदेशस्य निष्प्रयोजनत्वमेवोपपादयति—साधवः भवत्प्रणीतम् आचारं हि आमनन्ति इति। साधवः सज्जनाः। भवत्प्रणीतं भवद्भिः प्रणीतं स्मृत्यात्मना निबद्धम्। आचारं लौकिकवैदिकात्मकम्। हिशब्दः प्रसिद्धौ। आमनन्ति अभ्यस्यन्ति। भवद्भिः स्मृत्यात्मना निबद्ध आचार एव हि सद्भिः अभ्यस्यते। अथवा आचारं भवत्प्रणीतम् वदन्तीत्यर्थः। तस्मादाचारप्रवर्तकान् प्रत्याचारोपदेशो हासकारणमेवेति भावः।।३१।।

आर्याप्यरुन्धती तत्र साहाय्यं कर्तुमर्हति।
प्रायेणैवंविधे कार्ये पुरन्ध्रीणां प्रगल्भता॥३२॥

प्रकाशिका

किञ्चेत्याह—

आर्येति। आर्येति निर्देशेन स्वधर्मनिष्ठः सर्वः परमेश्वरस्यापि गौरवविषय इति द्योतयति। किं वयमेव नालमत्रेत्याह—प्रायेणेति। पुरन्ध्रीणां कुटुम्बिनीनाम्।।३२।।

विवरणम्

गौरवविशेषाभावादरुन्धतीं प्रत्यप्याह—

आर्येति। आर्या अरुन्धती अपि तत्र साहाय्यं कर्तुम् अर्हति। अत्रार्यशब्दप्रयोगात् स्वधर्ममात्रनिरता जनाः सर्वेऽपि परमेश्वरस्यापि गौरवविषया इति द्योत्यते। अरुन्धती वसिष्ठपत्नी। अपिशब्दः पूर्वोक्तमुनिजनसाहाय्यसमुच्चयार्थः। तत्र कन्याप्रार्थनायां साहाय्यं सहायत्वं कर्तुम् अर्हति योग्या भवति। ननु वयमेव तत्रालं किमनयेत्यत्राह—एवंविधे कार्ये प्रायेण पुरन्ध्रीणां प्रगल्भता इति। एवंविधे स्त्रीपुरुषसङ्घटनादिरूपे कार्ये कर्तव्ये। प्रायेण, अनेन पुरुषाणां तत्र न्यूनप्रागल्भ्यमुक्तम्। पुरन्ध्रीणां कुटुम्बिनीनां पुरन्ध्री स्यात्कुटुम्बिनी'ति भोजः। प्रगल्भता प्रागल्भ्यम्। स्त्रीजना एव तत्र प्रधानाधिकारिण इति भावः।।३२।।

तत् प्रयातौषधिप्रस्थं सिद्धये हिमवत्पुरम्।
महाकौशीप्रपातेऽस्मिन् सङ्गमः पुनरस्तु नः॥३३॥

प्रकाशिका

उपसंहरति—

तदिति। ओषधिप्रस्थमिति नाम। सिद्धये प्रस्तुतलाभाय। देवप्रसादायत्तं देवस्य दर्शनं क्व पुनर्भावीत्यत्राह—महाकौशीति। महाकौशीति हिमवत्प्रभवा कापि नदी। प्रपतत्यस्मिन्निति प्रपातः।।३३।।

विवरणम्

वचनमुपसंहरति—

तदिति। तद् यूयं सिद्धये ओषधिप्रस्थं हिमवत्पुरं प्रयात। तद् यस्मादवश्यं लोकहितार्थं कन्या प्रार्थनीया, तस्मादित्यर्थः। सिद्धये प्रस्तुतविवाहकार्यलाभाय। ओषधिप्रस्थमिति हिमवत्पुरस्य नाम। हिमवतः पुरं हिमवत्पुरम्। प्रयात प्रतिष्ठध्वं, प्रस्तुतविवाहकार्यसिद्ध्यर्थं भवद्भिरोषधिप्रस्थाभिधानां हिमवतो राजधानीं प्रति प्रयातव्यमित्यर्थः। 'चिन्तितोपस्थितांस्तावच्छाधि नः' (६.२४) इति मुनिभिः प्रार्थितो निदेशानुग्रहोऽनेन कृतः। नन्वस्मत्प्रत्यागमसमये देवप्रसादमात्रायत्तं देवस्य दर्शनं कस्मिन् प्रदेशे पुनरस्माकं भविष्यतीत्यत्राह—पुनः नः सङ्गमः अस्मिन् महाकौशीप्रपाते अस्तु। पुनर्भवतां प्रत्यागमनानन्तरम्। नः भवतामस्माकं च। सङ्गमः संयोगः। अस्मिन्निति सहस्तनिर्देशं वचनं सन्निधानं द्योतयति। हिमवच्छिखर एवेत्यर्थः। **महाकौशीति हिमवत्प्रभवा काचन महानदी**, तस्याः प्रपाते प्रपतत्यस्मिन्निति प्रपातः पतनस्थानं महाकौशीप्रपतनस्थाने इत्यर्थः। यस्मिन् देशे

महाकौशी हिमवच्छिखरादागत्य पतति तस्मिन् प्रदेशे इत्यर्थ। कन्याप्रार्थनानन्तरमत्र दृश्यमाने महाकौशीप्रपतनस्थान एव भवद्भिरागन्तव्यं, वयं तु तत्रैव निवसाम इति भाव:।।३३।।

तस्मिन् संयमिनामाद्ये जाते परिणयोन्मुखे।
जहुः परिग्रहव्रीलां प्राजापत्यास्तपस्विनः।।३४।।

प्रकाशिका

अथ प्रतिपन्नमहेश्वरनिदेशानां मुनीनां वृत्तमाह—

तस्मिन्निति। संयमिनामाद्ये शास्त्रप्रणयनेन स्वयमनुष्ठानेन च निवृत्तिलक्षणस्य धर्मस्य संप्रदायप्रवर्तक इत्यर्थ:। परिग्रहैः पत्नीभिः। व्रीलाम्, अद्याप्यमृदितकषाया वयमिति। प्राजापत्या ब्रह्मपुत्रा:।।३४।।

विवरणम्

इत्थं भगवता नियुक्तानां सप्तर्षीणां मानसीं प्रवृत्तिमाह—

तस्मिन्निति। संयमिनाम् आद्ये तस्मिन् परिणयोन्मुखे जाते प्राजापत्याः तपस्विनः परिग्रहव्रीलां जहुः। संयमिनां जितेन्द्रियाणाम् आद्ये श्रेष्ठे। अनेन भगवतः शास्त्रप्रणयनेन स्वयमेव तदुक्तार्थानुष्ठानेन च निवृत्तिलक्षणस्य धर्मस्य परम्पराप्रवर्तकत्वमुक्तम्। तस्मिन् परमेश्वरे। परिणयोन्मुखे परिणयो विवाहः तदर्थम् उन्मुखे उद्युक्ते जाते सति। प्रजापतेः ब्रह्मणः पुत्राः। 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' (४.१.८५)। अनेन परिग्रहव्रीलाया उपपत्तिरुक्ता। तपस्विनः महर्षयः। नित्ययोगे मतुप्। परिग्रहैः पत्नीभिः व्रीलां लज्जां जहुः परित्यक्तवन्तः। निवृत्तिमार्गप्रवर्तके परमेश्वरे स्वयमेव प्रवृत्तिमार्गप्रधाने विवाहे प्रवृत्ते सति ब्रह्मपुत्रत्वात् सन्तततपश्चरणोद्युक्तत्वाच्च मृदितकषायत्वप्राप्त्युपपत्तौ सत्यामपि तदभावजनितां लज्जां सप्तर्षयः परितत्यजुरित्यर्थः।।३४।।

ततः परममित्युक्त्वा प्रतस्थे मुनिमण्डलम्।
भगवानपि संक्रान्तः प्रथमोद्दिष्टमास्पदम्।।३५।।

प्रकाशिका

तत इति। परमं बाढम्। 'ओमेवं परमं मते' इति सिंहः। प्रथमोद्दिष्टं महाकौशिकीप्रपातम्। अत्र सर्वेषां कार्यत्वरा गम्यते।।३५।।

विवरणम्

अथ तेषां गमनोद्योगमाह—

तत इति। ततः मुनिमण्डलं परमम् इति उक्त्वा प्रतस्थे। ततः भगवन्नियोगानन्तरम्। मुनीनां मण्डलं समूहः। परममित्यनुवादवाचकमव्ययम्। 'ओमेवं परमं मते' इति सिंहः। इतिशब्दः प्रकारवाची। उक्त्वा अभिधाय। प्रतस्थे गन्तुमारेभे। सप्तर्षयः परमेश्वरोदीरितमर्थं तथैवेति प्रतिज्ञाय गमनोद्योगं चक्रुरित्यर्थः। भगवतः प्रवृत्तिमाह—भगवानपि प्रथमोद्दिष्टम् आस्पदं सङ्क्रान्त इति। भगवान् परमेश्वरः। अपिशब्दः पूर्वोक्तमुनिमण्डलसमुच्चयार्थः। प्रथमं भगवतोद्दिष्टं निर्दिष्टम्। आस्पदं स्थानं सङ्क्रान्तः प्राप्तः। भगवानपि महाकौशीप्रपातं जगामेत्यर्थः। अनेन सर्वेषां कार्यत्वरा गम्यते।।३५।।

त आकाशमसिश्याममुत्पत्य परमर्षयः।
आसेदुरोषधिप्रस्थं मनसा समरंहसः॥३६॥

प्रकाशिका

त इति। असिश्याममित्यनेन तेषां गमनत्वरयाकाशे दूरोत्पतनं ध्वनितम्। मनसा समरंहस इति त्वरा।।३६।।

विवरणम्

तेषां गमनप्रकारमाह—

त इति। ते परमर्षयः आकाशम् उत्पत्य ओषधिप्रस्थम् आसेदुः। परमाः उत्कृष्टाः ऋषयः। अनेनाकाशगमनसामर्थ्यं द्योत्यते। आकाशमुत्पत्य आकाशाभिमुखमुत्पतनं कृत्वेत्यर्थः। ओषधिप्रस्थम् आसेदुः प्रापुः। चातुर्यविशेषादुत्पतनसमनन्तरमेवाकाशे दूरोत्पतनं द्योतयन्नाकाशं विशिनष्टि—असिश्याममिति। असिः खङ्गः तद्वत् श्यामः यः तम्। आकाशस्य कृष्णवर्णत्वं प्रतीतिसिद्धम्। उक्तं च भट्टविष्णुना—

अरूपमपि यद्रूपं नीलोत्पलदच्छवि।
विभाति व्योमवत् तस्मै परस्मै विष्णवे नमः।।

इति। दूरोपलभ्यमानास्यैव आकाशस्य असिश्यामत्वादुत्पतनसमय एव तादृशदेशप्राप्तिरनेनोक्ता। तेन च कार्यत्वरा तेषां तपःप्रभावश्च ध्वन्यते। उत्पतनानन्तरमेव हिमवत्पुरप्राप्तौ हेतुमाह—मनसा समरंहस इति। मनसा समं तुल्यं रहो येषां ते तथा। तादृशतपः प्रभावयुक्तानां किं किं न साध्यमित्यर्थः।।३६।।

अलकामतिवाह्येव वसतिं वसुसम्पदाम्।
स्वर्गाभिष्यन्दवमनं कृत्वेवोपनिवेशितम्॥३७॥

प्रकाशिका

अलकामिति। अतिवाह्य अतिक्रम्य। स्वर्गाभिष्यन्दवमनं स्वर्गे अमान्त्या: संपद: समानयनम्। अत्र कौटल्य: 'भूतपूर्वमभूतपूर्वं वा जनपदं परदेशापवाहनेन स्वदेशाभिष्यन्दवमनेन वा निवेशयेत्' (कौटि.अर्थ.२.१.१९) इति। ग्रामादिनिवेशने यावत्संख्याको जनो व्यवस्थापित:, तावत्संख्याकाज्जनादाधिक्येन यो जन: समुत्पद्यते, सोऽभिष्यन्दशब्देनोच्यते। तस्य वमनमन्यत्रनयनम्। अत्र त्वभिष्यन्दवमनं स्वर्गाधिकसमृद्ध्यानयनम्। वसुसंपदां वसतिमलकामतिवाह्येव स्वर्गाभिष्यन्दवमनं कृत्वेव चोपनिवेशितमोषधिप्रस्थमित्यन्वय:।।३७।।

विवरणम्

अथ ओषधिप्रस्थस्य रमणीयत्वमाह दशभि: श्लोकै:। तत्रादौ सर्वसुखानां धनमूलत्वाद्धनबाहुल्यमाह—

अलकामिति। वसुसम्पदां वसतिम् अलकाम् अतिवाह्य इव स्वर्गाभिष्यन्दवमनं कृत्वा इव उपनिवेशितम्। वसूनां धनानां संपदां समृद्धीनां वसतिं निवासस्थानभूताम् अलकां वैश्रवणालयम् अतिवाह्य पराक्रमैरतिक्रम्येव च स्वर्गाभिष्यनन्दवमनं स्वर्गे अभिष्यन्दवमनम् अतिरिक्तसंपदानयनं, स्वर्गे यावती संपद् माति ततोऽधिका संपदत्राभिष्यन्दशब्देनोच्यते, तस्या वमनमन्यत्रानयनं, स्वर्गे अमान्त्या: संपद: समानयनमित्यर्थ:। कृत्वा विधायेव च उपनिवेशितं स्थापितम्। हिमवतेति शेष:। तादृशमोषधिप्रस्थं आसेदुरिति पूर्वेणान्वय:। अत्र हिमवत्पुरस्य धनपरिपूर्णत्वदर्शनादुत्प्रेक्षाद्वयम्। वैश्रवणालयमभिभूय तत्रस्था: संपद: समानीय विरचितमिवेत्येका। स्वर्गादतिरिक्ता: संपद: समानीय विरचितमिवेत्यन्या। द्विविधा हि नयविदां प्रवृत्ति:। यदाह कौटिल्य:—भूतपूर्वमभूतपूर्वं वा जनपदं परदेशापवाहनेन स्वदेशाभिष्यन्दवमनेन वा निवेशयेद्' इति। अत्राभिष्यन्दशब्दो भोजराजेन व्याख्यात:—

> द्वावभिष्यन्दनिष्यन्दौ सारे निष्पीडनोद्भवे।
> व्यवस्थितादभ्यधिकोऽप्यभिष्यन्दो जनादिक:।।

इति। अत्र तु धनं विवक्षितम्। अत एवादिशब्दप्रयोग:। अत्र वैश्रवणालयस्य परदेशत्वं स्वर्गस्य स्वदेशत्वं च गम्यते, तेन च वैश्रवणोऽपि हिमवदपेक्षया न्यून:, स्वर्गसंपदपि तदायत्तेति च ध्वन्यते।।३७।।

गङ्गास्त्रोत:परिक्षिप्तं वप्रान्तज्वलितौषधि।
ज्वलन्मणिशिलासालं गुप्तावपि मनोहरम्॥३८॥

प्रकाशिका

गङ्गेति। परिक्षिप्तं कृतपरिखाकृत्यम्। वप्रः प्राकाराधिष्ठानम्। सालः प्राकारः। गुप्तौ रक्षायाम्। अन्यानि दुर्गाणि कर्दमोत्तराभिः परिखाभिः कण्टकशाखाधिष्ठितैर्वप्रैश्च शिलामात्रघटितैः सालैश्च दृष्टिपरुषाणि भवन्ति। इदं तु न तथेति व्यतिरेकध्वनिः।।३८।।

विवरणम्

अथ रक्षाभावे धनस्याप्यस्थिरप्रसङ्गाद् राजधान्या रक्षाप्राधान्याच्च हिमवत्पुरस्य रक्षाविशेषमाह—

गङ्गेति। गङ्गास्त्रोतःपरिक्षिप्तं गङ्गायाः स्त्रोतसा प्रवाहेण परिक्षिप्तं परिवेष्टितम्। कृतपरिखाकृत्यमित्यर्थः। अनेन परिखाया रमणीयत्वमुक्तम्। वप्रस्यापि रमणीयत्वमाह—वप्रान्तज्वलितौषधि। वप्रस्य प्राकाराधिष्ठानस्य। 'स्याच्चयो वप्रमस्त्रियामि'त्यमरः। प्राकारस्थैर्यार्थं तस्य परितः कल्पितस्याधिष्ठानस्येत्यर्थः। अन्ते पर्यन्ते ज्वलिताः दीप्ताः ओषधयः वृक्षविशेषा यस्मिंस्तत्। सालस्यापि मनोहरत्वमाह—ज्वलन्मणिशिलासालमिति। ज्वलन्तो मणयः रत्नान्येव शिलाः पाषाणाः तैः कल्पितः सालः प्राकारो यस्मिंस्तत्। 'प्राकारो वरणः साल' इति सिंहः। एवम्भूतत्वादेवाह—गुप्तावपि मनोहरम् इति। गुप्तौ रक्षायामपि मनोहरं रमणीयम्। अन्यानि पुराणि कर्दमप्रायैः कलुषैरशुचिभिश्च जलैः परिपूरिताभिः परिखाभिः परिवेष्टितानि, कण्टकिद्रुमावृतैर्वप्रैश्च दृष्टिपरुषाणि, शिलामात्रघटितैः सालैश्च दिदृक्षूणां चक्षूंषि न रञ्जयन्तीति गुप्तौ न रमणीयानि। इदं तु गुप्तावपि मनोहरमेवेति व्यतिरेकध्वनिश्चायम्।।३८।।

वीतसिंहभया नागा यत्राश्वा बिलयोनयः।
यक्षकिंपुरुषाः पौरा योषितो वनदेवताः॥३९॥

प्रकाशिका

वीतेति। वीतसिंहभयत्वं दिव्यत्वात्। हिमवति क्वचिद् बिले अश्वानामुत्पत्तिरैतिह्यसिद्धा सिंहलद्वीप इव महिषाणाम्। ननु—

अमृताद् बाष्पतो वह्नेर्वेभ्योऽण्डाच्च गर्भतः।
साम्नो हयानामुत्पत्तिः सप्तधा परिकीर्तिता।।

इत्यश्वशास्त्रेषु परिगणनात् कथं बिलादुत्पत्तिः। अत्र दिव्यत्वात् परिहारः। वनदेवता इति हिमवतः स्थावरराजत्वात्।।३९।।

विवरणम्

दिव्यत्वमाह—

वीतेति। यत्र नागाः वीतसिंहभयाः। नागाः गजाः। वीतं विरहितं सिंहाद् भयं येषां ते तथा। यत्र गजाः सिंहेषु सत्स्वप्योषधिप्रस्थस्य दिव्यत्वात् तद्भयविरहिता इत्यर्थः। ननु 'पदं तुषारस्रुतिधौतरक्तम्' (१.६) इत्यत्र सिंहानां हतद्विपत्वमुक्तम्। इदानीं कथं गजानां वीतसिंह भयत्वम्। मैवम्। हिमवतः शृङ्गान्तरापेक्षया पूर्वमुक्तम्। इदानीं पुनरोषधिप्रस्थनगरमात्रापेक्षयेत्यविरोधात्। तत्रत्यानामश्वानामपि व्यतिरेकं सुलभत्वं चाह—यत्र अश्वाः बिलयोनयः इति। बिलमेव योनिरुद्भवस्थानं येषां ते तथा। अश्वशास्त्रे ह्यश्वानां सप्तधा जन्म प्रतिपादितम्—

अमृताद् बाष्पतो वह्नेर्देवेभ्योऽण्डाच्च गर्भतः।
साम्नो हयानामुत्पत्तिः सप्तधा परिकीर्तिता।।

इति। अत्र तु दिव्यत्वाद् बिलादुत्पत्तिः। पुराणप्रसिद्धा च हिमवति बिलादश्वोत्पत्तिः। यथा सिंहलद्वीपे महिषोत्पत्तिः। पौराणामपि विशेषमाह—यत्र यक्षकिंपुरुषाः पौरा इति। यत्र ओषधिप्रस्थे यक्षाः किंपुरुषाश्च पौराः पुरवासिनो भवन्ति। अनेन पौराणामपि दिव्यत्वमुक्तम्। योषितामपि दिव्यत्वमाह—यत्र वनदेवताः योषितः इति। वनाधिष्ठात्र्यो देवताः। हिमवतः स्थावरराजत्वात् स्थावरदेवताजनोपस्थानम्। योषितः स्त्रियः।।३९।।

शिखरासक्तमेघानां व्यज्यन्ते यत्र वेश्मसु।
अनुगर्जितसन्दिग्धाः करणैर्मुरवस्वनाः।।४०।।

प्रकाशिका

शिखरेति। करणैः पटहाद्यवस्थापितैर्वाद्यताडनविच्छेदैः। तथा राजकन्दर्पे—

नृत्तवादित्रगीतानां प्रयोगवशभेदिनाम्।
संस्थानं ताडनं रोधः करणानि प्रचक्षते।।

इति। गृहशिखरासक्तत्वान्मेघानामनुस्यूतैर्गर्जितैः संशयिता मुरवध्वनयो यत्र करणैः पृथत्त्वेन ज्ञायन्त इत्यर्थः।।४०।।

विवरणम्

औन्नत्यं नित्यप्रवृत्तोत्सवत्वं चाह—

शिखरेति। यत्र वेश्मसु शिखरासक्तमेघानाम् अनुगर्जितसन्दिग्धाः मुरवस्वनाः करमैर्व्यज्यन्ते। वेश्मसु गृहेषु। शिखरेषु शिरोगृहेषु आसक्तानामवस्थितानां मेघानाम्

अनुगर्जितैः अनुस्यूतैः गर्जितैः शब्दैः। 'स्तनितं गर्जितं मेघनिर्घोष' इत्यमरः। सन्दिग्धाः संशयिताः मुखानां मुरजानां स्वनाः शब्दाः। 'शब्दे निनादनिनदध्वनिध्वानरवस्वनाः' इत्यमरः। करणैः वाद्यताडनविच्छेदविशेषैः। तालैरित्यर्थः। यथोक्तं सङ्गीतशास्त्रे—

नृतवादित्रगीतानां प्रयोगवशभेदिनाम्।
संस्थानं ताडनं तालं करणानि प्रचक्षते।।

इति। व्यज्यन्ते विविच्य ज्ञायन्ते। गृहाणां मेघमार्गावगाहित्वान्नित्यप्रवृत्तोत्सवेषु तेषु घनगर्जितानां मुरवस्वनानां च नित्यमनुस्यूतत्वादुभयोः सान्द्रगभीरत्वाच्च किमेतानि मेघगर्जितानि उत मुरवस्वना इति जनानां संशये सति परस्परभेदावगमस्य स्वतो दुष्करत्वेऽपि यत्र जनास्तालविशेषैरेव मुरवस्वनान् विविच्यावगच्छन्तीत्यर्थः। घनगर्जितानां तालविशेषाभावादिति भावः।।४०।।

यत्र कल्पद्रुमैरेव विलोलविटपांशुकैः।
गृहयन्त्रपताकाश्रीरपौरादरनिर्मिता।।४१।।

प्रकाशिका

यत्रेति। यन्त्रशब्देन परम्पराधारदारुको नीप्रप्रान्तो विवक्षितः। अपौरादरनिर्मिता पौरप्रयत्नं विनैव सम्पादिता।।४१।।

विवरणम्

कल्पद्रुमाणामपि सद्भावमाह—

यत्रेति। यत्र कल्पद्रुमैः एव गृहयन्त्रपताकाश्रीः। कल्पद्रुमैः कल्पवृक्षैः करणभूतैः। एवशब्दः पताकान्तरव्यावृत्त्यर्थः। गृहे यानि यन्त्राणि पताकाबन्धनार्थं परस्परसङ्घटिताः दारुविशेषाः तेषु वर्तमानानां पताकानां ध्वजपटानां श्रीः शोभा। भवतीति शेषः। यत्र कल्पवृक्षैरेव ध्वजपटशोभा जायत इत्यर्थः। कल्पद्रुमेषु ध्वजपटशोभायाः सम्भावनां दर्शयति—विलोलविटपांशुकैरिति। विलोलानि चञ्चलानि विटपेषु शाखासु वर्तमानान्यशुंकानि वसनानि येषु ते तथा। अत्र यन्त्रप्रतिवस्तुतया विटपानामुपादानं, पताकाप्रतिवस्तुत्वेनांशुकानामिति विवेकः। निर्माणप्रयासाभावेनापि व्यतिरेकं दर्शयति—अपौरादरनिर्मितेति। आदरशब्देनात्रादरस्य कार्यभूतः प्रयत्नः कार्यकारणसम्बन्धाल्लक्ष्यते। निर्मातव्यस्य शोभाधिक्यप्रतीतिश्च फलम्। पौरैः प्रयासेन निर्मिता न भवतीत्यपौरादरनिर्मितेति। अथवा सर्वत्र हि पुरवासिभिरादरातिशयात् पताकाः क्रियन्ते। इह तु स्वयमेवोत्पन्नत्वान्न तथेत्यर्थः। यत्र ध्वजपटानां कार्यं कल्पवृक्षांशुकैरेव भवतीति भावः।।४१।।

यत्र स्फटिकहर्म्येषु नक्तं सोपानपङ्क्तिषु।
ज्योतिषां प्रतिबिम्बानि प्राप्नुवन्त्युपहारताम्॥४२॥

प्रकाशिका

यत्रेति। उपहारः कुसुमोपहारः।।४२।।

विवरणम्

एवं पुष्पोहारोत्पादनप्रयासस्याप्यभावमाह—

यत्रेति। यत्र स्फटिकहर्म्येषु सोपानपङ्क्तिषु नक्तं ज्योतिषां प्रतिबिम्बानि उपाहारतां प्राप्नुवन्ति। स्फटिकमयेषु हर्म्येषु सौधेषु। सोपानं हर्म्याद्यारोहणभूमिः। 'आरोहणं स्यात् सोपानमि'ति सिंहः। सोपानानां पङ्क्तिषु परम्परासु। नक्तमिति रात्रिवाचकमव्ययम्। रात्रावित्यर्थः। ज्योतिषां नक्षत्राणां प्रतिबिम्बानि प्रतिच्छायाः उपहारतां पुष्पोपहारत्वं प्राप्नुवन्ति गच्छन्ति। सर्वत्र हि जनाः प्रयत्नेन कुसुमान्यानीय क्रीडागृहसोपानपरम्परासु सन्ध्यायां पुष्पोपहारान् कुर्वन्ति, ओषधिप्रस्थे तु नक्षत्रप्रतिबिम्बैरेव पुष्पोहारः, सोपानपङ्क्तीनां स्फटिकमयत्वादिति भावः।।४२।।

यत्रौषधिप्रकाशेन नक्तं दर्शितसञ्चराः।
अनभिज्ञास्तमिस्राणां दुर्दिनेऽप्यभिसारिकाः॥४३॥

प्रकाशिका

यत्रेति। सञ्चरः सञ्चारविषयः। तमिस्रं तमः। दुर्दिने मेघतिमिरे।।४३।।

विवरणम्

आभिसारितवृत्तस्यापि तत्रैव सौकर्यमित्याह—

यत्रेति। यत्र अभिसारिकाः दुर्दिनेऽपि तमिस्राणामनभिज्ञाः। या मदनातुरा कान्तमभिसरति, साभिसारिकेत्युच्यते। 'कान्तार्थिनी तु या याति सङ्केतं साभिसारिके'त्यमरः। दुर्दिने मेघावृते दिवसेऽपि। 'मेघच्छन्नेऽह्नि दुर्दिनमि'ति सिंहः। तमिस्राणां तमसाम्। 'तमिस्रं तिमिरं तम' इत्यमरः। कर्मणीयं षष्ठी। अभिज्ञा न भवन्तीत्यनभिज्ञाः, अज्ञा इत्यर्थः। भवन्तीति शेषः। अभिसारिका हि सर्वत्र नक्षत्रशशिप्रभारहितासु मेघसंवृतासु निशासु तमसा पीड्यन्ते, ओषधिप्रस्थे तु न तथेत्यर्थः। नक्तम् ओषधिप्रकाशेन दर्शितसञ्चारा इति। नक्तं रात्रौ ओषधीनां निशासु ज्वलतां वृक्षविशेषाणां प्रकाशेन भासा दर्शितः प्रकाशितः सञ्चरः सञ्चारविषयभूतो याभ्यस्तास्तथा। सञ्चरशब्दो 'गोचरसञ्चर—'(३.३.११९) इत्यादिना निपातितः।

'मार्गोऽध्वा सञ्चरः पन्था'इति भोजः। ओषधिप्रभया प्रकाशितमार्गा इत्यर्थः। अत एव तमसामनभिज्ञा इत्युक्तम्। यत्राभिसारिकाः सुखेनैव रमणवसतिं प्रयान्तीति भावः।।४३।।

यौवनान्तं वयो यस्मिन्नातङ्कः कुसुमायुधः।
रतिखेदसमुत्पन्ना निद्रा संज्ञाविपर्ययः।।४४।।

प्रकाशिका

यौवनेति। अन्तशब्दः स्वरूपवचनः। 'अन्तोऽस्त्र्यवसिते मृत्यौ स्वरूपे निश्चयेऽन्तिके' इति यादवप्रकाशः। आतङ्को भयहेतुरित्यर्थः। अत्र यौवनेतरवयः-प्रभृतिनिषेधपरत्वाद् वाक्यस्य परिसङ्ख्यालङ्कारः।।४४।।

विवरणम्

किञ्च तत्रत्यानां दुःखलेशोऽपि नास्तीत्याह—

यौवनेति। यस्मिन् वयः यौवनान्तं यौवनस्वरूपम्। 'अन्तोऽस्त्र्यवसिते मृत्यौ स्वरूपे निश्चयेऽन्तिके' इति यादवः। ओषधिप्रस्थवास्तव्यानां जनानां सदा यौवनस्वरूपमेव वयः, न कदाचिदपि बाल्यस्वरूपं नापि वार्धक्यादिस्वरूपमिति भावः। दिव्यत्वमत्र हेतुः। राजादिदोषजनितानां भयहेतूनामप्यभावमाह—कुसुमायुधः आतङ्कः। कुसुमायुधः कामदेवः। स एव आतङ्कः भयहेतुरित्यर्थः। यस्मिन् कुसुमायुधादेव भयं, न शात्रवादिभ्य इत्यर्थः। अत्र हिमवतः प्रतापातिशयो हेतुः। रोगादिपीडापि नास्तीत्याह—रतिखेदसमुत्पन्ना निद्रा संज्ञाविपर्ययः इति। रतेर्हेतोः खेदो देहसादः तस्मात् समुत्पन्ना सञ्जाता निद्रैव संज्ञाविपर्ययः मोह इति यावत्। अतिविततरतिश्रमानन्तरभाविनी निद्रैव मोहः, न रोगादिसमुद्भवा नष्टचेष्टतेति भावः। अत्रापि दिव्यत्वं हेतुः। अनेन वाक्येन यौवनेतराणि वयांसि, कुसुमायुधव्यतिरिक्ता भयहेतवः, रतिश्रमसञ्जातमहानिद्राव्यतिरिक्तो मोहश्च तदितरविधिमुखेन निषिध्यन्त इति परिसङ्ख्यालङ्कार।।४४।।

भ्रूभेदिभिः सकम्पोष्ठैर्ललिताङ्गुलितर्जनैः।
यत्र कोपैः कृताः स्त्रीणामप्रसादार्थिनः प्रियाः।।४५।।

प्रकाशिका

भ्रूभेदिभिरिति। ललितेत्यादि बहुव्रीहिः। यत्र स्त्रीणां कोपैः प्रिया अप्रसादार्थिनः कृताः। तथा यत्र स्त्रीणां कोपैः प्रिया अप्रसादार्थिनः कृताः। तथा यत्र स्त्रीणां कोपो रमणीयः, यथा प्रेयांसः प्रसादनार्थं नार्थयन्त इति लोकतो

व्यतिरेकः। विशेषणानि च तदभिप्रायेणोपात्तानि। दक्षिणावर्तस्तु—आप्रसादार्थिनः यावत्प्रसादमर्थिनः। यत्र स्त्रीणामेवंविधैः कोपैरेव प्रिया आप्रसादार्थिनः कृताः, नान्येषां शत्रूणां कोपैरिति भाव इति व्याचष्ट। न त्वेतदौपयिकमिति प्रतिभाति, यतो न तावत् परिसङ्ख्यात्र स्वारसिकी। परिसङ्ख्यापक्षे विशेषणानां च निरुपयोगता। अर्थनीयं च किञ्चिदन्यदन्वेष्टव्यम्। प्रसादस्यावधित्वेन निर्देशात्। प्रसादस्यैवार्थनीयत्वे प्रसादार्थिन इत्येव वक्तुं युक्तम्। तदा च वीररसस्य प्रकृतत्वाद् भटा इत्यादि युक्तम्, न तु प्रिया इति।।४५।।

विवरणम्

किञ्च तत्राप्यद्भुतं किञ्चिदस्तीत्याह—

भ्रूभेदिभिरिति। यत्र स्त्रीणां कोपैः प्रियाः अप्रसादार्थिनः कृताः। स्त्रीणां कोपैः सपत्नीनामग्रहणादिजनितैः। प्रियाः कान्ताः। प्रसादमर्थयितुं शीलमेषामिति प्रसादार्थिनः, तथाविधा न भवन्त्यप्रसादार्थिनः कृताः विहिताः। सर्वत्र हि कुपितासु वल्लभासु तदैव पादप्रणामादिभिः तासां प्रसादमर्थयन्ते। ओषधिप्रस्थे तु न तथा। तासां कोपकालमात्रसुलभानतिमनोहरान् भावविशेषानेव सानन्दमवलोकयन्तो रमन्त इति भावः। अत एव कोपस्य रमणीयत्वप्रतिपादकानि विशेषणान्याह—भ्रूभेदिभिरित्यादिना। भ्रूभेदवद्भिः, सभ्रूकुटिकैरित्यर्थः। तथा सकम्पोष्ठैः सकम्पाः कम्पसहिताः ओष्ठाः दन्तच्छदा येषु तैः। तथैव ललिताङ्गुलितर्जनैः ललितानि मनोहराणि अङ्गुलिभिः तर्जनानि भर्त्सनानि येषु तैः। नह्येतादृशा रमणीया भावाः कोपेन विना लभ्यन्त इति युक्तमप्रसादार्थित्वं प्रियाणामिति भावः।।४५।।

सन्तानकतरुच्छायासुप्तविद्याधराध्वगम्।
यस्य चोपवनं बाह्यं सुगन्धिर्गन्धमादनः।।४६।।

प्रकाशिका

सन्तानकेति। यस्य बाह्यमुपवनं गन्धमादन इति। तत्रत्यानामासन्नत्वेनोपभोग्यत्वादियमुक्तिः। गन्धमादनशब्दस्य नपुंसकतां मत्वा गन्धवदिति केचित् पठन्ति। अन्ये तु पुस्त्वं मत्वा सुगन्धिरिति। केशवस्त्वाह 'गन्धमादनशब्दस्तु नृनपोः पर्वतान्तर' इति। अत्र प्रकरणे 'अलकाम्' (६.३७)इति 'गङ्गास्रोतः' (६.३८) इति च पद्ययोरोषधिप्रस्थेन वैभक्तोऽन्वयः, तदनन्तरेषु यच्छब्दशक्तिकृतः। न च यच्छब्दानामुत्तरत्र तच्छब्देन सम्बन्धः। प्रागेवाध्याहततच्छब्देन 'आसेदुरोषधिप्रस्थम्' (६.३६) इत्यनेनापेक्षाशमनात्।।४६।।

विवरणम्

उपवनस्यापि तत्राप्रयासलभ्यत्वमाह—

सन्तानकेति। यस्य बाह्यम् उपवनं गन्धमादनः च। यस्य ओषधिप्रस्थस्य बाह्यं बहिर्भागभवम्। उपवनम् उद्यानं गन्धमादनः गन्धमादनाख्यः पर्वतः। चशब्दोऽवधारणे। तत्रत्यानामासन्नत्वादुपभोग्यत्वेन यस्य बाह्योद्यानं गन्धमादनपर्वत एव भवतीत्यर्थः।

हिमवान् निषधो विन्ध्यो माल्यवान् पारियात्रकः।
गन्धमादनमन्ये च हेमकूटादयो नगाः।।

इत्यमरसिंहवचनाद् यद्यपि गन्धमादनशब्दस्य नपुंसकत्वं, तथापि 'गन्धमादनशब्दस्तु नृनपोः पर्वतान्तरे' इति केशवस्वामिवचनानुसारेणात्र पुल्लिङ्गतानिर्देशः। तत्रत्यानामुपभोगप्रकारानेव संक्षिप्य दर्शयति—सन्तानकतरुच्छायासुप्तविद्याधराध्वगम् इति। उपवनविशेषणं चेदम्। सन्तानकतरूणां कल्पवृक्षाणां छायासु सुप्ताः विद्याधरा एव अध्वगाः पथिका यस्मिंस्तत् तथा। अनेन हिमवतो रक्षाचातुर्यात् तेषां वीतभयत्वं द्योत्यते। गन्धमादनस्योपवनधर्मवत्त्वमाह—सुगन्धिरिति। शोभनो गन्धो यस्य स सुगन्धिः। 'गन्धस्येदुत्पूतिसुसुरभिभ्यः' (५.४.१३५) इति (इकारः समासान्तः)।।४६।।

तत् कान्तं मुनयो दिव्याः प्रेक्ष्य हैमवतं पुरम्।
स्वर्गाभिसन्धि सुकृतां वञ्चनामिव मेनिरे।।४७।।

प्रकाशिका

तदिति। कान्तं तथा कान्तमित्यर्थः। दिव्या इति तेषां स्वर्गादन्यत्र बहुमानस्याद्भुतत्वं द्योतयति। स्वर्गेऽभिसन्धि पुण्यफलेभ्यो विशिष्टबुद्धिम्। वञ्चनां मेनिर इवेत्यतथाभावे तथाभाव उत्प्रेक्ष्यते बहुमानातिशयद्योतनाय।।४७।।

विवरणम्

तादृशहिमवत्पुरदर्शने मुनीनां मनोवृत्तिविशेषमाह—

तदिति। दिव्याः मुनयः हैमवतं तत् पुरं प्रेक्ष्य सुकृतां स्वर्गाभिसन्धि वञ्चनां मेनिरे इव। दिवि भवा दिव्याः। 'द्युप्रागवागुदक्प्रतीचो यत्' (४.२.१०१)। अनेन तेषां स्वर्गादन्यत्र बहुमानो दुर्लभ इति द्योत्यते। स्वर्गिणामप्येतद्दर्शने विस्मयो जातः, किं पुनरितरेषामिति भावः। हैमवतं हिमवत्स्वामिकं तत् पूर्वोक्तं पुरं

राजधानीं प्रेक्ष्य दृष्ट्वा। शोभनं कर्म कुर्वन्तीति सुकृतः तेषाम्। यागादिकर्मकृतामित्यर्थः। स्वर्गे अभिसन्धि पुण्यफलेभ्यो विशिष्टबुद्धिम्। स्वर्गफलस्यैव प्राधान्यमिति बुद्धिमित्यर्थः। वञ्चनां वञ्चनया जनितां मेनिरे कल्पितवन्त इव। पुण्यफलेभ्यः सर्वेभ्यः स्वर्गप्राप्तेरेव वैशिष्ट्यमिति या सुकृतिनां बुद्धिः, तां प्राक्तनैः कैश्चिदापादितया वञ्चनया जनितां मेनिर इवेत्यर्थः। वञ्चनाशब्देनात्र वञ्चनायाः कार्यं लक्ष्यते। अत्र वञ्चनामननाभावेऽपि तथात्वमुत्प्रेक्ष्यते। तेन च तेषामोषधिप्रस्थविषयो बहुमानातिशयो द्योत्यते। तथात्वोत्प्रेक्षायां हेतुमाह—कान्तमिति। पूर्वोक्तप्रकारेण रमणीयमित्यर्थः।।४७।।

ते सद्मनि गिरेर्वेगादुन्मुखद्वाःस्थवीक्षिताः।
अवपेतुर्जटाभारैर्लिखितानलनिश्चलैः।।४८।।

प्रकाशिका

त इति। अवपेतुरिति प्रथमं दूरोत्पतनात्। अत एव उन्मुखद्वाःस्थवीक्षिताः। वेगातिशयाच्च जटाभाराणां चित्रगतानलप्रख्यत्वम्।।४८।।

विवरणम्

अथ तेषां गिरीन्द्रभवनप्राप्तिप्रकारमाह—

त इति। ते गिरेः सद्मनि वेगादवपेतुः। सद्मनि गृहे वेगाद् वेगमवलम्ब्येत्यर्थः। अनेन भगवन्नियोगानुष्ठानत्वरा गम्यते। अवपेतुः अवतीर्णवन्तः। 'त आकाशमसिश्याममुत्पत्य परमर्षयः' (६.३६) इत्यत्र पूर्वमुत्पतनस्योक्तत्वादिदानीमवपतनमुक्तम्। अत एव उन्मुखद्वाःस्थवीक्षिताः। उन्मुखैः ऊर्ध्वीकृतमुखैः द्वाःस्थै द्वारपालैः अवलोकिताः। एते के दूरादवतरन्तीति द्वारपालैः क्षणमात्रं दृष्टाः, न तु पृष्टाश्चेत्यर्थः। वेगातिशयादिति भावः। अत एव लिखितानलनिश्चलैः जटाभारैः उपलक्षिताः। चित्रेषु लिखिता अनला लिखितानलाः, तद्वन्निश्चलैः अचञ्चलैः। जटाभारैः। इत्थंभूतलक्षणे तृतीया। जटैव भारः जटाभारः। भारशब्दो बहुत्वं द्योतयति। अतिदूराद् गगनप्रदेशादतिवेगेनावतरणसमये हि जटाभाराणामूर्ध्वाग्रत्वम् अचञ्चलत्वं च भवति। अत एव लिखितानलोपमा। नहि लिखितोऽनलः समीपवर्तिनो जनानौष्ण्येन बाधते, ताम्रवर्णत्वं च नोपजहाति। जटानां ताम्रवर्णत्वं च प्रसिद्धम्।।४८।।

गगनादवतीर्णा सा यथावृद्धपुरस्सरा।
तोयान्तर्भास्करालीव रेजे मुनिपरम्परा।।४९।।

प्रकाशिका

गगनादिति। यथावृद्धेति। अत्र वराहमिहिरः—

पूर्वे भागे भगवान् मरीचिरपरे स्थितो वसिष्ठोऽस्मात्।
तस्याङ्गिरास्ततोऽत्रिस्तस्यासन्नः पुलस्त्यश्च।।
पुलहः क्रतुरिति भगवानासन्नानुक्रमेण पूर्वाद्याः।
तत्र वसिष्ठं मुनिवरमुपाश्रितारुन्धती साध्वी।। इति।।४९।।

विवरणम्

गिरिराजदर्शने तेषां क्रमप्राप्तिं वर्णयति—

गगनादिति। गगनादवतीर्णा यथावृद्धपुरःसरा सा मुनिपरम्परा तोयान्तर्भास्कराली इव रेजे। गगनाद् आकाशाद् अवतीर्णा कृतावतारा। यथावृद्धं वृद्धजनानतिक्रमेण पुरस्सरा अग्रगामिनो यस्यां सा तथा।

मरीचिः पूर्वभागस्थो वसिष्ठः परतस्ततः।
ततोऽङ्गिरास्ततश्चात्रिः पुलस्त्यः पुलहः क्रतुः।।

इति पराशरसंहितायां प्रसिद्धस्तेषामवस्थानक्रमोऽत्र दर्शितः। मुनीनां सप्तर्षीणां परम्परा पङ्क्तिः। तोयस्य जलस्य अन्तः अन्तर्भागे भास्कराणां सूर्यप्रतिबिम्बानाम् आलिः पङ्क्तिरिव रेजे शोभते स्म। यथा चञ्चलस्य जलस्यान्तर्भागे सूर्यप्रतिबिम्बपरम्परा शोभते, तथा सप्तर्षिपरम्परापि गिरिराजभवने शुशुभ इत्यर्थः। भास्करशब्देनात्र तत्प्रतिबिम्बो लक्ष्यते। भास्करस्य जलप्रवेशबहुत्वयोरनुपपत्तेः। बिम्बप्रतिबिम्बभावः सम्बन्धः। मुनिपरम्परायास्तेजःप्रकर्षप्रतीतिः फलम्। प्रतिबिम्बं हि बिम्बापेक्षया न्यूनप्रभं भवति। अत एव रघुवंशे तेजःप्रकर्षस्याप्रतिपाद्यत्वाद्—

बालार्कप्रतिमेवाप्सु वीचिभिन्ना पतिष्यतः।
रराज रक्षःकायस्य कण्ठच्छेदपरम्परा।। (१२.१००)

इत्यत्र प्रतिमाशब्दमेव प्रयुक्तवान्। तत्र हि रक्तसिक्तत्वं प्रतिपाद्यम्। अत एव बालशब्दोपादानम्।।४९।।

तानर्घ्यानर्घ्यमादाय दूरात् प्रत्युद्ययौ गिरिः।
नमयन् सारगुरुभिः पादन्यासैर्वसुन्धराम्।।५०।।

प्रकाशिका

तानिति। अर्घ्यान् पूज्यान्।।५०।।

विवरणम्

अथ गिरीन्द्रस्य प्रत्युत्थानप्रकारमाह—

तानिति। गिरिः अर्घ्यम् आदाय तान् दूरात् प्रत्युद्ययौ। अर्घः पूजा तदर्थं जलमर्घ्यम् आदाय गृहीत्वा तान् दूरात्। यदा तेषामीषद्दर्शनं जातं, तदैवोत्थायेत्यर्थः। अनेनादरातिशय उक्तः। अर्घ्यानिति पूज्यानित्यर्थः। गिरेगौरवातिशयमाह—सारगुरुभिः पादन्यासैः वसुन्धरां नमयन् इति। सारो बलं तेन गुरुत्वयुक्तैः। द्विविधं हि शरीराद्यवयविद्रव्यम्। तत्र श्लथावयवानां कार्पासभाण्डादिवन्न गुरुत्वं, नापि शक्तिः। निबिडावयवानां पुनरायसपिण्डादिवद् गुरुत्वं बलवत्त्वं चास्तीति युक्तं सारवतो गुरुत्वम्। पादयोर्न्यासैः अवस्थापनैः वसुन्धरां भूमिं नमयन् नतां कुर्वन्। निजशरीरगौरवेण वसुन्धरां प्रतिपदन्यासनतां विदधान इत्यर्थः।।

धातुताम्राधरः प्रांशुर्देवदारुबृहद्भुजः।
प्रकृत्यैव शिलोरस्कः सुव्यक्तो हिमवानिति॥५१॥

प्रकाशिका

धात्विति। स्थावराकारैर्दृष्टैर्धातुदेवदारुशिलापट्टैरधरभुजवक्षसां साम्यदर्शनात् प्रांशुत्वाच्च हिमवानिति सुव्यक्त इत्यभिप्रायः।।५१।।

विवरणम्

मुनीनां तद्दर्शनानन्तरं कोऽयमागच्छतीति सन्देहो न जात इत्याह—

धात्विति। हिमवान् इति सुव्यक्तः। अभूदिति शेषः। पर्वताकारं शरीरं परित्यज्य देवतात्मकं शरीरमादायागच्छन्नपि हिमवानेवायमिति सम्यग् व्यक्तोऽभूदित्यर्थः। नन्वसाधारणधर्मदर्शनाभावे कथं सुव्यक्तत्वमितीमामाशङ्कामसाधारणधर्मप्रतिपादनमुखेन परिहरति चतुर्भिर्विशेषणैः। तत्रादौ मुखदर्शन एव जायमानं विशेषमाह—धातुताम्राधर इति। धातुवद् गैरिकवत् ताम्रः रक्तवर्णः अधरः ओष्ठो यस्य स तथा। अनेनास्याधरस्य स्थावरात्मके शरीरे दृश्यमानेन धातुना साम्यमुक्तम्। शरीराकारस्यापि विशेषमाह—प्रांशुरिति। उन्नतकाय इत्यर्थः। अनेन स्थावरशरीरे दृश्यमानं प्रांशुत्वमस्याप्यस्तीति प्रतिपाद्यते। अस्य भुजानामपि विशेषमाह—देवदारुबृहद्भुज इति। देवदारुर्बृक्षविशेषः, तद्वद् बृहन्तौ महान्तौ भुजौ यस्य स तथा। अनेन भुजस्य स्थावरशरीरे दृश्यमानैर्देवदारुभिः सादृश्यमुक्तम्। अस्य वक्षःप्रदेशस्यापि विशेषमाह—प्रकृत्या एव शिलोरस्क इति। प्रकृत्या स्वभावत एव शिलेव कठिनं विस्तीर्णं च उरः वक्षःप्रदेशो यस्य स तथा। अनेन

स्थावराकारे दृष्टचरैः शिलापट्टैरस्य वक्षसः साम्यमुक्तम्। स्थावराकारावयवभूतैर्धातुदेवदारुशिलापट्टैरस्याप्यधरभुजवक्षसां सादृश्योपलम्भात् प्रांशुत्वाच्च देवशरीरावलम्बनेऽपि हिमवानेवायमिति सुव्यक्तोऽभूदित्यर्थः। अनेनास्य शरीरस्य महापुरुषलक्षणत्वं प्रतिपादितम्। तेन च परमेश्वरसम्बन्धयोग्यत्वं द्योत्यते।।५१।।

विधिप्रयुक्तसत्कारैः स्वयं मार्गस्य दर्शकः।
स तैराक्रामयामास शुद्धान्तं शुद्धकर्मभिः।।५२।।

प्रकाशिका

विधीति। स्वयमिति प्रेष्यवृत्तिरुक्ता। शुद्धान्तं राजगृहम्। शुद्धकर्मभिराक्रामयामासेति शुद्धान्तपावनाभिप्रायो द्योत्यते।।५२।।

विवरणम्

तेषां राजभवनप्रापणमाह—

विधीति। सः तैः शुद्धान्तम् आक्रमयामास। तैः सप्तर्षिभिः शुद्धान्तं राजगृहम्। 'भूभुजामन्तःपुरं स्यादवरोधनम्, शुद्धान्तश्चावरोधश्चे'त्यमरः। आक्रमयामास पादन्यासपूतं कारयामासेत्यर्थः। 'क्रमु पादविक्षेप' इत्यस्माद्धातोर्णिजन्तोऽयं शब्दः। अर्घ्यपाद्यादिभिः पूजा तु दर्शनानन्तरमेव कृतेत्याह—विधिप्रयुक्तसत्कारैरिति। विधितः शास्त्रतः प्रयुक्तः सत्कारः पूजा येभ्यस्तैः। राजगृहप्रापणप्रकारमाह—स्वयं मार्गस्य दर्शक इति। स्वयं स्वयमेव, न तु परिजनैः। अनेनात्मनस्तेषां प्रेष्यवृत्तिरुक्ता। मार्गस्य दर्शक उपदेष्टा। स्वयमेवाग्रतो गच्छन्नित इतो भवन्त इति सविनयमवददित्यर्थः। तेषां शुद्धान्तप्रवेशे शुद्धान्तस्यापि शुद्धत्वाधिक्यं जातमित्याह—शुद्धकर्मभिरिति। शुद्धानि अशुभसम्पर्करहितानि कर्माणि येषां तैः। मम गृहानेतेषां पादपांसुभिः पावयिष्यामीति गिरेरभिसन्धिरनेन श्लोकेन द्योत्यते।।५२।।

तत्र वेत्रासनासीनाननासनपरिग्रहः।
इत्युवाचेश्वरान् वाचं प्राञ्जलिः पृथिवीधरः।।५३।।

प्रकाशिका

तत्रेति। वेत्रासनस्य तद्योग्यत्वात् तदुक्तिः। ईश्वरान् लोकस्य स्वामिनः।।५३।।

विवरणम्

अथ गिरेर्वचनावसरं प्रस्तौति—

तत्रेति। पृथिवीधरः तत्र वेत्रासनासीनान् ईश्वरान् प्राञ्जलिः इति उवाच। तत्र शुद्धान्ते वेत्रलतानिर्मितेष्वासनेष्वासीनान्। मुनीनां वेत्रासनस्यैवोचितत्वादेवमुक्तिः। ईश्वरान् चरात्मकस्य प्रपञ्चस्य स्वामिनः। प्रकृष्टोऽञ्जलिर्यस्य स तथा। कृताञ्जलिर्भूत्वेत्यर्थः। इति वक्ष्यमाणप्रकारेण वाचं वाणीम् उवाच। हिमवतो विनयातिशयं दर्शयति—अनासनपरिग्रह इति। आसनस्वीकारो यस्य नास्ति स तथा। भूमावेवासीन इति यावत्। भूमावेवावस्थाय प्राञ्जलिर्भूत्वा हिमवान् मुनीनेवमुवाचेत्यर्थः।।५३।।

अपमेघोदयं वर्षमदृष्टकुसुमं फलम्।
अतर्कितोपपन्नं वो दर्शनं प्रतिभाति मे।।५४।।

प्रकाशिका

अपेति। अतर्कितोपपन्नम् अचिन्तितोपनतम्। अत्र हर्षाद्भुतयोरभिव्यक्तिः तौ च प्रीतेर्व्यभिचारिणौ।।५४।।

विवरणम्

इतिशब्दोक्तान् वचनप्रकारानेवाह दशभिः श्लोकैः। तत्रादौ मुनीनामचिन्तितोपनतत्वात् सहर्षाद्भुतमाह—

अपेति। अतर्कितोपपन्नं वः दर्शनं मे अपमेघोदयं वर्षम् अदृष्टकुसुमं फलं प्रतिभाति। अतर्कितमनिरूपितम्। उपपन्नं प्राप्तम्। अचिन्तितोपनतमित्यर्थः। वः युष्माकं दर्शनम् अवलोकनं मे मम। अपगतो मेघानाम् उदय आविर्भावो यस्मिंस्तादृशं वर्षमिति च अदृष्टानि अनुपलब्धानि कुसुमानि पुष्पाणि यस्य तादृशं फलमिति च मे प्रतिभाति। मेघोदयपुष्पोद्गमयोरनन्तरमेव हि सर्वत्र वर्षोद्भवफलप्रादुर्भावावुपलभ्येते इति तौ चिन्तितोपनतौ। भवदागमनं त्वचिन्तितोपनतम्। तस्मादिदमपमेघोदयं वर्षम् अदृष्टकुसुमं फलमिति चाहं सम्भावयामीत्यर्थः। उक्तश्चायमेवार्थः शाकुन्तले—

उदेति पूर्वं कुसुमं ततः फलं घनोदयः प्राक् तदनन्तरं पयः।
निमित्तनैमित्तिकयोरयं क्रमो भवत्प्रसादस्य पुरस्तु सम्पदः।।

(७.३०) इति। अत्र प्रीतेर्व्यभिचारिणौ हर्षाद्भुतावभिव्यज्येते।।५४।।

मूढं बुद्धमिवात्मानं हैमीकृतमिवायसम्।
भूमेर्दिवमिवारूढं मन्ये भवदनुग्रहात्।।५५।।

प्रकाशिका

मूढमिति। पूर्वस्मिन् क्षणे मूढमात्मानम् अस्मिन् क्षणे भवदनुग्रहाद् बुद्धमिव मन्य इत्यर्थः। एवमन्यत्राप्यात्मानमिति च पठन्ति। अनेनोत्प्रेक्षात्रयेण क्रमाद् ज्ञानतः स्वरूपतोऽधिकारतश्च वैशिष्ट्याभिमान उक्तः।।५५।।

विवरणम्

मुनिदर्शनानन्तरमात्मनः पूर्वस्मात् कालादुत्कर्षातिशयप्राप्त्यभिमानमाह—

मूढमिति। अहं भवदनुग्रहाद् मूढमात्मानं बुद्धमिव आयसं हैमीकृतम् इव भूमेः दिवम् आरूढमिव मन्ये। भवतामनुग्रहाद्धेतोः मूढं ज्ञानलवेनापि रहितं बुद्धं प्रबुद्धम्। सर्वज्ञत्वं प्राप्तमिवाहं कल्पयामीति भावः। अनयोत्प्रेक्षया ज्ञानतो वैशिष्ट्याभिमानो दर्शितः। स्वरूपतोऽपि वैशिष्ट्याभिमानमाह—आयसं हैमीकृतमिव च मन्ये इति। अयसो विकारः। 'तस्य विकारः' (४.३.१३४) इत्यण्। हैमीकृतं हेममयतां नीतम्। आयसमात्मानं भवदनुग्रहात् सुवर्णमयतां प्राप्तमिव च कल्पयामीत्यर्थः। अधिकारतोऽपि वैशिष्ट्याभिमानमाह—आत्मानं भूमेर्दिवम् आरूढमिव च मन्ये इति। एतावन्तं कालं भूमावेवावस्थितमात्मानमिदानीं स्वर्गाधिरूढमिव च पश्यामीत्यर्थः।।५५।।

अद्यप्रभृति मर्त्यानामभिगम्योऽस्मि शुद्धये।
यदध्यासितमर्हद्भिस्तद्धि तीर्थं प्रचक्षते॥५६॥

प्रकाशिका

अद्येति। शुद्धये दुष्कर्मशोधनाय। अर्हद्भिः पूज्यैः। चराचरभूतद्वयाभेदविवक्षयेयमुक्तिः।।५६।।

विवरणम्

स्थावराकारस्यात्मनो भवदनुग्रहादद्य पावनत्वं जातमित्याह—

अद्येति। अहम् अद्यप्रभृति शुद्धये मर्त्यानामभिगम्योऽस्मि। अद्यप्रभृति एतस्माद् दिवसादारभ्य। शुद्धये स्वकृतमहापातकादिदुष्कर्मशोधनाय। मर्त्यानां मनुष्यैः। 'कृत्यानां कर्तरि वा' (२.३.७१) इति षष्ठी। अभिगम्यः प्राप्योऽस्मि। अहमेतस्माद् दिवसादारभ्य काशीदेशादिवत् पातकादिपरिजिहीर्षुभिर्मनुष्यैराश्रयणीयो जात इत्यर्थः। तत्रोपपत्तिमाह—अर्हद्भिः यदध्यासितं तद् हि तीर्थं प्रचक्षते इति। अर्हद्भिः पूज्यैः। 'अर्हः प्रशंसायाम्' (३.२.१३३) इति शतृ। यत् स्थानम्

अध्यासितम् अधिष्ठितं, तदेव हि स्थानं तीर्थमित्युच्यते, नान्यत्। हिशब्दः प्रसिद्धौ। प्रसिद्धिश्चान्यस्य कस्यचित् तीर्थपदवाच्यत्वाभावमपि द्योतयति। काशीदेशस्यापि विश्वनाथाधिष्ठितत्वादेव तीर्थत्वमिति भावः। तस्मात् सज्जनाधिष्ठितस्यैव प्रदेशस्य तीर्थत्वादद्य भवदधिष्ठितः स्थावररूपोऽहमपि शुद्धये मर्त्यैरभिगम्य एवेति भावः।।५६।।

अवैमि पूतमात्मानं द्वयेनैव द्विजोत्तमाः!।
मूर्ध्नि गङ्गाप्रपातेन धौतपादाम्भसा च वः।।५७।।

प्रकाशिका

अवैमीति। धौतपादाम्भसेति बहुव्रीहिगर्भः कर्मधारयः। युष्मच्छब्दसापेक्षस्यापि पादशब्दस्य समासो गमकत्वात्।।५७।।

विवरणम्

मुनिजनपादलनजलस्य गङ्गाजलसाम्यमाह—

अवैमीति। द्विजोत्तमाः! अहं द्वयेनैव आत्मान पूतम् अवैमि। हे ब्राह्मण-श्रेष्ठा!। अनेन पूतत्वसम्भावनायां हेतुरुक्तः। द्वयेन वक्ष्यमाणाभ्यां द्वाभ्याम्। एवशब्दस्तृतीयस्य कस्यचिदप्यभावमाह, उभयोः साम्यं च द्योतयति। आत्मानं स्थावरजङ्गमात्मकं मां पूतं शुद्धम् अवैमि। 'इण् गतावि'ति धातुः। गत्यर्थानां ज्ञानार्थत्वाज्जानामीत्यर्थः। केन द्वयेनेत्याकाङ्क्षायामाह—मूर्ध्नि गङ्गाप्रपातेन वः धौतपादाम्भसा चेति। मूर्ध्नि ममाधित्यकायां गङ्गायाः प्रकृष्टेन पातेन पतनेन। प्रकृष्टत्वं च सन्ततपतनात्। वः युष्माकम्। धौतपादाम्भसा धौतः प्रक्षालितः पादो येन तादृशेनाम्भसा जलेन। अत्र यद्यपि धौतयुष्मत्पादाम्भसेत्येव समासो युक्तः, तथापि युष्मच्छब्दस्य समासात् पृथग्भावो गमकत्वादुपपन्नः। अर्थप्रतीतिरेव हि शब्देन साध्या। युष्मत्पादक्षालनपूतेन जलेनेत्यर्थः। चकार उभयसमुच्चयार्थः। सोऽपि द्वयोरपि साम्यं द्योतयति।।५७।।

जङ्गमं प्रेष्यपक्षे वः स्थावरं चरणाङ्कितम्।
विभक्तानुग्रहं मन्ये द्वैरूप्यं तेन मे कृतम्।।५८।।

प्रकाशिका

जङ्गममिति। द्विरूपमेव द्वैरूप्यम्। चातुर्वर्ण्यादिवत् ष्यञ्। तेनेति प्रेषणचरणन्यासाभ्यामित्यर्थः। तेन मे द्वैरूप्यं विभक्तानुग्रहं कृतमिति मन्य इत्यन्वयः।।५८।।

विवरणम्

स्थावरजङ्गमात्मकं मम शरीरद्वयमपि भवद्भिरनुगृहीतमित्याह—

जङ्गममिति। मे जङ्गमं प्रेष्यपक्षे। जङ्गमं जङ्गमशरीरम्। प्रेष्यपक्षे प्रेष्यः किङ्करः। 'नियोगकृत् कर्मकारः प्रेष्यभृत्यौ च किङ्करः' इति भोजः। भृत्यकोट्यामित्यर्थः। अभूदिति शेषः। मम जङ्गमशरीरं भवतां भृत्यकोट्यामभूदित्यर्थः। स्थावरशरीरस्य त्वनुग्रहान्तरं जातमित्याह—स्थावरं चरणाङ्कितं च इति। स्थावरं स्थावरशरीरं चरणैः पादन्यासैः अङ्कितं लाञ्छितं च। अभूदिति शेषः। मम स्थावरशरीरं भवत्पादन्यासपवित्रितं चाभूदित्यर्थः। सिद्धमर्थमाह—तेन मे द्वैरूप्यं विभक्तानुग्रहं कृतं मन्ये इति। तेन प्रेषणचरणन्यासाभ्यामित्यर्थः। अत्र तच्छब्देन प्रेषणचरणन्यासरूपमनुग्रहसामान्यं परामृश्यत इत्येकवचनप्रयोगोपपत्तिः। द्वैरूप्यं द्विरूपम्। 'चतुर्वर्णादीनां स्वार्थ उपसङ्ख्यानम्' (वा.५.१.१२४) इति स्वार्थे ष्यञ्। रूपद्वयमित्यर्थः। विभक्तः कृतविभागः अनुग्रहो यस्य तत्तथा। कृतं विहितम्। भवद्भिरिति शेषः। मन्ये कल्पयामि। प्रेषणचरणन्यासाभ्यां भवद्भिर्मे रूपद्वयस्यापि महाननुग्रहो विभज्य कल्पित इति कल्पयामीत्यर्थः।।५८।।

भवत्सम्भावनोत्थाय परितोषाय मूर्छते।
अपि व्याप्तदिगन्तानि नाङ्गानि प्रभवन्ति मे॥५९॥

प्रकाशिका

भवदिति। मूर्छते वर्धमानाय। प्रभवन्ति पर्याप्तानि भवन्ति। 'नमःस्वस्ति-' (२.३.१६) इत्यादिसूत्रे अलंशब्दस्यार्थग्रहणात् प्रभवतिना योगे परितोषायेति चतुर्थी।।५९।।

विवरणम्

मुनिजनागमनजनितं सन्तोषातिशयमेवाह—

भवदिति। मे अङ्गानि भवत्संभावनोत्थाय परितोषाय न प्रभवन्ति। मे अङ्गानि ममावयवाः। भवतां सम्भावना भवत्सम्भावना। सम्भावना अनुग्रहः। भवत्सम्भावनाया उत्तिष्ठति उद्भवतीति भवत्सम्भावनोत्थः, 'सुपि स्थः' (३.२.४) इति कः, तस्मै। भवत्कृतात् स्थावरजङ्गमात्मकशरीरद्वयानुग्रहादुद्भूतायेत्यर्थः। 'नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च' इति सूत्रेणालंशब्दस्यार्थग्रहणात् प्रभवतिना योगे परितोषायेति चतुर्थी। न प्रभवन्ति न पर्याप्तानि भवन्ति। अतर्कितभवदनुग्रहजन्मा ममायं परितोषो न मे शरीरावयवेषु माति, किन्तु हर्षाश्रुपुलकादिरूपेण बहिरुद्गच्छत्येवेत्यर्थः। अयमेवार्थो माघेनोक्तः—

युगान्तकालप्रतिसंहृतात्मनो जगान्ति यस्यां सविकासमासत।
तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुदः।।

(१.२३) इति। ननु किमङ्गानामतिकृशत्वादमानं, नेत्याह—व्याप्तदिगन्तान्यपीति। व्याप्तो दिगन्तो दिशामन्तो यैस्तथाभूतान्यपि। पर्वतरूपस्य शरीरस्य आच्छादितायतदिगम्बरत्वादित्थमुक्तम्। अपिशब्दो विरोधमाह। अमाने हेतुमाह—मूर्छत इति। वर्धमानायेत्यर्थः। 'मूर्छा मोहसमुच्छ्राययोरि'ति धातोः शतृप्रत्ययान्तोऽयं शब्दः।।५९।।

न केवलं दरीसंस्थं भास्वतां दर्शनेन वः।
अन्तर्गतमपास्तं मे रजसोऽपि परं तमः॥६०॥

प्रकाशिका

न केवलमिति। रजसः परं तमोऽपीति 'तमसः सत्त्वमुद्बभावि'ति तमसो मूलकारणत्ववचनात्। दरीसंस्थतमःपक्षे दर्शनमुपचरितमासत्तौ।।६०।।

विवरणम्

अन्तःकरणशुद्धिरपि मे भवद्दर्शनेन जातेत्याह—

न केवलमिति। भास्वतां वः दर्शनेन केवलं मे दरीसस्थं तमः न अन्तर्गतं रजसः परमपि अपास्तम्। भास्वतां तेजस्विनां, सूर्याणामिति च स्फुरति। अनेन तमोनिरसनसामर्थ्यमुक्तम्। वः युष्माकम्। दर्शनेन अवलोकनेन। दरीसंस्थतमःपक्षे दर्शनमासत्तावुपचरितं, हिमवतः सप्तर्षिदर्शनमात्रेण गुहासंस्थतमोनिरासासम्भवात्। दरीषु गुहास्ववस्थितम् अन्तर्गतम् अन्तर्भागं गतम्। हृदयकुहरगतमित्यर्थः। रजसः परं रजोगुणात् परम् उपरितनम्। 'तमसः सत्त्वमुद्बभौ' इति वचनेन तमसो मूलकारणत्वप्रतिपादनादुपरितनत्वं, लोकसिद्धक्रमापेक्षया वा। अपास्तं निरस्तम्। भवतामागमनेन मम स्थावरशरीरान्तर्गतं तिमिरमात्रं न केवलमपास्तम्, अपि तु जङ्गमशरीरहृदयकुहरगतस्तमोगुणोऽप्यपास्त इत्यर्थः। अत्र दर्शनस्यैव कर्तृत्वम्। दर्शनस्य हेतुत्वविवक्षायाम् अपास्तमित्यस्य गतमित्यर्थः।

नह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः।
ते पुनन्त्युरुकालेन दर्शनादेव साधवः।।

इति हि भागवतवचनम्।।६०।।

कर्तव्यं वो न पश्यामि स्याच्चेत् किं नोपपद्यते।
शङ्के मत्पावनायैव प्रस्थानं भवतामिदम्॥६१॥

प्रकाशिका

कर्तव्यमिति। क्रियामात्रसाध्यमेव वो न संभावयामीत्यर्थः। ईश्वरवत् परिपूर्णत्वादियमुक्तिः। स्याच्चेद् यदि संभवति, किं नोपपद्यते किं न प्राप्यते। किं दुष्प्रापमित्यर्थः। शङ्के संभावयामि। प्रस्थानं समागमनम्। 'प्रशब्दस्तु प्रकर्षं च द्योतयेच्च समागममि'त्युपसर्गवृत्तौ।।६१।।

विवरणम्

अथ मुनीनामागमनकार्यं स्वयमेव विचारयन्नाह—

कर्तव्यमिति। अहं वः कर्तव्यं न पश्यमि। कर्तव्यं साध्यमित्यर्थः। न पश्यामि नोपलभे। निपुणं विचारयन्नप्यहं भवतां साध्यभूतं वस्तु लोकत्रये किमपि न पश्यामीत्यर्थः। ईश्वरवत् परिपूर्णत्वादिति भावः। अत एवाह—स्याच्चेत् किं नोपपद्यते इति। स्याच्चेद् भवतां साध्यभूतं यत्किञ्चिदपि भवितुं संभावितं चेदित्यर्थः। किं नोपपद्यते, किं न प्राप्यते। सर्वमपि प्राप्यत इत्यर्थः। भवतां तपश्शत्त्या किं दुष्प्रापमिति भावः। किमर्थं तर्हीदमागमनमित्यत्राह—भवतामिदं प्रस्थानं मत्पावनायैव शङ्के इति। भवतां पूर्वोक्तन्यायेन निराकाङ्क्षाणाम्। इदं दृश्यमानं प्रस्थानं समागमः। 'प्रशब्दस्तु प्रकर्षं च द्योतयेच्च समागमम्' इत्युपसर्गवृत्तिः। मत्पावनाय मम पावनाय शुद्धिविधानाय। तादर्थ्ये चतुर्थी। एवशब्दो हेत्वन्तराभावं द्योतयति। शङ्के सम्भावयामि। ममान्तःकरणशुद्धिविधानार्थमेव भवतामिदमागमनमित्यहं कल्पयामीत्यर्थः।।६१।।

तथापि तावत् कस्मिंश्चिदाज्ञां मे दातुमर्हथ।
विनियोगप्रसादा हि किङ्कराः प्रभविष्णुषु।।६२।।

प्रकाशिका

तथापीति। यद्यपि स्वार्थशून्यं समागमनं, तथापीत्यर्थः। तावच्छब्दः क्रमद्योतकः। कस्मिंश्चित् कार्ये मां प्रथममाज्ञापयतेत्यर्थः। कस्मिंश्चिदित्यस्य विशेष्यमनुपाददता किङ्करत्वमात्मनो द्योत्यते। विनियोगः कार्य उपयोजनम्। स एव प्रसादो येषाम्। प्रभविष्णुषु प्रभुविषये।।६२।।

विवरणम्

अथात्मनः कैङ्कर्यमेव प्रकटयन्नाज्ञां प्रार्थयते—

तथापीति। तथापि तावद् मे कस्मिंश्चिद् आज्ञां दातुम् अर्हथ। तथापि यद्यपीदं भवदागमनं स्वार्थशून्यं, तथापीत्यर्थः। तावच्छब्दः क्रमार्थः। मे भृत्याय मह्यम्।

कस्मिंश्चित्, कार्ये इति शेषः। यत् कार्यं भवतां मनसि स्फुरति, तस्मिन्नित्यर्थः। अत्र कस्मिंश्चिदित्यनेन कार्यविशेषानुपादानादात्मनः किङ्करत्वं द्योत्यते। आज्ञां नियोगं दातुम् अर्हथ। आदौ कस्मिंश्चित् कार्ये मामाज्ञापयतेत्यर्थः। दर्शनानन्तरमेवाज्ञापनेन हि भृत्यानां प्रसादः। अत एवाह—किङ्कराः प्रभविष्णुषु विनियोगप्रसादा हि इति। किङ्कराः भृत्याः प्रभविष्णुषु प्रभुषु विषये। विनियोगप्रसादाः विनियोगः कार्य उपयोजनमेव प्रसादो येषां ते तथा। हिशब्दः प्रसिद्धौ। यदि प्रभुणा भृत्यः कस्मिंश्चित् कार्ये विनियुक्तो भवेत्, तर्हि स एव तस्य प्रसाद इत्यर्थः। यद्यपि भवन्तो निराकाङ्क्षाः, तथापि मत्प्रसादार्थमाज्ञा दातव्यैवेति भावः।।६२।।

एते वयममी दाराः कन्येयं कुलजीवितम्।
ब्रूत येनात्र वः कार्यमनास्था बाह्यवस्तुषु।।६३।।

प्रकाशिका

आज्ञाया अपि विषयं सङ्कोचयति—

एत इति। अत्र अस्मासु। बाह्यवस्तुषु अस्मद्व्यतिरिक्तपदार्थेषु। अनास्था युष्मभ्यमन्यद् वस्तु दातुमस्माकमनादर एवेत्यर्थः।।६३।।

विवरणम्

आज्ञाया अपि विषयसङ्कोचं कुर्वन्नाह—

एत इति। वयम् एते। वयमित्यात्मनि बहुवचनम्। एते, भवतामग्रे वर्तामह इति शेषः। दारान् दर्शयति—दारा अमी इति। दाराः भार्या। 'भार्या पत्नी प्रिया जाया दाराः पुंस्येव भूम्नि चे'ति भोजः। अमी इति सहस्तनिर्देशं वचनम्। मम भार्याप्येषा भवदनुग्रहकाङ्क्षिणी भवतामग्रे तिष्ठतीत्यर्थः। आत्मनः पुत्रीमपि दर्शयति—कन्येयम्। कन्याप्येषा तिष्ठतीत्यर्थः। कन्याया विशेषमाह—कुलजीवितमिति। कुलस्य जीवितं जीवनभूता। अनया विनास्मत्कुलं मृतप्रायमेवेति भावः। नन्वेते सर्वे तिष्ठन्तु नाम। प्रकृते तु किमायातमित्यत्राह—अत्र येन वः कार्यं ब्रूतेति। अत्रास्माकं मध्ये। सामान्यनिर्देशे 'सामान्ये नपुंसकमि'ति येनेत्यस्य नपुंसकत्वम्। वः युष्माकं कार्यम्। भवतीति शेषः। ब्रूत वदत। अस्मासु मध्ये मया वा भार्यया वा कन्यया वा भवता कार्यं भवतीति वदतेत्यर्थः। निगूढोऽभिप्रायः। नन्वेत्रयव्यतिरेकेण भवतो भृत्यधनधान्यादिकमस्त्येव। तत् किमर्थं न निर्दिश्यत इत्यत्राह—बाह्यवस्तुषु अनास्था इति। बाह्यवस्तुषु अस्माद्व्यतिरिक्तेषु वस्तुषु पदार्थेषु। युष्मभ्यं दातुमिति शेषः। अनास्था अनादरः। ममेति शेषः। एतत्रयव्यतिरिक्तं वस्तु भवद्भ्यो दातुं ममानास्थैवेत्यर्थः।।६३।।

इत्यूचिवांस्तमेवार्थं दरीमुखविसर्पिणा।
द्विरिव प्रतिशब्देन व्याजहार हिमालयः॥६४॥

प्रकाशिका

उपसंहरति—

इतीति। दरीमुखविसंर्पिणेति द्विर्व्याहरणोत्प्रेक्षाङ्गम्। उत्प्रेक्षा चादरद्योतिका।।६४।।

विवरणम्

हिमवतो वचनमुपसंहरति—

इतीति। इति ऊचिवान् हिमालयः दरीमुखविसर्पिणा प्रतिशब्देन तं अर्थम् एव द्विः व्याजहार इव। इति उक्तप्रकारेण ऊचिवान् अभिहितवान्। दर्येव मुखं दरीमुखं तत्र विसर्पिणा व्यापनशीलेन। प्रतिशब्देन प्रतिध्वनिना। तं पूर्वोक्तमर्थमेव। द्विः द्विवारम्। 'द्वित्रिचतुर्भ्यः सुच्' (५.४.१८) इति क्रियाभ्यावृत्तिगणने सुच्प्रत्ययः। व्याजहार उक्तवानिव। इत्थमभिधाय विरतवचसि हिमवति तस्य स्थावरशरीरदरीमुखव्यापिना प्रतिशब्देन पूर्वं जङ्गमशरीरोदितमर्थमेव स्थावरशरीरेण पुनरप्युक्तवानिवेत्युत्प्रेक्षा। शब्दस्य दरीमुखविसर्पित्वमुत्प्रेक्षाङ्गम्। दरीमुखविसर्पणं शब्दस्य गाम्भीर्यं हेतुः। उत्प्रेक्षया चादरातिशयो द्योत्यते।।६४।।

अथाङ्गिरसमग्रण्यमुदाहरणवस्तुषु।
ऋषयश्चोदयामासुः प्रत्युवाच स भूधरम्॥६५॥

प्रकाशिका

अथेति। उदाहरणमुक्तिः। यथा 'पत्रे निवेशितमुदाहरणं प्रियायाः' (विक्रमोर्व.२.१३) इति। उदाहरणवस्तुषु उक्तिप्रतिपाद्येष्वर्थेषु।।६५।।

विवरणम्

अथ मुनीनां प्रतिवचनोपक्रममाह—

अथेति। अथ ऋषयः अङ्गिरसं चोदयामासुः। अथ हिमवतो नियोगप्रार्थनानन्तरम्। अङ्गिरसम्, अङ्गिरा इति सप्तर्षीणामन्यतमस्य नाम। तं चोदयामासुः प्रेरयामासुः। प्रतिवक्तुमिति शेषः। अन्ये महर्षयो भगवत्सन्दिष्टमर्थं वक्तुमङ्गिरसं प्रेरयामासुरित्यर्थः। नन्वङ्गिरसः को विशेष इत्यत्राह—उदाहरणवस्तुषु अग्रण्यमिति। उदाहरणम् उक्तिः। यथोक्तमनेनैव—'पत्रे निवेशितमुदाहरणं प्रियायाः'

[विक्रमोर्व.२.१३] इति। वस्तुशब्दोऽर्थवाची। उक्तिप्रतिपाद्येष्वर्थेष्वित्यर्थः। अग्रणीः श्रेष्ठः, तम्। उक्तिकौशलशालिनमिति यावत्। चोदितस्याङ्गिरसः प्रवृत्तिमाह—सः भूधरं प्रत्युवाच इति। सः अङ्गिराः भूधरं हिमवन्तं प्रत्युवाच उत्तरमुक्तवान्।।६५।।

उपपन्नमिदं सर्वमतः परमपि त्वयि।
मनसः शिखराणां च सदृशी ते समुन्नतिः॥६६॥

प्रकाशिका

उपपन्नमिति। इदं सर्वं त्वय्युपपन्नम्। अतः परमपीति द्वितीयं वाक्यम्। कथमित्याह—मनस इति। मनस उन्नतिरौदार्यम्। ईदृशस्यौदार्यस्य किं नोपपद्यत इति भावः।।६६।।

विवरणम्

अथाङ्गिरसः प्रतिवचनप्रकारमेवाह उपपन्नमित्यादिभिः। तत्रादावष्टभिः श्लोकैः हिमवन्तं स्तौति। तत्र च तद्वचनप्रशंसानेन श्लोकेन क्रियते—

उपपन्नमिति। त्वयि इदं सर्वम् उपपन्नम्। त्वयि परमेष्ठिनः पुत्रे। इदं सर्वम् 'अपमेघोदयं वर्षम्' (६.५४) इत्याद्यारभ्य सर्वस्वसमर्पणपर्यन्तं वचनम्। उपपन्नं युक्तम्। त्वया यदभिहितं तत् सर्वं परमेष्ठिनः पुत्रे परिशुद्धान्तःकरणे च त्वयि न विस्मयायेत्यर्थः। किञ्चेत्याह—अतःपरमपीति। इतोऽधिकमपीत्यर्थः। त्वय्युपपन्नमिति अत्रापि योज्यम्। एतस्मात् परमपि यत्किञ्चिद्वक्तव्यं समर्पणीयं वास्ति चेत्, तद्वचनं तत्समर्पणं च त्वय्युपपन्नमेवेति भावः। कथमुपपन्नमित्यत्राह—ते मनसः शिखराणां च समुन्नतिः सदृशी इति। मनस उन्नतिरौदार्यम्। शिखराणामुन्नतिस्तुङ्गत्वम्। सदृशी तुल्या। यथा ते शिखराणामुन्नतिर्दृश्यते, तथा मनसोऽपि समुन्नतिरस्त्येवेत्यर्थः। ईदृशस्यौदार्यस्य किं किं नोपपद्यत इति भाव।।६६।।

स्थाने त्वां स्थावरात्मानं विष्णुमाहुस्तथाहि ते।
चराचराणां भूतानां कुक्षिराधारतां गतः॥६७॥

प्रकाशिका

स्थान इति। स्थावरात्मानं विष्णुमाहुरिति 'स्थावराणां हिमालयः' (१०.२५) इति भगवद्गीतावचनात्। कुक्षिशब्देन मध्यभाग उच्यते, ऊर्ध्वाधोभागयोर्व्योमपातालगतत्वात्।।६७।।

विवरणम्

उपपन्नत्वमेव हेतुनोपपादयितुं हिमवतो जगदाधारत्वमाह—

स्थान इति। स्थावरात्मानं त्वां विष्णुम् आहुः, स्थाने। स्थावरात्मानं स्थावरस्वरूपम्। पर्वतस्वरूपमित्यर्थः। त्वां भवन्तं विष्णुं नारायणम् आहुः वदन्ति। सन्त इति शेषः। स्थाने इति युक्तवाचकमव्ययम्। 'स्थाने युक्तार्थमव्ययमि'ति भोजः। 'स्थावराणां हिमालयः' इति भगवद्गीतावचनानुसारेण सन्तो यद् भवन्तं नारायणमेवाहुः, तदुपपन्नमेवेत्यर्थः। कथमुपपन्नमित्यत्राह—तथाहि ते कुक्षिः चराचराणां भूतानाम् आधारतां गतः इति। विष्णुपक्षे कुक्षिशब्द उदरवाची। 'त्रैलोक्यं मधुसूदनस्य जठरे' इत्यादिवचनात्। हिमवत्पक्षे तु मध्यभागवाची। चराश्चाचराश्च चराचराः, तेषाम्। भूतानां लोकानाम् आधारताम् आधारत्वं गतः प्राप्तः। यथा विष्णोः कुक्षिः चराचरात्मकस्य जगत आधारत्वेन प्रसिद्धः, तथा भवतो मध्यभागोऽपि। हिमवत ऊर्ध्वभागो हि व्योमव्यापी, अधोभागस्तु पातालव्यापीति युक्तं मध्यभागस्य चराचरात्मकजगदाधारत्वम्।।६७।।

गामधास्यत् कथं नागो मृणालसदृशैः फणैः।
आ रसातलमूलात् त्वमवालम्बिष्यथा न चेत्॥६८॥

प्रकाशिका

अत एवाह—

गामिति। मृणालसदृशैरिति, एतदपेक्षया कोमलत्वस्य विवक्षितत्वात्। त्वयैव धृता भूः, शेषेण धृतेति प्रवादमात्रमिति भावः।।६८।।

विवरणम्

तत्र हिमवत ऊर्ध्वदेशव्यापित्वं प्रागेवोक्तम् 'अधो विवस्वान् परिवर्तमानः' (१.१६)इत्यादिष्विति अधोदेशव्यापित्वमसाधारणकर्मत्वप्रतिपादनमुखेनाह—

गामिति। त्वं रसातलमूलाद् आ गां न अवालम्बिष्यथाः चेद्, नागः फणैः कथम् अधास्यत्। रसातलं पातालम् 'अधोभुवनपातालबलिसद्मरसातलमि'त्यमरः। रसातलमेव शूलं रसातलमूलं तस्मात्। अभिविधावाङ्। गां भूमिं न अवालम्बिष्यथाः नाधास्यश्चेत्, तर्हि। नागः अनन्तः, सामान्यवाचिनः शब्दाः श्रेष्ठपर्यवसायिन इति न्यायात्। फणैः। 'स्फुटायां तु फणा द्वयोरि'त्यमरः। कथमधास्यद्, न कथञ्चिदित्यर्थः। 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ'(३.३.१३९) इत्युभयत्रापि लृङ्। यदि त्वं पातालमूलपर्यन्तमधःस्थितः पृथिव्या धरणं नाकरिष्यः, तर्ह्यनन्तः पृथिव्या धारणं कथमकरिष्यदित्यर्थः। फणानां धारणासामर्थ्यमाह—

मृणालसदृशैरिति। मृणालेन सदृशैः तुल्यैः। मृणालवत् कोमलैरित्यर्थः। त्वयैव भूमिरनवरतं ध्रियते। अनन्तफणैर्ध्रियत इति प्रवादमात्रमेवेति भावः।।६८।।

आच्छिन्नामलसन्तानाः समुद्रोर्मिनिवारिताः।
पुनन्ति लोकं पुण्यत्वात् कीर्त्तयः सरितश्च ते॥६९॥

प्रकाशिका

अच्छिन्नेति। सन्तानः प्रवाहः। तथा पुण्यश्लोकस्तथा पुण्यप्रसवश्चासीत्यर्थः। अत्र साम्यगर्भः समुच्चयोऽलङ्कारः।।६९।।

विवरणम्

अथ हिमवत उत्तमश्लोकत्वं जगत्पावनत्वं चाह—

अच्छिन्नेति। ते कीर्त्तयः सरितश्च पुण्यत्वात् लोकं पुनन्ति। ते कीर्त्तयः यशांसि त्वदुद्भूताः सरितश्च पुण्यत्वाद् निसर्गपावनत्वात्। लोकं पुनन्ति। लोकस्याघं हरन्तीत्यर्थः। 'पूञ् पवने इति धातुः। यथा त्वत्तो निर्गता गङ्गाद्याः सरितो लोकस्याघं हरन्ति, तथैव कीर्त्तयश्चेति भावः। कीर्त्तीनां सरितां च साधारणधर्ममाह—अच्छिन्नेत्यादिना विशेषणद्वयेन। अच्छिन्नामलसन्तानाः। अत्र कीर्त्तिपक्षे कीर्त्तिकारणानां धर्मादीनां प्रत्यहमनुष्ठीयमानत्वादच्छिन्नत्वं, दुष्कीर्त्तिलेशेनापि रहितत्वादमलत्वम्। अच्छिन्नः अमलश्च सन्तानः परम्परा यासां तास्तथा इति च योज्यम्। सरित्पक्षे सन्तानः प्रवाहः। योजना तु पूर्ववदेव। अच्छिन्ननिर्मलप्रवाहा इत्यर्थः। तथा समुद्रोर्मिनिवारिता इति। समुद्राणामूर्मिभिः वीचिभिः निवारिताः। अनेनान्यैरनिवारितत्वमुक्तम्। चतुस्समुद्रपर्यन्तं व्याप्ता इत्यर्थः। नदीपक्षे समुद्रं प्राप्ता इत्यर्थः। समुद्रोर्म्यनिवारिता इति वा पाठः। अत्र साम्यगर्भः समुच्चयोऽलङ्कारः।।६९।।

यथैव श्लाघते गङ्गा पातेन परमेष्ठिनि।
प्रथमेन द्वितीयेन तथैवोच्छिरसि त्वयि॥७०॥

प्रकाशिका

यथैवेति। श्लाघते स्वयं बहुमन्यते। परमेश्वरस्थाने तिष्ठतीति परमेष्ठी। द्वितीयेन तत्सदृशेनेत्यर्थः।।७०।।

विवरणम्

अथ हिमवतो हरसमानत्वमाह—

यथैवेति। गङ्गा परमेष्ठिनि प्रथमेन पातेन यथा एव श्लाघते। उच्छिरसि

उन्नतं शिरो यस्य स तथा तस्मिन्। आभिजात्यतपःप्रभृतिभिरुत्कृष्टे च। एतच्च परमेश्वरसाम्यद्योतकं विशेषणम्। द्वितीयेन पूर्वपातसदृशेनेत्यर्थः। सादृश्यं चाधिकरणस्य पावनत्वसाम्यात्। पातेनेत्यनुषज्यते। तथैव। श्लाघत इति शेषः। एवशब्दद्वयेन श्लाघायामीषद्भेदस्याप्यभाव उक्तः। यथा पूर्वं परमेश्वरशिरःप्रदेशपतनेन गङ्गा नान्या मत्सदृशी नदीत्यात्मानं बहुमन्यते, द्वितीयेन त्वयि निपातेनापि तथैव बहुमन्यत इत्यर्थः। अत्र हिमवतः परमेश्वरसाम्यप्रतिपादनेन वक्ष्यमाणस्य परस्परसम्बन्धस्य युक्तत्वं द्योत्यते।।७०।।

तिर्यगूर्ध्वमधस्ताच्च व्यापको महिमा हरेः।
त्रिविक्रमोद्यतस्यासीत् स तु स्वाभाविकस्तव।।७१।।

प्रकाशिका

तिर्यगिति। व्यापक आसीदित्यन्वयः। अत्र व्यतिरेकः।।७१।।

विवरणम्

हिमवतो भगवतस्त्रिविक्रमाद् व्यतिरेकमाह—

तिर्यगिति। त्रिविक्रमोद्यतस्य हरेः महिमा तिर्यग् ऊर्ध्वम् अधस्तात् च व्यापकः आसीत्। त्रयो विक्रमाः पादविक्षेपाः। 'क्रमु पादविक्षेप' इति धातुः। तेषूद्यतस्य उद्युक्तस्य। बलिमखे पदत्रयेण त्रैलोक्यं क्रमितुमुद्यतस्येत्यर्थः। हरेर्विष्णोः महिमा महत्त्वं तिर्यक् परितः ऊर्ध्वम् उपरिभागे अधस्तादधोभागे च। व्याप्नोतीति व्यापकः। आसीत्। वामनावतार इति शेषः। हरेर्महिमा वामनावतारे सकृदेव सर्वलोकव्यापी बभूवेत्यर्थः। त्वन्महिमा तु न तथेत्याह—तव तु सः स्वाभाविकः इति। तुशब्दो विशेषद्योतकः। सः सर्वलोकव्यापी महिमा स्वाभाविकः स्वभावसिद्धः। हिमवच्छिखराणामतिमहत्त्वादित्थमुक्तम्। अत्र व्यतिरेकोऽलङ्कारः।।७१।।

यज्ञभागभुजां मध्ये पदमाक्रम्य तस्थुषा।
उच्चैर्हिरणमयं शृङ्गं सुमेरोर्वितथीकृतम्।।७२।।

प्रकाशिका

यज्ञेति। पदमाक्रम्य स्थानमधिष्ठाय। वितथीकृतं निरुत्कर्षं कृतमित्यर्थः। शृङ्गं शिखरम्। जातावेकवचनम्। शृङ्गशब्दशक्त्या प्राधान्यमपि ध्वन्यते।।७२।।

विवरणम्

स्वजात्युत्कर्षमाह—

यज्ञेति। यज्ञभागभुजां मध्ये पदम् आक्रम्य तस्थुषा त्वया सुमेरोः हिरणमयं

शृङ्गं वितथीकृतम्। यज्ञेषु यागेषु भागम् अंशं भुञ्जत इति यज्ञभागभुजः तेषाम्। मध्ये, न तु पार्श्वभागे कुत्रापि। अनेन हिमवतो महेन्द्रादिसमानकक्ष्यत्वं ध्वन्यते। पदं स्थानम् आक्रम्य अधिष्ठाय तस्थुषा स्थितेन त्वया देवतात्मना भवता सुमेरोः महामेरोः हिरण्मयं हिरण्यस्वरूपं शृङ्गं शिखरम्। जातावेकवचनम्। अत्र शृङ्गशब्दशक्त्या प्राधान्यमपि ध्वन्यते। 'शृङ्गं प्राधान्यसान्वोश्चे'त्यमरः। वितथीकृतं निरुत्कर्षं कृतमित्यर्थः। सुमेरोः सुवर्णात्मकत्वेन य उत्कर्षः, स तस्य यज्ञभागभोजित्वाभावाद् यज्ञभागभुजा त्वया निष्फलतां प्रापित इत्यर्थः। किमस्य हिरण्मयशृङ्गवत्त्वादिभिराडम्बरैः, यस्य न यज्ञभाग इति भावः। हिमवतो यज्ञभागभोजित्वं प्रागेवोक्तं 'प्रजापतिः कल्पितयज्ञभाग' (१.१७) इत्यत्र।।७२।।

काठिन्यं स्थावरे काये भवतः सर्वमर्पितम्।
इदं तु ते भक्तिनम्रमर्हदाराधनं वपुः॥७३॥

प्रकाशिका

काठिन्यमिति। भक्त्या नम्रं प्रह्वीकृतमिति मार्दवमुक्तम्। आराधनमिति करणे ल्युट्। अत्राष्टश्लोक्यां प्रथमे तद्वचनाभिनन्दनं, द्वितीये तस्य जगदाधारत्वं, तृतीये त्वसाधारणकर्मत्वं, चतुर्थे जगत्पावनत्वं, पञ्चमे परमेश्वरसमकक्ष्यत्वं, षष्ठे महत्त्वं, सप्तमे स्वजात्युत्कृष्टत्वम्, अष्टमे प्रश्रय इत्युक्तानि।।७३।।

विवरणम्

प्रश्रयगुणशालित्वमाह—

काठिन्यमिति। भवतः काठिन्यं सर्वं स्थावरे काये अर्पितम्। काठिन्यं कठिनत्वम् अर्थिषु कार्कश्यमिति च स्फुरति। सर्वं, कायान्तरे स्थापयितुं न किञ्चिदप्यवशेषितमिति भावः। स्थावरे काये पर्वतस्वरूपे शरीर इत्यर्थः। अर्पितं न्यस्तम्। शरीरान्तरे काठिन्यलेशस्याप्यभावमाह—अर्हदाराधनम् इदं वपुः तु भक्तिनम्रम् इति। अर्हतां पूज्यानाम्। सज्जनानामित्यर्थः। आराध्यतेऽनेनेत्याराधनम्। करणे व्युत्पत्तिः। सज्जनाराधनसाधनमित्यर्थः। इदं दृश्यमानं वपुः शरीरं, जङ्गमशरीरम्। तुशब्दः शरीरान्तराद् विशेषमाह। भक्त्या नम्रं नमनशीलम्। 'नमिकम्पि—' (३.२.१६७) इत्यादिना रः। अनेनातिमृदुत्वमुक्तम्। नहि कठिनानां नमनशीलत्वमुपपद्यते।।७३।।

यदागमनकार्यं नः शृणु कार्यं तवैव तत्।
श्रेयसामुपदेशात् तु वयमत्रांशभागिनः॥७४॥

प्रकाशिका

एवं हिमवन्तमभिष्टुत्य प्रस्तुतमवतारयति—

यदिति। आगमनस्य कार्यं प्रयोजनम्। तवैव कार्यं तच्छृण्वित्यन्वयः। श्रवणस्य सिद्धत्वेऽपि विधानमवहितश्रवणपरम्। तत्र हेतुः—तवैव कार्यमिति। स्वार्थाभावे वः कथमागमनमित्याह—श्रेयसामिति। अत्रेति लोके। श्रेयसामिति बहुवचनाच्छ्रेयस उपदेशादपि श्रेयो भवतीति भावः।।७४।।

विवरणम्

अथ प्रस्तुतमर्थमेवावतारयति—

यदिति। त्वं नः आगमनकार्यं यत्, तत् शृणु। नः अस्माकम्। आगनकार्यम् आगमनस्य कार्यं प्रयोजनं यत्, तच्छृणु आकर्णय। अत्रागमनकार्यकथनमात्रेणैव श्रवणस्य सिद्धत्वेऽपि श्रवणविधानेन सावधानश्रवणं प्रतिपाद्यते। आगमनकार्यं सामान्यतो निर्दिशति—तवैव कार्यम् इति। तवैव, नान्यस्य कस्यचित्। कार्यं प्रयोजनम्। अस्मदागमनं त्वत्प्रयोजनमात्रपरमित्यर्थः। इदं सावधानश्रवणे हेतुः, अचिरेणैव तव महान् प्रमोदो भविष्यतीति। तस्मात् सावधानमाकर्णत्येत्यर्थः। ननु स्वार्थाभावे कथं वः प्रवृत्त्युपपत्तिः, अत आह—वयं तु अत्र श्रेयसाम् उपदेशाद् अंशभागिनः इति। तुशब्दो विशेषमाह। अत्र लोके श्रेयसामभ्युदयानाम्। अत्र बहुवचनस्यायमभिप्रायः—एकस्मिन्नेव हि कर्मणि बहूनि फलान्युपपद्यन्ते। तेषु कानिचित् तत्र सहायभूतानधिगच्छन्ति। तस्मादुपदेष्टरि विद्यमानेनैवांशेन वयमिह लोके पूर्णकामा भवाम इति। उपदेशाद् ज्ञापनाद् अंशस्य भागिनः भजनशीलाः। 'संपृच—' (३.२.१४२) इत्यादिना घिनुण्। 'कुघिण्यतो' (७.३.५२) इति कुत्वम्। श्रेयसामिति अत्राप्यनुषज्यते।।७४।।

अणिमादिगुणोपेतमस्पृष्टपुरुषान्तरम्।
शब्दमीश्वर इत्युच्चैः सार्धचन्द्रं बिभर्ति यः।।७५।।

प्रकाशिका

तत्र प्रथमं वरगुणवर्णनेनोद्धर्षयति—

अणिमेति। अणिमादिगुणयोगेन ईश्वरस्य वाचकत्वेनावस्थितम्। यदाहुः—

> अणिमा महिमा लघिमा गरिमा प्राप्तिः प्रकाश्यमीशिता वशिता।
> ईशस्य यत्र कामावसायितेत्यष्टधैश्वर्यम्।।

इति। अन्येषां तु तदनुग्रहादष्टैश्वर्ययोग इत्यनीश्वरत्वमपि न विरुद्धम्। अत एवाह—

अस्पृष्टपुरुषान्तरमिति। वाचकत्वेन पुरुषान्तरमस्पृशन्तमित्यर्थः। उच्चैः लोकप्रख्यातम्। सार्धचन्द्रम् अर्धचन्द्रेणाविनाभूतम्। अनेनास्पृष्टपुरुषान्तरत्वमुपपादितम्।।७५।।

विवरणम्

अथ वरगुणप्रशंसया हिमवन्तं प्रोत्साहयति त्रिभिः श्लोकैः। तत्रादौ परमेश्वरस्यानन्यशब्दवाच्यत्वमाह—

अणिमेति। यः ईश्वरः इति शब्दं बिभर्ति। अत्र श्लोकत्रये विद्यमानस्य यच्छब्दस्य 'स ते दुहितरं साक्षाद्'(६.७८) इति चतुर्थश्लोकगतेन तच्छब्देनान्वयः। यः शंभुः ईश्वर इति शब्दं बिभर्ति वाचकत्वेनैव बिभर्तीत्यर्थः। ईश्वरशब्दं विशिनष्टि चतुर्भिर्विशेषणैः। तत्रादौ परमेश्वरस्येश्वरशब्दवाचकत्वे हेतुमाह—अणिमादिगुणोपेतम् इति। अणिमादिभिरष्टभिः गुणैः उपेतं सहितम्। अणिमाद्यष्टैश्वर्यसहितस्यैव वाचकमित्यर्थः। यथोक्तं स्कान्दपुराणे—

> अणिमा महिमा चैव लघिमा गरिमा तथा।
> ईशित्वं च वशित्वं च प्राप्तिः प्रकाम्यमेव च।।
> ईश्वरस्येत्थमैश्वर्यमष्टधा परिकीर्तितम्।

इति। अत्र वाचकतया परमेश्वरे वर्तमानस्येश्वरशब्दस्य परमेश्वरगतानामणिमादिगुणानां च सामानाधिकरण्यादुपेतत्वमित्यवसेयम्। इतरेषां चु तदनुग्रहादष्टैश्वर्ययोग इति न तेष्वतिव्याप्तिः। अत एव अस्पृष्टं पुरुषान्तरं परमेश्वरव्यतिरिक्तः पुरुषो येन तम्। न केवलं शम्भोरीश्वरशब्दवाच्यत्वं योगमात्रेण, अपि तु रूढ्या चेत्याह—उच्चैरिति। लोकप्रख्यातम्। परमेश्वर एव रूढमित्यर्थः। अस्पृष्टपुरुषान्तरत्वमेवोपपादयति—सार्धचन्द्रमिति। अर्धचन्द्रेणाविनाभूतमित्यर्थः। अर्धचन्द्रधारिणो देवस्यैव वाचकमिति भावः। यस्मादीश्वरशब्दोच्चारणानन्तरमर्धचन्द्रधारी देव एव श्रोतॄणां मनसि स्फुरति, तस्मादस्पृष्टपुरुषान्तर एवायं शब्द इति भावः।।७५।।

कल्पितान्योन्यसामर्थ्यैः पृथिव्यादिभिरात्मभिः।
यस्येदं ध्रियते व्यक्तं धुर्यैर्यानमिवाध्वनि।।७६।।

प्रकाशिका

कल्पितेति। कल्पितं सम्पादितम् अन्योन्यसामर्थ्यं यैः। अप्तेजसी पृथिव्यैव धृते स्वकार्यं कुरुत इति तयोस्तया सामर्थ्यकल्पनम्। एवमन्यत्रापि। आत्मभिर्देहैः। अध्वनीत्युभयशेषः।।७६।।

विवरणम्

परमेश्वरस्य भोगप्रदत्वमाह—

कल्पितेति। यस्य पृथिव्यादिभिः आत्मभिः इदं व्यक्तं ध्रियते। यस्य शम्भोः। पृथिव्यादिभिः पृथिवीसलिलात्ममारुततेजस्सूर्यचन्द्राकाशरूपैः अष्टभिः। आत्मभिः देहैः इदं दृश्यमानं व्यक्तं विश्वं ध्रियते। 'धृञ् धरणे' इत्यस्मात् कर्मणि लडन्तोऽयं शब्दः। पृथिव्यादिरूपैर्यस्य शरीरैरस्य विश्वस्य धरणं क्रियत इत्यर्थः। अत्रोपमामाह—धुर्यैः अध्वनि यानम् इव इति। रथस्य धुरं वहन्तीति धुर्या अश्वाः तैः। अध्वनि मार्गे यानं रथ इव। मार्गे यथा रथानां धारणमश्वैः क्रियते, तथा संसारमार्गे परमेश्वरशरीरैर्विश्वमित्यर्थः। अत्र साधारणं धर्ममाह—कल्पितान्योन्यसामर्थ्यैरिति। कल्पितं सम्पादितम् अन्योन्यस्य सामर्थ्यं यैस्तैः। जलं कूपतटादिरूपया पृथिव्या धृतमेव स्वकार्यभूतं स्नानादिकं जनयति। तेजोऽपि काष्ठादिरूपया पृथिव्या धृतमेव पाकादिकार्यकृद् भवति। पृथिवी तु सलिलानुगृहीतैव सस्यादिकार्यमुत्पादयति, जलतेजोभ्यामनुगृहीतैव घटादिकार्यं सम्पादयतीत्यादि सर्वत्र द्रष्टव्यम्। अथवा कल्पितान्योन्यसामर्थ्यैः पञ्चीकृतैरित्यर्थः। धुर्याणामपि वहनसामर्थ्यमन्योन्यकृतमेव, चतुर्णामश्वानां मध्ये कस्यचिदभावे त्रयाणामपि वहनसामर्थ्याभावात्। भगवच्छरीरैरेव सर्वे जना यथासुखं वर्तन्त इति भावः।।७६।।

योगिनो यं विचिन्वन्ति क्षेत्राभ्यन्तरवर्तिनम्।
अनावृत्तिभयं यस्य पदमाहुर्मनीषिणः।।७७।।

प्रकाशिका

योगिन इति। क्षेत्रं शरीरं, तदभ्यन्तरवर्तिनोऽपि विचेयत्वेन परं सूक्ष्मत्वं दर्शयति। सूक्ष्मत्वं दर्शयति। योगिन इति सनकादीनामेव विचयनेऽप्यधिकारे इति द्योतयति। किमेवंविधस्य महता प्रयासेन विचयने तेषां फलमित्याह—अनावृत्तीति। आवृत्तिः संसारः, तस्माद् भयं यत्र नास्ति। पदं स्वरूपम्। कथं धीरास्तत्प्राप्तौ न यतेरन्निति भावः। अत्र प्रथमेन पद्येनानन्यसाधारणमीश्वरत्वम्, अनन्तराभ्यां क्रमाद् भोगमोक्षप्रदत्वं च परमेश्वरस्योक्तम्। यदाहुः—

भुक्तिं मुक्तिमणूनां स्वव्यापारे समर्थताधानम्।
जडवर्गस्य विधत्ते सर्वानुग्राहकः शंभुः।।

इति।।७७।।

विवरणम्

मुक्तिप्रदत्वमप्याह—

योगिन इति। योगिनः यं विचिन्वन्ति। योगिनः योगाभ्यासशीलाः यं परमेश्वरम्। विचिन्वन्ति स्वरूपावधारणार्थमतद्व्यावृत्तिमुखेनान्विच्छन्तीत्यर्थः। ननु किं भगवतः शम्भोरत्यन्तदूरावस्थिततत्वादन्वेषणं, नेत्याह—क्षेत्राभ्यन्तरवर्तिनमिति। क्षेत्रं शरीरं तस्याभ्यन्तरे वर्तितुं शीलमस्येति तथा। क्षेत्राभ्यन्तरवर्तिनमपि विचिन्वन्तीत्यर्थः। अनेन स्वरूपस्य परमसूक्ष्मत्वमुक्तम्। ननु किमेवंविधस्यात्यन्तदुर्ग्रहस्य तस्य महता प्रयासेन विचयने तेषां प्रयोजनमित्यत्राह—मनीषिणः यस्य पदम् अनावृत्तिभयम् आहुः। मनीषिणो मन्वादयः यस्य शम्भोः पदं स्वरूपम्। अनावृत्तिभयम्। आवृत्तिः संसारः तस्माद् भयं यत्र नास्ति तदनावृत्तिभयम्। आहुः वदन्ति। 'यतः प्रतिनिवर्तन्ते नैव जातु विपश्चितः' इत्यादिवचनेष्विति भावः।।७७।।

स ते दुहितरं साक्षात् साक्षी विश्वस्य कर्मणः।
वृणुते वरदः शम्भुरस्मत्सङ्क्रमितैः पदैः।।७८।।

प्रकाशिका

स इति। सः, य एवंभूतत्वेन श्रुत्यादिप्रसिद्धः। ते दुहितरमिति अहो धन्योऽसीति भावः। साक्षादव्यवधानेन। स्वयमेव वृणुते इत्यर्थः। व्यवधानं हि तदर्थमन्येन वरणे सति भवति। वरदः, यः स्वयं तस्य तस्येप्सितान् वरान् ददाति, सोऽपि त्वां वृणुत इति पुनरप्यहो धन्योऽसीति प्रकाश्यते। स्वयमब्रुवन् कथं साक्षाद् वृणुत इत्याह—अस्मत्संक्रमितैरिति। लेखस्थानीया वयमिति भावः। अनेन 'अयाचितारं नहि देवमद्रिः' (१.५१) इत्युक्तमयाचनमपास्तम्। वृणुत इति कर्त्रभिप्रायक्रियाफलप्रकाशकेन देवस्य वरणे सादरत्वं द्योतयति।।७८।।

विवरणम्

अथ परमेश्वरसन्देशमेवाह—

स इति। सः शम्भुः ते दुहितरम् अस्मत्सङ्क्रमितैः पदैः साक्षाद् वृणुते। सः यः पूर्वोक्तसकलगुणविशिष्टत्वेन श्रुत्यादिषु प्रसिद्धः स इत्यर्थः। शं मुक्तिसुखं भवत्यस्मादिति शम्भुः परमेश्वरः। ते दुहितरं तव पुत्रीम्। अहो ते भाग्यपरम्परेति भावः। ननु स्वयं किञ्चिदप्यब्रुवन् महेश्वरः कथं स्वयं वृणुत इत्युच्यत इत्यत्राह—अस्मत्सङ्क्रमितैः पदैः इति। अस्मासु सङ्क्रमितैः कृतसङ्क्रमैः। सम्पूर्वात् क्रमेर्णिचि निष्ठा। मान्तत्वाद् वृध्द्यभावः। अनेन लेखस्थानीया वयमिति द्योत्यते।

अत एवाह—पदैरिति। पदान्यपि तदुदीरितान्येवेत्यर्थः। अनेन लेखस्थानीयत्वमेवोपपादितम्। साक्षादव्यवधानेन। स्वयमेव वृणुत इत्यर्थः। अन्येन वरणे सति हि व्यवधानं भवति, न तु लेखादिना वरण इति भावः। वृणुते याचते। 'वरणं प्रार्थना याच्ञा' इति भोजः। 'वृञ् वरणे' इति धातोरिदं रूपम्। 'स्वरित—'(१.३.७२) इत्यादिनात्मनेपदम्। तेन च क्रियाफलस्य कर्त्रभिप्रायत्व-प्रतिपादनेन वरणे देवस्य सादरत्वं द्योत्यते। अथ पुनरपि वरगुणप्रशंसया हिमवतो धन्यत्वमेव प्रतिपादयति विशेषणद्वयेन। विश्वस्य कर्मणः साक्षी। विश्वस्य सर्वेषामपि जीवानाम्। कर्मण इति जातावेकवचनम्। सत्कर्मणां दुष्कर्मणां चेत्यर्थः। साक्षी द्रष्टा। अत एव वरदः तत्तत्फलप्रदातेत्यर्थः। यः सर्वेषामपि जीवानामीप्सितं ददाति, सोऽपि निजाभिमतसिद्ध्यर्थमिदानीं त्वां याचते। अहो धन्योऽसीति भावः। अनेन 'अयाचितारं नहि देवम्' इत्यत्रोक्तमयाचनमपास्तं वेदितव्यम्।।७८।।

तमर्थमिव भारत्या सुतया योक्तुमर्हसि।
अशोच्या हि पितुः कन्या सद्भर्तृप्रतिपादिता।।७९।।

प्रकाशिका

तमिति। परस्परोपकारकत्वमुपमया ध्वन्यते। यतोऽर्थः शब्दोत्पन्नत्वेनैव प्रकाशते, शब्दश्चार्थप्रकाशनेन चरितार्थो भवति। तत्र तदीप्सिततमत्वेन तस्यापेक्षणीयतरत्वं यदुक्तं, तदुपपादयति—अशोच्येति। अशोच्या श्लाघ्येत्यर्थः। पितुरित्यनेन तवापि श्रेयो भविष्यतीति द्योतयति।।७९।।

विवरणम्

ननु तर्हीदानीं मया किं कर्तव्यमित्यत्राह—

तमिति। त्वं तं सुतया योक्तुम् अर्हसि। तं महेश्वरम्। अत्र कर्मसंज्ञया कर्तुरीप्सिततमत्वात् तवैवाभिमतोऽयमर्थ इति द्योत्यते। तेन च 'शृणु कार्यं तवैव तत्' (६.७४) इत्यत्रोक्तोऽर्थोनुसंहितः। सुतया तव पुत्र्या। अनेन त्वदायत्त एवायमर्थ इति द्योत्यते। योक्तुं योजयितुम् अर्हसि योग्यो भवसि। अत्रोपमामाह—भारत्या अर्थम् इव इति। भारत्या शब्देन अर्थं पदार्थमिव। ईश्वरकृतः शब्दार्थसम्बन्ध इति तार्किकाणां मतम्। तदनुसारेणेयमुक्तिः। यथेश्वरो जगत्सर्गानन्तरं शब्दार्थं परस्परं योजयति, तथा भवान् पार्वतीपरेश्वरौ परस्परं योजयितुमर्हतीत्यर्थः। अत्रोपमया दम्पत्योः परस्परोपकर्तृत्वं ध्वन्यते। अर्थो हि शब्दोल्लेखेनैव प्रकाशत इति हि वैयाकरणानां मतम्। यथोक्तं—'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते' इति [वाक्यपदीये]। शब्दश्चार्थप्रकाशेनैव चरितार्थो भवतीति यथा

शब्दार्थयोः परस्परोपकर्तृत्वं तथात्रापीत्यर्थः। 'शृणु कार्यं तवैव तद्' इत्यत्रोक्तमर्थमेव प्रकाशयति—कन्या सद्भर्तृप्रतिपादिता हि पितुः अशोच्या इति। कन्या पुत्री। सद्भर्तृप्रतिपादिता सते श्रेष्ठाय भर्त्रे वराय प्रतिपादिता दत्ता सती। हिशब्दः प्रसिद्धौ। पितुरिति कर्तरि षष्ठी। पित्रेत्यर्थः। अशोच्या श्लाघ्या भवति। तवाप्यनेनैव श्रेयो भविष्यतीत्यर्थः।।७९।।

यावद् द्वयानि भूतानि स्थावराणि चराणि च।
मातरं कल्पयन्त्येनामीशो हि जगतः पिता॥८०॥

प्रकाशिका

इत्थमासूत्रितां वध्वा भाविनीं श्लाघ्यतां विश्वातिशायितया श्लोकाभ्यां प्रपञ्चयति—

यावदिति। भविष्यन्तीति पूर्वार्धे वाक्यं समापनीयम्। उत्तरार्धे च तावच्छब्दोऽध्याहार्यः। तावत् कल्पयन्तीति वर्तमानसामीप्ये लट्। केचित् तु यावत् कल्पयन्तीति 'यावत् पुरा—'(३.३.४)इति लटमाहुः। **दक्षिणावर्तस्तु**—'यावदवधारणे (२.१.८) इत्याह।।८०।।

विवरणम्

इत्थमासूत्रितां पुत्र्यास्तत्तादृशीं भाविनीं श्लाघ्यतां श्लोकद्वयेन प्रपञ्चयति। तत्रादौ पुत्र्या लोकमातृत्वमाह—

यावदिति। स्थावराणि चराणि च द्वयानि भूतानि यावत् तावदेनां मातरं कल्पयन्ति। स्थावराणि अजङ्गमानि चराणि जङ्गमानि। द्वयानि द्विविधानीत्यर्थः। भूतानि जगन्ति। यावद्, भविष्यन्तीति शेषः। तावद् एनां तव पुत्रीं मातरं कल्पयन्ति आत्मनो मातृत्वेन कल्पयन्तीत्यर्थः। वर्तमानसामीप्ये लट्। अत्र भूतानामेव कल्पनेऽपि कर्तृत्वम्।,चराचरात्मना द्विविधानि भूतानि यावदात्मनः सत्तां लभन्ते, तावदेनां निजमातृत्वेनैव कल्पयिष्यन्तीत्यर्थः। अनेन देव्या नित्यत्वमुक्तम्। मातृत्वकल्पने हेतुमाह—ईशो हि जगतः पिता। ईशो महेश्वरः। हिशब्दः प्रसिद्धौ। जगतः स्थावरजङ्गमात्मकस्य प्रपञ्चस्य। पिता उत्पादकः। यस्मान्महेश्वरो जगतः पितृत्वेन प्रसिद्धः, तस्मात् तत्पत्नी मातैव, 'पत्न्यः पितुर्मातर एव सर्वाः' इति न्यायादिति भावः।।८०।।

प्रणम्य शितिकण्ठाय विबुधास्तदनन्तरम्।
चरणौ रञ्जयन्त्यस्याश्चूडामणिमरीचिभिः॥८१॥

प्रकाशिका

प्रणम्येति। प्रणम्येत्यनुवादेन तत्प्रणामस्य स्वतः प्राप्तत्वं द्योतयता विबुधकर्तृकं तच्चरणरञ्जनमुपपादितम्। रञ्जयन्तीति वर्तमानसामीप्ये लट्।।८१।।

विवरणम्

मातृत्वकल्पनस्य फलमाह—

प्रणम्येति। विबुधाः शितिकण्ठाय प्रणम्य तदनन्तरं चूडामणिमरीचिभिः अस्याः चरणौ रञ्जयन्ति। विबुधा देवाः शितिकण्ठाय नीलकण्ठाय। 'शिती धवलमेचकावि'त्यमरः। प्रणम्य प्रणमनं कृत्वा तदन्तरं तस्य प्रणमनस्यानन्तरं चूडामणीनां शिरोरत्नानाम्। 'चूडामणिः शिरोरत्नम्' इति सिंहः। मरीचिभिः रश्मिभिः। किरीटरत्नप्रभाभिरिति यावत्। अस्या इति सहस्तनिर्देशं वचनम्। चरणौ पादौ। रञ्जयन्तीति वर्तमानसामीप्ये लट्। रागयुक्तौ करिष्यन्ति। तादृशः कालोऽपि प्रत्यासन्न इत्यर्थः। अत्र शितिकण्ठाय प्रणम्येति नित्यप्राप्तं तत्प्रणमनमनूद्य विबुधकर्तृकं देवीचरणरञ्जनं विधीयत इति देव्यास्तत्समानकक्ष्यत्वप्राप्तिर्ध्वन्यते।।८१।।

उमा वधूर्भवान् दाता याचितार इमे वयम्।
वरः शम्भुरलं ह्येष त्वत्कुलोद्भूतये विधिः।।८२।।

प्रकाशिका

न केवलमस्याः, किन्तु कुलस्यैवास्य कापि लोकोत्तरता भविष्यतीत्याह—

उमेति। इमे वयं याचितारः शम्भुर्वर इत्यन्वयः। एष विधिर्विवाहविधिः। अत्रानूद्यमानानामङ्गभूतानां गुणाधिकानामुपादीनां पदार्थानामेकैकस्य वधूत्वाद्येकैकविधानादङ्गिनो विवाहविधेः किमपि कुलोन्नतिहेतुत्वं समर्थितम्। तत्र गुणा उमायाः शीलादयः, हिमवतः श्रद्धादयः, अस्मदर्थस्य शमादयः, शम्भोः पारमैश्वर्यादयो लोकतोऽधिका द्रष्टव्याः।।८२।।

विवरणम्

अपि च अनेन विवाहविधिना न केवलमस्याः, नापि केवलं तवैव, तव कुलस्यापि किमपि लोकोत्तरमौन्नत्यं भविष्यतीत्याह—

उमेति। उमा वधूः। उमा पार्वती वधूः कन्या। अत्र हि विवाहविधौ देया पार्वती। सा हि सौशील्यादिबहुगुणविशिष्टा। देयद्रव्यस्य गुणोत्तरत्वं हि दाने प्रधानम्। तस्मादनेनैव तव कुलस्य श्रेयो भविष्यतीत्यर्थः। पुनरपि विशेषमाह—

भवान् दाता इति। श्रद्धादिगुणविशिष्टो भवान् दाता दानकर्ता। देयद्रव्यस्य न्यूनगुणत्वेऽपि श्रद्धावता कृतं दानं फलभूयिष्ठं भवति। यथोक्तं भगवतैव—'पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति' (गीता.९.२६) इति। इत्थं गुणद्वयसाहचर्यमुक्त्वा पुनरपि गुणान्तरमाह—इमे वयं याचितार इति। इमे वयं शमदमादिगुणविशिष्टा वयम्। याचितारः प्रार्थयितारः। विप्रवाक्यपुरस्सरं क्रियमाणं हि सर्वमपि कर्म मङ्गलोदर्कं भवति, 'विप्रवाक्यं जनार्दन' इत्युक्तत्वात्। तत्रापि विशिष्टविप्रभाषितत्वमत्र विशेष इति भावः। अत एव माधवेन—

विशिष्टविप्रभाषितं शुभग्रहस्य चोदयः।
शुभग्रहस्य वर्गता त्रयो महागुणाः स्मृताः।।

इत्युक्तम्। पुनरपि महागुणान्तरमाह—शम्भुः वरः। वरो भर्ता। पारमैश्वर्यादिलोकोत्तरगुणविशिष्टाय हराय दीयते। अनेनैव त्वत्कुलस्य श्रेयो भविष्यति, उत्तमपात्रदानमात्रस्यैव गुणोत्तरत्वस्मृतेः। तस्मादेकैकमपि वस्तु दाने प्रशस्ततरं, किं पुनः समस्तमित्याह—एष विधिः त्वत्कुलोद्भूतये अलं हि इति। एष विधिः उमाया अस्मन्नियोगपूर्वकत्वत्कर्तृकहरार्पणरूपो विवाहविधिः। तव कुलस्य उद्भूतये उत्कृष्टायै समृद्ध्यै। पूर्वोक्तेष्वेकैकस्यापि समृद्ध्यै पर्याप्तत्वेऽपि समस्तपरिमेलनादत्रोत्कृष्टत्वम्। अलं पर्याप्तः। हिशब्दोऽवधारणार्थः। पर्याप्त एवेत्यर्थः।।८२।।

अस्तोतुः स्तूयमानस्य वन्द्यस्यानन्यवन्दिनः।
सुतासम्बन्धविधिना भव विश्वगुरोर्गुरुः।।८३।।

प्रकाशिका

भवतोऽपि कापि लोकोत्तरता भविष्यतीति विधिमुखेनाह—

अस्तोतुरिति। लोको हि स्वनिकृष्टोत्कृष्टापेक्षया स्तवनवन्दनयोः कर्मत्वं कर्तृत्वं च भजते। अयं तु न तथेत्यर्थः। तत्र हेतुर्विश्वगुरुत्वम्।।८३।।

विवरणम्

न केवलमदृष्टवशादेव तवोत्कृष्टत्वम्, अपि तु दृष्टवशादपीत्याह—

अस्तोतुरिति। त्वं सुतासम्बन्धविधिना विश्वगुरोः गुरुः भव। सम्बन्धविधिः सम्बन्धविधानम्। सुतया करणभूतया भगवता सहात्मनः सम्बन्धविधानेन। विश्वेषां गुरोः त्रैलोक्यगुरोरपि तस्य। गुरुर्भव श्वशुरभावं लभस्वेत्यर्थः। श्वशुरस्यापि गुरुत्वं स्मृतिप्रसिद्धं—

पित्रादयस्त्रयो भ्राता पितुर्मातामहस्तथा।
ज्येष्ठभ्राता मातुलश्च श्वशुरो गुरवस्त्विमे।।

इति। भगवतो विश्वगुरुत्वमेवोपपादयति—अस्तोतुरित्यादिभिश्चतुर्भिर्विशेषणैः। अस्तोतुः। स्वयं कस्यचिदपि स्तोता न भवतीत्यस्तोता तस्य। आत्मकर्तृकस्तवनरहितस्येत्यर्थः। अनेन स्तवने भगवतः कर्तृत्वं निरस्तम्। स्तवने कर्मत्वमुपपादयति—स्तूयमानस्येति। सर्वैरपि जनैः आत्माभीष्टसिद्ध्यर्थमनिशं कृतस्तवनस्येत्यर्थः। वन्दनेऽपि कर्मत्वमाह—वन्द्यस्येति। वन्दनयोग्यस्येत्यर्थः। वन्दनेऽपि भगवतः कर्तृत्वं निराकरोति—अनन्यवन्दिन इति। अन्यवन्दनशीलो न भवतीत्यनन्यवन्दी। आत्मकर्तृकवन्दनरहितस्येत्यर्थः। अयमेवार्थो माघेन विस्तरतः प्रतिपादितः—

केवलं दधति कर्तृवाचिनः प्रत्ययानिह न जातु कर्मणि।
धातवः सृजतिसंहृशास्तयः स्तौतिरत्र विपरीतकारकः।। (१४.६६)

इति। लोके हि सर्वे जनाः स्वन्यूनगुणेन जनेन वन्द्यन्ते स्तूयन्ते च, उत्कृष्टगुणांस्तु वन्दन्ते स्तुवन्ति च। अयं पुनरितः पूर्वं स्तवनवन्दनयोः कर्मत्वमेव सर्वदा लब्धवान्। विवाहानन्तरं न गुरुभूतत्वदपेक्षया तयोः कर्तृत्वमप्यस्य भविष्यतीति भावः।।८३।।

एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी।
लीलाकमलपत्राणि गणयामास पार्वती।।८४।।

प्रकाशिका

अथ मुनिवचनसमाप्तिं दर्शयन् रसाविष्टः कविः क्रमप्राप्तहिमवद्वृत्तान्तवर्णनात् प्रागेव नायिकावृत्तान्तमनुसन्धत्ते—

एवमिति। अत्र लक्ष्यक्रमो लज्जाभावध्वनिः, अनुभावरूपाभ्यां लीलाकमलपत्रगणनाधोमुखत्वाभ्यामन्यथापि कन्यानां सम्भवद्भ्यां प्रवृत्ततपश्चर्याद्यनुसन्धानपुरस्सरं शनैर्लज्जायां प्रतीतिविश्रान्तेः। तस्याश्चालम्बनं देवर्षिवाक्यं, पितृपार्श्ववृत्तिरुद्दीपनम्।।८४।।

विवरणम्

अथ रसाभिनिविष्टः कविः क्रमप्राप्तान् पर्वतराजवृत्तान्तोपवर्णनात् पूर्वमेव मुनिवचनसमाप्तिं दर्शयन् नायिकावृत्तान्तमनुसन्धत्ते—

एवमिति। देवर्षौ एवं वादिनि पार्वती पितुः पार्श्वे अधोमुखी लीलाकमलपत्राणि गणयामास। देवर्षौ अङ्गिरसि। एवं पूर्वोक्तप्रकारेण वदितुं

शीलमस्येत्येवंवादी। तथाभूते सति। पार्वती पितुः पार्श्वे समीपे। स्थितेति शेषः। अधोमुखी नम्राननना सती लीलार्थं यत् कमलं तस्य पत्राणि दलानि गणयामास सङ्ख्यातवती। अत्र देवर्षीणां पितुश्च वचनाकर्णनकौतुकात् पितृपार्श्ववर्तिन्या देव्या लज्जाख्यो भावोऽनेन वाक्येन ध्वन्यते। अलक्ष्यक्रमो लक्ष्यक्रमश्चेति द्विविधो हि ध्वनिः। तत्र रसभावादिध्वनिरलक्ष्यक्रमः। तथाप्यत्र भावध्वनिर्लक्ष्यक्रम एव। लीलाकमलपत्रगणनाधोमुखत्वाभ्यां झटिति लज्जायाः प्रतीत्यनुदयात् पूर्वानुरागतपश्चर्याद्यनुसन्धानक्रमेण प्रतीतेश्च। लीलापत्रगणनमधोमुखत्वं च लज्जाया अनुभावः, देवर्षिवाक्यमालम्बनविभावः। पितृपार्श्ववर्तनमुद्दीपनविभावः।।८४।।

शैलः सम्पूर्णकामोऽपि मेनामुखमुदैक्षत।
प्रायेण गृहिणीनेत्राः कन्यार्थेषु कुटुम्बिनः।।८५।।

प्रकाशिका

हिमवतः प्रतिपत्तिमाह—

शैल इति। मेनामुखोदीक्षणं तदभिप्रायवेदनाय। सम्पूर्णकामस्य तस्य किं तन्मुखोदीक्षणविलम्बनेनेत्याह—प्रायेणेति। गृहिणीनेत्राः गृहिणीप्रमाणाः। कन्यार्थेषु कन्याकार्येषु। कुटुम्बिनो गृहस्थाः।।९५।।

विवरणम्

अथ प्रकरणक्रमागतां हिमवतः प्रवृत्तिमेवानुसन्धत्ते—

शैल इति। शैलः संपूर्णकामः अपि मेनामुखम् उदैक्षत। सम्यक् पूर्णः कामो मनोरथो यस्य तथाभूतः सन्नपि। 'तस्थौ निवृत्तान्यवराभिलाषः' (१.५१) 'अथानुरूपाभिनिवेशतोषिणा' (५.७) इत्यादिवचनेषु प्रतिपादितस्याभिलाषस्य देवर्षिवचनश्रवणानन्तरं परिपूर्णत्वे जातेऽपि तदभिप्रायवेदनार्थं मेनाया मुखमुदैक्षत उदीक्षितवान्। ननु किं परिपूर्णमनोरथस्यास्य कार्यविलम्बनमात्रफलेन मेनामुखवीक्षणेनेत्यत्राह—कुटुम्बिनः कन्यार्थेषु प्रायेण गृहिणीनेत्राः इति। कुटुम्बिनो गृहस्थाः। कन्याया अर्थेषु कार्येषु। दानादिकर्मस्वित्यर्थः। प्रायेण प्रायशः। गृहिणी भार्या सैव नेत्रं येषां ते तथा। भवन्तीति शेषः। यथा चक्षुषा विना जनाः कर्तव्यमर्थं किञ्चिदपि न पश्यन्ति, तथा गृहस्थाः कन्यादानादिरूपमर्थं भार्यया विना न पश्यन्तीत्यर्थः। गृहिणीप्रमाणा इति भावः। गौणोऽयं प्रयोगः।।८५।।

इदमत्रोत्तरं न्याय्यमिति बुद्ध्या विचिन्त्य सः।
आददे वचसामन्ते मङ्गलालङ्कृतां सुताम्।।८६।।

प्रकाशिका

इदमिति। इदमा वक्ष्यमाणं हृदयगतं परामृश्यते। अत्रेति कन्याप्रार्थने। उत्तरमनन्तरकर्तव्यम्। विचिन्त्य विमर्शपूर्वं निश्चित्य। आददे हस्ते जग्राह। वचसां मुनिवचसाम्। अन्त इत्यविलम्बं द्योतयति। मङ्गलैः गौरसर्षपदूर्वादिभिः। अनेन रसाज्झटितीतिकर्तव्यतानिश्चयानुष्ठाने दर्शिते।।८६।।

विवरणम्

मेनामुखनिरीक्षणानन्तरं तन्मुखमपि प्रसन्नमवलोकयतो हिमवतः प्रवृत्तिमाह—

इदमिति। सः अत्र इदं न्याय्यम् उत्तरमिति बुद्ध्या विचिन्त्य वचसाम् अन्ते मङ्गलालङ्कृतां सुताम् आददे। अत्र सप्तर्षिकृते कन्याप्रार्थने। इदं वक्ष्यमाणं हृदयगतं कन्यार्पणमेव। न्याय्यं न्यायादनपेतम्। युक्तमित्यर्थः। उत्तरं प्रतिवचनम्। अनन्तरकरणीयमिति यावत्। बुद्ध्या स्वमनीषया विचिन्त्य विचारपूर्वकं निश्चित्य वचसामन्ते मुनिवचनावसानसमय एव। अनेनाविलम्बो द्योत्यते। मङ्गलैर्दूर्वाङ्कुरादिभिः अलङ्कृतां कृतनेपथ्यां सुतां पार्वतीम् आददे दानार्थं हस्ते गृहीतवान्। शीघ्रमेव कर्तव्यमर्थमवधार्य तनयां त्वरिततरमलङ्कृत्य मुनिवचनावसानसमय एव दातुमारेभ इत्यर्थः।।८६।।

एहि विश्वात्मने वत्से! भिक्षा त्वं परिकल्पिता।
अर्थिनो मुनयः प्राप्तं गृहमेधिफलं मया।।८७।।

प्रकाशिका

आदानस्योपयोगमुक्तिमुखेन दर्शयति—

एहीति। एहि मुनीन् यथोचितमुपगच्छेत्यर्थः। विश्वात्मने परमेश्वराय त्वं भिक्षा परिकल्पिता, 'रत्नादिस्तम्बपर्यन्तं सर्वं भिक्षा तपस्विन' इति वचनात्। गृहमेधी गृहस्थः। अनेन 'उमा वधूः' (६.८२) इत्यादिनोक्तस्यार्थस्य सविशेषाङ्गीकरणं द्योतितम्।।८७।।

विवरणम्

आत्मना परिनिश्चितमर्थं पुत्रीं प्रत्याह—

एहीति। वत्से! त्वम् एहि। हे वत्से! अनेन स्नेहातिशय उक्तः। त्वम् एहि आगच्छ। किमर्थमहमागच्छामीत्यत्राह—त्वं विश्वात्मने भिक्षा परिकल्पिता इति। विश्वात्मने परमेश्वराय। अनेन पतिगुणप्रशंसया पुत्र्याः प्रदानजं दुःखं निराकरोति।

भिक्षा देयद्रव्यम्। 'रत्नादिस्तम्बपर्यन्तं सर्वं भिक्षा तपस्विन' इति वचनानुसारेण भिक्षाशब्दप्रयोगः। कल्पिता, मयेति शेषः। नन्वनर्थिने कथं भिक्षप्रदानोपपत्तिरत आह—मुनयः अर्थिनः इति। मुनयः सप्तर्षयः अर्थिनो याचकाः। परमेश्वरनियोगात् त्वद्याचनार्थमेते समागता इत्यर्थः। आत्मनः प्रसादमपि पुत्रीं प्रति निवेदयति—मया गृहमेधिफलं प्राप्तम्। 'गृहमेधी गृहस्थः स्यादि'ति **भोजः**। गृहमेधिनः फलं गृहस्थाश्रमावलम्बनस्य फलं मया प्राप्तमित्यर्थः।

गृहस्थः श्रद्धया दद्याद् भिक्षां भिक्षार्थिने सदा।
भिक्षामददतः पुंसो गार्हस्थ्यं निष्फलं भवेत्।।

इति स्मृतेरिति भावः। अनेन श्लोकेन 'उमा वधूरि'त्यत्र श्लोके यदुक्तं, तस्यैवार्थस्य विशेषेणाङ्गीकरणं कृतमित्यवसेयम्, अत्रापि परमेश्वराय भिक्षा दीयते त्वमत्र भिक्षाद्रव्यं मुनयश्चार्थिन इति पूर्ववदेव सर्वमुक्त्वा तदन्ते गृहमेधिफलं मया प्राप्तमित्युपसंहारात्।।८७।।

एतावदुक्त्वा तनयामृषीनाह महीधरः।
इयं नमति वः सर्वांस्त्रिलोचनवधूरिति।।८८।।

प्रकाशिका

एतावदिति। एतावत् परिमिताक्षरमित्यर्थः। त्रिलोचनवधूरिति सिद्धतानिर्देशेन मुनिप्रार्थने दूराभ्युपगमं द्योतयति।।८८।।

विवरणम्

अथ हिमवतो मुनिप्रार्थितस्यार्थस्य सविशेषमङ्गीकरणमेवाह—

एतावदिति। महीधरः तनयाम् एतावदुक्त्वा ऋषीनाह। तनयां पुत्रीम् एतावद् एतावन्मात्रम्। परिमिताक्षरमित्यर्थः। अनेन कार्यत्वरा गम्यते। उक्त्वा अभिधाय। आह उक्तवान्। लिडर्थमव्ययमिदम्। वचनप्रकारमाह—त्रिलोचनवधूरियं वः सर्वान् नमतीति। त्रिलोचनस्य हरस्य वधूः। 'वधूर्जाया स्नुषा स्त्री चे'त्यमरः। इयमिति सहस्तनिर्देशं वचनम्। वः सर्वान् नमति प्रणमति। इतिशब्दः प्रकारवाची। अत्र त्रिलोचनवधूरिति सिद्धवदभिधानान्मुनिप्रार्थितस्यार्थस्य सविशेषमनुवादं दर्शितवान्।।८८।।

ईप्सितार्थक्रियोदारं तेऽभिनन्द्य गिरेर्वचः।
आशीर्भिरेधयामासुः पुरःपाकाभिरम्बिकाम्।।८९।।

प्रकाशिका

अत एवाह—

ईप्सितेति। ईप्सितार्थोऽभ्युपगमः, तत्क्रियायामुदारं विदग्धम्। वैदग्ध्यप्रदर्शिताभ्युपगममित्यर्थः। अभिनन्द्य प्रशस्य। आशीर्भिः प्रणामसमुचिताभिः। पुरःपाकाभिः पुरस्कृतफलाभिः।।८९।।

विवरणम्

देवीप्रणामानन्तरं मुनीनां तदनुरूपां प्रवृत्तिमाह—

ईप्सितेति। ते गिरेर्वचः। अभिनन्द्य प्रशस्य अम्बिकां पार्वतीम् आशीर्भिः प्रणामानन्तरोचितैराशीर्वादैः एधयामासुः वर्धयामासुः। संवर्धिताभिलषितप्राप्तिनिमित्तभूतादृष्टां व्यधुरित्यर्थः। हिमवद्वचसः प्रशंसार्हत्वमाह—ईप्सितार्थक्रियोदारमिति। कन्याप्रार्थनान्तरं मुनिभिरीप्सितस्याभिलषितस्यार्थस्य। अभ्युपगमस्येत्यर्थः। क्रियायां करणे उदारं विदग्धम्। प्रार्थनानन्तरं किमसौ वक्ष्यतीति मुनीनामाकाङ्क्षायां जातायां त्रिलोचनवधूरियं वो नमतीति वैदग्ध्यप्रदर्शिताभ्युपगममित्यर्थः। अत एव कुतूहलाधिक्यादभिनन्दनम्। तेषामाशिषामुत्कर्षमाह—पुरःपाकाभिरिति। पुरस्कृतफलाभिरित्यर्थः। पुरः अग्र एव पाकः अनुभवकालो यासामिति विग्रहः।।८९।।

तां प्रणामादरस्रस्तजाम्बूनदवतंसकाम्।
अङ्कमारोपयामास लज्जमानामरुन्धती॥९०॥

प्रकाशिका

तामिति। प्रणामादरः सादरप्रणामः। लज्जमानामिति वरबन्धुबुद्ध्या।।९०।।

विवरणम्

'आर्याप्यरुन्धती तत्र' (६.३२) इति यत् प्रागुक्तं, तदेव श्लोकद्वयेनानुसन्दधाति तामित्यादिना। तत्रादावरुन्धत्याः स्वपदप्रणतवधूविषयां प्रवृत्तिमाह—

तामिति। अरुन्धती ताम् अङ्कम् आरोपयामास। तां स्वपदप्रणतां पार्वतीम् अङ्कम् उत्सङ्गम्। 'उत्सङ्गचिह्नयोरङ्क' इत्यमरः। आरोपयामास प्रसादातिशयादात्मन उत्सङ्गेऽवस्थापयामासेत्यर्थः। देव्याः प्रणामोचितभक्त्यतिशयमाह—प्रणामादरस्रस्तजाम्बूनदवतंसकामिति। प्रणामादरेण सादरेण प्रणामेनेत्यर्थः। स्रस्तः पतितः जाम्बूनदं सुवर्णं 'स्वर्णं सुवर्णं कनकमि'त्यारभ्य 'रुक्मं कार्तस्वरं जाम्बू-

नदमष्टापदोऽस्त्रियामि'ति सिंहः। तन्मयो वतंसः शिरोलङ्कारो यस्यास्ताम्। सादरे हि प्रणामे शिरः सम्यगानतं भवति। शिरसः सम्यगानमने सति तु शिरोलङ्कारः स्रस्तो भवतीति भावः। वरबन्धुबुद्ध्या सञ्जातं तात्कालिकं भावविशेषमाह—लज्जमानामिति। अत्र वर्तमानप्रयोगेण लज्जायाः सन्ततप्रवृत्तत्वमुक्तम्।।९०।।

तन्मातरं चाश्रुमुखीं दुहितृस्नेहविक्लवाम्।
वरस्यानन्यपूर्वस्य विशोकामकरोद् गुणैः।।९१।।

प्रकाशिका

तन्मातरमिति। दुहितृस्नेहविक्लबामिति दुहिता मे दूरीभविष्यतीति। अन्या पूर्वं न विद्यते यस्य सोऽनन्यपूर्वः। पुंवद्भावः प्रागुपपादितः। आभ्यां श्लोकाभ्याम् 'आर्याप्यरुन्धती' (६.३२) इत्यादिनोक्तमनुसंहितम्।।९१।।

विवरणम्

देवीमातृविषयां प्रवृत्तिमाह—

तन्मातरमिति। सा दुहितृस्नेहविक्लबां तन्मातरम् अनन्यपूर्वस्य वरस्य गुणैः विशोकाम् अकरोच्च। दुहिता पुत्री, तद्विषयेण स्नेहेन विक्लबां परवशाम्। इतः परं मे दुहिता दूरवर्तिनी भविष्यतीति बुद्ध्या परवशीकृतामित्यर्थः। तस्या देव्या मातरं मेनाम्। अन्या पूर्वं न विद्यते यस्य सोऽनन्यपूर्वः। अन्यशब्दस्य सर्वनामत्वात् पुंवद्भावः। भार्यान्तररहितस्येत्यर्थः। इदमेव हि वधूनां प्रथममाशास्यम्। वरस्य भर्तुः गुणैः सकललोकनियन्तृत्वादिरूपैः। विशोकां विगतशोकामकरोत्। चशब्दो देवीलालनसमुच्चयार्थः। अलं विषादेन, तव पुत्र्या महानुत्कर्षो भविष्यति, नापि सपत्नीशोकलेशोऽपीत्यादिवचनैर्मेनां शोकहीनामकरोदित्यर्थः। दुहितृस्नेहवैक्लब्यस्यानुभावमाह—अश्रुमुखीमिति। अश्रूणि बाष्पजलानि मुखे यस्यास्ताम्। स्वहस्ताभ्यामेवाश्रूणि विमृज्य वरगुणप्रशंसया मेनां सुप्रसन्नामकरोच्चेति भावः।।९१।।

वैवाहिकीं तिथिं पृष्टास्तत्क्षणं हरबन्धुना।
तां त्र्यहादूर्ध्वमाख्याय चेलुश्चीरपरिग्रहाः।।९२।।

प्रकाशिका

वैवाहिकीमिति। वैवाहिकीं विवाहयोग्याम्। हरबन्धुनेत्यनेन यथा सुतायास्तथा जामातुरपि कुशलं वाञ्छता हिमवता कृतो विशिष्टतिथिप्रश्न इति द्योत्यते। त्र्यहादूर्ध्वं चतुर्थेऽह्नीत्यर्थः। चेलुरासनादुदचलन्।।९२।।

विवरणम्

हिमवत्संवादप्रकरणमुपसंहरति—

वैवाहिकीमिति। हरबन्धुना तत्क्षणं वैवाहिकीं तिथिं पृष्टाः चीरपरिग्रहाः तां त्र्यहादूर्ध्वम् आख्याय चेलुः। हरस्य बन्धुना श्वशुरभावं गमिष्यता हिमवता। अत एव सुतायामिव जामातर्यपि कुशलाभिलाषात् तदानीमेव विवाहोचितविशिष्ट-दिवसप्रश्नावकाशः। तत्क्षणं तस्मिन् क्षण एव। अहो मोहस्य महिमेति भावः। वैवाहिकीं विवाहयोग्यां तिथिं दिनम्। विवाहयोग्यो दिवसः क इति पृष्टाः चीरपरिग्रहाः मुनयः विवाहयोग्यां, तिथिं त्र्यहादूर्ध्वं दिवसत्रयादूर्ध्वं चतुर्थेऽहनीत्याख्याय चेलुः आसनादुदचलन्।।९२।।

ते हिमालयमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम्।
सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः।।९३।।

प्रकाशिका

त इति। आमन्त्र्य आपृच्छ्य। तद्विसृष्टास्तदनुज्ञाताः। खमिति ज्योतिष्पथवर्तित्वात्।।९३।।

विवरणम्

त इति। ते हिमालयम् आमन्त्र्य पुनः शूलिनं प्रेक्ष्य च सिद्धमर्थम् अस्मै निवेद्य च तद्विसृष्टाः खम् उद्ययुः। आमन्त्र्य आपृच्छ्य पुनरपि शूलिनं महेश्वरं प्रेक्ष्य दृष्ट्वा च। सिद्धमर्थं निजप्रयाससिद्धं प्रयोजनम्। अस्मै शूलिने निवेद्य च विज्ञाप्य च तद्विसृष्टाः तेन शूलिना विसृष्टाः गमनायानुज्ञाताः। खम् आकाशम्। ज्योतिष्पथमित्यर्थः। उद्ययुः उद्गतवन्तः। अत्र कथासङ्क्षेपो दर्शितः।।९३।।

पशुपतिरपि तान्यहानि कृच्छ्रा-
दगमयदद्रिसुतासमागमोत्कः।
कमपरमवशं न विप्रकुर्यु-
र्विभुमपि तं यदमी स्पृशन्ति भावाः।।९४।।

प्रकाशिका

पशुपतिरिति। पशुपतिः सकलब्रह्मादिचेतनवर्गप्रवृत्तिनिवृत्तिनियमकारी। अपिरसम्भावनां द्योतयति। तानीति त्रीणि। अवशम् अस्वतन्त्रम्। विप्रकुर्युर्बाधेरन्।

विभुं स्वतन्त्रम्। भावा औत्सुक्यादयः। परमस्वतन्त्रस्यास्येयमवस्था, किमुतास्वतन्त्राणामितरेषामित्यर्थः। अनेन वक्ष्यमाणस्य सम्भोगस्य प्राणप्रदत्वेनाभिलाषविप्रलम्भो दर्शितः।।

।। इत्यरुणगिरिनाथविरचितायां कुमारसम्भवप्रकाशिकायां
षष्ठः सर्गः।।६।।

विवरणम्

अथ भगवद्वृत्तमेवानुसन्दधाति—

पशुपतिरिति। पशुपतिरपि तानि अहानि कृच्छ्रादगमयत्। पशुपतिः पशूनां ब्रह्मादिस्तम्बपर्यन्तानां जीवानां पतिः प्रवृत्तिनिवृत्तिनियमकारी। तदुक्तं शैवागमे—

> ब्रह्मादयो जगति जीवगणास्तृणान्ताः
> सर्वे विमोहितधियः पशवः प्रदिष्टाः।
> तेषामभूदधिपतिः शिव एक एव
> तस्माद् विदुः पशुपतिं परमेश्वरं तम्।।

इति। तथाभूतः सन्नपि। अपिशब्दोऽयमसम्भावनां द्योतयति। तान्यहानि विवाहोचितचतुर्थदिवसप्राप्तिपरिपन्थिभूतानि त्रीणि दिनानि। कृच्छ्राद् यथाकथञ्चित्। चित्रदर्शनादिभिरिति भावः। अगमयद् अतिवाहयामास। कृच्छ्रादतिवाहने हेतुमाह—अद्रिसुतासमागमोत्क इति। अद्रेः सुतायाः पार्वत्याः समागमे सङ्गमे उत्क उन्मनाः। पार्वतीसमागमोत्सुक इत्यर्थः। परमेश्वरस्य तावदियं समवस्था। इतरेषां का कथेत्याह—अमी भावाः अवशम् अपरं कं न विप्रकुर्युः इति। अमी पशुपतेरपि बाधकाः भावाः औत्सुक्यादयश्च अवशं कर्मपाशनिबद्धत्वादस्वतन्त्रम्। मायापराधीनमित्यर्थः। इदं बाधाधिक्ये हेतुः। अपरं भगवद्व्यतिरिक्तम्। कं न विप्रकुर्युः सर्वानपि बाधेरन्नित्यर्थः। तादृशानां भावानां पशुपतावपि प्रवृत्तिं पुनरपि सविस्मयमाह—तं विभुमपि स्पृशन्ति यदिति। अत्राप्यमी भावा इत्यनुषज्यते। तं तत्तादृशं विभुं नित्यमुक्तत्वात् स्वतन्त्रम्। अपिर्विरोधमाह। स्पृशन्ति बाधन्त इत्यर्थः। अत्र स्पृशन्तीत्यनेन स्पर्शनमात्रस्याप्यसम्भावना द्योत्यते। यद् यस्मात्। नित्यमुक्तस्य भगवतस्तावदीदृशी दशा। तस्मादन्येषां बाधने को विस्मय इत्यर्थः। अत्र दिनत्रयं कथञ्चिदतिवाहयामासेत्यनेन चतुर्थेऽहनि कर्तव्यस्य विवाहस्य वर्णनमनन्तरसर्गे क्रियत इत्युत्तरसर्गार्थोपक्षेपः कृतः। औत्सुक्यप्रतिपादनेन तु वक्ष्यमाणानां संभोगानां प्राणभूतोऽभिलाषविप्रलम्भो दर्शित इत्यवगन्तव्यम्।।९४।।

षष्ठः सूक्ष्मतरो निसर्गमधुरः सर्गोऽयमत्युज्ज्वलैः
प्रत्युत्पन्नरसैरसीमहृदयैः पद्यैश्च विद्योतते।
वाणीवेयमणीयसी मतिरतिक्षीणा मदीया तथा-
प्यस्मिन् मां गुरुपादभक्तिरमलां व्याख्यां समाख्यापयत्।।
ऊढाभोगनृसिंहचम्पुरचनादक्षस्य नारायण-
क्ष्मादेवस्य कृतौ गिरीशगिरिजाभक्तिप्रवृद्धोदये।
व्याख्यानेऽत्र कुमारसम्भवपदार्थालोचनप्रक्रिया-
निष्णाते बत षष्ठ एष निरगात् सर्गो निसर्गोज्ज्वलः।।

।। इति श्रीकृष्णशिष्यस्य नारायणस्य कृतौ कुमारसम्भवविवरणे
षष्ठः सर्गः ।।६।।

।। अथ सप्तमः सर्गः ।।

अथौषधीनामधिपस्य वृद्धौ
तिथौ च जामित्रगुणान्वितायाम्।
समेतबन्धुर्हिमवान् सुताया
विवाहदीक्षाविधिमन्वतिष्ठत्॥१॥

प्रकाशिका

अथोपक्षिप्तं विवाहं वर्णयितुमुपक्रमते—

अथेति। ओषधीनामधिपस्य वृद्धौ, तथा च कालविधाने—'अर्के कर्कटकन्यकाघटधनुर्मुक्ते भृगौ मन्त्रिणि स्फीतज्योतिषि शीतरोचिषि बलोद्रिक्ते विरिक्ते तिथावि'ति। जामित्रं सप्तमराशिः, तस्य गुणो ग्रहमुक्तत्वम्। तथा सुबोधे—'शुद्धो भवेत् सप्तम' इति। अत्र तु जामित्रशब्देन विवाहो लक्ष्यते, मुख्यार्थाभावात्। जामित्रगुणो विवाहयोग्यता। दक्षिणावर्तस्तु—तनौ च जामित्रेति केचित् पठन्ति। तनौ लग्ने। 'लग्नादयस्तनुकुटुम्बसहोत्थबन्ध्वि'त्यादिना लग्नादीनां संज्ञाकरणात्। तच्चायुक्तम्। वैवाहिकीं तिथिं पृष्टा इत्युक्तत्वादिति। एतत् त्वयुक्तम्। तिथिप्रश्ने विलग्नगुणस्याप्यपेक्षणीयत्वात्। तस्मात् सोऽपि पाठो न वर्जनीयः। विवाहदीक्षा विवाहोपनयनं, तस्य विधिः तदर्थं कर्तव्यं देवताराधनादिकमनुष्ठानम्। 'दीक्ष मौण्ड्येज्योपनयननियमव्रतादेशेष्वि'त्यस्माद् धातोर्दीक्षापदं व्युत्पन्नम्। स्त्रीणां विवाह एवोपनयनत्वेन स्मर्यते। 'वैवाहिको विधिःस्त्रीणामौपनायनिकः स्मृतः' (२.६७) इति मनुः। अन्वतिष्ठत् कारयामास। ण्यर्थोऽन्तर्भूतः।।१।।

विवरणम्

अथ पूर्वसर्गोपक्षिप्तो विवाहोत्सवः सप्तमेनानेन सर्गेण वर्ण्यते। तत्रादौ तद्विषयां हिमवतः प्रवृत्तिमाह अथेत्यादिना—

अथेति। अथ हिमवान् ओषधीनाम् अधिपस्य वृद्धौ तिथौ जामित्रगुणान्वितायां च सुतायाः विवाहदीक्षाविधिम् अन्वतिष्ठत्। अथ सप्तर्षिनिर्दिष्टदिवसत्रयात्ययानन्तरम् ओषधीनामधिपश्चन्द्रः। 'ओषधीशो निशापतिरि'ति सिंहः। तस्य वृद्धौ वर्धनकाले। पूर्वपक्ष इत्यर्थः। 'उदगयन आपूर्यमाणपक्षे कल्याणे नक्षत्रे चौलकर्मोपनयनगोदानविवाहाः'(१.४.१) 'सार्वकालमेके विवाहम्' (१४.२) इत्याश्वलायन-

गृह्ये। तन्मतानुसारेणैवेयमुक्तिः। तिथिः प्रतिपदादिः, तस्यां जामित्रगुणान्वितायाम्। जामित्रशब्देनात्र विवाहो लक्ष्यते। जामित्रशब्दो हि लग्नस्य सप्तमराशौ प्रसिद्धः। यथोक्तं मुहूर्तदर्शने—'जामित्रास्तकलत्रमन्मथमदद्यूनाभिधं सप्तमम्' इति। तस्य गुणस्तु ग्रहरहितत्वम्। यथोक्तं सुबोधे—'शुद्धो भवेत् सप्तमः' इति। तस्मात् सप्तमस्य ग्रहरहितत्वं लग्नस्यैवोपपद्यते, न तु तिथेरिति मुख्यार्थासम्भवः। विवाहस्य सप्तमशुद्ध्या सह नित्यसम्बन्धश्चास्ति। सप्तमशुद्धेरावश्यकत्वप्रतीतिश्च फलम्। तस्माज्जामित्रगुणो विवाहयोग्यता। तिथौ विवाहयोग्यतासहितायां चेत्यर्थः। विवाहयोग्ये दिवस इति यावत्। विवाहयोग्या दिवसाश्च मुहूर्तपदव्यामुक्ताः—'इष्टाः कृष्णाष्टमीनेन्द्वजपितृमरुदन्त्योत्तरा मूलमित्रा उद्वाहे' इति। सुतायाः पुत्र्याः। विवाह एव दीक्षा विवाहदीक्षा। दीक्षाशब्दस्यात्रोपनयनमर्थः। 'दीक्ष मौण्ड्येज्योपनयननियमव्रतादेशेषु' इत्यस्माद् धातोर्दीक्षापदव्युत्पत्तिः। विवाह एव हि स्त्रीणामुपनयनम्। यथाह मनुः—'वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृत' इति। तस्माद् विवाहदीक्षा विवाहोपनयनं, तस्य विधिं तदर्थं कर्तव्यं देवताराधनादिरूपमनुष्ठानम्। अन्वतिष्ठद् अनुष्ठापितवान्। अन्तर्भूतण्यर्थोऽयं प्रयोगः। विवाहदीक्षाविधेः पूर्वमङ्गमाह—समेतबन्धुरिति। समेताः संप्राप्ताः बन्धवो यं स तथा। सर्वानपि बन्धुजनानानीय तैः सम्भूयेत्यर्थः।।१।।

वैवाहिकैः कौतुकसंविधानै-
र्गृहे गृहे व्यग्रपुरन्ध्रिवर्गम्।
आसीत् पुरं सानुमतोऽनुरागा-
दन्तःपुरं चैककुलोपमेयम्॥२॥

प्रकाशिका

वैवाहिकैरिति। वैवाहिकैर्विवाहप्रयोजनैः। कौतुकसंविधानैः मङ्गलोपकरणसंपादनैः प्रतिसरबन्धोपकरणसंपादनैर्वा। करणे हेतौ वा तृतीया। अनुरागाद् गृहे गृहे व्यग्रो व्यापृत आकुलो वा पुरन्ध्रिवर्गः कुटुम्बिनीजनो यत्र। 'व्यग्रस्तु विगताग्रे स्याद् व्यापृताकुलयोरपी'ति केशवः। एवम्भूतं पुरमन्तःपुरं च एकेन कुलेन वंशेन उपमेयमासीदित्यर्थः।।२।।

विवरणम्

अथ विवाहदीक्षामेवानुक्रमेण वर्णयितुमपक्रमते—

वैवाहिकैरिति। सानुमतः पुरम् अन्तःपुरं च एककुलोपमेयम् आसीत्। सानुमतः पर्वतस्य पुरं राजधानी। तस्यां वर्तमाना जना इत्यर्थः। अन्तःपुरम्

अन्तःपुरजनाश्च। एककुलोपमेयम् एकेनैव कुलेनोपमेयम् उपमातुं शक्यमासीत्। सानुमतः पौराणामन्तपुरवासिनां च तदानीमेकवंशोद्भूतत्वप्रतीतिर्जातेत्यर्थः। तत्र हेतुमाह—वैवाहिकैः कौतुकसंविधानैः अनुरागाद् गृहे गृहे व्यग्रपुरन्ध्रिवर्गमिति। वैवाहिकैः विवाहप्रयोजनैः। कौतुकं मङ्गलम्। 'कौतूहले मङ्गले च कौतुकं स्याद्' इति भोजः। अत्र कौतुकशब्देन मङ्गलोपकरणं लक्ष्यते। मङ्गलोपकरणानां संविधानैः सम्पादनैः। हेतौ करणे वा तृतीया। अनुरागाद्धेतोः गृहे गृहे प्रतिगृहम्। व्यग्रः व्याकुलः व्यापृतो वा। 'व्यग्रस्तु विगताग्रे स्याद् व्यापृताकुलयोरपी'ति **केशवः**। पुरन्ध्रिवर्गः कुटुम्बिनीजनो यत्र। अन्तःपुरवासिनां जनानां पौरजनानां चानुरागसाम्यनिमित्तेन प्रवृत्तिसाम्येनैकवंशजाता एवैते जना इति द्रष्टॄणां प्रतीतिर्जातेत्यर्थः।।२।।

सन्तानकाकीर्णमहापथं त-
च्चीनांशुकैः कल्पितकेतुमालम्।
भासा ज्वलत् काञ्चनतोरणाङ्कं
स्थानान्तरे स्वर्ग इवाबभासे।।३।।

प्रकाशिका

सन्तानकेति। सन्तानकं देवकुसुमम्। महापथो राजपथः। तत्सामर्थ्यात् तच्छब्देन पुरमेव परामृश्यत इत्यवसेयम्। चीनो जनपदविशेषः।।३।।

विवरणम्

मङ्गलोपकरणसम्पादनस्य फलमाह—

सन्तानकेति। तत् स्थानान्तरे स्वर्गः इव आबभासे। तद् हिमवत्पुरं स्थानान्तरे मेरुशिखरव्यतिरिक्तस्थाने स्वर्ग इव शोभते स्म। हिमवच्छिखरवर्तित्वमात्रमेवास्य स्वर्गाद्विशेष इति भावः। स्वर्गसाम्यमेवोपपादयति—सन्तानकेत्यादिना। सन्तानकाकीर्णमहापथं सन्तानकैर्देवतरुकुसुमैराकीर्णो विकीर्णो महापथो राजमार्गो यत्र तत्। रथ्यासंस्कारस्तत्र कल्पवृक्षपुष्पैरेवेत्यर्थः। पताकाबन्धनेऽपि विशेषमाह—चीनांशुकैः कल्पितकेतुमालम् इति। चीनाख्ये जनपदविशेषे निर्मितैरंशुकैः वसनैः। दुकूलैरिति यावत्। कल्पिता निर्मिताः केतुमालाः पताकाः यत्र तत्। पुरस्य स्वाभाविकीमेव शोभामाह—भासा ज्वलदिति। भासा तेजसा ज्वलद् दीप्यमानम्। तोरणानां विशेषमाह—काञ्चनतोरणाङ्कमिति। काञ्चनैः कनकैः निर्मितानि तोरणान्येवाङ्कः चिह्नं यस्य तत् तथा। काञ्चनतोरणानामिति पाठे काञ्चनतोरणानां भासा ज्वलदित्यन्वयः। नहि स्वर्गस्यैतद्व्यतिरिक्तं किमपि गुणान्तरमस्तीति भावः।।३।।

एकैव सत्यामपि पुत्रपङ्क्तौ
चिरस्य दृष्टेव मृतोत्थितेव।
उपोढपाणिग्रहणेति पित्रो-
रुमा विशेषोच्छ्वसिता बभूव॥४॥

प्रकाशिका

एकैवेति। एकशब्दः केवलार्थः। उपोढपाणिग्रहणा निकटीभूतविवाहा। इतिर्हेतौ। विशेषेणोच्छ्वसिता उल्लसिता। अधिकलालितेत्यर्थः। उमैकैवेत्यन्वयः। 'महीभृतः पुत्रवतोऽपि' (कु.१.२६) इत्यादिना या विशेषप्रतिपत्तिरुक्ता, तस्या एवेदानीं विवाहप्रत्यासत्त्या प्रागवस्थाया दूराधिकत्वमुत्प्रेक्षाद्वयेन प्रकाश्यते।।४।।

विवरणम्

इत्थमारब्धेषु विवाहकोलाहलेष्वासन्नविवाहायां देव्यां पित्रोः प्रीतिविशेषमाह—

एकैवेति। पुत्रपङ्क्तौ सत्याम् अपि उमा एका एव उपोढपाणिग्रहणा इति पित्रोः विशेषोच्छ्वसिता बभूव। पुत्राणां पङ्क्तौ समूहे सत्यां भवन्त्यामपि। अपिशब्दोऽयमसम्भावनां द्योतयति। उमा पार्वती एकैव। एकशब्दः केवलार्थः। उपोढं प्रत्यासन्नं पाणिग्रहणं विवाहो यस्याः सा तथा। इतिशब्दो हेतौ। प्रत्यासन्नविवाहत्वादित्यर्थः। पित्रोः हिमवतो मेनायाश्च। विशेषोच्छ्वसिता विशेषेणोच्छ्वसिता उल्लसिता। पूर्वकालाद् विशेषेण लालनास्पदं बभूवेत्यर्थः। 'महीभृतः पुत्रवतोऽपि दृष्टिरि'त्यत्र पार्वत्यां यः स्नेहविशेषः प्रतिपादितः, स एवेदानीमनुरूपनायकप्राप्तिहेतुभूतविवाहप्रत्यासत्त्या शतगुणः संबभूवेत्यर्थः। अत एवोत्प्रेक्षते—चिरस्य दृष्टा इव इति। पूर्वमतिचिरकालमदृष्टा सती पुनः सहसा दृष्टेवेत्यर्थः। ततोऽप्यधिकतरलालनीयत्वप्रतिपादकमुत्प्रेक्षान्तरमाह—मृतोत्थिता इव इति। पूर्वं गतजीविता पुनर्दैववशात् सञ्जातजीवितेवेत्यर्थः।।४।।

अङ्काद् ययावङ्कमुदीरिताशीः
सा मण्डनान्मण्डनमन्वभुङ्क्त।
सम्बन्धिभिन्नोऽपि गिरेः कुलस्य
स्नेहस्तदेकायतनं जगाम॥५॥

प्रकाशिका

इतरबन्धुवर्गस्यापि प्रतिपत्तिमाह—

अङ्कादिति। यथा कादम्बर्यां—गन्धर्वाणामङ्कादङ्कं सञ्चरन्तीति। उदीरिताशीरिति यानसमयविशेषणम्। मण्डनाद् एकया कृतं मण्डनमनुभूयेत्यर्थः। मण्डिता सत्येव मण्डनमनुबभूवेत्यर्थः। संबन्धिनः पुत्रादयः, तैर्भिन्नो विभक्तः। कुलस्य ज्ञातिसङ्घस्य। तच्छब्देन देवी परामृश्यते। एकशब्दः प्रधानार्थः केवलार्थो वा। तत्कुलस्य पुत्रादिविभक्तः स्नेह एकौघीभूय तामेव जगामेवेत्युत्प्रेक्षागर्भेयमुक्तिः।।५।।

विवरणम्

अन्येषामपि बन्धुजनानां प्रतिपत्तिविशेषमाह—

अङ्कादिति। सा उदीरिताशीः अङ्काद् अङ्कं ययौ। सा पार्वती उदीरिता उच्चारिता आशिषः आशीर्वादा यस्यै तथाभूता सती। प्रयाणसमयविशेषणं चेदम्। अङ्कादुत्सङ्गाद् अङ्कमुत्सङ्गान्तरं ययौ गतवती। तां सर्वेऽप्यङ्कमारोप्याशीर्वादानुदीरयामासुरित्यर्थः। स्नेहातिशयद्योतकं चेदम्। अलङ्कारेऽपि स्नेहातिशयद्योतकं विशेषमाह—सा मण्डनान्मण्डनमन्वभुङ्क्त इति। एकैकया कृतं मण्डनमनुभूयान्याभिः कृतं मण्डनमनुबभूवेत्यर्थः। मण्डनमत्र बन्धुजनप्रीतिदायानामाभरणानामर्पणम्। बन्धुजनाः पूर्वमेव मण्डितामप्येनां पुनरपि स्नेहातिशयान्मण्डयामासुरित्यर्थः। किं बहुनेत्याह—गिरेः कुलस्य स्नेहः संबन्धिभिन्नः अपि तदेकायतनं जगाम। गिरेः कुलस्य ज्ञातिवर्गस्य स्नेहः वात्सल्यं सम्बन्धिभिः पुत्रादिभिः भिन्नः विभक्तोऽपि। तदेकायतनं, तच्छब्देनात्र देवी परामृश्यते। एकशब्दः प्रधानवाची केवलार्थो वा। आयतनं गृहम्। पार्वतीरूपमेकमेव गृहं जगाम। हिमवत्कुलजातानां स्नेहः पुत्रादिविभक्तोऽप्येकाकारेण तामेव प्राविशदिवेत्युत्प्रेक्षागर्भेयमुक्तिः।।५।।

मैत्रे मुहूर्ते शशलाञ्छनेन
योगं गतासूत्तरफल्गुनीषु।
तस्याः शरीरप्रतिकर्म चक्रु-
र्बन्धुस्त्रियो याः पतिपुत्रवत्यः।।६।।

प्रकाशिका

मैत्र इति। सूर्योदयात् तृतीयो मैत्रः। उत्तरफल्गुनीषूत्तराख्यासु तारासु। शरीरस्य प्रतिकर्म रोमादिशोधनम्। अत्र **सुबोधिनी**वचनं—'रोहिण्यैन्दवरेवतीश्वसनभं मूलानुराधा मघा हस्ताश्वोत्तराभत्रयं च शुभदं वैवाहिके कर्मणि' इति। पतिपुत्रवत्य इति मङ्गलार्थम्।।६।।

विवरणम्

अथ रोमानखशोधनाभ्यञ्जनस्नानवसनधारणादिकं क्रमेण वर्ण्यते। तत्र रोमादिशोधनमाह—

मैत्र इति। उत्तरफल्गुनीषु शशलाञ्छनेन योगं गतासु मैत्रे मुहूर्ते बन्धुस्त्रियः तस्याः शरीरप्रतिकर्म चक्रुः। उत्तरफल्गुनीसंज्ञासु तारासु। 'फल्गुनीप्रोष्ठपदानां च नक्षत्रे'(१.२.६०) इति बहुवचनम्। शशलाञ्छनेन चन्द्रेण योगं गतासु संयोगं प्राप्तासु। उत्तरफल्गुनीनक्षत्रस्य विवाहयोग्यत्वमुक्तं सुबोधिन्यां—'रोहिण्यैन्द्रवरेवतीश्वसनभं मूलानुराधा-मघा-हस्ताश्चोत्तरभत्रयं च शुभदं वैवाहिके कर्मणि' इति। तत्रोत्तरफल्गुन्या विशेषेण शुभदत्वमुक्तं गौतमेन—'विवाहे शुभदात्यन्तं तस्मादुत्तरफल्गुनी'ति। मैत्रे मित्रदेवत्ये। मुहूर्ते मुहूर्तशब्दो नाडिकाद्वयवाची।

> अष्टादश निमेषास्तु काष्ठा त्रिंशत् तु ताः कला।
> तास्तु त्रिंशत् क्षणस्ते तु मुहूर्तो द्वादशास्त्रियाम्।।
> ते तु त्रिंशदहोरात्रः

इति सिंहः। सूर्योदयादारभ्य तृतीयो मुहूर्तो मैत्रः। 'रौद्रः सार्पस्तथा मैत्रः' इत्यादिवचनात्। बन्धुभूताः स्त्रियः तस्याः शरीरस्य प्रतिकर्म रोमादिशोधनं चक्रुः। बन्धुस्त्रीष्वपि विशेषमाह—याः पतिपुत्रवत्यः इति। पतिः पुत्राश्च सन्त्यासां तास्तथा। मङ्गलक्रियासु तासामेवोचितत्वादित्थमुक्तम्।।६।।

सा गौरसिद्धार्थनिवेशवद्भि-
दूर्वाप्रवालैः प्रतिभिन्नशोभम्।
उन्नीविकौशेयमुपात्तबाण-
मभ्यङ्गनेपथ्यमलञ्चकार।।७।।

प्रकाशिका

सेति। गौरं धवलम्। निवेशो योगः। दूर्वायाः प्रवालैः पल्लवैः। प्रतिभिन्नं सञ्जातम्। उन्नीवि उद्गतनीविबन्धनं कौशेयं यत्र। अनेन पाणिग्रहणात् प्राक्तनः परिधानप्रकार उक्तः। यथा विद्धसालभञ्जिकायां—

> कन्येति सूचयति वेषविशेष एव यन्नीलचोलकवती लिखितात्र चित्रे।
> पाणिग्रहात् प्रभृति तु प्रमदाजनस्य नीवीनिवेशसुभगः परिधानमार्गः।।

इति। उपात्तबाणम्, अत्र मनुः—

> शरः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया।
> वासोदशा शूद्रया तु वर्णोत्कृष्टस्य वेदने।। (३.४४)

इति। देवेषु च परमेश्वर एक एव ब्राह्मणः। श्रुतिं चात्र प्रमाणयन्ति। तस्माद् वर्णोत्कृष्टस्य वेदनमत्रावसेयम्। अभ्यङ्गनेपथ्यम् अभ्यङ्गस्याङ्गभूतं प्रसाधनं, स्नानस्य वक्ष्यमाणत्वात्। अलञ्चकार प्रसाधनस्यापि प्रसाधनमभूदित्यर्थः।।७।।

विवरणम्

सेति। सा अभ्यङ्गनेपथ्यम् अलञ्चकार। अभ्यङ्गस्याङ्गभूतं नेपथ्यमाकल्पम्। 'आकल्पवेषौ नेपथ्यम्' इति सिंहः। अलञ्चकार अलङ्कृतवती। अभ्याङ्गार्थं कृतानां मङ्गलालङ्काराणामप्यलङ्कारतामनुबभूवेत्यर्थ। सर्वेषां हि मण्डनं शरीरशोभार्थम्। अस्यास्तु शरीरशोभायाः स्वाभाविकत्वाद् वैपरीत्यं जातमिति भावः। अत एव वक्ष्यति—'तां प्राङ्मुखीं तत्र निवेश्य तन्वीम्' (७.१३) इत्यादि। तानेव मङ्गलालङ्कारानाह विशेषणत्रयेण। तत्र शिरोलङ्कारमाह—'गौरसिद्धार्थनिवेशवद्भिः दूर्वाप्रवालैः प्रतिभिन्नशोभम्' इति। गौराणां धवलानां सिद्धार्थानां सर्षपाणां निवेशो योगो येषामस्तीति तथा, तैः। अत्र सिद्धार्थशब्दो यद्यपि धवलसर्षपवाची। 'सिद्धार्थस्त्वेष धवल' इत्यमरः। तथापि करिकलभन्यायाद् गौरशब्दोपादानं मङ्गलार्थम्। अत्यन्तधावल्यप्रतीतिश्च फलम्। दूर्वाप्रवालैः दूर्वापल्लवैः। प्रतिभिन्ना सञ्जाता शोभा यत्र तत् तथा। कटितटालङ्कारमाह—उन्नीविकौशेयमिति। उन्नीवि उद्गतनीवीबन्धं कौशेयं दुकूलं यत्र तत्। अनेन स्त्रीणां विवाहात् पूर्वं नीवीबन्धरहितः परिधानप्रकार उक्तः। यथोक्तं विद्धसालभञ्जिकायां—

> कन्येति सूचयति वेषविशेष एव यन्नीलचोलकवती लिखितात्र चित्रे।
> पाणिग्रहात् प्रभृति तु प्रमदाजनस्य नीवीविशेषसुभगः परिधानमार्गः।।

इति। हस्तालङ्कारमाह—उपात्तबाणमिति। उपात्तो धृतो बाणः शरो यत्र तत्। अत्र मनुः—

> शरः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया।
> वासोदशा शूद्रया तु वर्णोत्कृष्टस्य वेदने।।

इति। देवेषु परमेश्वर एक एव ब्राह्मण इति श्रुतिप्रसिद्धिरिति हिमवतः क्षत्रियत्वमनेन प्रतिपादितम्।।७।।

बभौ च सम्पर्कमुपेत्य बाला
विवाहदीक्षाविधिसायकेन।
करेण भानोर्बहुलावसाने
सन्धुक्ष्यमाणेव शशाङ्करेखा।।८।।

प्रकाशिका

बभाविति। बहुलावसाने पूर्वपक्षप्रतिपदीत्यर्थः। शशाङ्करेखा चन्द्रकला। यथोक्तं—'सौषुम्नेन त्वममृतपथेनैत्य शीतांशुभावम्' इति।।८।।

विवरणम्

बाणग्रहणमेव विशेषतो वर्णयति—

बभाविति। बाला विवाहदीक्षाविधिसायकेन सम्पर्कम् उपेत्य बभौ च। शशाङ्कलेखासाम्यसिद्ध्यर्थं बालेत्युक्तम्। विवाहदीक्षा विवाहोपनयनं, तस्य विधिर्विधानं, तदर्थेन सायकेन शरेण। सम्पर्कं संबन्धम् उपेत्य प्राप्य बभौ शुशुभे च। अत्र चकारेण 'अभ्यङ्गनेपथ्यमलञ्चकार' (७.७) इति पूर्वं यदुक्तं, तत्र बाणस्य विशेषं द्योतयति। विवाहदीक्षाविधिसायकेन तु सम्पर्कमुपेत्य बाला शुशुभे च, न केवलमलञ्चकारेत्यर्थः। अत्रोपमामाह—बहुलावसाने भानोः करेण सन्धुक्ष्यमाणा शशाङ्कलेखा एव इति। बहुलः कृष्णपक्षः। 'बहुलः कृष्णपक्षः स्यादि'ति भोजः। तस्य अवसाने समाप्तौ। पूर्वपक्षप्रतिपदीत्यर्थः। भानोः सूर्यस्य करेण किरणेन कर्तृभूतेन सन्धुक्ष्यमाणा सम्यग् वर्ध्यमाना। 'सन्धुक्षणं दीपने स्याद् वर्धने दहनेऽपि चे'ति **भोजः**। शशाङ्कलेखा चन्द्रकलेव। रविकरैरेव हि शशिकलावर्धनम्। तदुक्तं—

सलिलमये शशिनि रवेर्दीधितयो मूर्छितास्तमो नैशम्।
क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्यान्तः।।

इति।।८।।

ता लोध्रकल्केन हृताङ्गतैला-
माश्यानकालेयकृताङ्गरागाम्।
वासो वसानामभिषेकयोग्यं
नार्यश्चतुष्काभिमुखीमनैषुः।।९।।

प्रकाशिका

तामिति। आश्यानेति ईषदार्द्रयावककृताङ्गरागाम्। 'अथ यावकं कालेयकं चे'ति सिंहः। स्नानात् प्रागङ्गरागकरणं लोध्रकषायस्य रौक्ष्यं परिहर्तुम्। अभिषेकयोग्यं कार्पासादि। चतुष्कं चतुस्तम्भप्रतिष्ठितं मण्डपम्।।९।।

विवरणम्

स्नानोद्योगमाह—

तामिति। नार्यः तां चतुष्काभिमुखीम् अनैषुः। नार्यः स्नानाधिकृताः स्त्रियः। चतुष्कं चतुस्तम्भं मण्डपं, तदभिमुखीम्। अनैषुः स्नानमण्डपं प्रापयामासुरित्यर्थः। कीदृशीमित्यत्राह—लोध्रकल्केन हृताङ्गतैलामित्यादिना। लोध्रो वृक्षविशेषः, तस्य कल्केन। परिमृदितया त्वचेत्यर्थः। हृतमङ्गगतं तैलं यस्याः ताम्। तथा आश्यानकालेयकृताङ्गरागाम्। आश्यानेन ईषदार्द्रेण। 'आश्यानमीषदार्द्रे स्यादि'ति भोजः। कालेयेन जावकेन। 'अथ जावकम्। कालेयकं चे'त्यमरः। कृतो विहितः अङ्गरागो यस्याः ताम्। लोध्रकल्कस्य रौक्ष्यं परिहर्तुं स्नानात् प्राक्तनमिदमङ्गरागार्पणमित्यवसेयम्। पुनश्चाभिषेकयोग्यं वासः वसानाम्। अभिषेकः स्नानम्। कौशेयादिवाससामभिषेकयोग्यत्वाभावात् कृतकार्पासवसनपरिधानामित्यर्थः। तैलपरित्यागम्, अङ्गरागार्पणं, वासःपरिधानं च विजने प्रदेशे विधाय सतूर्यस्नानार्थं मण्डपमेनां तदधिकृताः स्त्रियः प्रापयामासुरित्यर्थः।।९।।

विन्यस्तवैडूर्यशिलातलेऽस्मि-
न्नाविद्धमुक्ताकृतभक्तिलेखे।
आवर्जिताष्टापदकुम्भतोयैः
सतूर्यमेनां स्नपयाम्बभूवुः॥१०॥

प्रकाशिका

विन्यस्तेति। आसनार्थन्यस्तवैडूर्यशिलापट्टे। आविद्धेति, सूत्रस्यूतमुक्तासम्पादितभक्तिरचने। अष्टापदं स्वर्णम्।।१०।।

विवरणम्

सतूर्यस्नानमेवाह—

विन्यस्तेति। ताः अस्मिन् आवर्जिताष्टापदकुम्भतोयैः एनां सतूर्यं स्नपयाम्बभूवुः। अस्मिन् चतुस्तम्भे मण्डपे। आवर्जितैः आस्त्रावितैःअष्टापदकुम्भतोयैः। अष्टापदं काञ्चनम्।

चामीकरं जातरूपं महारजतकाञ्चने।
रुक्मं कार्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियाम्।।

इत्यमरः। काञ्चनमये कुम्भे सम्भृतैस्तोयैरित्यर्थः। सतूर्यमिति स्नपनक्रियाविशेषणम्। तूर्यशब्दो वाद्यविशेषवाची। सवाद्यघोषमित्यर्थः। स्नापयाम्बभूवुः स्नानं कारितवत्यः। स्नातेर्मित्त्वाद्ध्रस्वः। इदंशब्दोक्तस्य चतुष्कस्य देवीस्नानयोग्यतां दर्शयति विशेषणद्वयेन। तत्रासनसौख्यमाह—विन्यस्तवैडूर्यशिलातले इति। वैडूर्य

विदूरदेशोद्भूतो रत्नविशेषः। विन्यस्तं वैदूर्यमयं शिलतलं शिलापट्टं यत्र तस्मिन्। अवस्थानसौख्यप्रदर्शनार्थं तलशब्दनिर्देशः। मण्डपस्य दर्शनीयत्वमाह—आविद्धमुक्ताकृतभक्तिलेखे इति। आविद्धाभिः सूत्रप्रोताभिः मुक्ताभिः मुक्ताफलैः कृता सम्पादिता भक्तिलेखा विन्यासविशेषरचना यत्र तस्मिन्। आबद्धमुक्ताफलभक्तिशोभे इति पाठे आबद्धैः सूत्रप्रोतैः भुक्ताफलैः कृतया भक्त्या विन्यासविच्छित्त्या शोभा यत्रेति विग्रहः। सूत्रप्रोतभक्तिरचनाचित्रे चतुस्तम्भमण्डपे वैदूर्यशिलायामासीनां तां काञ्चनकलशजलैः सतूर्यघोषं स्नापयामासुरित्यर्थः।।१०।।

सा मङ्गलस्नानविशुद्धगात्री
गृहीतवत्युद्गमनीयवस्त्रम्।
निवृत्तपर्जन्यजलाभिषेका
प्रफुल्लकाशा वसुधेव रेजे॥११॥

प्रकाशिका

सेति। विशुद्धमङ्गरागादिरहितम्। 'धौतमुद्गमनीयं स्यादि'ति **हलायुधः**।।११।।

विवरणम्

अथ कृतमङ्गलस्नानाया देव्या शोभां विशेषेण वर्णयति—

सेति। मङ्गलस्नानविशुद्धगात्री उद्गमनीयवस्त्रं गृहीतवती सा निवृत्तपर्जन्यजलाभिषेका प्रफुल्लकाशा वसुधा इव रेजे। मङ्गलार्थेन स्नानेन विशुद्धमङ्गरागादिरहितं गात्रं शरीरं यस्याः तथाभूता सती। पुनश्च उद्गमनीयवस्त्रं कारुधौतं वसनम्। 'धौतमुद्गमनीयं स्यादि'ति हलायुधः। गृहीतवती च सती। निवृत्तः उपरतः पर्जन्यजलाभिषेकः पर्जन्यजलैः मेघजलैः। 'पर्जन्यो रसदब्देन्द्रावि'त्यमरः। अभिषेकः परितः सेको यस्याः तथाभूता सती। पुनश्च शरदि प्रफुल्ला विकसितकुसुमाः काशास्तृणविशेषा यस्यां तथाभूता च सती। वसुधा भूमिरिव रेजे शुशुभे। मङ्गलस्नानेन संक्षालिताङ्गरागा गृहीतधवलवसना पार्वती वर्षजलसंक्षालितपङ्का शरदागमे विकसितकाशपरिष्कृता भूमिरिव रराजेत्यर्थः।।११।।

तस्मात् प्रदेशाच्च वितानवन्तं
युक्तं मणिस्तम्भचतुष्टयेन।
पतिव्रताभिः परिगृह्य निन्ये
क्लृप्तासनं कौतुकवेदिमध्यम्॥१२॥

प्रकाशिका

तस्मादिति। परिगृह्येत्यादरावधानादिद्योतकम्। कौतुकं प्रतिसरः, तद्बन्धार्था वेदिः कौतुकवेदिः।।१२।।

विवरणम्

अथ देव्या मङ्गलालङ्कारभवनप्रवेशप्रकारमाह—

तस्मादिति। सा पतिव्रताभिः परिगृह्य तस्मात् प्रदेशात् कौतुकवेदिमध्यं निन्ये च। परिगृह्य आदाय। सस्नेहबहुमानं निजकरैः परितः संस्पृश्येत्यर्थः। तस्मात् प्रदेशात् स्नानमण्डपात्। कौतुकं प्रतिसरः, तद्बन्धार्थं या वेदिः परिष्कृता भूमिः, तस्या मध्यं मध्यप्रदेशं निन्ये नीता। चकारः पूर्वोक्तस्नानादिसमुच्चयार्थः। अत्र कौतुकबन्धनमन्येषामपि मङ्गलालङ्काराणामुपलक्षणम्। स्नानानन्तरमन्तःपुरसुन्दरीभिरलङ्कारमण्डपं नीतेत्यर्थः। अलङ्कारमण्डपस्य रमणीयतां दर्शयति विशेषणत्रयेण। वितानवन्तम् आबद्धवितानमित्यर्थ। तथा मणिस्तम्भचतुष्टयेन युक्तं मणिमयानां रत्नमयानां स्तम्भानां चतुष्टयेन। सङ्ख्याया अवयवे तयप्। मणिमयैश्चतुर्भिः स्तम्भैरुपेतमित्यर्थः। तथा क्लृप्तासनं क्लृप्तं कल्पितमासनं यत्र तं तथा।।१२।।

तां प्राङ्मुखीं तत्र निवेश्य तन्वीं
क्षणं व्यलम्बन्त पुरो निषण्णाः।
भूतार्थशोभाह्रियमाणनेत्राः
प्रसाधने सन्निहितेऽपि नार्यः॥१३॥

प्रकाशिका

तामिति। प्राङ्मुखीमिति मङ्गलार्थम्। भूतार्थः सत्यार्थः। भूतार्थश्चासौ शोभा चेति समासः। स्वाभाविकशोभेत्यर्थः। प्रसाधने प्रसाधनसाधने। विवाहाङ्गतया प्रसाधनं कार्यम्। तस्मिंश्च कृते स्वाभाविकी कान्तिरपिधीयेत। तस्मात् प्रागेव प्रसाधनादेनां कान्तिमनुभवाम इति तासां विलम्बः।।१३।।

विवरणम्

देव्या मङ्गलालङ्कारप्रस्तावे विशेषमाह—

तामिति। नार्यः तां तन्वीं तत्र प्राङ्मुखीं निवेश्य प्रसाधने सन्निहितेऽपि पुरः निषण्णाः क्षणं व्यलम्बन्त। नार्यः अन्तःपुरस्त्रियः तत्र कौतुकवेदिमध्ये। प्राचि पूर्वभागे मुखं यस्याः तथाभूतां सतीं, निवेश्य अवस्थाप्य। अत्र प्राङ्मुखावस्थापनं

मङ्गलार्थं, 'मङ्गल्ये प्राङ्मुखो भवेदि'ति वचनात्। प्रसाधने प्रसाधनसाधन इत्यर्थः। प्रसाधनमलङ्कारः। सन्निहिते समीपस्थेऽपि। अपिशब्दो विलम्बसम्भावनां परिहरति। पुरः अग्रभाग एव निषण्णाः स्थिताः सत्यः। पुरोनिषण्णत्वमपि कालविलम्बाभावे हेतुः। क्षणं क्षणकालं, न तु चिरकालं, मुहूर्तातिक्रमभयादिति भावः। व्यलम्बन्त विलम्बनं कृतवत्यः प्रसाधयितुमिति शेषः। प्रसाधिकाः प्रसाधनसाधनेषु सन्निहितेष्वपि पुरोभाग एव निषण्णाः सत्यः प्रसाधनं कर्तुं क्षणमात्रं कालक्षेपं कृतवत्य इत्यर्थः। विलम्बे हेतुमाह—भूतार्थशोभाह्रियमाणनेत्रा इति। भूतार्थः परमार्थः। भूतार्थश्चासौ शोभा चेति भूतार्थशोभा। स्वाभाविकशोभेत्यर्थः। तया ह्रियमाणानि आह्रियमाणानि नेत्राणि यासां तास्तथा। अत्र पुरोनिषण्णत्वं नेत्रहरणेऽपि हेतुः। अवश्यं कर्तव्यं हि विवाहे प्रसाधनम्। कृते तु प्रसाधने बहुविधैराभरणाङ्गरागादिभिरस्याः स्वाभाविकी कान्तिः पिहिता भवेत्। तस्मात् प्रसाधनात् पूर्वमेवास्याः स्वाभाविकीं कान्तिं क्षणमात्रमनुभवाम इति मत्वा व्यलम्बन्तेत्यर्थः। नेत्रहरणमेव वा विलम्बे हेतुः।।१३।।

धूपोष्मणा त्याजितमार्द्रभावं
केशान्तमन्तःकुसुमं तदीयम्।
पर्याक्षिपत् काचिदुदारबन्धं
दूर्वावता पाण्डुमधूकदाम्ना।।१४।।

प्रकाशिका

धूपोष्मणेति। अन्तशब्दः स्वरूपवचनः। अन्तःकुसुमं, कृत्वेत्यर्थः। पर्याक्षिपद् वेष्टयामास। उदारो विदग्धो बन्धो बन्धप्रकारो यस्य। पाण्डुशब्दः परभागद्योतकः। 'मधुमतीरोषधीरिति मधूकानि बध्नातीति **शम्बिल्य**गृह्यवचनान्मधूकधारणम्।।१४।।

विवरणम्

अथ मुहुर्तातिक्रमत्वरया तासां प्रसाधनोद्योगमाह—

धूपोष्मणेति। काचित् तदीयं केशान्तं दूर्वावता पाण्डुमधूकदाम्ना पर्याक्षिपत्। काचित् काचन प्रसाधिका तदीयं पार्वतीसम्बद्धम्। केशान्तम्, अन्तशब्दोऽयं स्वरूपवाची। 'अन्तः स्वरूपे पर्यन्ते मृत्यौ मध्यावसानयोः' इति **भोजः**। केशस्वरूपमित्यर्थः। दूर्वावता दूर्वायुक्तेन पाण्डुना श्वेतवर्णेन मधूकदाम्ना मधूकपुष्पनिबद्धेन दाम्ना मालया। अत्र मधूकशब्देनैव पाण्डुत्वे सिद्धेऽपि परभागद्योतनार्थमुपादानम्। पर्याक्षिपद् वेष्टयामास। प्रसाधिकासु काचित् पार्वत्याः

केशं दूर्वाङ्कुरानुविद्धया मधूककुसुममालया बन्धयामासेत्यर्थः। 'मधूकानि बध्नाती'ति शाम्बल्यगृह्यवचनादत्र मधूकधारणमुक्तम्। स्नातोत्तीर्णाया देव्याः केशानामार्द्रत्वादार्द्राणां च बन्धनानर्हत्वादार्द्रतात्यागप्रकारवचनेन केशान्तं विशिनष्टि—धूपोष्मणा आर्द्रभावं त्याजितमिति। अगुरुचन्दनादिभिः संस्कृतो धूमो धूपः, तस्योष्मणा औष्ण्येन करणभूतेन आर्द्रभावम् आर्द्रत्वं कर्म त्याजितं हापितमित्यर्थः। प्रसाधिकाजनेनेति शेषः। आर्द्रभावस्य धूपोष्मणा परित्यागः सौरभ्यातिशयार्थः। सौरभ्यातिशयोत्पादनप्रकारमाह—अन्तःकुसुममिति। अन्तर्भागे कुसुमानि पुष्पाणि यस्य तम्। दर्शनमात्रेऽपि मनोहरत्वमाह—उदारबन्धमिति। उदारः उत्कृष्टः बन्धः बन्धनप्रकारो यस्य तं तथा।।१४।।

प्रसन्नशुक्लागुरु चक्रुरङ्गं
गोरोचनापत्रविभक्तमस्याः।
सा चक्रवाकाङ्कितसैकताया-
स्त्रिस्रोतसः कान्तिमतीत्य तस्थौ।।१५।।

प्रकाशिका

प्रसन्नेति। प्रसन्नं स्वच्छम्। गोरोचनापत्रैः विभक्तम्। विभक्तसर्वाङ्गीणशुक्लागुरुविन्यासमित्यर्थः। तस्थौ, कक्ष्यान्तर इति शेषः।।१५।।

विवरणम्

अङ्गरागार्पणप्रकारमाह—

प्रसन्नेति। ताः प्रसन्नशुक्लागुरु अस्याः अङ्गं गोरोचनापत्रविभक्तं चक्रुः। प्रसन्नः स्वच्छः। शुक्लगुरुरगुरुविशेषः। अत्र शुक्लागुरुशब्देन तत्कृतमङ्गरागं लक्ष्यते। प्रसन्नं शुक्लागुरुकृतमङ्गरागं यत्र तादृशम् अस्या अङ्गं गोरोचनानिर्मितेन पत्रेण पत्रभङ्गेन विभक्तं कृतविभागं चक्रुः। स्वच्छतरशुक्लागुरुनिर्मिताङ्गरागं तदङ्गं रक्ततरगोरोचनापत्रविभक्तं चक्रुरित्यर्थः। तथाभूताया देव्याः कान्तिविशेषमाह—सा चक्रवाकाङ्कितसैकतायाः त्रिस्रोतसः कान्तिम् अतीत्य तस्थौ इति। सा रक्तगोरोचनाविभक्तशुक्लाङ्गरागा। चक्रवाकैः सुवर्णवर्णैः पक्षिविशेषैः अङ्कितं चिह्नितं सैकतं पुलिनं यस्याः तस्याः त्रिस्रोतसः गङ्गायाः कान्ति शोभाम् अतीत्य अतिक्रम्य तस्थौ। उत्कृष्टे कक्ष्यान्तरे इति शेषः। रक्ततरचक्रवाकाङ्कितसैकतायाः स्वत एव शुक्लतरायास्त्रिस्रोतसः कान्तिमधश्चकारेत्यर्थः।।१५।।

लीनद्विरेफं परिभूय पद्मं
समेघलेशं शशिनश्च बिम्बम्।
तदाननश्रीरलकैः प्रसिद्धै-
श्चिच्छेद सादृश्यकथाप्रसङ्गम्॥१६॥

प्रकाशिका

लीनेति। प्रसिद्धैश्चूर्णाद्यलङ्कृतैः। प्रसङ्गः प्रस्ताव। सम्भावितसादृश्ययोरनयोः परिभवादेव तदाननस्यान्यसादृश्यं न सम्भाव्यमित्यर्थः।।१६।।

विवरणम्

अलकसंस्कारं भङ्ग्यन्तरेणाह—

लीनेति। तदाननश्रीः प्रसिद्धैः अलकैः लीनद्विरेफं पद्मं समेघलेशं शशिनः बिम्बं च परिभूय सादृश्यकथाप्रसङ्गं चिच्छेद। तस्याः पार्वत्याः आननस्य मुखस्य श्रीः शोभा। 'श्रीरिन्दिरायां शोभायामि'त्यमरः। प्रसिद्धैः भूषितैः। 'प्रसिद्धौ ख्यातभूषितावि'त्यमरः। कुसुमचूर्णादिसंस्कृतैरलकैरित्यर्थः। लीनोऽधिष्ठितः द्विरेफः भृङ्गो यत्र तादृशं पद्मं पङ्कजं च परिभूय विजित्य। मेघस्य लेखेन खण्डेन सहितं समेघलेखं शशिनश्चन्द्रस्य बिम्बं च परिभूय। सादृश्यस्य कथा सादृश्यकथा, तस्याः प्रसङ्गं प्रस्तावं चिच्छेद दूरतो निराचकार। लीनद्विरेफस्य पद्मस्य समेघलेखस्य चन्द्रबिम्बस्य च लोके तादृशतदाननसादृश्यवार्तायाः सम्भावितत्वात् तयोरनायासेनैव परिभवाच्च सादृश्यवार्तायाः प्रसङ्गोऽपि नाभूदित्यर्थः।।१६।।

कर्णार्पितो लोध्रकषायरूक्षे
गोरोचनाभेदनितान्तगौरे।
तस्याः कपोले परभागलाभाद्
बबन्ध चक्षूंषि यवप्ररोहः॥१७॥

प्रकाशिका

कर्णेति। रूप इति केचित् पठन्ति। लोध्रकषायेण रूपो रूषणं यस्य। भेदः सम्भेदः। गौरं पीतम्। 'परभागो गुणोत्कर्ष'' इति यादवः। प्ररोहोऽङ्कुरः।।१७।।

विवरणम्

मङ्गलार्थं यवाङ्कुरकर्णावतंसार्पणमाह—

कर्णेति। कर्णार्पितः यवप्ररोहः तस्याः कपोले परभागलाभात् चक्षूंषि बबन्ध। कर्णयोरर्पितः कर्णावतंसत्वेन न्यस्तः यवस्य दीर्घशूकस्य प्ररोहोऽङ्कुरः कपोले गण्डप्रदेशयोः परभागस्य गुणोत्कर्षस्य लाभात् सिद्धेः। 'परभागे गुणोत्कर्ष' इति **यादवः**। चक्षूंषि नयनानि। द्रष्टॄणामिति शेषः। बबन्ध कपोलयोरेव निबद्धमकरोत्। देव्याः कर्णार्पितः कपोलयोर्लम्बमानो यवाङ्कुरो नृणां चक्षुषां गण्डप्रदेशादितरप्रदेशगमनं नानुमनुते स्मेत्यर्थः। परभागलाभमेव प्रदर्शयति विशेषणद्वयेन। लोध्रकषायरूक्षे लोध्रकषायेण लोध्रपङ्केन रूक्षे अत्यन्तधवलत्वाद् दुर्निरीक्षे। मनोहर इत्यर्थः। लोध्रकषायरूप इति वा पाठः। लोध्रकषायेण रूषो रूषणं यस्य तस्मिन्। लोध्रकषायसम्पृक्त इत्यर्थः। तथा गोरोचनाभेदनितान्तगौरे गोरोचनाया भेदः सम्मेदः, तेन नितान्तगौरे अत्यन्तपीते। गोरोचनापत्रनितान्तगौर इति वा पाठः। तादृशे कपोले लम्बमानस्य यवप्ररोहस्य सकलजननेत्रहरणे कः प्रयास इति भावः।।१७।।

रेखाविभक्तः सुविभक्तगात्र्याः
किञ्चिन्मधूच्छिष्टविमृष्टरागः।
कामप्यभिख्यां स्फुरितैरपुष्य-
दासन्नलावण्यफलोऽधरोष्ठः॥१८॥

प्रकाशिका

रेखेति। रेखाकारेण विभक्तसन्निवेश इत्यर्थः। मधूच्छिष्टं सिक्थकं, तेन किञ्चिद्विमृष्टो विशोधितो रागो यस्य। अत्र वात्स्यायनवचनं—'सक्थकमलक्तकं चौष्ठयोर्दत्त्वे'ति। तच्च **जयमङ्गलायां** व्याख्यातम्—'अलक्तकपिण्डेनोत्पिष्यौष्ठौ ताम्बूलमुपयुज्य सिक्थगुलिकया ताडयेदित्यर्थ क्रम' इति। कामप्यनिर्वचनीयाम्। अभिख्यां शोभाम्। स्फुरितैः प्रियतमभावनाजनितैः स्फुरणैरित्यर्थ। आसन्नं लावण्यस्य फलं प्रियोपभोगलक्षणं यस्य। तथाविधस्य स्फुरितं शोभत एवेति भावः।।१८।।

विवरणम्

अधराभरणं वर्णयति—

रेखेति। सुविभक्तगात्र्याः अधरोष्ठः स्फुरितैः कामपि अभिख्याम् अपुष्यत्। सुविभक्तं सम्यग्विभक्तं गात्रं शरीरं यस्याः तस्याः। अनेन स्वाभाविकी कान्तिरुक्ता। सा च 'वपुर्विभक्तं नवयौवनेन'(१.३१)इत्यत्र दर्शिता। अधरश्चासावोष्ठश्चेत्यधरोष्ठः। स्फुरितैः स्फुरणैः। प्रियतमभावनाजनितैरिति शेषः। भावनासन्निहित-

प्रयितमदर्शनसञ्जातैः सात्त्विकविकाररूपैरधरस्फुरणैरित्यर्थः। कामप्यनिर्वचनीयाम् अभिख्यां शोभाम्। 'शोभाभिख्या कान्तिरि'त्यमरः। अपुष्यत् प्रापदित्यर्थः। अधरोष्ठस्यापि स्वाभाविकीं कान्तिमाह—रेखाविभक्त इति। रेखाकारेण विभक्तः कृतविभागः। रेखाकारेण विभक्तसन्निवेश इत्यर्थः। संस्कारविशेषजां कान्तिमाह—किञ्चिन्मधूच्छिष्टविमृष्टराग इति। मधूच्छिष्टं सिक्थकं, तेन किञ्चिद्विमृष्टो विशोधितो रागो लाक्षादिरागो यस्य स तथा। यथोक्तमधरसंस्कारप्रकरणे वात्स्यायनेन—'सिक्थकमलक्तकं चौष्ठयोर्दत्त्वे'ति। तच्च **जयमङ्गलाकारेण** व्याख्यातम्—'आदावोष्ठमलक्तपिण्डेनोत्पिष्य पुनश्च ताम्बूलमुपयुज्य सिक्थकगुलिकया शनैश्शनैस्ताडयेदि'ति। प्रियतमभावनाजनितमधरस्फुरणमपि तदानीं शोभावहमासीदित्याह—आसन्नलावण्यफल इति। आसन्नं प्रत्यासन्नं लावण्यस्य प्रियोपभोगलक्षणं फलं यस्य। अत्यन्तप्रत्यासन्नं हि देव्या अधरस्य प्रियतमोपभोगलक्षणं फलमिति तादृशं स्फुरणं तदानीं शोभत एवेति भावः।।१८।।

पत्युः शिरश्चन्द्रकलामनेन
स्पृशेति सख्या परिहासपूर्वम्।
सा रञ्जयित्वा चरणौ कृताशी-
र्माल्येन तां निर्वचनं जघान॥१९॥

प्रकाशिका

पत्युरिति। अस्य **भोजेन** व्याख्यानं कृतम्—अनेन रागेण। रञ्जयित्वेति वचनाद् रञ्जनसाधनं लाक्षादिरागो गृह्यते। चरणपरामर्शे त्वाभ्यामिति भवितव्यमिति। अभिनवगुप्तयोजना तु—अनेनेति अलक्तकोपरक्तस्य चन्द्रमसि परभागलाभः। अनवरतपादपतनप्रसादनैर्विना न पत्युर्झटिति यथेष्टानुवर्तिन्या भवितव्यमिति चोपदेशः। शिरोधृता च या चन्द्रकला, तामपि परिभवेति सपत्नीलोकापजय उक्तः। निर्वचनमित्यनेन लज्जावहित्थहर्षेर्ष्यासाध्वससौभाग्याभिमानप्रभृति यद्यपि ध्वन्यते, तथापि तद् निर्वचनशब्दार्थस्य कुमारीजनोचितस्याप्रतिपत्तिलक्षणस्यार्थस्योपस्कार(क)तां केवलमाचरति। उपस्कृतस्त्वर्थः शृङ्गाराङ्गतामेतीति। माल्येन करधृतेन लीलारविन्देनेत्यर्थः।।१९।।

विवरणम्

पादयोरलक्तकरसार्पणं भङ्ग्यन्तरेणाह—

पत्युरिति। चरणौ रञ्जयित्वा अनेन पत्युः शिरश्चन्द्रकलां स्पृश इति परिहासपूर्वं सख्या कृताशीः सा तां माल्येन निर्वचनं जघान। चरणौ पादौ

रञ्जयित्वा अलक्तकरसेन रागयुक्तौ कृत्वा। अनेनेति समनन्तररञ्जितो वामचरणो गृह्यते। अलक्तोपरक्तस्य पादस्य श्वेतांशुकलायां परभागलाभश्च भविष्यति। पत्युर्भविष्यतः शिरसि या चन्द्रकला तां स्पृश। अपराधप्रशमनार्थे पादप्रणामे सरोषं संस्पृशेत्यर्थः। इतिशब्दः पूर्वोक्तप्रकारवाची। परिहासपूर्वमित्याशीर्वादक्रियाविशेषणम्। परिहासः पूर्वं यथा भवति तथा। कृताशीः कृता विहिता आशीः आशीर्वादो यस्यै सा पार्वती तां सखीं माल्येन कुसुमेन। करधृतेन लीलाकमलेनेत्यर्थः। जघान ताडनं कृतवती। अत्र 'पत्युश्शिरश्चन्द्रकलां स्पृशे'त्यनेन पादप्रणामचाटुशतवचनादिभिर्विना न झटिति भर्तृवशवर्तिनी भवेत्युपदेशः सूचितः। शिरसि वर्तमानां चन्द्रकलां प्रत्यपि परिभवमाचर, किं पुनः सपत्नीजनं प्रतीति च ध्वन्यते। अत्र निर्वचनशब्दः कुमारीजनोचितमप्रतिपत्तिलक्षणमर्थमेव साक्षात् प्रतिपादयति। लज्जावहित्थहर्षेर्ष्यासाध्वससौभाग्याभिमानप्रभृतयस्तु ध्वन्यमाना अप्यप्रतिपत्तिलक्षणस्यार्थस्य शोभामावहन्ति।।१९।।

तस्याः सुजातोत्पलपत्रकान्ते
प्रसाधिकाभिर्नयने समीक्ष्य।
न चक्षुषोः कान्तिविशेषबुद्ध्या
कालाञ्जनं मङ्गलमित्युपात्तम्।।२०।।

प्रकाशिका

तस्या इति। सुजातेति सुष्ठुजातत्वेन समग्रगुणत्वं लक्ष्यते। इतिर्हेतौ मननगर्भः। एवं बुद्ध्वेत्यर्थः। उपात्तं प्रसाधनमुपयोजितम्। कान्तिविशेषबुद्ध्या अस्मिन् निक्षिप्ते चक्षुषोः कान्तिविशेषः स्यादिति बुद्ध्या।।२०।।

विवरणम्

देव्या नयनप्रसाधने विशेषमाह—

तस्या इति। प्रसाधिकाभिः तस्याः सुजातोत्पलपत्रकान्ते नयने समीक्ष्य कालाञ्जनं मङ्गलम् इत्युपात्तम्। प्रसाधिकाभिः अलङ्कारकर्त्रीभिः। सुजातस्य सुष्ठु जातस्य समीचीनपङ्कजलसम्पर्कादिवशाज्जातस्य। अनेन समग्रगुणत्वं लक्ष्यते। सुन्दरस्येत्यर्थः। उत्पलस्य कुवलयस्य पत्रवद् दलवत् कान्ते मनोहरे। अतीव कृष्णे दीर्घे चेत्यर्थः। नयने नेत्रे समीक्ष्य सम्यगवलोक्य। कालाञ्जनं कृष्णवर्णमञ्जनम्। अथवा कालाञ्जनं दीपमषी। **'कालाञ्जनं दीपमषी कज्जलमि'ति भोजः**। इतिशब्दो हेतौ। मननगर्भश्चायं निर्देशः। मङ्गलमिति बुद्ध्वेत्यर्थः। उपात्तं प्रसाधने

उपयोजितमिति यावत्। प्रसाधिका देव्याः कुवलयदलमनोज्ञं नयनद्वयमवलोक्य मङ्गलारम्भेष्ववश्यकर्तव्यमेतदिति बुद्ध्वैव तस्मिन्नञ्जनमर्पयामासुरित्यर्थः। एतदेव स्फुटयति—चक्षुषोः कान्तिविशेषबुद्ध्या न इति। अस्मिन्नर्पिते चक्षुषोः कान्तिविशेषो भविष्यतीति बुद्ध्या न, केवलया मङ्गलबुद्ध्यैवेत्यर्थः।।२०।।

सा सम्भवद्भिः कुसुमैर्लतेव
ज्योतिर्भिरुद्यद्भिरिव त्रियामा।
सरिद् विहङ्गैरिव लीयमानै-
रामुच्यमानाभरणा चकाशे॥२१॥

प्रकाशिका

सेति। सम्भवद्भिः प्रादुर्भवद्भिः। अत्रामुच्यमानेष्वाभरणेषु प्रथमं शरीरस्यैवेदं किञ्चिदुज्ज्वलमवयवजातमुन्मिषतीति द्रष्टॄणां प्रतीतिः, ततोऽन्यत्वावगमे प्रतिबन्धापगमसमुन्मिषदनाहार्यपदार्थबुद्धिः, ततश्च सम्यग्विचारे त्वाहार्यबुद्धिरिति क्रमादुपमानत्रयेण द्योत्यते। अत्राभरणानां समास उपसर्जनीभावो न हृदयहारी। आभरणैरिति तु युक्तम्।।२१।।

विवरणम्

इत्थमङ्गरागार्पणप्रकारमुक्त्वा हाराद्याभरणार्पणप्रकारमाह—

सेति। आमुच्यमानाभरणा सा चकाशे। आमुच्यमानानि अर्प्यमाणानि आभरणानि यस्यां तथाभूता। सा पार्वती चकाशे शोभते स्म। अत्रोपमात्रयमाह—सम्भवद्भिरित्यादिना। लता सम्भवद्भिः कुसुमैः इव। लता मालत्यादिका सम्भवद्भिः प्रादुर्भवद्भिः कुसुमैः पुष्पैरिव। अनेनोपमानेन देव्याः शरीरस्यैवैतान्युज्ज्वलतराण्यवयवान्तराणि कानिचित् कालवशात् समुन्मिषन्तीति सहृदयानां प्रतीतिर्द्योत्यते। पुनश्च विचारदशायामाभरणानामवयवेभ्यो भेदावगमे सति प्रतिबन्धापगमप्रकाश्याः केचित् सहजा एवैते पदार्था इति प्रतीतिरुत्पन्ना। तदनुसारेण द्वितीयामुपमामाह—त्रियामा उद्यद्भिः ज्योतिर्भिः इव इति। त्रियामा रात्रिः उद्यद्भिः सूर्यालोकप्रतिबन्धापगमे सति प्रकाशमानैः ज्योतिर्भिः नक्षत्रादिभिरिव। ततश्च सम्यग्विचारे सति आभरणेष्वर्पणामोचनयोग्यपदार्थत्वावधारणमेव सञ्जातमिति तदनुसारेण तृतीयामुपमामाह—सरित् लीयमानैः विहङ्गैः इव इति। सरिन्नदी लीयमानैः वर्षापगमादिवेलायामवतरद्भिः विहङ्गैः हंसादिभिरिव। अनेनोपमानत्रयक्रमप्रदर्शनेन देवीशरीरावयवानामाभरणानां च परस्परसङ्गमयोग्यता दर्शिता।

अत्रामुच्यमानाभरणेत्याभरणानां समासे उपसर्जनीभावो न सहृदयहृदयाह्लादकारी। आमुच्यमानैराभरणैरित्येव वक्तव्यमिति केचिन्मन्यन्ते। तन्मन्दम्। उपसर्जनीभावेऽपि महाकविप्रयोगरसवशात् पृथक्प्रयोगफलसिद्धेः।।२१।।

आत्मानमालोक्य च शोभमान-
मादर्शबिम्बे स्तिमितायताक्षी।
हरोपयाने त्वरिता बभूव
स्त्रीणां प्रियालोकफलो हि वेषः॥२२॥

प्रकाशिका

आत्मानमिति। अक्ष्णोः स्तिमितत्वं प्रियागमनचिन्तया। त्वरिता उत्सुका।।२२।।

विवरणम्

इत्थं विहितानामलङ्काराणां फलमाह—

आत्मानमिति। सा आदर्शबिम्बे शोभमानम् आत्मानम् आलोक्य हरोपयाने त्वरिता बभूव च। आदर्शबिम्बे दर्पणतले शोभमानं स्वाभाविकेन सौन्दर्येण अलङ्कारजनितया कान्त्या च दीप्यमानम् आत्मानं स्वदेहम् आलोक्य दृष्ट्वा हरस्य परमेश्वरस्य उपयाने समीपप्राप्तौ त्वरिता उत्सुका बभूव सञ्जाता च। अत्र चकारेण हरोषयानौत्सुक्यस्य शोभमानात्मस्वरूपदर्शनसमकालीनत्वं द्योत्यते। हृदयगता हरोपयानाकाङ्क्षा नयनद्वये प्रकटाभूदित्याह—स्तिमितायताक्षीति। स्तिमिते प्रियागमनचिन्तया निश्चले। सावधानध्याने हि निश्चलं नयनं भवति। यथोक्तं रघुवंशे—'ध्यानस्तिमितलोचन' (१.७३) इति। आयते स्वत एवायते दीर्घे च अक्षिणी यस्याः। आयते सन्तोषवशात् प्रसारिते इति माधवः। उक्तमर्थमर्थान्तरन्यासेन समर्थयते—स्त्रीणां वेषः प्रियालोकफलः हि इति। स्त्रीणां वेषः अलङ्कारः। प्रियालोकफलः प्रियस्यालोक एव फलं यस्य स तथा। हिशब्दः प्रसिद्धौ। प्रियकर्तृकमवलोकनमेव हि स्त्रीणामलङ्कारस्य फलम्।।२२।।

अथाङ्गुलिभ्यां हरितालमार्द्रं
मङ्गल्यमादाय मनश्शिलां च।
कर्णावसक्तामलदन्तपत्रं
माता तदीयं मुखमुन्निनाय॥२३॥

प्रकाशिका

अथेति। तस्या मुखं माता कर्णावसक्तामलदन्तपत्रं कृत्वा दक्षिणहस्ताङ्गुलिभ्यां हरितालकल्कं मनश्शिलाकल्कं चादाय वामहस्तेन चिबुके गृहीत्वोन्नामितवतीत्यर्थः।।२३।।

विवरणम्

अथ देवीमात्रा मेनयैवावश्यकर्तव्यं मङ्गलालङ्कारविशेषं वर्णयति त्रिभिः श्लोकैः। तत्रानन्तरश्लोके वक्ष्यमाणस्य विवाहदीक्षातिलकविधानस्याङ्गभूतं मुखोन्नयनमाह—

अथेति। अथ माता तदीयं मुखं कर्णावसक्तामलदन्तपत्रं मङ्गल्यम् आर्द्रं हरितालं मनःशिलां च अङ्गुलिभ्यामादाय उन्निनाय। अथ प्रसाधिकाकर्तृकप्रसाधनानन्तरं माता मेना तदीयं देवीसम्बन्धि मुखं कर्णयोरवसक्ते स्थिते अमले निर्मले दन्तपत्रे गजदन्तनिर्मितकर्णावतंसविशेषौ यस्य तथाविधम्। कृत्वेति शेषः। पुनश्च मङ्गल्यं मङ्गलप्रयोजनम् आर्द्रं जलसम्बन्धादार्द्रतां प्राप्तं हरितालं हरितालकल्कं मनःशिलां मनःशिलाकल्कं च अङ्गुलिभ्यामादाय गृहीत्वा उन्निनाय चिबुके गृहीत्वोन्नामितवती। हरितालमनश्शिलाभ्यां तिलकं विधातुमिति शेषः। प्रसाधिकाजनकर्तव्यप्रसाधनसमाप्त्यनन्तरं मेना स्वयमेव देव्या वदनमादौ कर्णावसक्तामलदन्तपत्रं कृत्वा दक्षिणहस्ताङ्गुलिभ्यामार्द्रं हरितालं मनश्शिलां चादाय चिबुके गृहीत्वा तिलकविधानार्थं मुखमुन्नमय्य मुखदर्शनकुतूहलात् किञ्चित्कालं तूष्णीमेव स्थितवतीत्यर्थः। अत एवोन्नयनमात्रे वाक्यसमाप्तिः, न पुनरुन्नीय तिलकं चकारेत्यत्र।।२३।।

उमास्तनोद्भेदमनु प्रवृद्धो
मनोरथो यः प्रथमं बभूव।
तमेव मेना दुहितुः कथञ्चिद्
विवाहदीक्षातिलकं चकार॥२४॥

प्रकाशिका

किमर्थमुन्नामनमित्याह—

उमेति। अनुर्लक्षणे। उमास्तनोद्भेदकालादारभ्येत्यर्थः। मनोरथो मनोरथविषयः। एवशब्देन इत्थं करिष्यामीति यत्प्रकारविशिष्टोऽभिलषितः, तत्प्रकारमेव तिलकं कृतवतीति द्योत्यते। कथञ्चिदिति दुश्चरतपश्चर्यादिकृच्छ्रमनुसन्धत्ते। अथ च प्रहर्षपरवशत्वात् कथञ्चित्। विवाहदीक्षातिलकं दुहितुः कदा करिष्यामीति यो भर्तृवाल्लभ्यादिभ्यः प्रथमं मनोरथभूमिस्तिलक आसीत्, तमेव मेना कथञ्चिच्च-

कारेत्यर्थः। अत्र तथाविधस्य मुखोन्नयनस्य तिलककरणाङ्गत्वेऽप्यनयोः पद्ययोरेकवाक्यत्वं न कृतं मुखमुन्नीय तिलकं चकारेति। तच्च तन्मुखावलोकनकुतूहलिन्यास्तस्यास्तदुन्नयन एवेक्षणं विश्राम्यतीति द्योतयितुम्। यः प्रथमम् उमस्तनोद्भेदमनु प्रवृद्धो मनोरथो बभूव, मेना दुहितुस्तमेव विवाहदीक्षातिलकं कथञ्चिच्चकारेत्यन्वयः।।२४।।

विवरणम्

अथ मुखोन्नयनस्य प्रधानकार्यभूतं तिलकविधानमाह—

उमेति। यः प्रथमः उमास्तनोद्भेदम् अनु प्रवृद्धः मनोरथः बभूव, मेना दुहितुः तमेव विवाहदीक्षातिलकं कथञ्चिच्चकार। यः विवाहदीक्षातिलकः प्रथमः आदिमः। भर्तृवल्लभत्वगर्भधारणपुत्रजन्मादीनामपि मनोरथविषयत्वात् तद्व्यावृत्त्यर्थं प्रथमशब्दोपादानम्। उमायाः पार्वत्याः स्तनयोः कुचयोः उद्भेदमुद्गमनम्। अनुर्लक्षणे। प्रवृद्धः प्रकर्षेण सम्पूर्णः। उमास्तनोद्भेदं लक्षीकृत्य प्रवृद्धः, उमास्तनोद्भेदकालादारभ्य क्रमेण प्रवृद्ध इति यावत्। मनोरथः मनोरथविषयो बभूव। दुहितुः आत्मनः पुत्र्याः। तं विवाहदीक्षातिलकमेव। विवाहदीक्षा विवाहोपनयनं तदर्थस्तिलको विवाहदीक्षातिलकः, तम्। कथञ्चित् प्रहर्षपरवशत्वेन हस्तनेत्राणां सम्यक्प्रवृत्त्यभावेऽपि यथाकथञ्चिच्चकारेत्यर्थः। तिष्ठन्तु तावद् भर्तृवल्लभत्वादयः, मम पुत्र्या विवाहदीक्षातिलकमेवाहं कदात्र करिष्यामीति यो विवाहदीक्षातिलकः प्रथमो मनोरथविषयो बभूव, तमेव विवाहदीक्षातिलकं मेना कथञ्चिच्चकारेत्यर्थः। अथवा अहं कदा नु दुहितरमनुरूपाय वराय दातुं विवाहदीक्षातिलकं करिष्यामीति यत्प्रकारविशिष्टो मनोरथः प्रथममासीत्, पुत्र्या विहितं दुश्चरतपश्चर्यादिकृच्छ्रमनुभूयापि मेना तत्प्रकारविशिष्टमेव विवाहदीक्षातिलकं कथञ्चिच्चकारेत्यर्थः।।२४।।

बबन्ध चास्राकुलदृष्टिरस्याः
स्थानान्तरे कल्पितसन्निवेशम्।
ध्यात्र्यङ्गुलीभिः प्रतिसार्यमाण-
मूर्णामयं कौतुकहस्तसूत्रम्॥२५॥

प्रकाशिका

(प्रकाशिकाया अत्राऽभावः)

विवरणम्

कौतुकबन्धनमाह—

बबन्धेति। सा अस्या ऊर्णामयं कौतुकहस्तसूत्रं बबन्ध च। ऊर्णामयम् ऊर्णातन्तुनिर्मितं विवाहमङ्गलार्थं बन्धनीयं कौतुकाभिधानं हस्तसूत्रम्। बबन्ध च। चकारस्तिलकविधानसमुच्चयार्थः। कौतुकबन्धने स्नेहपारवश्यं दर्शयति— अस्राकुलदृष्टिरिति। अस्रेणानन्दाश्रुणा आकुले परवशे दृष्टी नेत्रे यस्याः सा तथा। अत एव स्थानान्तरे कल्पितसन्निवेशम्। स्थानान्तरे विहितस्थानादन्यत्र कल्पितः कृतः सन्निवेशः अवस्थानं यस्य तत्। अत एव धात्र्या अङ्गुलीभिः प्रतिसार्यमाणम्। धात्र्या उपमात्रा अङ्गुलीभिः प्रतिसार्यमाणं बन्धनोचितस्थानमेव नीयमानम्। हर्षपरवशत्वाद् आनन्दाश्रुभिराकुलदृष्टित्वाच्च मेनया स्थानान्तरे बन्धुमारब्धं कौतुकमुपमाता स्वस्थान एव तया बन्धयामासेत्यर्थः।।२५।।

क्षीरोदवेलेव सफेनपुञ्जा
पर्याप्तचन्द्रेव शरत्त्रियामा।
नवं नवक्षौमनिवासिनी सा
भूयो बभौ दर्पणमादधाना॥२६॥

प्रकाशिका

क्षीरोदेति। वेला समुद्र[तटं,फेनं]जलविकृतिः। पर्याप्तः पूर्णः। भूयो बहुतरम्। अत्र शुक्लाङ्गरागायास्तस्या नवक्षौमनिवसनत्वं सर्वश्वेतत्वप्रतीत्यर्थम्। ततश्च सर्वश्वेताभ्यामुपमितिः। इत्थमियत्पर्यन्तमत्र प्रबन्धे भक्तिपरवशेन कविना प्रथमं यौवनोद्भेदविशिष्टत्वेन, तदनन्तरं वसन्तपुष्पाभरणशोभत्वेन, पश्चाद् विवाहनेपथ्यशालित्वेन च परदेवतास्वरूपमुपवर्णयता श्रोतृजनानुग्रह कृत इत्यवसेयम्।।२६।।

विवरणम्

दुकूलपरिधानं दर्पणोद्धरणं च भङ्ग्यन्तरेणाह—

क्षीरोदेति। नवक्षौमनिवासिनी नवं दर्पणम् आदधाना सा सफेनपुञ्जा क्षीरोदवेला इव पर्याप्तचन्द्रा शरत्त्रियामा इव भूयः बभौ। नवम् अभिनवं क्षौमं धवलतरं दुकूलविशेषं(नि)वसितुं परिधातुं शीलमस्या इति तथा नवं विवाहसमये ग्रहणार्थं तदानीमेव निर्मितं दर्पणम् आदधाना करे गृह्णती। फेनानां जलविकाराणां पुञ्जेन समूहेन सहिता। क्षीरोदस्य क्षीरसमुद्रस्य। संज्ञायामुदकस्योदादेशः। वेला समुद्र[तटं,फेनं]जलविकृतिः [तत्पुञ्जेन सहिता] सेव। पर्याप्तः पूर्णः चन्द्रो यस्यां सा शरत्कालरात्रिरिव च। भूयः सुतरां बभौ शुशुभे। शुक्लाङ्गरागत्वेन शुक्लाम्बरत्वेन च सर्वश्वेता दर्पणं दधाना च सती देवी सफेनपुञ्जा क्षीरोदवेलेव पूर्णचन्द्रसहिता शरत्कालरात्रिरिव च बभावित्यर्थः। अत्र नवक्षौमनिवासिनीति

विशेषणं देव्याः सर्वश्वेतत्वप्रतीत्यर्थमेव। अत एव सर्वश्वेताभ्यामुभाभ्यामुपमितिः। फेनपुञ्जपूर्णचन्द्रयोस्तु दर्पणप्रतिवस्तुत्वेनोपादानम्। अत्रापि महाकविः पूर्ववत् परदेवतायाः स्वरूपवर्णनं कृतवानित्यवसेयम्।२६।।

तामर्चिताभ्यः कुलदेवताभ्यः
कुलप्रतिष्ठां प्रणमय्य माता।
अकारयत् कारयितव्यदक्षा
क्रमेण पादग्रहणं सतीनाम्॥२७॥

प्रकाशिका

तामिति। कुलदेवताभ्यः राजकुलप्रतिष्ठाभ्यो लक्ष्मीवागादिभ्यः। कुलस्य प्रतिष्ठां संरक्षणीमित्यर्थः। प्रणमय्य 'ल्यपि लघुपूर्वाद्'(६.४.५६) इति णेरयादेशः। क्रमेण यथाप्रधानं यथावयश्च यथाभिजनं च।।२७।।

विवरणम्

इत्थं कृतनेपथ्याया देव्याः कुलदेवतावन्दनं पतिव्रतापादाभिवन्दनं चाह—

तामिति। माता ताम् अर्चिताभ्यः कुलदेवताभ्यः प्रणमय्य सतीनां पादग्रहणं क्रमेण अकारयत्। अर्चिताभ्यः विवाहोत्सवानुगुणया महत्या सपर्यया पूर्वं पूजिताभ्यः कुलक्रमार्चिताभ्यो देवताभ्यः। सकलविपत्प्रशमनार्थं स्वकुलपारम्पर्येणार्चिताभ्यो लक्ष्मीदुर्गाभद्रकालीप्रभृतिभ्य इत्यर्थः। प्रणमय्य प्रणामं कारयित्वा। 'ल्यपि लघुपूर्वाद्' (६.४.५६) इति णेरयादेशः। सतीनां पतिव्रतानां पादग्रहणमभिवादनम्। 'समे तु पादग्रहणमभिवादनमित्युभे' इत्यमरः। क्रमेण आभिजात्यवयःप्रभृतिक्रमेण अकारयत् कारयामास। तां माता कुलक्रमार्चिताभ्यो देवताभ्यः नमस्कारं कारयित्वा पश्चाद् विवाहदर्शनकुतूहलादागतानां बन्धुभूतानां पतिव्रतानामभिवादनं चाभिजात्यवयःप्रभृतिक्रमेण कारयामासेत्यर्थः। मातुस्तस्यां तथाविधे प्रयासे हेतुमाह—कुलप्रतिष्ठामिति। कुलस्य प्रतिष्ठां स्थितिकरीम्। संरक्षणीमित्यर्थः। मेनायास्तादृशे कर्मणि कौशलमाह—कारयितव्यदक्षेति। कारयितव्ये कारयितुमुचिते कर्मणि दक्षा कुशला नह्यन्येन जनेन तत्कालोचितं कर्म कारयितुं सर्वेषां कुशलता सम्भवतीति भावः।।२७।।

अखण्डितं प्रेम लभस्व पत्यु-
रित्युच्यते ताभिरुमा स्म नम्रा।
तया तु तस्यार्धशरीरलाभात्
पश्चात्कृताः स्निग्धजनाशिषोऽपि॥२८॥

प्रकाशिका

अथ तासां प्रत्यभिवादनमाह—

अखण्डितमिति। अखण्डितमन्ययानुपात्तांशमित्यर्थः। नम्रा प्रणामसमये इत्यर्थः। तुशब्दो देव्या महाभाग्यादिगुणसम्पदो विशेषोऽयमिति द्योतयति। पश्चात्कृता अधरीकृताः। प्रेमालाभाच्छरीरलाभस्य दुर्लभत्वात्। अपिशब्देन तदाशिषामेवातिभूम्यवगाहित्वं द्योत्यते।।२८।।

विवरणम्

तया गृहीतपादानां च तासां प्रत्यभिवादनप्रकारमाह—

अखण्डितमिति। नम्रा उमा ताभिः पत्युः अखण्डितं प्रेम लभस्व इति उच्यते स्म। नम्रा पादानता साधुकारिणी। ताभिः पतिव्रताभिः पत्युः भर्तृभूतस्य हरस्य अखण्डितं सपत्नीभूतयान्ययानुपात्तांशं प्रेम स्नेहं लभस्व प्राप्नुहि इत्युच्यते स्म उक्ताभूत्। पतिव्रतानां पादानता देवी ताभिः पत्युः परं प्रेमास्पदं भवेत्याशीर्वादेनाभिनन्दिताभूदिति भावः। इत्थं कृताशिषो देव्या महाभाग्यादिगुणयोगाद् विशेषमाह—तया तु तस्य अर्धशरीरलाभात् स्निग्धजनाशिषः अपि पश्चात्कृताः इति। तया उमया। तुशब्दो महाभाग्यवत्त्वादिगुणविशिष्टाया देव्या विशेषं द्योतयति। तस्य पत्युः अर्धशरीरलाभात्। शरीरस्यार्धमर्धशरीरम्। 'अर्धं नपुंसकम्' (२.२.२) इति समासः। तस्य लाभाद्धेतोः। समविभक्तांशस्य भर्तृशरीरस्य लाभादित्यर्थः। स्निग्धानां जनानामाशिषः आशीर्वादा अपि। अपिशब्देन सतीनां स्निग्धानां च तासामाशीर्वादानामत्युत्कर्षात् पश्चात्करणानुपपत्तिरुक्ता। पश्चात्कृता अधःकृताः। आभिरूप्यवैदग्ध्यसौशील्यसौभाग्यादिगुणविशिष्टया देव्या तु सतीनां स्निग्धानां च तासां भर्तृप्रेमलाभमात्रपरा आशिषो भर्तुः शरीरार्धस्यैव स्वीकारादधः कृता इति भावः।।२८।।

इच्छाविभूत्योरनुरूपमद्रि-
स्तस्याः कृती कृत्यमशेषयित्वा।
सभ्यः सभायां सुहृदास्थितायां
तस्थौ वृषाङ्कागमनं प्रतीक्ष्य॥२९॥

प्रकाशिका

इच्छेति। कृत्यमुक्तप्रकारं कौतुकबन्धादि। अशेषयित्वा समाप्य। सभ्यः सभागतसुहृद्विषयसमुदाचारादिनिपुण इत्यर्थः। प्रतीक्ष्य प्रतीक्षमाण इत्यर्थः।

वृषाङ्कशब्देन वृषो धर्मः सोऽस्य चिह्नमिति धर्माधिष्ठातृत्वेन विश्वाधारत्वं विश्वस्पृहणीयत्वं च देवस्य द्योत्यते।।२९।।

विवरणम्

विवाहोत्सवे हिमवता कर्तव्यं कारयितव्यं चार्थजातमुपसंहरति—

इच्छेति। अद्रिः इच्छाविभूत्योः अनुरूपं तस्याः कृत्यम् अशेषयित्वा सुहृदास्थितायां सभायां वृषाङ्कागमनं प्रतीक्ष्य तस्थौ। इच्छा पुत्रीविषयोऽभिलाषः कर्तव्यविषयो वा, विभूतिरैश्वर्यं, तयोः। अनुरूपं सदृशं तस्याः कृत्यं पार्वतीसम्बद्धं कौतुकबन्धनादिरूपं कर्तव्यजातम् अशेषयित्वा निश्शेषं कृत्वा कारयित्वा च। समाप्येत्यर्थः। सुहृद्भिः बन्धुभिरास्थितायामधिष्ठितायाम्। बन्धुजनपरिपूर्णायां सभायामित्यर्थः। वृषाङ्कस्य वृषकेतनस्य हरस्यागमनं प्रतीक्ष्य हरवृषस्य धर्मरूपत्वप्रसिद्धेर्भगवतो धर्माधिष्ठातृत्वेन सर्वलोकाधारत्वं सर्वलोकस्पृहणीयत्वं च दर्शितम्। तेन च तत्सम्बन्धस्य पुरुपुण्यलभ्यत्वेन हिमवतः सभासम्भाव्यत्वं सूचितम्। कृत्यमशेषयित्वेत्यनेन सभायां स्वैरालापयोग्यता दर्शिता। अत एवाह— कृतीति। कृतकृत्य इत्यर्थ। कुशल इति वा। हिमवतः सभागतसुहृद्विषयसमुदाचारनिपुणत्वमाह—सभ्य इति। सभायां साधुः। सज्जनसम्भाषणकुशल इत्यर्थः।।२९।।

तावद् भवस्यापि कुबेरशैले
तत्पूर्वपाणिग्रहणानुरूपम्।
प्रसाधनं मातृभिरादृताभि-
र्न्यस्तं पुरस्तात् पुरशासनस्य।।३०।।

प्रकाशिका

तावदिति। यावता देव्याः कृत्यजातं सख्यादिभिरारभ्यते, तावता कालेनेत्यर्थः। भवस्यापि, न केवलमुमायाः। कुबेरशैले कैलासे। तत्पूर्वेति प्रथमविवाहे प्रसाधनस्य सविशेषत्वं द्योतयति। प्रसाधनं वस्त्राभरणादि। मातृभिरादृताभिरिति। बन्धुस्त्रियो हि वरमण्डने कौतुकिन्यो भवन्ति। पुरस्तान्न्यस्तं प्रसाधनाय पुरो निहितम्। पुरशासनस्येत्यनेन चतुर्दशभुवनैकवीरस्य देवस्य शृङ्गाराङ्गभूतः प्रसाधनविधिः शोभावद् इति द्योत्यते।।३०।।

विवरणम्

इत्थं नायिकावृत्तान्तमुपसंहृत्य नायकवृत्तान्तं प्रस्तौति तावदित्यादिना—

तावदिति। तावत् कुबेरशैले मातृभिः भवस्यापि प्रसाधनं पुरस्ताद् न्यस्तम्। तावद् यावत् पार्वत्याः प्रसाधनं प्रसाधिकाजनैरारब्धं, तावदेवेत्यर्थः। कुबेरस्य शैले कैलास इत्यर्थः। हरस्य स्वाधिष्ठानभूते शैले ममताभावात् कुबेरशैल इत्युक्तं, न तु गिरीशशैल इति। मातृभिः

ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा।
वाराही च तथेन्द्राणी चामुण्डा सप्त मातरः।।

इत्यादिषु प्रसिद्धाभिः। भवस्य हरस्य। अपिशब्दस्य न केवलमुमाया इत्यर्थः। प्रसाधयत्यलङ्करोति अनेनेति प्रसाधनमलङ्कारः। करणे ल्युट्। वसनाभरणादिकमित्यर्थः। पुरस्तात् पुरोभागे न्यस्तं निहितमासीत्। भगवतः प्रसाधनार्थमिति शेषः। प्रसाधनस्य सविशेषत्वमाह—तत्पूर्वपाणिग्रहणानुरूपमिति। तदेव पूर्वं यस्य तत् तत्पूर्वं, तादृशे पाणिग्रहणे अनुरूपम् उचितम्। प्रथमविवाहोचितमित्यर्थः। ननु स्वेच्छामात्रनिर्मितचतुर्दशभुवनस्य निजाभरणमात्रनिर्माणे कः प्रयास इति किं मातृणां प्रसाधनार्पणप्रयासेन, अत आह—आदृताभिरिति। बन्धुभूता हि नार्यो वरमण्डने विशेषेण कौतुकिन्यो भवन्तीति तासामादरातिशय एव तत्र हेतुरिति भावः। चतुर्दशभुवनैकवीरस्य भगवतः शृङ्गाराङ्गभूतः प्रसाधनविधिरपि शुशुभेतरामित्याह—पुरशासनस्येति। पुरत्रयं शास्तीति पुरशासनः त्रिपुरहरस्येत्यर्थः।।३०।।

तद्गौरवान्मङ्गलमण्डनश्रीः
सा पस्पृशे केवलमीश्वरेण।
स्वभाववेषः परिणेतुरिष्टं
भावान्तरं तस्य विभोः प्रपेदे।।३१।।

प्रकाशिका

तदिति। तद्गौरवान्मातृषु बहुमानात्। श्रीशब्देन श्रीमल्लक्ष्यते। तस्यैव स्पर्शयोग्यत्वात्। केवलं पस्पृशे न तूपात्ता। तत् कथं परवेष इत्याह—स्वभाववेष इति। स्वाभाविकं भस्मकपालाद्याकल्पजातम्। परिणेतुर्वरस्य। इष्टमपेक्षितम्। भावान्तरमन्यथाभवनम्। विभोरिति हेतुः।।३१।।

विवरणम्

भगवतः प्रसाधने विशेषमाह—

तदिति। सा मङ्गलमण्डनश्रीः ईश्वरेण तद्गौरवात् केवलं पस्पृशे। सा मातृभिः अग्रे निहिता। मङ्गलार्थं मण्डनश्रीः। श्रीः शोभा। तस्यश्च

स्पर्शयोग्यत्वाभावाद् अत्र श्रीमल्लक्ष्यते। श्रीमन्मण्डनमित्यर्थः। ईश्वरेण मातृषु गौरवाद् बहुमानात्केवलं पस्पृशे स्पृष्टाभूत्। न तूपात्तापीत्यर्थः। ननु कथं तर्हि विवाहोचितमण्डनोपपत्तिरत आह—विभोः तस्य स्वभाववेषः परिणेतुः इष्टं भावान्तरं प्रपेदे इति। विभोः प्रभोः। अनेनाभरणानामिच्छामात्रेणान्यथात्वप्राप्तौ हेतुरुक्तः। स्वभावसिद्धो वेषः स्वाभाविकमलङ्कारजातम्। भस्मकपालादिकमित्यर्थः। परिणेतुर्वरस्य विवाहोद्युक्तस्येत्यर्थः। इष्टमपेक्षितं भावान्तरमन्यथाभावं प्रपेदे प्राप्तोऽभूत्। भगवतो भस्मकपालादिकं स्वाभाविकमलङ्कारसाधनमेव सिताङ्गराग-शिरोलङ्कारकुसुमादिस्वरूपतां प्राप्तमिति भावः।।३१।।

बभूव भस्मैव सिताङ्गरागः
कपालमेवामलशेखरश्रीः।
उपान्तभागेषु च रोचनाङ्कः
सिंहाजिनस्यैव दुकूलभावः।।३२।।

प्रकाशिका

एतदेव प्रपञ्चयति—

बभूवेति। उपान्तभागेषु पर्यन्तप्रदेशेषु। रोचनाङ्कः रोचनालिखितहंसादिलक्षणः। उक्तञ्च 'हंसचिह्नदुकूलवान्'(रघु.१७.२५) इति। केचित् तु विशेषणसम्बन्धयोग्यतार्थं सिंहाजिनं चैवेति पाठमादृत्य भावशब्दः पदार्थवाचीति व्याचक्षते।।३२।।

विवरणम्

तदेव प्रपञ्चयति बभूवेत्यादिना—

बभूवेति। भस्म एव सिताङ्गरागः बभूव। भगवता शरीरे विलिप्तं भस्मैव सितो धवलोऽङ्गरागोऽभूत्। भस्मैव चन्दनाद्यङ्गरागत्वं प्राप्तमित्यर्थः। तथा कपालमेव अमलशेखरश्रीः बभूव। कपालं ब्रह्मशिरःकपालजालम्। अमलो निर्मलः शेखरः शिरोलङ्कारः, तस्य श्रीः। श्रीमाञ्छेखर इत्यर्थः। ब्रह्मशिरःकपालमेव निर्मलं शोभमानं च शिरोलङ्कारसाधनमभूदित्यर्थः। सिंहाजिनस्यैव दुकूलभावः च बभूव। सिंहस्याजिनं सिंहाजिनम्। अजिनं चर्म तस्यैव दुकूलभावः च बभूव। सिंहाजिनस्य दुकूलत्वं चासीदित्यर्थः। चकारः पूर्वोक्तालङ्कारपरिणामसमुच्चयार्थः। दुकूलस्य मङ्गलालङ्कार-योग्यत्वं द्योतयितुं दुकूलभावं विशिनष्टि—उपान्तभागेषु रोचनाङ्कः इति। उपान्तभागेषु पर्यन्तप्रदेशेषु रोचनैवाङ्कश्चिह्नं यस्य स तथा। गोरोचनादि-

लिखितहंसादिलक्षण इत्यर्थः। तादृशमेव हि दुकूलं मङ्गलक्रियायामुचितं, विशेषतश्च विवाहे। यथोक्तमतिथेरभिषेकानन्तरं रघुवंशे—

आमुक्ताभरणः स्रग्वी हंसचिह्नदुकूलवान्।
आसीदतिशयप्रेक्ष्यः स राजश्रीवधूवरः।।(१७.२५)

इति। तत्र हंसचिह्नदुकूलस्य राजश्रीपरिणयनकालीनत्वमुक्तम्। अत्र केचिद् दुकूलस्यैव रोचनाङ्कत्वं, न तु दुकूलभावस्येति विशेषणविशेष्ययोः परस्परसम्बन्धार्थं सिंहाजिनं चैव दुकूलभाव इति पठन्ति। तन्मते भावशब्दः पदार्थवाची दुकूलपदार्थ इत्यर्थः। वयं तु लक्षणया सम्बन्धं ब्रूमः।।३२।।

शङ्खान्तरद्योति विलोचनं य-
दन्तर्निविष्टानलपिङ्गतारम्।
सान्निध्यपक्षे हरितालमय्या-
स्तदेव जातं तिलकक्रियायाः॥३३॥

प्रकाशिका

शङ्खेति। 'शङ्खो निधौ ललाटास्थ्नी'ति सिंहः। 'शङ्खस्तु ललाटास्थिमर्मणोरि'ति केशवः। सान्निध्यपक्षे सान्निध्यकृत्ये। 'पक्षः पार्श्वगरुत्साध्ये'ति यादवः।।३३।।

विवरणम्

अपि च भगवतो ललाटलोचनमेव हरितालतिलकमासीदित्याह—

शङ्खेति। शङ्खान्तरद्योति विलोचनं यत् तद् एव हरितालमय्याः तिलकक्रियायाः सान्निध्यपक्षे जातम्। शङ्खो ललाटास्थि। 'शङ्खो निधौ ललाटास्थ्नी'त्यमरः। तस्यान्तरे मध्ये द्योतितुं शीलस्येति तथा। तादृशं यद् विलोचनं नेत्रं तदेव। हरितालो धातुविशेषः, तन्मय्याः तिलकक्रियायाः। क्रियाशब्दो द्रव्यपरः। कृतस्य तिलकस्येत्यर्थः। सान्निध्यस्य सन्निधानस्य पक्षे साध्ये 'पक्षः सहाये मासार्धे साध्यपार्श्वगरुत्सु चे'ति भोजः। हरितालतिलकेन यत् साध्यं शोभापादनं तत्र ललाटलोचनमेव जातमित्यर्थः। हरितालतिलकसाम्यप्रतिपादकं विलोचनविशेषणमाह—अन्तर्निविष्टानलपिङ्गतारमिति। अन्तर्भागे निविष्टेनानलेन पिङ्गा रक्तवर्णा तारा कनीनिका यस्य तत् तथोक्तम्। **हरितालतिलकं हि रक्तवर्णं भवति**।।३३।।

यथाप्रदेशं भुजगेश्वराणां
करिष्यतामाभरणान्तरत्वम्।
शरीरमात्रं विकृतिं प्रपेदे
तथैव तस्थुः फणरत्नशोभाः॥३४॥

प्रकाशिका

यथेति। यथाशब्दो वीप्सायाम्। स्वे स्वे प्रदेश इत्यर्थः। आभरणान्तरत्वं हारादित्वम्। विकृतिमन्यथात्वम्।।३४।।

विवरणम्

भुजगानामेव हारकाञ्चीकटकादिभावप्राप्तिं भङ्ग्यन्तरेणाह—

यथेति। यथाप्रदेशम् आभरणान्तरत्वं करिष्यतां भुजगेश्वराणां शरीरमात्रं विकृतिं प्रपेदे। यथाशब्दो वीप्सार्थः। प्रदेशो हाराङ्गदादिस्थानम्। स्वेषु स्वेषु प्रदेशेष्वित्यर्थः। आभरणान्तरत्वं तत्तत्स्थानोचितहाराद्याभरणत्वं करिष्यतां कर्तुमारब्धानाम्। भुजगेश्वरा वासुकिप्रभृतयः तेषाम्। शरीरमात्रं केवलं शरीरमेव। विकृतिं विकारं हारादिभावं प्रपेदे प्राप्तमभूत्। हारस्थाने हारत्वम्, अङ्गदस्थाने अङ्गदत्वं, काञ्चीस्थाने काञ्चीत्वं च भगवता विधातुमारब्धानां वासुकिप्रभृतीनां शरीरमात्रस्यैव तदानीमन्यथाभावो नेतव्योऽभूदित्यर्थः। मात्रशब्दव्यावर्त्यमर्थान्तरमाह—फणरत्नशोभाः तथा एव तस्थुः इति। फणे यानि रत्नानि तेषां शोभाः तथैव पूर्ववदेव तस्थुः स्थितिं चक्रुः। आभरणानां रत्नालङ्कृतत्वस्य शोभावहत्वाद् रत्नानामन्यथात्वप्राप्तौ भगवता न यत्नः कर्तव्योऽभूदित्यर्थः।।३४।।

दिवापि निष्ठ्यूतमरीचिभाजा
बाल्यादनाविष्कृतलक्षणेन।
चन्द्रेण नित्यं प्रतिभिन्नमौले-
श्चूडामणेः किं ग्रहणं हरस्य॥३५॥

प्रकाशिका

दिवेति। दिवा मरीचिमत्त्वं परमेश्वरपरिग्रहात्। वाल्यात् कलामात्रत्वात्। ग्रहणं वचनम्। सविशेषमुज्ज्वलेनाकलङ्केन चन्द्रेण नित्यसम्बद्धे देवस्य मौलौ चूडामणिरित्थमासीदिति न वक्तव्यमेवेत्यर्थः।।३५।।

विवरणम्

चूडामणिस्थाने निहितस्य चन्द्रस्य तु स्वरूपमात्रेऽपि न विकारो नेतव्योऽभूदित्याह—

दिवेति। नित्यं चन्द्रेण प्रतिभिन्नमौलेः हरस्य चूडामणेः ग्रहणं किम्। नित्यं सर्वदा। चन्द्रेण आह्लादकरेणेत्यर्थः। प्रतिभिन्नो रञ्जितो मौलिर्यस्य तस्य हरस्य परमेश्वरस्य चूडामणेः शिरोलङ्कारस्य ग्रहणं वचनम्। ग्रहणशब्दस्य वचनार्थत्वं प्रसिद्धं 'वैकुण्ठनामग्रहणमेषामघहरं विदुः' (श्रीभाग.६.२.१४) इत्यादौ। किं किमर्थम्। निष्प्रयोजनमित्यर्थः। चन्द्रमसि मूर्धनि वर्तमाने सति हरस्य चन्द्र एव रत्नचूडामणिरासीदिदिति वचनं निरर्थकमित्यर्थः। अस्य चूडामणेरितरचूडामणिभ्यो व्यतिरेकमाह—दिवा अपि निष्ठ्यूतमरीचिभाजा इति। दिवापि अहन्यपि। निष्ठ्यूतान् निक्षिप्यमाणान् सर्वतः प्रसार्यमाणान् मरीचीन् रश्मीन् भजत इति तथा। रत्ननिर्मिता हि चूणामणयो न दिवसेषु किरणमुद्वमन्ति। हरचूणामणिश्चन्द्रस्तु हरपरिगृहीतत्वान्न दिवाकरकरैरभिभूयते इति युक्तमस्य मरीचीनां सन्ततप्रवृत्तत्वमिति भावः। निर्दोषत्वमाह—बाल्याद् अनाविष्कृतलक्षणेन इति। बाल्याद् बालत्वात्। कलामात्रत्वादित्यर्थः। अनाविष्कृतमप्रकाशितं लक्षणं कलङ्को येन तेन। 'कलङ्काङ्कौ लाञ्छनं च चिह्नं लक्ष्म च लक्षणमि'त्यमरः। 'बभूव भस्मैव सिताङ्गरागः' (७.३२) इत्यादिवचनानुसारेण निरूप्यमाणे हि भगवतश्चन्द्र एव चूडामणिरासीदिति वक्तव्यम्। तत् तु निष्प्रयोजनम्। तथा सति चन्द्रे दोषारोपणं च स्यात्। न्यूनगुणत्वापादनाच्चन्द्रस्य। आह्लादकरत्वसन्ततप्रवृत्तरश्मित्वनिर्दोषत्वादेरितरचूडामणिव्यतिरेकस्य विद्यमानत्वादिति भावः।।३५।।

इत्यद्भुतैकप्रभवः प्रभावात्
प्रसिद्धनेपथ्यविधेर्विधाता।
आत्मानमासन्नगणोपनीते
टङ्के निषिक्तप्रतिमं ददर्श।।३६।।

प्रकाशिका

इतीति। अद्भुतो निरूप्यमाणविस्मयनीयः संसारः तदात्मभूतं तत्त्वज्ञातं च। यदाहुः—'संसारेऽपि सतीन्द्रजालमपरं यद्यस्ति तेनापि किम्' इति। तस्यैकप्रभवः प्रधानं जन्मकारणम्। तस्य महेन्द्रजालिकस्य प्रभावादित्थं प्रसिद्धनेपथ्यविधिविधानं किमाश्चर्यमिति भावः। प्रसिद्धो लोकसिद्धः। आसन्न आप्तः। टङ्के परशौ। निषिक्ता सङ्क्रान्ता प्रतिमा प्रतिबिम्बो यस्य। इत्थं नेपथ्यविधिं परिसमाप्य देवो रत्नादर्शकृत्यं परशुनैव निर्वर्तितवानित्यर्थः।।३६।।

विवरणम्

इत्थमुपवर्णितं नेपथ्यग्रहणमुपसंहरन् दर्पणावलोकनप्रकारमाह—

इतीति। प्रभावाद् इति प्रसिद्धनेपथ्यविधेः विधाता आत्मानं टङ्के निषिक्तप्रतिमं ददर्श। प्रभावाद् मायाबलाद् इति उक्तप्रकारेण प्रसिद्धो लोकप्रसिद्धो यो नेपथ्यविधिः तस्य विधाता निर्माता सः। आत्मानं स्वशरीरं टङ्के परशौ। 'टङ्कः परशुश्च परश्वध' इति भोजः। निषिक्ता संक्रान्ता प्रतिमा प्रतिबिम्बो यस्य तम्। निविष्टप्रतिममिति वा पाठः। ददर्श दृष्टवान्। यथा भस्मादयः सिताङ्गरागतां गतास्तथा परशुरेवात्मदर्शोऽभूदिति भावः। इत्थमलौकिकानामाभरणानां प्रसिद्धाभरणत्वप्रापणे भगवतः कः प्रयास इत्याह—अद्भुतैकप्रभव इति। निरूप्यमाणे सति विस्मयनीयः प्रपञ्चएवात्राद्भुतशब्देनोच्यते। तस्यैकः प्रधानभूतः प्रभवः जन्मकारणम्। जगत्सर्गादिकर्तुर्भगवत एवंविधाभरणप्रणयने कः प्रयास इति भावः। टङ्कस्यापि प्रभाववशात् सुकरत्वमाह—आसन्नगणोपनीते इति। आसन्नेन आसन्नपरिचारकेण गणेन भूतगणेन उपनीते समीपे प्रापिते। भगवन्मनोगतवेदिना सेवाविचक्षणेन भूतगणेनानीत इत्यर्थः।।३६।।

स गोपतिं नन्दिभुजावलम्बी
शार्दूलचर्मान्तरितोरुपृष्ठम्।
तद्भक्तिसंक्षिप्तबृहत्प्रमाण-
मारुह्य कैलासमिव प्रतस्थे॥३७॥

प्रकाशिका

अथ देवस्य श्वशुरकुलप्रयाणं वर्णयितुमुपक्रमते—

स इति। गोपतिं वृषम्। शार्दूलेन पर्याणीकृतशार्दूलचर्माणमित्यर्थः। तद्भक्तीति परोक्षपरामर्शिना तच्छब्देन कर्तृभूतत्वादध्यक्षायमाणस्य देवस्य परामर्शो न न्याय्य इति केचिन्मन्वते।।३७।।

विवरणम्

अथ भगवतो हिमवत्पुरप्रस्थानं वर्णयितुमुपक्रमते—

स इति। सः नन्दिभुजावलम्बी गोपतिम् आरुह्य प्रतस्थे। सः य एवं कृतनेपथ्यः दृष्टतत्सामीचीन्यश्च परमेश्वरः। नन्दिनो नन्दिकेश्वरस्य भुजमवलम्बितुं शीलमस्येति तथा। अनेन नन्दिनः सेवाविचक्षणत्वमुक्तम्। गवां वृषाणां पतिं श्रेष्ठम् आरुह्य प्रतस्थे गन्तुमुदयुङ्क्त। तथा देवी दर्पणालोकनानन्तरं हरोपयानत्वरिता

बभूव, तथा देवोऽपि तदैव गन्तुमारभतेत्यर्थः। 'कामिनां मण्डनश्रीर्व्रजति हि सफलत्वं वल्लभालोकनेन' इति न्यायोऽनेन दर्शितः। वाहनभूतस्य वृषस्य परिस्तोमविधानप्रकारमाह—शार्दूलचर्मान्तरितोरुपृष्ठम्। इति। शार्दूलो व्याघ्रः। 'शार्दूलद्वीपिनौ व्याघ्रे' इति सिंहः। तस्य चर्मणा अजिनेन अन्तरितम् आच्छादितम् उरु महत् पृष्ठं पृष्ठदेशो यस्य तम्। गोपतिमुत्प्रेक्षते—तद्भक्तिसङ्क्षिप्तबृहत्प्रमाणं कैलासम् इव इति। तस्मिन् परमेश्वरे भक्त्या सङ्क्षिप्तं सङ्कोचितं बृहद् अत्यन्तमुन्नतं विस्तृतं च प्रमाणं येन तादृशं कैलासमिव। नित्यं भगवदावासस्थानभूतः कैलास एव भगवतः प्रस्थानसमयेऽपि भगवद्भक्त्या वाहनभावोचितं वेषमादाय सहैव गन्तुमुद्युक्त एवायमिति जनैरुत्प्रेक्ष्यमाणमित्यर्थः। धवलवर्णत्वं महाकायत्वं भगवदधिष्ठितत्वं चात्रोत्प्रेक्षाबीजम्। अत्र कर्तृभूतत्वात् प्रत्यक्षायमाणस्य देवस्य परोक्षपरामर्शिना तच्छब्देन तद्भक्तीति परामर्शो न हृदयङ्गम इति केचिदाहुः। तन्मन्दम्। प्रतीतिस्खलनाभावात्।।३७।।

तं मातरो देवमनुव्रजन्त्यः
स्ववाहनक्षोभचलावतंसाः।
मुखैः प्रभामण्डलराजिगौरैः
पद्माकरीचक्रुरिवान्तरिक्षम्॥३८॥

प्रकाशिका

तमिति। राजिः परम्परा। गौरैररुणैः। 'गौरोऽरुणे सिते पीते' इति सिंहः। मण्डलराजिग्रहणं मुखानामपि परम्परारूपत्वं ध्वनयति।।३८।।

विवरणम्

अथ देवपरिजनानामपि प्रस्थानं वर्णयति श्लोकद्वयेन। तत्र ब्रह्माण्यादीनां प्रस्थानमाह तमित्यादिना—

तमिति। तं देवम् अनुव्रजन्त्यः मातरः मुखैः अन्तरिक्षं पद्माकरीचक्रुः इव। तं प्रस्थितम् अनुव्रजन्त्यः अनुगच्छन्त्यः मातरः ब्रह्माण्याद्याः मुखैः आत्मीयैर्वदनैः अन्तरिक्षमाकाशम्। पद्मानि पङ्कजानि, तेषामाकरः उद्भवस्थानभूतः सरोविशेषः। पद्माकरीचक्रुरित्यभूततद्भावे च्विः। आकाशे दृश्यमानैः पद्मसन्निभैर्वदनैरपद्माकरमेवान्तरिक्षं पद्माकरं चक्रुरिवेत्यर्थः। तासां तात्कालिकं रमणीयत्वविशेषमाह—स्ववाहनक्षोभचलावतंसा इति। स्वेषां निजानां वाहनानां हंसवृषमयूरादीनां क्षोभेण गमनसम्भवेन चलनेन चलाश्चञ्चला अवतंसाः शिरोऽलङ्कारा यासां तास्तथा। मुखानां पद्मसाम्यमेव स्फुटयति—प्रभामण्डलराजिगौरैः इति। मण्डलाकारेण

वर्तमाना प्रभा प्रभामण्डलं, तस्य राजिभिः परम्पराभिर्गौरैररुणैः। 'गौरोऽरुणे सिते पीत' इत्यमरः। अत्र मण्डलराजिग्रहणं मुखानामपि परम्परारूपत्वं ध्वनतीत्याकाशस्य पद्माकरसाम्यप्रतिपत्त्युपपत्तिः।।३८।।

तासां च पश्चात् कनकप्रभाणां
काली कपालाभरणा चकाशे।
वलाकिनी नीलपयोदराजि-
र्दूरं पुरःक्षिप्तशतह्लदेव॥३९॥

प्रकाशिका

तासामिति। वलाकिनी व्रीह्यादित्वादिनिर्मत्वर्थे। पुरःक्षिप्तशतह्लदा पुरःप्रसारितविद्युत्का। अत्र कालीत्यन्वर्थेन नाम्ना वर्णसाम्यं द्योत्यते।।३९।।

विवरणम्

भद्रकाल्याः प्रयाणोद्योगं दर्शयति—

तासामिति। कनकप्रभाणां तासां पश्चात् कपालाभरणा काली च चकाशे। कनकं सुवर्णं, तस्य प्रभेव प्रभा यासां तासां मातॄणां पश्चात् पृष्ठभागे काली भद्रकाली। चकारः पूर्वोक्तमातृसमुच्चयार्थः। चकाशे शुशुभे। 'काशृ दीप्तावि'ति धातुः। कालीमुत्प्रेक्षते—वलाकिनी नीलपयोदराजिः दूरं पुरःक्षिप्तशतह्लदा इव इति। वलाकाः श्वेतवर्णाः पक्षिविशेषाः। ते सन्त्यस्यामिति वलाकिनी। व्रीह्यादित्वान्मत्वर्थीय इनिप्रत्ययः। नीलानां कृष्णवर्णानां पयोदानां मेघानां राजिः पङ्क्तिः। दूरं दूरभागे। पुर इति पुरोभागवाचकमव्ययम्। पुरोभागे क्षिप्ताः प्रसारिताः शतह्लदाः विद्युतो यया सा तथा। 'शम्पाशतह्लदाह्लादिन्यैरावत्यः क्षणप्रभा, तडित् सौदामनी विद्युदि'त्यमरः। अत्र कालीनीलपयोदराज्योः कालीशब्दस्यान्वर्थत्वाद् वर्णसाम्यम्। शिरःकपालानां धवलत्वाद् वलाकासाम्यम्। सुवर्णवर्णानां मातॄणां विद्युत्साम्यम्। काल्याः पश्चाद्गतत्वात् पुरःक्षिप्तशतह्लदमेघसाम्यम्। मातॄणामत्यन्तसामीप्याभावाद् दूरपदप्रयोगोपपत्तिः।।३९।।

ततो गणैः शूलभृतः पुरोगै-
रुदीरितो मङ्गलतूर्यघोषः।
विमानशृङ्गाण्यवगाहमानः
शशंस सेवावसरं सुरेभ्यः॥४०॥

प्रकाशिका

तत इति। उदीरित उत्थापितः। सेवावसरं शशंसेति परमेश्वरदर्शनस्य तैरपि परमार्थदुर्लभत्वं तेषां तत्प्रतीक्षत्वं च द्योत्यते।।४०।।

विवरणम्

वाद्यघोषप्रकारमाह—

तत इति। ततः शूलभृतः पुरोगैः गणैः उदीरितः मङ्गलतूर्यघोषः विमानशृङ्गाणि अवगाहमानः सुरेभ्यः सेवावसरं शशंस। ततः प्रस्थानानन्तरं शूलभृतः परमेश्वरस्य पुरोगैः पुरोभागे गच्छद्भिः गणैः भूतगणैः उदीरितः उत्थापितः। मङ्गलं विवाहमङ्गलं, तदर्थः तूर्यघोषः वाद्यविशेषाणां घोषः नादः। विमानानां व्योमयानानाम्। 'व्योमयानं विमानोऽस्त्री'त्यमरः। शृङ्गाणि शिरोगृहाणि अवगाहमानः प्रविशन् सन् सुरेभ्यः देवेभ्यः सेवाया अवसरं समयं शशंस निवेदयामास। अत्र बहुषु वाद्येषु निनदत्सु तूर्याणामेव तादृशदूरावस्थितदेवविमानशिरोगृहप्राप्त्युपपत्तेस्तूर्यशब्दोपादानम्। तूर्यश्रवणानन्तरं देवानामागमनदर्शनाच्छशंसेत्युत्प्रेक्षागर्भो निर्देशः। सेवावसरं शशंसेत्यनेन देवैरपि परमेश्वरदर्शनस्य परमार्थतो दुर्लभत्वं तेषां दर्शनाऽवसरप्रतीक्षणपरत्वं च द्योत्यते।।४०।।

उपाददे तस्य सहस्त्ररश्मि-
स्त्वष्ट्रा नवं निर्मितमातपत्रम्।
स तद्दुकूलादविदूरमौलि-
र्बभौ पतद्गङ्ग इवोत्तमाङ्गे॥४१॥

प्रकाशिका

ज्ञापितावसराणां देवानां देवोपस्थानप्रकारमाह—

उपादद इति। तद्दुकूलात् छत्रप्रान्तविलम्बिताद् दुकूलात्। 'अन्याराद्—' (२.३.२९) इत्यत्र सूत्रे आराच्छब्दस्यार्थग्रहणादत्र पञ्चमी। पतद्गङ्गत्वोत्प्रेक्षया गङ्गापतनद्रष्टॄणां दिव्यानां तत्स्मरणं द्योत्यते।।४१।।

विवरणम्

सेवावसरावगमानन्तरं देवानां सेवाप्रकारमाह पञ्चभिः श्लोकैः। तत्र सूर्यकृतां सेवामाह—

उपादद इति। सहस्त्ररश्मिः तस्य आतपत्रम् उपाददे। सहस्त्ररश्मिरादित्यः तस्य परमेश्वरस्य आतपत्रं सितच्छत्रम् उपाददे गृहीतवान्। सूर्यरश्मिपरिहारार्थमेव हि

सर्वैरातपत्रादानं क्रियते। भगवतस्तु सूर्यः स्वयमेव शरीरमवलम्ब्यातपत्रं गृहीतवानित्यर्थः। विश्वकर्मा तु छत्रप्रदानेनैव सेवितवानित्याह—त्वष्ट्रा नवं निर्मितम् इति। त्वष्ट्रा विश्वकर्मणा नवमभिनवं सत्। भगवतो विवाहप्रस्थानार्थं तदानीमेव निर्मितमित्यर्थः। अनेन दर्शनीयतरत्वमुक्तम्। आतपत्रग्रहणजनितं भगवतः शोभाविशेषमाह—तद्दुकूलाद् अविदूरमौलिः सः उत्तमाङ्गे पतद्गङ्गः इव बभौ इति। तस्य आतपत्रस्य दुकूलादत्यन्तधवलाद् वसनविशेषात्। छत्रान्ते लम्बमानादतिधवलात् कौशेयादित्यर्थः। 'अन्याराद्' (६.३.२९) इति सूत्रे आराच्छब्दस्यार्थग्रहणादत्राविदूरशब्दयोगे पञ्चमी। अविदूरे समीपे मौलिः शिरो यस्य। सः परमेश्वरः उत्तमाङ्गे शिरसि पतन्ती गङ्गा यस्य तथाविध इव बभौ शोभते स्म। अत्र पतद्गङ्गत्वोत्प्रेक्षया पूर्वं गङ्गापतनदर्शिनां दिव्यजनानां तादृशदुकूलदर्शने पूर्वदृष्टगङ्गाप्रपतनस्मरणं द्योत्यते।।४१।।

मूर्ते च गङ्गायमुने तदानीं
सचामरे देवमसेविषाताम्।
समुद्रगारूपविपर्ययेऽपि
सहंसपाते इव लक्ष्यमाणे।।४२।।

प्रकाशिका

मूर्ते इति। समुद्रगारूपं प्रवाहरूपम्। सहंसपाते इव लक्ष्यमाणे सहंसपातत्वसम्भावनया दृश्यमाने।।४२।।

विवरणम्

गङ्गायमुनयोः सेवाप्रकारमाह—

मूर्ते इति। गङ्गायमुने च तदानीं मूर्ते सचामरे देवमसेविषाताम्। गङ्गा च यमुना च गङ्गायमुने। चकारः सहस्त्ररश्मिसेवासमुच्चयार्थः। तदानीं विवाहप्रस्थानसमये मूर्ते मूर्तियुक्ते। गृहीतदेवस्त्रीशरीरे भूत्वेत्यर्थ। सचामरे चामरसहिते असेविषाताम् उपतस्थतुः। भगवतो विवाहप्रस्थानवेलायां गङ्गा च यमुना च नदीरूपमपहाय सुरसुन्दरीरूपमुपादाय च पार्श्वद्वये स्थित्वा चामरव्यजनवीजनैः सेवां व्यधत्तामित्यर्थः। तत्स्वरूपदर्शने सति सहृदयानां प्रतीतिमुत्प्रेक्षामुखेन दर्शयति—समुद्रगारूपविपर्यये अपि सहंसपाते इव लक्ष्यमाणे इति। समुद्रं गच्छत इति समुद्रगे तयोः यद् रूपं प्रवाहरूपं तस्य विपर्यये व्यत्यासेऽपि। दिव्यस्त्रीरूपधारणे सत्यपीत्यर्थः। अपिशब्दस्तथात्वे हंसपातयोग्यतां निराकरोति। हंसानां पातो

हंसपातः। पात उत्पतननिपतनादिरूपो व्यापारः। हंसपातेन सहिते सहंसपाते। इवशब्दो द्रष्टॄणां सम्भावनां दर्शयति। लक्ष्यमाणे दृश्यमाने। जनैरिति शेषः। गङ्गायमुनयोः समीपे पुनः पुनर्निपततोरुत्पततोश्च सितव्यजनयोः साक्षात्कारे सति महाजनैः सहंसपातत्वसम्भावनया दृश्यमाने इत्यर्थः।।४२।।

तमभ्यगच्छत् प्रथमो विधाता
श्रीवत्सलक्ष्मा पुरुषश्च साक्षात्।
जयेति वाचा महिमानमस्य
संवर्धयन्त्या हविषेव वह्निम्।।४३।।

प्रकाशिका

तमिति। साक्षादिति मूर्त्यन्तराव्यवहितेनात्मीयरूपेणैवेत्यर्थः। भगवान् नारायणो हि सर्वस्मिल्लोककार्ये स्वांशैः प्रवर्तते। इह तु परमेश्वरगौरवान्न तथेति भावः। संवर्धयन्त्येति पाठः। संवर्धयन्ताविति पाठे अभ्यगच्छदित्येकवचनान्वयो न स्यात्। अस्य महिमानं नैसर्गिकं संवर्धयन्त्या स्तुतिवाचा अभ्यगच्छतामित्यर्थः।।४३।।

विवरणम्

हरिविरिञ्चयोः परमेश्वरविवाहोत्सवप्राप्तौ तत्कृतं सेवाप्रकारं चाह—

तमिति। प्रथमः विधाता जयेति वाचा तम् अभ्यगच्छत्। प्रथमो विधाता ब्रह्मा। मरीच्यादीनां सर्गशेषविधायित्वाद् ब्रह्मणो विधातृषु प्राथम्यम्। जयेति वाचा जयेत्यादिरूपया स्तुतिवाचा। सहेति शेषः। तमभ्यगच्छद् अभिमुखीकृत्य गतवान्। हरेरपि प्राप्तिमाह—श्रीवत्सलक्ष्मा पुरुषः साक्षात् च इति। श्रीवत्सलक्ष्मा पुरुषः विष्णुः। श्रीवत्स एव लक्ष्म चिह्नं यस्य स तथा। 'उरस्यस्य श्रीवत्सो लाञ्छनं मतमि'त्यमरः। साक्षाद् मूर्त्यन्तराव्यवधानेन। मत्स्यकूर्माद्यंशानामंशिभूतेन स्वेनैव रूपेणेत्यर्थः। नारायणो हि भगवान् सर्वेषु लोककार्येषु निजांशैरेव प्रवृत्त इति पुराणप्रसिद्धम्। अत्र तु परमेश्वरगौरवात् स्वयमेवेति भावः। चशब्दः समुच्चयार्थः। जयेति वाचा तमभ्यगच्छदिति अत्रापि योज्यम्। कीदृशी जयवागित्यत्राह—अस्य महिमानं संवर्धयन्त्या इति। अस्य परमेश्वरस्य महिमानं नैसर्गिकं महत्त्वं। संवर्धयन्त्या सम्यग् वर्धयन्त्या। वाचो महिमसंवर्धकत्वमुपमया स्फुटयति—हविषा वह्निम् इव इति। हविषा आज्येन वह्निमिव। 'घृतमाज्यं हविः सर्पिरि'ति सिंहः। यथा हविषा वह्निं वर्धयति, तथात्मनैवास्य महिमानं संवर्धयन्त्या वाचेत्यर्थः।

संवर्धयन्ताविति वा पाठः। हविषा वह्निमिव जयेति वाचास्य महिमानं संवर्धयन्तौ इति च योजना। यत् त्वत्राभ्यगच्छदित्येकवचनप्रयोगविरोधात् संवर्धयन्ताविति द्विवचनप्रयोगो न युक्त इत्युक्तं, तदयुक्तम्। उभयकृतसेवाप्रकारवाचित्वादस्य वाक्यस्य द्विवचनप्रयोगोपपत्तेः। अर्थादभूतामिति क्रियान्तरान्वयस्य सिद्धत्वाच्च। क्रियासामान्यवाचिनः शब्दा हि सार्वत्रिकाः।।४३।।

एकैव मूर्तिर्बिभिदे त्रिधा सा
सामान्यमेषां प्रथमावरत्वम्।
विष्णोर्हरस्तस्य हरिः कदाचिद्
वेधास्तयोस्तावपि धातुराद्यौ।।४४।।

प्रकाशिका

एकैवेति। मूर्तिः समष्टिरूपा। बिभिदे व्यस्ताभवत्। त्रिधा ब्रह्मविष्णुशिवात्मना। सेति श्रुत्यादिप्रसिद्धा परामृश्यते। सामान्यं, न तु नियतम्। एषां ब्रह्मादीनाम्। प्रथमावरत्वं जन्मतः। तदेव दर्शयति—विष्णोरिति। अयं श्लोकः प्रक्षिप्त इति मन्वते, नायकप्रभावानङ्गत्वात्।।४४।।

विवरणम्

इत्थं हरिहरहिरण्यगर्भाणामेकत्र समागमं प्रतिपाद्य तेषामभेदप्रतिपादनैमुखेन नायकभूतस्य परमेश्वरस्य परमात्मस्वरूपत्वं दर्शयन्नत्यन्तोत्कृष्टत्वमाह—

एकैवेति। एका एव सा मूर्तिः त्रिधा बिभिदे। एका केवला। सा स्मृतिपुराणप्रसिद्धा मूर्तिः परब्रह्मादिशब्दसिद्धं स्वरूपं त्रिधा ब्रह्मविष्णुहररूपेण बिभिदे भिन्नाभूत्। सृष्टिस्थितिप्रलयकार्यापेक्षयेति शेषः। इदानीं तु यः सेव्यसेवकभावो निर्दिष्टः सोऽपि न स्वाभाविक इत्याह—एषां प्रथमावरत्वं सामान्यम् इति। एषां हरिहरहिरण्यगर्भाणाम्। प्रथमोऽवरश्च प्रथमावरौ तयोर्भावस्तत्त्वम्। जन्मप्रभावादिभिरग्रगण्यत्वं प्रथमत्वम्। तैरनन्तरगण्यत्वमवरत्वम्। तदुभयमप्येषां सामान्यं समानम्। 'सामान्यं तु समानत्वे समानेऽपि क्वचिद् भवेदि'ति कौशिकः। एषां जन्मतः प्रभावतश्च यावुत्कर्षापकर्षौ तौ न क्वचिदेव नियतौ, किन्तु स्वातन्त्र्यमवलम्ब्य स्वयमेव कल्पिताविति भावः। यथा बालकानां राजामात्य-भृत्याद्यभिनयपूर्विका क्रीडा, तथेत्यर्थः। एतदेव प्रपञ्चयति—विष्णोरित्यादिना। तत्राद्यावित्ययं शब्दो विभक्तिव्यत्ययेन पूर्ववाक्यत्रये योजनीयः। कदाचिद् विष्णोः हरः आद्यः। कदाचिद् यदा तेषां मनसि स्फुरति तदेत्यर्थः। विष्णोरिति सम्बन्धषष्ठी। हरः परमेश्वरः आद्यः प्रभावादिभिरुत्कृष्टः। कस्मिंश्चित्

काले विष्णोः सम्बन्धिनो हर उत्कृष्ट इत्यर्थः। तस्यैव विष्णोः कदाचिदुत्कर्षमाह—कदाचित् तस्य हरिः आद्य इति। तस्य हरस्य सम्बन्धिनः हरिः विष्णुराद्यः। ब्रह्मणोऽप्युत्कर्षमाह—कदाचित् तयोः वेधाः आद्य इति। तयोर्हरिहरयोः सम्बन्धिनोः वेधाः ब्रह्मा आद्यः। ब्रह्मापेक्षया हरिहरयोरप्युत्कर्षमाह—कदाचित् धातुः तौ अपि आद्यौ इति। धातुर्ब्रह्मणः सम्बन्धिनः तौ हरिहरौ आद्यौ। अयं तु श्लोको नायकोत्कर्षप्रतिपादकत्वाभावात् प्रक्षिप्त इति केचिन्मन्यन्ते। तदयुक्तम्। नायकस्य परमोत्कर्षप्रतिपादनपरत्वादस्य श्लोकस्य। जगत्सर्गादिकर्ता परब्रह्मादिशब्दसिद्धः परमात्मैवायं परमेश्वर इति ह्यनेन श्लोकेन प्रतिपादितम्। भक्तिपरवशस्य कवेः सर्वस्तुतिरूपो वायं श्लोकः।।४४।।

तं लोकपालाः पुरुहूतमुख्याः
श्रीलक्षणोत्सर्गविनीतवेषाः।
दृष्टिप्रदाने कृतनन्दिसंज्ञा-
स्तद्दर्शिताः प्राञ्जलयः प्रणेमुः।।४५।।

प्रकाशिका

तमिति। श्रीलक्षणानि छत्रचामरादीनि वेषग्रहणादुल्बणाङ्गरागशेखरादीनि च, तेषामुत्सर्गेण त्यागेन विनीतः स्वामिसन्दर्शनसमयसमुचितविनयप्रकाशको वेषो येषाम्। दृष्टिप्रदाने देवस्य दृष्टिं दापयितुम्। कृता नन्दिनो देवान्तरङ्गामात्यस्य संज्ञा हस्ताद्यैः सूचना यैः। प्राञ्जलयः अञ्जलिं बद्ध्वेत्यर्थ।।४५।।

विवरणम्

इन्द्रादिलोकपालानां सेवाप्रकारमाह—

तमिति। पुरुहूतमुख्याः लोकपालाः प्राञ्जलयः तं प्रणेमुः। पुरुहूतो देवेन्द्रो मुख्यः श्रेष्ठो येषां ते। लोकपालाः लोकान् पालयन्तीति लोकपालाः। एतच्च त्रयस्त्रिंशत्कोटिसङ्ख्यातानामितरेषां देवानामप्युपलक्षणम्। प्राञ्जलयः कृताञ्जलिपुटाः सन्तः तं परमेश्वरं प्रणेमुः प्रकर्षेण नेमुः। भृत्योचितं नमस्कारं चक्रुरित्यर्थः। तेषां स्वामिदर्शनोचितं वेषभूषणादिकं दर्शयति—श्रीलक्षणोत्सर्गविनीतवेषा इति। श्रियो लक्षणानि छत्रचामरवाहनादीनि, तेषामुत्सर्गेण परित्यागेन। विनीत इति कर्तरि निष्ठा। स्वामिदर्शनोचितविनयद्योतक इत्यर्थः। तादृशो वेषो येषां ते तथा। वेषः आकारः। 'वेषः प्रसाधनाकारपरिवेषप्रवेष्टने' इति **भोजः**। अत्र वेषग्रहणेनातिबहलाङ्गरागशिरोलङ्कारादिपरित्यागोऽपि प्रतीयते। देवानां देवामात्यं प्रति परमेश्वरानुग्रहार्थनामाह—दृष्टिप्रदाने कृतनन्दिसंज्ञाः इति। दृष्टिप्रदाने इति

निमित्तसप्तमी। दृष्टेः प्रदानं दृष्टिप्रदानम्। देवस्य दृष्टिमात्मनि प्रसारयितुमित्यर्थः। कृता विहिता नन्दिविषया संज्ञा हस्ताद्यैः सूचना यैस्ते तथा। 'संज्ञा स्याच्चेतना नाम हस्ताद्यैश्चार्थसूचना' इति सिंहः। एते वयं देवप्रसादार्थिनः संप्राप्ता इति नन्दिनं प्रति कृतप्रार्थना इत्यर्थः। इत्थं स्वामिगौरवादाकारेङ्गितादिभिः प्रार्थितस्य प्रधानामात्यस्य प्रवृत्तिमाह—तद्दर्शिता इति। तेन नन्दिना दर्शिताः दर्शनं नीताः। देवेन्द्रोऽयम् अग्निरयं यमोऽयमित्यादिनामोच्चारणपुरस्सरं नन्दिना दर्शिता इत्यर्थः।।४५।।

कम्पेन मूर्ध्नः शतपत्रयोनिं
वाचा हरिं वृत्रहणं स्मितेन।
आलोकमात्रेण सुरानशेषान्
सम्भावयामास यथाप्रधानम्॥४६॥

प्रकाशिका

तेषु समागतेषु यथार्हं देवस्य प्रतिपत्तिमाह—

कम्पेनेति। मूर्ध्नः कम्पेनेति गौरवं, वाचेति मित्रभावः, स्मितेनेति प्रसादः, आलोकमात्रेणेति प्रतिपत्तिमात्रं च द्योत्यते।।४६।।

विवरणम्

इत्थमुपस्थितेषु देवेषु देवस्य तत्तज्जनोचितां प्रवृत्तिमाह—

कम्पेनेति। सः मूर्ध्नः कम्पेन शतपत्रयोनिं सम्भावयामास। मूर्ध्नः शिरसः कम्पेन चालनेन सम्भावयामास। सम्मानितवान्। अनेन ब्रह्मणि गौरवातिशयः सूच्यते। वाचा हरिं सम्भावयामास। अनेन हरौ सख्यं द्योत्यते। वृत्रहणं स्मितेन। वृत्रहणमिन्द्रं स्मितेन मन्दस्मितेन सम्भावयामास। अनेन तं प्रति प्रसादातिशयः सूचितः। अशेषान् सुरान् आलोकमात्रेण। अशेषानखिलान् सुरान् देवान् आलोकमात्रेण तत्तद्विषयेण केवलेनावलोकनेन सम्भावयामास। अनेन भवतामागमनमस्माभिर्विज्ञातमिति प्रकाश्यते। इत्थं सम्भावनायां हेतुमाह—यथाप्रधानमिति। सम्भावनक्रियाविशेषणमिदम्। प्रधानभूताननतिक्रम्येत्यर्थः।।४६।।

तस्मै जयाशीः ससृजे पुरस्तात्
सप्तर्षिभिस्तान् स्मितपूर्वमाह।
विवाहयज्ञे विततेऽत्र यूय-
मध्वर्यवः पूर्ववृता मयेति॥४७॥

प्रकाशिका

तस्मा इति। जयाशीः जयेत्याशीः। ससृजे प्रयुक्ता। पुरस्तादितरदेवर्षिभ्यः पूर्वम्। आह उवाच। इदमस्त्यादिवत्। तिङन्तप्रतिरूपकमव्ययम्। विवाहेत्यादिकया विस्रम्भोक्त्या तेषु देवः परं प्रसादं दर्शयति। यज्ञरूपणया विवाहस्य लोकहितार्थत्वं द्योत्यते। अध्वर्युशब्दो लक्षणया ऋत्विक्पर्यायः।।४७।।

विवरणम्

अथ देवर्षीणां प्राप्तिं तद्विषयां सम्भावनां चाह—

तस्मा इति। सप्तर्षिभिः पुरस्तात् तस्मै जयाशीः ससृजे। सप्तर्षिभिः मरीच्यादिभिः पुरस्ताद् इतरदेवर्षिभ्यः पूर्वम्। जयेत्याशीः आशीर्वादः ससृजे प्रयुक्ता। देवस्य प्रयाणपटहश्रवणानन्तरं सर्वेषु देवर्षिषु सेवार्थं समागतेषु सत्सु तेषां मध्ये सप्तर्षीणामेव प्राधान्यादेते भगवते जयेत्याशीर्वादमुदीरयामासुरित्यर्थः। भगवतस्तेषु प्रतिपत्तिमाह—सः तान् स्मितपूर्वम् आह इति। तान् सप्तर्षीन्। स्मितपूर्वमिति वचनक्रियाविशेषणम्। स्मितं मन्दस्मितं पूर्वं यथा भवति तथा आह उवाच। आहेति लिडर्थे तिङ्प्रतिरूपकमव्ययम्। किमुवाचेत्यत्राह—वितते अत्र विवाहयज्ञे यूयं मया अध्वर्यवः पूर्ववृताः इति इति। वितते विस्तृते। देवगणैरुपदेवगणैर्देवर्षिगणैश्च समाकीर्ण इत्यर्थः। अत्रास्मिन् मयेदानीं करिष्यमाणे विवाहे एव यज्ञे यागे। यज्ञत्वरूपणेन विवाहस्य तारकासुरनिग्रहादिना लोकोपकारकत्वं ध्वन्यते। लोकोपकारकत्वं प्रसिद्धम्—

अग्नौ प्राप्ताहुतिः सम्यगादित्यमुपतिष्ठते।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः।। (मनु.३.७६)

इत्यादिषु। यूयं सदाचारप्रवर्तका भवन्तः। अध्वर्युशब्दो लक्षणया ऋत्विक्पर्यायः। सर्वेषां प्राधान्यसाम्यप्रतीतिः फलम्। पूर्ववृताः पूर्वमेव वृताः। यदा पूर्वं मया 'तत् प्रयातौषधिप्रस्थम्' (६.३३) इति वचनेन युष्माभिरेवायं श्रमः कर्तव्य इत्ययमर्थोऽप्यर्थादुक्त एवेत्यर्थः। इतिशब्दस्याहेत्यनेनान्वयः। अनेन विस्रम्भभाषितेन देवस्तेषु प्रकृतं प्रसादातिशयं प्रकाशितवानित्यवसेयम्।।४७।।

विश्वावसुप्राग्रसरैः प्रवीणैः
संगीयमानत्रिपुरापदानः।
अध्वानमध्वान्तविकारलङ्घ्य-
स्ततार ताराधिपखण्डधारी।।४८।।

प्रकाशिका

विश्वावस्विति। विश्वावसुः प्राग्रसरः पुरस्सरो येषाम्। प्रवीणैर्निपुणैः, अपि च प्रकृष्टवीणैः। त्रिपुरापदानं त्रिपुरविषयमपदानम्। ध्वान्तशब्दो लक्षणया-विद्यावाची।।४८।।

विवरणम्

अथ गन्धर्वकृतसेवाप्रतिपादनपुरस्सरं भगवतः प्रयाणं वर्णयति—

विश्वावस्विति। ताराधिपखण्डधारी विश्वावसुप्राग्रसरैः सङ्गीयमानत्रिपुरापदानः अध्वानं ततार। ताराधिपश्चन्द्रः तस्य खण्डं शकलं धर्तुं शीलमस्येति। तथा। अनेन दूरस्थानामपि जनानां दर्शनसौकर्यं ध्वन्यते। विश्वावसुः प्राग्रसरः पुरस्सरो येषां तैः, विश्वावसुप्रभृतिभिरित्यर्थः। विश्वावसुरिति गन्धर्वाणामधीशितुः संज्ञा। सङ्गीयमानं सम्यग् गीयमानं त्रिपुरविषयमपदानम् अद्भुतपराक्रमो यस्य तथाभूतः सन्। अनेन मार्गे त्रिपुरदहनविषयं गानमुक्तम्। अध्वानं मार्गं ततार तीर्णवान्। 'तॄ प्लवनतरणयोरि'ति धातुः। गीयमानत्रिपुरदहनादिभगवच्चरितैर्विश्वावसुप्रभृतिभिर्गन्धर्वैः स्तूयमानो देवो मार्गमतिक्रान्तवानित्यर्थः। तेषां गानचातुर्यमाह—प्रवीणैरिति। निपुणैः। प्रकृष्टा वीणा येषां तैरिति वा। इत्थं देवानामुपदेवानां देवर्षीणां च भगवत्सेवां प्रतिपाद्य किं बहुना महाजनाः सर्वेऽपि तं सिषेविरे इत्याह—अध्वान्तविकारलङ्घ्य इति। 'क्षुब्धस्वान्तध्वान्त—' (७.२.१८)इत्यादिना तमसि निपातितो ध्वान्तशब्दस्तद्गतज्ञाननिरोधकत्वगुणयोगाद् विद्यायां गौणो वर्तते।

> अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते।
> लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता।।

इति न्यायात्। तस्य विकारास्तु परमार्थज्ञाननिरोधादयः, तद्रहिता अध्वान्तविकारास्तैर्लङ्घ्यः प्राप्यः। ये परमार्थज्ञानवन्तस्तैः सर्वैरपि सेव्य इत्यर्थः।।४८।।

खे खेलगामी तमुवाह वाहः
सशब्दचामीकरकिङ्किणीकः।
तटाभिघातादिव लग्नपङ्के
धून्वन् मुहुः प्रोतघने विषाणे।।४९।।

प्रकाशिका

अथ भगवद्गमनस्यालोकसाधारणशोभाभाजनत्वं भगवतो वृषाकृतेर्धर्मस्य स्वरूपं च श्रोतृजनपापनिर्हरणाय कारुणिकः कविरुपवर्णयति—

खे इति। खेलं मन्थरम्।।४९।।

विवरणम्

अथ भगवतो वाहनभूतस्य वृषाकृतेर्धर्मस्य भगवत्सेवाप्रकारमाह—

खे इति। वाहः खे तम् उवाह। वाहः वाहनभूत उक्षा खे आकाशे तं परमेश्वरम् उवाह ऊढवान्। गमनप्रकारमाह—खेलगामीति। खेलं मन्थरं यथा भवति तथा गन्तुं शीलमस्येति तथा। अनेन सर्वेषां दर्शनसौख्यमुक्तम्। लोकोत्तरशोभाभाजनत्वमाह—सशब्दचामीकरकिङ्किणीक इति। सशब्दाः शब्दसहिताः चामीकरमय्यः सुवर्णमय्यः किङ्किण्यो यस्य स तथा। गतिवशान्मेघमार्गप्राप्तौ विशेषमाह—प्रोतघने विषाणे मुहुः धून्वन् इति। प्रोताः गमनवेगवशात् सङ्घट्टिताः घना मेघा ययोः तथाभूते। विषाणे शृङ्गे मुहुः पुनः पुनः धून्वन् कम्पयन्। धूननमत्र मेघापनयनार्थम्। प्रोतघने विषाणे उत्प्रेक्षते—तटाभिघाताद् लग्नपङ्के इव इति। तदेष्वद्रिसानुषु। 'अथ लिङ्गत्रयें तटम्। प्राहुर्जलाशयप्रान्ते तीरे त्वन्येऽद्रिसानुनी'ति **केशवः**। अभिघातादभिहननाद्धेतोः लग्नानि पङ्कानि ययोः तथाभूते इव लक्ष्यमाणे। उक्षाणो हि यथा तटाभिघातलग्नानां पङ्कानामपनयनार्थं विषाणे मुहुर्मुहुः कम्पयन्ति, तथायमपि जनैरुत्प्रेक्ष्यमाण इत्यर्थः। अत्रापि धर्मस्वरूपस्य भगवद्वाहनभूतस्य वृषस्य स्वरूपकथनेन श्रोतृजनपापध्वंसः। कवेरभिप्रायः पूर्ववद् द्रष्टव्यः।।४९।।

स प्रापदप्राप्तपराभियोगं
नगेन्द्रगुप्तं नगरं मुहूर्तात्।
पुरोऽवलग्नैर्हरदृष्टिपातैः
सुवर्णसूत्रैरिव कृष्यमाणम्।।५०।।

प्रकाशिका

स इति। तच्छब्दो वाहं परामृशति। अप्राप्तेति हिमवत्प्रताप उक्तः। पुरोऽवलग्नैः पुरस्तादवपतितैः। कपिलैर्हरदृष्टिपातैर्हेतुभूतैः सुवर्णसूत्रैः कृष्यमाणमिव लक्ष्यमाणमित्यर्थः।।५०।।

विवरणम्

अथ भगवतो हिमवत्पुरप्राप्तिमाह—

स इति। सः मुहूर्ताद् नगेन्द्रगुप्तं नगरं प्रापत्। सः हरवाहनभूतो वृषराजः। मुहूर्तादल्पेन कालेनेत्यर्थः। नगेन्द्रेण हिमवता गुप्तं रक्षितम्। नगरम् ओषधिप्रस्थाभिधानं पुरम्। प्रापत् प्राप्तवान्। 'आप्लृ व्याप्तावि'ति धातोः 'पुषादिद्युताद्य्लृदितः परस्मैपदेषु'(३.१.५५) इत्यङि रूपम्। हिमवतः प्रभावातिशयं दर्शयन् पुरं विशिनष्टि—अप्राप्तपराभियोगमिति। अप्राप्तः कदाचिदपि न प्राप्तः पराभियोगः परैः शत्रुभिः कृतोऽभियोगः अभिभवो येन तत्। कदाचिदप्यननुभूतपराभिभवमित्यर्थः। अनेन पुरस्य निर्भयत्वप्रतिपादनमुखेन नित्यप्रवृत्तोत्सवत्वं ध्वन्यते। क्षणेन प्राप्यमाणं पुरमुत्प्रेक्षते—पुरः अवलग्नैः हरदृष्टिपातैः सुवर्णसूत्रैः कृष्यमाणम् इव इति। पुरः पुरस्ताद् अवलग्नैरवपतितैः हरस्य दृष्टिपातैर्दृष्टिप्रचारैर्हेतुभिः सुवर्णमयैः सूत्रैः पाशैः कृष्यमाणमिव लक्ष्यमाणम्। हरदृष्टिपातानां कपिलत्वात्सुवर्णसूत्रत्वोत्प्रेक्षा। नेत्राणां कपिलवर्णत्वं च महापुरुषलक्षणम्। देवीनिवासभूतहिमवत्पुरदर्शनोत्सुकस्य भगवतो दृष्टिपातानामग्रभागस्थिते हिमवत्पुरे निबद्धत्वात् सूत्रैः आकृष्य समीपं नीयमानमिव लक्ष्यमाणमित्यर्थः। वेगेन गमने पुरोभागस्थिते वस्तुन्यागमनप्रतीतिरुत्प्रेक्षाहेतुः। वेगातिशयप्रतीतिश्च फलम्।।५०।।

तस्योपकण्ठे घननीलकण्ठः
कुतूहलादुन्मुखपौरदृष्टः।
स्ववाहचिह्नादवतीर्य मार्गा-
दासन्नभूपृष्ठमियाय देवः।।५१।।

प्रकाशिका

तस्येति। उपकण्ठे उपशल्ये। स्ववाहचिह्नाद् मेघचिह्नान्मार्गाद्, मेघपथादित्यर्थः। मेघवाहनकल्पे भगवान् विष्णुर्मेघो भूत्वा हरमवहदिति पुराणे श्रवणादियमुक्तिः। आसन्नभूपृष्ठत्वं गमनस्य प्रत्युद्गमनसौकर्यार्थम्।।५१।।

विवरणम्

इत्थं हिमवत्पुरपर्यन्तमुपगतस्य देवस्य हिमवत्प्रत्युद्गमनसौकर्यार्थमवस्थानमाह—

तस्येति। देवः तस्य उपकण्ठे स्ववाहचिह्नाद् मार्गाद् अवतीर्य आसन्नभूपृष्ठम् इयाय। देवः परमेश्वरः तस्य हिमवत्पुरस्य उपकण्ठे समीपे, ग्रामान्त इत्यर्थः। स्ववाहचिह्नात् स्वस्य वाहो वाहनं स्ववाहः, स्ववाह एव चिह्नं लाञ्छनं यस्य तादृशान्मार्गाद्, मेघमार्गादित्यर्थः। हरस्य मेघवाहनत्वं प्रसिद्धं **हरिपुराणे**—पुरा किल मेघवाहनकल्पे नारायणो मेघो भूत्वा देवासुरयुद्धे युद्धसन्नद्धं हरमुवाहेति। अत

एव कपर्दी मेघवाहन इति प्रोक्तम्। अवतीर्य अवरुह्य। आसन्नभूपृष्ठमिति गमनक्रियाविशेषणम्। आसन्नं भूपृष्ठं भूतलं यथा भवति तथा। इयाय जगाम। कैलाशशिखरादारभ्य हिमवद्धामान्तपर्यन्तं मेघमार्गेणैव गत्वा तस्मादारभ्य हिमवतः प्रत्युद्गमनसौकर्यार्थं क्षितितलसमीपव्योपमार्गेणैव गतवानित्यर्थः। भगवद्रूपस्य दिदृक्षूणां मनोहरत्वमाह—घननीलकण्ठ इति। घनो मेघः तद्वन्नीलः कृष्णवर्णः कण्ठो यस्य स तथा। सजलजलधरश्यामलगलप्रदेश इत्यर्थः। तादृशभगवदागमनवेलायां हिमवत्पुरवासिनां भगवद्दर्शनप्रकारमाह—कुतूहलाद् उन्मुखपौरदृष्ट इति। कुतूहलात् कौतुकात् उन्मुखैरूर्ध्वमुखैः पौरैर्हिमवत्पुरवासिभिः दृष्टः वीक्षितः। मेघमार्गादवतरणसमय एव पुरवासिभिः कौतुकातिशयादीक्ष्यमाण इत्यर्थः।।५१।। [मल्लिनाथः स्वबाणचिह्नादिति पठति]

तमृद्धिमद्बन्धुजनाधिरूढै-
वृन्दैर्गजानां गिरिचक्रवर्ती।
प्रत्युज्जगामागमनप्रतीतः
प्रफुल्लवृक्षैः कटकैरिव स्वैः।।५२।।

प्रकाशिका

प्रत्युद्गमनमाह—

तमिति। ऋद्धिर्वस्त्राभरणादिः। तत्प्रतिवस्तुतया प्रफुल्लत्वमुपात्तम्। प्रतीतो हृष्टः।।५२।।

विवरणम्

अथ हिमवतः प्रत्युद्गमनप्रकारमाह—

तमिति। गिरिचक्रवर्ती गजानां वृन्दैः तं प्रत्युज्जगाम। गिरिचक्रवर्ती गिरिराजः। गजानां वृन्दैः समूहैः, प्रत्युद्गमनसाधनैः। तं परमेश्वरम्। प्रत्युज्जगाम प्रत्युद्गतवान्। गजवृन्दानां शोभातिशयजनकत्वमाह—ऋद्धिमद्बन्धुजनाधिरूढैरिति। ऋद्धिर्वस्त्राकल्पादिः तद्वद्भिः बन्धुजनैरधिरूढैः कृतारोहणैः। तादृशे प्रत्युद्गमने हेतुमाह—आगमनप्रतीत इति। आगमनेन निजगृहप्राप्त्या प्रतीतः सन्तुष्टः। तादृशं प्रत्युद्गमनमुत्प्रेक्षते—प्रफुल्लवृक्षैः स्वैः कटकैः इव। प्रफुल्ला विकसितकुसुमाः वृक्षा येषु तैः स्वैः आत्मीयैः कटकैः प्रस्थैरिव। 'कटकोऽस्त्री नितम्बोऽद्रेः स्नुः प्रस्थः सानुरस्त्रियामि'त्यमरः। अत्र गजवृन्दप्रतिवस्तुत्वेन कटकानामुपादानं, बन्धुजनप्रतिवस्तुत्वेन वृक्षाणां, वस्त्राकल्पादिप्रतिवस्तुत्वेन प्रफुल्लत्वस्येति विभागः।।५२।।

वर्गावुभौ देवमहीधराणां
द्वारे पुरस्योद्घटितापिधाने।
समीयतुर्दूरविसर्पिघोषौ
भिन्नैकसेतू पयसामिवौघौ॥५३॥

प्रकाशिका

वर्गाविति। उद्धटितापिधाने उत्सारितकवाटे। अनेन पूर्वं जनसञ्चारार्थं किञ्चिद्विवृतं पुरद्वारमतिविवृतं कृतमिति प्रतीयते। पुरद्वारप्रतिवस्तुतया सेतुरुपात्तः।।५३।।

विवरणम्

अथ महेश्वरमहीधरयोः समागमं वर्णयिष्यन्नादौ तत्सैनिकानां समागममाह—

वर्गाविति। पुरस्य द्वारे उद्घटितापिधाने देवमहीधराणाम् उभौ वर्गौ समीयतुः। पुरस्य द्वारे गोपुरे 'पुरद्वारं तु गोपुरमि'त्यमरः। उद्घटितं विवृतम् अपिधानं कवाटं यस्य तथाविधे सति देवानामिन्द्रादीनां महीधराणां महामेरुप्रभृतीनां च वर्गौ समूहौ समीयतुः समागमं प्रापतुः। गोपुरकवाटे जनसञ्चारार्थं किमपि विवृते सति उभावपि सैनिकजनौ परस्परसम्मर्दादेव कवाटमतिविवृतं विधाय परस्परमेकीबभूवतुरित्यर्थः। अत्रोपमां दर्शयति—भिन्नैकसेतू पयसाम् ओघौ इव इति। भिन्नः भग्नः एकः साधारणः सेतुर्ययोः तौ पयसां जलानाम् ओघौ प्रवाहाविव। यथा लवणजलशुद्धजलयोः परस्परं संसर्गभयान्मध्ये विहिते सेतौ येन केनचित् कारणेन किमपि भग्ने सति उभावपि जलप्रवाहौ सेतुमुन्मूल्य परस्परसङ्क्रान्तौ भवतः तथेत्यर्थः। अत्र साधारणं धर्ममाह—दूरविसर्पिघोषाविति। दूरे अतिदूरे विसर्पणं कर्तुं शीलमस्येति दूरविसर्पी तथाविधो घोषः गजतुरगसैनिकादिघोषः जलप्रवाहादिघोषश्च ययोः तौ तथा। अत्र कवाटप्रतिवस्तुत्वेन सेतुरुपात्तः। सैनिकद्वयप्रतिवस्तुत्वेन जलप्रवाहद्वयम्। उपमया वर्गद्वयस्यातिमहत्त्वं सूचितम्।।५३।।

ह्रीमानभूद् भूमिधरो हरेण
त्रैलोक्यवन्द्येन कृतप्रणामः।
पूर्वं महिम्ना स हि तस्य दूरा-
दावर्जितं नात्मशिरो विवेद॥५४॥

प्रकाशिका

ह्रीमानिति। अत्यन्तमनुचितं मयैतदङ्गीक्रियत इति ह्रीर्जाता। उचितमेव तु संवृत्तमस्य, तत् त्वसौ न विवेदेत्यर्थः। श्रीमहाभारतेऽपीदृशः प्रयोगोऽस्ति। 'यथार्हां केशवे वृत्तिमवशाः प्रतिपेदिर' इति।।५४।।

विवरणम्

अथ हरमहीधरयोः समागमप्रकारमाह—

ह्रीमानिति। हरेण कृतप्रणामः भूमिधरः ह्रीमान् अभूत्। हरेण परमेश्वरेण कृतः प्रणामो यस्मै तथाविधः भूमिधरः हिमवान् ह्रीमान् लज्जावानभूत्। श्वसुरत्वेन भाविनो हिमवतो गुरुत्वसम्भवात् तदुचिते नमस्कारे हरेण कृते सति अत्यन्तमनुचितं मयेदङ्गीक्रियत इति हिमवतो लज्जा सञ्जातेत्यर्थः। लज्जाया हेतुमाह—त्रैलोक्यवन्द्येनेति। त्रैलोक्येनापि वन्द्यो मा नमति, मया चेदमिदानीमङ्गीक्रियत इति लज्जा सञ्जातेत्यर्थः। हरदर्शनोचितसमुदाचारस्तु पूर्वमेवावशेन हिमवता कृत इत्याह—सः हि पूर्वं तस्य महिम्ना दूराद् आवर्जितम् आत्मशिरः न विवेद इति। सः हिमवान् तुशब्दार्थे हिशब्दः। पूर्वं हरप्रणामात् पूर्वम्। हरदर्शनसमय एवेत्यर्थः। तस्य हरस्य महिम्ना प्रभावेण दूरादावर्जितम्। अत्यन्तमानमितम्। दूरमावर्जितमिति पाठेऽपि स एवार्थः। आत्मशिरः आत्मनः शिरः न विवेद न ज्ञातवान्। हरदर्शनसमय एव हरप्रभावादात्मशिरः स्वयमेव प्रणतमासीत्। तत् त्वसौ न विवेदेत्यर्थः। ईदृशः प्रयोगो महाभारतेऽपि श्रूयते। यथा भगवतः श्रीकृष्णस्य दौत्यं कर्तुं सुयोधनगृहप्रवेशे 'यथार्हां केशवे वृत्तिमवशाः प्रतिपेदिरे' इति।।५४।।

स प्रीतियोगाद् विकसन्मुखश्री-
र्जामातुरग्रेसरतामुपेत्य।
प्रावेशयन्मन्दिरमृद्धमेन-
मागुल्फगाढार्पितमार्गपुष्पम्।।५५।।

प्रकाशिका

स इति। अग्रेसरतामुपेत्य उत्सारणकर्मव्यापृत इत्यर्थ। मन्दिरं पुरम्। ऋद्धं मणिमुक्तादिचित्रितम्। गुल्फौ पादग्रन्थिपुटिके।।५५।।

विवरणम्

अथ भगवतः श्वशुरगृहप्रवेशं वर्णयति—

स इति। सः जामातुः अग्रेसरताम् उपेत्य एनं मन्दिरं प्रावेशयत्। सः हिमवान् जामातुः पुत्र्याः पतेः। 'जामाता दुहितुः पतिरि'त्यमरः। जामातृशब्दोऽयं भाविलक्षणया परमेश्वरमाह। अग्रे सरति गच्छतीत्यग्रेसरः तस्य भावस्तत्ता ताम्। उपेत्य प्राप्य। उत्सारणकर्म कृत्वेत्यर्थः। एनं परमेश्वरं मन्दिरं पुरं प्रावेशयत् प्रवेशयामास। गौरवातिशयात् स्नेहातिशयाच्च स्वयमेव जनतामुत्सारयन् गिरिचक्रवर्ती परमेश्वरं निजगृहं प्रवेशयामासेत्यर्थः। परमेश्वराग्रेरस्य हिमवतः प्रसादातिशयमाह—प्रीतियोगाद् विकसन्मुखश्रीः इति। प्रीत्या प्रसादेन योगः प्रीतियोगः तस्माद्धेतोः। विकसन्मुखश्रीः विकसन्ती वर्धमाना मुखश्रीः मुखशोभा यस्य तथा। हिमवत्पुरस्य परमेश्वरस्यापि विस्मयकरत्वमाह—ऋद्धमिति। मणिमुक्तादिचित्रितमित्यर्थः। भगवदागमनवेलायां पुरन्ध्रीणामादरातिशयमाह—आगुल्फगाढार्पितमार्गपुष्पमिति। गुल्फौ पादजङ्घायाः सन्धिपुटिके। आगुल्फं गुल्फपर्यन्तम्। अभिविधावाङ्। गाढं निविडं यथा भवति तथार्पितं पुरन्ध्रीजनैर्विकीर्णं मार्गे पुष्पं मार्गविकरणीयं पुष्पं यत्र तत्। अनेन मन्दिरविशेषणद्वयेन हिमवतः समृद्ध्यतिशयः प्रीत्यतिशयश्च ध्वन्यते।।५५।।

तस्मिन् मुहूर्ते पुरसुन्दरीणा-
मीशानसन्दर्शनलालसानाम्।
प्रासादमालासु बभूवुरित्थं
त्यक्तान्यकार्याणि विचेष्टितानि॥५६॥

प्रकाशिका

तत्क्षणे पुरजनवृत्तान्तं सप्तभिः श्लोकैराह—

तस्मिन्निति। इत्थमिति वक्ष्यमाणप्रकारपरामर्शः। त्यक्तान्यकार्याणीति लालसत्वमुपपादितम्। अत्र नायकोत्कर्षप्रतिपादनपरे प्रासङ्गिके पुराङ्गनावृत्तान्तोपवर्णने सम्भ्रमकृतमौत्सुक्यं भावः।।५६।।

विवरणम्

भगवतः समागमनमये पुरस्त्रीजनवृत्तान्तमाह सप्तभिः श्लोकैः। तत्राद्येन श्लोकेन तमेव सामान्येनाह—

तस्मिन्निति। तस्मिन् मुहूर्ते ईशानसन्दर्शनलालसानां पुरसुन्दरीणां प्रासादमालासु इत्थं विचेष्टितानि बभूवुः। तस्मिन् मुहूर्ते भगवतः पुरप्रवेशसमये। मुहूर्तशब्देन कालस्याल्पत्वं सूचयता क्षणान्तरे तद्दर्शनस्य दुर्लभत्वप्रतिपादनमुखेन

वक्ष्यमाणस्य सम्भ्रमस्योपपत्तिर्दर्शिता। ईशानः परमेश्वरः, तस्य सन्दर्शने सम्यग्दर्शने लालसा(सम्) औत्सुक्यं यासां तासाम्। 'लालसे प्रार्थनौत्सुक्ये' इत्यमरः। पुरसुन्दरीणां पुरस्त्रीणाम्। प्रासादानां सौधानां मालासु समूहेषु। इत्थं वक्ष्यमाणप्रकारेण विचेष्टितानि विविधानि चेष्टितानि व्यापाराः बभूवुः। ईशानसन्दर्शनलालसत्वमेव स्फुटयति—त्यक्तान्यकार्याणीति। त्यक्तानि उपेक्षितानि अन्यानि ईशानसन्दर्शनव्यतिरिक्तानि प्रकृतान्यतिप्रियाण्यलङ्कारकार्याण्यपि यैः तादृशानि विचेष्टितानि बभूवुरित्यर्थः। परमेश्वरे साक्षादेव दर्शनपदवीमागते सति पुरवधूजनाः प्रकृतं प्राधनकार्यमपहाय सत्वरं तद्दर्शनयोग्यं प्रासादजालमारुरुहुरित्यर्थः। अत्र पुरवधूवृत्तान्तप्रकरणे सम्भ्रमोपकृतमौत्सुक्यं प्रतिपाद्यते।।५६।।

आलोकमार्गं सहसा व्रजन्त्या
कयाचिदुद्वेष्टनवान्तमाल्यः।
बन्धुं न सम्भावित एव तावत्
करेण रुद्धोऽपि च केशहस्तः।।५७।।

प्रकाशिका

आलोकेति। आलोकमार्गं जालमार्गम्। सहसा अविचारितम्। उद्वेष्टनेन गमनरभसगलितबन्धत्वेन वान्तं निर्गतं माल्यं यस्य। न सम्भावितो नाकलितः स्मृतः। तावदालोकमार्गावधीत्यर्थः। केशहस्तः केशचयः। करेण रुद्धोऽपि न केशहस्त इति पाठे तावच्छब्देन क्रम उक्तः। केशहस्तस्तावद् बन्धुं न सम्भावित एव। स्वाधीनेन करतलेन रोधोऽप्यस्य न कृत इत्यर्थः।।५७।।

विवरणम्

इत्थंशब्दोक्तान् प्रकारानेव प्रपञ्चयति पञ्चभिः श्लोकैः। तत्र कस्याश्चिदवस्थां दर्शयति—

आलोकेति। सहसा आलोकमार्गं व्रजन्त्या कयाचित् करेण रुद्धः अपि च केशहस्तः तावद् बन्धुं न सम्भावितः एव। सहसा अविचारितम्। आलोकाय भगवदालोकनाय मार्गः आलोकमार्गः तम्। गवाक्षमार्गमित्यर्थः। व्रजन्त्या गच्छन्त्या कयाचिन्नार्या करेण हस्तेन रुद्धोऽपि च निरुद्धः सन्नपि च। निरोधार्थं केशहस्तेषु हस्तव्यापारे कृतेऽपि च बन्धुं न सम्भावित इति विरोधं वक्तुमपिचत्येवं शब्दद्वयम्। केशहस्तः केशचयः, प्रशस्तः केशो वा। 'हस्तयष्टिलतादयः प्रशंसावचना' इति वचनात्। अनेनात्यन्तमादरपदत्वेऽप्यनादरः सूच्यते। तावत् तदवधि। आलोकमार्गावधीत्यर्थः। बन्धुं बन्धनं विधातुं न सम्भावितः न ज्ञातः। न स्मृत

इत्यर्थः। एवशब्दः स्मरणलेशमपि व्यावर्तयति। बन्धनाभावजातं दोषमाह—उद्वेष्टनवान्तमाल्य इति। उद्गतं वेष्टनं यस्य स तथा, अत एव वान्तमाल्यश्च। वान्तानि उद्गीर्णानि माल्यानि पुष्पाणि येन स तथा। अयमभिप्रायः—केशे कुसुमानि निधाय केशाग्रैरेव किञ्चित् परिवेष्ट्य यावद् दाम्ना बन्धुमारभ्यते, तावद् भगवदागमनकोलाहलमाकर्ण्य प्रकृतं केशबन्धनं परित्यज्य सत्वरमुत्थाय प्रस्थितायाः कस्याश्चित् केशहस्ते गमनवेगवशाद् विगलितपरिवेष्टने सति केशकुसुमानि मार्गकुसुमतां प्रपेदिर इति।।५७।।

प्रसाधिकालम्बितमग्रपाद-
माक्षिप्य काचिद् द्रवरागमेव।
उत्सृष्टलीलागतिरा गवाक्षा-
दलक्तकाङ्कां पदवीं ततान॥५८॥

प्रकाशिका

प्रसाधिकेति। अग्रपादमिति। 'राजदन्तादिषु परम्' (२.२.३१) इत्युपसर्जनस्य पादपदस्य परनिपातः। तदपाठे 'हस्ताग्राग्रहस्तादयो गुणगुणिनोर्भेदाभेदात्'(५.२.२०) इति वामनोक्तदिशा परनिपातः। येन 'पादाग्रं प्रपदमि'त्यमरसिंहवचनमपि संगतम्। द्रवरागमशुष्कलाक्षारसम्। लीला विलासः।।५८।।

विवरणम्

अन्यस्याः समवस्थामाह—

प्रसाधिकेति। काचित् प्रसाधिकालम्बितम् अग्रपादम् आक्षिप्य गवाक्षाद् आ पदवीम् अलक्तकाङ्कां ततान। काचित् पुरवधूः प्रसाधिकयालङ्कर्त्र्यालम्बितं प्रसाधनार्थं गृहीतमग्रपादं पादाग्रम्। राजदन्तादिषु पाठादुपसर्जनभूतस्य पादपदस्य परनिपातः। अमरसिंहस्तु तस्मिन्ननन्तर्भावमभ्युपगम्य 'पादाग्रं प्रपद'मित्येवोक्तवान्। तन्मतेन तदपाठपक्षे 'हस्ताग्राग्रहस्तादयो गुणगुणिनोर्भेदाभेदादि'ति वामनोक्तक्रमेण परनिपातः। आक्षिप्य बलादाकृष्य। प्रसाधिकाकरादिति शेषः। गवाक्षाद् वातायनाद् आ। मर्यादायामाङ्। पदवीं मार्गम् वातायनावधिभूतं मार्गमित्यर्थः। अलक्तकाङ्काम् अलक्तको लाक्षारस एवाङ्कः चिह्नं यस्याः तादृशीम्। ततान चकार। पदव्या अलक्तकाङ्कत्वकरणे हेतुं पादविशेषणेनाह—द्रवरागमेव इति। द्रवः अशुष्कः रागः लाक्षारसो यस्मिन् तादृशमेव। स्वाभाविकं सविलासयानमपि तदानीं सम्भ्रमात् परित्यक्तमित्याह—उत्सृष्टा त्यक्ता लीलया विलासेन गतिर्यया सा तथा।।५८।।

विलोचनं दक्षिणमञ्जनेन
सम्भाव्य तद्वञ्चितवामनेत्रा।
तथैव वातायनन्निकर्षं
ययौ शलाकामपरा वहन्ती॥५९॥

प्रकाशिका

विलोचनमिति। दक्षिणमिति सम्भ्रमानुभावः। प्रसिद्धवामोपक्रमलङ्घनमुक्तम्। क्रमे तु किल प्रमाणं श्रुतिः। तेनाञ्जनेन वञ्चितं वामनेत्रं यया। प्रतिश्रुत्य अदानं चात्र वञ्चनम्। यथाह भोजराजः—

अदानं च प्रतिश्रुत्य विसंवादनमेव च।
कालस्य हरणं चाहुः प्रत्यादानं च वञ्चनम्।।

इति। प्रतिश्रवश्च नेत्रयोरविशेषेणाञ्जनदानाध्यवसायः।।५९।।

विवरणम्

अथापरस्याः सम्भ्रमातिशयमाह—

विलोचनमिति। अपरा दक्षिणं विलोचनम् अञ्जनेन सम्भाव्य तथा एव वातायनसन्निकर्षं ययौ। अपरा पुरवधूः। आदौ दक्षिणं नेत्रम् अञ्जनेन सम्भाव्य मानयित्वा। सम्भ्रमस्यानुभावोऽयम्, अञ्जनविलेपने श्रुतिप्रसिद्धस्य वामोपक्रमस्यातिक्रमात्। तथैव, वामनयने किञ्चिदप्यञ्जनमनर्पयित्वेत्यर्थः। अनेन पुनरपि सम्भ्रमातिशय उक्तः। वातायनस्य गवाक्षस्य सन्निकर्षं समीपं ययौ। न केवलं तस्यास्तदानीं लोकवेदविरोधो दोषो जातः, अपि तु वञ्चनादोषोऽपीत्याह—तद्वञ्चितवामनेत्रेति। तेनाञ्जनेन करणेन वञ्चितं वामनेत्रं यया सा तथा। प्रतिश्रुत्य अदानमिह वञ्चनमुच्यते। यदाह भोजराजः[सरस्वतीक.५.५७]—

अदानं च प्रतिश्रुत्य विसंवादनमेव च।
कालस्य हरणं चाहुः प्रत्यादानं च वञ्चनम्।।

इति। उभयोरपि नेत्रयोरविशेषेणाञ्जनार्पणस्य सङ्कल्पितत्वात् प्रतिश्रुत्य अदानमिह सञ्जातम्। अञ्जनार्पणार्थमुद्धृतायाः शलाकायाः समर्पणमपि सम्भ्रमान्न कृतमित्याह—शलाकां वहन्तीति। शलाकामञ्जनार्पणसाधनं वहन्ती दधाना।।५९।।

जालान्तरप्रेषितदृष्टिरन्या
प्रस्थानभिन्नानवबद्धनीविः।
नाभिप्रविष्टाभरणप्रभेण
हस्तेन तस्थाववलम्ब्य वासः॥६०॥

प्रकाशिका

जालेति। प्रस्थानेन भिन्ना स्रस्ता अनवबद्धा च नीविर्यस्याः। 'नीविराग्रन्थनं नार्या जघनस्थस्य वासस' इति नाममाला।।६०।।

विवरणम्

कस्याश्चिदौत्सुक्यातिशयमाह—

जालेति। अन्या प्रस्थानभिन्नानवबद्धनीविः हस्तेन वासः अवलम्ब्य तस्थौ। अन्या पुरसुन्दरी प्रस्थानेन भिन्ना स्रस्ता अनवबद्धा अकृतबन्धना च नीविर्यस्याः तथाभूता सती। 'नीविराग्रथनं नार्या जघनस्थस्य वामसः' इति नाममाला। हस्तेन करेण वासः वसनम् अवलम्ब्य गृहीत्वा तस्थौ। परमेश्वरदर्शनौत्सुक्यवशाद् गमनवेगगलितबन्धनाया नीव्या बन्धनमप्यकुर्वाणा हस्तेन करेण वासः वसनम् अवलम्ब्य गृहीत्वा तस्थौ। परमेश्वरदर्शनौत्सुक्यवशाद् गमनवेगगलितबन्धनाया नीव्या बन्धनमप्यकुर्वाणा हस्तेन वस्त्रमवलम्ब्यैव स्थितवतीत्यर्थः। तत्र हेतुमाह—जालान्तरप्रेषितदृष्टिरिति। जालस्य गवाक्षस्य। 'वातद्वारं गवाक्षः स्याज्जालं वातायनं तथे'ति **भोजः**। तस्यान्तरेण मध्येन प्रेषिता प्रेरिता दृष्टिर्यया सा तथा। औत्सुक्यातिशयकृतं हस्तस्यापि निश्चलत्वमाह—नाभिप्रविष्टाभरणप्रभेणेति। नाभौ प्रविष्टा प्राप्ता आभरणस्य पर्युप्तरत्नस्य कटकस्य प्रभा यस्य तादृशेन हस्तेन। नहि हस्तस्य किञ्चिच्चलने सति कटकरत्नप्रभा नाभिकुहरं प्रविशति।।६०।।

अर्धाचिता सत्वरमुत्थितायाः
पदे पदे दुर्निमिते गलन्ती।
कस्याश्चिदासीद् रशना तदानी-
मङ्गुष्ठमूलार्पितसूत्रशेषा॥६१॥

प्रकाशिका

अर्धेति। आचयनं गुम्फनम्। दुर्निमिते दुःखेन न्यस्ते। 'डुमिञ् प्रक्षेप' इति धातुः। गलन्ती गलन्मणिरित्यर्थः। उपविश्य प्रसारितपदाङ्गुष्ठमूलसंयमितैकदेशे सूत्रे

रशनामणीन् ग्रथ्नत्यास्तदागमनश्रवणरभसोत्थिताया गच्छन्त्या योषितः तदनुबन्धवशेन दुःखन्यस्तेषु पदेषु क्रमशो गलन्मणे रशनायाः सूत्रमेवावशिष्टमासीदित्यर्थः।।६१।।

विवरणम्

अन्यस्याः सम्भ्रमवशाद् रशनापरित्यागोऽपि जात इत्याह—

अर्धेति। तदानीं कस्याश्चिद् रशना अङ्गुष्ठमूलार्पितसूत्रशेषा आसीत्। रशना काञ्ची अङ्गुष्ठस्य पादाङ्गुष्ठस्य मूले अर्पितं बद्धं सूत्रमेव शेषमवशिष्टं यस्याः सा तथा। सूत्रमात्रावशेषत्वप्राप्तौ हेतुमाह—अर्धाचितेत्यादिना। अर्धाचिता अर्धमाचिता गुम्फिता। कुत्राप्युपविश्य रशनामणिगुम्फनार्थं पादाङ्गुष्ठे सूत्रैकदेशमुपनिबध्य पादं प्रसार्य रशनामणीनामर्धगुम्फनमनेनोक्तम्। पुनश्च हरगमनकोलाहलश्रवणात् सत्वरमुत्थितायाः। सत्वरमित्युत्थानक्रियाविशेषणम्। त्वरासहितं यथा भवति तथा कृतोत्थानायाः। अत एव पदे पदे गलन्ती। पदे पदे सर्वेष्वपि पदावस्थानेषु। गलन्ती गलन्मणिरित्यर्थः। रशनानुबन्धवशात् पादावस्थानस्यापि सौकर्याभावमाह—दुर्निमित इति। दुःखेन निमिते न्यस्ते। 'डुमिञ् प्रक्षेपण' इति धातुः। अत्र बहुमणिगणाकीर्णाया रशनायाः परित्यागस्य रशनानुबन्धवशात् पदानां दुर्निमितत्वस्य चाज्ञानमौत्सुक्यानुभावः, सत्वरोत्थानं तु सम्भ्रमस्येति विभागः।।६१।।

तासां मुखैरासवगन्धगर्भै-
र्व्याप्तान्तराः सान्द्रकुतूहलानाम्।
विलोलनेत्रभ्रमरैर्गवाक्षाः
सहस्त्रपत्रावरणा इवासन्।।६२।।

प्रकाशिका

तासामिति। व्याप्तान्तराः निरवकाशीकृता इत्यर्थः। सान्द्रकुतूहलानामिति व्याप्तान्तरालत्वे हेतुः। मुखस्य विशेषणद्वयेन कमलसादृश्यं द्योत्यते। तच्चोत्प्रेक्षाया हेतुः। सहस्त्रपत्रमयमावरणं कपाटं येषाम्। तद्भावस्य चोत्प्रेक्षा। मुखानां च निश्चलत्वप्रतीतिः।।६२।।

विवरणम्

इत्थमुपगतानां पुरसुन्दरीणां परमेश्वरदर्शनप्रकारं भङ्ग्यन्तरेणाह—

तासामिति। तासां मुखैः व्याप्तान्तराः। गवाक्षाः सहस्त्रपत्रावरणाः इव आसन्। तासां पुरसुन्दरीणां मुखैर्वदनैः। व्याप्तान्तराः व्याप्तं निरवकाशीकृतमन्तरं

मध्यं येषां ते तथा। गवाक्षाः वातायनानि। सहस्रं पत्राणि दलानि सन्त्यस्येति सहस्रपत्रं कमलम्। सहस्रशब्दश्चायं बहुसङ्ख्यापरः, न सहस्रसङ्ख्यापरः। सहस्रपत्रमयमावरणं कवाटं येषां तथाविधा इवासन्। अत्र गवाक्षाणां सहस्रपत्रावरणत्वमुत्प्रेक्ष्यते। मुखानां मनोहरत्वमुत्प्रेक्षाहेतुः। निश्चलत्वप्रतीतिः फलम्। तेन च दर्शनौत्सुक्यं ध्वन्यते। मुखस्य कमलसाम्यमेव विशेषणद्वयेन दर्शयन्नुत्प्रेक्षायां हेतुमेव प्रकटयति—आसवगन्धगर्भैरित्यादिना। आसवस्य मधुनः गन्धः गर्भे अन्तर्भागे येषां तैः। तथा विलोलनेत्रभ्रमरैः विलोलानि चञ्चलानि नेत्राणि नयनान्येव भ्रमराः भृङ्गाः येषु तैः। गवाक्षाणां तन्मुखव्याप्तान्तरालत्वे हेतुमाह—सान्द्रकुतूहलानामिति। सान्द्रं निबिडं कुतूहलं कौतुकं यासां तासाम्।।६२।।

तावत् पताकाकुलमिन्दुमौलि-
रुत्तोरणं राजपथं प्रपेदे।
प्रासादशृङ्गाणि दिवापि कुर्व-
ञ्ज्योत्स्नाभिषेकद्विगुणच्छवीनि॥६३॥

प्रकाशिका

तावदिति। द्विगुणच्छवीकरणं प्रागेव सुधाधवलत्वात्। अत्रोपपादकमिन्दुमौलित्वम्।।६३।।

विवरणम्

इत्थं पुरवधूवृत्तान्तमुपसंहृत्य प्रकृतं भगवद्वृत्तान्तमेव प्रस्तौति—

तावदिति। इन्दुमौलिः तावद् राजपथं प्रपेदे। इन्दुमौलिश्चन्द्रशेखरः। तावद् यावदेवं पुरवधूवृत्तान्तः प्रस्तुतः तावदित्यर्थः। राजपथं राजमार्गं प्रपेदे प्राप्तवान्। राजपथस्य मङ्गलोपकरणरमणीयत्वमाह—पताकाकुलम् इति। पताकाभिराकुलं संकुलम्। तथा उत्क्षिप्ततोरणमित्यर्थः। भगवदागमनप्रत्युत्पन्नं शोभाधिक्यमाह—दिवापि प्रसादशृङ्गाणि ज्योत्स्नाभिषेकद्विगुणच्छवीनि कुर्वन् इति। दिवेत्यह्नो वाचकमव्ययम्। अहन्यपीत्यर्थः। प्रासादानां सौधानां शृङ्गाणि शिखराणि। ज्योत्स्नया चन्द्रिकया योऽभिषेकः सङ्क्षालनं तेन द्विगुणा वर्धिता छविः शोभा येषां तथाविधानि कुर्वन् सम्पादयन्। भगवत इन्दुमौलित्वमत्र हेतुः। अत एवेन्दुमौलिरित्युक्तम्। भगवत्कोटीरगतस्य तस्य तत्प्रभावादेव दिवापि ज्योत्स्नाप्रसारणोपपत्तिः। प्रागेव सुधाधवलानि प्रासादशृङ्गाणि शिरश्चन्द्रचन्द्रिकया द्विगुणितधावल्यानि कुर्वन् परमेश्वरो राजमार्गमाससादेत्यर्थः।।६३।।

तमेकदृश्यं नयनैः पिबन्त्यो
नार्यो न जग्मुर्विषयान्तराणि।
तथाहि शेषेन्द्रियवृत्तिरासां
विनोपघातेन जडीबभूव॥६४॥

प्रकाशिका

तमिति। एकदृश्यं दर्शनीयेषु प्रधानम्। पानोपचारेण तृष्णातिशयो ध्वन्यते। विषयान्तराणि शब्दादीनि। एतदुपपादयति—तथाहीति। वृत्तिः श्रवणादिरूपो व्यापारः। विनोपघातेन शक्तिनिरोधमन्तरेण। जडीबभूव कुण्ठिताभवत्। देवदर्शनसमये लोचनकिङ्करीभावमुपगते मनसि ततश्च कुण्ठेषु शेषेन्द्रियव्यापारेषु सन्निहितान्यपि विषयान्तराणि पुराङ्गना नाजानन्नित्यर्थः।।६४।।

विवरणम्

अथ पुरवधूनां भगवद्दर्शनौत्सुक्यं वर्णयति—

तमिति। एकदृश्यं तं नयनैः पिबन्त्यः नार्यः विषयान्तराणि न जग्मुः। एकं प्रधानभूतं दृश्यं दर्शनीयम्। दर्शनीयेषु प्रधानभूतमित्यर्थः। तं परमेश्वरं नयनैः नेत्रैः। पिबन्त्यः सतृष्णमवलोकयन्त्य इत्यर्थः। यथा पिपासार्दिता जनाः सलिलं सतृष्णं पिबन्ति, तथावलोकयन्त्य इति दर्शने पानोपचारस्याभिप्रायः। एकदृश्यत्वमत्र हेतुः। नार्यः पुरसुन्दर्यः विषयान्तराणि शब्दादीनि। भगवद्रूपव्यतिरिक्तं रूपमिन्द्रियान्तरविषयभूतं शब्दस्पर्शगन्धरसप्रपञ्चेष्वित्यर्थः। न जग्मुः नाधिगतवत्यः। तत्तदिन्द्रियैस्तत्तद्विषयं न जगृहुरित्यर्थः। एतदेवोपपादयति—तथाहीत्यादिना। तथाहि आसां शेषेन्द्रियवृत्तिः उपघातेन विना जडीबभूव। तथाहि तेन प्रकारेण वर्तमानत्वादित्यर्थः। आसां पुरसुन्दरीणां शेषाणाम् अवशिष्टानामिन्द्रियाणां नेत्रव्यरिक्तानां श्रोत्रादीनां वृत्तिः श्रवणादिरूपा प्रवृत्तिः। उपघातेन विना शक्तिव्याघातमन्तरेण जडीबभूव। अभूततद्भावे च्विः। अकुण्ठितापि कुण्ठिताभवदित्यर्थः। परमेश्वरदर्शनोपक्षीणे चक्षुषि चित्ते च तत्सहायताप्राप्तिमात्रकृतार्थे मनःसहायवैधुर्यात् परिक्षीणशक्तिषु श्रोत्रादीन्द्रियेषु पुरवधूजनाः सन्निहितमपि विषयान्तरं नाधिजग्मुरित्यर्थः।।६४।।

स्थाने तपो दुश्चरमेतदर्थ-
मपर्णया पेलवयापि तप्तम्।
या दास्यमप्यस्य लभेत नारी
सा स्यात् कृतार्था किमुताङ्कशय्याम्॥६५॥

प्रकाशिका

स्थान इति। एतच्छब्दः साक्षात्क्रियमाणविश्वोत्तरसकलगुणविशिष्टतया वस्तु परामृशति। अङ्कमुरः। परमेश्वरदास्यमुपगतः पुरुषः स्त्री वा परमपुरुषार्थभाजनं भवेदिति कवेरभिप्रायः।।६५।।

विवरणम्

इत्थं परमेश्वरदर्शनव्यापृतानां पुरसुन्दरीणामुक्तिप्रकारः श्लोकत्रयेणोच्यते। तत्रादौ सुकुमाराया देव्यास्तत्तादृशतपश्चरणानुसन्धानजनितस्य निजहृदये शल्यवदवस्थितस्य दुःखस्य निवृत्तिं भङ्ग्यन्तरेणाहुः—

स्थान इति। अपर्णया एतदर्थं दुश्चरं तपः अभितप्तं स्थाने। अपर्णाशब्देनात्र पूर्वोक्तं महत्तरं तपश्चरणमनूद्यते। एतदर्थम्, अत्रैतच्छब्देन लोकोत्तरगुणविशिष्टतया साक्षात्क्रियमाणं भगवत्स्वरूपं परामृश्यते। एतादृशपरमेश्वरप्राप्त्यर्थमित्यर्थः। दुश्चरम् अत्यन्तदुष्करमित्यर्थः। अभितप्तं कृतं, तपतिः सकर्मकः करोत्यर्थे वर्तते इति न्यायात्। स्थाने इत्यव्ययं युक्तमित्येतस्मिन्नर्थे। 'युक्ते द्वे साम्प्रतं स्थाने' इत्यमरः। एतत्प्राप्तये पार्वत्या स्वयं विशीर्णानि पर्णान्यप्यपास्य दुश्चरं तपस्तप्तमिति यत्, तद् युक्तमेवेत्यर्थः। तादृशतपश्चरणे देव्याः शरीरपाटवाभावमाहुः—पेलवयेति। प्रकृत्या मृद्वङ्ग्येत्यर्थः। अत्रार्थादपिशब्दो द्रष्टव्यः। 'तदानपेक्ष्य स्वशरीरमार्दवं तपो महत् सा चरितुं प्रचक्रमे' (५.१८) इत्यत्रोक्तोऽर्थोऽनेन दर्शितः। युक्तत्वमेवोपपादयति—येत्यादिना। या नारी अस्य दास्यमपि लभेत सा कृतार्था स्याद्, अङ्कशय्यां किमुत। या नारी अस्य परमेश्वरस्य दास्यं दासीभावमपि लभेत प्राप्नुयात् सा नारी कृतार्था कृतकृत्या भवेत्। या पुनः अङ्कशय्याम् अङ्के उरसि। 'अङ्कश्चिह्नेऽन्तिकोरसो'रिति **यादवः**। शय्यां शयनं लभेत, सा किमुत किमुच्यते इत्यर्थः। एतादृशस्यास्य दास्यमपि या नारी लभेत, सा कृतार्थैव भवति। या पुनरस्य सुरतपरिश्रमादुरसि शयनमेव लभेत, सा कृतार्थेति किं वक्तव्यमित्यर्थः। अत्र परमेश्वरदास्यमुपगतो जनः परमपुरुषार्थभाजनं भवतीति कवेर्निगूढोऽभिप्रायः।।६५।।

न नूनमारूढरुषा शरीर-
मनेन दग्धं कुसुमायुधस्य।
व्रीलादमुं देवमुदीक्ष्य मन्ये
सन्न्यस्तदेहः स्वयमेव कामः।।६६।।

प्रकाशिका

नेति। आरूढरुषा अनेन कुसुमायुधस्य शरीरं दग्धमिति प्रसिद्धिमनूद्य नेति निषिध्यते। किन्तर्हीत्याह—व्रीलादिति। अत्र वामनसूत्रम्—'अविधौ गुरोः स्त्रियां बहुलं विवक्षा' (५.२.४२) इति। तस्य चायं वृत्तिग्रन्थः 'अविधावकारविधाने 'गुरोश्च हलः' (३.३.१०३) इति स्त्रियां बहुलं विवक्षा क्वचिदविवक्षा क्वचिद्विवक्षा क्वचिदुभयमिति। विवक्षा यथा ईहा लज्जेति। अविवक्षा यथा आतङ्क इति। विवक्षाविवक्षे यथा बाधा बाधः, ऊहा ऊहः, व्रीला व्रील इति'।।६६।।

विवरणम्

उक्तमर्थमुपापदयितुं परमेश्वरस्य लावण्यातिशयमाहुः—

नेति। अनेन आरूढरुषा कुसुमायुधस्य शरीरं न दग्धं नूनम्। अनेन एतादृशशृङ्गारात्मकेन। अनेन शृङ्गाररौद्रयोरत्यन्तविरुद्धत्वात् कोपाविषयत्वमुक्तम्। शरीरं न दग्धम्। नूनंशब्दो निश्चये। असौ कोपमधिष्ठाय कुसुमायुधस्य शरीरं भस्मसादकरोदिति हि लोकप्रसिद्धिः। तत्तु शृङ्गाररौद्रयोरत्यन्तविरुद्धत्वादत्यन्ताशक्ते कुसुमायुधेऽस्य कोपानुपपत्तेश्च नेति वयं निश्चिनुम इत्यर्थः। कथं तर्हि कामदेवो विनष्टोऽभूदत आहुः—कामः अमुं देवम् उदीक्ष्य व्रीलात् स्वयम् एव सन्न्यस्तदेहः (इति)मन्ये इति। कामः कामदेवः अमुं कामदेवशरीरलावण्यपरिभाविशरीरलावण्यतया दृश्यमानं देवं दीप्यमानम् उदीक्ष्य अवलोक्य व्रीलात् लज्जाया हेतोः। ननु व्रीलाशब्दः स्त्रीलिङ्गतयैव लोके प्रसिद्धः। अतः कथं व्रीलादित्युक्तम्। उच्यते। 'अविधौ गुरोः स्त्रियां बहुलं विवक्षा' इति वामनसूत्रम्। तद्वृत्तिकारेण चैतत् सूत्रमेवं व्याख्यातम्—अविधावकारविधाने 'गुरोश्च हल' इति स्त्रियां बहुलं विवक्षा, क्वचिद् विवक्षा क्वचिदविवक्षा क्वचिदुभयमि'ति। तत्रोदाहरणानि चैवमुक्तवान्—'विवक्षा यथा ईहा लज्जेति। अविवक्षा यथा आतङ्क इति। विवक्षाविवक्षे यथा बाधा बाधः, ऊहा ऊहः, व्रीला व्रील इति'। स्वयमेव न त्वस्य तस्मिन् कर्मणि व्यापारलेशोऽपीति भावः। सन्न्यस्तः सम्यङ् न्यस्तः उपेक्षितो देहो येन स तथा। अत्र पुरसुन्दरीणां बहुत्वेऽपि मन्य इत्येकवचनप्रयोगः प्रत्येकमेकत्वविवक्षयेत्यवगन्तव्यम्। अत्यन्तसुन्दरमस्य शरीरमवेक्ष्य सञ्जातलज्जः कामदेवः स्वयमेव स्वशरीरं योगाग्निना भस्मसादकरोदिति मन्यामह इत्यर्थः। अनेन श्लोकेन पुरसुन्दरीणां स्वपक्षभूतस्य मन्मथस्य मारणेन जनिताया भगवद्विषयाया असूयायाः प्रशमो दर्शितः।।६६।।

अनेन सम्बन्धमवाप्य दिष्ट्या
मनोरथप्रार्थितमीश्वरेण।
मूर्धानमालि! क्षितिधारणोच्च-
मुच्चैस्तरां वक्ष्यति शैलराजः॥६७॥

प्रकाशिका

अनेनेति। दिष्ट्येति हर्षद्योतकमव्ययम्। मनोरथैः सङ्कल्पैः प्रार्थितं विषयीकृतम्। चिराभिलषितमित्यर्थः। ईश्वरेणेति तत्सम्बन्धस्य महार्घता दुरवापता च ध्वन्यते। उच्चमभिमानोदग्रम्। वक्ष्यतीति वहेर्लृटि रूपम्। अत्र प्रथमेन श्लोकेन प्रथमं यद् देव्यास्तादृशतपश्चरणानुसन्धानजं दुःखं तत्सौकुमार्यवेदिनीनां पुराङ्गनानां हृदि शल्यायमानमासीत्, तत् तदानीं देवदर्शनेनापनीतमिति प्रतीयते। द्वितीयेन तासां स्वपक्षभूतमन्मथमारणसमुत्थभगवद्विषयासूयाप्रशमः, तृतीयेन स्वाम्यभ्युदयाभिनन्दनद्वारेण तद्विषयोऽनुरागः।।६७।।

विवरणम्

अथैतादृशेन भगवता सञ्जातसम्बन्धस्य स्वामिनो हिमवतः प्रकृष्टतरमभ्युदयमभिनन्दमानाः(न्त्यः) स्वामिभक्तिं प्रदर्शयन्ति—

अनेनेति। आलि! शैलराजः ईश्वरेण अनेन सम्बन्धम् अवाप्य क्षितिधारणोच्चं मूर्धानम् उच्चैस्तरां वक्ष्यति दिष्ट्या। आलि! हे सखि! शैलराजः हिमवान् ईश्वरेण त्रैलोक्यनाथेन। अनेन तत्सम्बन्धस्यात्यन्तमहत्त्वं दुरवापत्वं च द्योत्यते। तेन च मूर्धानमुच्चैस्तरां वक्ष्यतीत्यत्र हेतुः प्रदर्शितः। अनेन पुरतो दृश्यमानेन। सम्बन्धप्राप्तेरासन्नत्वमनेन द्योत्यते। क्षितेर्भूमेधरिणेन उद्धरणेन उच्चमभिमानोदग्रं मूर्धानं शिरः उच्चैस्तराम् अत्युन्नतत्वेन वक्ष्यति वहनं करिष्यति। 'वह प्रापण' इति धातोर्लृटि रूपम्। शैलराजोऽयमन्यैरत्यन्तदुष्करस्य क्षितिमण्डलधारणस्यानायासेन क्रियमाणत्वादिदानीमेवाभिमानोन्नतमात्मशिरः परमेश्वरसम्बन्धलाभानन्तरमत्युन्नतत्वेन वक्ष्यतीत्यर्थः। दिष्ट्येति हर्षद्योतकमव्ययम्। अहो वयमिदानीं भाग्यवत्यो जाता इति भावः। निजसुताया यौवनोद्भेदकालादारभ्यैतावन्तं कालमस्मत्स्वामिना प्रार्थितोऽयं सम्बन्ध इत्याह—मनोरथप्रार्थितमिति। मनोरथैः सङ्कल्पैः प्रार्थितं विषयीकृतम्। चिराभिलषितमित्यर्थः। 'तस्थौ निवृत्तान्यवराभिलाषः' (१.५१) 'अथानुरूपाभिनिवेशतोषिणा' (५.७) इत्यादिषु स्फुटतरोऽयमर्थः।।६७।।

इत्योषधिप्रस्थविलासिनीनां
शृण्वन् कथाः श्रोत्रसुखास्त्रिनेत्रः।
केयूरचूर्णीकृतलाजमुष्टि-
र्हिमालयस्यालयमाससाद॥६८॥

प्रकाशिका

उपसंहरति—

इतीति। इतिः प्रकारे, एवं प्रकारा अन्या अपीत्यर्थः। श्रोत्रसुखत्वं रमणीयनानाभावप्रकाशकत्वात्। केयूरेति जनसंबाध उक्तः। अंसेनांसावघट्टने हि केयूरचूर्णीकृतत्वमाचारलाजानां भवति। मुष्टिपरिमिता लाजा लाजमुष्टिः।।६८।।

विवरणम्

पुरवधूवृत्तान्तमुपसंहृत्य भगवतो हिमवत्पुरप्राप्तिप्रकारमाह—

इतीति। त्रिनेत्रः ओषधिप्रस्थविलासिनीनाम् इति कथाः शृण्वन् हिमालयस्य आलयम् आससाद। त्रिनेत्रः परमेश्वरः ओषधिप्रस्थे हिमवत्पुरे या विलासिन्यः स्त्रियः तासाम्। इतिशब्दः प्रकारवाची। एवम्प्रकारा अन्याश्चेत्यर्थः। कथाः वाचः शृण्वन् आकर्णयन् सन् हिमवतः भवनम् आससाद प्राप्तवान्। कथानां मनोहरत्वमाह—श्रोत्रसुखाः। श्रोत्रयोः कर्णयोः सुखकराः। सुखकरत्वं च स्तुतिरूपत्वाद् रमणीयनानाभावप्रकाशकत्वाच्च। पुरप्रवेशसमये जनसम्बाधं स्वभावोक्त्या प्रकाशयति—केयूरचूर्णीकृतलाजमुष्टिरिति। केयूरेण अङ्गदेन चूर्णीकृता चूर्णत्वं प्रापिता लाजमुष्टिः मुष्टिपरिमिता लाजा येन स तथा। अनेन सम्मर्द उक्तः। भगवतः पुरप्रवेशसमये पुरवधूजनैरवकीर्णानां लाजानां केयूरसङ्घट्टनेन चूर्णीभावो तथा भवति, तथा तत्र जनसम्मर्दवशात् परस्परमंसेनांसावघट्टनं जातमित्यर्थः।।६८।।

ततोऽवतीर्याच्युतदत्तहस्तः
शरद्घनाद् दीधितिमानिवोक्ष्णः।
क्रान्तानि पूर्वं कमलासनेन
कक्ष्यान्तराण्यद्रिपतेर्विवेश॥६९॥

प्रकाशिका

तत इति। अत्राप्यच्युते सख्यं कमलासने मान्यत्वं प्रतीयते। अवतीर्येत्यनेन पूर्वं वाहनादनवतीर्ण एव देवः श्वशुरप्रणामं कृतवानिति प्रतीयते।।६९।।

विवरणम्

अथ भगवतो वाहनावतारं प्रदर्शयन् भवनान्तःप्रवेशमाह—

तत इति। ततः सः दीधितिमान् शरद्घनादिव उक्ष्णः अवतीर्य अद्रिपतेः कक्ष्यान्तराणि विवेश। ततः हिमालयभवनप्राप्त्यनन्तरं दीधितिमानादित्यः शरत्कालमेघादिव उक्ष्णः स्ववाहनभूताद् वृषाद् अवतीर्य कृतावतारः सन् अद्रिपतेः हिमवतः कक्ष्यान्तराणि कक्ष्याविशेषान् विवेश प्रविष्टवान्। अत्रावतरणमात्र एवोपमा। शरद्घनवृषयोर्गौरत्वं महाप्रमाणत्वं च साधारणो धर्मः, तेजस्वित्वं परमेश्वरदीधितिमतोः। यथा शरद्घनाद् दीधितिमानवतरति, तथा वृषादवतीर्येत्यर्थः। परमेश्वरस्य वाहनादवतारे भगवतो नारायणस्य सख्योचितां प्रवृत्तिमाह—अच्युतदत्तहस्त इति। अच्युतेन नारायणेन दत्तो हस्तो यस्मै। अच्युतेन दत्तं हस्तमवलम्ब्यावतीर्येत्यर्थः। भगवतः पुरप्रवेशे कमलासनस्य माननीयत्वोचितां प्रवृत्तिमाह—कमलासनेन पूर्वं क्रान्तानि इति। कमलासनेन ब्रह्मणा। पूर्वम्, अग्रेगच्छतेत्यर्थः। क्रान्तानि। 'क्रमु पादविक्षेप' इत्यस्माद् धातोर्निष्ठान्तमिदं रूपम्। कृतपदविन्यासानीत्यर्थः। भगवता सबहुमानमग्रेसरतां प्रापितेन परमेष्ठिना पूर्वमुपगतानि कक्ष्यान्तराणि हरः स्वयमेव पश्चादाविवेशेत्यभिप्रायः।।६९।।

तमन्वगिन्द्रप्रमुखाश्च देवाः
सप्तर्षिपूर्वाः परमर्षयश्च।
गणाश्च गिर्यालयमन्वगच्छन्
यशस्यमारम्भमिवोत्तमार्थाः।।७०।।

प्रकाशिका

तमिति। अन्वगनुपदम्। आसन्नमित्यर्थः। अनेनानुगमने तेषामहमहमिका द्योत्यते। सप्तर्षयः पूर्वे पुरस्सरा येषाम्। आरम्भमनुष्ठानम्। उत्तमोऽर्थः प्रयोजनं येषाम्। महेच्छा इत्यर्थः। अत्रोपमानेनानुगमने तेषां सादरत्वं द्योत्यते।।७०।।

विवरणम्

इन्द्रादीनां हिमवद्भवनप्राप्तिमाह—

तमिति। इन्द्रप्रमुखा देवाः च सप्तर्षिमुख्याः परमर्षयः च गणाः च तम् अन्वग् गिर्यालयम् अन्वगच्छन्। इन्द्रो महेन्द्रः प्रमुखः प्रधानं येषां ते देवाश्च। सप्तर्षिमुख्याः सप्तर्षिप्रमुखाः। सप्तर्षिपूर्वा इति पाठे सप्तर्षयः पूर्वे पुरस्सरा येषामिति विग्रहः। परमा उत्कृष्टा ऋषयश्च गणा भूतगणाश्च तं परमेश्वरम्। अन्वग्

अनुपदम्। प्रत्यासन्नमित्यर्थः। अनुगमनक्रियाविशेषणं चेदम्। अनेन तेषामहमहमिकयानुगमनं द्योत्यते। गिरेः हिमवतः आलयं गृहम् अन्वगच्छन् अनुगमनं कृतवन्तः। तत्रादौ प्राधान्यादिन्द्रस्य, तदनन्तरमन्येषां देवानां, पुनश्च सप्तर्षीणाम्, अनन्तरमितरेषाम् ऋषीणां, पश्चात् तु भूतगणानामनुगमनमिति प्राधान्यक्रमोऽत्र विवक्षितः। परमेष्ठी पुनरतिप्राधान्यादग्रेसरतामुपगतः। नारायणस्तु सख्यातिशयेन हस्तग्रहणमेव गत इति 'अच्युतदत्तहस्तः' (७.६९) इत्यनेन द्योत्यते। एतेषां भगवदनुगमनमुपमिनोति—उत्तमार्थाः यशस्यम् आरम्भम् इव इति। उत्तमोऽर्थः प्रयोजनं येषां ते तथा। महेच्छाः, महान्त इति यावत्। नहि महतां क्षुद्रेषु प्रयोजनेष्वाकाङ्क्षा भवति। यशसे हितं यशस्यम् आरम्भं व्यापारमिव। यथा महान्तो यशस्करं कर्मानुवर्तन्ते, तथेत्यर्थः। अनेनोपमानेन तेषामनुगमनादरो द्योत्यते।।७०।

तत्रेश्वरो विष्टरभाग् यथावत्
सरत्नमर्घ्यं मधुमच्च गव्यम्।
नवे दुकूले च नगोपनीतं
प्रत्यग्रहीत् सर्वममन्त्रवर्जम्।।७१।।

प्रकाशिका

तत्रेति। तच्छब्देनात्र व्यवहितोऽप्यौचित्यादालयः परामृश्यते। विष्टरभाग् मधुपर्कप्रदानार्थं दत्ते विष्टरे निषण्णः। अर्घ्यम् अर्घार्थं जलम्। गव्यमत्र दधि विवक्षितम्। यथाश्वलायनः—'दधि मध्वानीय सर्पिर्वा मध्वलाभे' इति। नगोपनीतमिति युक्तः पाठः। अमन्त्रवर्जं मन्त्रसहितम्।।७१।।

विवरणम्

इत्थमुपगतभवनस्य भगवतो मधुपर्काद्युपायनमाह—

तत्रेति। ईश्वरः तत्र विष्टरभाक् सरत्नम् अर्घ्यं मधुमद् गव्यं नवे दुकूले च सर्वं नगोपनीतम् अमन्त्रवर्जं यथावत् प्रत्यग्रहीत्। ईश्वरः परमेश्वरः तत्र गिर्यालये। विष्टरमासनविशेषः, तद् भजतीति विष्टरभाक्। मधुपर्कप्रदानार्थं दत्ते विष्टरे उपविश्येत्यर्थः। सरत्नं रत्नसहितम्। नवरत्नादिभिः पवित्रितमित्यर्थः। अर्घः पूजा, तदर्थं जलमर्घ्यम्। मधुमद् मधु माक्षिकं तत्सहितम्। गव्यमत्र दधि विवक्षितम्। तदुक्तमाश्वलायनगृह्ये—'दधि मध्वानीय सर्पिर्वा मध्वलाभे' इति। दधिमिश्रं मधु मधुपर्कमित्युच्यते। नवे अभिनवे दुकूले परिधानीयोत्तरीयवसने। चशब्दः

समुच्चयार्थः। सर्वशब्देन पूर्वोक्तमर्घ्यादिवस्तुजातं परामृश्यते। नगेन हिमवतोपनीतं समीपं प्रापितं सत्। अमन्त्रवर्जमिति प्रतिग्रहक्रियाविशेषणम्। मन्त्रसहितमित्यर्थः। यथावद् यथाविधि प्रत्यग्रहीत् प्रतिगृहीतवान्। परमेश्वरो हिमवतः कक्ष्याविशेषे विष्टर उपविष्टो हिमवता कृतामर्घ्यपाद्यादिकां पूजां परिगृहीतवानित्यर्थः।।७१।।

दुकूलवान् सोऽथ वधूसमीपं
निन्ये विनीतैरवरोधरक्षैः।
वेलासकाशं स्फुटफेनराशि-
र्नवैरुदन्वानिव चन्द्रपादैः।।७२।।

प्रकाशिका

दुकूलवानिति। परिहिततद्दत्तदुकूलः। विनीतैः प्रश्रितवेषभाषादिकैः। रक्षन्तीति रक्षाः। वेला अब्धिकूलम्। उपमानेन तदानीमप्यगाधत्वादयो धर्मा देवे स्फुटा इति ध्वन्यते।।७२।।

विवरणम्

अथ भगवतः पार्वतीपरिसरप्राप्तिमाह—

दुकूलवानिति। अथ दुकूलवान् सः अवरोधरक्षैः वधूसमीपं निन्ये। अथ मधुपर्कादिदानानन्तरम्। दुकूलवान् परिहितनगोपनीपनीतदुकूल इत्यर्थः। सः परमेश्वरः। अवरोधमन्तःपुरं रक्षन्तीति अवरोधरक्षाः तैः। वृद्धकाञ्चुकीयैरित्यर्थः। अन्येषां वधूसमीपप्राप्तावनधिकारादिति भावः। वध्वाः पार्वत्याः समीपं निन्ये प्रापितोऽभूत्। अवरोधरक्षाणां भगवदग्रेसरत्वप्राप्तिसमुचितं भावविशेषमाह—विनीतैरिति। प्रवणैः वेषभाषादिभिरित्यर्थः। अत्रोपमामाह—स्फुटफेनराशिः उदन्वान् नवैः चन्द्रपादैः वेलासकाशम् इव इति। स्फुटः प्रकटः फेनानां राशिः समूहो यस्य तादृशः उदन्वान् समुद्रः नवैरभिनवैः चन्द्रपादैश्चन्द्रस्य रश्मिभिः। 'पादा रश्म्यङ्घ्रितुर्यांशा' इत्यमरः। वेलायाः कूलस्य सकाशं समीपमिव। अत्र दुकूलस्य फेनोपमानेन धावल्यं प्रतिपादितम्। तच्च मङ्गलदुकूलाङ्गम्। देवस्योदन्वदुपमानेन 'चन्द्रोदयारम्भ इवाम्बुराशिः' (३.६७) इत्यत्रोक्ता धर्माः प्रतिपाद्यन्ते। अवरोधरक्षाणां चन्द्रपादोपमानेन जराधवलशरीरत्वादयो धर्माः प्रतिपादिताः। विनीतप्रतिवस्तुतया चन्द्रपादानां नवत्वमुपात्तम्। वृद्धा हि चन्द्रपादा अतिप्रकटा भवन्ति। समीपप्राप्तेरारम्भदशैवेयमित्यप्यनेन द्योत्यते। देव्या वेलोपमानेन लज्जापारतन्त्र्यान्निर्व्यापारत्वं भगवत्प्राप्तियोग्यत्वं च ध्वन्यते।।७२।।

तया विवृद्धाननचन्द्रकान्त्या
प्रफुल्लचक्षुःकुमुदः कुमार्या।
प्रसन्नचेतस्सलिलः शिवोऽभूत्
संसृज्यमानः शरदेव लोकः॥७३॥

प्रकाशिका

तयेति। आननसदृशश्चन्द्र आननचन्द्र इत्यादेः समासस्याङ्गीकाराद् विशेषणानामुपमानान्वयित्वमपि द्रष्टव्यम्। प्रसादश्चेतसि हर्षः। सलिलेऽनाविलत्वम्। तया संसृज्यमान इत्यन्वयः।।७३।।

विवरणम्

देवीसङ्गमे देवस्य प्रसादातिशयं वर्णयति—

तयेति। तया कुमार्या संसृज्यमानः शिवः प्रसन्नचेतस्सलिलः अभूत्। तया लोकोत्तरगुणविशिष्टया कुमार्या बालया संसृज्यमानः पदे पदे क्रमेण संसर्गमुपगच्छन् शिवः परमेश्वरः प्रसन्नं हृष्टं चेतस्सलिलं सलिलमिव चेतो यस्य। 'उपमितं व्याघ्रादिभिः—' (२.१.५६) इति समासः। तथाभूतोऽभूत्। स्वच्छत्वादिना चेतसः सलिलसादृश्यं द्रष्टव्यम्। अत्रोपमामाह—शरदा लोकः इवेति। संसृज्यमान इत्यत्राप्यनुषज्यते। यथा शरदा संसृज्यमानो लोकः प्रसन्नेचतस्सलिलो भवति, तथासावपीत्यर्थः। प्रसन्नमनाविलं चेतस्सलिलं चेतस्सदृशं सलिलं यस्येत्यत्रापि योज्यम्। उपमानोपमेययोः साधारणं धर्मं दर्शयिष्यन्नादौ देवीशरदोः साधारणं धर्ममाह—विवृद्धाननचन्द्रकान्त्या इति। विवृद्धा विशेषेण वर्धनं प्राप्ता चन्द्रसदृशस्याननस्य आननसदृशस्य चन्द्रस्य च कान्तिर्यस्यास्तया। शिवलोकयोः साधारणं धर्ममाह—प्रफुल्लचक्षुःकुमुद इति। प्रफुल्लं विकसितं कुमुदसदृशं चक्षुः चक्षुः सदृशं कुमुदं च यस्य स तथा। चन्द्रकान्तिविवृद्धौ कुमुदस्यैव विकास इति चक्षुषः कुमुदसादृश्यं, न तु कमलसादृश्यम्।।७३।।

तयोः समापत्तिषु कातराणि
किञ्चिद्व्यवस्थापितसंहृतानि।
ह्रीयन्त्रणां तत्क्षणमन्वभूव-
न्नन्योन्यलोलानि विलोचनानि॥७४॥

प्रकाशिका

तयोरिति। समापत्तिषु यदृच्छासमागमेषु। कातराण्यधृष्टानि। किञ्चिद्व्यवस्थापितानि अर्थादन्योन्योपरि। ह्रीयन्त्रणां लज्जायन्त्रितत्वम्। अन्योन्यं प्रति लोलानि सतृष्णानि चलानि च। अत्राद्याभ्यां विशेषणाभ्यां ह्रीयन्त्रणाप्रकार उक्तः, तृतीयेन हेतुः।।७४।।

विवरणम्

चिराभिलषितदर्शनयोस्तयोः परस्परदर्शने शृङ्गारचेष्टां वर्णयति—

तयोरिति। तयोः विलोचनानि तत्क्षणं ह्रीयन्त्रणाम् अन्वभूवन्। तयोः पार्वतीपरमेश्वरयोः विलोचनानि कटाक्षविक्षेपाः तत्क्षणं तस्मिन् क्षणे ह्रिया लज्जया यन्त्रणां प्रतिबन्धम् अन्वभूवन् अनुबभूवुः। चिराभिलषितदर्शनयोः पार्वतीपरमेश्वरयोः परस्परकटाक्षविक्षेपास्तदानीं लज्जया परस्परदर्शनाक्षमा बभूवुरित्यर्थः। ह्रीयन्त्रणायाः प्रकारमेव विशेषणद्वयेनाह—समापत्तिष्वित्यादिना। समापत्तिषु कातराणि। समापत्तिर्यदृच्छया समागमः। तेषु कातराणि अधृष्टानि। यदा कटाक्षाणां यदृच्छया परस्परसमागमः, तदा शालीनतासहितानीत्यर्थः। अत एव किञ्चिद्व्यवस्थापितसंहृतानि। अन्योन्योपरि किञ्चिद्व्यवस्थापितानि स्थिरीकृतानि पुनस्तदानीमेव लज्जया संहृतानि व्यावर्तितानि च। किञ्चिद्व्यवस्थापितानि संहृतानि चेति समासः। दर्शनौत्सुक्यमाह—अन्योन्यलोलानीति। अन्योन्यं प्रति लोलानि सतृष्णानि। 'लोलश्चलसतृष्णयोरि'त्यमरः।।७४।।

तस्याः करं शैलगुरूपनीतं
जग्राह ताम्राङ्गुलिमष्टमूर्तिः।
उमात्मना गूढतनोः स्मरस्य
तच्छङ्किनः पूर्वमिव प्ररोहम्।।७५।।

प्रकाशिका

तस्या इति। गुरुः पुरोधाः। उमात्मना उमाशरीरेण तच्छङ्किन इति गूहने हेतुः। अत्र ताम्राङ्गुलिप्रतिवस्तुनो नवप्रवालस्य प्ररोहविशेषणत्वेनानुपादानमव्यभिचारेण प्रतीतेः। उत्प्रेक्षया च मनोविकारहेतुत्वं ध्वनितम्।।७५।।

विवरणम्

पाणिग्रहणमेव वर्णयति—

तस्या इति। अष्टमूर्तिः तस्याः करं जग्राह। अष्टमूर्तिः परमेश्वरः तस्या करं

जग्राह समन्त्रं गृहीतवान्। कथं जग्राहेत्यत्राह—शैलगुरूपनीतमिति। शैलस्य हिमवतो गुरुः पुरोहितः, तेनोपनीतं प्रसारितम्। हिमवत्पुरोहितवचनेन हरान्तिकं नीतमिति यावत्। करस्य दर्शनसमय एव मनोहारित्वमाह—ताम्राङ्गुलिमिति। ताम्राः रक्तवर्णाः अङ्गुलयो यस्य तम्। तादृशं करमुत्प्रेक्षते—तच्छङ्किनः उमात्मना गूढतनोः स्मरस्य पूर्वं प्ररोहमिव। तस्मादष्टमूर्तेः शङ्कितुं शीलमस्येति तथा। स्वानुभूतो देहदाहोऽत्र शङ्काहेतुः। शङ्काया अनुभावमाह—उमात्मना गूढतनोरिति। उमात्मना उमाशरीरेण गूढा छन्ना तनुः शरीरं यस्य तस्य स्मरस्य कामदेवस्य। पूर्वं प्रथमोद्गतं प्ररोहम् अङ्कुरमिव। उत्प्रेक्षया दर्शनमात्रेणैव मनोविकारहेतुत्वं ध्वन्यते। अत्र ताम्राङ्गुलिप्रतिवस्तुत्वेन नवप्रवालमिति प्ररोहस्यापि विशेषणमर्थाद् द्रष्टव्यम्। तच्चानुक्तमपि प्ररोहस्य नवप्रवालाव्यभिचारात् प्रतीयत इति महाकविनैवमुक्तम्।।७५।।

रोमोद्गमः प्रादुरभूदुमायाः
स्विन्नाङ्गुलिः पुङ्गवकेतुरासीत्।
वृत्तिस्तयोः पाणिसमागमेन
समं विभक्तेव मनोभवस्य।।७६।।

प्रकाशिका

रोमोद्गम इति। अस्यार्थस्य 'कन्या तु प्रथमसमागम' इत्यादिवात्स्यायनवचनविरोधाशङ्का रघुवंशप्रकाशिकायाम् 'आसीद् वरः कण्टकितप्रकोष्ठः' (७.२२) इत्यादि श्लोकप्रसङ्गे निराकृता। मनोभवस्य व्यापारस्तदानीं पाणिसमागमेन कर्त्रा तयोर्द्वयोरन्यूनानतिरिक्तत्वेन विभक्त इवेत्यर्थः।।७६।।

विवरणम्

प्रवृद्धरागयोस्तयोः पाणिसमागमस्यापि सम्भोगतुल्यकक्ष्यतामाह—

रोमोद्गम इति। उमायाः रोमोद्गमः प्रादुरभूत्। रोमोद्गमः रोमाञ्चः प्रादुरभूत् प्रकाशोऽभूत्। 'प्रकाशे प्रादुराविः स्यादि'त्यमरः। हरस्यापि तादात्विकं वृत्तमाह—पुङ्गवकेतुः स्विन्नाङ्गुलिः आसीदिति। पुङ्गवो वृषः केतुर्ध्वजचिह्नं यस्य सः। परमेश्वर इत्यर्थः। स्विन्नाः स्वेदयुक्ताः अङ्गुलयो यस्य स तथा। ननु वात्स्यायने 'कन्या तु प्रथमसमागमे स्विन्नकरचरणाङ्गुलिः सन्नतमूर्तिश्च भवति। पुरुषस्तु रोमाञ्चितो भवति। एभिरनयोर्भावं परीक्षेते'त्युक्तम्। अतः कामशास्त्रविरुद्धमिदं वचनमिति चेत्। मैवम्। सात्त्विकविकाराणां स्त्रीपुरुषसाधारणत्वात् तद् वात्स्यायनवचनमुपलक्षणमेव। अत एव रघुवंशे 'आसीद् वरः कण्टकितप्रकोष्ठः स्विन्नाङ्गुलि संववृते कुमारी'-(रघु.७.२२)इत्युक्तम्।

तस्य स्फुरत्फणगणप्रतिपालनोत्थं
कम्पं च वीक्ष्य पुलकं च ततो नु तस्या।
सञ्जातसात्त्विकविकारधियः स्वभृत्यान्
नृत्यान्न्यषेधदुरगाधिपतिर्विलक्षः।। (११.२९)

इति नैषधकाव्येऽपि। उभयोरप्येवंविधसात्त्विकविकारप्रतिपादने फलितमर्थमुत्प्रेक्षामुखेन दर्शयति—मनोभवस्य वृत्तिः पाणिसमागमेन तयोः समं विभक्ता इव इति। वृत्तिर्व्यापारः। पाण्योः करयोः समागमेन परस्परसङ्गेन कर्त्रा। तयोरित्यधिकरणसप्तमी। पार्वतीपरमेश्वराभिधाने मिथुन इत्यर्थः। समम् अन्यूनातिरिक्तत्वेन विभक्ता कृतविभागाभूदिव। कामदेवव्यापाराः पाणिग्रहणसमये पाणिसमागमेनैव तस्मिन् मिथुने समविभागाः कृता इवेत्यर्थः।।७६।।

प्रयुक्तपाणिग्रहणं यदन्यद्
वधूवरं पुष्यति कान्तिमग्र्याम्।
सान्निध्ययोगादनयोस्तदानीं
किं कथ्यते श्रीरुभयस्य तस्य।।७७।।

प्रकाशिका

प्रयुक्तेति। अन्यल्लौकिकम्। वधूवरं 'सर्वो द्वन्द्वो विभाषैकवद्भवती'ति। प्रयुक्तविवाहं यल्लौकिकं वधूवरं, तदप्यनयोर्देवीदेवयोः सान्निध्ययोगादग्र्यां कान्ति पुष्यति। तस्मिन् काले तस्य मिथुनस्य कान्तिः किं कथ्यत इत्यर्थः।।७७।।

विवरणम्

पाणिग्रहणानन्तरं कृतकृत्ययोस्तयोः कान्तिविशेषं वर्णयति—

प्रयुक्तेति। प्रयुक्तपाणिग्रहणम् अन्यद् यद् वधूवरं, तद् अनयोः सान्निध्ययोगाद् अग्र्यां कान्ति पुष्यति। प्रयुक्तं कृतं पाणिग्रहणं विवाहो यस्य तादृशं सद् अन्यत् लौकिकम्। वधूर्वरश्च वधूवरम्। सर्वो द्वन्द्वो विभाषयैकवद् भवती'त्येकवद्भावादेव नपुंसकत्वमपि। अनयोः पार्वतीपरमेश्वरयोः सान्निध्यस्य सन्निधानस्य योगाद् अग्र्यां लोकोत्तरां कान्तिं द्युतिं पुष्यति प्राप्नोति। कृतविवाहं सदन्यद् यल्लौकिकं वधूवरं, तत् पार्वतीपरमेश्वरसान्निध्यवशादेव लोकोत्तरकान्तियुक्तं भवतीत्यर्थः। 'वधूरुमात्मिका भर्ता विवाहे शङ्करात्मकः' इति वचनादिति भावः। नन्वनेन वाक्येन प्रकृते किमायातमित्यत्राह—तदानीं तस्य उभयस्य श्रीः किं कथ्यते इति। तदानीं पाणिग्रहणावसानसमये तस्योभयस्य पार्वतीपरमेश्वराभिधानस्य

मिथुनस्य श्रीः शोभा किं कथ्यते। अवाङ्मनसगोचरैवैत्यर्थः। यत्सन्निध्यमात्रेणैव लौकिकमिथुनं लोकोत्तरां कान्तिमनुभवति विवाहसमये, तस्यैव मिथुनस्य कान्तिः किं कथ्यते इत्यर्थः।।७७।।

प्रदक्षिणप्रक्रमणात् कृशानो-
रुदर्चिषस्तन्मिथुनं बभासे।
मेरोरिवान्ते परिवर्तमान-
मन्योन्यसंसक्तमहस्त्रियामम्।।७८।।

प्रकाशिका

प्रदक्षिणेति। उदर्चिष इति मेरुसाम्यसिद्ध्यर्थम्। अन्योन्यसंसक्तं निर्व्यवधानम्। अनेन गृहीतपाणिकमिथुनसाम्यं साध्यते।।७८।।

विवरणम्

पाणिग्रहणानन्तरं विहितमग्निप्रदक्षिणं वर्णयति—

प्रदक्षिणेति। उदर्चिषः कृशानोः प्रदक्षिणप्रक्रमणात् तद् मिथुनं बभासे। उदर्चिषः उद्गतार्चिषः। इन्धनादिभिरिद्धस्येत्यर्थः। एतच्च विशेषणं मेरुसाम्यसिद्ध्यर्थम्। मेरुरपि सुवर्णरत्नार्चिरुज्ज्वलो भवति। कृशानोरग्नेः प्रदक्षिणेन प्रक्रमणाद् गमनाद्धेतोः तद् मिथुनं पार्वतीपरमेश्वराभिधानं द्वन्द्वं बभासे शुशुभे। अत्रोपमामाह—मेरोः अन्ते परिवर्तमानम् अन्योन्यसंसक्तम् अहस्त्रियामम् इव इति। मेरोः महामेरोः अन्ते उपान्ते परिवर्तमानं परितः प्रादक्षिण्येन वर्तमानम्। अन्योन्यसंसक्तं परस्परं संसक्तम्। निर्व्यवधानमित्यर्थः। अहश्च त्रियामा च अहस्त्रियामम्। अत्रापि पूर्ववदेकवद्भावनपुंसकत्वे। अत्रान्योन्यसंसक्तमिति विशेषणं परस्परगृहीतहस्तमिथुनसाम्यसिद्ध्यर्थम्। यथा महामेरोरुपान्ते परस्परमविश्लेषेण वर्तमानमहस्त्रियामं शोभते, तथाग्निप्रदक्षिणसमये तन्मिथुनमपि शुशुभेतरामित्यर्थः। तत्र पार्वतीपरमेश्वरात्मकस्य मिथुनस्य संसक्ताहस्त्रियामसाम्यप्रतिपादनेन तत्संयोगस्यापि नित्यत्वमुक्तम्।।७८।।

तौ दम्पती त्रिः परिणीय वह्नि-
मन्योन्यसंस्पर्शनिमीलिताक्षौ।
स कारयामास वधूं पुरोधा-
स्तस्मिन् समिद्धार्चिषि लाजमोक्षम्।।७९।।

प्रकाशिका

ताविति। परिणीय परितो नीत्वा। प्रदक्षिणं कारयित्वेत्यर्थः। अन्योन्येत्यादिना प्रदक्षिणकरणस्य प्रयोजकव्यापारसापेक्षत्वमुक्तम्।।७९।।

विवरणम्

लाजहोमं वर्णयति—

ताविति। सः पुरोधाः तौ दम्पती वह्निं त्रिः परिणीय समिद्धर्चिषि तस्मिन् वधूं लाजमोक्षं कारयामास। स पुरोधाः हिमवत्पुरोहितः। तौ दम्पती भार्यापती 'दम्पती जम्पती भार्यापती' इत्यमरः। वह्निं विवाहसाक्षिभूतमग्निं त्रिः परिणीय त्रिवारं परितो नीत्वा। प्रदक्षिणत्रयं कारयित्वेत्यर्थः। समिद्धं सम्यगिद्धमर्चिः ज्वाला यस्य तस्मिन्। तच्छब्देनाग्निः परामृश्यते। वधूं पार्वतीं लजानां मोक्षं होमं कारयामास कारितवान्। अत्र प्रदक्षिणे प्रयोज्यत्वं दम्पत्योः, लाजमोक्षे वध्वाः। उभयोरपि प्रदक्षिणकरणे प्रयोजकव्यापारसापेक्षत्वमाह—अन्योन्यसंस्पर्शनिमीलिताक्षाविति। अन्योन्यस्य परस्परस्य संस्पर्शेन। करग्रहणजनितेन सुखेनेत्यर्थः। निमीलिते नितरां मीलिते अक्षिणी नयने याभ्याम्। तेन उभयोरपि नेत्रव्यापारवैधुर्यात् पुरोहितोपदिष्टमार्गेणैव प्रदक्षिणमिति भावः। अत्र निमीलिताक्षत्वं स्पर्शसुखस्यानुभावः।।७९।।

सा लाजधूमाञ्जलिमिष्टगन्धं
गुरूपदेशाद् वदनं निनाय।
कपोलसंसर्पिशिखः स तस्या
मुहूर्तकर्णोत्पलतां प्रपेदे।।८०।।

प्रकाशिका

सेति। गुरूपदेशाद् धूमाग्रमञ्जलिनादाय पिबेत्येवंरूपात्। तथाविधस्य धूमस्य कर्णोत्पलत्वमसम्भवदुपमां कल्पयतीति निदर्शनात्रालङ्कारः।।८०।।

विवरणम्

सेति। सा गुरूपदेशात् लाजधूमाञ्जलिं वदनं निनाय। गुरोः पुरोहितस्योपदेशाद् धूमाग्रमञ्जलिना गृहीत्वा वदनं नयेत्येवंरूपात्। लाजहोमजनितं धूमं पार्वती कराञ्जलिना निजवदनमानीयाघ्रातवतीत्यर्थः। 'लाजाञ्जलिं विसृज्य धूमाग्रं समाजिघ्रेदि'ति प्रयोगवृत्तिकारवचनमत्र प्रमाणम्। गुरुनियोगविहितस्यास्य कर्मणस्तात्कालिकं सुखकरत्वं चास्तीत्याह—इष्टगन्धमिति। इष्टः अभीष्टो गन्धो

यस्य तम्। सुरभिमित्यर्थः। तात्कालिकं शोभाजनकत्वं चाह—कपोलयोर्गण्डयोः सम्यग् व्याप्तुं शीलमस्या इति कपोलसंसर्पिणी। तादृशी शिखा अग्रं यस्य स तथा। स लाजधूमाञ्जलिः मुहूर्तं क्षणमात्रं कर्णोत्पलतां कर्णालङ्कार-भूतनीलोत्पलत्वं प्रपेदे प्राप्तोऽभूत्। यावदसौ धूमाञ्जलिर्गण्डप्रदेशादूर्ध्वभागं न जगाम, तावदेवासावस्याः कर्णोत्पलसाम्यं प्राप्तोऽभूदित्यर्थः। निदर्शनात्रालङ्कारः।।८०।।

तदीषदार्द्रारुणगण्डरेख-
मुच्छ्वासिकालाञ्जनरागमक्ष्णोः।
वधूमुखं क्लान्तयवावतंस-
माचारधूमग्रहणाद् बभूव॥८१॥

प्रकाशिका

तदिति। आर्द्रं स्विन्नम्। उच्छ्वासिकालाञ्जनरागं बाष्पक्लिन्नत्वादुद्रिक्तकालाञ्जनवर्णम्। मुखस्य तदेककालभाविभिरेभिर्धर्मैरपूर्वशोभाभाजनत्वं ध्वन्यते।।८१।।

विवरणम्

देवीमुखस्य तदानीमन्यादृशी काचिदपूर्वा शोभा संजातेत्याह—

तदिति। तद् वधूमुखम् आचारधूमग्रहणाद् ईषदार्द्रारुणगण्डरेखम् अक्ष्णोः उच्छ्वासिकालाञ्जनरागं क्लान्तयवावतंसं बभूव। वध्वा नवोढायाः मुखं वदनम् आचारधूमग्रहणात् सदाचारप्राप्ताद् धूमग्रहणाद् धूमस्य ग्रहणादादानाद् ईषदार्द्रा धूमोष्मणा किञ्चित् स्विन्ना अरुणा रक्तवर्णा च गण्डरेखा गण्डप्रदेशो यस्य तत् तथा। अक्ष्णोरिति सप्तमी। नयनयुगले उच्छ्वासी उच्छ्वसनशीलः किञ्चिदुच्छूनतां प्राप्तः कालाञ्जनस्य रागो वर्णो यस्य तत् तथा। बाष्पक्लिन्नत्वमत्र हेतुः। क्लान्तो धूमोष्मणा किमपि म्लानिं प्राप्तः यवावतंसो यवाङ्कुरमयः कर्णालङ्कारो यस्य तत् तथा। चशब्दोऽत्रार्थाद् द्रष्टव्यः। ईषदुष्णस्य तस्य धूमस्य ग्रहणात् तदानीं देव्या वदनं स्विन्नारुणगण्डम् ईषदुच्छूनाञ्जननयनं परिम्लानयवाङ्कुरावतंसं च बभूव। अनेन कान्त्यतिशयो ध्वन्यते।।८१।।

वधूं गिरिः प्राह तवैष वत्से!
वह्निर्विवाहं प्रति पूर्वसाक्षी।
शिवेन भर्त्रा सह धर्मचर्या
कार्या त्वया मुक्तविचारयेति॥८२॥

प्रकाशिका

वधूमिति। पूर्वः प्रथमः। अनेन साक्ष्यन्तराणामादित्यादीनामपि सद्भावः सूचितः। मुक्तविचारयेति एतच्चरितेषु सदसच्चिन्तां विहायेत्यर्थः। अयं च प्राजापत्यो विवाहः। 'सह धर्मं चरतम् इति प्राजापत्य' (गृ.१.६.१) **इत्याश्वलायनवचनात्**।।८२।।

विवरणम्

सहधर्मचरणविधानमाह—

वधूमिति। गिरिः वधूं प्राह। गिरिर्हिमवान् वधूं नवोढां पार्वतीं प्राह उवाच। तिङ्प्रतिरूपकमव्ययमेतत्।

पञ्चानां ब्रुवआद्यानामाहादेशः स्मृतो लटि।
आहेत्येतदतीते तिङ्प्रतिरूपकमव्ययम्।।

इति भोजः। वचनप्रकारमाह—वत्से! एष वह्निः तव विवाहं प्रति पूर्वसाक्षी। एष विवाहार्थं पुरोभागे संभृतो वह्निरग्निः पूर्वसाक्षी प्रथमः साक्षी। 'आदित्यचन्द्रावनिल' इत्यादिस्मृतावादित्यादीनां यद्यपि सर्वकर्मसु साक्षित्वं प्रसिद्धं, तथापि विवाहे बह्निरेव प्रथमः साक्षीति च प्रसिद्धमेवेति द्योतयितुं पूर्वशब्दः। अस्तु साक्षी। मया तु किंकर्तव्यमित्यत्राह—त्वया मुक्तविचारया शिवेन भर्त्रा सह धर्मचर्या कार्या इति। मुक्तः परित्यक्तो विचारो यया तथाभूतया सत्या। शिवचरितेषु सदसच्चिन्तामपहायेत्यर्थः। धर्मचर्या धर्मानुष्ठानम्। अनेन प्राजापत्यो विवाहोऽत्र निर्व्यूढ इति दर्शितम्। 'सह धर्मं चरतम् इति प्राजापत्य' इत्याश्वलायनवचनात्।।८२।।

आलोचनान्तं श्रवणे विवृत्य
पीतं गुरोस्तद् वचनं भवान्या।
निदाघकालोल्बणभेदयेव
माहेन्द्रमम्भः प्रथमं पृथिव्या।।८३।।

प्रकाशिका

आलोचनेति। आलोचनान्तं लोचनसमीपावधि। अनेन श्रवणलोचनयोरल्पान्तरत्वमपि द्योत्यते। पीतमित्यादरातिशयद्योतकम्। उल्बणो भेदो वि[illegible]णं यस्याः।।८३।।

विवरणम्

देव्यास्तद्वचनानुष्ठानोपादानप्रकारमाह—

आलोचनेति। भवान्या गुरोः तद् वचनं श्रवणे आलोचनान्तं विवृत्य पीतम्। भवान्या भवपत्न्या। इदानीं भवानीति संज्ञापि जातेत्यनेन द्योत्यते। गुरोः पितुर्हिमवतः तत् सहधर्मचर्याविधायकं वचनं श्रवणे श्रोत्रे आलोचनान्तं लोचनसमीपावधि विवृत्य विदार्य। देव्याः श्रवणलोचनयोर्यदल्पान्तरत्वं स्वाभाविकं, तद् गुरुवचनश्रवणकौतुकेन श्रोत्रयोस्तदानीमत्यन्तविवृतत्वादेवेत्युत्प्रेक्षागर्भेयमुक्तिः। अत्र श्रवणे पानोपचारेण सतृष्णश्रवणत्वमुक्तम्। तेन चादरातिशयो द्योत्यते। अत्रोपमामाह—निदाघकालोल्बणभेदया पृथिव्या माहेन्द्रं प्रथमम् अम्भ इव इति। निदाघकाले घर्मकाले उल्बण उद्रिक्तो भेदो विदारणं यस्यास्तया पृथिव्या भूम्या। माहेन्द्रं महेन्द्रस्येदम्। वर्षजमित्यर्थः। प्रथमम् आद्यम् अम्भो जलमिव। यथा पृथिव्या प्रथमं जलं पीयते, तथा द्वितीयादि नाद्रियत इति प्रथमशब्दोपादानम्। अयं च प्रथमशब्दो वचनस्य सहधर्मचर्याविधायकत्वविशेषणप्रतिवस्तुतयोपात्तः, अम्भःशब्दो वचनप्रतिवस्तुतया, माहेन्द्रशब्दो गुरुप्रतिवस्तुतया च। विदारणस्य श्रोत्रप्रतिवस्तुत्वं पृथिव्या भवानीप्रतिवस्तुत्वं च स्पष्टम्।।८३।।

ध्रुवेण भर्त्रा ध्रुवदर्शनाय
प्रयुज्यमाना प्रियदर्शनेन।
सा दृष्ट इत्याननमुन्नमय्य
ह्रीसन्नकण्ठी कथमप्युवाच॥८४॥

प्रकाशिका

ध्रुवेणेति। ध्रुवेण भर्त्रा शाश्वतेन पत्या। अनेन वर्ण्यमानेषु शिवचेष्टितेषु लीलासिद्धत्वं कविरनुसन्धत्त इति द्योत्यते। ध्रुवो नक्षत्रविशेषः। प्रियदर्शनेनेति अन्यत्र द्रष्टव्यबुद्धिरेव नास्या इति द्योतयति।।८४।।

विवरणम्

ध्रुवदर्शनमाह—

ध्रुवेणेति। ध्रुवेण भर्त्रा ध्रुवदर्शनाय प्रयुज्यमाना सा आननम् उन्नमय्य दृष्ट इति कथमपि उवाच। ध्रुवेण शाश्वतेन। जननविनाशशून्येनेत्यर्थः। अनेन विशेषणेन कविरुक्तेषु वक्ष्यमाणेषु च पार्वतीपरमेश्वरयोश्चरितेषु केवललीलासिद्धत्वमनुसन्दधाति। भर्त्रा पत्या ध्रुवदर्शनाय ध्रुवस्योत्तराशास्थितस्य नक्षत्रविशेषस्य दर्शनायावलोकनाय।

इदं तु ध्रुवदर्शनमरुन्धतीसप्तर्षीणामप्युपलक्षणम्। 'ध्रुवमरुन्धतीं सप्तर्षीनिति दृष्ट्वा वाचं विसृजेद्' (गृ.१.७.२२) इत्याश्वलायनवतनात्। प्रयुज्यमाना प्रेर्यमाणा। ध्रुवोऽयमत्र तिष्ठति, तं पश्येति सहस्ताभिनयमुच्यमानेत्यर्थः। आननं वदनमुन्नमय्योत्क्षिप्य। ध्रुवस्योर्ध्वदेशवर्तित्वात् तद्दर्शनार्थमत्र वदनोन्नमनम्। दृष्टः अवलोकितो ध्रुव इति लज्जया कथमप्युवाच उक्तवती। प्रियशरीरव्यतिरिक्तानामर्थानां दर्शनं तन्नियोगादेवास्या इत्याह—प्रियदर्शनेनेति। प्रियं लोकोत्तरसौन्दर्यत्वादिष्टं दर्शनं यस्य तेन। देवस्य यो योऽवयवो दृष्टः, तत्र तत्र नेत्रद्वयं निमज्जति। अतः कथमन्यदर्शनाकाङ्क्षेति भावः। कथमप्युवाचेति यदुक्तं, तत्र हेतुमाह—ह्रीसन्नकण्ठीति। ह्रिया लज्जया सन्नो निरुद्धः कण्ठः स्वरो यस्याः सा तथा।।८४।।

इत्थं विधिज्ञेन पुरोहितेन
प्रयुक्तपाणिग्रहणोपचारौ।
प्रणेमतुस्तौ पितरौ प्रजानां
पद्मासनस्थाय पितामहाय॥८५॥

प्रकाशिका

इत्थमिति। प्रकृतमर्थं पुरोहितप्रयोगप्रकारत्वेन परामृशतेत्थंपदेन ध्रुवदर्शनस्यापि तत्प्रयुक्तत्वमवधार्यते। पाणिग्रहणोपचाराः अग्निप्रदक्षिणादयः। प्रजानां पितरावित्यनेन विश्वकारणभूतयोस्तयोः कुलवृद्धस्य ब्रह्मणः प्रणामो लौकिकाचारानुसरणमात्रमिति द्योतयति। प्रथमं लोकमान्यत्वाद् ब्रह्मा देवेन शिरःकम्पेन सम्भावितः, इदानीं तु वधूकुलकूटस्थत्वात् प्रणामेनेति विशेषः।।८५।।

विवरणम्

शास्त्रसिद्धं कर्म समाप्य लोकसिद्धं कर्म वर्णयति इत्थमित्यादिना। तत्र जगत्पूज्यस्य ब्रह्मणः प्रणामं वर्णयत्यनेन—

इत्थमिति। विधिज्ञेन पुरोहितेन इत्थं प्रयुक्तपाणिग्रहणोपचारौ तौ पद्मासनस्थाय पितामहाय प्रणेमतुः। विधिं जानातीति विधिज्ञः। शस्त्रज्ञेनेत्यर्थः। अनेनानुष्ठापनप्रावीण्यमुक्तम्। पुरोहितेनोपाध्यायेन इत्थं पूर्वोक्तप्रकारेण। अनेन पूर्वोक्तस्य सर्वस्याप्यर्थजातस्य पुरोहितप्रयुक्तत्वं द्योतयता भगवत्कृतस्य ध्रुवदर्शनप्रेरणस्यापि तस्यैव प्रयोजककर्तृत्वमिति ध्वन्यते। प्रयुक्ता कारिताः

पाणिग्रहणे विवाहे उपचारा अग्निप्रदक्षिणादयो ययोस्तौ पार्वतीपरमेश्वरौ। पद्ममेवासनं पद्मासनं, तत्र स्थिताय। नारायणनाभिकमलाधिष्ठितायेत्यर्थः। अनेन जगत्पूज्यत्वं ध्वन्यते। पितामहाय ब्रह्मणे प्रणेमतुर्नमश्चक्रतुः। पार्वतीपरमेश्वरकर्तृकोऽयं पितामहप्रणामो लौकिकाचारानुसरणमात्रेणैवेत्याह—प्रजानां पितराविति। ब्रह्मादिस्तम्बपर्यन्तानां जीवानां पितरौ मातापितरौ। लोकानुरणादेव देवः पूर्वमपि शिरःकम्पेन तं सम्भावितवान्, इदानीं तु वधूसनाथः प्रणामेनेति भाव।।८५।।

वधूर्विधात्रा प्रतिनन्द्यते स्म
कल्याणि! वीरप्रसवा भवेति।
वाचस्पतिः सन्नपि सोऽष्टमूर्ते-
राशास्यचिन्तास्तिमितो बभूव॥८६॥

प्रकाशिका

वधूरिति। प्रतिनन्दनमाशीः। वाचस्पत्तिर्वाण्याः पतिः। अष्टमूर्तिपदेन परमपरिपूर्णत्वं द्योत्यते। देव्या अपि वस्तुतः परिपूर्णत्वेऽपि आशीःपात्रत्वमपह्नुतवैभवत्वात्।।८६।।

विवरणम्

परमेष्ठिन आशीर्वादप्रकारमाह—

वधूरिति। विधात्रा वधूः प्रतिनन्द्यते स्म। विधात्रा ब्रह्मणा वधूः नवोढा पार्वती प्रतिनन्द्यते स्म। प्रतिनन्दनमत्रार्थादाशीर्वादः। आशीर्भिरनुगृहीताभूदिति भावः। आशीर्वादमेव प्रदर्शयति—कल्याणीत्यादिना। कल्याणि! त्वं वीरप्रसवा भव इति। कल्याणि! हे मङ्गलशीले! वीरो लोकोत्तरप्रतापः प्रसवः पुत्रो यस्याः सा वीरप्रसवा। वीरपुत्रा भवेत्यर्थः। इतिशब्दः प्रकारवाची। तारकाद्यसुरनिग्रहादिकार्यलाभत्वरया विस्मृतदेवीवैभवो विधाता तस्यै तदनुगुणमाशीर्वादं कृत्वा चतुर्दशभुवननायकस्य परमेश्वरस्याशीर्वादे मूकोऽभूदित्याह—सः वाचस्पतिः सन् अपि अष्टमूर्तेः आशास्यचिन्तास्तिमितो बभूव। सः विधाता वाण्याः पतिः सन्नपि भवन्नपि। अपिशब्दो विरोधवाची। अष्टमूर्तिशब्देनात्र परिपूर्णत्वं द्योत्यते, तेन चाशिषामविषयत्वम्। आशिषो प्रतिपाद्यमाशास्यं, तद्विषयया चिन्तया विचारेण स्तिमितो निश्चलो बभूव। परिपूर्णस्यास्य किमल्पैरस्माभिराशास्यमिति चिन्तया तूष्णीमेवावस्थितोऽभूदित्यर्थः।।८६।।

क्लृप्तोपचारां चतुरन्तवेदिं
तावेत्य पश्चात् कनकासनस्थौ।
जायापती लौकिकमेषितव्य-
मार्द्राक्षतारोपणमन्वभूताम्॥८७॥

प्रकाशिका

क्लृप्तेति। उपचारः पूर्णकुम्भादिः। लौकिकं लोकाचारसिद्धम्। एषितव्यं बन्धुभिरभिलषणीयमित्यर्थः।।८७।।

विवरणम्

लोकाचारसिद्धमक्षतधारणमाह—

क्लृप्तेति। तौ जायापती पश्चात् चतुरन्तवेदिमेत्य कनकासनस्थौ लौकिकम् एषितव्यम् आर्द्राक्षतारोपणम् अन्वभूताम्। जायापती भार्यापती। पश्चाद् वृद्धजनाभिवादनप्रत्यभिवादनयोरनन्तरम्। चत्वारोऽन्ताः कोणा यस्यास्तादृशीं वेदिं मण्डपविशेषम्। चतुरश्रमण्डपमित्यर्थः। एत्य संप्राप्य कनकमये सुवर्णमये आसने स्थितौ भूत्वा लौकिकं लोकाचारसिद्धम्। अत एव एषितव्यं बन्धुजनैरित्यर्थात्। बन्धुभिरभिलषणीयमित्यर्थः। शिवयोस्तु परिपूर्णत्वान्न किञ्चिदप्यभिलषणीयमस्तीति भावः। आर्द्राणामक्षतानाम्। 'सहरिद्रजलेनाक्तो मङ्गल्यस्तण्डुलाक्षत' इति भोजः। आरोपणं स्वाङ्गेषु विकिरणम् अन्वभूतामनुभूतवन्तौ। मण्डपस्यापि लोकाचारसिद्धमितिकर्तव्यमाह—क्लृप्तोपचारामिति। क्लृप्ता रचिता उपचाराः पूर्णकुम्भादयो यस्यां तथाभूताम्। गन्धोदकप्रोक्षणपुष्पमालालम्बनपूर्णकलशादिभिरलङ्कृते चतुष्कोणमण्डपे प्राङ्मुखमुपविश्य पार्वतीपरमेश्वरौ बन्धुजनैर्विकीर्यमाणस्याक्षतस्य धारणमनुबभूवतुरित्यर्थः।।८७।।

पत्रान्तलम्बैर्जलबिन्दुवर्षै-
राकृष्टमुक्ताफलजालशोभम्।
तयोरुपर्यायतनालदण्ड-
माधत्त लक्ष्मीः कमलातपत्रम्॥८८॥

विवरणम्

अथ तदवसरे देवैः क्रियमाणः शिवयोः सेवाप्रकारश्चतुर्भिः श्लोकैर्वर्ण्यते। तत्रादौ लक्ष्म्याः सेवाप्रकारमाह—

पत्रान्तेति। लक्ष्मी: तयोरुपरि कमलातपत्रम् आधत्त। लक्ष्मी: श्री: तयो: पार्वतीपरमेश्वरयो: उपरि उपरिभागे कमलातपत्रं कमलमेवातपत्रं श्वेतच्छत्रम् आधत्त धृतवती। लक्ष्मी: स्वयमेव मूर्तिमती सती पार्वतीपरमेश्वरयोरुपरि कमलमयं श्वेतच्छत्रमाधत्तेत्यर्थ:। कमलस्यातपत्रत्वरूपणे हेतुमेव स्फुटयति—पत्रान्तेत्यादिना विशेषणद्वयेन। पत्रान्तलम्बै: जलबिन्दुवर्षै: आक्रुष्टमुक्ताफलजालशोभम्। पत्राणां दलानामन्तेऽग्रे लम्बन्त इति पत्रान्तलम्बा: तै:। जलानां बिन्दवो जलबिन्दव: तेषां वर्षै:। आक्रुष्टा निन्दिता मुक्ताफलजालानां मौक्तिकनिकुरम्बाणां शोभा येन तत्। श्वेतच्छत्रं हि लम्बमानहारपटलपर्यन्तभागं भवति। अत्र तु पत्रान्तलम्बमानैर्जलबिन्दुभिर्मौक्तिकानां शोभाप्यभिभूयत इति भाव:। अत्र जलबिन्दुवर्षेणाभिनवत्वमुक्तम्। तेन च शोभाधिक्यं ध्वन्यते। तथा आयतनालदण्डम्। आयतं दीर्घं नालमेव दण्डो यस्य तत्॥८८॥[पद्यस्यास्य प्रकाशिका नास्ति]

द्विधा प्रयुक्तेन च वाङ्मयेन
सरस्वती तन्मिथुनं नुनाव।
संस्कारपूतेन वरं वरेण्यं
वधूं सुखग्राह्यनिबन्धनेन॥८९॥

प्रकाशिका

द्विधेति। सरस्वती मूर्तिमती भगवती। वाग्देवता। तदित्यतिलोकतया परामृशति। नुनाव तुष्टाव। द्वैविध्यं प्रति नियमं च दर्शयति—संस्कारेति। संस्कारो व्याकरणानुसरणम्। वरेण्यं श्रेष्ठम्। अनेनोत्तमनायकत्वात् संस्कृतयोग्यत्वमुक्तम्। सुखग्राह्यनिबन्धनेन देशभाषयेत्यर्थ:, 'स्त्रीषु नाप्राकृतं वदेदि'ति वचनात्॥८९॥

विवरणम्

सरस्वत्या: सेवाप्रकारमाह—

द्विधेति। सरस्वती च तद् मिथुनं स्त्रीपुरुषयुग्मम्। द्विधा प्रयुक्तेन वक्ष्यमाणविधद्वयमनुसृत्य प्रयुक्तेन वाङ्मयेन वाग्जालेन नुनाव तुष्टाव। 'णू स्तवन' इति धातु:। शिवयोर्विवाहावसानसमये सरस्वती साक्षादेव मूर्तिमती समागत्य तुष्टावेत्यर्थ:। द्विधा प्रयुक्तेन वाङ्मयेनेति यदुक्तं, तत्र स्त्रीपुरुषविभागकृतं नियमं दर्शयति—वरेण्यं वरं संस्कारपूतेन, वधूं सुखग्राह्यनिबन्धनेनेति। वरेण्यं श्रेष्ठम्। अनेनोत्तमनायकत्वमुक्तम्। तेन च संस्कृतयोग्यत्वं ध्वन्यते। वरं भर्तारम्। संस्कारो व्याकरणानुसरणम्। तेन पूतेन शुद्धेन। वधूं भार्याम्। सुखग्राह्यनिबन्धनेन सुखेन

ग्राह्यं निबन्धनं प्रबन्धो यस्य तेन। नहि प्रबन्धेन विना स्तुतिरुपपद्यत इति निबन्धनपदोपादानम्। अत्र सुखग्राह्यपदेन देशभाषारूपत्वं निबन्धनस्योक्तम्। देशभाषा चात्र प्राकृतभाषा, 'स्त्रीषु नाप्राकृतं वदेद्' इति वचनात्। उत्तमनायकं भगवन्तं संस्कृतभाषया, देवीं तु प्राकृतभाषया च वाग्देवता तुष्टावेत्यर्थः।।८९।।

तौ सन्धिषु व्यञ्जितवृत्तिभेदं
रसान्तरेषु प्रतिबद्धरागम्।
अपश्यतामप्सरसां मुहूर्तं
प्रयोगमाद्यं ललिताङ्गहारम्॥९०॥

प्रकाशिका

ताविति। सन्धिषु मुखप्रतिमुखगर्भावमर्शनिर्वहणेषु। वृत्तीनां कैशिक्यारभटीसात्त्वतीभारतीनां भेदो व्यत्यासः। रसान्तरेषु शृङ्गारादिरसविशेषेषु। प्रतिबद्धः प्रतिनियतः रागो यत्र। प्रयोगं नाट्यम्। आद्यम्। अत्र भरतस्था काचित् कथा लिख्यते—ब्रह्मणः सकाशाद् भरतस्ताण्डवं शिक्षयामास। ततः परं लास्यशिक्षां प्रार्थितवान्। ब्रह्मा त्वेवमाह—लास्यप्रयोगस्य कैशिकीभूयिष्ठत्वात्, कैशिक्याश्च पुरुषैः प्रयोक्तुमशक्यत्वात् लास्यं तव न शिक्षणीयमिति। अत्र ब्रह्मणोक्तौ श्लोकौ—

कैशिकी श्लक्ष्णनैपथ्या शृङ्गाररससम्भवा।
अशक्या पुरुषैः साधु प्रयोक्तुं स्त्रीजनादृते।। (ना.शा.१.४५-४६)
इत्युक्त्वा तत्प्रयोगार्थं सृष्टैवाप्सरसां गणम्।
शिक्षयामास ललितं लास्यं तस्मात् तदादिकम्।।

इति। तदादिकमप्सरोजनोपक्रमम्। तस्मात् प्रयोगस्याद्यत्वम्। अनेन प्रयोगस्य प्रथमसंप्रदायत्वेन परिशुद्धत्वमुक्तम्। ललिताङ्गहारं सुकुमाराङ्गविक्षेपम्। अनेन लास्यात्मकत्वमुक्तम्।।९०।।

विवरणम्

अप्सरसां सेवाप्रकारमाह—

ताविति। तौ मुहूर्तम् अप्सरसां प्रयोगम् अपश्याताम्। तौ पार्वतीपरमेश्वरौ। मुहूर्त्तं क्षणकालमित्यर्थः। अप्सरसाम् अप्सरःस्त्रीणां प्रयोगं नाट्यम् अपश्यतां दृष्टवन्तौ। प्रयोगस्य नाटकलक्षणानुसारित्वमाह—सन्धिषु व्यञ्जितवृत्तिभेदम् इति। सन्धिषु मुखप्रतिमुखादिषु। यथोक्तं—

मुखं प्रतिमुखं गर्भोऽथावमर्शश्चतुर्थकः।
तथा निर्वहणं चैव प्रबन्धे पञ्च सन्धयः।।

इति। व्यञ्जितः प्रकाशितः वृत्तीनां कैशिक्यादीनां भेदो व्यत्यासो यस्मिन् तम्। वृत्तीनामपि चतुर्विधत्वमुक्तं—

कैशिक्यारभटी चैव सात्त्वती भारतीत्यमूः।
चतस्रो वृत्तयो ज्ञेया नाटकेषु पृथग्विधाः।।

इति। 'अवान्तरैककार्यस्य सम्बन्धः सन्धिरुच्यते' इति सन्धिलक्षणं चोक्तम्। मुखप्रतिमुखादिषु सन्धिषु तत्तदुचिताभिः कैशिक्यारभट्यादिभिर्वृत्तिभिर्भिन्नप्रयोगमित्यर्थः। तत्तद्रविशेषेषु तत्तद्रागविशेषनियमं चाह—रसान्तरेषु प्रतिबद्धरागमिति। रसान्तरेषु शृङ्गारादिरसविशेषेषु प्रतिबद्धः प्रतिनियतो रागो मतरीगुञ्जरीत्यादिरागो यत्र तम्। शृङ्गारवीरकरुणादिषु रसविशेषेषु तत्तदुचितेन रागेण प्रतिनियतमित्यर्थः। प्रयोगस्य प्रथमसम्प्रदायत्वेन परिशुद्धत्वमाह—आद्यमिति। आद्यशब्देनात्र भरतशास्त्रप्रसिद्धा काचन कथा प्रतिपादिता। सा यथा—

पद्मयोनेः सकाशात् प्राग् भरतः किल ताण्डवम्।
शिक्षयामास सकलं लास्यशिक्षां ततः परम्।।

भरतः प्रार्थयामास प्रोवाचैनमथात्मभूः।
लास्यप्रयोगो भवता नैव शक्यः कथञ्चन।।
लास्ये हि कैशिकी वृत्तिरधिका सा न पूरुषैः।
प्रयोक्तव्या ततो लास्ये नारीणामेव नैपुणम्।।
कैशिकी श्लक्ष्णनैपथ्या शृङ्गाररससम्भवा।
अशक्या पुरुषैः साधु प्रयोक्तुं स्त्रीजनादृते।।
इत्युक्त्वा तत्प्रयोगार्थं सृष्ट्वैवाप्सरसां गणम्।
शिक्षयामास ललितं लास्यं तस्मात् तदादिकम्।।

इति। अत्र तदादिकमित्यनेनाप्सरोजनोपक्रमत्वमुक्तम्। तत एव प्रयोगस्याद्यत्वम्। तेन च प्रथमसंप्रदायत्वात् प्रयोगस्य विशुद्धत्वम्। शिष्यप्रशिष्यादिपरम्परया दूरान्तरिते हि संप्रदाये प्रयोगस्याप्यशुद्धिः सम्भाव्येत। यथोक्तं—

शिष्यस्य बुद्धिमान्द्यादाचार्यस्योपदेशसंवरणात्।
परिमुषितसंप्रदायानहह परे दूषयन्ति शास्त्रार्थान्।।

इति। प्रयोगस्य लास्यात्मकत्वमाह—ललिताङ्गहारम् इति। ललितः सुकुमारोऽङ्गहारोङ्गविक्षेपो यस्मिंस्तत्। 'अङ्गहारोऽङ्गविक्षेप' इत्यमरः।।९०।।

देवास्तदन्ते हरमूढभार्यं
किरीटदष्टाञ्जलयो निपत्य।
शापावसानप्रतिलब्धमूर्ते-
र्ययाचिरे पञ्चशरस्य सेवाम्।।९१।।

प्रकाशिका

देवा इति। तदन्ते प्रयोगावसाने। अनेन शृङ्गारोद्दीपनसम्पदुक्ता। ऊढभार्यमित्यालम्बनसम्पत्। आभ्यां विज्ञापनाया उचितावसरत्वं द्योत्यते। अत एव वक्ष्यति—'काले प्रयुक्ता' (७.९) इति। किरीटदष्टाञ्जलयो निपत्येति विज्ञापनायां समुदाचारः। शापावसानं प्राक् 'परिणेष्यति पार्वतीं यदा' (४.४२) इत्यादिनोक्तं यत्, तत्र प्रतिलब्धमूर्तेर्देवप्रसादात् प्रत्यापन्न-शरीरस्य।।९१।।

विवरणम्

इन्द्रादिदेवानां सेवायां विशेषमप्याह—

देवा इति। देवाः तदन्ते ऊढभार्यं हरं किरीटदष्टाञ्जलयः निपत्य पञ्चशरस्य सेवां ययाचिरे। देवाः इन्द्रादयः। येषामज्ञानविलसितात् कामो दग्धः, त एवेत्यर्थः। अनेन याचनयोग्यत्वमुक्तम्। तस्य प्रयोगस्यान्तेऽवसाने। अनेन शृङ्गारोद्दीपनविभावातिशयो दर्शितः। आलम्बनविभावातिशयमप्याह—ऊढभार्यमिति। ऊढा परिणीता भार्या येन तम्। अनेनोद्दीपनालम्बनविभावातिशयप्रतिपादनेन विज्ञापनोचितमवसरं दर्शयति। अत एव उत्तरश्लोके वक्ष्यति—'काले प्रयुक्ते'-(कु.सं.७.९२)त्यादि। हरं परमेश्वरम्। किरीटेषु मकुटेषु दष्टाः शिलष्टा अञ्जलयो येषां तथाभूताः सन्तो निपत्य प्रणिपत्य। सेवावसानकाल इत्यर्थः। अनेन विज्ञापनस्य समुदाचारो दर्शितः। अयमपि फलप्राप्तौ हेतुः। पञ्चशरस्य कामस्य सेवां सम्भोगारम्भे तदुचितशर-प्रयोगरूपां शुश्रूषां ययाचिरे याचितवन्तः। निजनियोगमात्रेण परित्यक्तशरीरस्य मदनस्यानुग्रहस्तदानीं सुकर इत्यवधार्य विबुधाः प्रार्थयामासुरित्यर्थः। शरीरयोगस्तु तस्य सुरजनाभ्यर्थनात् पूर्वमेव देवप्रसादाज्जात इत्याह—शापावसानप्रतिलब्धमूर्तेरिति। शापस्य 'अभिलाषमुदीरितेन्द्रियः'(४.४१) इत्यत्रोक्तस्य निग्रहवचनस्यान्ते 'परिणेष्यति पार्वतीं यदा' इत्यादिनोक्ते शापावसानसमये प्रतिलब्धा प्रत्यापत्तिं प्राप्ता मूर्तिः शरीरं यस्य तस्य। पितामहशापावसानसमये भगवदनुग्रहादेव प्रत्यापन्नशरीरस्येत्यर्थः।।९१।।

तस्यानुमेने भगवान् विमन्यु-
र्व्यापारमात्मन्यपि सायकानाम्।
काले प्रयुक्ता खलु कालविद्भि-
र्विज्ञापना भर्तृषु सिद्धिमेति॥९२॥

प्रकाशिका

तस्येति। विमन्युः, न तु तदनुरोधमात्रात्। अत्रात्मन्यपि सायकव्यापाराभ्युपगमेनान्यत् तस्य शरीरयोगादिकं देवेनानुमतमित्यवसातव्यम्।।९२।।

विवरणम्

इत्थमभ्यर्थितस्य भगवतः प्रवृत्तिमाह—

तस्येति। भगवान् विमन्युः तस्य सायकानां व्यापारम् आत्मनि अपि अनुमेने। विगतो मन्युः कोपो यस्मात् तथाभूतः सन्। 'मन्युर्दैन्ये क्रतौ क्रुधि' इत्यमरः। पार्वतीपरिणयनानन्तरं भगवान् मन्मथं प्रति स्वयमेव विगतकोपः सञ्जातः। न केवलमिन्द्रादिप्रार्थनामात्रमत्र हेतुरिति भावः। तस्य कामदेवस्य सायकानां शराणां व्यापारं प्रहाररूपां प्रवृत्तिम् आत्मनि स्वस्मिन्नपि। अपिशब्देनात्मनि सायकव्यापाराभ्यनुज्ञाया असम्भाव्यत्वं दर्शितम्। तेन च भक्तानुग्रहशीलत्वं भगवतो द्योत्यते। अनुमेने अभ्यनुज्ञातवान्। उक्तमर्थमर्थान्तरन्यासेन समर्थयते—कालविद्भिः काले भर्तृषु प्रयुक्ता विज्ञापना सिद्धिम् एति खलु इति। कालविद्भिः 'न तु कार्यान्तरासक्ते नापि रोषकषायिते' इत्यादिविज्ञापनकालवेदिभिरित्यर्थः। काले अवसरे भर्तृषु स्वामिषु प्रयुक्ता विज्ञापनाभ्यर्थना सिद्धिं फलप्राप्तिम् एति प्राप्नोति। खलुशब्दः प्रसिद्धौ। स च समर्थनाद्योतकः। अवसरज्ञानकुशलैर्भृत्यैस्तत्तदवसरे प्रार्थितमर्थं स्वामिनोऽनुमन्यन्त इति लोकप्रसिद्धमेवेत्यर्थः।।९२।।

अथ विबुधगणाँस्तानिन्दुमौलिर्विसृज्य
क्षितिधरपतिकन्यामाददानः करेण।
कनककलशरक्षाशक्तिशोभासनाथं
क्षितिविरचितशय्यं कौतुकागारमागात्॥९३॥

प्रकाशिका

अथेति। कलशः पूर्णकुम्भः। रक्षाशक्तिः रक्षार्थायुधविशेषः। क्षितिविरचितशय्यम्, 'अत ऊर्ध्वमक्षारालवणाशिनावधश्शायिनौ ब्रह्मचारिणौ स्याताम्'

(गृ.१.८.१०) इत्याश्वलायनवचनात्। अत ऊर्ध्वं विवाहादूर्ध्वमित्यर्थः। तत एव कौतुकागारं मङ्गलगृहं मन्तव्यं, न तु कामगृहं, यथा दक्षिणावर्तव्याख्याने।।९३।।

विवरणम्

इत्थं प्रतिपादितं विवाहोत्सवमुपसंहरति—

अथेति। अथ इन्दुमौलिः तान् विबुधगणान् विसृज्य क्षितिधरपतिकन्यां करेण आददानः कौतुकागारम् आगात्। अथ कामदेवानुग्रहानन्तरम् इन्दुमौलिश्चन्द्रशेखरः विबुधानां देवानां गणान् समूहान् विसृज्य। तेषां स्वपुरप्रवेशायाज्ञां कृत्वेत्यर्थः। क्षितिधराणां पर्वतानां पत्युः कन्यां पुत्रीं पार्वतीम्। करेणाददानः हस्तेन हस्ते गृहीत्वेत्यर्थः। कौतुकागारं मङ्गलगृहम् आगात् प्राप्तवान्। विवाहानन्तरं देवो देव्या सह दीक्षागृहमागादित्यर्थः। कौतुकागारस्य लौकिकाचारसिद्धं विशेषमाह—कनककलशरक्षाशक्तिशोभासनाथमिति। कनकमयः कलशः पूर्णकुम्भः। रक्षार्था शक्ती रक्षाशक्तिः। शक्तिरायुधविशेषः। दीक्षागृहे शक्तिनिक्षेपो दुर्दैवतापरिहारार्थः। स च देशाचारसिद्धः। पूर्णकुम्भशक्तिभ्यां शोभया सनाथं सहितमित्यर्थः। शास्त्रसिद्धं विशेषमाह—क्षितिविरचितशय्यमिति। क्षितौ भूप्रदेशे विरचिता शय्या शयनीयं यस्मिन्। 'अत ऊर्ध्वमक्षारालवणाशिनावधःशायिनौ ब्रह्मचारिणौ स्याताम्' इत्याश्वलायनगृह्यानुसारेणेयमुक्तिः। अत ऊर्ध्वं विवाहादूर्ध्वम्। दिवसत्रयमित्यर्थः।।९३।।

नवपरिणयलज्जाभूषणां तत्र गौरीं
वदनमपहरन्तीं तत्कृतोत्क्षेपमीशः।
अपि शयनसखीभ्यो दत्तवाचं कथञ्चित्
प्रमथमुखविकारैर्हासयामास गूढम्॥९४॥

प्रकाशिका

नवेति। नवोऽचिरनिर्वृत्तः। उत्क्षेप उदञ्चनम्। शयनसख्यो विस्रब्धसख्य इत्यर्थः। प्रमथाः पारिषदा भिङ्गिरिटिप्रभृतयो हास्याधिदेवताः। 'शृङ्गारो विष्णुदेवत्यो हास्यः प्रमथदैवत' इति भरतः। मुखविकारो हास्यप्रयोगात्मकः। स च लज्जामपहरति। यथा गोनर्दीयः—

हास्येन नर्मवचसा नवोढां लज्जितां प्रियाम्।
विमुक्तलज्जां कुर्वीत निपुणैश्च सखीजनैः।।

इति। अत्र वदनापहरणं कृच्छ्राद् वाग्दानं गूढहासश्च लज्जानुभावः। वदनोत्क्षेपणं

सखीभिरालापनं हास्यप्रयोगश्च नववधूविषयाः नायकोपक्रमाः। एतच्छायायोनिरर्थो बालरामायणे—

स्नायुन्यासनिबद्धकीकसतनुं नृत्यन्तमालोक्य मां
चामुण्डाकरतालकुट्टितलयं वृत्ते विवाहोत्सवे।
ह्रीमुद्रामपनुद्य यद् विहसितं देव्या समं शम्भुना
तेनाद्यापि मयि प्रभुः स जगतामास्ते प्रसादोन्मुखः।

इति। इयं च भिङ्गिरिटेरुक्तिः।।९४।।

इत्यरुणगिरिनाथविरचितायां कुमारसम्भवप्रकाशिकायां
सप्तमः सर्गः।

विवरणम्

अथ सम्भोगवर्णनरूपस्योत्तरसर्गस्य बिन्दुमुपक्षिपति—

नवेति। ईशः तत्र नवपरिणयलज्जाभूषणां गौरीं प्रमथमुखविकारैः गूढं हासयामास। ईशः परमेश्वरः तत्र कौतुकागारे। दीक्षादिषु क्रियाकलापेष्वतीतेष्वित्यर्थात्। सिध्यति। नवेन नूतनेन परिणयेन विवाहेन हेतुना या लज्जा सैव भूषणं यस्यास्ताम्। नवोढानां हि वधूनां लज्जा भूषणमेव। लज्जाया मनोहारित्वाद् भूषणत्वरूपणम्। गौरीं पार्वतीम्। प्रमथा भिङ्गिरिटिप्रभृतयो रुद्रपारिषदाः। 'प्रमथाः स्युः पारिषदाः' इत्यमरः। 'प्रमथाः स्युर्भूतगणा रुद्रपारिषदा गणाः' इति **भोजश्च**। तेषां मुखविकारैर्हास्यप्रयोगरूपैर्वदनव्यापारविशेषैः गूढमत्यन्तप्रच्छन्नं यथा भवति तथा हासयामास हासं कारितवान्। अत्र गूढत्वं लज्जाया अनुभावः, हासस्तु हास्यप्रयोगस्य। हास्यप्रयोगो हि लज्जामपहरति। यथाह गोनर्दीयः—

हास्येन मधुना नर्मवचसावर्जितां प्रियाम्।
विमुक्तलज्जां कुर्वीत निपुणैश्च सखीजनैः।।

इति। हास्यप्रयोग एव केवलं लज्जामपहरति, किमुत हास्यरसदेवताभूतानां भिङ्गिरिटिप्रभृतीनां तत्प्रयोग इति भावः। हास्यरसस्य भृङ्गिरिटिप्रभृतयो देवताः। यदाह भरतः—'शृङ्गारो विष्णुदेवत्यो हास्यः प्रमथदैवतः' इति। प्रयोगान्तराणां निष्फलत्वमाह—तदित्यादिना विशेषणद्वयेन। तत्रादौ देवप्रवृत्तेरेव लज्जापरतन्त्रायां देव्यां वैफल्यमाह—तत्कृतोत्क्षेपं वदनम् अपहरन्तीम् इति। तेनेशेन कृतो विहित उत्क्षेप उदञ्चनं यस्य तत्। ईशस्यात्र कर्तृभूतस्यापि परोक्षवाचिना तच्छब्देन परामर्शः 'वृषेव सीतां तदवग्रहक्षताम्' (५.६१) इत्यादिवद् द्रष्टव्यः। तद् वदनमिति पृथक्कृत्य वा योजनीयम्। तत्र तच्छब्देन लोकप्रसिद्धमाधुर्यादिगुण-

शालित्वमुक्तम्। मनोहारित्वेन सततं दिदृक्षितत्वात् परिचयेन शनैः शनैर्लज्जापनोदार्थं च देवेनैवोदञ्चितं मुखमित्यर्थः। अपहरन्तीं नमयन्तीम्।

मुहुरङ्गुलिसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लबाभिरामम्।
मुखमंसविवर्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्बितं तु।।

इति शाकुन्तलोक्तप्रकारोऽनेन दर्शितः। देवनियुक्तानां निपुणानां सखीजनानां प्रवृत्तेरप्यसम्पूर्णफलत्वमाह—शयनसखीभ्यः अपि कथञ्चिद् दत्तवाचम् इति। शयनसखीभ्यो विस्रब्धसखीभ्य इत्यर्थः। याः सख्यः पूर्वं शयनसमयेऽपि देवीं न विमुञ्चन्ति, ताभ्योऽपीति भावः। किं पुनरन्याभ्य इत्यपिशब्दार्थः। कथञ्चित् कथमपि दत्ता वाग् यया ताम्। सखीभिर्बहुषु वाक्येषु भाषितेषु यस्य कस्यचिदेवोत्तरं ददाति। तदपि न देवसन्निधौ, नापि देवानुबद्धासु कथास्विति कथञ्चिदित्यस्यार्थः। अत्र गूढहासो वदनापहरणं कथञ्चिद् वाग्दानं च लज्जाया अनुभावः। लज्जापनोदनार्थमात्मना कृते वदनोत्क्षेपे निष्फले देवनियुक्तानां सखीनामालापेऽपि विफलप्राये प्रमथैः कारितो हास्यप्रयोग एव सफलो जात इत्यभिप्रायः। उक्तश्चायमेवार्थो बालरामायणे भिङ्गिरिटिवाक्यप्रकरणे—

'स्नायुन्यासनिबद्धकीकसतनुं नृत्यन्तमालोक्य मां
चामुण्डाकरतालकुट्टितलयं वृत्ते विवाहोत्सवे।
ह्रीमुद्रामपनुद्य यद् विहसितं देव्या समं शम्भुना
तेनाद्यापि मयि प्रभुः स जगतामास्ते प्रसादोन्मुखः।।'

।।९४।।

सर्गः सप्तम उत्तमोऽयममितैः पद्यैरवद्येतरै-
रुद्यत्स्वादुरसैर्गभीरमधुरैराद्योतितार्थोदयः।
हन्तेमा मम निर्गुणा भणितयो बुद्धिस्तु मन्दोद्यमा-
प्यस्मिन् मद्गुरुगौरवादकरवं निर्विक्रियां व्याक्रियाम्।।

इति श्रीकृष्णशिष्यस्य नारायणस्य कृतौ
कुमारसम्भवविवरणे
सप्तमः सर्गः।

●

।। अथाष्टमः सर्गः ।।

पाणिपीडनविधेरनन्तरं
शैलराजदुहितुर्हरं प्रति।
भावसाध्वसपरिग्रहादभूत्
कामदौहृदसुखं मनोहरम्।।१।।

प्रकाशिका

अथोपक्षिप्तं नववधूविषयं देवस्य प्रथमानुरागानन्तरसम्भोगं वर्णयति—

पाणीति। 'तथा परिणयोद्वाहौ विवाहः पाणिनीडनमि'ति सिंहः। कामविषये यद् दौहृदम् इच्छा, तत् कामदौहृदम्। तेन च तद्विषयभूत आलिङ्गनादिर्लक्ष्यते। तज्जनितं सुखं कामदौहृदसुखम्। सम्भोगसुखमित्यर्थः। तस्य च विवाहानन्तरत्ववचनेन प्रथमानुरागानन्तरत्वमुक्तम्। तदानन्तर्याच्च देव्या देवं प्रति भावस्याभिलाषस्य साध्वसस्याधाष्टर्यस्य च परिग्रहः। अथवा भावमिश्रं साध्वसं भावसाध्वसम्। साध्वसस्यैव प्राधान्येन सम्भोगस्वादुत्वजनकत्वेनोत्तरश्लोकेषु वर्णयिष्यमाणत्वात् समासेऽपि तस्यैव प्राधान्यमङ्गीकार्यम्। तच्च भावमिश्रत्वाद् रमणीयम्। तस्य परिग्रहाद् देवं प्रति तत् सुखं मनोहरमभूत्। नायिकाभावदर्शनप्रवृद्धभावस्य नायकस्य तस्याः साध्वसपरतन्त्रत्वात् कथश्चिदसमग्रलभ्यमानानि मनोरथगुणितान्यालिङ्गनादीनि मनो जह्रुरित्यर्थः।।१।।

विवरणम्

अथ पूर्वसर्गोपक्षिप्तं देवस्य नववधूविषयं प्रथमानुरागानन्तरसम्भूतं सम्भोगं वर्णयितुमष्टमः सर्गोऽयमारभ्यते। तत्र **माधवेनो**क्तम्—अत्राष्टमः सर्गो गौरीसम्भोगवर्णनाद् वाचयितुं श्रोतुं व्याख्यातुं च न युक्तः, एतच्छीलानां देवताशापादायुषः क्षयो भविष्यतीति। दक्षिणावर्तेन पुनः—अस्य प्रकरणस्य शिवयोः सम्भोगविषयत्वाद् सभावार्थान् विविच्य वक्तुं बिभेमि। तस्मादन्वयमात्रमत्राधिक्रियत इत्युक्तम्। अरुणाचलनाथेन तु तदुभयमपि दूषितम्। अयं किल तस्याभिप्रायः—पार्वतीपरमेश्वरयोः शरीरग्रहणमात्रमपि लोकानुग्रहार्थमेव। यथोक्तं भगवता 'विदितं वो यथा स्वार्था न मे काश्चित् प्रवृत्तयः' (६.२६) इति। देव्या अपि शरीरग्रहणादिकं लोकानुग्रहार्थमेवेति देवीमाहात्म्यादिषु तत्र तत्र प्रतिपादितम्। त्रिविधा हि लोके जनाः मुक्ता मुमुक्षवः सक्ताश्चेति। तत्र मुक्तानां कृतकृत्यत्वादेतयोर्लीलायितानां सञ्चिन्तनश्रवणादिभिः परब्रह्मानुभवतुल्यकुल्यः परमाह्लादो

भवतीत्यनुग्रहो भूयानेव। मुमुक्षूणां तु लीलायितश्रवणानुसन्धानादिभिरन्तःकरणशुद्धिरूपो महाननुग्रहः स्पष्ट एव। किञ्च महत्तरैरपि तपश्चरणैरुभाभ्यामपि तदनुग्रह एव कृतः, इत्थं कर्तव्यमित्युपदेशमात्रपरत्वात् तयोस्तपश्चरणानाम्। कामिनां तु चित्तावर्जनं सम्भोगशृङ्गारानुगृहीतकथाश्रवणेनैव सुकरमिति लीलागृहीतशरीरौ भगवन्ताविमं प्रकारमारब्धवन्तौ। येन केनापि प्रकारेण भगवति मनःप्रणिधानमेव मुक्तिकारणमित्युक्तं भागवते—

कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव वा।
नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते।।

इति। महाकविरपि कामिनां चित्तं पार्वतीपरमेश्वरपादारविन्दासक्तं विधातुमेवाष्टमेऽस्मिन् सर्गे वात्स्यायनशास्त्रानुसारिणीं पदवीमुररीचकार। तस्माल्लोकोत्तरलौकिकनायकव्यवहारमखिलजनानुग्रहार्थमनुकुर्वतोरेतयोर्महानटयोस्तदनुगुणानां प्रबन्धानां निर्माणतद्व्याख्यानश्रवणादिभिरनुग्रह एव भूयानाविर्भवति। तदनुबद्धानि वचनानि तु स्तुतावेव पर्यवस्यन्तीत्यलमतिप्रसङ्गेन। प्रकृतमेवानुसरामः। वक्ष्यमाणमेवार्थं संक्षेपतः प्रतिपादयति—

पाणीति। पाणिपीडनविधेः अनन्तरं शैलराजदुहितुः हरं प्रति भावसाध्वसपरिग्रहात्। कामदौहृदसुखं मनोहरम् अभूत्। पाणिपीडनं विवाहः। 'विवाहोपयमौ समौ। तथा परिणयोद्वाहोपयमाः पाणिपीडनमि'त्यमरः। पाणिपीडनस्य विधिः पाणिपीडनविधिः। विधिर्विधानम्। तस्यानन्तरम्। शैलराजस्य दुहितुः पुत्र्याः पार्वत्याः हरं प्रति परमेश्वरमुद्दिश्य भावस्याभिलाषस्य साध्वसस्य अधार्ष्ट्यस्य च परिग्रहात् स्वीकारात्। भावमिश्रस्य साध्वसस्य स्वीकारादिति मध्यमपदलोपी वा समासः। तथात्वे साध्वसस्यैव प्राधान्यं प्रतिपादितं भवति। साध्वसं हि सम्भोगे स्वादुतां जनयति। अत एवोत्तरश्लोकेषु तथैव प्रतिपाद्यते। कामविषयं दौहृदं कामदौहृदम्। दौहृदमिच्छा। तया च तद्विषयभूतमालिङ्गनचुम्बनादिकं लक्ष्यते। तज्जनितं सुखं कामदौहृदसुखम्। सम्भोगसुखमित्यर्थः। मनोहरमभूत्, हरं प्रतीत्यत्राप्यनुषज्यते। अत्र सम्भोगसुखस्य पाणिपीडनानन्तरत्वकथनेन प्रथमानुरागानन्तरभवत्वमुक्तं, तेन च देव्या देवं प्रति भावसाध्वसपरिग्रहस्योपपत्तिः, तेन च कामसुखानां देवमनोहरत्वम्। साध्वसपरतन्त्रायां देव्यामसमग्रलभ्यानि मनोरथशतगुणितान्यालिङ्गनादीनि देवस्य मनो जह्रुरित्यर्थः।।१।।

व्याहृता प्रतिवचो न सन्दधे
गन्तुमैच्छदवलम्बितांशुका।
सेवते स्म शयनं पराङ्मुखी
सा तथापि रतये पिनाकिनः।।२।।

प्रकाशिका

तदेव वर्णयति—

व्याहृतेति। प्रियावचनश्रवणकौतुकिना देवेन तत्प्रसङ्गार्थं व्याहृता सा प्रतिवचो दातुं नारभतैव। गमननिवारणार्थं गृहीतांशुकापि गन्तुमेवैच्छत्। आलिङ्ग्यमानापि पराङ्मुखी शयनमसेवत। एवं परस्परसंल्लापादिषु साध्वसादसमग्रेष्वपि 'दुर्लभाभिनिवेशी काम' इति न्यायात् स तस्य प्रीतये बभूवेत्यर्थः। अत्र दक्षिणावर्त आह—'अस्य प्रकरणस्य शिवयोः सम्भोगविषयत्वाद् रसभावान् विविच्य वक्तुं बिभेमि, तस्मादन्वयमात्रादि क्रियत' इति। एतदल्पज्ञताविलसितं, यतः प्रसिद्धलौकिकोत्तमनायकव्यवहारमनुकुर्वतोरनयोर्महानटयोर्लीलामात्रात्मिकासु प्रवृत्तिषु परमार्थबुद्धिर्यस्यास्ति तस्यैवायं दोषः। यस्य तु सा नास्ति तस्य तद्विवेचनमपि शिवयोः स्तुतिः पर्यवस्यति।।२।।

विवरणम्

उक्तमर्थमेव विस्तरतः प्रतिपादयति व्याहृतेत्यादिना—

व्याहृतेति। सा व्याहृता प्रतिवचः न सन्दधे। सा पार्वती व्याहृता मञ्जुलतरवल्लभासँल्लापश्रवणकौतुकाद् देवेन प्रसङ्गार्थं किमप्युक्ता सती प्रतिवचः उत्तरवाक्यं न सन्दधे नोपाददे। पुनश्च सम्मुखावस्थानमात्रेऽपि लज्जिताया देव्याः प्रियवचनश्रवणानन्तरभवां प्रवृत्तिमाह—अवलम्बितांशुका गन्तुम् ऐच्छद् इति। गमननिवारणार्थं देवेनावलम्बितं गृहीतमंशुकं वस्त्रं यस्याः तथाभूतापि। गन्तुमैच्छत् ततो गमनं कर्तुं केवलमारेभे। शयनेऽपि साध्वसपारतन्त्र्यमाह—पराङ्मुखी शयनं सेवते स्म इति। पराङ्मुखी सादरमालिङ्ग्यमानाप्यनभिमुखी सती शयनं शय्यां सेवते स्म असेवत। इत्थं परस्परसँल्लापादिषु दुर्लभेष्वपि देवस्य तद्विषयं रागोत्कर्षमाह—सा तथा अपि पिनाकिनः रतये इति। सा पार्वती। तथापि सँल्लापादिषु दुर्लभेष्वपीत्यर्थः। पिनाकिनः परमेश्वरस्य रतये प्रीतये। बभूवेति शेषः। 'दुर्लभाभिनिवेशी काम' इति न्यायोऽनेन दर्शितः।।२।।

कैतवेन शयिते कुतूहलात्
पार्वती प्रतिमुखं निपातितम्।
चक्षुरुन्मिषति सस्मितं प्रिये
विद्युदाहतमिव न्यमीलयत्॥३॥

प्रकाशिका

अथ षड्भिः श्लोकैः साध्वसस्य क्रमाच्छैथिल्यं दर्शयति—

कैतवेनेति। मयि सुप्ते किमियं करिष्यतीति ज्ञातुं व्याजसुप्ते देवे तत्स्वापपरीक्षाकुतूहलेन तन्मुखाभिमुखं चक्षुः पुनस्तस्मिन् सनर्मस्मितमुन्मिषितलोचने सति विद्युता प्रतिहतमिव ससाध्वसं निमीलयामासेत्यर्थः। अत्र सुप्तस्यापि कमितुर्मुखनिरीक्षणात् साध्वसस्य किञ्चिच्छैथिल्यमुक्तम्। इत उत्तरेष्वपि यथोत्तरं शैथिल्यमवसेयम्।।३।।

विवरणम्

अथ परिचयवशात् क्रमेण साध्वसशैथिल्यं दर्शयति षड्भिः श्लोकैः। तत्रादौ सुप्ते भर्तरि तन्मुखनिरीक्षणं शक्यमासीदिति साध्वसस्य पूर्वावस्थातः किञ्चिच्छैथिल्यमाह—

कैतवेनेति। प्रिये कैतवेन शयिते पार्वती कुतूहलात् प्रतिमुखं निपातितं चक्षुः प्रिये सस्मितम् उन्मिषति विद्युदाहतम् इव न्यमीलयत्। प्रिये कान्ते कैतवेन व्याजेन शयिते सुप्ते। स्वापमुपगते मयि किमियं करिष्यतीत्यवधारयितुं स्वापव्याजमुपगते सतीत्यर्थः। कुतूहलात् तन्मुखारविन्दविलोकनकौतुकात्। प्रतिमुखं तन्मुखाभिमुखं निपातितं नितरां पातितम्। सुखावलोकनं यथा भवति तथा निवेशितमित्यर्थः। चक्षुः लोचनम्। सस्मितं सनर्मस्मितमित्यर्थः। उन्मिषति उन्मीलितवति सति। चक्षुरिति अत्राप्यनुषज्यते। विद्युता सौदामन्या आहतं प्रतिहतमिव न्यमीलयद् निमीलितवती। उत्प्रेक्षया चक्षुर्निमीलनस्य साध्वसादस्वतन्त्रता द्योत्यते।।३।।

नाभिदेशनिहितः सकम्पया
शङ्करस्य रुरुधे तया करः।
तद्दुकूलमथ चाभवत् स्वयं
दूरमुच्छ्वसितनीविबन्धनम्।।४।।

प्रकाशिका

नाभीति। नीवीविस्रंसनाय नाभिदेशन्यस्तो देवस्य करो वेपथुमत्या तया सलज्जया रुद्धः, तथापि प्रियतमसन्निधानवशात् तस्या दुकूलं स्वयमेव दूरविस्रस्तनीविकमासीदित्यर्थः। यथाह रसिकचूडामणिरमरुकः—'कान्ते तल्पमुपागते विगलिता नीवी स्वयं बन्धनाद्' इति। अत्र नीवीस्पर्शस्य रोधात् तत्प्राग्भावी स्तनमर्दनादिः करव्यापारस्तया सोढ इति प्रतीयते।।४।।

विवरणम्

पुनरपि क्रमेण साध्वसस्य पूर्वावस्थातः शैथिल्यमाह—

नाभीति। नाभिदेशनिहितः शङ्करस्य करः सकम्पया तया रुरुधे। नीवीविस्रंसनकाङ्क्षया नाभिदेशे नाभिप्रदेशे निहितः न्यस्तः शङ्करस्य परमेश्वरस्य करः हस्तः सकम्पया लज्जापारतन्त्र्याद् वेपथुमत्या तया पार्वत्या रुरुधे रुद्धोऽभूत्। इत्थं लज्जाया अनुभावमुक्त्वा रागस्याप्यनुभावं दर्शयति—अथ च तद्दुकूलं स्वयं दूरम् उच्छ्वसितनीविबन्धनम् अभवद् इति। अथ च तथापीत्यर्थः। तद्दुकूलं तस्याः पार्वत्याः दुकूलं वसनम्। स्वयं देवस्य करव्यापारेण विनैवेत्यर्थः। दूरमत्यन्तमुच्छ्वसितं विस्रस्तं नीव्या बन्धनं यस्य तथाविधमभूत्। यद्यपि देवेन नीवीविस्रंसनाय नाभिदेशे निहितः करो देव्या रुद्धः, तथापि प्रियतमसन्निधानवशाद् देव्या दुकूलं स्वयमेव विस्रस्तनीवीबन्धनमभूदित्यर्थः। प्रियतमसन्निधाने स्त्रीणां नीवी स्वयमेव विगलतीति कामशास्त्रप्रसिद्धम्। अमरुकेण चोक्तं—'कान्ते तल्पमुपागते विगलिता नीवी स्वयं बन्धनादि'ति। अत्र नीवीविस्रंसनिरोधवचनेन तत्पूर्वभाविनः स्तनविमर्दनचुम्बनादिव्यापारा देव्या कथमपि सोढा इति प्रतीयते। तेन च भावसाध्वसयोर्मध्ये साध्वसस्य पराजयारम्भो व्यज्यते।।४।।

एवमालि! निगृहीतसाध्वसं
शङ्करो रहसि सेव्यतामिति।
सा सखीभिरुपदिष्टमाकुला
नास्मरत् प्रमुखवर्तिनि प्रिये॥५॥

प्रकाशिका

एवमिति। एवंशब्देन सामान्यवाचिनापि कश्चिदेव समुचितः प्रियसेवाप्रकारोऽभिधीयते। शङ्करः सर्वाकारमधुर इत्यर्थः। तेन तत्सेवायाः परमस्वादुत्वमुक्तम्। अत्र प्रियाभिमुखवर्तित्वलक्षणकारणबलात् प्रबलेनाकुलत्वहेतुना साध्वसेन साध्वसनिग्रहात्मकोपायोपदेशपूर्वके प्रियसेवाप्रकारोपदेशे स्मृतिजनकः संस्कार एव प्रमोषं नीतः। अत्र चातुष्षष्टिकविषये सख्युपदेशश्रवणग्रहणव्यवसायः साध्वसशैथिल्यं द्योतयति।।५।।

विवरणम्

अथ सखीजनकृतस्य कामशास्त्रानुसारिणः प्रियतमसेवाप्रकारोपदेशस्य श्रवणं तत्त्वतस्तदर्थावधारणं च क्रमेण शक्यमासीदिति भङ्ग्यन्तरेणाह—

एवमिति। आलि! त्वया शङ्करः निगृहीतसाध्वसं रहसि एवं सेव्यताम् इति सखीभिः उपदिष्टं प्रिये प्रमुखवर्तिनि सा न अस्मरत्। आलि! हे सखि!। अस्मान् प्रति साध्वसमवलम्ब्यालम्। अस्मदुक्तमर्थं सम्यगवधारयेत्यनया सम्बुद्ध्या व्यज्यते। शं सुखं करोतीति शङ्करः। अनेन रूपतः शीलतोऽपि माधुर्यमुक्तम्। तेन तत्सेवायाः परमानन्दकरत्वं प्रतिपादितम्। निगृहीतसाध्वसमिति क्रियाविशेषणम्। निगृहीतं परित्यक्तं साध्वसं यथा भवति तथा सेव्यतामित्यर्थः। रहसि विजने। अनेन साध्वसनिग्रहस्य सुकरत्वमुक्तम्। एवमित्यनेन कामशास्त्रप्रसिद्धः प्रियतमसेवाप्रकारोऽभिधीयते। सेव्यताम् आराध्यताम्। इतिशब्दः उपदेशप्रकारवाची। सखीभिः आत्मनः प्रियवयस्याभिः। अनेन विस्रम्भास्पदत्वमुक्तम्। तेन च उपदेशयोग्यत्वं प्रतिपादितम्। 'विमुक्तलज्जां कुर्वीत निपुणैश्च सखीजनैरि'ति न्यायोऽनेन दर्शितः। उपदिष्टम् अर्थमित्यर्थात् सिध्यति। प्रिये कान्ते प्रमुखवर्तिनि अभिमुखावस्थानशीले सति सा पार्वती नास्मरत्। स्मरणाभावे हेतुमाह—आकुलेति। प्रियाभिमुखवर्तित्वलक्षणेन कारणेनानुगृहीतात् साध्वगादुत्पन्नेन मनोविकारेणाकुलेत्यर्थः। अत एव प्रियतमसेवाप्रकारोपदेशस्मृतिजनकस्य संस्कारस्यापि प्रमोषोपपत्तिः। पूर्वं हि 'अपि शयनसखीभ्यः' (७.९४) इत्यत्र सखीजनेष्वपि कथञ्चिद् वाग्दानमुक्तम्। इदानीं तु सखीजनोपदेशश्रवणं तदर्थग्रहणं च शक्यमासीदिति साध्वसस्य शैथिल्यं प्रतिपादितम्।।५।।

अप्यवस्तुनि कथाप्रवृत्तये
प्रश्नतत्परमनङ्गशासनम्।
वीक्षितेन परिगृह्य पार्वती
मूर्धकम्पमयमुत्तरं ददौ॥६॥

प्रकाशिका

अपीति। अवस्तुनि त्वयात्र गगने गन्धर्वनगराकारं दृष्टं न वेत्येवमादितुच्छे वस्तुन्यपि प्रश्नः कथाप्रवृत्तये वाङ्मिश्रणाय। अनङ्गशासनमित्यनेन परमधूर्तोऽपि स तद्गुणजालाकृष्टस्तथा तदनुवर्तने प्रायतिष्टेति द्योत्यते। वीक्षितेन परिगृह्य तदाकारविलोकितेन धूर्तोऽयमिति परिचिन्त्य। अत्र मूर्धेत्यादिना यद्यपि कथाप्रवृत्तेर्निवृत्तिरुक्ता, तथाप्युत्तरप्रवृत्तेः वीक्षणाच्च लज्जाया गलितप्रायतां द्योत्यते।।६।।

विवरणम्

अथ क्रमेण प्रियतमावलोकनतद्वचनश्रवणावधारणादिकं शक्यमासीदित्याह—

अपीति। पार्वती कथाप्रवृत्तये अवस्तुनि अपि प्रश्नतत्परम् अनङ्गशासनं वीक्षितेन परिगृह्य मूर्धकम्पमयम् उत्तरं ददौ। कथायाः परस्परसंल्लापस्य प्रवृत्तये उत्पत्तये। वाङ्मिश्रणायेत्यर्थः। अवस्तुनीति विषयसप्तमी। अत्यन्तशून्ये वस्तुनि विषयेऽपीत्यर्थः। प्रश्ने अनुयोगे तत्परं तात्पर्यवन्तम्। अद्य प्रभाते गगनमण्डले गन्धर्वाणां नगरमाविर्भूतम्। तत्र च गन्धर्वराजः सभार्यः प्रतिवसति स्म। तत् किं त्वया दृष्टम् अथवा न दृष्टमित्यादीनि शून्यानि वस्तूनि परस्परवाङ्मिश्रणमात्राकाङ्क्षया पृच्छन्तमित्यर्थः। अनङ्गशासनमित्यनेन यः किल परमधूर्तः पूर्वं कामदेवमपि निजग्राह, सोऽपीदानीं देवीगुणगणाकृष्टचित्तस्तदनुसरणे तथा प्रयासं कृतवानिति द्योत्यते। वीक्षितेन तदाकारावलोकनेन परिगृह्य अङ्गीकृत्य। परमधूर्तोऽयमित्य-वधार्येत्यर्थः।

आकारैरिङ्गितैर्गत्या स्वरहासावलोकनैः।
नेत्रवक्त्रविकारैश्च ज्ञायतेऽन्तर्गतं मनः।। (मनुस्मृ.८.२६)

इति स्मृतेरिति भावः। मूर्धकम्पमयं शिरःकम्पस्वरूपमुत्तरं ददौ दत्तवती। शिरसश्चालनेन धूर्तप्रश्नोचितमुत्तरं दत्तवतीत्यर्थः। अत्र यद्यपि परमसाध्यायाः कथाप्रवृत्तेरलाभः कण्ठेनोक्तः, तथापि वीक्षितेन परिगृह्येत्यनेन मूर्धकम्पमयमत्तरं ददावित्यनेन च लज्जाया विगलितप्रायत्वं द्योत्यते।।६।।

शूलिनः करतलद्वयेन सा
सन्निरुध्य नयने हृतांशुका।
तस्य पश्यति ललाटलोचने
मोघयत्नविधुरा रहस्यभूत्।।७।।

प्रकाशिका

शूलिन इति। यच्चक्षुःपिधानानिर्वृतेर्यत्नस्य मोघत्वं, तेन विधुरा व्याकुलाभूत्। अत्र नीवीस्रंसनस्य सोढत्वप्रतीतेर्लज्जाशैथिल्यविशेषो ध्वन्यते।।७।।

विवरणम्

अथ भगवदनुवृत्तिबलेन लज्जायास्ततोऽपि शैथिल्यं दर्शयति—

शूलिन इति। रहसि हृतांशुका सा करतलद्वयेन शूलिनः नयने सन्निरुध्य तस्य ललाटलोचने पश्यति मोघयत्नविधुरा अभूत्। रहसि विजने हृतम् अंशुकं वसनं यस्याः सा पार्वती। करयोस्तलं करतलं तयोर्द्वयेन। उभाभ्यां करतलाभ्यामित्यर्थः। शूलिनः परमेश्वरस्य नयने उभे नेत्रे सम्यङ्निरुध्य पिधाय

पुनरपि तस्य परमेश्वरस्य ललाटगते लोचने नेत्रे पश्यति सति मोघो निष्फलः प्रयत्नो यस्याः सा तथा। अत एव विधुरा व्याकुला अभूत्। हृतांशुका देवी काञ्चीगुणस्थानचञ्चलानि देवस्य नयनाञ्चलान्यवलोक्य तेषां त्रयाणां मध्ये करद्वयेन नयनद्वयं पिधाय नयनान्तरपिधाने करान्तराभावेन निर्वृतिमलभमाना निष्फलनेत्रद्वयपिधानप्रयासा व्याकुला संबभूवेत्यर्थः। अत्र नीवीविस्रंसनमपि देव्या सोढमिति प्रतीयते। अत एव लज्जाशैथिल्यम्।।७।।

चुम्बनेष्वधरदानवर्जितं
सन्नहस्तमदयोपगूहने।
क्लिष्टमन्मथमपि प्रियं प्रभो-
र्दुर्लभप्रतिकृतं वधूरतम्॥८॥

प्रकाशिका

चुम्बनेष्विति। अत्र बहुवचनेन चुम्बनविशेषाणां क्रमात् सोढत्वं द्योत्यते। अधरदानराहित्यादिना साध्वसशेषानुवृत्तिर्ध्वन्यते। दुर्लभं प्रतिकृतं चुम्बने सीत्कृतमित्यादि यत्र। अत एव क्लिष्टमन्मथमसमग्रेच्छमपि रतं वधूस्वभावसमुचितत्वात् तस्य प्रियमासीदित्यर्थः।।८।।

विवरणम्

अथ क्रमेण देवकृताः सर्वेऽपि व्यापारा देव्या सोढाः। साध्वसस्य तु देव्याः प्रतिव्यापारनिरोधमात्र एव व्यापार इत्याह—

चुम्बनेष्विति। वधूरतं क्लिष्टमन्मथम् अपि प्रभोः प्रियम्। वध्वा नवोढायाः रतं रतिः। क्लिष्टमन्मथम्। मन्मथशब्देनात्र सम्भोगेच्छा लक्ष्यते, क्लिष्टशब्देन चासम्पूर्णत्वम्। क्लिष्टः असम्पूर्णः मन्मथः सम्भोगेच्छा यस्मिंस्तथाभूतं सदपि। असमग्रेच्छमपीत्यर्थः। प्रभोः परमेश्वरस्य प्रियमिष्टम्। अभूदिति शेषः। वधूरतमसम्पूर्णमनोरथमपि तादृशस्वभावस्य नवोढाजनसमुचितत्वाद् देवस्यातिप्रियमेवाभूदित्यर्थः। क्लिष्टमन्मथत्वमेव हेतुभिर्दर्शयति—चुम्बनेष्वित्यादिना। चुम्बनेषु अधरदानवर्जितम्। अत्र चुम्बनेष्विति बहुवचनेन तत्पूर्वभाविनामालिङ्गनविशेषाणां चुम्बनविशेषाणां च क्रमेण सोढत्वं द्योत्यते। अधरस्य दानेन वर्जितं विरहितम्। प्रियतमेन बहुविधेषु चुम्बनेषु कृतेष्वपि निजाधरार्पणविरहितमित्यर्थः। अनेन साध्वसशेषस्यानुवृत्तिरुक्ता। आलिङ्गनेष्वपि साध्वसशेषानुवृत्तिमाह—अदयोपगूहने सन्नहस्तम् इति। अदये निर्दये उपगूहने आलिङ्गने सन्नौ स्रस्तौ हस्तौ यस्मिंस्तत् तथा। अनुरागातिशयादपदयेष्वालिङ्गनेषु प्रवृत्तेष्वपि निजकरद्वयव्यापाररहितमित्यर्थः।

इत्थं विशेषतः प्रतिपाद्य विस्तरभयात् सामान्यतः प्रतिपादयति—दुर्लभप्रतिकृतमपि। दुर्लभानि दुःखेन लभ्यानि प्रतिकृतानि प्रतिव्यापारा यस्मिन्। चुम्बने सीत्कृतं, ताडने ताडनमित्यादिप्रतिव्यापाररहितमित्यर्थः। तथाविधमपि वधूरतं देवस्य हृदयमाजहारेत्यर्थः। तत्र वधूरतत्वं हेतुः।।८।।

यन्मुखग्रहणमक्षताधरं
दत्तमव्रणपदं नखं च यत्।
यद् रतं च सदयं प्रियस्य तत्
पार्वती विषहते स्म नेतरत्॥९॥

प्रकाशिका

इत्थं क्रमाद् वध्वाः साध्वसशैथिल्यं प्रदर्श्य तद्विषयचातुष्षष्टिकप्रयोगप्रकारमाह—

यदिति। मुखग्रहणं मुखपानम्। दत्तं पातितम्। अव्रणपदम् अजनितव्रणपदमित्यर्थः। सदयं प्रहरणादिरहितम्। नेतरदिति नायिकाया नात्यन्तमन्मथरसाभिज्ञत्वेन मन्दरागत्वात्। अयमेवार्थो रघुवंशे दृष्टान्तीकृतः[सदयमित्यादिना] 'नवपाणिग्रहणां वधूमिव' (८.७) इति। कामसूत्रकारैरप्युक्तं—'कुसुमसुकुमारा हि योषितः। तास्त्वनधिगतोपक्रमैरि'त्यादिना।।९।।

विवरणम्

इत्थं क्रमेण वध्वा साध्वसशैथिल्यं प्रतिपाद्य तद्विषयान् कामशास्त्रप्रसिद्धान् चतुषष्टिसङ्ख्यापरिमितान् प्रयोगान् सङ्क्षिप्याह—

यदिति। पार्वती प्रियस्य अक्षताधरं मुखग्रहणं यद्, अव्रणपदं दत्तं नखं च यत्, सदयं रतं च यत् तद् विषहते स्म, इतरद् न। प्रियस्य कान्तस्य। क्षतः दन्तपातैर्विदलितः अधरो येन तत् क्षताधरं, तथाविधं न भवतीत्यक्षताधरम्। तादृशं मुखग्रहणं मुखपानं यत्। व्रणानां पदं व्रणपदं, पदं स्थानं, तद् यस्य न विद्यते तदव्रणपदम्। दत्तं पातितम्। व्रणपदरहितं नखपातं च यदित्यर्थः। सदयं प्रहरणादिरहितं रतं च यत् तद् विषहते स्म सोढवती। इतरत् क्षताधरं मुखग्रहणं, सव्रणं नखपातं, प्रहरणादिसहितं रतं च न सेहे। नायिकाया अत्यन्तमन्मथरसाभिज्ञत्वाभावेन रागमान्द्यादिति भावः। अत एव वक्ष्यति—'ज्ञातमन्मथरसा शनैः शनैः सा मुमोच रतिदुःखीलताम्' (८.१३) इति। रघुवंशे चायमेवार्थो दृष्टान्तत्वेन दर्शितः—

सदयं बुभुजे महाभुजः सहसोद्वेगमियं व्रजेदिति।
अचिरोपनतां स मेदिनीं नवपाणिग्रहणां वधूमिव।। (८.७)

इति। वात्स्यायनेनाप्युक्तं—'कुसुमसुकुमारा हि योषितः। तास्त्वनधिगतोपक्रमैः' (३.२) इत्यादिना।।९।।

रात्रिवृत्तमनुयोक्तुमुद्यतं
सा प्रभातसमये सखीजनम्।
नाकरोदपकुतूहलं रहः/ह्रिया
शंसितुं च/तु हृदयेन तत्वरे॥१०॥

प्रकाशिका

रात्रिवृत्तमुक्त्वा प्रभातवृत्तं द्वाभ्यां श्लोकाभ्यामाह—

रात्रीति। अनुयोक्तुं प्रष्टुम्। अपकुतूहलं नाकरोदिति लज्जयोत्तरं न ददावित्यर्थः। शंसितुं च हृदयेन तत्वर इति हर्षेण रहसि ताभ्यः प्रत्येकं निवेदयितुमैच्छदित्यर्थः।।१०।।

विवरणम्

इत्थं रात्रिवृत्तमुक्त्वा प्रभातवृत्तं द्वाभ्यां श्लोकाभ्यामुच्यते। तत्रादौ शयनादुत्थाय सखीजनसन्निधिं गताया देव्या वृत्तमाह—

रात्रीति। सा प्रभातसमये रात्रिवृत्तम् अनुयोक्तुम् उद्यतं सखीजनम् अपकुतूहलं नाकरोत्। रात्रौ निशि कान्तसन्निधौ सञ्जातं वृत्तं वृत्तान्तम् अनुयोक्तुं प्रष्टुम् उद्यतम् उद्युक्तम्। तद्भावपरिज्ञानादकृतसविस्तरप्रश्नमिति भावः। सखीजनं प्रियसखीसमाजम् अपकुतूहलम् अपगतकुतूहलं नाकरोद् न कृतवती। उत्तरश्रवणे हि कुतूहलनिवृत्तिर्भवति। लज्जयोत्तरं न ददावित्यर्थः। दर्शनानन्तरमेव रात्रिवृत्तं प्रष्टुमुद्युक्ते सखीजने लज्जया वदनमवनमयामासैवेत्यर्थः। इत्थं लज्जाया अनुभावमुक्त्वा प्रियतमानुरागस्यानुभावमाह—रहः शंसितुं हृदयेन तत्वरे च इति। रहः विजने शंसितुं निवेदयितुं हृदयेन मनसा तत्वरे त्वरां कृतवती। हर्षोद्रेकवशाद् रहसि ताभ्यः प्रत्येकं कथयितुं सद्य एव तासां पृथग्भावमैच्छदित्यर्थः।।१०।।

दर्पणे च परिभोगदर्शिनी
पृष्ठतः प्रणयिनो निषेदुषः।
प्रेक्ष्य बिम्बमनुबिम्बमात्मनः
कानि कान्यपि चकार लज्जया॥११॥

प्रकाशिका

दर्पण इति। परिभोगशब्देन नखक्षतादि लक्ष्यते। बिम्बं प्रतिबिम्बम्। कानि कान्यपि नयननिमीलनादीनि। बहुवचनेन युगपदनेकविकारोत्पत्तिर्दर्शिता, वीप्सया त्वनेकवारमन्येषां च विकाराणामुत्पत्तिः। अपिशब्दयुक्तश्च किंशब्दोऽनाख्येयत्वं द्योतयति।।११।।

विवरणम्

दर्पणदर्शनप्रकारमाह—

दर्पण इति। दर्पणे परिभोगदर्शिनी सा पृष्ठतः निषेदुषः प्रणयिनः बिम्बम् आत्मनः अनुबिम्बं प्रेक्ष्य लज्जया कानि कान्यपि चकार च। दर्पणे मुकुरे। परिभोगशब्देनात्र परिभोगोत्पन्नानि दन्तक्षतादीनि लक्ष्यन्ते। कार्यकारणभावश्च सम्बन्धः। परिभोगस्वरूपसाक्षात्कारप्रतीतिः फलम्। तेन च तद्दर्शनस्य प्रीतिजनकत्वं व्यज्यते। परिभोगान् द्रष्टुं शीलमस्या इति तथा। कुतूहलातिशयात् सर्वदा दर्शनं णिनिप्रत्ययार्थः। पृष्ठतः पृष्ठभागे निषेदुषः स्थितवतः। देवीभावनिरीक्षणकौतुकात् पृष्ठभागे स्थित्वा तत्प्रतिबिम्बमालोकयत इत्यर्थः। अवलोकनकौतुके हेतुमाह—प्रणयिन इति। प्रणयोऽस्यास्तीति प्रणयी। प्रणयः प्रेमा। 'प्रणयास्त्वमी। विस्रम्भयाच्ञाप्रेमाण' इत्यमरः। बिम्बं प्रतिबिम्बम्। आत्मनः अनुबिम्बं निजप्रति-बिम्बस्य पश्चात्। 'अव्ययं विभक्ति—' (२.१.६) इत्यादिना पश्चादर्थेऽव्ययीभावः। प्रेक्ष्य अवलोक्य लज्जया हेतुभूतया कानि कान्यपि नयननिमीलनवदन-विनमनादीनि। अत्र बहुवचनेन युगपदेव बहूनां विकाराणामुत्पत्तिर्दर्शिता। वीप्सया पुनरनेकवारमन्येषां विकाराणामप्युत्पत्तिर्द्योत्यते। अपिशब्दयुक्तः किंशब्दो वक्तुमक्यतां प्रतिपादयति। पार्वती दर्पणे सम्भोगचिह्नावलोकनसमये भावपरीक्षार्थं पृष्ठभागावस्थितस्य प्रियतमस्य प्रतिबिम्बं निजप्रतिबिम्बस्य पश्चादवलोक्य मनसां वचसामप्यगोचरान् विकारान् युगपदेव कृतवतीत्यर्थः।।११।।

नीलकण्ठपरिभुक्तयौवनां
तां विलोक्य जननी समाश्वसत्।
भर्तृवल्लभतया हि मानसीं
मातुरस्यति शुचं वधूजनः॥१२॥

प्रकाशिका

इत्थं नववधूसम्भोगमुपवर्ण्योपसंहरति—

नीलकण्ठेति। समाश्वसदित्यनेन महता प्रयत्नेन लब्धस्यापि देवस्यातिगम्भीरप्रकृतित्वेनाविगाह्यत्वात् तद्विषये दुहितुर्वाल्लभ्यस्य संशयितत्वात् तदेकजीविताया मेनायाः शोकस्तत्परिभोगदर्शनपर्यन्तमनुवृत्त इति द्योत्यते। अस्यति क्षिपति।।१२।।

विवरणम्

इत्थमुपवर्णितं देवस्य नववधूविषयं सम्भोगमुपसंहरति—

नीलकण्ठेति। जननी नीलकण्ठपरिभुक्तयौवनां तां विलोक्य समाश्वसत्। जननी देव्या माता मेना। अत्र जननीशब्दप्रयोगेण तदेकजीविताया मेनायाः पुत्रीविवाहावसानपर्यन्तमनुरूपभर्तृप्राप्तिसन्देहजनितायाः पीडाया अनुवृत्तिः, विवाहानन्तरं पुनरप्यत्यन्तदुश्चरतपश्चरणादिना कृच्छ्रलब्धस्याप्यनुरूपस्य वल्लभस्यातिगम्भीरप्रकृतित्वेनाविगाह्यहृदयत्वादस्य मे दुहिता वल्लभा वा स्यादवल्लभा वा स्यादिति सन्देहजनितायाः पीडाया अनुवृत्तिरिति जननसमयादारभ्यैतावन्तं कालं पीडापात्रत्वं द्योत्यते। नीलकण्ठेन परमेश्वरेण परिभुक्तम् अनुभूतं यौवनं यस्यास्ताम्। अत्र नीलकण्ठशब्देनाभिरूप्यादिभिरनुरूपत्वमुक्तम्। परिभुक्तयौवनामित्यनेन देवस्य तद्विषया चित्तासक्तिरुक्ता। तां पार्वतीं विलोक्य विशेषेणावलोक्य। नखदन्तक्षतादिपरिभोगचिह्नैर्देवस्याभिलाषावगमपर्यन्तं दृष्ट्वेत्यर्थः। अत एव समाश्वसद् आश्वस्ताभूत्। जननसमयादारभ्य क्रमेण परिवर्धमानं तापमपाचकारेत्यर्थः। उक्तमर्थमर्थान्तरन्यासेन समर्थयते—वधूजनः भर्तृवल्लभतया हि मातुः मानसीं शुचम् अस्यति इति। वधूजनः स्त्रीजनः भर्तुः कान्तस्य वल्लभतया इष्टतया। हिशब्दः प्रसिद्धौ। मातुः जनन्याः मानसीं मनसि भवां शुचं दुःखम् अस्यति परित्यजति। मातरो हि दुहितृजननादारभ्य कथं मे दुहिता भविष्यति कुत्र वा गमिष्यति भर्तुरभिमता वा भविष्यति अनभिमता वा भविष्यतीत्यादिचिन्तया प्रतिक्षणं विजृम्भमाणं दुःखं भर्तृवल्लभत्वावधारणानन्तरमेव परित्यजन्तीति लोकप्रसिद्धमित्यर्थः।।१२।।

वासराणि कतिचित् कथञ्चन
स्थाणुना पदमकार्यत प्रिया।
ज्ञातमन्मथरसा शनैः शनैः
सा मुमोच रतिदुःखशीलताम्।।१३।।

प्रकाशिका

इत्थं यथा क्रमं प्रयुक्तस्योपक्रमस्य सिद्धिमाह—

वासराणीति। द्वितीयया तु पदकारणस्यासमाप्तिर्द्योत्यते। समाप्तौ तु अपवर्गे तृतीयैव स्याद् वासरैरिति। कथञ्चन प्रयत्नेन पदमकार्यत मन्मथरसज्ञान इत्यर्थः। पदशब्देनात्राभिमुख्यं लक्ष्यते, मन्मथशब्देन च सम्भोगः। रतौ दुःखं शीलं यस्याः सा रतिदुःखशीला। रतिदुःखशीलता रतौ वामत्वम्। यदाह—'मुग्धा नववयःकामा रतौ वामा मृदुः क्रुधि' (दशरूपके२.१६) इति। शनैः शनैर्मुमोचेति लज्जाया झटित्यनपगमात्।।१३।।

विवरणम्

इत्थं देवेन यथाक्रमं प्रयुक्तस्य नववधूविषयस्योपक्रमस्य सिद्धिमाह—

वासराणीति। स्थाणुना प्रिया कतिचिद् वासराणि कथञ्चन पदम् अकार्यत। स्थाणुना परमेश्वरेण प्रिया पार्वती कतिचिद्वासराणि कानिचिद्दिनानि। अत्यन्तसंयोगे द्वितीया। अनेन पदकारणस्य पुनरप्यपरिमाप्तिर्द्योत्यते। परिमाप्तौ पुनः 'अपवर्गे तृतीया' (२.३.६) इति वासरैरिति तृतीयैव स्यात्। अत एव वक्ष्यति—'मेखलापनयलोलतां गतं हस्तमस्य शिथिलं रुरोध च' (८.१४) इति। कथञ्चन कृच्छ्रात्। पदशब्देनात्राभिमुख्यं लक्ष्यते। सम्भोगरसज्ञान इत्यर्थात् सिध्यति। अकार्यतेति 'डुकृञ् करणे' इत्यस्माद् धातोर्णिचि कर्मणि रूपम्। स्थाणुना प्रिया सम्भोगरसज्ञानं प्रापितेत्यर्थः। अवगतसंम्भोगरसाया देव्याः प्रवृत्तिमाह—ज्ञातमन्मथरसा शनैः शनैः रतिदुःखशीलतां मुमोच इति। ज्ञातमन्मथरसा, मन्मथशब्देन सम्भोगो लक्ष्यते। ज्ञातसम्भोगरसेत्यर्थः। लज्जायाः सद्य एवापगमानुपपत्तेः शनैः शनैरित्युक्तम्। सम्भोगरसावगमक्रमेणेत्यर्थः। रतौ सुरते दुःखं दुष्करं शीलं शीलनं प्रवर्तनं यस्याः सा रतिदुःखशीला तस्या भावस्तत्ता ताम्। सुरते वामस्वभावत्वमिति यावत्। तदुक्तं **दशरूपके**—'मुग्धा नववयःकामा रतौ वामा मृदुः क्रुधि' इति। मुमोच तत्याज। क्रमेण अनुकूला जातेति भावः।।१३।।

सस्वजे प्रियमुरोनिपीडितं
प्रार्थितं मुखमनेन नाहरत्।
मेखलापनयलोलतां गतं
हस्तमस्य शिथिलं रुरोध च।।१४।।

प्रकाशिका

सस्वज इति। उरोनिपीडितमिति क्रियाविशेषणम्। अत्रालिङ्गने स्वयंप्रवृत्तिः मुखग्रहणेऽप्रातिकूल्यं मेखलापनयने किञ्चित् प्रातिकूल्यमित्यनुसन्धेयम्।।१४।।

विवरणम्

क्रमेणानुकूलत्वप्राप्तिमेव प्रकटयति—

सस्वज इति। अत्र सेति कर्तृपदमध्याहार्यम्। सा प्रियम् उरोनिपीडितं सस्वजे। प्रियं वल्लभम्। उरोनिपीडितमित्यालिङ्गनक्रियाविशेषणम्। उरो वक्षः निपीडितं नितरां पीडितं यथा भवति तथा सस्वजे आलिलिङ्ग। प्रियतमं तदवसरे स्वयमेव गाढमालिङ्गितवतीत्यर्थः। अत्रालिङ्गने स्वयंप्रवृत्तिरुक्ता। मुखग्रहणे तु न तथेत्याह—अनेन प्रार्थितं मुखं न अहरद् इति। अनेन प्रार्थितं पातुमभ्यर्थितं मुखं वदनं नाहरद् न हृतवती। मुखग्रहणे पूर्ववत् प्रातिकूल्यं न चकारेत्यर्थः। नीवीविस्रंसने पुनः किञ्चित् प्रातिकूल्यं जातमित्याह—अस्य मेखलापनयलोलतां गतं हस्तं शिथिलं रुरोध च इति। अस्य प्रियस्य मेखलायाः काञ्च्याः अपनये नीवीबन्धनप्रदेशात् किञ्चिदपनयने लोलतां चलत्वं गतं प्राप्तं हस्तम्। शिथिलमिति रोधनक्रिया-विशेषणम्। शिथिलं मन्दं यथा भवति तथा रुरोध च। नीवीविस्रंसे किमपि प्रातिकूल्यं चकारेत्यर्थः। अत्रालिङ्गने स्वयंप्रवृत्तत्वाद् मुखग्रहणे प्रातिकूल्याभावाद् नीवीविस्रंसे किञ्चित् प्रातिकूल्याच्च लज्जाया गलितप्रायत्वं द्योत्यते। तत्र च सम्भोगरसावगमो हेतुः।।१४।।

भावसूचितमदृष्टविप्रियं
चाटुमत् क्षणवियोगकातरम्।
कैश्चिदेव दिवसैस्तदा तयोः
प्रेम रूढमितरेतराश्रयम्॥१५॥

प्रकाशिका

भावेति। भावसूचितम् अभिप्रायविशेषैर्व्यञ्जितं, लज्जापगमात्। अदृष्टविप्रियम्, अत्यन्तानुकूलवृत्तित्वात्। चाटुमद्, विस्रम्भप्रकर्षात्। एते च प्रेमप्रकर्षहेतवः। क्षणवियोगकातरमिति प्रकर्षप्रकारः। तदा विस्रम्भणकाले। रूढं प्रकर्षवदभूत्। इतरेतराश्रयं तयोः प्रेम कैश्चिद् दिवसैरेव, न तु पक्षैर्मासैर्वा तदेत्थं प्ररूढमासीदित्यर्थः।।१५।।

विवरणम्

किं बहुना, तयोः परस्परस्नेहः प्रकर्षपदवीमारुरोहेत्याह—

भावेति। इतरेतराश्रयं तयोः प्रेम कैश्चिद् दिवसैरेव तदा रूढम्। इतरेतरं परस्परमाश्रयो यस्य तत् तथा। देवीप्रेम्णो देव एवाश्रयः, देवप्रेम्णस्तु देवीत्यन्योन्यावलम्बनमित्यर्थः। तयोः पार्वतीपरमेश्वरयोः प्रेम स्नेहः कैश्चिद् दिवसैः अल्पैरहोभिरेव। न तु कैश्चिन्मासैः, नापि कैश्चित् पक्षैः, किन्तु दिवसैरेवेत्येवशब्दार्थः। तदा विस्रम्भोपपादनसमये रूढं प्ररूढम्। आसीदिति शेषः। गुणश्रवणपरस्परदर्शनादिषु तयोर्यः परस्परस्नेहः सञ्जातः, स तदानीं प्रकर्षपदमारुरोहेत्यर्थः। प्रेम्णः प्रकर्षप्राप्तौ हेतुं विशेषणत्रयेण दर्शयति—भावेत्यादिना। भावसूचितं भावैः अभिलाषद्योतकैः कटाक्षविक्षेपादिभिः सूचितं व्यञ्जितम्। लज्जापगमात् परस्परानुरागद्योतकैर्भावविशेषैः प्रकाशितमित्यर्थः। अभिलाषगूहने विस्रम्भाभावादभिलाषस्यापि शनैः शनैरपगमप्रसङ्गादेवमुक्तम्। तथा अदृष्टविप्रियम्। अदृष्टमनुपलब्धं विप्रियमप्रियं यस्मिंस्तत् तथा। अत्यन्तानुकूलवृत्तित्वादप्रियलेशेनापि विरहितमित्यर्थः। तथा चाटुमत् चाटुः प्रियोक्तिरस्त्यस्मिन्निति चाटुमत्। विस्रम्भातिशयवशात् प्रियोक्तिशतोपबृंहितमित्यर्थः। प्रेम्णः प्रकर्षप्रकारमाह—क्षणवियोगकातरम् इति। क्षणवियोगे क्षणकालभवे वियोगेऽपि कातरं भीतम्। एतादृशस्य संयोगस्य कदाचिदप्यन्यथाभावो मा भूदित्यनिशं प्रार्थयमानमित्यर्थः। 'अपायदर्शी स्नेह' इति न्यायादिति भावः।।१५।।

तं यथात्मसदृशं वरं वधू-
रन्वरज्यत वरस्तथैव ताम्।
सागरादनपगा हि जाह्नवी
सोऽपि तन्मुखरसैकनिर्वृतः॥१६॥

प्रकाशिका

अथ तस्य तयोः प्रेम्णः परस्परमन्यूनत्वमाह—

तमिति। अनुर्लक्षणे कर्मप्रवचनीयः। नापगच्छतीत्यनपगा। मुखशब्दो लाक्षणिकः प्रतिवस्तुतामुत्तम्भयति। वरस्यानुरञ्जनकौशलस्य सिद्धत्वाद् वध्वनुराग उपमानतयोक्तः।।१६।।

विवरणम्

इत्थं परस्परप्रतिरूढस्य तयोः प्रेम्णः परस्परमन्यूनत्वमाह—

तमिति। वधूः तं वरम् अनु यथा वरः ताम् अनु तथा एव अरज्यत। वधूः नवोढा तं परमेश्वरं वरं भर्तारम्। अनुर्लक्षणे कर्मप्रवचनीयः। वरं लक्षीकृत्येत्यर्थः। यथा यादृशेन प्रकारेण अरज्यत, वरो भर्ता तां पार्वतीं लक्षीकृत्यापि तादृशेन प्रकारेणैवारज्यत रक्तोऽभूत्। तत्र हेतुः—आत्मसदृशमिति। आत्मनः सदृशम् आभिजात्याभिरूप्यादिगुणैः समानम्। वध्वा आत्मसदृशीत्वमनेनैव सिध्यतीति पृथगनुपादानम्। सदृक्शब्दस्य द्वितीयान्तो वायं शब्दः। अत्रोभयोरपि परस्परानुरागमात्रस्य वक्तव्यत्वेऽपि वध्वनुरागस्योपमानत्वेनोपादानं तस्यैव प्राधान्यं द्योतयितुम्। वरस्यानुरागो ह्यनुरञ्जनप्रकारेण सिद्धः। देवे देव्या अनुरञ्जनोद्युक्ते सति देवी तथा नामारज्यत, यथा वध्वनुरागो वरानुरागस्य दृष्टान्तत्वमुपगच्छेदिति भावः। अत्र प्रतिवस्तूपमामाह—सागरादित्यादिना। तत्रादौ वध्वनुरागस्य प्रतिवस्तूपमामाह—जाह्नवी सागराद् अनपगा हि इति। जाह्नवी गङ्गा सागरात् समुद्राद् न अपगच्छतीत्यनपगा। हिशब्दः प्रसिद्धौ। नहि जाह्नवी सागरमपहायान्यत्र कुत्रापि गच्छतीत्यर्थः। वरानुरागस्य प्रतिवस्तूपमामाह—सः अपि तन्मुखरसैकनिर्वृतः इति। सः सागरः तस्या मुखे यो रसः जलं तेनैकेनैव निर्वृतः सुखितः। अत्र मुखशब्दो लक्षणयाग्रभागवाची प्रतिवस्तुतां प्रकटयति, वदनेऽपि श्लिष्टत्वात्।।१६।।

शिष्यतां निधुवनोपदेशिनः
शङ्करस्य रहसि प्रपन्नया।
शिक्षितं युवतिनैपुणं तया
यत् तदेव गुरुदक्षिणीकृतम्॥१७॥

प्रकाशिका

शिष्यतामिति। रहसि सम्प्रयोगे। युवतिनैपुणं युवतिकर्मसु कौशलम्। रहसि यद् युवतिनैपुणं शिक्षितमित्यन्वयः। अत्र पूर्वार्धे वरस्यानुरञ्जने कौशलमनुवादद्वारेण दर्शितम्, उत्तरार्धे विधेयत्वेन वध्वा इत्यवसेयम्।।१७।।

विवरणम्

देवस्य प्रियानुरञ्जनप्रकरणमुपसंहरति—

शिष्यतामिति। तया निधुवनोपदेशिनः शङ्करस्य शिष्यतां प्रपन्नया रहसि यद् युवतिनैपुणं शिक्षितं, तद् एव गुरुदक्षिणीकृतम्। तया पार्वत्या निधुवनं रतम् उपदेष्टुं शीलमस्येति स तथा तस्य शङ्करस्य शिष्यत्वं प्राप्तया सत्या रहसि विजने। युवतयः स्त्रियः तदुचितं नैपुणं वैदग्ध्यं युवतिनैपुणम्। शिक्षितमभ्यस्तम्। तदेव गुरुदक्षिणीकृतं गुरुदक्षिणतां प्रापितम्। पार्वती हरशिक्षितेनैव सुरतवैदग्ध्येन हरं

परितोषयामासेत्यर्थः। अत्र पूर्वार्धे नायकस्य नायिकानुरञ्जनकुशलत्वमनुवादद्वारेणोक्तम्। उत्तरार्धे तु नायिकाया नायकानुरञ्जनवैदग्ध्यं विधिमुखेनैवोपात्तमिति विभागः। नायकानुरञ्जनकौशलस्य पूर्वं प्रपञ्चितत्वमनुवादद्वारेण कथने हेतुरित्यवसेयम्।।१७।।

दष्टमुक्तमधरोष्ठमम्बिका
वेदनाविधुतहस्तपल्लवा।
शीतलेन निरवापयत् क्षणं
मौलिचन्द्रशकलेन शूलिनः॥१८॥

प्रकाशिका

दष्टेति। दष्टमुक्तमित्यनेनाक्षताधरमुखग्रहणस्य विपर्यय उक्तः। अधरोष्ठमिति उत्तरोष्ठे दशनव्यापारनिषेधात्। वेदनेत्यादिना नववधूत्वाद् दशनव्यापारस्य नातिसोढत्वमुक्तम्। मौलिचन्द्रशकलेन निर्वापणं जातविस्रम्भतां ध्वनयति।।१८।।

विवरणम्

अथ द्वाभ्यां श्लोकाभ्यां देव्या देवविषये प्ररूढो विस्रम्भातिशयः प्रदर्श्यते। तत्रादौ देव्याः स्ववैक्लब्यशमनाय स्वयमेव देवविषयां प्रवृत्तिमुक्त्वा विस्रम्भातिशयं दर्शयति—

दष्टेति। अम्बिका दष्टमुक्तम् अधरोष्ठं शूलिनः मौलिचन्द्रशकलेन क्षणं निरवापयत्। अम्बिका पार्वती। पूर्वं दष्टं पश्चान्मुक्तं चेति दष्टमुक्तम्। अनेन पूर्वोक्तस्य 'यन्मुखग्रहणमक्षताधरम्' (८.९) इत्यादेर्विपर्यय उक्तः। अधरञ्चेममोष्ठं चेत्यधरोष्ठम्। उत्तरोष्ठे दशनव्यापारस्य कामशास्त्रे निषिद्धत्वादधरपदोपादानम्। शूलिनः परमेश्वरस्य मौलौ यच्चन्द्रशकलं चन्द्रकला तेन क्षणं क्षणकालं निरवापयद् निर्वापितवती। अपनीतवेदनमकरोदित्यर्थः। वेदनायां अनुभावमाह—वेदनाविधुतहस्तपल्लवेति। वेदनया पीडया विधुतौ कम्पितौ हस्तपल्लवौ पल्लवाविव हस्तौ यया सा तथा। अनेन नवोढात्वाद् दशनव्यपाराणामनतिसोढत्वमुक्तम्। मौलिचन्द्रशकलस्य निर्वापणसामर्थ्यमाह—शीतलेनेति।।१८।।

चुम्बनादलकचूर्णरूषितं
शङ्करोऽपि नयनं ललाटजम्।
उच्छ्वसत्कमलगन्धये ददौ
पार्वतीवदनगन्धवाहिने॥१९॥

प्रकाशिका

चुम्बनादिति। चुम्बनादधरचुम्बनसमय इत्यर्थः। ललाटजमिति। तस्यालकसन्निकर्षसम्भवात्। शङ्करोपीऽति। न केवलमम्बिका शूलिनो मौलिचन्द्रशकलेनाधरं निर्वापितवती, सोऽपि तन्मुखमरुता ललाटाक्षीत्यर्थः।।१९।।

विवरणम्

देवगतवैक्लब्यशमनायापि देव्या एव प्रवृत्तिमुक्त्वा ततो विस्रम्भातिशयमाह—

चुम्बनादिति। शङ्करः अपि चुम्बनाद् अलकचूर्णरूषितं ललाटजं नयनं पार्वतीवदनगन्धवाहिने ददौ। शङ्करोऽपि। न केवलं देवी दष्टमुक्तमधरं देवस्य मौलिचन्द्रशकलेन निर्वापितवती, अपितु शङ्करोऽपि देवीमुखानिलेन ललाटलोचनं निर्वापितवानित्यपिशब्दार्थः। चुम्बनात् पार्वतीकृताधरचुम्बनाद् अलके यच्चूर्णं गन्धसंस्कारचूर्णं तेन रूषितं सम्पृक्तं ललाटजं ललाटभवं नयनं नेत्रम्। अधरचुम्बनसमये ललाटजस्यैव लोचनस्यालकसन्निकर्षसम्भवाल्ललाटजमिति विशेषणम्। गन्धं वोढुं शीलमस्येति गन्धवाही वायुः। पार्वत्या वदने मुखे यो गन्धवाही तस्मै दत्तवान्। देव्या सरभसविहितादधरचुम्बनात् तत्समये ललाटघटितानामलकानां गन्धसंस्कारचूर्णैराकुलीकृतं ललाटलोचनं परमेश्वरः पार्वतीवदनमारुतेनैव विगतवेदनमकरोदित्यर्थः। अत्र देव्याः परमेश्वरस्य ललाटलोचननिर्वापणप्रवृत्तिर्विस्रम्भातिशयं ध्वनयति। देवस्य निर्वापणनियोगः परिज्ञातविस्रम्भतां द्योतयति। पार्वतीवदनमारुतेन लोचननिर्वापणे कृते सति फलान्तरमप्याह—उच्छ्वसत्कमलगन्धये इति। उच्छ्वसतः विकसतः कमलस्य गन्ध इव गन्धो यस्य तस्मै। विकसितचरे हि कमले मधुलवानां भृङ्गमारुतादिभिरपहृतत्वाद् गन्धोऽपि मान्द्यमुपेयादित्युच्छ्वसत्पदप्रयोगः। देव्याः पद्मिनीत्वात् स्वाभाविकपद्मगन्धबन्धुरायेत्यर्थः। 'उपमानाच्च' (५.४.१३७) इति गन्धशब्दस्येकारः समासान्तः।।११।।

एवमिन्द्रियसुखस्य वर्त्मनः
सेवनादनुगृहीतमन्मथः।
शैलराजभवने सहोमया
मासमात्रमवसद् वृषध्वजः॥२०॥

प्रकाशिका

उपसंहरति—

एवमिति। इन्द्रियसुखमिन्द्रियानुकूलं वर्त्म सम्भोगः, तस्य सेवनात्।

अनुगृहीतमन्मथ इत्यनेन 'तस्यानुमेने' (७.९२) इत्यादिनोक्तस्यात्मनि कामव्यापाराभ्यनुज्ञानस्य निर्वहणं दर्शितम्। मासमात्रमिति 'एवं भुञ्जानो नवोढां मासेन वशीकुर्यादि'ति गोनर्दीयवचनात्। शैलराजभवन इति सम्पूर्णसकलसमृद्धिकत्वं ध्वनितम्।।२०।।

विवरणम्

इत्थं देव्याः प्ररूढविस्रम्भत्वमुपपाद्योपसंहरति—

एवमिति। वृषध्वजः शैलराजभवने उमया सह मासमात्रम् अवसत्। वृषध्वजः परमेश्वरः शैलराजस्य हिमवतः भवने गृहे। अनेन सम्पूर्णसकलसमृद्धित्वं ध्वनितम्। उमया पार्वत्या सह। मासमात्रमित्यन्तसंयोगे द्वितीया। 'एवं भुञ्जानो नवोढां मासेन वशीकुर्यादि'ति **गोनर्दीयवच**नान्मासपदप्रयोगः। अवसद् उवास। भगवान् परमेश्वरः सकलसम्पत्समृद्धे हिमवत्पुर एव निवसन् नवोढां पार्वतीं मासमात्रेणैवात्मानुकूलां वितेन इत्यर्थः। 'तस्यानुमेने भगवानि'त्यादिना यः कामदेवशरव्यापारः स्वस्मिन्ननूदितः, तस्यापि निर्वहणं दर्शयति—इन्द्रियसुखस्य वर्त्मनः एवं सेवनाद् अनुगृहीतमन्मथः इति। इन्द्रियाणां सुखस्य सुखकरस्य वर्त्मनः मार्गस्य। सम्भोगस्येत्यर्थः। एवंशब्देन पूर्वोक्तमवाङ्मनसगोचरं सेवनं परामृशति। सेवनाद्धेतोरनुगृहीतः कृतानुग्रहो मन्मथो येन स तथा। यथा मन्मथस्यायमस्मदनुकूल एवेदानीं सञ्जात इति मतिरुत्पद्येत तथा तदनुकूलोऽभूदित्यर्थः।।२०।।

सोऽनुमान्य हिमवन्तमात्मभू-
रात्मजाविरहदुःखपीडितम्।
तत्र तत्र विजहार संपत-
न्नप्रमेयगतिना ककुद्मता॥२१॥

प्रकाशिका

इत्थं रागसरणिमवतीर्णस्य देवस्य देशकालादिलक्षणामुद्दीपनसम्पदं नवनवां वर्णयितुमुपक्रमते—

स इति। अनुमान्याभ्युपगमय्य। आत्मनो भवतीत्यात्मभूः। कारणान्तरनिरपेक्षमस्य भवनमस्तीत्यर्थः। ततश्च भवनेऽपि निरपेक्षस्य परं स्वातन्त्र्यं ध्वन्यते। तच्च तत्र तत्र विहरणे हिमवदनिवार्यत्वे च हेतुः। आत्मजाविरहदुःखेन भाविनाप्युत्प्रेक्ष्यमाणेन। पीडितमित्यनेन तदनुमाननस्य दुष्करत्वं द्योत्यते। तत्र तत्रेति वैचित्र्यस्य रसावहत्वात्। अप्रमेयगतिना मनोवायुप्रभृतिभिरप्युपमातुमशक्येन ककुद्मता सम्पतन् न त्वैश्वर्यविशेषेणेति लौकिकव्यापारानुकरणपरत्वमुक्तम्।।२१।।

विवरणम्

इत्थं कामुकसरणिमवतीर्णस्य भगवतः पार्वतीसहचरस्य तत्तद्देशकालविशेषरूपामुद्दीपनसम्पदं वर्णयितुमारभते—

स इति। सः हिमवन्तम् अनुमान्य ककुद्मता तत्र तत्र सम्पतन् विजहार। सः वृषध्वजः हिमवन्तं श्वशुरभूतं गिरिराजम् अनुमान्य अनुमतिं कारयित्वा। ककुद्मता वृषेण, न तु चिन्तितदेशप्राप्तिकारिणा निजैश्वर्यमात्रेण। अनेन तत्तद्देशविशेषदर्शनकुतूहलिन्या देव्याश्चित्तानुवर्तनमुखेन लौकिकव्यापारानुसरणं देवस्योक्तम्। तत्र तत्र तेषु तेषु रमणीयेषु देशेषु सम्पतन् गच्छन् विजहार क्रीडामातेने। देवस्य तत्र तत्र विहरणे तनयावियोगपीडितेन हिमवताप्यनिवार्यगमनत्वे च हेतुमाह—आत्मभूरिति। आत्मन एव भवतीत्यात्मभूः। स्वशरीरपरिग्रहेऽपि परानपेक्ष इत्यर्थः। अनेन देवस्य स्वातन्त्र्यं ध्वन्यते। हिमवदननुमाननस्यात्यन्तदुष्करत्वं दर्शयति—आत्मजाविरहदुःखपीडितमिति। आज्मजायाः पुत्र्याः विरहेऽनन्तरक्षणे भावितया सम्भाव्यमाने वियोगे यद् दुःखं तेन पीडितं परवशम्। आत्मजायाः पितृमातृवियोगदुःखं तु देववियोगकातरतया शान्तमित्यनेनैव ध्वन्यते। ककुद्मतो मनोनुकूलगमनत्वमाह—अप्रमेयगतिनेति। अप्रमेया मारुतमनःप्रभृतिभिरप्युपमातुमशक्यत्वादपरिच्छेद्या गतिः गमनं यस्य तेन।।२१।।

मेरुमेत्य मरुदाशुवाहनः
पार्वतीस्तनपुरस्कृतः कृती।
हेमपल्लवविभङ्गसंस्तरा-
नन्वभूत् सुरतमर्दनक्षमान्।।२२।।

प्रकाशिका

नानादेशविहरणप्रकारं वर्णयति—

मेरुमिति। मरुदिवाशुगति वाहनं यस्य। तत्कालविशेषणं चैतत्। वाहनेऽभिमुखस्थापितायाः पार्वत्याः स्तनाभ्यां पुरस्कृतः। अनेन लेशतोऽपि सम्भोगविच्छेदासहत्वं ध्वनितम्। कृती तत एव धन्यमानी। हेमेति हेमपल्लवशकलकल्पितशयनानि।।२२।।

विवरणम्

'तत्र तत्र विजहार सम्पतन्' (८.२५) इति, यदुक्तं, तदेव विस्तरतः प्रतिपादयति षड्भिः श्लोकैः। तत्रादौ महामेरुशिखरेषु सुरतमाह—

मेरुमिति। अत्र स इति कर्तृपदमध्याहार्यम्। सः मेरुम् एत्य हेमपल्लवविभङ्गसंस्तरान् अन्वभूत्। मेरुं महामेरुम् एत्य प्राप्य। विभङ्गशब्दो लक्षणया भग्नद्रव्यवाची। तत्कालावलूनत्वान्मनोहरत्वप्रतीतिः फलम्। हेममयैस्तत्कालावलूनैः पल्लवैर्विरचितान् संस्तरान् शयनीयानि अन्वभूद् अनुभूतवान्। हेममयैस्तत्कालावलूनैः कल्पवृक्षपल्लवैः कृतं शयनीयमसेवतेत्यर्थः। दूरतरमेरुशिखरप्राप्तौ भगवतः कः प्रयास इत्याह—मरुदाशुवाहन इति। अत्राशुशब्दस्याशुगतीत्यर्थः। मरुदिवाशुगति वाहनं यस्य स तथा। देवस्य सम्भोगविच्छेदे क्षणमात्रमप्यसहनत्वं दर्शयति—पार्वतीस्तनपुरस्कृत इति। पार्वत्याः स्तनाभ्यां पुरस्कृतः अग्रभागे कृतः। वाहनोपरि स्वाभिमुखमेव स्थापितायाः पार्वत्याः स्तनाभ्यामग्रतः कृत इत्यर्थः। अनेनाभिमुखावस्थानमुक्तम्। अथवा पुरस्कृतः पूजितः। आलिङ्गित इत्यर्थः। 'पुरस्कृतः पूजितेऽरात्यभियुक्तेऽग्रतः कृत' इत्यमरः। अनेन गमनसमयेऽपि सम्भोगानामविच्छेदो ध्वन्यते। अत एव कृती धन्योऽहमित्यभिमानीत्यर्थः। हेमपल्लवसंस्तराणामितरसंस्तरेभ्यो व्यतिरेकमाह—सुरतमर्दनक्षमानिति। सुरतेषु यन्मर्दनं चरणाद्यभिहननं तत्र क्षमान् शक्तान्। इतराणि हि शयनीयानि बहुविधकरणभेदसहितेषु सुरतेषु चरणादिव्यापारासहत्वेन जीर्णतामुपगच्छेयुरिति भावः।।२२।।

पद्मनाभवलयाङ्किताश्मसु
प्राप्तवत्स्वमृतविप्रुषो नवाः।
मन्दरस्य कटकेषु चाभवत्
स प्रियावदनपद्मषट्पदः॥२३॥

प्रकाशिका

पद्मेति। इदं विशेषणं 'महतां चोपलक्षणमि'त्युदात्तोऽलङ्कारः। नवाः प्रथमोद्गताः अमृतविप्रुषः प्राप्तवत्स्वित्यनेन तत्रस्थानां जङ्गमस्थावराणां धन्यत्वं नित्यसुभगत्वं च ध्वनितम्।।२३।।

विवरणम्

मन्दराद्रौ सुरतमाह—

पद्मेति। सः मन्दरस्य कटकेषु च प्रियावदनपद्मषट्पदः अभवत्। मन्दरस्य मन्दराचलस्य कटकेषु प्रस्थेषु। 'कटकोऽस्त्री नितम्बोऽद्रेः स्नुः प्रस्थः सानुरस्त्रियामि'त्यमरः। चकारः पूर्वोक्तसुमेरुसमुच्चयार्थः। प्रियायाः वल्लभायाः

वदन एव पद्मे पङ्कजे षट्पदः भ्रमरोऽभवत्। पङ्कजमकरन्दमिवेन्दिन्दिरश्चन्द्रशेखरः प्रियावदनाधरामृतमास्वादितवानित्यर्थः। मन्दरकटकानामखिलेन्द्रियप्रीतिकरत्वप्रतिपादनमुखेनोद्दीपनत्वं विशेषणद्वयेन प्रदर्श्यते। तत्रादाविन्द्रियाणां मध्ये नेत्रस्यैव प्राधान्यात् तत्प्रीतिकरत्वमाह—पद्मनाभवलयाङ्किताश्मस्विति। पद्मनाभस्य श्रीनारायणस्य वलयैः अङ्गदैः अङ्किताः लाञ्छिताः अश्मानः दृषदो येषु तेषु। 'पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषदि'ति सिंहः। पुरा किल जलनिधिमथने विषण्णेषु सुरासुरवृन्देषु नारायणः स्वयमेव कराभ्यां मन्दराचलं गृहीत्वा ममन्थेति पुराणेषु श्रूयते। तदा तत्करगतानां हेमवलयानां शिलाभिः सह सङ्घर्षवशात् सम्प्राप्तहेमलेखसकलशिलातलेष्वित्यर्थः। इतरेन्द्रियप्रीतिकरत्वमाह—नवाः अमृतविप्रुषः प्राप्तवत्स्विति। नवाः प्रथमोद्गताः। मथनदण्डे हि प्रथमोद्गतं नवनीतादिकं सक्तं भवति। अनेन तद्गतानाममृतविप्रुषामितरापेक्षया स्वादिष्ठत्वमुक्तम्। अमृतस्य हि त्वगिन्द्रियप्रीतिकरत्वमुक्तं रघुवंशे दृष्टान्तत्वेन—'निषिञ्चन्तमिवामृतं त्वचि' (३.२६) इति। सर्वेन्द्रियप्रीतिकरत्वमेवमेव द्रष्टव्यम्। अमृतानां विप्रुषो बिन्दून्। 'पृषन्ति बिन्दुपृषतौ पुमांसौ विप्रुषः स्त्रिय' इत्यमरः। प्राप्तवत्सु अधिगतेषु। अनेन विशेषणेन तत्रत्यानां स्थावराणां जङ्गमानां च धन्यत्वं नित्यसुभगत्वं च ध्वन्यते। अत्र सम्पतत्स्वप्यमृतबिन्दुषु प्रियावदनपद्ममकरन्दास्वादनप्रतिपादनेन देवस्यामृतबिन्दुष्वनादरोऽपि ध्वनितः। अत्र पद्मनाभेत्यादिना भगवतः श्रीनारायणस्य वर्ण्यमानमन्दराचलोत्कर्षप्रतिपादनार्थमङ्गत्वेन प्रतिपादनादुदात्तमलङ्कारः। 'उदात्तं वस्तुनः सम्पन्महतां चोपलक्षणमि'ति[काव्यप्रकाशे]। उपलक्षणमङ्गभावः।।२३।।

वारणध्वनितभीतया तया
कण्ठसक्तमृदुबाहुबन्धनः।
एकपिङ्गलगिरौ जगद्गुरु-
र्निर्विवेश विशदाः शशिप्रभाः।।२४।।

प्रकाशिका

वारणेति। रावणेति केचित् पठन्ति। मृद्विति बाहुविशेषणम्। एकपिङ्गलो वैश्रवणः। जगद्गुरुरित्यनेन सर्वत्राप्रतिहतेच्छत्वं द्योत्यते। विशदा ज्योत्स्नाः, तासां च कैलाससम्बन्धादतिविशदत्वं ध्वन्यते।।२४।।

विवरणम्

कैलासशिखरेषु सुरतमाह—

वारणेति। जगद्गुरुः एकपिङ्गलगिरौ विशदाः शशिप्रभाः निर्विवेश। जगतां

गुरुर्नियन्ता परमेश्वरः। अनेन तदीप्सितानां सर्वत्राप्यप्रतिहतत्वं द्योत्यते। एकपिङ्ग एवैकपिङ्गलः वैश्रवणः।

किन्नरेशो वैश्रवणः पौलस्त्यो नरवाहनः।
यक्षैकपिङ्गैलबिलः श्रीदः पुण्यजनेश्वरः।।

इत्यमरः। तस्य गिरौ कैलासे। विशदाः निर्मलाः। अनेन मेघमुक्तत्वं पूर्वपक्षसम्बन्धाद् रजनीमुखोपभोग्यत्वं रजतमयकैलासशिखरसम्बद्धत्वादतिविशदत्वं च द्योत्यते। शशिनश्चन्द्रस्य प्रभाः ज्योत्स्नाः निर्विवेश अनुबभूव। तत्र रममाणस्य देवस्य सुखान्तरमपि जातमित्याह—वारणध्वनितभीतया तया कण्ठसक्तमृदुबाहुबन्धनः इति। वारणानां गजानां ध्वनिताच्छब्दाद् भीतया तया पार्वत्या कण्ठे सक्तं सज्जितं मृद्वोः कोमलयोर्बाह्वोर्बन्धनमालिङ्गनं यस्य स तथा। तस्य देशस्य गजेन्द्रबहुलत्वान्मध्ये मध्ये गजबृंहितभीतया देव्या गाढगाढमालिङ्गित इत्यर्थः। कामिनीनां सभयालिङ्गनस्य कामुकानां श्लाघ्यत्वप्रसिद्धेरेवमुक्तम्। यथाहुः—

कोपप्रशमने भीतौ वियोगे पुनरागमे।
सम्भोगे च समाश्लेषो विशेषेण सुखावहः।।

इति। रावणध्वनितभीतयेति केचित् पठन्ति। तन्मते कैलासोद्धरणोद्युक्तस्य रावणस्य ध्वनिताद् भीतयेत्यर्थः।।२४।।

तस्य जातु मलयस्थलीरते-
र्धूतचन्दनलतः प्रियाक्लमम्।
आचचाम सलवङ्गकेसर-
श्चाटुकार इव दक्षिणानिलः॥२५॥

प्रकाशिका

तस्येति। जातु कदाचित्। धूतेति कम्पितचन्दनशाखः। प्रियायाः क्लमं रतिश्रमम्। चाटुकारः प्रियवादी, वन्दीत्यर्थः। वन्दिपक्षे तु धूता आक्षिप्ता चन्दनलता येन। देवि! त्वत्सादृश्ये चन्दनलतापि दूरस्थेत्याक्षेपः। सलवङ्गकेसरः पुष्पाञ्जलिप्रक्षेपार्थं गृहीतलवङ्गकेसरः।।२५।।

विवरणम्

मलयाचले सुरतमाह—

तस्येति। दक्षिणानिलः जातु मलयस्थलीरतेः तस्य प्रियाश्रमम् आचचाम।

दक्षिणानिलो मलयानिलः। दर्दुरानिल इति पाठे दर्दुरध्वनियुक्तो वायुरित्यर्थः। जातु कदाचित्। 'कदाचिज्जात्वि'त्यमरः। मलयो मलयाचलः तस्य स्थल्यां प्रदेशे रतिः सुरतं यस्य तस्य परमेश्वरस्य प्रियायाः श्रमं पुरुषायितादिजनितं शरीरसादम्। प्रियाक्लममिति वा पाठः। आचचाम निश्शेषमपाचकारेत्यर्थः। अत्रोपमामाह—चाटुकारः इव इति। चाटुः श्लाघावचनम्। 'अस्त्री चाटुश्चटुः श्लाघे'त्यमरः। चाटु करोतीति चाटुकारः प्रियवादी वन्दी। यथा प्रभातसमये वन्दी स्तुतिर्वचनैः परिश्रममपाकरोति, तथा दर्दुरानिलोऽपीत्यर्थः। अत्र वचनप्रतिवस्तुतया दर्दुरपदोपादानम्। उपमानोपमेययोः साधारणं धर्ममाह—धूतेत्यादिना विशेषणद्वयेन। धूतचन्दनलतः धूताः कम्पिताश्चन्दनलताः येन। अनेनानिलस्य सौरभ्यातिशय उक्तः। वन्दिपक्षे तु धूताः आक्षिप्ताश्चन्दनलता येनेति योजनीयम्। हे देवि! स्वाभाविकसौरभ्यशालित्वेन यद्यपि भवत्याश्चन्दनलतायाश्च सादृश्यं प्रतीयते, तथापि प्रकृतिकठिना चन्दनलता त्वत्सादृश्यविषये दूरादवस्थितैवेत्याक्षेपप्रकारः। तथा सलवङ्गकेसरः लवङ्गानां वृक्षविशेषाणां केशरैः कुसुमकिञ्जल्कैः सहितः। 'किञ्जल्कः केशरोऽस्त्रियामि'त्यमरः। वन्दिपक्षे पुष्पाञ्जलिप्रक्षेपार्थं करगृहीतलवङ्गकेसर इत्यर्थः।।२५।।

हेमतामरसताडितप्रिया
तत्कराम्बुविनिमीलितेक्षणा।
खे व्यगाहत तरङ्गिणीमुमा
मीनपङ्क्तिपुनरुक्तमेखला॥२६॥

प्रकाशिका

हेमेति। हेमपद्मेन ताडितः प्रियो यया। तत्करेति भर्तृकरोत्पीडिताम्बुनिमीलितलोचना। खे तरङ्गिणीं मन्दाकिनीम्। नाभिदघ्ने पयसि विहरन्त्या देव्या मेखलास्थाने मीनेषु सञ्चरत्सु मेखलाद्वैगुण्यं प्रतिभातीति मीनेति विशेषणम्।।२६।।

विवरणम्

इत्थं वनक्रीडाप्रकारमुक्त्वा जलक्रीडाप्रकारमाह—

हेमेति। उमा खे तरङ्गिणीं व्यगाहत। उमा पार्वती खे आकाशे वर्तमानां तरङ्गिणीं नदीम्। आकाशगङ्गामित्यर्थः। व्यगाहत विगाहते स्म। पार्वती परमेश्वरेण सह जलक्रीडार्थं मन्दाकिनीमगाहतेत्यर्थः। जलक्रीडाप्रकारं सङ्क्षिप्याह—हेमेत्यादिना विशेषणद्वयेन। हेमतामरसताडितप्रिया हेममयेन तामरसेन पद्मेन ताडितः अभिहतः प्रियो भर्ता यया सा तथा। ताडनसमये प्रियस्य प्रवृत्तिं

देवीविशेषणद्वारेणाह—तत्कराम्बुविनिमीलितेक्षणा इति। तत्करे प्रियकरे यदम्बु जलं तेन हेतुना विनिमीलिते विशेषेण मीलिते अक्षिणी यया सा तथा। भर्तृकरोत्पीडितजलपतनसमये निमीलितलोचनेत्यर्थः। जलविहारसमये देव्याः शोभान्तरं च जातमित्याह—मीनपङ्क्तिपुनरुक्तमेखला इति। मीनानां मत्स्यानां पङ्क्त्या आवल्या कर्तृभूतया पुनरुक्ता अर्थाद् द्वैरूप्यमापादिता मेखला काञ्ची यस्याः सा तथा। नाभिदघ्ने पयसि परस्परं ताडनजलप्रक्षेपादिभिर्विहरन्त्या देव्या मेखलापदे मीनजालेषु परितः सञ्चरत्सु मेखलाद्वैरूप्यं प्रतीतमासीदित्यर्थः।।२६।।

तां पुलोमतनयालकोचितैः
पारिजातकुसुमैः प्रसाधयन्।
नन्दने चिरमयुग्मलोचनः
सस्पृहं सुरवधूभिरैक्ष्यत॥२७॥

(प्रकाशिकाया अत्राऽभावः)

विवरणम्

इत्थं मन्दाकिन्यां कृतविहारं स्नाताया देव्यास्तदनुरूपं प्रसाधनप्रकारमाह—

तामिति। नन्दने पारिजातकुसुमैः तां प्रसाधनम् अयुग्मलोचनः सुरवधूभिः सस्पृहं चिरम् ऐक्ष्यत। नन्दनोद्याने पारिजातकुसुमैः कल्पवृक्षपुष्पैः तां पार्वतीं प्रसाधयन् अलङ्कुर्वन् अयुग्मलोचनस्त्रिनेत्रः सुरवधूभिः सुरसुन्दरीभिः सस्पृहं साभिलाषं यथा भवति तथा ऐक्ष्यत ईक्षितोऽभूत्। तत् तु न क्षणमात्रं किन्तु चिरं चिरकालम्। 'कालाध्वनोः—' (२.३.५) इति द्वितीया। पारिजातकुसुमानां विशेषमाह—पुलोमतनयालकोचितैः इति। पुलोमतनया शची तस्या अलकानामेवोचितैः योग्यैः। अन्याभिः सुरवधूभिर्मनसाप्यगम्यैरित्यर्थः। नन्दनोद्याने पौलोमीव्यतिरिक्तसुरवधूजनदुर्लभैः कल्पवृक्षकुसुमविशेषैः प्रियामलङ्कुर्वन्नयुग्मलोचनः सुरसुन्दरीभिः अपिनामानेन सह कदाचिदप्यस्माकमेवमवस्थानं भवेदिति साभिलाषं मुहुर्मुहुरवलोकितोऽभूदिति भावः।।२७।।

इत्यभौममनुभूय शङ्करः
पार्थिवं च वनितासखः सुखम्।
लोहितायति कदाचितातपे
गन्धमादनवनान्यवर्तत॥२८॥

प्रकाशिका

प्रकृतोपसंहारेण प्रकरणान्तरमारभते—

इतीति। अभौमं मेरुमन्दरादिगतम्। पार्थिवं मलयगतम्। वनितासख इति सुखस्य सम्भोगाङ्गत्वमुक्तम्। आतपे लोहितायतीति वक्ष्यमाणप्रकरणप्रस्तावार्थम्। गन्धमादनवनाद् गन्धमादनवनमुद्दिश्य। गन्धमादनस्यौषधिप्रस्थप्रत्यासन्नत्वाद् न्यवर्ततेत्युक्तम्।।२७।।

विवरणम्

‘तत्र तत्र विजहार सम्पतन्’ (८.२१) इति यदुक्तं तदुपसंहृत्य सन्ध्याचन्द्रोदयाद्युद्दीपनवर्णनपुरस्सरं सुरतं वर्णयितुं तदुचितदेशप्राप्तिमाह—

इतीति। शङ्करः अभौमं पार्थिवं च सुखं वनितासखः इति अनुभूय कदाचिद् आतपे लोहितायति गन्धमादनवनं न्यवर्तत। भौमं भूमिभवं न भवतीत्यभौमम्। मेरुमन्दरस्वर्गापगादिदिव्यप्रदेशभवमित्यर्थः। पार्थिवं पृथिवीभवम्। मलयाचलादिगतमित्यर्थः। चशब्दो विस्तरणभयादनुक्तानामन्येषां च समुच्चयार्थः। सुखं सम्भोगसुखमित्यर्थः। अत एवोक्तं—वनितासख इति। वनितायाः सखा सन्। वनितया सहेत्यर्थः। अत्यर्थजनितानुरागा स्त्री वनिता। ‘वनिता जनितात्यर्थानुरागायां च योषिती’त्यमरः। इति पूर्वोक्तक्रमेण अनुभूय। कदाचिदित्यनेन बहुकालानुभव उक्तः। आतपे सूर्यप्रभायां लोहितायति रुधिरवदाचरति रक्तवर्णत्वमुपयाति। दिनान्तसमय इत्यर्थः। इदं च वक्ष्यमाणसन्ध्यादिवर्णनप्रस्तावार्थमुक्तम्। गन्धमादनवनं प्रति न्यवर्तत। गन्धमादनवनादिति पाठे गन्धमादनवनमुद्दिश्येत्यर्थः। ल्यब्लोपे पञ्चमी। न्यवर्तत निवृत्तोऽभूत्। गन्धमादनवनस्यौषधिप्रस्थोद्यानभूतत्वान्न्यवर्ततेत्युक्तम्। यथोक्तं—‘यस्य चोपवनं बाह्यं सुगन्धिर्गन्धमादनः’ (६.४६) इति। कामगेन वृषेण दयितया सह तत्र तत्र सञ्चरन् परमेश्वरः कदाचिदोषधिप्रस्थसमीपवर्तिनं गन्धमादनाचलमेवोद्दिश्य प्रतिनिवृत्तोऽभूदित्यर्थः।।२८।।

तत्र काञ्चनशिलातलाश्रयी
नेत्रगम्यमवलोक्य भास्करम्।
दक्षिणेतरभुजव्यपाश्रयां
व्याजहार सहधर्मचारिणीम्॥२९॥

प्रकाशिका

तत्रेति। नेत्रगम्यं सुखदर्शनम्। अनेन नयिकादृष्टिदानयोग्यतां द्योतयति।

भास्करमवलोक्येति व्याहारस्य तद्विषयत्वं सूचयति। दक्षिणेत्यादिना समुचितप्रदेशस्थितिरुक्ता। सहधर्मचारिणीमिति आत्मनिर्विशेषत्वं द्योतयति।।२९।।

विवरणम्

अथ सुरतवर्णनानामुद्दीपनपूर्वकत्वादवश्यवर्णनीयानां सन्ध्याचन्द्रोदयादीनां पृथगेव वर्णने सति प्रकृतमपहाय कथान्तरारम्भेण रम्भङ्गमाशङ्क्य रसानुसारी महाकविर्नायिकानायकसंल्लापमुखेनैव सन्ध्यादिवर्णनं कर्तुमुपक्रमते—

तत्रेति। अत्र स इत्यध्याहार्यम्। सः तत्र काञ्चनशिलातलाश्रयी नेत्रगम्यं भास्करमवलोक्य दक्षिणेतरभुजव्यपाश्रयां सहधर्मचारिणीं व्याजहार। तत्र गन्धमादनवने काञ्चनमयं शिलातलं शिलाप्रदेशमाश्रयितुं शीलमस्येति तथा। सुखासीनत्वादासनस्थैर्यं णिनिप्रत्ययार्थः। काञ्चनशब्द उद्दीपनसस्पदं द्योतयति। नेत्रैर्गम्यं प्राप्यम्। प्रभापरिक्षयात् सुखदृश्यमित्यर्थः। अनेन सुकुमारतरनायिकादृष्टिपातयोग्यत्वं ध्वन्यते। भास्करम् आदित्यम् अवलोक्य व्याजहारेत्यनेन व्यवहाराणां तद्विषयत्वं सूचितम्। दक्षिणेतरो वामो भुजः व्यपाश्रय आश्रयो यस्यास्ताम्। वामपार्श्वस्थितामित्यर्थः। अनेन समुचितप्रदेशवर्तित्वमुक्तम्। प्रोद्वीक्षणाख्यो भावश्च दर्शितः। प्रोद्वीक्षणं नाम वामपार्श्वे स्त्रियं स्थापयित्वा चन्द्रादिदर्शनमि'ति भोजः। सहधर्मचारिणीं भार्याम्। सह धर्मं चरितुं शीलमस्या इति तथा। अनेनात्मनिर्विशेषत्वं देव्याः प्रतिपादितम्। व्याजहार उक्तवान्। भगवान् परमेश्वरो गन्धमादनवने काञ्चनमयीं काञ्चन शिलामधिष्ठाय सम्प्राप्तास्तमयत्वात् प्रभापरिक्षयेण सकललोकदृष्टिगोचरं भास्करमुद्दिश्य प्रियतमां व्याहृतवानित्यर्थः।।२९।।

पद्मकान्तिमरुणत्रिभागयोः
सङ्क्रमय्य तव नेत्रयोरिव।
संक्षये जगदिव प्रजेश्वरः
संहरत्यहरसावहर्पतिः।।३०।।

प्रकाशिका

पद्मेति। अरुणस्त्रिभागस्तृतीयो भागो ययोः। अनेन पुनरुपादानाय सङ्क्रम्यमाणायाः पद्मकान्तेः 'वृद्धिः समानैः सर्वेषामि'ति न्यायादनपचयाभिसन्धिर्द्योत्यते। सङ्क्रमणेन च संह्रियमाणस्याह्नः सारभूता पद्मकान्तिरिति ध्वन्यते, यतो गृहादौ कस्मिंश्चिदवयविनि संह्रियमाणे सारभूतं दार्वादि क्वचिन्निक्षिप्यते। पद्मकान्तिसङ्क्रमणोत्प्रेक्षायां च तन्नेत्रयोः सम्भोगकालप्रत्यासत्त्या

वर्धमानकान्तिकत्वं हेतुः। संक्षये कल्पान्ते। उपमानेन संह्रियमाणस्यातिविततत्वं तत्संहर्तुः स्वतन्त्रत्वं च द्योत्यते।।३०।।

विवरणम्

उक्तिप्रकारानेवाह पद्मेत्यादिना। तत्रादौ वक्ष्यमाणमर्थं सङ्क्षिप्य दर्शयति—

पद्मेति। अहर्पतिः असौ अहः संहरति। अह्नां पतिरहर्पतिः आदित्यः। असौ तेजःपरिक्षयात् प्रत्यक्षतया लक्ष्यमाणः। सहस्तनिर्देशं चेदं वचनम्। अहः दिवसम्। 'दिनाहनी वा तु क्लीबे दिवसवासरावि'त्यमरः। संहरति सम्यग् हरति विनाशयति। अत्रोपमामाह—प्रजेश्वरः संक्षये जगद् इव इति। प्रजानां जनानाम् ईश्वरः प्रजेश्वरः। सृष्टिस्थितिसंहारकारी परमात्मेत्यर्थः। अनेन प्रजासंहारे प्रजेश्वरस्येवाह्नः संहारेऽप्यहर्पतेः स्वातन्त्र्यं ध्वन्यते। संक्षये, क्षय एव संक्षयः कल्पान्तः, तस्मिन्। 'संवर्त प्रलयः कल्पः क्षयः कल्पान्त इत्यपी'त्यमरः। जगत् प्रपञ्चमिव। अत्र संह्रियमाणस्याह्नः प्रपञ्चदृष्टान्तेन तस्यापि प्रपञ्चवदतिविततत्वं ध्वन्यते, संहारस्य विस्मयकरत्वं च। उत्प्रेक्षामप्याह—पद्मकान्तिम् अरुणत्रिभागयोः तव नेत्रयोः सङ्क्रमय्य इव इति। पद्मानां कान्ति शोभाम्। अरुणः रक्तवर्णः त्रिभागस्तृतीयो भागो ययोस्तयोः। अत्र त्रिभागशब्दस्त्रिभागशेषासु निशास्वितिवद् (कु.५.५७)-द्रष्टव्यः। अनेन नेत्रविशेषणेन नेत्रयोः पद्मकान्तिसङ्क्रमणयोग्यत्वमुक्तम्। तेन च पुनरुपादानाय सङ्क्रम्यमाणायाः पद्मकान्तेरपचयाभावनिश्चयः सङ्क्रमणहेतुर्द्योत्यते। 'वृद्धिः समानैः सर्वेषामि'ति न्यायात्। नेत्रयोरित्यधिकरणसप्तमी। सङ्क्रमय्य सङ्क्रमणं कृत्वेव। संह्रियमाणस्याह्नः सारभूतां पद्मकान्ति तदुचिते प्रदेशे निक्षिप्य संरक्ष्येवेत्यर्थः। यद्वत् पुरातने गृहादाववयविनि नवीकरणाय संह्रियमाणे सति तत्सारभूतं दार्वादिकं कुत्रचित् प्रदेशे निक्षिप्यते, तद्वदित्यर्थः। अत्र देवीनेत्रयोः सम्भोगप्रत्यासत्त्या परिवर्धमानकान्तित्वं पद्मकान्तिसङ्क्रमणोत्प्रेक्षायां हेतुः।।३०।।

शीकरव्यतिकरं मरीचिभि-
र्दूरयत्यवनते विवस्वति।
इन्द्रचापपरिवेषशून्यतां
निर्झराः प्रसवितुर्व्रजन्ति ते॥३१॥

प्रकाशिका

शीकरोति। व्यतिकरः संपर्कः। दूरयति दूरीकुर्वति। अपनयतीत्यर्थः। दक्षिणावर्तस्त्वाह—दूरयतीत्यस्य साधुत्वं मृग्यम्। तथाहि दूरशब्दात् 'तत्करोति—'(ग.सू.३.१.२६) इति णिचि कृते 'णाविष्ठवत्प्रातिपदिकस्ये'ति इष्ठवद्भावः

स्यात्। 'स्थूलदूर—'(६.४.१५६) इत्यादिना पूर्वस्य यणो लोपो गुणश्च भवति। तदा दवयतीति रूपं स्यादिति। अत्र वामनेन—'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' (ग.सू.३.१.२६) इति बहुलग्रहणात् समर्थितम्। नानाप्रभासमुदाय इन्द्रचापः, तत्परिवेषस्तन्मण्डलं, तेन शून्यताम्। जले पतन्तोऽर्ककिरणा नानावर्णसमुदायमण्डलानि कुर्वन्ति। तेषु गतेषु तान्यपि गच्छन्तीति प्रसिद्धिः। प्रसवितुः पितुः।।३१।।

विवरणम्

सूर्य एव सर्वेषामपि तेजसां प्रवर्तक इति यदुच्यते, तत् सत्यमेव। अत एव तस्मिन् गतप्राये तेजोऽन्तराण्यपि नश्यन्तीत्याह—

शीकरेति। अवनते विवस्वति मरीचिभिः शीकरव्यतिकरं दूरयति ते प्रसवितुः निर्झराः इन्द्रचापपरिवेषशून्यतां व्रजन्ति। अवनते आसन्नास्तमयत्वादधोमुखे। इदं तु मरीचिभिः शीकरव्यतिकरदूरीकरणे हेतुः। विवस्वति आदित्ये मरीचिभिः किरणैः शीकरव्यतिकरं शीकरैः जलकणैः व्यतिकरं सम्पर्कम्। दूरयति दूरीकुर्वति। अपनयति सतीत्यर्थः। ननु दूरशब्दात् तत्करोतीति णिचि कृते 'णाविष्ठवत् प्रातिपदिकस्ये'तीष्ठवद्भावात् 'स्थूलदूर—' इत्यादिना सूत्रेण यणादेर्लोपः पूर्वस्य गुणश्च भवति। तदा दवयतीत्येव रूपं स्यादिति कथं दूरयतीति। उच्यते। 'प्रातिपदिकाद्धात्वर्थे बहुलम्—' इति(वामनेन?) बहुलग्रहणादिति ब्रूमः। ते प्रसवितुः तव पितुर्हिमवत इत्यर्थः। निर्झराः वारिप्रवाहाः। इन्द्रचापो नाना रत्नप्रभासमुदायः, तस्य परिवेषो मण्डलं, तेन शून्यतां शून्यत्वं व्रजन्ति। जलशीकरेषु पतन्तो रविकिरणा नानावर्णसमुदायमण्डलानि विरचयन्ति। रविकिरणेषु निवृत्तेषु तान्यपि निवर्तन्त इति प्रसिद्धिः। सूक्ष्मदर्शिनां प्रत्यक्षभूतश्चायमर्थः। सूर्यमण्डलस्याधोमुखत्वात् समुन्नतेभ्यो हिमवच्छिखरेभ्यो निपततां जलप्रवाहशीकराणां रविकरसम्पर्काभावान्नानाप्रभामण्डलान्यपि निवृत्तानीत्यर्थः।।३१।।

दष्टतामरसकेसरत्यजोः
क्रन्दतोर्विपरिवृत्तकण्ठयोः।
निघ्नयोः सरसि चक्रवाकयो-
रल्पमन्तरमनल्पतां गतम्।।३२।।

प्रकाशिका

दष्टेति। दैवबलात्कारेण चञ्चुपुटद्वयदष्टपद्मकेसरत्यागपूर्वकमन्योन्यपराङ्मुखीकृतकण्ठयोः परस्परादर्शनादिना तथा वैशसमनुभवतोश्चक्रवाकदम्पत्योरल्पमपि

देशव्यवधानं सद्य एव सहस्रयोजनव्यवधानमिव जातमित्यर्थः। अनेन दैवादावयोः किञ्चित्कासमागमे सति न केवलं भवत्या, मयापि महद् वैशसमनुभूतमिति द्योतयन्नुपेक्षापराधशल्यं परमधूर्तः प्रियतमाहृदयादुद्धरति।।३२।।

विवरणम्

अपिच चक्रवाकमिथुनान्यपि वियुक्तानीत्याह—

दष्टेति। सरसि चक्रवाकयोः अल्पम् अन्तरम् अनल्पतां गतम्। सरसि पद्माकरे। 'पद्माकरस्तटाकोऽस्त्री कासारः सरसी सरः' इत्यमरः। चक्रवाकयोः चक्रवाकदम्पत्योः अल्पमन्तरम् अत्यल्पमेव देशव्यवधानम् अनल्पतां गतम्। सहस्रयोजनपरिमितमिव जातमित्यर्थः। सरसि परिवर्तमानयोः पद्मपत्रमात्रान्तरितयोश्चक्रवाकदम्पत्योर्दैववशादत्यल्पमपि देशव्यवधानं परस्परदर्शनविलापश्रवणाद्यभावादनेकसहस्रयोजनपरिमितमिव जातमिति भावः। अनेन परस्परविरह उक्तः। विरहस्यानुभावमाह—दष्टेत्यादिना विशेषणत्रयेण। दष्टतामरसकेसरत्यजोः दष्टं कबलनार्थं चञ्चुद्वयेन गृहीतं तामरसस्य पद्मस्य केसरं किञ्जल्कं त्यजत इति दष्टतामरसकेसरत्यजौ तयोः। अर्धकबलिततामरसकेसरमपि परित्यजतोरित्यर्थः। अनेन विषयनिवृत्तिरूपा मदनावस्था दर्शिता। उन्मादावस्थामप्याह—क्रन्दतोरिति। उच्चैस्तरामाक्रन्दनं कुर्वतोरित्यर्थः। विरहप्रकारमेवाह—विपरिवृत्तकण्ठयोरिति। अन्योन्यपराङ्मुखीकृतग्रीवयोः। प्रियतमावस्थितं देशमपहाय वलितग्रीवमितस्ततश्चक्षुर्विक्षिपतोरित्यर्थः। एवंविधे वैशसे हेतुमाह—निघ्नयोरिति। 'अधीनो निघ्न आयत्तः स्वच्छन्द' इत्यमरः। विधिपराधीनयोरित्यर्थः। स्निग्धयोरिति वा पाठः। अनेन परमधूर्तो देवः 'न जातु बाला लभते स्म निर्वृतिं तुषारसङ्घातशिलातलेष्वपि' (५.५५) इत्यादिसखीवचनमनुसन्दधानः त्वद्विरहात् प्रणयपराधीनेन मयापि चक्रवाकवदेवं वैशसमनुभूतमिति द्योतयन् प्रियतमाहृदयगतमुपेक्षाशल्यं दैववैपरीत्यदोषप्रतिपादनमुखेनोद्धृतवानित्यवसेयम्।।३२।।

स्थानमाह्निकमपास्य दन्तिनः
सल्लकीविटपभङ्गवासितम्।
आविभातचरणाय गृह्णते
वारि वारिरुहरुद्धषट्पदम्।।३३।।

प्रकाशिका

स्थानमिति। आह्निकमह्नो योग्यम्। सल्लकीति भक्षितशेषसल्लकीशाखाशकलसुरभितम्। सल्लकी गजप्रिया लता। आविभातचरणाय विभातादारभ्य

यच्चरणं भक्षणं तस्मै पर्याप्तं वारि गृह्णते। वारिरुहरुद्धषट्पदमित्यनेन भ्रमरबाधाराहित्यमुक्तम्। वारिरुहपत्रलोचन इति वा पाठः। पत्रसंपुट इत्ययुक्तः पाठः। इदमत्रानुसन्धेयं—दन्तिनो ह्यातपभयात् कुत्रापि तरुषण्डे दिवसमतिवाहयन्तः स्वैरं सल्लक्यादिभक्षणं कुर्वन्ति। ततो दिवसान्ते निर्गत्य भक्षितानुरूपं जलं पिबन्तीति।।३३।।

विवरणम्

आदित्यास्तमये गजानामपि समवस्थानमाह—

स्थानमिति। वारिरुहपत्रलोचने! दन्तिनः आह्निकं स्थानम् अपास्य आविभातचरणाय वारि गृह्णते। वारिरुहस्य पङ्कजस्य पत्रे दले इव लोचने यस्याः तस्याः सम्बुद्धिरियम्। दन्तिनः गजाः आह्निकम् अह्नो दिवसस्य योग्यं स्थानम्। निरातपं वनप्रदेशमित्यर्थः। अपास्य परित्यज्य आविभातचरणाय विभातादारभ्य यच्चरणं भक्षणं तस्मै। पर्याप्तमिति शेषः। वारि जलम्। गृह्णते उपाददते। 'ग्रह उपादाने' इति धातुः। पिबन्तीति यावत्। आह्निकस्य स्थानस्य मनोहरत्वमाह—सल्लकीविटपभङ्गवासितमिति। सल्लकी गजप्रिया।

गन्धिनी गजभक्ष्या तु सुवहा सुरभी रसा।
महेरणा कुन्दुरुकी सल्लकी ह्लादिनीति च।।

इत्यमरः। तस्या विटपानां ये भङ्गाः शकलानि तैर्वासितं सुरभीकृतम्। दन्तिनो हि सन्तततातपानि दिनानि शीतलेषु वनप्रदेष्वतिवाहयन्ति। सल्लकीशकलानि च कवलयन्ति। दिवसावसानेषु तु सरोवरमवगाह्य भक्षितानुरूपं जलं पिबन्ति। यथोक्तं पालकाप्ये—

आतपभीता नागा वनभुवि तरुषण्डमण्डिते कुहचित्।
अतिवाहयन्ति दिवसान् सलिलं गृह्णन्ति सन्ध्यासु।।

इति।।३३।।

पश्य पश्चिमदिगन्तलम्बिना
निर्मितं मितकथे! विवस्वता।
दीर्घया प्रतिमया सरोम्भसां
तापनीयमिव सेतुबन्धनम्।।३४।।

प्रकाशिका

पश्येति। तापनीयं तपनीयमयम्। पश्चिमदिगन्तलम्बित्वात् प्रतिमाया दीर्घत्वम्।।३४।।

विवरणम्

अत्यद्भुतमन्यच्च पश्येत्याह—

पश्येति मितकथे! पश्चिमदिगन्तलम्बिना विवस्वता दीर्घया प्रतिमया सरोम्भसां तापनीयं सेतुबन्धनं निर्मितम् इव पश्य। मिता स्वल्पा कथा यस्यास्तस्याः सम्बुद्धिरियम्। हे स्वल्पभाषिणीत्यर्थः। मितभाषितत्वमुत्तमनायिकाधर्मः। पश्चिमाया दिशः अन्ते अवसाने लम्बितुं शीलमस्येति तथा। अनेन प्रतिमाया दीर्घत्वे हेतुरुक्तः। विवस्वता सूर्येण कर्त्रा। दीर्घया सरसां पश्चिमदिग्भागादारभ्य पूर्वदिग्भागपर्यन्तं तरङ्गेषु दृश्यमानयेत्यर्थः। प्रतिमया प्रतिबिम्बेन करणभूतेन। सरसि यान्यम्भांसि तेषाम्। तपनीयं सुवर्णं तन्मयं सेतोर्बन्धनं कृतमिव। पश्य अवलोकय। पश्चिमदिगन्तावस्थिते विवस्वति वीचिभिन्नायतत्वप्रतिमाया दीर्घतया सरसां पूर्वभागपर्यन्तमवस्थितत्वाज्जले तपनीयमयसेतुर्निर्मित इव प्रतिभातीत्यर्थः।।३४।।

उत्तरन्ति विनिकीर्य पल्वलं
गाढपङ्कमतिवाहितातपाः।
दंष्ट्रिणो वनवराहयूथपा
दष्टभङ्गुरबिसाङ्कुरा इव॥३५॥

प्रकाशिका

उत्तरन्तीति। उच्चैर्देशप्राप्तिरुत्तरणम्। विनिकीर्य विक्षोभ्य। अत्रावगाढपङ्कत्वं हेतुः। दंष्ट्रिणः 'ब्रीह्यादिभ्यश्च' (५.२.११६) इतीनिः। इदमुत्प्रेक्षाया मूलम्। अयमर्थो रघुवंशेऽप्युक्तः 'स पल्वल' (२.१६) इत्यादिना।।३५।।

विवरणम्

वराहाणामवस्थानं दर्शयति—

उत्तरन्तीति। वनवराहयूथपाः अतिवाहितातपाः पल्वलं विनिकीर्य उत्तरन्ति। वने वर्तमानानां वराहाणां यूथं समूहं पान्ति रक्षन्तीति वनवराहयूथपाः। वराहाधिपतय इत्यर्थः। अतिवाहितः गमितः आतपः आतपसमयो यैस्तथाभूताः सन्तः। पल्वलं वेशन्तम्। 'वेशन्तः पल्वलं चाल्पसर' इत्यमरः। विनिकीर्य विक्षोभ्य उत्तरन्ति उन्नतं देशं गच्छन्ति निम्नात्। पल्वलप्रदेशादिति शेषः। अत्र यूथपानामुत्तरणवचनेन यूथानामप्युत्तरणमर्थादुक्तं भवति। आतपभीता वराहाः पल्वलेष्वातपसमयमतिवाह्य दिनावसाने पल्वलादुद्गच्छन्तीत्यर्थः। अयं च वराहाणां स्वभावः। उक्तं च रघुवंशे—'स पल्वलोत्तीर्णवराहयूथानि' इति। विनिकीर्य

पल्वलमिति यदुक्तं, तत्र हेतुमाह—गाढपङ्कमिति। गाढः पङ्को यस्मिस्तत्। परिपूर्णपङ्कमित्यर्थः। वराहयूथपानां स्वरूपविशेषमाह—दंष्ट्रिण इति। दंष्ट्राः सन्त्येषामिति दंष्ट्रिणः। ब्रीह्यादित्वादिनिः। दंष्ट्राद्वितयविद्योतमाना इत्यर्थः। अत एवोत्प्रेक्षते—दष्टभङ्गुरबिसाङ्कुराः इव इति। दष्टः सन्दष्टः भङ्गुरः भञ्जनशीलः बिसानां मृणालानामङ्कुरो यैस्ते तथा। बिसाङ्कुराणां धावल्यं निशिताग्रत्वं चोत्प्रेक्षाबीजम्। अत्र भङ्गुरशब्दो भक्षणसौकर्यं द्योतयन् बिसाङ्कुरदंशने हेतुमुद्घाटयति। अवसरे भक्षणार्थं गृहीतमृदुलमृणालाङ्कुरा इवेत्यर्थः।।३५।।

एष वृक्षशिखरे कृतास्पदो
जातरूपरसगौरमण्डलः।
हीयमानमहरत्ययातपं
पीवरोरु! पिबतीव बर्हिणः।।३६।।

प्रकाशिका

एष इति। वृक्षशिखरे कृतास्पद इत्यनेन 'आवासवृक्षोन्मुख-बर्हिणानि'-(रघु.२.१७) इत्यनुसंहितम्। जातरूपेति। हेमद्रवपीतबर्हमण्डलः। हीयमानमहरत्ययातपमित्यत्रेदमनुसन्धेयं—क्षीयमाणानां तेजसां प्रसराः सदृशेषु तेजोन्तरेषु प्रतिफलन्ति। तदानीं तानि तेजोन्तराणि क्षीयमाणांस्तेजःप्रसरान् गृह्णन्तीव प्रतिभान्ति। ततो जातरूपरसगौरमण्डलो बर्हिणः स्वसंक्रान्तं हीयमानमहरत्ययातपं पिबन्नुत्प्रेक्ष्यते। अमुमेवार्थमनुसन्धास्यति 'सिंहकेसरसटासु' (८.४६) इत्यादिना।।३६।।

विवरणम्

मयूराणामवस्थानं दर्शयति—

एष इति। पीवरोरु! वृक्षशिखरे कृतास्पदः एषः बर्हिणः अहरत्ययातपं पिबति इव। पीवरौ महान्तौ ऊरू यस्यास्तस्याः सम्बुद्धिः। वृक्षस्य शिखरे अग्रे। 'शिरोऽग्रं शिखरं वा ने'त्यमरः। कृतं विहितमास्पदं स्थानं येन स तथा। सन्ध्यामयमात्रमवलोक्य वृक्षाग्रे कृतावास इत्यर्थः। शिखण्डिनो हि दिवसावसानसमयादारभ्य प्रभातपर्यन्तं व्याघ्रादिभयादत्युन्नतेषु वृक्षाग्रेषु निवसन्ति। अत एवोक्तं रघुवंशे—'आवासवृक्षोन्मुखबर्हिणानी'ति[रघु.२.१७]। बर्हिणः बर्ही। 'मयूरो बर्हिणो बर्ही'त्यमरः। अह्नो दिवसस्य अत्यये अवसाने य आतपः तं पिबतीव। उत्प्रेक्षायां हेतुमाह—जातरूपरसगौरमण्डल इति। जातरूपं काञ्चनम्। 'चामीकरं जातरूपं महारजतकाञ्चने' इत्यमरः। तस्य रसो द्रवः तद्वद् गौरं पीतम्। 'गौरोऽरुणे सिते पीते' इत्यमरः। मण्डलशब्देन मण्डलवान् लक्ष्यते। सुवर्णद्रवपीतशिखण्डमण्डल

इत्यर्थः। हेत्वन्तरमप्याह—हीयमानमिति। प्रतिक्षणं परिक्षीयमाणम्। अत्र सुवर्णद्रवपीतेषु शिखण्डिशिखण्डमण्डलेषु तत्समानवर्णं दिनान्तातपं प्रतिफलितं प्रतिक्षणं परिक्षीयमाणं चावलोक्य अनेन पीयत इवायं दिनान्तातप इत्युत्प्रेक्ष्यते। शिखण्डमण्डलस्य दिनान्तातपतुल्यवर्णत्वं दिनान्तातपस्य परिक्षीयमाणत्वं चोत्प्रेक्षाबीजम्।।३६।।

पूर्वभागतिमिरप्रवृत्तिभि-
र्व्यक्तपङ्कमिव जातमेकतः।
खं हृतातपजलं विवस्वता
भाति किञ्चिदिव शोषवत् सरः॥३७॥

प्रकाशिका

पूर्वेति। प्राचीमूलप्रवृत्ततिमिरं विवस्वता संक्षिप्तातपजलमाकाशमेकतः स्फुटपङ्केन किञ्चिच्छुष्केण सरसा सदृशं प्रतिभातीत्यर्थः। नत्वेवमर्थस्थितौ पूर्व इवशब्दः प्रवृत्तिभिरिति शाब्दश्च हेतुरनुपादेयः। न। उत्प्रेक्षाया विवक्षितत्वात्। ननु पूर्वभागनिर्देशेनैवोत्प्रेक्ष्यमाणस्य व्यक्तपङ्कत्वस्याप्यर्थात् क्वाचित्कत्वसिद्धावेकत इत्यनुपादेयम्। न। वास्तवमुपमानभूतसरोविशेषणत्वमभिप्रेत्य प्रयुक्तत्वात्। तथा चार्थस्थितिर्दर्शिता। इवशब्दस्त्वत्र किञ्चिन्निरूप्यते। तस्य ह्युपमावाचित्वे सर इवेत्युपमाननिकट एव प्रयोगो मुख्यः। चादीनां हि निपातानां समुच्चेतव्यादिनिकटे प्रयोगो नियतः। तथा चोपपादितमाचार्येण महिम्ना (व्यक्तिविवेके क्रमभेदप्रसङ्गे २.३६ कारिकया)। इह तु सरोविशेषणस्य शोषवदित्यस्य यद् विशेषणमीषदर्थवाचि किञ्चिदिति, तन्निकटे प्रयोगः। स क्रमभेददुष्ट एव। अथ किञ्चिदित्यस्य किमपीत्यर्थः सरोविशेषणत्वं च, तर्हि तदेवानुपादेयम्, उपमायानुपयोगित्वात्। तस्मादिवशब्दस्य वाक्यालङ्कारार्थत्वं युक्तम्। यथा 'आवर्जिता किञ्चिदिव स्तनाभ्याम्' (कु.३.५४) इति। यथा वा 'मध्यं वयः किञ्चिदिव स्पृशन्ती'ति। तथा च खं किञ्चिदिव शोषवत् सरो भातीत्यन्वयः। विवस्वता हृतातपजलमित्युभयविशेषणमिति दक्षिणावर्तः। तदसत्। शोषवत्त्वस्य धर्मस्याधिक्यात्। अवस्थाभेदेन बहुत्वाद् प्रवृत्तिभिरिति बहुवचनम्।।३७।।

विवरणम्

सूर्यास्तमयावसरे गगनस्यावस्थानं दर्शयति—

पूर्वेति। विवस्वता हृतातपजलं खं किञ्चिदिव शोषवत् सरः भाति। विवस्वता आदित्येन। जलमिवातपः आतपजलम्। स्वच्छत्वमत्र साधारणधर्मः। हृतं

सङ्क्षिप्तम्। आतपजलं यस्य तादृशं खम् आकाशं किञ्चिदिव किमपि। इवशब्दो वाक्यालङ्कारे। यथा 'आवर्जिता किञ्चिदिव स्तनाभ्याम्' इत्यत्र 'मध्यं वयः किञ्चिदिव स्पृशन्ती'त्यत्र च। शेषोऽस्यास्तीति शेषवत् सरः। 'कासारः सरसी सर' इत्यमरः। भाति प्रतिभाति। देशान्तरं गन्तुकामेन विवस्वता सङ्क्षिप्तातपजलं व्योम किमप्यवशिष्टसलिलसरोरूपेण प्रतिभातीत्यर्थः। उत्प्रेक्षा चेयम्। ननु किमर्थमयमिवशब्दो वाक्यालङ्कारे निक्षिप्तः। सर इव भातीत्युपमैवास्तु। मैवम्। तस्योपमावाचित्वे सर इवेत्युपमाननिकटे प्रयोगस्यैव मुख्यत्वात्। यदाह महिमा—'चादीनां हि निपातानां समुच्चेतव्यादिसन्निधौ प्रयोगो नियत' इति। इह तु किञ्चिदित्यस्य शब्दस्य निकटे प्रायुङ्क्त। नापि किञ्चिदित्येतत् सरोविशेषणमपि। सरोविशेषणस्य शेषवदित्यस्य विशेषणत्वात्। तस्मादुपमापक्षेऽत्र क्रमभेददुष्ट एवायमिवशब्दः। न च गत्यन्तरे सम्भवति क्लिष्टार्थोपादानं युक्तम्। तस्मादयमिवशब्दो वाक्यालङ्कारार्थ एवेत्यलमनेन। उत्प्रेक्षान्तरविवक्षया खं विशिनष्टि—पूर्वभागतिमिरप्रवृत्तिभिः एकत व्यक्तपङ्कम् इव जातम् इति। पूर्वभागे प्राचीदिग्भागे यास्तिमिराणां प्रवृत्तयस्ताभिः। अत्र तिमिरप्रवृत्तीनामवस्थाभेदाद् बहुत्वम्। एकत एकस्मिन् भागे। व्यक्तं पङ्कं यस्य तथाभूतमिव जातम् आपन्नम्। भास्वति पश्चिमदिगन्तावस्थिते सति प्राचीदिगन्तप्रसृतैस्तिमिरैरेकस्मिन् भागे व्यक्तपङ्कमिव प्रतीयमानमित्यर्थः।।३७।।

आवसद्भिरुटजाङ्गणं मृगै-
र्मूलसेकसरसैश्च वृक्षकैः।
आश्रमाः प्रविशदग्निधेनवो
बिभ्रति श्रियमुदीरिताग्नयः॥३८॥

प्रकाशिका

आवसद्भिरिति। आवसद्भिरधितिष्ठद्भिः। उटजाङ्गणं पर्णशालापुरोभागम्। मूलसेकः सायंकालिकः, तेन सरसैः स्निग्धच्छायैः। वृक्षकैर्बालवृक्षैः। उदीरिताग्नयः प्रणीताग्नयः। अत्र श्रीभरणहेतवश्चत्वारः। तत्र शाब्दत्वेन द्वावुपादाय किमित्यार्थत्वेनान्यावुपात्तवानिति न ज्ञायते। प्रक्रमाभेदस्तु सुभगः।।३८।।

विवरणम्

मुनिजनाश्रमाणामपीदानीं शोभाधिक्यं जातमित्याह—

आवसद्भिरिति। आश्रमाः उटजाङ्गणम् आवसद्भिः मृगैः मूलसेकसरसैः वृक्षकैः च श्रियं बिभ्रति। उटजानां पर्णशालानाम् अङ्गणं पुरोभागम् आवसद्भिः

अधिवसद्भिः। क्रमेण पूर्यमाणत्वं वर्तमानप्रत्ययस्यार्थः। मृगैः एणैः। मूले यः सेकः सायङ्कालीनः, तेन सरसैः स्निग्धच्छायैः। वृक्षकैः अल्पार्थे कः। बालवृक्षैरित्यर्थः। चशब्दः समुच्चयार्थः। श्रियं शोभां बिभ्रति दधति। आश्रममृगा हि प्रभातसमयादारभ्य दिनान्तपर्यन्तं बहुलतृणेषु प्रदेशेषु चरन्तः सायमुटजाङ्गणेषु निवसन्ति। उटजाङ्गणमधितिष्ठद्भिर्नानावर्णैर्मृगैः सिक्तमूलतया स्निग्धच्छायैर्वृक्षैश्च मुनिजनाश्रमा नयनयोः प्रीतिं वितरन्तीत्यर्थः। इत्थं दृष्टानुसारिणीं शोभां हेतुद्वयेन प्रतिपाद्य अदृष्टानुसारिणीं शोभां हेतुद्वयेनाह—प्रविशदग्निधेनव इत्यादिना। प्रविशन्त्य आगच्छन्त्यः अग्निधेनवो होमधेनवो येषु ते तथा। अनेन होमवेलाप्रत्यासत्तिर्ध्वन्यते। अत्रापि पूर्वपदेन वर्तमानार्थः। तथा उदीरिताग्नयः उदीरिताः प्रणीताः गार्हपत्याहवनीयदक्षिणाग्नयो येषु ते तथा। अग्निहोमात् पूर्वकालीनमग्निप्रणयनं नाम वैदिकं कर्मानेनोच्यते। अनेन तत्तत्काले तत्तदनुष्ठानप्रतिपादनेन मुनीनां धन्यत्वं ध्वन्यते। अत्राश्रमाणां श्रीभरणे चत्वारो हेतवः। तत्राद्यं हेतुद्वयं दृष्टोपयोगि, द्वितीयं चादृष्टोपयोगीति विभागं दर्शयितुमाद्यहेतुद्वयं मृगैर्वृक्षैश्च शोभन्त इति शब्दत एव निर्दिष्टम्। अन्यत् पुनराश्रमविशेषणत्वेनार्थादिति न प्रक्रमभेददोषमावहति। नहि वैदिकोऽयमग्निहोत्रहोमो मृगागमनवृक्षसेचनतुल्यकक्ष्यः। ये मृगैर्वृक्षकैर्धेनुभिरग्निभिश्च श्रियं बिभ्रतीत्येकवाक्यता स्यादित्यलमतिविस्तरेण।।३८।।

बद्धकोशमपि तिष्ठति क्षणं
सावशेषविवरं कुशेशयम्।
षट्पदाय वसतिं ग्रहीष्यते
प्रीतिपूर्वमिव दातुमुत्तरम्॥३९॥

प्रकाशिका

बद्धेति। बद्धकोशं जातसङ्कोचम्। वसतिः प्रतिश्रयः। प्रीतिपूर्वमुत्तरं दातुमिव क्षणं सावशेषविवरं तिष्ठतीत्यन्वयः। सन्तो हि प्रतिश्रयार्थिने प्रीतिपूर्वमुत्तरं दातुं किञ्चित् स्फुरितामुखास्तिष्ठन्ति। अन्तरमिति क्वचित् पाठः।।३९।।

विवरणम्

पङ्कजानामवस्थां दर्शयति—

बद्धेति। कुशेशयं बद्धकोशमपि क्षणं सावशेषकुहरं तिष्ठति। कुशेशयं कमलम्। 'सहस्रपत्रं कमलं शतपत्रं कुशेशयमि'त्यमरः। बद्धः कोशो येन तद्

बद्धकोशम्। जातसङ्कोचमित्यर्थः। अपिशब्दो विरोधवाची। नहि जातसङ्कोचस्य पद्मस्य सावशेषकुहरत्वमुपपद्यते। तथापि क्षणं क्षणकालं सावशेषम् अवशेषसहितं कुहरं बिलं यस्य तथाभूतं सत् तिष्ठति। 'कुहरं विवरं बिलमि'त्यमरः। सकलमपि पङ्कजकुलम् आसन्नसन्ध्यत्वाज्जातसङ्कोचमपि रविकिरणानामत्यन्तविनाशाभावात् क्षणकालं किञ्चिदवशिष्टबिलं तिष्ठतीत्यर्थः। पङ्कजानां तथावस्थाने हेतुमुत्प्रेक्षते—वसतिं ग्रहीष्यते षट्पदाय प्रीतिपूर्वम् उत्तरं दातुम् इव इति। वसतिमावासस्थानं ग्रहीष्यते ग्रहीतुमारब्धवते। ऌटः शत्रादेशः। षट्पदाय भ्रमराय। प्रीतिपूर्वमिति दानक्रियाविशेषणम्। प्रीतिः पूर्वं यथा भवति तथा। आदरपूर्वमित्यर्थः। उत्तरं प्रतिवचनं दातुमिव। सन्तो हि गृहागतेभ्यः पान्थेभ्यस्तदभ्यर्थनात् पूर्वमेव तद्विवक्षितस्य वाक्यस्य प्रतिवचनं दातुं किमपि विकसितमुखाम्बुजास्तिष्ठन्ति। अन्तरमिति पाठे प्रीतिपूर्वमवकाशं दातुमिवेत्यर्थः। विवृतकुहरेषु सरसिजेषु षट्पदप्रवेश उत्प्रेक्षामूलम्।।३९।।

दूरमग्नपरिमेयरश्मिना
वारुणी दिगरुणेन भानुना।
भाति केसरवतेव मण्डिता
बन्धुजीवतिलकेन कन्यका।।४०।।

प्रकाशिका

दूरेति। दूरावनतत्वात् सङ्ख्येयरश्मिना।।४०।।

विवरणम्

मार्ताण्डमण्डलमण्डितां पश्चिमामाशां दर्शयति—

दूरेति। वारुणी दिक् दूरमग्नपरिमेयरश्मिना अरुणेन भानुना भाति। वारुणी वरुणसम्बन्धिनी दिक् पश्चिमाशा दूरमत्यन्तं मग्नेन अवनतेन अत एव परिमेयरश्मिना परिमेयाः सङ्ख्येया रश्मयो यस्य तेन। आसन्नास्तमयत्वेनात्यन्तावनतत्वात् सङ्ख्येयरश्मिजालेनेत्यर्थः। अरुणेन रक्तवर्णेन भानुना आदित्येन भाति शोभते। अत्रोत्प्रेक्षामाह—केसरवता बन्धुजीवतिलकेन मण्डिता कन्यका इव इति। केसराः किञ्जल्का अस्य सन्तीति केसरवान्, तेन। बन्धुजीवतिलकेन। बन्धुजीव इति रक्तवर्णः कुसुमविशेषः। तन्मयेन तिलकेन। मण्डितालङ्कृता कन्यका कुमारीव अत्र। रश्मिप्रतिवस्तुत्वेन केशराणामुपादानम्।।४०।।

सामभिः सहचराः सहस्रशः
स्यन्दनाश्वहृदयङ्गमस्वनैः।
भानुमग्निपरिकीर्णतेजसं
संस्तुवन्ति किरणोष्मपायिनः॥४१॥

प्रकाशिका

सामभिरिति। सहचरा बालखिल्यादयः। सहस्रशः सहस्रम्। अग्नौ परिकीर्ण निक्षिप्तं तेजो येन। किरणोष्मपायिन इति तपोविशेष उक्तः। अस्मिन्नर्थे सर्वत्र श्रुतिः किल मूलम्।।४१।।

विवरणम्

सूर्यसहचराणां बालखिल्यादीनामस्तमयसमुचितां स्तुतिं दर्शयति—

सामभिरिति। सहस्रशः सहचराः अग्निपरिकीर्णतेजसं भानुं सामभिः संस्तुवन्ति। सहस्रशः सहस्रसङ्ख्यायुक्ता इत्यर्थः। सहैव चरन्तीति सहचराः बालखिल्यादयः। अग्नौ परिकीर्णं निक्षिप्तं तेजो येन तम्। आदित्यो रात्रावग्निं प्रविशतीति श्रुतिप्रसिद्धिः। उक्तं च रघुवंशे—'दिनान्ते निहितं तेजः सवित्रेव हुताशनः' (४.१) इति। भानुम् आदित्यं सामभिः सामवेदैः सम्यक् स्तुवन्ति। स्तुतौ सम्यक्त्वं नामाक्षरस्वरमात्रादीनामन्यूनानधिकत्वम्। बालखिल्यादयो हि सन्ततमादित्यगमनानुसारेणैव गच्छन्ति। ऋग्भिः प्रभाते संस्तुवन्ति, यजुर्भिर्मध्याह्ने, सामभिः सन्ध्यायामिति च श्रुतिप्रसिद्धम्। साम्नां स्वरप्रधानत्वाद् बालखिल्यादीनां स्वरमाधुर्यं प्रदर्शयन् सामानि विशिनष्टि—स्यन्दनाश्वहृदयङ्गमस्वनैरिति। स्यन्दने सूर्यरथे ये अश्वाः वाजिनः तेषां हृदयङ्गमाः मनोहारिणः स्वना येषां तैः। स्यन्दनाश्वानां गानाकर्णनकुतूहलं तदिङ्गितैरवधार्यत इत्यर्थः। बालखिल्यानां तपोविशेषमहिमानमाह—किरणौष्ण्यपायिन इति। किरणानां रविकिरणानाम् औष्ण्यं पातुं शीलमेषामिति तथा। रविकिरणोष्मणैव शरीरवृत्तिं कुर्वन्त इत्यर्थः। अयमपि तपोविशेषः। श्रुतिप्रसिद्धः।।४१।।

सोऽयमानतशिरोधरैर्हयैः
कर्णचामरविघट्टितेक्षणैः।
अस्तमेति युगभुग्नकेशरैः
सन्निधाय दिवसं महोदधौ॥४२॥

प्रकाशिका

सोऽयमिति। गगनावतरणवशाद्धयानामानतशिरोधरत्वम्। ततश्चान्ये विशेषणे। युगस्य स्वस्थानच्युतत्वात् केसराणां कुटिलत्वम्। सन्निधायेत्याद्युत्प्रेक्षागर्भमभिधानम्।।४२।।

विवरणम्

रवेरस्तमयप्रकारमेव वर्णयति—

सोऽयमिति। सः अयं दिवसं महोदधौ सन्निधाय आनतशिरोधरैः हयैः अस्तम् एति। सः यो बालखिल्यादिभिः स्तुत स इत्यर्थः। अयमिति सहस्तनिर्देशं वचनम्। आनतः अधःप्रदेशगमनवशात् सन्नतः शिरोधरो ग्रीवा येषां तादृशैः हयैः अश्वैः अस्तप्राप्तिसाधनभूतैः दिवसम् अहः महोदधौ समुद्रे सन्निधाय स्थापयित्वा अस्तमेति अदर्शनं प्राप्नोति। अस्तमित्यदर्शनेऽव्ययम्। 'अस्तमदर्शने' इति सिंहः। अस्ताचलं वा। बालखिल्यादिभिः स्तूयमानो रविरयमुन्नताद् गगनप्रदेशादधःप्रदेशावतरणवशादवनतशिरोधरैर्हयैरस्तं यातीत्यर्थः। दिवसं महोदधौ सन्निधायेत्युत्प्रेक्षागर्भमभिधानम्। महोदधिमात्रे रविकिरणदर्शनमुत्प्रेक्षाहेतुः। दिवसं दृश्यमानमन्दातपे समुद्रे निक्षिप्येवेत्यर्थः। अथाश्वानामानतशिरोधरत्वहेतुकं विशेषणद्वयमाह—कर्णचामरविघट्टितेक्षणैः। कर्णयोरलङ्कारार्थं बद्धे ये चामरे ताभ्यां विघट्टिते अभिहते ईक्षणे विलोचने येषां तैः। आनतशिरोधरत्वेन हेतुना कर्णावसक्तचामराभिहतनेत्रैरित्यर्थः। तथा युगभुग्नकेशरैः युगेन हेतुना भुग्नाः कुटिलाः केसराः स्कन्धरोमाणि येषां तैः। स्कन्धावस्थितस्य युगस्य दूरावतरणवशेन स्वस्थानात् च्युतत्वात् तत्सन्निवेशविशेषेण कुटिलस्कन्धरोमभिरित्यर्थः। अत्राश्वानामवतरणस्वभावोक्त्या स्वभावोक्तिः।।४२।।

खं प्रसुप्तमिव संस्थिते रवौ
तेजसो महत ईदृशी गतिः।
तत् प्रकाशयति यावदुत्थितं
मीलनाय खलु तावतश्च्युतम्।।४३।।

प्रकाशिका

खमिति। प्रसुप्तमिव, तमसा संवृतत्वात्। संस्थितेऽस्तमिते। ईदृशी वक्ष्यमाणप्रकारा। गतिः स्वभावः। तद् महत् तेजः। यावद् यत्प्रमाणम्। तावतस्तत्प्रमाणस्य। च्युतमस्तमितम्। दक्षिणावर्तस्तु—'यद्यप्ययमर्थस्तेजोमात्र-

सुलभस्तथापि प्रकृतं रविमपेक्ष्य महत इति विश।५७।मि’त्याह। तन्न। यतोऽर्थान्तरे सामान्यरूपेऽन्वितं यद् विशेषणं तत् प्रकृतं विशेषमेव विशेषयतीति न युक्तम्। किञ्च महत एव तेजसोऽपाये तावतो मीलनं भवति। अल्पस्य त्वपाये तादृशान्येनापि प्रकाशः संभवति।।४३।।

विवरणम्

आदित्यास्तमये जातं विशेषमाह—

खमिति। रवौ संस्थिते खं प्रसुप्तमिव। रवौ आदित्ये। संस्थिते अस्तमित इत्यर्थः। खम् आकाशं प्रसुप्तं प्रकर्षेण सुप्तं स्वापमुपगतमिव। भवतीति शेषः। अस्तमिते रवौ व्योमप्रदेशस्तमसा संवृतत्वान्निष्प्रभो भवतीत्यर्थः। उक्तमर्थमर्थान्तरन्यासेन समर्थयते—महतः तेजसः गतिः ईदृशी इति। महतः अत्युत्कृष्टस्य तेजसः गतिः स्वभावः ईदृशी वक्ष्यमाणप्रकारा। वक्ष्यमाणप्रकारविशिष्टत्वं महतस्तेजसो नियतमित्यर्थः। तमेव प्रकारमाह—तद् उत्थितं यावत् प्रकाशयति च्युतं तावन् मीलनाय खलु इति। तद् महत् तेजः उत्थितमुदितं यद् यावद् यत्प्रमाणं प्रकाशयति अभिद्योतयति च्युतं अस्तमितं सत् तावतः तत्प्रमाणस्य मीलनाय अप्रकाशनाय। पर्याप्तं भवतीति शेषः। खलुशब्दः प्रसिद्धौ। महत्तरं तेजः समुत्थितं सद् यावन्तमर्थजातं प्रकाशयति, अस्तमितं तु तत् तावतोऽर्थजातस्य मीलनाय पर्याप्तं भवतीति भावः।।४३।।

सन्ध्ययाप्यनुपदं रवेः पदं
धर्म्यमस्तशिखरे समर्पितम्।
प्राक् तथेयमुदये पुरस्कृता
नानुयास्यति कथं तमापदि।।४४।।

प्रकाशिका

सन्ध्ययेति। अनुपदमन्वगित्यर्थः। धर्म्यं धर्मोपेतम्। एतच्च विशेषणं नायिकात्वारोपपिशुनम्। अस्तो गिरिविशेषः। रवेरनुपदं सन्ध्ययाप्यस्तशिखरे पदं समर्पितमित्यन्वयः। प्रागित्यादि श्लेषगर्भो हेतूपन्यासः। उदयः संपदपि। पुरस्कारः पूजापि। अत्र समासोक्तिरलङ्कारः। शृङ्गाराभासव्यवहारस्त्वत्र भोजदृशा। अस्माभिस्त्वनौचित्यप्रवृत्तानां रसादीनामाभासत्वमिष्यते।।४४।।

विवरणम्

सन्ध्याकालोऽपि सम्प्राप्तं इत्याह—

सन्ध्ययेति। सन्ध्यया अपि रवेः अनुपदम् अस्तशिखरे पदं समर्पितम्। सन्ध्ययापीत्यपिशब्दस्य न केवलं रविणेत्यर्थः। रवेः आदित्यस्य अनुपदं पश्चादित्यर्थः। अस्तशिखरे अस्तगिरेः शिखरे पदं पादः समर्पितं न्यस्तम्। यदा रविरस्तमयोन्मुखस्तदुचितं प्रदेशमधिवसति, तदा सन्ध्ययापि तस्मिन्नेव प्रदेशे पादविन्यासः कृत इत्यर्थ। युक्तं चैतदित्याह—धर्म्यमिति। धर्मादनपेतं यथा भवति तथेत्यर्थः। एतच्च क्रियाविशेषणम्। इदं नायिकात्वारोपसूचकम्। निधनेऽपि पतिमार्गानुसारित्वं हि नायिकाधर्मः। धर्म्यत्वमेव श्लेषगर्भेण हेतुनोपपादयति—प्राग् उदये तथा पुरस्कृता इयम् आपदि तं कथं न अनुयास्यति। प्रागितः पूर्वं सर्वदापि। आदित्यपक्षे स्वोदयसमये, नायकपक्षेऽभ्युदये सम्पदीत्यर्थः। तथा लोकोत्तरेण प्रकारेणेत्यर्थः। पुरस्कृता अग्रतः कृता पूजिता च। इयं सन्ध्या नायिका च। आपदि अस्तमये विपदि च। तम् आदित्यं नायकं च। आपदि अस्तमये विपदि च। तम् आदित्यं नायकं च। कथं नानुयास्यति, अनुयास्यत्येवेत्यर्थः। आदित्येन स्वोदयसमये सन्ध्या पुरस्क्रियते, आदित्योदयपूर्वभावित्वात् पूर्वसन्ध्यायाः। 'विचेयतारकः कालः सन्ध्या सूर्योदयावधिः' इति स्मृतेः। अर्धास्तमयादारभ्य नक्षत्रदर्शनावधिका पुनरपरसन्ध्या। 'यावन्नक्षत्रदर्शनमि'ति स्मृतेः। अत्र समासोक्तिरलङ्कारः।।४४।।

रक्तपीतकपिशाः पयोमुचां
कोटयः कुटिलकेशि! भान्त्यमूः।
द्रक्ष्यसि त्वमिति वेलयानया
वर्तिकाभिरिव साधु वर्तिताः॥४५॥

प्रकाशिका

रक्तेति। वर्तिकाभिस्तूलिकाभिः। वर्तिता बिन्यस्तरागविशेषाः।।४५।।

विवरणम्

सन्ध्यारागमेव वर्णयति—

रक्तेति। कुटिलकेशि! पयोमुचां कोटयः अमूः रक्तपीतकपिशाः भान्ति। कुटिला वक्राः केशा यस्यास्तस्याः सम्बुद्धिः। 'स्वाङ्गाद्—'(४.१.५४) इत्यादिना ङीष्। पयोमुचां मेघानां कोटयः पङ्क्तयः। अमूः इति सहस्तनिर्देशं वचनम्। रक्ता रक्ताम्बुजतुल्यवर्णा। 'रक्तः शोणः कोकनदच्छविरि'त्यमरः। पीता हरिद्रातुल्यवर्णाः। 'पीतो गौरो हरिद्राभ' इत्यमरः। कपिशाः कृष्णलोहितवर्णाः। 'श्यावः स्यात् कपिशो धूम्रधूमलौ कृष्णलोहित' इत्यमरः। भान्ति शोभन्ते। जलधरा एते नानावर्णा

भासन्ते। तान् पश्येत्यर्थः। नानावर्णतयावस्थाने हेतुमुत्प्रेक्षते—त्वं द्रक्ष्यसि इति अनया वेलया वर्तिकाभिः साधु वर्तिताः इव इति। त्वं पश्यसीति हेतोः अनया वेलया सन्ध्यया वर्तिकाभिः तूलिकाभिः साधु सम्यग् यथा भवति तथा वर्तिता विन्यस्तरागविशेषा इव। उत्कृष्टस्त्रीनिकटगमने हि स्त्रीभिरलङ्कृताभिर्भवितव्यमिति हेतोरिवेत्यर्थः। अनया वेलयेति सन्ध्यायां प्रसाधिकात्वारोपपूर्वको व्यवहारः।।४५।।

सिंहकेसरसटासु भूभृतां
पल्लवप्रसविषु द्रुमेषु च।
पश्य धातुशिखरेषु भानुना
संविभक्तमिव सान्ध्यमातपम्॥४६॥

प्रकाशिका

सिंहेति। केसराणि श्मश्रुरोमाणि, सटाः स्कन्धरोमाणीति दक्षिणावर्तः। केशवस्तु तौ पर्यायावाह। तत्पक्ष एव हि युगभुग्नकेसरत्वं सुघटम्। तदत्र सटा समूहः। भूभृतामिति सन्ध्यातपसम्बन्धहेतुमुन्नतदेशस्थितिं द्योतयन् सर्वशेषः।।४६।।

विवरणम्

सन्ध्यातपो विगतप्राय इत्याह—

सिंहेति। सान्ध्यम् आतपं पश्य। सान्ध्यं सन्ध्याकालभवम् आतपं रविकिरणं पश्य। सन्ध्यातपमुत्प्रेक्षते—भानुना भूभृतां सिंहकेशरसटासु पल्लवप्रसविषु द्रुमेषु धातुशिखरेषु च संविभक्तम् इव इति। सन्ध्यातपानामत्युन्नतप्रदेशेष्वेवावस्थानोपपत्तेरत्र भूभृतामिति शब्दस्त्रिष्वपि स्थानेषु योजनीयः। भानुना आदित्येन। भूभृतां पर्वतानाम्। सम्बन्धषष्ठी चेयम्। सिहानां केसरसटासु स्कन्धरोमावलीषु। पर्वतोपरि वर्तमानानां सिंहानां रक्तवर्णेषु स्कन्धरोमसमूहेष्वित्यर्थः। पल्लवप्रसविषु किसलयपुष्पवत्सु द्रुमेषु वृक्षेषु। पर्वतसम्बन्धिनां वृक्षाणां रक्तेषु पल्लवपुष्पेषु चेत्यर्थः। धातुप्रचुरेषु शिखरेषु। गैरिकपूरितेषु शृङ्गेष्वित्यर्थः। संविभक्तं सम्यग् विभक्तम्। विभज्य दत्तमिवेत्यर्थः। एकेन हि बहुभ्यो दीयमानं वस्तु परिक्षीयमाणं भवतीति भावः।।४६।।

पार्ष्णिमुक्तवसुधास्तपस्विनः
पावनाम्बुरचिताञ्जलिक्रियाः।
ब्रह्म गूढमभिसन्ध्यमादृताः
शुद्धये विधिविदो गृणन्त्यमी॥४७॥

प्रकाशिका

पार्ष्णीति। पादाग्रस्थिता इत्यर्थः। जलाद्यञ्जलिदाने तथा स्थितिः प्रसिद्धा, यथा 'पादाग्रस्थिततया' (रत्नावली.१.१) इत्यादौ। पार्ष्णिमुक्तवसुधत्वं प्राणायामवशादिति केचित्। पावनाम्बुरचिताञ्जलिक्रिया इति पाठः। ब्रह्म वेदम्। गूढमुपांशु। अभिसन्ध्यं सन्ध्यामुद्दिश्य। शुद्धये नित्यानुष्ठानं ह्यात्मशुद्धिफलम्। इदं च प्रस्तावकं वक्ष्यमाणस्य देवकर्तृकस्य सन्ध्यावन्दनस्य।।४७।।

विवरणम्

द्विजानां सन्ध्यावन्दनमप्यारब्धमित्याह—

पार्ष्णीति। अमी तपस्विनः ब्रह्म अभिसन्ध्यं गूढं गृणन्ति। तपोऽस्त्येषामिति तपस्विनः। 'अस्मायामेधास्रजो विनिः' (५.२.१२१)। इदं च विहितकालानतिक्रमे हेतुः। ब्रह्म वेदम्। सावित्रीमुचमित्यर्थः। अभिसन्ध्यं सन्ध्यामुद्दिश्य। गूढमिति क्रियाविशेषणम्। उपांशु यथा भवति तथा। गृणन्ति उच्चरन्ति। एते तपस्विनः सावित्रीमृचं सन्ध्यामुद्दिश्योपांशूच्चरन्तीत्यर्थः। सन्ध्योपासनस्य फलमाह—शुद्धय इति। आत्मशुद्धय इत्यर्थः। नित्यानुष्ठानं ह्यन्तःकरणशुद्धिफलम्। सन्ध्योपासनस्य पूर्वकालीनं जलाञ्जलिदानं सप्रकारमाह—पार्ष्णिमुक्तवसुधाः पावनाम्बुरचिताञ्जलिक्रिया इति। पार्ष्णिभ्यां गुल्फयोरधोभागाभ्यां परित्यक्ता वसुधा भूमिर्यैस्ते तथा। पार्ष्णिभ्यां वसुधां मुक्त्वा पादाग्रमात्रावस्थिता भूत्वेत्यर्थः। पावनैः विशुद्धैः अम्बुभिः रचिता कृता अञ्जलिक्रिया जलाञ्जलिदानरूपा क्रिया यैस्तथा। जलाद्यञ्जलिदाने पादाग्रमात्रेणावस्थितिः प्रसिद्धा, यथा 'पादाग्रस्थितये'त्यादौ। तपस्विनां विहितानुष्ठाने हेतुमाह—आदृता इति। कृतादराः। कृतबहुमाना इत्यर्थः। बहुमाने हेतुमाह—विधिविद इति। विधिमर्थवादाद्युपबृंहितं विधिवाक्यं विदन्तीति तथा। वेदार्थवेदिन इत्यर्थः। अयं च श्लोको वक्ष्यमाणस्य देवकर्तृकस्य सन्ध्यावन्दनस्य प्रस्तावकत्वेनोक्तः।।४७।।

तन्मुहूर्तमनुमन्तुमर्हसि
प्रस्तुताय नियमाय मामपि।
त्वां विनोदनिपुणः सखीजनो
वल्गुवादिनि! विनोदयिष्यति।।४८।।

प्रकाशिका

तदेव प्रस्तौति—

तदिति। प्रस्तुताय तपस्विभिरारब्धाय। नियमाय नियमं कर्तुम्। मामपि नियमायानुमन्तुमर्हसि मयापि नियमो यथानुष्ठीयते तथानुमन्तुमर्हसीत्यर्थः। विनोदयिष्यति विनोदं कारयिष्यति। विनोदश्च सुखेन कालयापनम्।।४८।।

विवरणम्

देवकर्तृकं सन्ध्यावन्दनमेव प्रस्तौति—

तदिति। तत् त्वं प्रस्तुताय नियमाय माम् अपि मुहूर्तम् अनुमन्तुम् अर्हसि। तद्, यस्मादेतैः सन्ध्यावन्दनमारब्धं तस्मादित्यर्थः। अनेन कालातिपातो मा भूदिति ध्वन्यते। प्रस्तुताय तपस्विभिरारब्धाय नियमाय नियमं कर्तुम्। मामपि, यथा तपस्विभिरयं नियमोऽनुष्ठीयते तथा मयापि कर्तव्योऽयं विधिरित्यर्थः। मुहूर्तं क्षणकालम्। यथैते मुनयश्चिरकालं सन्ध्यामुपासते, अहं तु त्वद्विरहासहिष्णुतया न तथेत्यर्थः। अनुमन्तुम् अनुज्ञातुम् अर्हसि योग्या भवसि। ननु त्वद्वियोगविधुराया मम तदानीं का गतिः, अत आह—वल्गुवादिनि! (विनोदनिपुणः) सखीजनः त्वां विनोदयिष्यतीति। वल्गु सुन्दरं यथा भवति तथा वदितुं शीलमस्या इति तथा। अनेन परस्परसंल्लापकौशलं द्योत्यते। अत एव विनोदनिपुण इति सखीजनविशेषणम्। विनोदे सुखेन कालयापने विदग्धः सखीजनः सखीसमाजः विनोदयिष्यति विनोदं कारयिष्यति। सखीसमाजः परस्परसंल्लापादिभिस्तव सुखेन कालयापनं कारयिष्यत्येव मा खिद इति भावः।।४८।।

निर्विभुज्य दशनच्छदं ततो
वाचि भर्तुरवधीरणापरा।
शैलराजतनया समीपगा-
माललाप विजयामहेतुकम्।।४९।।

प्रकाशिका

निर्विभुज्येति। निर्विभुज्य कुटिलीकृत्य। दन्तैरधरमवष्टभ्येत्यर्थः। एतच्चासूयाव्यञ्जकम्। अवधीरणाऽनादरः। समीपगां नित्यासन्नाम्। विजयेति देव्याः सखी। अहेतुकं प्रस्तावशून्यम्। अयं च बिब्वोको नाम भावः। 'गर्वाभिमानादिष्टेऽपि बिब्वोकोऽनादरक्रिये'ति। अनादरकार्यमनिमित्तं सम्भाषणं सख्या।।४९।।

विवरणम्

इत्थमुक्त्वा देवे सन्ध्योपासनार्थं गते देव्याः प्रवृत्तिमाह—

निर्विभुज्येति। ततः शैलराजतनया दशनच्छदं निर्विभुज्य समीपगां विजयाम् अहेतुकम् आललाप। ततः भगवतः सन्ध्यावन्दनप्रयाणानन्तरं शैलराजतनया

पार्वती दशनच्छद्रम् अधरं निर्विभुज्य कुटिलीकृत्य। दन्तैरधरमवष्टभ्येत्यर्थः। अनेनासूया व्यज्यते। समीपगां नित्यासन्नाम्। विजयां विजयाख्यां सखीम्। अहेतुकमिति क्रियाविशेषणम्। हेतुशून्यं यथा भवति तथा आललाप उक्तवती। अत्राहेतुकमित्यनेनासूयायां हेत्वभाव उक्तः। प्रणयमात्रहेतुकत्वं च द्योत्यते। देवे सन्ध्यां प्रणमति सति सन्ध्यायाः स्त्रीत्वादन्यवधूप्रणाममसहमाना देवी सासूयं प्रियवयस्यामुक्तवतीत्यर्थः। अधरदंशनेन सूचितामसूयां वचनेऽपि सूचयामासेत्याह—वाचि भर्तुः अवधीरणापरा इति। वाचि वचने न मनसीत्यर्थः। भर्तुः प्रियतमस्य। अनेन कोपस्य प्रणयमात्रहेतुत्वमुक्तम्। अवधीरणायामनादरे परा तत्परा। अनादरस्य कार्यं प्रियसखीं प्रत्यनिमित्तसम्भाषणम्। भर्तर्यनादरद्योतकं वचनं प्रियसखीं प्रति व्याजहारेत्यर्थः। अनेन श्लोकेन बिब्बोको नाम भावः प्रतिपादितः। यथोक्तं—'गर्वाभिमानादिष्टेऽपि बिब्बोकोऽनादरक्रिया' इति।।४९।।

ईश्वरोऽपि दिवसात्ययोचितं
मन्त्रपूर्वमनुतस्थिवान् विधिम्।
पार्वतीमवनतामसूयया
प्रत्युपेत्य पुनराह सस्मितम्॥५०॥

प्रकाशिका

ईश्वर इति। मन्त्रपूर्वमित्यनेन किञ्चित्कालविलम्बं द्योतयति। अवनतामवाङ्मुखीम्। असूयया सन्ध्यावन्दनजनितया। स्मितं तु तवासूयेयमस्थान इत्युपालम्भपरम्। अनेनाचरितेन 'रागी वीतरागो वा नाचारं लङ्घयेदि'ति लोकसंशिक्षणमाचरति देवः।।५०।।

विवरणम्

अथ रसानुसारी महाकविरालपनप्रकाराणां साक्षाद् रसानुगुणत्वाभावात् तानुपेक्ष्य देवस्यानुसरणप्रकारमेव वक्तुमुपक्रमते—

ईश्वर इति। ईश्वरः अपि दिवसात्ययोचितं विधिं मन्त्रपूर्वम् अनुतस्थिवान् असूयया अवनतां पार्वतीं प्रत्युपेत्य पुनः सस्मितम् आह! ईश्वरोऽपीति त्रैलोक्याधिपतित्वात् तदुपास्याया देवताया अभावेऽपीत्यर्थः। तेन च रागिभिरपि मोहाद् विहितकर्मपरित्यागो न कर्तव्य इति लोकशिक्षार्थत्वं सन्ध्यानुष्ठानस्य द्योत्यते। दिवसात्यये सध्यायाम् उचितं योग्यं विधिं विधानम्। मन्त्रपूर्वमित्यनुष्ठानक्रियाविशेषणम्। मन्त्रपूर्वं यथा भवति तथा अनुतस्थिवान् अनुष्ठितवान् सन्। अनेन मन्त्रोच्चारणमात्रेणैव कालविलम्ब इति ध्वन्यते, तेन च विरहासहत्वम्।

असूयया, सन्ध्यावन्दनसम्भूतयेति शेषः। अवनताम् अवाङ्मुखीं पार्वतीं प्रत्युपेत्य प्रत्यागम्य। पुनः पुनरपीत्यर्थः। पूर्वमपि भगवद्वचनस्य प्रकृतत्वात्। सस्मितं स्मितसहितं यथा भवति तथा आह उक्तवान्। अस्थाने तवेयमसूयेति स्मितेन द्योत्यते। तच्चोपालम्भे पर्यवस्यति। आहेति तिङ्प्रतिरूपकं भूतार्थेऽव्ययमित्युक्तमसकृत्। देवः सन्ध्याकालोचितं कर्म त्वरितं विधाय सन्ध्यावन्दनजनितयासूययानतवदनां देवीं प्रत्यागम्य पुनरपि सस्मितमुवाचेत्यर्थः।।५०।।

मुञ्च कोपमनिमित्तकोपने!
सन्ध्यया प्रणमितोऽस्मि नान्यथा।
किं न वेत्सि सहधर्मचारिणं
चक्रवाकसमवृत्तिमात्मनः॥५१॥

प्रकाशिका

मुञ्चेति। अनिमित्तकोपन इति स्मितसूचित उपालम्भः। नान्यथा न कामाभिसन्धिना, किन्तु धर्माभिसन्धिनेत्यर्थः। कथमेवं जानीयामित्याह—किं न वेत्सीति। तव सहधर्मचारिणं चक्रवाकसमवृत्तिं जानास्येवेत्यर्थः। चक्रवाका ह्येकजानयः प्रसिद्धाः।।५१।।

विवरणम्

वचनप्रकारमेवाह—

मुञ्चेति। अनिमित्तकोपने! त्वं कोपं मुञ्च। अनिमित्तं निमित्तरहितं यथा भवति तथा कोपं कर्तुं शीलं अस्या इति तथा। अनया सम्बुद्ध्या स्मितसूचितमुपालम्भमेव वाचि निवेशितवानित्यवसेयम्। त्वं कोपं मुञ्च परित्यज। निमित्तराहित्यात् परित्याज्य एवायं कोप इति भावः। कथं निमित्ताभावः, अत आह—अहं सन्ध्यया प्रणमितः अस्मि इति। सन्ध्यया प्रणमने प्रयोजककर्त्र्या प्रणमितः प्रकर्षेण नमितः नमनं कारितोऽस्मि। 'णमु प्रह्वत्वे' इति धातोर्णिचि निष्ठा। मान्तत्वाद् वृध्द्यभावः। सन्ध्याप्रणमनमेव मया कृतम्। कस्तव कोपावकाश इति भावः। ननु सन्ध्यया प्रणमितोऽसीति मया ज्ञातमेव। अत एव मे कोप इत्यत्राह—अन्यथा नेति। यथा त्वया कामापेक्षयेति कल्पितं, तथा न, अपि तु धर्मपिक्षयैवेत्यर्थः। ननु तत्र किं प्रमाणमित्यत्राह—त्वम् आत्मनः सहधर्मचारिणं चक्रवाकसमवृत्तिं न वेत्सि किम् इति। आत्मनः तवेत्यर्थः। सहधर्मचारिणं सहचरं चक्रवाकेण समा तुल्या वृत्तिर्यस्य तम्। न वेत्सि किं, जानास्येवेत्यर्थः। त्वं सर्वदा त्वया सहैव वर्तमानं मां चक्रवाकतुल्यधर्माणं किं न जानासि। जानास्येवेत्यर्थ। चक्रवाको ह्येकजानिः

जायावियोगकातरश्चेति प्रसिद्धम्। उक्तं च रघुवंशे—'रथाङ्गनाम्नोरिव भावबन्धनम्' (३.२४) इति।।५१।।

निर्मितेषु पितृषु स्वयम्भुवा
या तनुः सुतनु! पूर्वमुज्झिता।
सेयमस्तमुदयं च सेवते
तेन मानिनि! ममात्र गौरवम्।।५२।।

प्रकाशिका

अभिसंहिते धर्मे गौरवमाह—

निर्मितेष्विति। अत्र भविष्यत्पुराणवचनं—

> पितामहः पितॄन् सृष्ट्वा मूर्तिं तामुत्ससर्ज ह।
> सा प्रातः सायमागत्य सन्ध्यारूपेण पूज्यते।।
>
> एनां सन्ध्यां यतात्मानो ये तु दीर्घमुपासते।
> दीर्घायुषो भविष्यन्ति नीरुजाः पाण्डुनन्दन!।।

इति।।५२।।

विवरणम्

जगद्गुरोरप्यात्मनः सन्ध्यायां गौरवे हेतुमाह—

निर्मितेष्विति। मानिनि! सुतनु! स्वयम्भुवा पितृषु निर्मितेषु या तनुः पूर्वम् उज्झिता सा इयम् अस्तम् उदयं च सेवते। स्वयम्भुवा ब्रह्मणा पितृषु अग्निष्वात्तादिषु निर्मितेषु सत्सु या तनुः शरीरं पूर्वम्, इदानीं विद्यमानस्य शरीरस्य ग्रहणात् पूर्वमित्यर्थः। उज्झिता त्यक्ता सेयं तनुः अस्तम् अस्तमयपर्वतम् उदयम् उदयपर्वतं च सेवते। ब्रह्मा पितृसर्गानन्तरं तत्सृष्टिकर्तृभूतं शरीरं परित्यज्य शरीरान्तरं गृहीतवान्। परित्यक्तं तच्छरीरं तु सन्ध्यारूपेण परिणतम्। तदेव सर्वैरुपास्यत इत्यर्थः। भविष्यत्पुराणप्रसिद्धश्चायमर्थः—

> प्रजापतिः पितॄन् सृष्ट्वा मूर्तिं तामुत्ससर्ज ह।
> सा प्रातः सायमागत्य सन्ध्यारूपेण पूज्यते।।
>
> एनां सन्ध्यां यतात्मानो ये तु दीर्घमुपासते।
> दीर्घायुषो भविष्यन्ति नीरुजाः पाण्डुनन्दन!।।

इति। नन्वस्तु तथा, प्रस्तुते किमायातमित्यत्राह—मानिनि! तेन मम अत्र गौरवम् इति। हे मानिनि! अभिमानवति! परित्याज्य एवायमभिमान इति भावः। तेन,

यस्मात् कारणात् सन्ध्यायाः पितामहशरीरत्वं, तस्मात् कारणादित्यर्थः। अत्र सन्ध्यायां गैरवं बहुमानः। पितामहस्य भगवतापि पूज्यत्वं प्रागेवोक्तं—'प्रणेमतुस्तौ पितरौ प्रजानां पद्मासनस्थाय पितामहाय' (कुमा.७.८६) इति।।५२।।

तामिमां तिमिरवृत्तिपीडितां
भूमिलम्बमिव सम्प्रति स्थिताम्।
एकतस्तटतमालमालिनीं
पश्य धातुरसनिम्नगामिव।।५३।।

प्रकाशिका

तामिति। तां, यैवं विश्वमहनीया। तिमिरस्य वृत्तिः प्रसरः, तेन पीडितां प्रतीच्यामेव संकोचिताम्। ततश्च नदीप्रवाहवदायतावस्थानाम्। भूमिलम्बं 'लबि अवस्रंसन' इति धातोः सप्तम्यन्त उपपदे 'समासत्तौ' (३.४.५०) इति णमुल्। भूमौ लम्बित्वेत्यर्थः।।५३।।

विवरणम्

इत्थं परमार्थवचनेन प्रशान्तकोपां देवीं प्रति पुनरपि प्रस्तुतमेवार्थमधिकृत्याह—

तामिति। त्वं तिमिरवृत्तिपीडितां ताम् इमां पश्य। तिमिरस्य तमसो वृत्त्या प्रसरेण पीडितां निरस्तप्रसराम्। वर्धमानेन तमसा प्रतीच्यामेव दिशि सङ्कोचं प्रापितामित्यर्थः। दक्षिणोत्तरदिगन्तव्यापिनीं परिहृतपूर्वदिगन्तां चेति भावः। अनेन नदीप्रवाहवदायतावस्थानं सूचितम्। तां, या पितामहपरिणामभूतत्वाद् विश्वलोकमहनीया तामित्यर्थः। इमामिति सहस्तनिर्देशं वचनम्। दृश्यमानां सन्ध्यामित्यर्थः। पश्य अवलोकय। अत्यन्तरक्तवर्णा पूर्वभागे तिमिरपरिपूर्णा सन्ध्या सम्प्रति नयनरमणीया वर्तते। सावधानमवलोकयेत्यर्थः। सन्ध्यायाः कालविशेषवशादवस्थाविशेषप्राप्तिमुत्प्रेक्षामुखेन दर्शयति—सम्प्रति भूमिलम्बमिव स्थितामिति। सम्प्रति इदानीम्। कालविशेषेण सन्ध्यारागस्याधोभागमात्रवर्तित्वादित्यर्थः। भूमिलम्बं 'लबि अवस्रंसन' इत्यस्माद्धातोः सप्तम्यन्तोपपदे 'समासत्तौ' इति णमुलन्तोऽयं शब्दः। भूमौ लम्बित्वेत्यर्थः। स्थितामवस्थिताम्। सम्प्रति सन्ध्यारागस्याधोभागमात्रवर्तित्वाद् भूमौ निरन्तरावस्थिततया प्रतीयमानामित्यर्थः। अत एवोत्प्रेक्षते—एकतः तटतमालमालिनीं धातुरसनिम्नगाम् इव इति। एकतः एकस्मिन् भागे। पूर्वभाग इति भावः। तटतमालमालिनीम् तटं तीरप्रदेशः। तमालाः कृष्णवर्णा वृक्षविशेषाः। माला समूहः। तटे वर्तमानानां तमालानां मालास्त्यस्यामिति तथा।

'व्रीह्यादिभ्यश्च' (५.२.११३) इतीनिः। 'धातुर्मनश्शिलाद्यद्रेरि'ति सिंहः। रसो जलम्। निम्नगा नदी। धातुप्रचुरो रसो धातुरसः। धातुरसमयी निम्नगा धातुरसनिम्नगा तामिव। दक्षिणोत्तरप्रवाहवतीं पूर्वभागे तमालपरिवृतां धातुप्रचुरजलपरिपूर्णां नदीमिव दृश्यमानामित्यर्थः। **अरुणाचलनाथस्तु**—महता प्रयासेनात्रत्यमिवशब्दमुपमाद्योतकपक्षे निक्षिप्तवान्। बालप्रबोधार्थिनो वयं तु प्रतीतिबलादुत्प्रेक्षापक्षे निक्षिपामः।।५३।।

सान्ध्यमस्तमितशेषमातपं
रक्तरेखमपरा बिभर्ति दिक्।
साम्परायवसुधा सशोणितं
मण्डलाग्रमिव तिर्यगुज्झितम्।।५४।।

प्रकाशिका

सान्ध्यमिति। आतपं प्रकाशम्। रक्तरेखं रक्तरेखारूपम्। मण्डलाग्रं खड्गः। उज्झितं क्षिप्तम्। नन्वत्रेव पूर्वत्राप्युपमानस्य क्रियान्वयेन भवितव्यम्। न चासौ सिध्यति। धातुरसनिम्नगाया देवीदर्शनविषयस्यासिद्धत्वात्। उच्यते। न ह्युपमानस्य सर्वत्र क्रियान्वयः। तर्ह्युपमानवाचिपदं केनान्वयमुपेयात्? उपमेयवाचिना। ननु कस्तयोः सम्बन्धः। विशेषणविशेष्यभावः। तत्रोपमानं विशेषणं, शुक्लादिवद् व्यावर्तकत्वात्। अन्यद् विशेष्यं, पटादिवद् व्यावृत्तप्रत्ययविषयत्वात्। अत एव वागर्थावित्यादौ द्वितीयादिविभक्तियोगः। ननु तथापि क्रियान्वयेन भवितव्यम्। सर्वेषामेव विशेषणपदानां विशेष्यपदवत् क्रियापदान्वयस्य वाक्ये वाक्यविदामिष्टत्वात्। उच्यते। स ह्यन्वयः प्रथमं सत्त्या प्रतीतिपथमवतरति। न तु विश्रान्तिपदं भवति। विश्रान्तिपदं तु पार्ष्ठिको विशेषणविशेष्ययोरन्वयः। स एव च व्यवहाराङ्गं वास्तवश्च। अत एव हि श्रौत्यामुपमायां तयोः समानविभक्तिकत्वम्।।५४।।

विवरणम्

सन्ध्यारागस्य ततोऽपि न्यूनत्वात् तमेव रुधिरोक्षितेन खड्गेनोपमिनोति—

सान्ध्यमिति। अपरा दिक् सान्ध्यम् अस्तमितशेषं रक्तलेखम् आतपं बिभर्ति। अपरा दिक् पश्चिमाशा सान्ध्यं सन्ध्याकालभवम् अस्तमितस्य विनष्टस्य शेषम् अत एव रक्तलेखं रक्तलेखारूपम् आतपं प्रकाशं बिभर्ति दधाति। अस्तमितप्रायतल्लेखारूपं सन्ध्यारागं पश्चिमाशा दधातीत्यर्थः। अत्रोपमामाह—साम्यरायवसुधा सशोणितं तिर्यग् उज्झितं मण्डलाग्रम् इव इति। साम्यरायवसुधा युद्धभूमिः।

'युद्धायत्योः साम्परायः' इत्यमरः। सशोणितं शोणितेन रुधिरेण सहितं तिर्यक् तिरश्चीनं यथा भवति तथा उज्झितं क्षिप्तं मण्डलाग्रं करवालम्। 'कौक्षेयको मण्डलाग्रः करवालः कृपाणवद्' इत्यमरः, तमिव। यथा रणक्षितिः शोणितोक्षितं म्रियमाणैस्तिर्यक् क्षिप्तं मण्डलाग्रं दधाति, तथा पश्चिमाशा सन्ध्यानुरागमित्यर्थः। अत्र सन्ध्यारागस्य खड्गोपमया सूर्यास्तमयप्रदेश एव तिर्यगवस्थानं सूचितम्।।५४।।

यामिनीदिवससन्धिसम्भवे
तेजसि व्यवहिते सुमेरुणा।
एतदन्धतमसं निरङ्कुशं
दिक्षु दीर्घनयने! विजृम्भते।।५५।।

प्रकाशिका

यामिनीति। यामिनीदिवससन्धिसम्भवे सान्ध्य इत्यर्थः। सुमेरुणेति पौराणिकपक्षावलम्बनेन भणितिः। निरङ्कुशं निष्प्रतिबन्धम्।।५५।।

विवरणम्

अपिच तेजोलेशस्यापि विनष्टत्वादन्धकारावृतमिदं जगज्जायत इत्याह—

यामिनीति। हे दीर्घनयने! यामिनीदिवससन्धिसम्भवे तेजसि सुमेरुणा व्यवहिते अन्धतमसम् एतद् दिक्षु निरङ्कुशं विजृम्भते। दीर्घे नयने यस्यास्तस्याः सम्बुद्धिः। यामिन्याः रात्र्याः दिवसस्य च सन्धिर्यामिनीदिवससन्धिः, तस्मिन् सम्भव उद्भवो यस्य तस्मिन्। तेजसि सान्ध्ये तेजसीत्यर्थः। सुमेरुणा महामेरुणा व्यवहिते कृतव्यवधाने सति अन्धतमसम् अत्यन्तप्रवृद्धं तम इत्यर्थः। 'ध्वान्ते गाढेऽन्धतमस'मित्यमरः। दिक्षु सर्वासु दिक्षु निरङ्कुशम्। अत्र मत्तगजस्वैरसञ्चारप्रतिबन्धकवाचिनाङ्कुशशब्देन प्रतिबन्धमात्रं लक्ष्यते। साध्यसाधनभावश्चात्र सम्बन्धः। अन्धतमसस्य गजवदनिवारणीयत्वप्रतीतिः फलम्। निष्प्रतिबन्धं यथा भवति तथा विजृम्भते वर्धते। पश्येति शेषः। सुमेरुणा व्यवहित इति पौराणिकमतानुसारेणोक्तम्। सूर्यः सुमेरुं प्रदक्षिणीकरोतीति तन्मतम्। अत्रान्धतमसस्य पुनर्वर्धनानुपपत्तेरन्धतमसं विजृम्भत इत्यस्यान्धतमसरूपेण वर्धत इत्यर्थो द्रष्टव्यः। अत एवोत्तरश्लोके 'नोर्ध्वमीक्षणगतिरि'त्यादिना तमसः प्रवृद्धत्वावस्थां वक्ष्यति।।५५।।

नोर्ध्वमीक्षणगतिर्न चाप्यधो
नाभितो न च पुरो न पृष्ठतः।
लोक एष तिमिरौघ उत्थिते
गर्भवास इव वर्तते निशि।।५६।।

प्रकाशिका

नोर्ध्वमिति। अभितः पार्श्वतः। गर्भवास इवेति। तत्रापि नोर्ध्वादावीक्षणगतिः।।५६।।

विवरणम्

अन्धतमसविजृम्भणे लोकस्यावस्थामाह—

नोर्ध्वमिति। तिमिरौघे उत्थिते ऊर्ध्वम् ईक्षणगतिः न। तिमिराणाम् ओघे समूहे उत्थिते प्रवृद्धे सति ऊर्ध्वम् ऊर्ध्वभागे। ईक्षणानां नेत्राणां गतिः प्रवृत्तिः न। भवतीति शेषः। तमसि प्रवृद्धे नेत्राणामूर्ध्वभागप्रवृत्तिर्न भवतीत्यर्थः। अधोभागेऽपि नास्तीत्याह—अधः च अपि न इति। अधः अधोभागेऽपि च न। ईक्षणगतिरधोभागेऽपि नास्तीत्यर्थः। पार्श्वद्वयेऽपि नास्तीत्याह—नाभितः इति। अभितः पार्श्वतः। चशब्दोऽत्राप्यनुषज्यते। पार्श्वद्वयेऽपि नेत्राणां गतिर्न भवतीत्यर्थः। पुरोभागेऽपि नेत्रप्रवृत्तिर्नास्तीत्याह—पुरश्च न इति। पुरः पुरोभाग इत्यर्थः। पृष्ठेऽपि नास्तीत्याह—पृष्ठतः न इति। चशब्दोऽत्रापि द्रष्टव्यः। पृष्ठतः पृष्ठभागे इत्यर्थः। तमसि प्रवृद्धे कुत्रापि न नेत्रप्रवृत्तिरित्यर्थः। अत एवोत्प्रेक्षते—एषः लोकः निशि गर्भवासे वर्तते इव इति। एषः दृश्यमानो लोकः गर्भवासे गर्भगृहे। 'गर्भागारं वासगृहमि'त्यमरः(?)। शीतातपादिनिवारणार्थं पाषाणवृक्षादिभिः कल्पितं गृहं गर्भगृहमित्युच्यते। नहि तत्राप्यूर्ध्वादावीक्षणगतिः सम्भवति। 'लोक एष तिमिरेण वेष्टित' इति वा पाठः।।५६।।

शुद्धमाविलमवस्थितं चलं
वक्रमार्जवगुणान्वितं च यत्।
सर्वमेव तमसा समीकृतं
धिङ् महत्त्वमसतां हतान्तरम्।।५७।।

प्रकाशिका

शुद्धमिति। समीकृतं निर्विशेषीकृतम्। असताम् असाधूनाम्। तमश्च भाऽभावरूपत्वादसत्। अतः श्लेषाविद्धोऽयमर्थान्तरन्यासः। हतान्तरमपहतविशेषम्। असतां महत्त्वं यदि स्यात्, तन्निह्नुतेतरपदार्थगतविशेषं भवतीत्यर्थः।।५७।।

विवरणम्

अपिच सर्वमपि जगदैकरूप्यमुपगतमित्याह—

शुद्धमिति। शुद्धम् आविलम् अवस्थितं चलं वक्रम् आर्जवगुणान्वितं च यत् तत् सर्वम् एव तमसा समीकृतम्। शुद्धं निर्मलम्। आविलं कलुषम्। 'कलुषोऽनच्छ आविल' इत्यमरः। मलोपहतमित्यर्थः। अवस्थितं निश्चलं चलं चञ्चलं वक्रं कुटिलम् आर्जवगुणान्वितम् अकुटिलत्वेन गुणेनान्वितं सहितं च यद् द्रव्यं, तत् सर्वमेव तमसा अन्धकारेण समीकृतं निर्विशेषीकृतम्। समलनिर्मलानाम् अचलचञ्चलानाम् अवक्रवक्राणां च पदार्थानां तमसा तत्तद्विशेषदर्शननिरोधद्वारेण साम्यमापादितमित्यर्थः। अत्र श्लेषानुविद्धमर्थान्तरन्यासमाह—असतां महत्त्वं हतान्तरं धिग् इति। असताम् असाधूनाम्। तमसश्चाभावरूपत्वादसत्त्वमस्ति। अभावरूपं तम इति तार्किकाणां मतमनुसृत्यैवमुक्तम्। महत्त्वम् औन्नत्यं प्रवृद्धत्वं च। हतम् अपहतम् अन्तरम् विशेषो येन तत् तथा। धिगिति निन्दावचनमव्ययम्। 'धिङ् निर्भर्त्सननिन्दयो'रित्यमरः। यद्यसतां क्वचिन्महत्त्वमुत्पद्येत, तर्हि धिग्। न (ते) जनानां जातिकर्मादिकृतं विशेषमीक्षन्त इति भावः।।५७।।

नूनमुन्नमति यज्वनां पतिः
शार्वरस्य तमसो निषिद्धये।
पुण्डरीकमुखि! दिङ्मुखं यथा
कैतकैरिव रजोभिराहतम्।।५८।।

प्रकाशिका

नूनमिति। उन्नमति उदयते। वर्तमानसामीप्ये लट्। दिङ्मुखम् अर्थात् प्राचीमुखम्। यथेत्युपपादनद्योतकम्। 'दिङ्मुखं हरेरि'ति केचित् पठन्ति।।५८।।

विवरणम्

अथ चन्द्रोदयं वर्णयितुमुपक्रमते—

नूनमिति। यज्वनां पतिः शार्वरस्य तमसः निषिद्धये उन्नमति नूनम्। यज्वनां पतिश्चन्द्रः। यदाह मुरारिः—'गौराङ्गीवदनोपमासुकृतमादत्ते पतिर्यज्वनाम्'-

[अनर्घ्यराघवे] इति। शार्वरस्य शर्वरीभवस्य तमसः तिमिरस्य निषिद्धये निषेधाय उन्नमति उदयते। वर्तमानसामीप्ये लट्। नूनमिति निश्चयवाचकमव्ययम्। 'नूनं तर्केऽथ निश्चय' इत्यमरः। सर्ववर्णविभागविनाशकारिणस्तमसः शान्तये द्विजानामधिपः सद्य एवोदेष्यतीति वयं निश्चिनुम इत्यर्थः। ननु तत्र किं प्रमाणम् (अत्राह)—पुण्डरीकमुखि! यथा दिङ्मुखं कैतकैः रजोभिः आहतम् इव इति। पुण्डरीकं पद्मम्। पुण्डरीकमिव मुखं यस्याः। 'दिङ्मुखं हरेरि'ति केषाञ्चित् पाठः। तन्मते हरेरिन्द्रस्य दिशो मुखमित्यर्थः। यथेत्युपपादनद्योतकमव्ययम्। यस्मात् प्रकाराद्धेतोरित्यर्थः। दिङ्मुखं दिशो मुखम्। प्राच्या इत्यर्थात् सिध्यति। कैतकैः केतकीकुसुमसम्बन्धिभिः रजोभिः कुसुमरेणुभिः आहतम् अनुविद्धमिव। भवतीति शेषः। यस्मादिदं प्राचीदिङ्मुखं केतकीकुसुमरेणुभिरनुविद्धमिव भवति, तस्मात् तमोनिरोधाय चन्द्रः समुदेष्यत्येवेत्यर्थः।।५८।।

मन्दरान्तरितमूर्तिना निशा
लक्ष्यते शशभृता सतारका।
त्वं मया प्रियसखीसमागता
श्रोष्यतेव वचनानि पृष्ठतः।।५९।।

प्रकाशिका

मन्दरेति। सतारकेत्यस्य प्रतिवस्तु प्रियसखीसमागतेति, मन्दरान्तरितमूर्तित्वस्य पृष्ठतः स्थितिः।।५९।।

विवरणम्

किञ्च चन्द्रोऽप्युदितप्राय एवेत्याह—

मन्दरेति। मन्दरान्तरितमूर्तिना शशभृता सतारका निशा लक्ष्यते। मन्दरेण मन्दराचलेन अन्तरिता आच्छादिता मूर्तिः शरीरं यस्य तेन। शशभृता चन्द्रेण तारकाभिर्नक्षत्रैः सहिता निशा रात्रिः लक्ष्यते अवलोक्यते। चन्द्रोऽयं मन्दराचलगूढशरीरः सन् आत्मनः प्रियतमां सतारकां निशामवलोकयतीत्यर्थः। मन्दारचलस्य गन्धमादनपूर्वभागावस्थिततत्वादन्तरितत्वप्रतीतिः। अत्रोपमामाह— वचनानि श्रोष्यता पृष्ठतः मया प्रियसखीसमागता त्वम् इव इति। वचनानि विस्रम्भवाक्यानि श्रोष्यता श्रोतुकामेनेत्यर्थः। पृष्ठतः पृष्ठभागे। स्थितेनेति शेषः। प्रियसखीसमागता प्रियाभिः, अनेन विस्रम्भसँल्लापयोग्यत्वमुक्तं, सखीभिर्वयस्याभिः समागता सहिता त्वमिव। यथा प्रियसखीभिः सह तव सुखावस्थानसमये मद्विषयान् विस्रम्भसँल्लापानाकर्णयितुकामेन मया कदाचित् त्वमवलोक्यसे, तथेत्यर्थः।

अनेनात्मनः प्रेमप्रकाशनं देवेन कृतमित्यवसेयम्। अत्र सतारकेत्यस्य प्रतिवस्तुत्वेन प्रियसखीसमागतेत्युक्तं, मन्दरान्तरितमूर्तिनेत्यस्य तु पृष्ठतः स्थितेनेति।।५९।।

रुद्धनिर्गमनमा दिनक्षयात्
पूर्वदृष्टतनुचन्द्रिकास्मिता।
एतदुद्गिरति रात्रिचोदिता
दिग् रहस्यमिव चन्द्रमण्डलम्।।६०।।

प्रकाशिका

रुद्धेति। आ दिनक्षयाद् दिनव्यपगमावधि। अनेनाविस्रब्धजनसन्निधानपरिहारो ध्वनितः। रात्रिर्नायिकेव दिग् दूतीवेत्येकदेशविवर्तिन्युपमेयम्। उद्दीपकत्वसाम्याद् रहस्येन चन्द्रमण्डलस्योपमितिः।।६०।।

विवरणम्

अपिच, तस्मादपि शनैः शनैरयमुद्गच्छति शीतभानुरित्याह—

रुद्धेति। दिग् रात्रिचोदिता एतत् चन्द्रमण्डलम् उद्गिरति। दिक् प्राचीत्यर्थात् सिध्यति। रात्र्या निशया चोदिता प्रेरिता सती। एतदिति सहस्तनिर्देशं वचनम्। चन्द्रमण्डलं चन्द्रबिम्बम् उद्गिरति उद्वमति। अत्रोपमामाह—रहस्यम् इव इति। यथा नायिकाचोदिता दूती प्रियतमगतं प्रियतरं रहस्यवृत्तान्तं वदनादुद्वमति, तथेत्यर्थः। अत्र रहस्येन चन्द्रमण्डलस्योपमितिरुद्दीपकत्वसाम्यादिति द्रष्टव्यम्। साधारणं धर्ममाह—दिनक्षयाद् आरुद्धनिर्गमनम् इति। दिनस्य क्षयो दिनक्षयः। अत्राभिविधौ आङ्। दिनव्यपगमावधीत्यर्थः। रुद्धं निरुद्धं निर्गमनम् उद्गमनम् यस्य तत् तथा। रात्रिसमागमपर्यन्तं निरुद्धप्रसरमित्यर्थः। रहस्यपक्षे अविस्रब्धजनश्रवणपरिहारार्थं दिवसावसानपर्यन्तं रक्षितमित्यर्थः। दिनान्ते हि सर्वे जनाः यथागतं गच्छन्तीति भावः। चन्द्रोदयरहस्यवचनयोरारम्भदशां प्रकाशयन् दिशं विशिनष्टि— पूर्वदृष्टनुचन्द्रिकास्मिता इति। पूर्वमेव दृष्टं तनु अत्यल्पं चन्द्रिकैव स्मितं यस्याम्। अनेन स्मितपूर्वाभिभाषित्वमुक्तम्। चन्द्रोदयारम्भे हि तनुतरा चन्द्रिका पूर्वमुद्गच्छति। अत्र चन्द्रमण्डलस्य रहस्योपमितिरुपमाशब्देनैवोक्ता। रात्रेर्नायिकोपमा दिशो दूत्युपमा चार्थादायातीत्येकदेशविवर्तिनीयमुपमा।।६०।।

पश्य पक्वफलिनीफलत्विषा
बिम्बलाञ्छितवियत्सरोम्भसा।
विप्रकृष्टविवरं हिमांशुना
चक्रवाकमिथुनं विडम्ब्यते।।६१।।

प्रकाशिका

पश्येति। पक्वफलिनीफलसाम्यमुदयरागात्। बिम्बाभ्यां बिम्बप्रतिबिम्बाभ्यां लाञ्छिते वियत्सरोम्भसी यस्य। वियत्स्थमुदयारुणं बिम्बं सरोम्भःस्थं प्रतिबिम्बं च परस्परं विप्रकृष्टान्तरे विघटितं चक्रवाकमिथुनं विडम्बयत इत्यर्थः।।६१।।

विवरणम्

चन्द्रोदयानन्तरं वियति दृश्यमानं चन्द्रबिम्बं सरसि दृश्यमानं तत्प्रतिबिम्बं च आश्चर्यरूपं दृश्यत इत्याह—

पश्येति। बिम्बलाञ्छितवियत्सरोम्भसा हिमांशुना विप्रकृष्टविवरं चक्रवाकमिथुनं विडम्ब्यते पश्य। बिम्बाभ्यां बिम्बप्रतिबिम्बाभ्यां लाञ्छिते अङ्किते वियत्सरोम्भसी वियदाकाशं सरसामम्भश्च यस्य तेन। विप्रकृष्टं दूरं विवरमन्तरं यस्य तादृशं चक्रवाकद्वन्द्वं विडम्ब्यते अनुक्रियते पश्य अवलोकय। अत्र पश्येत्यर्थागतमपि दर्शनीयत्वातिशयं द्योतयितुं प्रयुक्तम्। आकाशदेशस्थं चन्द्रबिम्बं सरोजलस्थं तत्प्रतिबिम्बं च बिम्बस्य दूरोन्नतत्वेन परस्परविप्रकृष्टत्वाद् निशायां परस्परवियुक्तं चक्रवाकमिथुनमनुकुरुतः, सावधानमवलोकयेत्यर्थः। उपमात्रार्थी। चन्द्रबिम्बप्रतिबिम्बयोश्चक्रवाकदम्पत्योश्च सरःप्रदेशदृश्यमानत्वमप्युपमाहेतुः। किञ्च वर्णसाम्यमप्यस्तीत्याह—पक्वफलिनीफलत्विषा इति। रक्तवर्णफला कापि लता फलिनीशब्दार्थः। 'फलिनी शक्रपुष्प्यपी'त्यमरः। फलिन्याः फलं फलिनीफलम्। त्विट् शोभा। पक्वस्य फलिनीफलस्य। त्विडिव त्विड् यस्य तेन। रक्तवर्णेनेत्यर्थः। चक्रवाकमिथुनस्य रक्तवर्णत्वं प्रसिद्धम्।।६१।।

शक्यमोषधिपतेर्नवोदयाः
कर्णपूररचनाकृते तव।
अप्रगल्भयवसूचिकोमला-
श्छेत्तुमग्रनखसम्पुटैः कराः॥६२॥

प्रकाशिका

शक्यमिति। अत्र वामनः—'शक्यमिति रूपमलिङ्गवचनस्यापि कर्माभिधायां सामान्योपक्रमात्' (५.२.२३) इति। सामान्योपक्रमो विशेषाविवक्षा। अप्रगल्भत्वेनापि नवोदयत्वं लक्ष्यते। यवसूचिर्यवाङ्कुरः। सूचिवत् सूचिः, तद्वत् कोमलाः। कोमलत्वं चारोपितम्। तेन च छेदस्य शक्यतारोपः। एवञ्च सर्व एवायं वाक्यार्थ उपचारप्राणकः। अमुं च प्रकारं संभवभणितिरिति केचिदाचक्षते। नखसंपुटैः अन्योन्याभिमुखनखयुगलसन्निपातैः।।६२।।

विवरणम्

चन्द्रिकापि मन्दं मन्दं प्रसरतीत्याह—

शक्यमिति। ओषधिपतेः नवोदयाः कराः तव कर्णपूररचनाकृते अग्रनखसम्पुटैः छेत्तुं शक्यम्। ओषधिपतेः चन्द्रस्य नवः उदयः येषां ते तथा कराः रश्मयः तव कर्णपूररचनाकृते कर्णावतंसनिर्माणार्थम्। अग्रनखो नखाग्रम्। सम्पुटः सन्निवेशविशेषः। अग्रनखयोः सम्पुटाः अग्रनखसम्पुटाः तैः। अन्योन्याभिमुखनखाग्रनिपातनैरित्यर्थः। छेत्तुं छेदनं कर्तुं शक्यं योग्यम्। अत्र वामनः—'शक्यमिति रूपं विलिङ्गवचनस्यापि कर्माभिधायां सामान्योपक्रमाद्' (५.२.२३) इति। अत्रसामान्योपक्रमादित्यस्य विशेषविवक्षाभावादित्यर्थः। तस्माच्छक्यमित्यत्र विशेषविवक्षाभावाल्लिङ्गवचनविशेषाभावः। अत्र शक्यं यत्किञ्चिदस्तीति सामान्येनोपक्रमे किं तच्छक्यमित्याकाङ्क्षायां विशेषरूपो वाक्यशेषो द्रष्टव्यः। यथा—'शक्यमरविन्दसुरभिः' (शाकु.३.४) इत्यादौ, 'शक्यमञ्जलिभिः पातुं वाताः केतकिगन्धिनः' इत्यत्र च। चन्द्रकराः सम्प्रत्यभिनवप्रवृत्तत्वात् तव कर्णपूरनिर्माणार्थं नखाग्रलाव्या इत्यर्थः। चन्द्रकराणां कर्णपूरयोग्यत्वमप्यस्तीत्याह—अप्रगल्भयवसूचिकोमला इति। अप्रगल्भा अभिनवोदितत्वादतिमृदुला ये यवसूचयः यवाङ्कुराः सूचिवद्भान्तीति सूचयोऽङ्कुराः तद्वत् कोमलाः मृदुतराः। अत्र चन्द्रकराणामभिनवोदितत्वात् कोमलत्वमारोपितं, तेनच्छेदनयोग्यत्वमप्यारोप्यते। तस्मात् समस्तोऽप्ययमुपचारप्राणको वाक्यार्थः।।६२।।

अङ्गुलीभिरिव केशसञ्चयं
सन्निगृह्य तिमिरं मरीचिभिः।
कुड्मलीकृतसरोजलोचनं
चुम्बतीव रजनीमुखं शशी॥६३॥

प्रकाशिका

अङ्गुलीभिरिति। अत्रोपमारूपकोत्प्रेक्षाणां सङ्करः।।६३।।

विवरणम्

सम्प्रति रजनीशशिनौ सुरतोद्युक्तनायिकानायकत्वेन प्रतीयेते इत्याह—

अङ्गुलीभिरिति। शशी अङ्गुलीभिः केशसञ्चयम् इव मरीचिभिः तिमिरं सन्निगृह्य रजनीमुखं चुम्बति इव। शशी चन्द्रः अङ्गुलीभिः केशानां कचानां सञ्चयं समूहमिव मरीचिभिः रश्मिभिः तिमिरं तमः सन्निगृह्य सम्यङ् निगृह्य गृहीत्वा रजन्या मुखं पूर्वभागं वदनं च चुम्बतीव। यथा नायको नायिकायाश्चिकुरनिकुरम्बं

कराङ्गुलीभिः सम्यग् गृहीत्वा वदनं चुम्बति, तथा चन्द्रोऽपि अधोभागवर्तिनां तिमिराणामुपरिभागे करं प्रसार्य स्थितत्वादुपलब्धनिशामुखसम्बन्धत्वाच्चाङ्गुलीभिश्चिकुरं गृहीत्वा वदनं चुम्बतीवेत्युत्प्रेक्षते। चुम्बनजनितस्यानन्दस्यानुभावोऽपि मुखे दृश्यत इवेत्याह—कुड्मलीकृतसरोजलोचनमिति। कुड्मलीकृतं मुकुलीकृतं सरोजमेव लोचनं यस्य तत्। अस्माकमप्युपभोगकालः सम्प्राप्त इत्यनेन ध्वन्यते। अत्र अङ्गुलीभिः केशसञ्चयमिवेत्यत्र उपमा, कुड्मलीकृतसरोजलोचनमिति रूपकं, रजनीमुखं चुम्बतीवेत्युत्प्रेक्षेत्युपमारूपकोत्प्रेक्षाणां समासोक्तेश्चात्र सङ्करः।।६३।।

पश्य पार्वति! नवेन्दुरश्मिभिः
सामिभिन्नतिमिरं नभस्तलम्।
लक्ष्यते द्विरदभोगदूषितं
संप्रसीददिव मानसं सरः॥६४॥

प्रकाशिका

पश्येति। पार्वतीति श्लाघागर्भम् सम्बोधनम्। सामिभिन्नमर्धक्षिप्तम्। द्विरदभोगदूषितं गजस्नानक्रीडाकलुषितम्।।६४।।

विवरणम्

चन्द्रिकायां प्रसृतायां तिमिरमपि शनैः शनैः शाम्यतीत्याह—

पश्येति। पार्वति! नवेन्दुरश्मिभिः सामिभिन्नतिमिरं नभस्तलं द्विरदभोगदूषितं सम्प्रसीदद् मानसं सरः इव लक्ष्यते पश्य। हे पार्वतीति श्लाघागर्भं सम्बोधनम्। नवैः अभिनवोदितैः इन्दुरश्मिभिः चन्द्रकिरणैः कर्तृभूतैः। अत्र नवत्वं तिमिरस्य सामिभिन्नत्वे हेतुः। सामीत्यर्धवाचकमव्ययम्। 'सामि त्वर्धे जुगुप्सने' इत्यमरः। भिन्नं क्षिप्तम्। सामिभिन्नमर्धक्षिप्तं तमो यत्र तादृशं नभस्तलम् आकाशप्रदेशः द्विरदानां गजानां भोगेन स्नानक्रीडादिना दूषितं कलुषीकृतम्। नह्यतिमहतस्तस्य सरसः समस्तकलुषितत्वं समस्तकलुषितत्वं यस्य कस्यचित् क्रीडया सम्भवतीति द्विरदपदोपादानम्। सम्प्रसीदत् सम्यक् स्वच्छतामुपगच्छत्। अत्र वर्तमाननिर्देशेन प्रतिक्षणं प्रसादाधिक्यं द्योत्यते। मानसमिति देवानां सरसो नाम। लक्ष्यते दृश्यते। नभसो विस्तृतत्वान्मानसेनोपमा। पश्य सावधानमवलोकयेत्यर्थः। चन्द्रकिरणानामभिनवोदितत्वात् तैरर्धक्षिप्ततिमिरमिदं नभस्तलं पूर्वं गजस्नानक्रीडादूषितत्वात् स्वयमेव क्रमेण प्रसादमुपगच्छन्मानसं सर इव लक्ष्यते। अतिचित्रमेतत् सावधानमवलोकयेत्यर्थः। एतादृशी दशा नभस्तलस्य क्षणान्तरे विनश्यति। तस्मात् सद्य एवावलोकयेति भावः।।६४।।

रक्तभावमपहाय चन्द्रमा
जात एष परिशुद्धमण्डलः।
विक्रिया न खलु कालदोषजा
निर्मलप्रकृतिषु स्थिरोदया॥६५॥

प्रकाशिका

रक्तेति। रक्तशब्देन विषयासक्तिः, मण्डलशब्देन स्वराष्ट्रं, प्रकृतिशब्देनामात्यादयश्च ध्वन्यते। यथा राजा नवो यौवनारम्भे रागदूषितप्रवृत्तित्वात् क्षयलोभविरागादिकलुषितमण्डलः पश्चात् स्वाभाविकेनामात्यादिकृतेन च विनयेन युक्तः सन्नपगतरागः शुद्धमण्डलो भवति, तथायमपीत्युपमाध्वतिः।।६५।।

विवरणम्

चन्द्रोऽयमुदयरागमपहाय स्वाभाविकेन वैशद्येनान्वितो जात इत्याह—

रक्तेति। एषः चन्द्रमाः रक्तभावम् अपहाय परिशुद्धमण्डलः जातः। चन्द्रमाः चन्द्रः। रक्तभावं रक्तत्वम्। उदयरागमिति यावत्। अपहाय परित्यज्य परितः समन्ताच्छुद्धं मण्डलं बिम्बं यस्य तथाभूतो जातः। युक्तं चैतदित्याह—कालदोषजा विक्रिया निर्मलप्रकृतिषु स्थिरोदया न खल्विति। कालदोषाज्जाता विक्रिया विकारः निर्मलप्रकृतिषु निर्मलस्वभावेषु स्थिरो निश्चलः उदय आविर्भावो यस्याः तथाविधा न खलु। खलुशब्दः प्रसिद्धौ। निर्मलस्वभावेषु कालदोषजो विकारो न स्थिर इत्यर्थः। अत्र रक्तशब्देन विषयेष्वत्यन्तसक्तिः, मण्डलशब्देन स्वराष्ट्रं, प्रकृतिशब्देनामात्यादयश्च ध्वन्यन्ते। ततश्च यथा तावदभिनवो राजा यौवनारम्भे रागादिदूषितवृत्तित्वात् किञ्चित् कालं विरागादिकलुषितमण्डलो भवति पुनश्च कालान्तरे स्वाभाविकेन वा वृद्धामात्यकृतेन वा विनयेन भूषितो भूत्वा विगतरागः शुद्धमण्डलो जायते, तथायमपीत्युमाध्वनिः।।६५।।

उन्नतेषु शशिनः प्रभा स्थिता
निम्नसंश्रयपरं निशातमः।
नूनमात्मसदृशि प्रकल्पिता
वेधसैव गुणदोषयोर्गतिः॥६६॥

प्रकाशिका

उन्नतेष्विति। नूनं निश्चये। गुणदोषाभ्यां धर्मिणौ लक्ष्येते।।६६।।

विवरणम्

शशिनि दूरोन्नते सति निम्नप्रदेशेषु केषुचिदेव तमो दृश्यत इत्याह—

उन्नतेष्विति। शशिनः प्रभा उन्नतेषु स्थिता। शशिनः चन्द्रस्य प्रभा चन्द्रिका उन्नतेषु उन्नतप्रदेशेषु स्थिता। अतिविशदा चन्द्रिका समुन्नतेषु स्थलेषु प्रसृताभूदित्यर्थः। अतिमलिनं तिमिरं तु न तथेत्याह—निशातमः निम्नसंश्रयपरम्। निशायां यत् तम् ध्वान्तं निम्नानाम् अवटतटाकादीनां संश्रये सम्यगाश्रये परं तत्परम्। अभूदिति शेषः। अतिमलिनं तिमिरमधःप्रदेशवर्ति जातमित्यर्थः। ब्रह्मण एवायं कौशलविशेष इत्याह—गुणदोषयोः आत्मसदृशि [स्थाने]गतिः वेधसा एव प्रकल्पिता नूनम् इति। अत्र गुणदोषशब्दाभ्यां गुणी दोषवांश्च लक्ष्यते। आश्रयाश्रयिभावश्च सम्बन्धः। नैर्मल्यमालिन्ययोराधिक्यप्रतीतिः फलम्। आत्मसदृशि आत्मना सदृग् आत्मसदृक् तस्मिन्। गतिः प्राप्तिः वेधसा ब्रह्मणा। एवशब्दो जनान्तरव्यावृत्त्यर्थः। प्रकल्पिता प्रकर्षेण कल्पिता। सम्यक् कल्पितेत्यर्थः। नूनंशब्दो निश्चये। गुणवतां चन्द्रिकाप्रभृतीनां यदात्मयोग्ये समुन्नते स्थले गतिः कल्पिता, यच्च दोषवतां तमःप्रभृतीनां तदधिष्ठानयोग्ये निम्नप्रदेश एव वर्तनं, कल्पितं, तत् परमेष्ठिन एव कौशलविशेषो नान्यस्तेत्यर्थः। **आत्मसदृशी** इति पाठे आत्मसदृशी गतिः प्राप्यभूमिरित्यर्थः। अर्थान्तरन्यासप्रकारश्चायम्।।६६।।

चन्द्रपादजनितप्रवृत्तिभि-
श्चन्द्रकान्तजलबिन्दुभिर्गिरिः।
मेखलातरुषु निर्वृतानिमान्
बोधयत्यसमये शिखण्डिनः।।६७।।

प्रकाशिका

चन्द्रेति। प्रवृत्तिः स्यन्दः। मेखलाशब्दस्तरूणां नीचैर्वृत्तित्वं द्योतयति। बोधश्च प्रभातकालभाव्यवश्यायबिन्दुशङ्कया। शिखण्डिन इति इतरपक्षिणां नीडाश्रयत्वात्।।६७।।

विवरणम्

इत्थमुदिते शशिनि चन्द्रकान्तशिलानां प्रवृत्तिमाह—

चन्द्रेति। असौ गिरिः यन्द्रपादजनितप्रवृत्तिभिः चन्द्रकान्तजलबिन्दुभिः मेखलातरुषु निर्वृतान् इमान् शिखण्डिनः असमये बोधयति। असौ गिरिर्गन्धमादनः चन्द्रस्य पादैः रश्मिभिः जनिता उत्पादिता प्रवृत्तिः स्यन्दो येषां तथाभूतैः चन्द्रकान्तशिलानां जलबिन्दुभिः मेखलायां पर्वतस्य नितम्बभागे ये तरवः वृक्षाः

तेषु। निर्वृतान् सुखसुप्तानित्यर्थः। इमान् दृश्यमानान् शिखण्डिनः बर्हिणान्। असमये अकाले। प्रभातकालात् पूर्वमेवेत्यर्थः। बोधयति विगतस्वापान् करोति। प्रभातसमय एव पक्षिणां बोधः सम्भाव्यते। अत्र तु गिरेश्चन्द्रकान्तप्रचुरत्वाच्चन्द्रकान्तेषु चन्द्रोदये जलप्रवाहसम्भवाच्च शिखण्डिनस्तज्जलपतनसमये प्रभातसमयसम्भावितावश्यायबिन्दुशङ्कया प्रभातकालात् पूर्वमेव प्रबुद्धा भवन्तीत्यर्थः। इतरपक्षिणां नीडाश्रयत्वान्नीडे च जलपतनासम्भवाच्छिखण्डिन इत्युक्तम्। अत एव तेषामिदानीमेव केकाकोलाहलः श्रूयत इति भावः। चन्द्रकान्तशिलानां पर्वतसम्भूतत्वात् पर्वत एव बोधयतीत्युक्तम्।।६७।।

कल्पवृक्षशिखरेषु संप्रति
प्रस्फुरद्भिरिह पश्य सुन्दरि!।
हारयष्टिगणनामिवांशुभिः
कर्तुमागतकुतूहलः शशी।।६८।।

प्रकाशिका

कल्पेति। कल्पवृक्षाणां हि कुसुमं हारादि।।६८।।

विवरणम्

कल्पवृक्षाणामग्रभागावस्थितेषु चन्द्रकरेषु विशेषमाह—

कल्पेति। सुन्दरि! शशी सम्प्रति (इह) कल्पवृक्षशिखरेषु (प्र)स्फुरद्भिः अंशुभिः हारयष्टिगणनां कर्तुम् आगतकुतूहलः इव पश्य। सुन्दरि! हे सर्वावयवरमणीये!। शशी चन्द्रः सम्प्रति एतस्मिन् काले इहास्मिन् गन्धमादने कल्पवृक्षाणां शिखरेषु अग्रभागेषु प्रकर्षेण स्फुरद्भिः शोभमानैः। हारयष्टीनां यष्ट्याकाराणां हाराणां मौक्तिकानां गणनां सङ्ख्यानं कर्तुं विधातुम् आगतं प्राप्तं कुतूहलं येन तथाभूत इव। पश्य अवलोकय। कल्पवृक्षकुसुमानां हारादिरूपत्वात् सम्प्रति चन्द्रोऽयं कल्पवृक्षोपरि पतद्भिरात्मनः करैस्तद्गतानां हाराणां परिगणनायां कुतूहलात् प्रवृत्त इव दृश्यते। सावधानमवलोकयेत्यर्थः। हारयष्टीनां गणनार्हत्वं चन्द्रकराणां तत्समीपवर्तित्वं चोत्प्रेक्षाहेतुः।।६८।।

उन्नतावनतभागवत्तया
चन्द्रिका सतिमिरा गिरेरियम्।
भक्तिभिर्बहुविधाभिरर्पिता
भाति भूतिरिव मत्तहस्तिनः।।६९।।

प्रकाशिका

उन्नतेति। उन्नतावनतभागवत्तया अर्थाद् गिरेरेव। सतिमिरा तिमिरशबला गिरेश्चन्द्रिका। भक्तिभिर्भक्तिरेखाभिः। बहुविधाभिर्बहुप्रकारसन्निवेशाभिः। अत्र भक्तिरेखारहितानि गजाङ्गानि तिमिरस्थानीयानि।।६९।।

विवरणम्

पर्वतप्रसृतानां चन्द्रकराणां विशेषमाह—

उन्नतेति। उन्नतावनतभागवत्तया सतिमिरा गिरेः इयं चन्द्रिका बहुविधाभिः भक्तिभिः अर्पिता मत्तहस्तिनः भूतिः इव भाति। उन्नताः तुङ्गाः अवनता निम्नाश्च भागाः प्रदेशाः सन्त्यस्येत्युन्नतावनतभागवान् तस्य भावस्तत्ता तया हेतुभूतया। पर्वतस्य निम्नोन्नतप्रदेशवत्त्वात्। सतिमिरा तिमिरसहिता। तिमिरशबलेत्यर्थः। गिरेः पर्वतस्य। चन्द्रिका गिरौ विसर्पन्ती चन्द्रिकेत्यर्थः। बहुविधाभिः बहुप्रकारसन्निवेशाभिः भक्तिभिः भक्तिरेखाभिः अर्पिता न्यस्ता। मत्तहस्तिनः महागजस्य। गिरेर्महत्त्वादिदं विशेषणम्। भूतिः भस्मेव भाति शोभते। 'भूतिर्भस्मनि सम्पदि' इत्यमरः। उन्नतप्रदेशे चन्द्रिकाप्रवृत्तिः निम्नप्रदेशे तिमिरप्रवृत्तिरिति पूर्वमेवोक्तम्। गिरेरुन्नतावनतभागवत्त्वाद् गिरौ प्रसृता तिमिरशबलचन्द्रिका महागजस्योपरि कुशलजनैर्विचित्राकारा विहिता भक्तिरेखेव राजत इत्यर्थः। पर्वतो मत्तहस्तिवद् भाति। सतिमिराः गिरिप्रदेशाः गजाङ्गवच्छोभन्ते। क्वचित् क्वचित् प्रसृता चन्द्रिका तु तदङ्गे भस्मभिः कृता भक्तिरेखेव राजत इति भावः।।६९।।

एतदुच्छ्वसितपीतमैन्दवं
सोढुमक्षममिव प्रभारसम्।
मुक्तषट्पदविरावमम्भसां
भिद्यते कुमुदमा निबन्धनात्।।७०।।

प्रकाशिका

एतदिति। एतत् कुमुदमित्यन्वयः। उच्छ्वसितपीतम् उच्छ्वसितेन दलशैथिल्येन पीतम्। सातिशयपीतमिति केचिद् व्याचक्षते। आनिबन्धनाद् आ वृन्तात्। अत्र पारतद्रवपायिना पश्चाद् सोढुमशक्तेन उत्क्रोशता भिन्नशरीरेण साम्यं प्रतीयते।।७०।।

विवरणम्

दूरोदिते शशिनि कुसुदान्यपि सम्यग् विकसन्तीत्याह—

एतदिति। अम्भसाम् एतत् कुमुदं निबन्धनाद् आ भिद्यते। अम्भसां जलानाम्। कुमुदं, जले वर्तमानमित्यर्थः। कुमुदमिति जात्येकवचनम्। सकलमपि कुमुदकुलमित्यर्थः। निबन्धनाद् आ। निबन्धनं वृन्तम्। मर्यादायामाङ्। वृन्तप्रदेशावधीत्यर्थः। भिद्यते भेदमाप्नोति। विकसतीत्यर्थः। शशिकराणां सम्यक् प्रसृतत्वात् कुमुदान्यपि सम्यग् विकसन्तीत्यर्थः। वृन्तपर्यन्तं विकासे हेतुमुत्प्रेक्षते—ऐन्दवं प्रभारसं सोढुम् अक्षमम् इव इति। ऐन्दवम् इन्दुसम्बन्धिनम्। प्रभारसं प्रभाणां रसं वीर्यम्। 'शृङ्गारादौ गुणे वीर्ये विषे रागे द्रवे रस' इत्यमरः। सोढुम् अक्षमम् अशक्तमिव। दलेषु पतितानां चन्द्रकराणां वीर्यं सोढुमशक्यत्वादिवेत्यर्थः। मृदुतरं हि वस्तु गुरुतरवस्तुभरणे सति विहङ्गाधिष्ठिता लतेव सन्नतं भवतीति भावः। कुमुदानां विकासारम्भदशामेवाह—उच्छ्वसितपीतमिति। उच्छ्वसितेन उच्छ्वासेन। भावे निष्ठा। दलशैथिल्येन हेतुनेत्यर्थः। पीतं पीतवर्णम्। रक्तकुमुदापेक्षयैवमुक्तम्। कुमुदेषु मधुकराणां मधुपानजनितः कोलाहलोऽपि सञ्जात इत्याह—मुक्तषट्पदविरावमिति। मुक्तः प्रयुक्तः षट्पदानां भ्रमराणां विरावो येन तत् तथा। उदीरितमधुकरनिनादमित्यर्थः। अत्र कुमुदस्य पीतपारतद्रवेण पश्चात् तद्वीर्यं सोढुमशक्तेन भिन्नसर्वाङ्गेण क्रन्दता पुरुषेण साम्यं प्रतीयत इति समासोक्तिः।।७०।।

पश्य कल्पतरुलम्बि शुद्धया
ज्योत्स्नया जनितरूपसंशयम्।
मारुते चलति चण्डि! केवलं
व्यज्यते विपरिवृत्तमंशुकम्।।७१।।

प्रकाशिका

पश्येति। कल्पतरुलम्बीति, तेषां हि पल्लवान्यंशुकानि। शुद्धया तुषारादिसम्पर्करहितया जनितरूपसंशयम् इदमंशुकमियं ज्योत्स्नेति विवेक्तुमशक्यमित्यर्थः। तवांशुकपरिवर्तने परिकुप्यसीति द्योतनाय चण्डीति पदम्। व्यज्यते, मारुतपरिवर्तितत्वाज्ज्योत्स्नातो भिद्यत इत्यर्थः।।७१।।

विवरणम्

कल्पवृक्षप्रवालानामंशुकरूपत्वात् तद्गतानां चन्द्रकराणां मनोहारित्वातिशयमाह—

पश्येति। कल्पतरुलम्बि ज्योत्स्नया जनितरूपसंशयम् अंशुकं मारुते चलति विपरिवृत्तं केवलं व्यज्यते। चण्डि! त्वं पश्य। कल्पतरौ लम्बितुं शीलमस्येति तथा। कल्पतरौ लम्बमानमित्यर्थः। कल्पतरूणां हि पल्लवान्यंशुकानि। यदाह शक्तिभद्रो हनूमद्वाक्यप्रकरणे—

एषां पल्लवमंशुकानि कुसुमं मुक्ताः फलं विद्रुमं
वैडूर्यं दलमङ्कुरो मरकतं हैमं च शाखाशतम्।
एते के जगतीरुहो वनजुषोऽप्यज्ञातपूर्वा मया
प्रायः सारममी दिवो विटपिनः किं तैर्ममान्यो भरः।।

इति। ज्योत्स्नया चन्द्रिकया कर्तृभूतया जनितः उत्पादितः रूपे स्वरूपे संशयो यस्य तत् तथा। अंशुकस्य चन्द्रिकायाश्च वर्णसाम्यादिदमंशुकमियं ज्योत्स्नेति विवेक्तुमशक्यमित्यर्थः। अंशुकं वमनं मारुते वायौ चलति वाति सति। विपरिवृत्तं विशेषेण परिवृत्तम्। सञ्जातपरिवर्तनमित्यर्थः। इदं च हेतुगर्भं विशेषणम्। केवलशब्दोऽवधारणे। ज्योत्स्नातो भिद्यत इत्यर्थः। कल्पतरुपल्लवभूतानामंशुकानां ज्योत्स्नायाश्च कल्पतरुशाखावलम्बितत्वाद् रूपसाम्याच्चेदमंशुकमियं ज्योत्स्नेति विवेक्तुमशक्यत्वेऽपि वायौ वात्यंशुकानां चलनदर्शनाद् ज्योत्स्नायाश्च तदभावान्मारुतपरिवर्तितस्यांशुकत्वं निश्चीयत इत्यर्थः। हे चण्डि! कोपने! त्वं सावधानं पश्य अवलोकस्य। अत्र चण्डीति सम्बुद्ध्या तवांशुकपरिवर्तने त्वं कुप्यसीति द्योत्यते। ज्योत्स्नाया अंशुकत्वसाम्ये हेतुमाह—शुद्धयेति। तुषारादिसम्पर्कराहित्यान्निर्मलयेत्यर्थः।।७१।।

शक्यमङ्गुलिभिरुद्धृतैरधः
शाखिनां पतितपुष्पपेशलैः।
पत्रजर्जरशशिप्रभालवै-
रेभिरुत्कचयितुं तवालकम्।।७२।।

प्रकाशिका

शक्यमिति। अध इत्यपादानवाचि द्रष्टव्यम्। पेशलैर्मधुरैः। पत्रेति। पत्रैर्विच्छिन्नायाः शशिप्रभाया लेशैः उत्कचयितुं सम्बन्धुम्। 'कच दीप्तिबन्धनयोरि'ति धातुः। एतदपि वाक्यं पूर्ववद् द्रष्टव्यम्।।७२।।

विवरणम्

तरूणां पत्रान्तरालैर्निर्गतानामधःप्रदेशेषु दृश्यमानानां चन्द्रकिरणानामुद्दीपनत्वातिशयमाह—

शक्यमिति। शाखिनाम् अधः अङ्गुलिभिः उद्धृतैः एभिः पत्रजर्जरशशिप्रभालवैः तव अलकम् उत्कचयितुं शक्यम्। शाखिनां वृक्षाणाम्। अधः अधोभागादित्यर्थ। अङ्गुलिभिरुद्धृतैर्गृहीतैः सद्भिः एभिः दृश्यमानैः। पत्रैः

वृक्षलतादीनां पर्णैर्हेतुभूतैर्जर्जरैः विच्छेदं गतैरित्यर्थः, शशिनश्चन्द्रस्य प्रभाणामंशूनां लवैर्लेशैः साधनभूतैः। अलकशब्देनात्र केशा एवोच्यन्ते। उत्कचयितुं, 'कच दीप्तिवन्धनयोरि'ति धातुः। बन्धुमित्यर्थः। शक्यं योग्यम्। पत्रविच्छिन्नप्रसराश्चन्द्रकराः शाखिनामधःप्रदेशादङ्गुल्यग्रैरुद्धृत्य तव शिरोरुहबन्धनं कर्तुं युक्ता इति भावः। शशिप्रभाणां शिरोबन्धनयोग्यत्वमेव विशेषणेनोपपादयति—पतितपुष्पपेशलैरिति। शाखिभ्यः पतितानि यानि पुष्पाणि तद्वत् पेशलैः सुन्दरैः। मालाकारेण बद्धैरेव हि पुष्पैरनुदिनं तव शिलोबन्धनं क्रियते। इदानीं पुनरेभिरेव कर्तुं युक्तमित्यर्थः। अत्रापि 'शक्यमोषधिपतेर्नवोदयाः' (८.६२) इतिवत् समस्तोऽयमुपचारप्राणको वाक्यार्थः।।७२।।

एष तारमुखि! योगतारया
युज्यते तरलबिम्बया शशी।
साध्वसादुपगतप्रकम्पया
कन्यकेव नवदीक्षया वरः॥७३॥

प्रकाशिका

एष इति। यस्यां तारायां चन्द्रस्तिष्ठति, सा योगतारा। तरलबिम्बत्वं प्रातीतिकम्। नवदीक्षया प्रत्यग्रविवाहदीक्षया। अनेन देव्याः प्रथमावस्थास्मारणं नर्माचरति।।७३।।

विवरणम्

अथ चन्द्रवर्णनमुखेनैव सम्भोगकालप्रत्यासत्तिं भङ्ग्यन्तरेण दर्शयति—

एष इति। तारमुखि! एष शशी तरलबिम्बया योगतारया युज्यते। तारमत्युज्ज्वलं मुखं यस्याः तस्याः सम्बुद्धिरियम्। शशी चन्द्रः। तरलं चञ्चलं बिम्बं मण्डलं यस्याः तया। चञ्चलमण्डलयेत्यर्थः। अत्र मण्डलस्य चञ्चलत्वं प्रातिभासिकम्। नक्षत्रादयो हि दूरावलोकनसमये किञ्चिच्चलन्तीति प्रतीयन्त इति तेषां स्वभावः। इदं च नववधूत्वोपमाने हेतुः। योगतारया। इन्दुर्यस्यां तारकायां तिष्ठति, सा योगतारा। युज्यते योगं प्राप्नोति। इन्दुरयमद्यतनसम्बन्धयोग्यया स्वकान्तया तारकया सङ्गच्छत इत्यर्थः। अनेनावयोरपि सम्भोगकालः प्राप्त इति ध्वन्यते। अत्रोपमामाह—वरः साध्वसाद् उपगतप्रकम्पया नवदीक्षया कन्यया इव इति। वरः भर्ता साध्वसाद् अधाष्टर्याद् उपगतः प्राप्तः प्रकम्पः प्रकृष्टः कम्पो वेपथुर्यया तया। नवा प्रत्यग्रा दीक्षा विवाहदीक्षा यस्याः तया। नवोढयेत्यर्थः। यथा वरः साध्वसपरतन्त्रत्वादुपगतवेपथुप्रकर्षया कन्यया सङ्गच्छते तथायं चन्द्रोऽपीत्यर्थः।

अनेन वाक्येन देवो देव्याः प्रथमसङ्गमावस्थानकर्मणो देवीमन्मथोद्दीपनार्थमनुस्मारितवानित्यवसेयम्।।७३।।

पाकभिन्नशरकाण्डगौरयो-
रुल्लसत्प्रतिकृतिप्रपन्नयोः।
रोहतीव तव गण्डरेखयो-
श्चन्द्रबिम्बनिहिताक्षि! चन्द्रिका॥७४॥

प्रकाशिका

पाकेति। पाकेन भिन्नं संभिन्नम्। उल्लसन्त्या प्रतिकृत्या चन्द्रप्रतिमया प्रपन्नयोः। पाकेत्यादि चन्द्रिकायाः प्रतिफलने हेतुः। प्रतिफलनाच्चन्द्रप्रतिबिम्बनाच्च चन्द्रिकारोहणोत्प्रेक्षा। चन्द्रबिम्बनिहिताक्षीति समग्रकान्तिभाजनयोरात्मगण्डरेखयोः स्फीतयोर्मुधा चन्द्रं पश्यसि। तदेतावेवादर्शतले पश्येत्युपालम्भपरं सम्बोधनम्।।७४।।

विवरणम्

अथ देवश्चन्द्रबिम्बादतिमनोहरत्वं देवीवदनस्यैव प्रतिपादयंश्चन्द्रवर्णनमुपसंहरति—

पाकेति। चन्द्रबिम्बनिहिताक्षि! चन्द्रिका तव गण्डरेखयोः रोहति इव। चन्द्रस्य बिम्बे निहिते समर्पिते अक्षिणी यया। अनेन चन्द्राभिमुखावस्थानमुक्तम्। तच्च चन्द्रिकाप्रतिफलने एको हेतुः। समग्रगुणास्पदत्वाद् विजितचन्द्रयोस्तव गण्डरेखयोः सतोः किं मुधा चन्द्रं पश्यसि। आदर्शमादायैते एवावलोकयेत्युपालम्भगर्भेयं सम्बुद्धिः। चन्द्रिका ज्योत्स्ना तव गण्डरेखयोः गण्डप्रदेशयोः रोहणाधिकरणभूतयोः रोहति प्ररोहतीव। चन्द्राभिमुखावस्थितायास्तव गण्डद्वितयाच्चन्द्रिका सततमुद्गच्छतीवेत्यर्थः। चन्द्रिकाप्रतिफलने प्रधानहेतुभूतं गण्डरेखयोरौज्ज्वल्यमाह—पाकभिन्नशरकाण्डगौरयोरिति। पाकेन भिन्नं सम्भिन्नं यच्छरकाण्डं वेणुविशेषदण्डः, तद्वद् गौरयोः। पाकसम्मिश्रं हि शरकाण्डं गौरवर्णं भवति। अत एवोल्लसत्प्रतिकृतिप्रपन्नयोः उल्लसन्त्या शोभमानया प्रतिकृत्या चन्द्रप्रतिमया प्रपन्नयोः प्राप्तयोः। गण्डप्रदेशयोर्निर्मलत्वात् संप्राप्तचन्द्रप्रतिमयोरित्यर्थः।।७४।।

लोहितार्कमणिभाजनार्पितं
कल्पवृक्षमधु बिभ्रती स्वयम्।
त्वामियं स्थितिमतीमुपस्थिता
गन्धमादनवनाधिदेवता॥७५॥

प्रकाशिका

एवं काललक्षणमुद्दीपनमुपवर्ण्य उद्दीपनान्तरं प्रस्तौति—

लोहितेति। लोहितार्कमणिभाजनं लोहितार्कसदृशं मणिपात्रम्। स्वयं स्वहस्तेन। स्थितिमतीं प्रभावयुक्ताम्। सकलदिव्याङ्गनासेव्यामित्यर्थः। इदञ्च वाक्यं प्रक्रंस्यमानसम्भोगवर्णनप्रसङ्गार्थम्।।७५।।

विवरणम्

इत्थं सन्ध्याचन्द्रोदयादिरूपमुद्दीपनमुपवर्ण्य मधुपानादिरूपमुद्दीपनं वर्णयितुमुपक्रमते—

लोहितेति। गन्धमादनवनाधिदेवता इयं त्वाम् उपस्थिता। गन्धमादनवनस्याधिदेवता अधिष्ठात्री देवता इयं त्वामुपस्थिता प्राप्ता। अत्र वनान्तरे भवती निवसतीति प्रभावादवधार्य त्वत्सेवार्थमियं गन्धमादनवनदेवता सम्प्राप्ता भवतीत्यर्थः। दर्शनकालोचितामुपदामपि स्वहस्तेनैवेयमुद्धरतीत्याह—कल्पवृक्षमधु लोहितार्कमणिभाजनार्पितं स्वयं बिभ्रती इति। कल्पवृक्षपुष्पसम्भवं मधु मद्यम्। अत्र कल्पवृक्षसम्बन्धान्मद्यस्योत्कर्षातिशयो व्यज्यते। भाजनस्याप्युद्दीपनत्वमाह—लोहितेत्यादि। लोहितः सन्ध्यारागरक्तो योऽर्कः तत्सदृशे मणिभाजने रत्नपात्रेऽर्पितं न्यस्तं सत् स्वयं स्वहस्तेनैव बिभ्रती वहन्ती। कल्पवृक्षमधु रत्नपात्रे निधाय स्वयमेवोद्वहन्तीत्यर्थः। अत्र स्वयमेवोद्धरणमात्मनः कैङ्कर्यं च द्योतयति। देव्याः सकलदेवतान्तरसेव्यत्वे हेतुमाह—स्थितिमतीमिति। स्थितिर्मर्यादास्त्यस्या इति तथा। स्वप्रभावेणैव प्रवर्तितसमस्तलोकमर्यादामित्यर्थः। अनेन त्रैलोक्यवासिनां सर्वेषामपि सेव्यत्वं देव्याः प्रतिपादितम्। इदं च मद्यानयनं करिष्यमाणस्य सम्भोगवर्णनस्य प्रसङ्गार्थमुपात्तम्।।७५।।

आर्द्रकेसरसुगन्धि ते मुखं
मत्तमत्तनयनं स्वभावतः।
अत्र लब्धवसतिर्गुणान्तरं
किं विलासिनि! मदः करिष्यति।।७६।।

प्रकाशिका

आर्द्रेति। आर्द्रकेसरं प्रत्यग्रवकुलम्। वीप्सायां द्विर्वचनम्। मत्तत्वेन मदेऽपि सम्भविनो धर्मा लक्ष्यन्ते। गुणान्तरं स्वभावसिद्धोक्तगुणद्वयव्यतिरिक्तम्। अत्र मधुकार्यत्वेऽप्यार्द्रकेसरसुगन्धित्वस्योपचारान्मदकार्यत्वम्। दक्षिणावर्तस्तु—'मधुरिति वा पाठः। मद्यविशेषवाची पुल्लिङ्गान्तो मधुशब्दोऽस्ती'त्याद्यवोचत्। तदसत्।

पूर्ववाक्ये स्वशब्दनिर्दिष्टस्य मधुनोऽत्र तच्छब्देनापरामर्ष्टुमयुक्तत्वात्। स्वशब्दनिर्देशे वा नापुंसकः संस्कारो युक्तः। अन्यथा लिङ्गप्रक्रमभेदप्रसङ्गः। पुल्लिङ्गनिर्देशे सति चेदमित्युत्तरवाक्ये परामर्शो न युक्तः। इत्थं पद्यत्रयालोचनयात्र पाठो निर्णयः।।७६।।

विवरणम्

इत्थं प्रसङ्गागतं मधुपानमेव चाटुवचनमुखेन परिहरन्नाह—

आर्द्रेति। विलासिनि! ते मुखम् आर्द्रकेसरसुगन्धि। हे विलासिनि! विलासवति!। अनया सम्बुद्ध्या विलासोऽपि तव स्वाभाविकः, न मधुविकारजन्य इति ध्वन्यते। आर्द्रं प्रत्यग्रं यत् केसरं बकुलकुसुमं तद्वत् सुगन्धि। शोभनो गन्धो यस्य तत् सुगन्धि। 'गन्धस्येदुत्पूतिसुसुरभिभ्यः' (५.४.१३५)। मुखसौगन्ध्यं हि मद्यस्य प्रथमं फलम्। तत्तु तव स्वभावसिद्धमेवेति भावः। यत् पुनः शीधुपान समये नयनादौ विशेषतो विलासप्रादुर्भावरूपं फलं, तदपि ते वदनस्य स्वभावसिद्धमेवेत्याह—स्वभावतः मत्तमत्तनयनमिति। स्वभावतः प्रकृत्यैव मत्तमत्तमत्यन्तमत्तं नयनं यस्य तत् तथा। अत्र मत्तशब्देन मधुमदे सम्भविनां विलासादिधर्माणां सत्त्वं लक्ष्यते। द्विर्वचनेन च तेषां पूर्णत्वं, स्वभावत इत्यनेन तेषां नित्यत्वं च द्योत्यते। यस्मादितरनारीणां मधुमदसाध्या एते विकारास्तव स्वभाविकाः, तस्मात् किं तव मधुनेत्याह—अत्र लब्धवसतिः मदः किं गुणान्तरं करिष्यति। अत्र तव मुखे लब्धवसतिः लब्धप्रतिष्ठः मदः मधुमदः किं गुणान्तरं गुणभेदं करिष्यति मधुपानेन तव मुखे लब्धप्रतिष्ठो मदः स्वाभाविकपूर्वोक्तगुणद्वयव्यतिरिक्तं कीदृशं गुणान्तरं विधास्यति। न यादृशतादृशमपि। तस्मात् तव निरुपयोगं मध्विति भावः।।७६।।

मान्यभक्तिरथवा सखीजनः
सेव्यतामिदमनङ्गदीपनम्।
इत्युदारमभिधाय शङ्कर-
स्तामपाययत पानमङ्गनाम्।।७७।।

प्रकाशिका

वैयर्थ्यात्मकमाक्षेपं परिहरति—

मान्येति। अथवा सखीजनभक्तिमात्रमाननात्र गुणान्तरं भविष्यति। तस्मादिदं मधु सेव्यतामित्यर्थः। सखीशब्देन प्रकृता वनदेवता विवक्ष्यते। विशेषणद्वारेणापि गुणान्तरमाह—अनङ्गदीपनमिति। उदारं विदग्धम्। पीयत इति पानं मधु। अपाययत स्वहस्तेनादायेति शेषः।।७७।।

विवरणम्

इत्थमाक्षिप्य समादधाति—

मान्येति। अथवा सखीजनः मान्यभक्तिः। अथवेति पक्षान्तरे। तच्च पूर्वोक्तगुणद्वयव्यतिरिक्तगुणान्तरप्रस्तावपरम्। स एव च गुणः सखीजन इत्यादिनोच्यते। सखीशब्देनात्र प्रकृता गन्धमादनवनदेवता विवक्षिता। उपपद्यते च गन्धमादनस्य हिमवत्सन्निहितत्वात् तद्देवतायाः सखीत्वम्। मान्या माननीया भक्तिर्यस्य स तथा। यस्मात् सखीजनभक्तिमानना गुणान्तरं प्रसूते, तस्मात् सेवनीयमिदं मध्विति भावः। अत एवोच्यते—इदं सेव्यतामिति। इदं मधु सेव्यताम् उपयुज्यतामित्यर्थः। पूर्वोक्तगुणद्वयव्यतिरिक्तं गुणान्तरं चास्तीत्याह—अनङ्गदीपनमिति। अनङ्गं मदनं दीपयति वर्धयतीति तथा। मदनोद्दीपनादपि मधु सेव्यमित्यर्थः। इत्थमुपवर्णितं भगवद्वचनमुपसंहृत्यार्थान्तरं प्रस्तौति—शङ्करः इति उदारम् अभिधाय ताम् अङ्गनां पानम् अपाययतेति। इति पूर्वोक्तप्रकारेण उदारं विदग्धं यथा भवति तथा अभिधाय उक्त्वा। वचनस्योदारत्वमपि शङ्करेत्यनेन सूचितम्। तामङ्गनां पार्वतीम्। पीयत इदमिति व्युत्पत्त्या पानशब्देनात्र मध्वेव विवक्ष्यते। अपाययत पानं कारितवान्। स्वहस्तेनादायेति शेषः। शङ्करः 'पद्मकान्तिमरुणत्रिभागयोः' (८.३०) इत्यारम्भ 'सेव्यतामिदमनङ्गदीपनमि'त्यन्तेन काललक्षणमुद्दीपनं देवीचित्तावर्जनं च विधाय मधुपानलक्षणमुद्दीपनमपि वल्लभायाः कृतवानित्यवसेयम्।।७७।।

पार्वती तदुपयोगसम्भवां
विक्रियामपि सतीं मनोहराम्।
अप्रतर्क्यविनियोगनिर्मिता-
माम्रतेव सहकारतां ययौ।।७८।।

प्रकाशिका

पार्वतीति। विक्रियामपि, विक्रिया हि धैर्यविपर्ययात्मकत्वाद् दोषः। मनोहरामिति दोषस्य गुणीभावः। अप्रतर्क्येति सहकारताया विशेषणम्। अप्रतर्क्योऽचिन्त्यप्रभावो यो विनियोगो मणिमन्त्रौषधकालादियोगः, तेन निर्मिताम्। सहकाराः स्वादुफला आम्राः। दक्षिणावर्तस्त्वाह—'अप्रतर्क्यविनियोगनिर्मितामाकस्मिकफलरसोपयोगकल्पिताम्। अयमर्थः—कस्यचिदाम्रस्य पूर्वप्रतिपन्ना त्वाम्रता कदाचित् स्वादुफलदर्शनेन यथा सहकारतां प्रतिपद्यते, तथे'ति।।७८।।

विवरणम्

अथ देव्या मधुपानविकारं वर्णयति—

पार्वतीति। पार्वती तदुपयोगसम्भवां ययौ। तस्य मधुनः उपयोगात् पानात् सम्भवो यस्याः ताम्। ययौ प्राप्तवती। मधूपयोगे यत् सम्भवति, तत् प्राप्तवतीत्यर्थः। वक्ष्यमाणविक्रियापेक्षया स्त्रीलिङ्गत्वम्। तामेव निर्दिशति—विक्रियां सतीम् अपि मनोहराम् इति। विक्रियां विकाररूपिणीं सतीमपि मनोहराम्। विक्रिया हि धैर्यविपर्ययात्मकत्वाद् दोषः। तथाभूतां भवन्तीमपि मनोहरामित्यर्थः। नहि विक्रिया कुत्रापि मनोहरा भवति। देव्या मधूपयोगसम्भवा विक्रिया तु न तथेति भावः। देव्यास्तदुपयोगेन तादृशविक्रियाप्राप्तावुपमामाह—आम्रता अप्रतर्क्यविनियोगनिर्मितां सहकारताम् इव इति। ईषत्स्वादुफलश्चूतविशेष इहाम्रशब्देनोच्यते। तस्य भावस्तत्ता। अप्रतर्क्यः अविचिन्त्यप्रभावो यो विनियोगः मणिमन्त्रौषधकालादियोगः, तेन निर्मितां विहिताम्। सहकारताम् अतिस्वादुफलश्चूतविशेषः सहकारः, तस्य भावस्तत्ता, तामिव। यथा मन्दस्वादुफलत्वात् पूर्वमाम्रतामुपगता चूतलता पुनर्मणिमन्त्रयोगादतिस्वादुफलां सहकारतां प्राप्नोति, तथा पार्वत्यपि मधुपानेन पूर्वापेक्षयातिमनोहरां विक्रियामवापेत्यर्थः।।७८।।

तत्क्षणं विपरिवर्तितह्रियो-
र्नेष्यतोः शयनमिद्धरागयोः।
सा बभूव वशवर्तिनी द्वयोः
शूलिनः सुवदना मदस्य च॥७९॥

प्रकाशिका

तत्क्षणमिति। विपरिवर्तिता अपनीता ह्रीर्येन। नेष्यतोः प्रापयिष्यतोः। इद्धो रागो यस्य येन च। तत्क्षणं वशवर्तिनी बभूवेत्यन्वयः। कस्य कस्येत्याह—शूलिन इति। अत्र मदवशत्वं शूलिवशत्वहेतुरवसेयम्।।७९।।

विवरणम्

मधुपानस्य फलमाह—

तत्क्षणमिति। सा सुवदना तत्क्षणं द्वयोः वशवर्तिनी बभूव। सा यैवं कृतपाना। सुवदना शोभनं वदनं यस्याः सा तथा। अनेन मुखशोभाया अपि पूर्वस्मात् किञ्चिदाधिक्यं ध्वन्यते। तत्क्षणं तस्मिन् क्षणे। अनेन मधुपानविकारस्य सद्यःप्रसर उक्तः। द्वयोर्वक्ष्यमाणयोः वशवर्तिनी वशं वर्तितुं शीलमस्या इति तथा बभूव भवति स्म। कस्य कस्य चेत्याकाङ्क्षायामाह—शूलिनः मदस्य च इति। शूलिनः परमेश्वरस्य मदस्य मधुपानजनितस्य विकारस्य। चशब्दः समुच्चयार्थः। अत्र मदवशवर्तित्वं लज्जामपहाय शूलिवशवर्तित्वप्राप्तौ हेतुरित्यवसेयम्। शूलिनि

मदे च श्लिष्टं विशेष(ण)त्रयम्। तत्राद्यमाह—विपरिवर्तितह्रियोरिति। विपरिवर्तिता अपनीता ह्रीर्याभ्यां तयोः। मदो हि लज्जामपनयति। शूली च तदानीं चाटुशतवचनेन लज्जामपनीतवानित्यनेनोक्तम्। वक्ष्यमाणासु सर्वास्वपि लीलासु लज्जापगमनस्यैव हेतुत्वादिदं विशेषणं पूर्वमुपात्तम्। पुनश्च लज्जापगमनस्य कार्यं द्वितीयेन विशेषणेनाह—शयनं नेष्यतोरिति। शयनं शय्यां नेष्यतोः प्रापयिष्यतोः। मदो हि लज्जामपनीय स्वयमेव शय्यां प्रापयिष्यति, शूली तु करग्रहणादिभिः। लज्जापनये शय्याप्रापणे च रागवृद्धिरेव हेतुरिति तृतीयेन विशेषणेनाह—इद्धरागयोरिति। इद्धः प्रवृद्धः रागो येन यस्य च तयोः।।७९।।

घूर्णमाननयनं स्खलत्कथं
स्वेदबिन्दुमदकारणस्मितम्।
आननेन न तु तावदीश्वर-
श्चक्षुषा चिरमुमामुखं पपौ।।८०।।

प्रकाशिका

अत्र मदवशवर्तित्वं वर्णयति—

घूर्णमानेति। चक्षुषेति मदविकारदर्शनसुखमेवान्वभूदित्यर्थः।।८०।।

विवरणम्

अत्र मदवशवर्तित्वस्यैव शूलिवशवर्तित्वे हेतुत्वादादौ मदवशवर्तित्वं वर्णयति—

घूर्णमानेति। ईश्वरः तावद् उमामुखं चक्षुषा चिरं पपौ। ईश्वरः त्रयाणां लोकानां नियन्ता। तस्य तावदीदृशी समवस्था। अन्येषां का कथेत्यनेन द्योत्यते। तावत् तस्यामवस्थायाम्। अनेन तादृशावस्थायाः पूर्वावस्थातो व्यतिरेक उक्तः। उमाया मुखम्। अनेन प्रथमसर्गप्रतिपादितं स्वाभाविकमनोहारित्वं ध्वनितम्। चक्षुषा करणभूतेन। चिरं, न तु कञ्चित् कालम्। पपाविति दर्शने पानोपचारः। तेन च तथा तृषितस्य पानं ग्लानिप्रशमप्रमोदादीन् जनयति, तथात्रापीति ध्वन्यते। चक्षुषः करणत्वमात्रमेवात्र विशेष इति द्योतयितुं चक्षुषेत्युक्तम्। अत एव मुखस्य करणत्वं निषेधति—आननेन न त्विति। आननेन वदनेन। तुशब्दोऽत्र विशेषं द्योतयति। अधरपानादिसुखमपहाय देवीवदने मदविकारजनितानतिमनोहरान् विशेषानेवावलोकयन्नतिचिरकालं रेम इति भावः। तदवलोकनस्यैव परमसुखत्वमाह—घूर्णमानेत्यादिभिश्चतुर्भिर्विशेषणैः। घूर्णमाननयनं घूर्णमाने सञ्जायमानकालुष्ये नयने नेत्रे यस्य तत् तथा। स्खलत्कथं स्खलन्ती मदपारवश्यान्मध्ये मध्ये विच्छेदं गच्छन्ती कथा वाक्प्रवृत्तिर्यस्य तत्। असमग्रवर्णपदवाक्यमित्यर्थः। तथैव

स्वेदबिन्दुमत्। स्वेदानां स्वेदजलानां बिन्दवः सन्त्यस्मिन्निति तथा। मदविकारजनितस्वेदकणिकालङ्कृतम्। तथा अकारणस्मितम्। अकारणं हेतुशून्यं स्मितं मन्दस्मितं यस्य तत्। एतादृशमुखदर्शनादन्यत् किं सुखसाधनमिति भावः। अत्र मुखविशेषणानां पिपासाविधानाभिप्रायत्वात् परिकरः।।८०।।

तां विलम्बितपनीयमेखला-
मुद्वहञ्जघनभारदुर्वहाम्।
ध्यानसंभृतविभूतिभास्वरं
प्राविशन्मणिशिलागृहं हरः॥८१॥

प्रकाशिका

इत्थं सख्यादिसन्निधौ सम्भोगमुपवर्ण्य विविक्ते तं वर्णयितुं देव्याः शूलिवशवर्तित्वमाह—

तामिति। विलम्बितपनीयमेखलां रागवेगविगलितहेमकाञ्चीम्। ध्यानेति ध्यानप्रभावसंपादितरतोपकरणम्।।८१।।

विवरणम्

एवं तावत् सख्यादिसन्निधौ सम्भोग उक्तः। अथ विविक्तरतं वर्णयितुं देव्याः शूलिवशवर्तित्वमाह—

तामिति। हरः ताम् उद्वहन् मणिशिलागृहं प्राविशत्। हरः परमेश्वरः तां पार्वतीम्। उद्वहन् स्वहस्ताभ्यामादरातिशयादुद्धृत्येत्यर्थः। मणिमयीभिः शिलाभिर्निर्मितं गृहं सुरतगृहं प्राविशत् प्रविष्टवान्। अत्र मणिशब्देन नित्योज्ज्वलत्वं ध्वनितं, तेन च रागातिशयमाह—विलम्बितपनीयमेखलामिति। विलम्बिनी रागवेगवशात् पदे पदे विगलनशीला तपनीयमेखला हेमकाञ्ची यस्याः ताम्। रागो हि स्त्रीणां जघनगतं काञ्चीदुकूलादिकं विगालयतीति कामशास्त्रप्रसिद्धम्। उद्धृत्य गमने देव्या जघनगौरवाद् देवेनापि दुर्वहत्वमाह—जघनभारदुर्वहामिति। जघनभारेण दुर्वहां देवेनापि दुःखेन वोढुं शक्यामित्यर्थः। ननु वनान्तरे कथं सुरतोपकरणसम्भवोपपत्तिरिति किं मणिशिलागृहप्रवेशेनेत्याशङ्क्य मणिशिलागृहं विशिनष्टि—ध्यानसम्भृतविभूतिभास्वरमिति। ध्यानेन ध्यानमात्रेण सम्भृताभिः सम्पादिताभिः विभूतिभिः सुरतोपकरणैः भास्वरं शोभनशीलम्। प्रभावमात्रनिर्मितरतोपकरणशोभमानमित्यर्थः।।८१।।

तत्र हंसधवलोत्तरच्छदं
जाह्नवीपुलिनचारुदर्शनम्।
अध्यशेत शयनं प्रियासखः
शारदाभ्रमिव रोहिणीपतिः॥८२॥

प्रकाशिका

तत्रेति। अत्र शयनरचनायाः प्रधानाङ्गत्वात् तद्वैशिष्ट्यं वर्णितम्। तदुक्तं मुनिना—'सुक्लृप्तमुभयोपधानं मध्ये विनतं शुक्लोत्तरच्छदं बद्धवितानं शयनीयं स्याद्' इति।।८२।।

विवरणम्

इत्थं सुरतगृहं प्रविष्टस्य देवस्य शयनीयप्राप्तिमाह—

तत्रेति। सः तत्र प्रियासखः हंसधवलोत्तरच्छदं शयनम् अध्यशेत। तत्र मणिशिलागृहे। प्रियायाः सखा। दयितया सहेत्यर्थः। हंसाः श्वेतगरुतः। 'हंसास्तु श्वेतगरुत' इत्यमरः। हंसवद् धवलम् उत्तरच्छदम् आच्छादनवसनं यस्य तत् शयनं शय्याम् अध्यशेत अधिरुह्याशेत। 'अधिशीङ्स्थासां कर्म' (१.४.४६) इति अधिशब्दयोगाच्छयनस्य कर्मत्वम्। परमेश्वरो दयितया सह मणिशिलागृहे सिततमायां शय्यायामशेतेत्यर्थः। अत्रोपमामाह—रोहिणीपतिः शारदाभ्रम् इव इति। रोहिणीपतिश्चन्द्रः। अत्र रोहिणीपतिशब्देन रोहिण्या सहेत्ययमर्थो ध्वन्यते। शारदं शरत्कालभवम्। अभ्रं मेघः। यथा चन्द्रः प्रियतमया रोहिण्या सह शारदाभ्रमधिशेते, तथेत्यर्थः। शारदाभ्रं हि श्वेततरं भवति। शयनशरदभ्रयोः साधारणं धर्ममाह—जाह्नवीपुलिनचारुदर्शनमिति। जाह्नव्या गङ्गायाः पुलिनं सैकतम्। 'तोयोत्थितं तत् पुलिनं सैकतं सिकतामयमि'त्यमरः। तद्वच्चारु मनोहरं दर्शनं यस्य तत्। पुलिनं हि सर्वासामपि नदीनां श्वेतं भवति। किं पुनरतिश्वेतसलिलाया जाह्नव्या इति द्योतयितुं जाह्नवीपदोपादानम्। अत्र बहुषु रतोपकरणेषु सत्स्वपि तेषु शय्याया एव प्रधानोपकरणत्वस्य कामशास्त्रप्रसिद्धिस्तन्मात्रवर्णने हेतुरित्यवसेयम्। यदाह वात्स्यायनः—'सुक्लृप्तमुभयोपधानं मध्ये विनतं शुक्लोत्तरच्छदं बद्धवितानं शयनीयं स्याद्' इति।।८२।।

क्लिष्टचन्द्रमदयैः कचग्रहै-
रुत्पथार्पितनखं समत्सरम्।
तस्य तच्छिदुरमेखलागुणं
पार्वतीरतमभूदतृप्तये॥८३॥

प्रकाशिका

क्लिष्टेति। उत्पथार्पितनखं शास्त्रीयनियमोल्लङ्घिनखकर्म। तदुक्तं 'रतिचक्रे प्रवृत्ते तु नास्ति शास्त्रं न च क्रमः' इति। समत्सरं कलहरूपत्वात् सुरतस्य। तदुक्तं—'कलहरूपं सुरतमाचक्षत' इति। मत्सरेण च कृतप्रतिकृतादि द्योत्यते, यद् वधूरते दुर्लभत्वेन प्रागुक्तम्। तदुक्तं—

> कृते प्रतिकृतं कुर्याच्चुम्बिते प्रतिचुम्बितम्।
> करणेन च तेनैव ताडिते प्रतिताडितम्।।

इति। अयं च प्रागुक्तवधूरतविपर्ययः, प्रौढमन्मथरसत्वेन नायिकाया गाढरागत्वात्। अतृप्तये औत्सुक्याय।।८३।।

विवरणम्

अथ रतमेव वर्णयति—

क्लिष्टेति। तस्य तत् पार्वतीरतम् अतृप्तये अभूत्। तस्य परमेश्वरस्य तत् लोकोत्तरगुणविशिष्टत्वादवाङ्मानसगोचरं पार्वत्या रतं सुरतम् अतृप्तये। अत्रत्योऽयमतृप्तिशब्दो न तृप्त्यभावमात्रवाची, किन्तु अधर्मादिवद् विपरीतवाची। औत्सुक्यायाभवदित्यर्थः। औत्सुक्यकरत्वमेव प्रतिपादयति चतुर्भिर्विशेषणैः। तत्रादौ रतस्य पूर्वावस्थामाह—अदयैः कचग्रहैः क्लिष्टचन्द्रम् इति। अदयैः निर्दयैः। रागपारवश्यादनधिगतशारीरमार्दवैरित्यर्थः। कचग्रहैः केशग्रहणैः। चुम्बनादिषु सम्भवद्भिरित्यर्थः। क्लिष्टः परिमृदितः चन्द्रः परमेश्वरकोटीरघटितो बालचन्द्रः येन तत् तथा। अथ द्वितीयामवस्थामाह—उत्पथार्पितनखमिति। उत्पथमित्यर्पणक्रिया-विशेषणम्। उत्पथमुल्लङ्घितकामशास्त्रक्रमं यथा भवति तथार्पितानि नखानि येन तत् तथा। शास्त्रीयक्रमोल्लङ्घिनखव्यापारमित्यर्थः। इयं च रतस्य परिपूर्णावस्था। तादृश्यां शास्त्रक्रमानादरोऽपि कामशास्त्रप्रसिद्धः। यथोक्तं—'रतिचक्रे प्रवृत्ते तु नास्ति शास्त्रं न च क्रमः' इति। पुनश्च ततोऽप्यधिकोत्कर्षे सति तृतीयं विशेषणं—समत्सरमिति। सुरतस्य कलहरूपत्वान्मत्सरसहितमित्यर्थः। कलहरूपत्वमपि सुरतस्य कामशास्त्रप्रसिद्धम्। 'कलहरूपं हि सुरतमाचक्षत' इत्युक्तत्वात्। मत्सरशब्देनात्र कृतप्रतिकृतादिकं द्योत्यते। तदुक्तं—

> कृते प्रतिकृतं कुर्याच्चुम्बिते प्रतिचुम्बितम्।
> करणेन च तेनैव ताडिते प्रतिपादितम्।।

इति। अनेन वचनेन 'दुर्लभप्रतिकृतं वधूरतम्' (८.८) इत्यत्र वधूरते यद् दुर्लभत्वेन पूर्वमुक्तं, तत् सर्वमिदानीं प्रौढतया गाढरागायां नायिकायां सुलभमासीदिति द्योत्यते। रतेरन्त्यावस्थामाह—छिदुरमेखलागुणमिति। छिदुरःस्वय-

मेवच्छेदनशीलः मेखलागुणः काञ्चीकलापो यत्र तत् तथा। बहुविधकरणभेदभाविनामायासानामसहनतया सञ्छिन्नमेखलाकलापमित्यर्थः।।८३।।

केवलं प्रियतमादयालुना
ज्योतिषामवनतासु पङ्क्तिषु।
तेन तत्परिगृहीतवक्षसा
नेत्रमीलनकुतूहलं कृतम्॥८४॥

प्रकाशिका

तत्र विशेषमाह—

केवलमिति। अतृप्तेनापि देवेन केवलं रतक्लान्तामुरसि शयितां प्रियां दयमानेन गलितप्रायायां रजन्यां शयनादरः कृत इत्यर्थः। अत्र केवलशब्देनास्य वाक्यस्य पूर्ववाक्येनैकवाक्यता द्योत्यते। अस्ति चास्यैवैतच्छाया कवेरुक्तिः "अस्यापिद्यां स्पृशति वशिनश्चारणद्वन्द्वगीतः पुण्यः शब्दो मुनिरिति मुहुः केवलं राजपूर्वः" (शाकु.२.१४) इति।।८४।।

विवरणम्

यद्यपि तथाविधं पार्वतीरतं देवस्य तृप्तये न बभूव, तथापि विशेषोऽस्तीत्याह—

केवलमिति। ज्योतिषां पङ्क्तिषु अवनतासु तेन केवलं प्रियतमादयालुना नेत्रमीलनकुतूहलं कृतम्। ज्योतिषां नक्षत्राणां पङ्क्तिषु समूहेषु अवनतासु अत्युज्ज्वलत्वाभावादत्युन्नतां स्थितिमपहाय किञ्चिदानतस्वरूपत्वेन लक्ष्यमाणासु। अनेन प्रभातकालप्रत्यासत्तिरुक्ता। तेनं परमेश्वरेण केवलं प्रियतमायां देव्यां दयालुना दयाशीलेन नेत्रयोर्निमीलने कुतूहलं कौतुकं कृतम्। गलितप्रायायां रजन्यां यदत्र देवेन नेत्रनिमीलनादरः कृतः, तत्र सुरतक्लान्तायां देव्यां दयालुत्वमेव केवलं हेतुः, न तु देव्यास्तत्तादृशमारवीरमहोत्सवानुभवे तृप्तिरिति भावः। यद्यपि देवस्य तत्तादृशं पार्वतीरतं न तृप्तये बभूव, तथापि केवलं प्रियतमायां दयालुतया देवेन शयनादरः कृत इति पूर्वश्लोकेन सहैकवाक्यत्वमस्य श्लोकस्यात्रत्यः केवलशब्दः प्रतिपादयति। देवस्य नेत्रनिमीलनप्रस्तावे देव्याः समवस्थां देवविशेषणमुखेन दर्शयति—तत्परिगृहीतवक्षसेति। तया देव्या परिगृहीतं स्वीकृतं वक्ष उरःप्रदेशो यस्य तेन। अनेन सुरतक्लान्ताया देव्या देवोपरि शयनमुक्तम्।।८४।।

स व्यबुध्यत बुधस्तवोचितः
शातकुम्भकमलाकरैः समम्।
मूर्छनापरिगृहीतकैशिकैः
किन्नरैरुषसि गीतमङ्गलः॥८५॥

प्रकाशिका

स इति। बुधानामध्यात्मशास्त्रविदां स्तवस्योचितः। यतस्त एव सकलतत्त्वातीतमेनं जानन्ति। अन्ये तु लोकसामान्यं जानीयुः। तान् प्रति वास्तवोऽयं परमेश्वरे रागिव्यवहारः। शातकुम्भेति विशेषणं मानसस्य सरसः प्रत्यासन्नत्वात्। वक्ष्यति च 'रचितमानसोर्मयः' (८.८६) इति। सममिति सहोक्तिः। मूर्छनया परिगृहीतः कैशिको रागविशेषो यैः। मूर्छनालक्षणे भरतः—'क्रमयुक्ताः स्वराः सप्त मूर्छना परिकीर्तिता' इति। गीतानि मङ्गलान्यात्मचरितानि यस्य। परमेश्वरचरितमेव हि परमं मङ्गलम्॥८५॥

विवरणम्

इत्थमनुभूतवल्लभासुरतस्य निद्रासुखमभिनयतो देवस्य प्रबोधावस्थां वर्णयति—

स इति। सः उषसि शातकुम्भकमलाकरैः समं व्यबुध्यत। शातकुम्भं सुवर्णम्। 'स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम्, तपनीयं शातकुम्भमि'त्यमरः। शातकुम्भमयानि कमलानि शातंकुम्भकमलानि तेषामाकराः शातकुम्भकमलाकराः मानसादयः। मानसस्य सरसो गन्धमादनप्रत्यासन्नत्वादेवमुक्तम्। अत एव 'रचितमानसोर्मयः' इति वक्ष्यति। सममिति सहार्थमव्ययम्। 'साकं सार्धं समं सहे'त्यमरः। व्यबुध्यत प्रबुद्धोऽभूत्। य एवं सुरतमनुभूय प्रसुप्तः, सः आत्मपर्यन्तवर्तिभिर्मानसादिपद्माकरैः सार्धं प्रबुद्धोऽभूदित्यर्थः। समं व्यबुध्यतेति सहोक्तिरलङ्कारः। तत् पुनरनेन प्रकरणेन परमेश्वरे रागित्वोपवर्णनं कृतं, तत्र परमार्थतया मन्तव्यमित्याह—बुधस्तवोचित इति। बुधानामध्यात्मशास्त्रविदां स्तवस्य स्तुतेरुचितः। योग्यः। स्वरूपज्ञानाधीना हि स्तुतिः। परमेश्वरस्य स्वरूपज्ञानं तु सकलोपनिषदर्थतत्त्वावधारणेन मृदितकषायाणामेव सम्भवति, नान्येषामिति तेषामेव स्तुतेरयमुचितः। तस्मात् परमेश्वरस्य न सकलजनसाधारणं रागित्वं, भक्तानुग्रहार्थमारोपितमेवेति भावः। अथ लौकिकलोकोत्तरनायकानुगुणां प्रभातसमयोचितां स्तुतिं वर्णयति—मूर्छनेत्यादिना। किन्नरैः गीतमङ्गलः। किन्नरैः किम्पुरुषैः। किन्नराणामेव स्वरमाधुर्यप्रसिद्धेः किन्नरपदोपादानम्। गीतानि मङ्गलान्यात्मचरितानि यस्य स तथा। परमेश्वरचरितमेव हि परमं मङ्गलं, 'मङ्गलानां

च मङ्गलमि'त्युक्तत्वात्। प्रभातसमयोचितं रागविशेषं च दर्शयति—मूर्छनापरिगृहीतकैशिकैरिति। अत्र मूर्छनालक्षणं भरतेनोक्तं—'क्रमयुक्ताः स्वराः सप्त मूर्छना परिकीर्तिते'ति। कैशिकः प्रभातकालोचितो रागविशेषः। मूर्छनया परिगृहीतः स्वीकृतः कैशिको यैस्तैः।।८५।।

तौ क्षणं शिथिलितोपगूहनौ
दम्पती रचितमानसोर्मयः।
पद्मभेदपिशुनाः सिषेविरे
गन्धमादनवनान्तमारुताः॥८६॥

प्रकाशिका

ताविति। शिथिलितोपगूहनौ, स्वेदापनयनार्थम्। भेदो विकासः। विशेषणाभ्यां शीतत्वं पद्मसुरभित्वं चोक्तम्। गन्धमादनसम्बन्धेन नानाकुसुमसौरभयोग उक्तः। तौ दम्पती सिषेविर इत्यनेन कस्तन्मिथुनं सर्वात्मना न सेवेतेति ध्वन्यते। अर्थान्तरन्यासध्वनिश्चायम्।।८६।।

विवरणम्

अथ प्रभातवातानामपि तादृशमिथुनसेवां वर्णयति—

ताविति। गन्धमादनवनान्तमारुताः तौ दम्पती क्षणं सिषेविरे। अत्रत्योऽयमन्तशब्दः स्वरूपवाची। गन्धमादनपर्वते ये वनान्ताः वनप्रदेशाः तत्रत्या मारुताः तौ दम्पती तत्तादृशौ जायापती। अनेन सर्वजनसेव्यत्वं ध्वनितम्। क्षणं क्षणकालम्। अनेन सेवायास्तादृशावसरप्राप्तिरुक्ता। सिषेविरे सेवितवन्तः। गन्धमादनवायवो देवयोः सुरतश्रममपनीतवन्त इत्यर्थः। अत्र गन्धमादनशब्देन बहुविधमहाकुसुमसौरभ्यशालित्वमुक्तम्। तादृशमारुतसेवासमये देवयोस्तदनुरूपां प्रवृत्तिमाह—शिथिलितोपगूहनाविति। शिथिलितं मन्दीकृतम् उपगूहनमालिङ्गनं याभ्यां तौ तथा। शरीरगतस्वेदजलापनयनार्थं परित्यक्तगाढालिङ्गनावित्यर्थः। आलिङ्गनस्य सर्वात्मना परित्यागाभावस्तु रागवशादित्यवगन्तव्यम्। शैत्यमान्द्यसौरभ्यशालिनामेव मारुतानां सुखकरत्वादेतेषां तद्योगित्वमाह—रचितेत्यादिना विशेषणद्वयेन। तत्र शैत्यं मान्द्यं चाह—रचितमानसोर्मय इति। रचितो निर्मितो मानसस्य मानससरसः ऊर्मयः कल्लोला यैस्ते तथा। अत्र मानसोर्मिरचनया परिश्रान्तत्वान्मान्द्यम् ऊर्मिसम्बन्धेन शैत्यं च द्योत्यते। सौरभ्यमाह—पद्मभेदपिशुना इति। पद्मानां कमलानां भेदस्य विकासस्य पिशुनाः सूचकाः। 'पिशुनौ खलसूचकावि'त्यमरः। पद्मसौरभ्यशालित्वात् प्रभातसमयभाविनां पद्मविकासानां सूचका इत्यर्थः। अत्र तौ दम्पती सिषेविर

इत्यनेन तादृशं मिथुनं के न सेवेरन्निति ध्वन्यते। अर्थान्तरन्यासध्वनिश्चायम्।।८६।।

ऊरुमूलनखमार्गराजिभि-
स्तत्क्षणं हृतविलोचनो हरः।
वाससः प्रशिथिलस्य संयमं
कुर्वतीं प्रियतमामवारयत्।।८७।।

प्रकाशिका

पुनरप्यनुपशान्तरागस्य यूनो वृत्तं वर्णयति—

ऊरुमूलेति। नखमार्गराजिभिर्नखपदरेखाभिः। संयमं बन्धम्। तद्वारणं नखपददिदृक्षया रिरंसया च।।८७।।

विवरणम्

इत्थं बहुविधेषु सुरतेषु विहितेष्वप्यशान्तरागस्य कामिनो वृत्तं वर्णयति ऊरुमूलेत्यादिभिस्त्रिभिः श्लोकैः—

ऊरुमूलेति। हरः तत्क्षणं प्रशिथिलस्य वाससः संयमं कुर्वतीं प्रियतमाम् अवारयत्। हरः परमेश्वरः तत्क्षणं तस्मिन् क्षणे प्रशिथिलस्य पूर्वं सुरतावसानसमये वेष्टितस्यापि प्रियतमाङ्गसङ्गवशात् पुनरपि प्रकर्षेण शिथिलस्य गलितस्य वाससः वसनस्य संयमं वेष्टनं कुर्वतीं विदधतीं प्रियतमां दयिताम् अवारयत् निवारितवान्। प्रभातसमये दयिताया वसनपरिधानमवारयदित्यर्थः। वारणे हेतुमाह—ऊरुमूलनखमार्गराजिभिः हृतविलोचन इति। ऊर्वोर्मूले ये नखमार्गाः नखपदानि तेषां राजिभिः रेखाभिः। 'रेखास्तु राजय' इत्यमरः। हृतविलोचनः हृतानि बिलोचनानि यस्य स तथा। ऊरुमूलगतनखपदप्रेक्षणकुतूहलादित्यर्थः। अनेन रिरंसाया अनुपरमो ध्वन्यते।।८७।।

स प्रजागरकषायलोचनं
गाढदन्तपददारिताधरम्।
आकुलालकमरंस्त रागवान्
प्रेक्ष्य भिन्नतिलकं प्रियामुखम्।।८८।।

प्रकाशिका

स इति। अत्र विशेषणानां चतुर्णामप्येकैकं परममुद्दीपनम्। अत एव रागवान् अतिशयितरागोऽरंस्त।।८८।।

विवरणम्

उदीर्णरागस्य कामिनः सुरतपरिश्रमपिशुनं प्रियतमावदनमपि सुतरां मन्मथोद्दीपनमासीदित्याह—

स इति। सः प्रियामुखं प्रेक्ष्य अरंस्त। प्रियाया दयिताया मुखं प्रेक्ष्य विलोक्य अरंस्त रेमे। परमेश्वरः प्रभातप्रायायामपि रजन्यां दयितामुखकमलावलोकनेनैव रेम इत्यर्थः। प्रियतमामुखस्य तदानीं मन्मथोद्दीपनत्वातिशयमाह—प्रजागरेत्यादिभिश्चतुर्भिर्विशेषणैः। प्रजागरकषायलोचनम्। प्रजागरेण प्रकृष्टेन जागरेण कषाये कलुषिते लोचने नयने यस्य तत्। निद्राभावकलुषितकान्तविलोचनमित्यर्थः। पुनश्च गाढदन्तपददारिताधरं गाढेन मग्नेन दन्तपदेन दन्तव्रणेन दारितं क्षतम् अधरं(?) यस्य तत्। दशनव्रणरमणीयाधरमित्यर्थः। तथा आकुलालकम्। आकुलाः कचग्रहणादिभिर्व्याकुलसन्निवेशाः अलका यस्य तत्। तथा च भिन्नतिलकम्। भिन्नः स्वेदादिभिरर्धे विशीर्णः तिलको यस्य तत्। अत्र चतुर्णामपि विशेषणानामेकैकमप्युद्दीपनं, किं पुनरेकत्र मेलनमिति भावः। अत एवाह—रागवानिति। अतिशायने मतुप्। अतिशयितराग इत्यर्थः। प्रतिक्षणविजृम्भमाणाभिलाष इति भावः।।८८।।

तेन भङ्गविषमोत्तरच्छदं
मध्यपिण्डितविसूत्रमेखलम्।
निर्मलेऽपि शयनं निशात्यये
नोज्झितं चरणरागलाञ्छितम्॥८९॥

प्रकाशिका

तेनेति। भङ्गस्तरङ्गः। निम्नत्वान्मध्ये पिण्डिता समूहीकृता विसूत्रा मेखला यत्र। निर्मले तमोरहिते। अत्र शयनविशेषणैश्चित्ररतानि सूच्यन्ते। तानि च (१९.२५)रघुवंशप्रकाशिकायां दर्शितानि।।८९।।

विवरणम्

किञ्च, पूर्वातीतचित्ररतपिशुनं शयनीयमपि कामिनो (मनो) जहारेत्याह—

तेनेति। निशात्यये निर्मले अपि तेन शयनं नोज्झितम्। निशात्यये प्रभातसमये निर्मले! तमोविरहित इत्यर्थः। अपिशब्देन शयनमोचनस्य कालातिपातः

सूचितः। तेन परमेश्वरेण शयनं नोज्झितं न परित्यक्तम्। प्रभातवेलायां तमोविरहितायामपि तेन कामिना शयनतलमेवावलोक्य कञ्चित् कालमास्थितमित्यर्थः। शयनीयस्य पूर्ववत् चित्ररतसूचकत्वादिति भावः। चित्ररतसूचकत्वमेवाह—भङ्गविषमोत्तरच्छदमित्यादिना विशेषणत्रयेण। भङ्गस्तरङ्गः, तेन पादाघातादिवशाज्जातेन तरङ्गाकारेण संस्थानविशेषेण विषमः निम्नोन्नतः उत्तरच्छदः आच्छादनवसनं यस्य तत् तथा। 'अत्रोत्तरच्छदस्य निम्नोन्नतत्वप्रतिपादनेन बहवो रतविशेषाः सूचिताः। संविष्टतरमुपविष्टरतमुत्थितरतं चेति त्रिविधा हि करणविशेषाः सङ्क्षेपतः कामशास्त्रप्रतिद्धाः। तत्रैकैकस्यापि करणस्य बहवो बेदाः। ते तु विस्तरभयान्न लिख्यन्ते। तथा मध्यपिण्डितविसूत्रमेखलम्। मध्ये मध्यप्रदेशे पिण्डिता समूहीकृता विसूत्रा सूत्ररहिता मेखला रशना यत्र तत् तथा। शयनीयस्य मध्यभागो हि निम्नो भवतीति प्रागेवोक्तम्। सूत्रप्रोतानां मेखलानां सूत्रे सुरतभेदेन भग्ने सति शयनीयस्य मध्यभागे समूहीभूयावस्थानमनेन दर्शितम्। तेन च विष्णुविक्रमाख्यं रतं सूचितम्। तत्तु गजरतादिषड्भेदभिन्नम्। एवं हि रतिरहस्ये गजरतस्य लक्षणमुक्तं—

गूहितस्तनभुजास्यमस्तकामुन्नतस्फिचमधोमुखीं स्त्रियम्।
क्रामति स्वकरघृष्टमेहने वल्लभे करिवदैभमुच्यते।।

इति। विष्णुविक्रमाख्यं तु तस्मादीषद्भेदभिन्नम्। यथात्रैव 'योषिदेकचरणे समुद्धृते जायते च हरिविक्रमाह्वयम्' इति। एवंविधे सुरते मेखलाभङ्गः कथं न जायेतेति भावः। तथा चरणरागलाञ्छितम्। चरणे पादे यो राग अलक्तकरसः, तेन लाञ्छितम् अङ्कितम्। अनेन धैनुकं रतं विवक्षितम्। यथोक्तं रतिरहस्य एव—

न्यस्तहस्तयुगला निजे पदे योषिदेति कटिरूढवल्लभा।
अग्रतो यदि शनैरधोमुखी धैनुकं वृषवदुन्नते प्रिये।।

इति। एते च करणभेदा अनुक्तानामपि करणविशेषाणामुपलक्षणत्वेन प्रतिपादिताः। एतादृशसुरतभेदपिशुनं शयनतलं कथं कामिना परित्यज्यत इति भावः।।८९।।

स प्रियामुखरसं दिवानिशं
तर्षवृद्धिजनकं सिषेविषुः।
दर्शनप्रणयिनामदृश्यता-
माजगाम विजयानिवेदितः॥९०॥

प्रकाशिका

रागस्य धारावाहित्वमाह—

स इति। तर्षस्तृष्णा। दर्शनप्रणयिनां देवेन लोकतन्त्रेऽधिकृतानां ब्रह्मादीनां विजयानिवेदितोऽप्यदृश्यतां यदाजगाम, तदपि ब्रह्मादिमनीपितानुसारेण कुमारमुत्पादयिष्यतो देवस्य लीलाविजृम्भितं लोकतन्त्रनिर्वाहार्थमेव, यतोऽसौ रागादिभिरपरामृष्टः। तदुक्तं कैश्चित्—'क्लेशकर्मविषाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर' (पातञ्जल. योग.पा.१.सू.२४) इति। एतदेवोक्तं 'विदितं वो यथा' (कुमा.६.२६) इत्यादिप्रकरणे देवेनैव। अयं चाभिसन्धिर्देवस्य सर्वत्रात्र प्रकरणे न विस्मर्तव्यः, अन्यथा तूत्तमदेवतासम्भोगवर्णने ध्वनिकारोक्तमनौचित्यं जागृयात्। 'अनौचित्यादृते नान्यद् रसभङ्गस्य कारणमि'ति च तेनैवोक्तम्। देवाभिसन्धौ तु स्मर्यमाणे दूरीभवत्येवानौचित्यविलसितम्। परमार्थबुद्धावेव ह्यनौचित्यान्वेषः संभवति। नहीन्द्रजालविलसितं जानानस्य गन्धर्वनगरं विस्मयाय। ननु रागित्वस्यापरमार्थबुद्धौ कथं शृङ्गारः प्राणिति। मा प्राणितु। चमत्कारश्च प्राक्प्रतिपादितेन जगद्रक्षणोद्यमात्मना वीरेणैवाङ्गिना रसेन सिद्धः। चमत्कारे च सिद्धे किं शृङ्गारनिबन्धेन। यथा श्रीमद्भागवतादौ गोपीभिः सह भगवतः सम्भोगवर्णने विदितपरमार्थानामनुसन्धातृणां न कश्चिच्छृङ्गारावेधः, किन्तु जगद्रक्षणोद्यमात्मकवीरावेधो यस्तद्विषयायास्तेषां भक्तिपर्यायाया रतेरुद्दीपकः, तथात्रापि द्रष्टव्यम्। किञ्च एवंविधे विषये यदनौचित्यं, तत् कविशक्त्या तिरोहितत्वाद् ग्राम्यत्वेन न प्रतिभासत इति ध्वनिकार उक्तवान्। तत्राभिनवगुप्तपादैर्व्याख्यातं—'शक्तितिरस्कृतत्वादि'ति। सम्भोगशृङ्गारोऽप्यसौ वर्णितस्तथा प्रतिभावनता कविना, यथा तत्रैव विश्रान्तं हृदयं पौर्वापर्यपरामर्शं कर्तुं न ददाति। यथा निर्व्याजपराक्रमस्य पुरुषस्याविषयेऽपि युध्यमानस्य तावत् तस्मिन्नवसरे साधुवादो वितीर्यते, न तु पौर्वापर्यपरामर्शे, तथात्रापीति भावः' इति। तत्र यः पौर्वापर्यपरामर्शोऽनौचित्यप्रतिभासहेतुः, स एवास्माकमपि परमेश्वरे रागराहित्यप्रतिभासहेतुः सन्ननौचित्यं व्यावर्तयति। तर्हि ध्वनिकारोक्तस्य संभोगवर्णनानौचित्यस्य कोऽवकाश इति चेद्, अस्त्येवावकाशः इन्द्रादावुत्तमदेवतान्तरे। तत्र च रागस्य वस्तुतः संभवेऽपि लोकमहनीयत्वात् तत्सम्भोगवर्णनं पित्रोः सम्भोगवर्णनमिव लज्जातङ्कादिना चमत्कारभङ्गहेतुः सम्पद्यत इति सर्वं सुस्थम्।।९०।।

विवरणम्

इत्थं प्रवृद्धो रागः कदाचिदपि न विच्छिन्नः, किन्तु धारारूपेणैव सर्वदापि प्रवृत्तोऽभूदित्याह—

स इति। सः दर्शनप्रणयिनाम् अदृश्यताम् आजगाम। दर्शने प्रणयः प्रार्थना अस्त्येषामिति तथा। भगवता लोकतन्त्रे नियुक्तानां ब्रह्मादीनामिति अर्थात् सिध्यति। अदृश्यो द्रष्टुमशक्यः तस्य भावस्तत्ता ताम् आजगाम प्राप्तोऽभूत्। दिवानिशमन्तरेव विहरन्नयमात्मदर्शनार्थिनां ब्रह्मादीनामपि दर्शनं न विततारेत्यर्थः। ननु किं दर्शनदानाभावे तदर्थिनां ब्रह्मादीनामागमस्याविज्ञानमेव हेतुः, नेत्याह—विजयानिवेदित इति। अपिशब्दोऽत्राध्याहार्यः। विजयया देवीप्रियवयस्यया विज्ञापितोऽपीत्यर्थः। अनेन देवीसखीनामेवान्तःप्रवेशयोग्यतापि ध्वन्यते। दर्शनदानाभावे हेतुमाह—दिवानिशं प्रियामुखरसं सिषेविषुः इति। दिवानिशं सततमित्यर्थः। प्रियामुखे यो रसः अधरामृतं, तं सिषेविषुः सेवितुमिच्छुः। प्रियामुखरससेवाभिलाषस्य सन्ततप्रवृत्तत्वादित्यर्थः। सन्ततप्रवृत्तौ हेतुमाह—तर्षवृद्धिजनकमिति। तर्षस्तृष्णा, तस्य वृद्धिर्वर्धनं, तस्य जनकमुत्पादकम्।।९०।।

समदिवसनिशीथं सङ्गिनस्तत्र शम्भोः
शतमगमदृतूनां सार्धमेका निशेव।
न च सुरतसुखेषुच्छिन्नतृष्णो बभूव
ज्वलन इव समुद्रान्तर्गतस्तज्जलेषु॥९१॥

प्रकाशिका

इत्थं रागिजनाचार्यकमाचरतो योगेश्वरस्य तत्रातिप्रसङ्गत्वमाह—

समेति। दिवसस्य निशीथतुल्यत्वं कार्यान्तरविमुखत्वात्। तत्र तस्य ऋतूनां सार्धं शतमित्यनेन वत्सराणां पञ्चविंशतिर्गतेत्युक्तम्। इदं च मानुषमानेनेति दक्षिणावर्तः। स नाम कियान् कालो देवानाम्। अनेन चतुर्णां पुरुषायुषभागानामेको भागोऽनीयतेति प्रतीयते। समुद्रान्तर्गतो ज्वलनो बाडवः। तस्य यथा जलतृष्णा वर्धते, तथा देवस्याप्यारोपिता विषयतृष्णा ववृध इत्यर्थः। उपमानेन तु यथा बाडवोऽग्निः कालान्तरे समुद्रं शोषयति, तथा देवोऽपि विषयतृष्णोपलक्षितानां मायाकार्याणामत्यन्तोच्छेदहेतुरिति कविर्व्युत्पाद्यं जनं प्रत्याययति। अयं च शिवयोः संभोग उत्तरसर्गार्थस्य कुमारसम्भवस्य प्रस्तावकतयात्रोक्तः। स एव ह्यत्र प्रबन्धे कार्यभूतः। ननु देवानां मन्त्रिते तारकवध उद्देश्यतया दृश्यते। ततस्तस्यैव प्रबन्धकार्यत्वमङ्गीकार्यम्। उच्यते। परमोद्देश्यत्वेऽपि तारकवधोऽत्र प्रबन्धे न कार्यम्। तथाहि—कार्यं नाम वाक्यार्थविशेषः, येनावच्छिन्नं पदजातं प्रबन्ध इति व्यपदिश्यते। तच्चात्र कुमारसम्भवः। ततश्च तेन व्यपदेशः काव्यस्य शिशुपालवध

इतिवत्। तारकवधस्तु तत्प्रस्तावकतयात्र निमित्तभूत उपक्षिप्तः, यथा किरातार्जुनीये दुर्योधनजयः। निमित्तस्यैव वाक्यार्थत्वे 'चर्मणि द्वीपिनं हन्ती'त्यत्रापि चर्मलाभस्य वाक्यार्थत्वं स्याद्, न तु द्वीपिहननस्य। ननु कार्येण सता नायकलाभेन भवितव्यम्। कुमारसम्भवश्च लोकरक्षार्थो लोकतन्त्राधिकृतानां ब्रह्मादीनामेव लाभः। परमपरिपूर्णयोः परमेश्वरयोः स कीदृशो लाभः। नैवम्। तयोरपि लीलया दयया वा ब्रह्मादिभिरधिकृतैर्लोकं तन्त्रयतोः स्वयं च लोकवृत्तमनुकुर्वतोरुपदिशतोश्च स लाभ एव। तर्ह्यारम्भादिभिः कार्यावस्थाभेदैर्नायकगतैर्भवितव्यम्। तदुक्तम्—'अवस्थाः पञ्च कार्यस्ये'त्यादिना। ते चात्र नायकगता न लक्ष्यन्ते, किन्तु ब्रह्मादिगताः। नैवम्। कुमारस्य सम्भूतये खलु योगविसृष्टदेहा सतीदेवी हिमवद्भवनेऽवतीर्णा। तत्प्रत्यासत्तये देवोऽपि गौरीशिखरे तप आतिष्ठत्। देवानामारम्भस्तु तत्संघटनार्थः। सर्वत्र ह्याधिकारिकवृत्तोपकारिणा प्रासङ्गिकवृत्तेन भूयते। तच्च दर्शितं 'सोऽहं तृष्णातुरैर्वृष्टिम्'(६.२७)इत्यादिना। ननु यदि देवैरभ्यर्थ्य परिणयने देवः प्रवर्तितः, तत् किमर्थोऽयं कामवृत्तान्तः कविनोपन्यस्तः। देवीतपश्चर्यामूलत्वेन तस्योपयोगः। तथा च दर्शितं—'तथा समक्षं दहता मनोभवम्'(५.१) इत्यादिप्रकरणे। ननु यदि लोकार्थं परिणयने प्रवृत्तो देवः, तत् किमर्थमनुमतोऽस्य देव्यास्तपश्चर्याक्लेशः। तत्रायमभिप्रायो देवस्य—नाहं कथञ्चिदपि केनापि तपसा विना लभ्य इति लोकस्य विदितमस्त्विति। किञ्च विशिष्टपरिभवो न पथ्य इति प्रथयितुं कामदाहः कृतो देवेन। 'तपः परमं श्रेय' इति ख्यापयितुं तप आस्थितम्। सवोपकारक्षमं गार्हस्थ्यं श्रेय इत्युपदेष्टुं परिणयनमङ्गीकृतम्। एवं नानाविधात्र प्रबन्धे पुरुषार्थव्युत्पत्तिर्भवतीत्यवसेयम्।।९१।।

ये वाक्यार्थविचारकर्कशधियो ये वा रसस्रोतसि
स्वेच्छामज्जनकेलिषु व्यसनिनो ये वा शिवौ संश्रिताः।
ते निर्मत्सरसावधानमनसो मत्कां मनोहारिणीं
संगृह्णन्तु कुमारसम्भवसमुद्बोधाय टीकामिमाम्।।

।। इत्यरुणगिरिनाथविरचितायां कुमारसम्भवप्रकाशिकायाम्

अष्टमः सर्गः।।८।।

विवरणम्

इत्थं रागिजनपदवीमवतीर्णस्य परमेश्वरस्य तत्रैवातिप्रसक्तिमाह—

समेति। तत्र सङ्गिनः शम्भोः ऋतूनां सार्धं शतम् एका निशा इव अगमत्। तत्र तस्यां पार्वत्यां सङ्गः सक्तिरस्यास्तीति सङ्गी तस्य शम्भोः। ऋतूनां वसन्तादीनामृतूनां सार्धम् अर्धसहितं शतं पञ्चाशदुत्तरं शतम् एका निशेव एका रात्रिरिव अगमद् अत्येति स्म। इत्थं देवीगुणगणाक्षिप्तचित्तस्य देवस्य वसन्तादीनाम् ऋतूनां पञ्चाशदुत्तरं शतम् एका रात्रिरिव सद्य एवातीतमभूदिति भावः। ऋतुशतस्यैकनिशोपमानेन सद्यःप्रयातत्वप्रतीतिरुक्ता। तत्र हेतुः तत्र सङ्गिन इत्यनेनोक्तः। ऋतूनां सार्धं शतमिति। अयमर्थः—एकस्मिन् वत्सरे हि षड् ऋतवः। तथा च सति वत्सराणां पञ्चविंशतिर्गतेत्युक्तं भवति। ते च देवसंवत्सरा इत्यर्थादायाति। कार्यान्तरमपहाय कामुकसरणिमेव देव एतावन्तं कालमुररीचकारेति दर्शयितुम्। ऋतुशतं विशिनष्टि—समदिवसनिशीथमिति। दिवसश्च निशीथश्च दिवसनिशीथौ। निशीथोऽर्धरात्रः। 'अर्धरात्रनिशीथौ द्वावि'ति सिंहः। तेन च त्रियामाया मध्यमो भागो लक्ष्यते। स हि शास्त्रेषु सुरतविहितः कालः। दिवसो वासरः। समास्तुल्या दिवसा निशीथाश्च यत्र। अत्र दिवसस्य निशीथतुल्यत्वप्रतिपादनेन कार्यान्तरेष्वनादर उक्तः। अत एव 'दर्शनप्रणयिनामदृश्यतामाजगाम' (८.९०) इत्युक्तम्। तथैव तादृशे काले गतेऽपि सुरततृष्णा न शशामेत्याह—सुरतसुखेषु छिन्नतृष्णः न बभूव च इति। सुरते यानि सुखानि तेषु छिन्ना विच्छिन्ना तृष्णा औत्सुक्यं यस्य तथाभूतो न बभूव। छिन्नतृष्णत्वप्राप्तिसम्भावनायां सत्यामपि नच्छिन्नतृष्णो बभूवेति चशब्देनोच्यते। ननु चिरकालनिषेवणे कथं न तृष्णोपशमः इतीमामाशङ्कामुपमया परिहरति—समुद्रान्तर्गतः ज्वलनः तज्जलेषु इव इति। समुद्रस्यान्तर्भागं गतः ज्वलनः अग्निः। बाडवाग्निरित्यर्थः। तज्जलेषु तस्य समुद्रस्य जलेष्विव। यथा सन्ततपीतसमुद्रजलस्य बडवानलस्य जलतृष्णा वर्धते, तथा देवस्यापीति भावः। अत्र देवस्य बाडवोपमया यथा बाडवाग्नेः, समुद्रजलतृष्णा न स्वतोऽस्ति, किन्तु द्रष्टृजनप्रतीतिमात्रसिद्धा, तथा देवस्य विषयतृष्णापीति ध्वन्यते। इदं च शिवयोः सम्भोगवर्णनं कुमारसम्भवस्योपक्षेपार्थं कृतम्। कुमारसम्भव एव हि प्रबन्धसाध्य इति पूर्वमेवोक्तम्। ननु प्रबन्धे यत् साध्यं, तेन नायकलाभभूतेन भवितव्यम्। यथा युधिष्ठिरविजयादौ दुर्योधनजयादयः। अत्र तु कुमारोत्पत्तिरिन्द्रादीनामेव कार्यं पुष्णाति, तस्यास्तारकासुरनिग्रहफलत्वात्। परिपूर्णस्य परमेश्वरस्य कुमारोत्पत्त्या तारकानिग्रहणेन वा न कमपि लाभं पश्यामः। मैवम्। लीलया जगत्सर्गस्थितिसंहारव्यापृतस्य परमेश्वरस्यापि जगद्रक्षणजागरूकत्वोपपत्तेः। एवमेव मायापरपर्यायायास्तच्छक्तिभूताया देव्या अपि तदनुविधानोपपत्तिः समर्थनीया। ननु,

अवस्थाः पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः।
आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः।। (दशरू. १.१९)

इत्युक्ताः कार्यावस्थाभेदा नात्र नायकगता लक्ष्यन्ते। आरम्भो ह्यत्र देवानामेव। 'तस्मिन् विप्रकृताः काले तारकेण दिवौकसः' (२.१) इत्युक्तत्वात्। मैवम्—

अथावमानेन पितुः प्रयुक्ता दक्षस्य कन्या भवपूर्वपत्नी।
सती सती योगविसृष्टदेहा तां जन्मने शैलवधूं प्रपेदे।। (१.२१)

इत्यत्र जगद्रक्षणार्थं कुमारोत्पत्तिकामाया देव्या हिमवद्भवनावतारस्योक्तत्वात्। देवोऽपि तत्रत्यासत्त्यर्थमेव हिमवत्प्रस्थे तपश्चक्रे। इन्द्रादीनामारम्भस्तु तयोः सङ्घटनार्थमेव, तथा शाकुन्तलादौ सखीप्रभृतीनाम्। अस्मिन् काव्ये महाकविना देवयोस्तपश्चरणप्रतिपादनेन तपसः सकलपुरुषार्थसाधनत्वं प्रतिपादितम्। महाजनपरिभवः समूलनाशाय भवतीति व्युत्पादयितुं कामदहनवृत्तान्त उपवर्णितः। सर्वोपकारक्षमं गार्हस्थ्यमेव परमं श्रेय इति दर्शयितुं विवाहवर्णनं कृतम्। देवस्य भक्तवश्यतां प्रतिपादयितुमष्टमसर्गे देव्या अनुवृत्तिः प्रतिपादिता। इत्थमस्मिन् काव्ये बहवः पुरुषार्था महाकविना प्रतिपादिता इत्यूहनीयमिति सर्वं सुमङ्गलम्।।९१।।

सर्गोऽयं चरमो गुणैरचरमः सम्भोगलीलायितं
शम्भोरत्र हि वर्ण्यते कवयिता श्रीकालिदासः स्वयम्।
व्याख्या तद्विषयेयमद्य जगतां हासाय सञ्जायते
सन्तस्त्वत्र तथाप्यणूनपि गुणानास्वादयेयुर्ध्रुवम्।।

वैदेहीनवसङ्गचम्पुरचनादक्षस्य नारायण-
क्ष्मादेवस्य कृतौ गिरीशगिरिजाभक्तिप्रवृद्धोदये।
व्याख्यानेऽत्र कुमारसम्भवपदार्थालोचनप्रक्रिया-
निष्णाते मधुरोऽष्टमोऽयमगमत् सर्गो निसर्गोज्ज्वलः।।

काली च नीलकण्ठश्च तत्परौ यत्प्रिये सदा।
तेनेयं रचिता व्याख्येत्यत्र को नाम विस्मयः।।

माता काली पिता वा पदनतविबुधो नीलकण्ठश्च यस्य
भ्राता तु श्रीकुमारः स खलु निखिलमप्युत्थितं विघ्नजातम्।
निघ्नन् निघ्नेशकल्पः कृतविवृतितरिर्दुस्तरं कालिदासा-
दुद्भूतं काव्यरत्नाकरमिममकरोद् बाललीलानुकूलम्।।

बहुप्रलापप्रमुखेषु भूरिषु
स्फुटेषु दोषेष्विह सम्भृतेष्वपि।
गुणाः क्वचित् केचन सन्ति चेदिमान्
पिबन्तु भूयिष्ठगुणा महाजनाः।।

समस्तलोकोपकृतौ कृतोद्यमो य एवमालक्षितसर्वलक्षणः।
स्फुटं समाचष्ट कुमारसंभवं नमामि तं देशिकवर्यमादरात्।।

श्वेतग्रामवनाह्वये मुररिपोरारामभूते वरे
ग्रामे यः पुरुषोत्तमः समुदभूत् ख्यातः कवीनां पदे।
पुत्र्यास्तस्य सुतः स्वमातुलमुखादापीतकौमारत-
न्त्राम्भोधिप्रभवामृतो रचितवानेतं स नारायणः।।

।। इति श्रीकृष्णशिष्यस्य नारायणस्य कृतौ कुमारसम्भवविवरणे
अष्टमः सर्गः।।८।।

।।शुभं भूयात्।।

●

परिशिष्टम्

१. मूलपाठभेदाः
२. ग्रन्था ग्रन्थकृतश्च
३. कालिदाससन्दर्भाः
४. अलङ्काराः
५. उद्धरणानि
६. कुमारसम्भवश्लोकानुक्रमः

(१) पाठभेदाः[१]

श्लोकः	कालिदासग्रन्थावलि-२	अरुणनारायणौ
		प्रथमः सर्गः
१.	तोयनिधी वगा	वारिनिधी वगा
१४.	गृहद्वार	गृहद्वारि
१७.	यज्ञभागं	यज्ञभागः
२२.	दिक्पांसु	दिक् पांसु
२४.	चकासे	चकाशे
२५.	लेखा	रेखा
२८.	०रसं नि. बाल्यम्	०रसान् नि. बाल्यम्
३१.	चतुरस्रशोभि	चतुरस्रशोभम्
३२.	निक्षेपणात्	विक्षेपणात्
३३.	सन्नताङ्गी	सन्नतांसा
३४.	लावण्य उत्पाद्यइ	लावण्यमुत्पत्तुमिवा
३९.	यौवनेन कामस्य	यौवनस्य कामेन
४०.	शिरीषपुष्पा	शिरीषमाला
	कण्ठपाशो	कण्ठपाशौ
४४.	प्रजल्पि	सञ्जल्पि
४७.	तं केशपाशं	तत् केशपाशं
५३.	गङ्गाप्रवाहोक्षित	गङ्गाप्रपातोत्थित
५५.	शैलेयमद्धे	शैलेयगन्धे
५७.	समेताम्	समग्राम्

---

१. संस्करणेऽस्मिन्नरुणगिरिनाथनारायणाभ्यां कुमारसम्भवस्य यन्मूलमादृतं यच्चास्माभिः कालिदास-ग्रन्थावल्या द्वितीये संस्करणे तयोरन्तरं लेशत उपस्थाप्यते, कणेहत्य तु सचेतोभिरेव तदनुसन्धेयम्।

का.ग्र.	अ.ना.
	द्वितीयः सर्गः
४. नमस्त्रिमू	नमोऽस्त्वमू
५. अतश्च	अदश्च अत इति पाठे पौनरुक्त्यम्, अ.
प्रभवः	प्रभावः
११. द्रवः	— पद्यमिदम्, अ.ना.न पठतः
१२. देवता	दैवतम्।
सर्गशेषप्रणयनात्	सर्गशेषविधायित्वात्
१५. यथार्थाः	याथार्थ्य
१९. किमित	किमिदं
यथा पुरा	यथापुरम्
२४. क्षति	क्षय
२७. बलवत्तरैः	बलोत्तरैः
३०. स द्विनेत्रं	स विनेतृ
सहस्त्रनयनाधिकम्	दशचक्षुःशताधिकम्
३२. साध्यते	सिद्ध्यति
३३. भवत्लब्धवरो	त्वया दत्तवरो
३४. लेखाम्	रेखाम्
४२. संसुप्तः	सन्तप्तः
४९. निष्क इवा	निष्कमिवा
५०. पुष्करा॰	पुष्पका॰
५१. सृष्टम्	स्त्रष्टुम्
५५. वरेण शमितं	वरेणाऽशमि
५७. मुद्यतम्	मुद्गदम्
निषिक्तस्य	निषिक्तात् तु
	तृतीयः सर्गः
१. श्रितेषु	श्रितेऽपि
२. विसृष्ट	निसृष्ट
५. कटाक्षैः	विलासैः

का.ग्र.	अ.ना.
६. पीडयामि	पीडयानि
८. सरसापरा	सहसापरा
१४. च्चैद्विषामीप्सितमेदेव	स्तरामीप्सितमर्थमत्र
१५. निपातसाध्यो	निपातहार्यो
२०. महो बतासि	महो यथाऽसि
२१. नोदयिता	श्चोदयिता
२३. प्रार्थितकार्य	प्रार्थितकर्म
२४. समाधेः प्रति	समाधिप्रति
°माधाय	°मादाय
२५. कुबेरगुप्ताम्	कुबेरनाथाम्
२६. आसिञ्जित	आशिञ्जित
२७. सद्यः	सख्युः
३६. कृष्णशारः	कृष्णसारः
३८. चुचुम्बे	चुचुम्ब
४३. दृष्टिप्रपातं	दृष्टिप्रतीपं
४६. प्रभासङ्ग	प्रभाऽभ्यङ्ग
५०. °मार्यां लक्ष्मीं	°मार्यान् रश्मीन्
५३. आकृष्ट	आक्रुष्ट
५७. पुष्पचापः	पुष्पकेतुः
स्वकार्य°	स्वकर्म°
राशशंसे	राशशंस
६१. प्रणिपातपूर्वं	प्रणिपत्य पूर्वं
६३. तथ्यमेवा	भव्यमेवा
६८. स्फुटद्बाल°	कुचद्बाल°
साचीकृता	साचीक्रिया
७१. दुष्प्रेक्ष्य	दुष्प्रेक्ष
७५. समर्थ्य	समीक्ष्य
७६. °कृतात्मा	°कृताभ्रः

	का.ग्र.	अ.ना.

चतुर्थः सर्गः

५.	न विदीर्ये	न च दीर्ये
१५.	स्वनै॰	स्वरै॰
१६.	॰दूतिपदेषु कोकिलाम् ॰ताम्	दूतपदेषु कोकिलान्॰ ॰तान्
१९.	रसि	रपि
२१.	जीविते	जीवती॰
२५.	रिवार्दितः	रिवार्पितः
२७.	सुहृदः	सुहृदं
	यदिदं, प्रकीर्य॰	तदिदं॰॰ विकीर्य
३२.	ननु	अनु
३५.	प्रणि॰॰ याचितश्चि॰	विनि॰॰ याचितां चिताम्
३६.	मां विना	मद् विना
४२.	नियोजयि॰	समग्रयि॰
४३.	धर्मयाचितः	धर्मचारिणि
४४.	रविपीत॰	अपि वीत॰
४५.	सुचरितार्थपदैः	समभिवृद्धरसैः
४६.	परिपा॰	प्रतिपा॰
	लेखा	रेखा

पञ्चमः सर्गः

२.	॰रूपताम्	॰कामताम्
	वा	तत्
३.	गिरीशप्रति	गिरीशं प्रति
४.	मनीषिताः सन्ति	मनीषितायार्च
५.	ध्रुवेच्छा॰	स्थिरेच्छा॰
७.	गौरी शिख॰	गौरीशिख॰
१०.	रसना॰	रशना॰
११.	विसृष्टरा॰	निसृष्टरा॰

	का.ग्र.	अ.ना.	
१३.	द्वयेऽपि	द्वयीषु	
	दृष्टं	॰दृष्टिर्हं॰	
१४.	॰प्रस्त्रवणैर्व्य॰	॰प्रस्नविनी व्य॰	
१७.	तच्च	तत्र	
१८.	पूर्वतपःसमा॰	सर्वसमा समा॰	
१९.	लीलया	॰सेवया॰	
	॰निर्मितं	॰धर्मि यन्	
२०.	हविर्भुजां शुचिस्मिता	शुचिस्मिता हविर्भुजां	
२२.	किल	खलु	
	॰साधनः	साधनम्	
२३.	द्विविधेन	द्विविधेन	विविधेन मल्लि:
	॰सम्भृतेन च	॰सम्भृतेन सा	
२४.	॰धरोत्सेध॰	॰धरोत्सङ्ग	
२७.	॰सन्धानः	॰सन्तान॰	
२८.	प्रियम्बदां	प्रियंवदा	
	नारायणे पाठान्तरत्वेन दर्शितम्		
३०.	तेजसा	वर्चसा	
	शरीरबद्धः	शरीरबन्धः	
३१.	॰म्येऽपि नि॰	॰म्येऽभिनि॰	
३५.	प्रणयापराधिषु	प्रणयापराधिषु	प्रणयापहारिषु मल्लि:
	॰क्षि प्रचलै॰	॰क्षेपचलै॰	
३७.	बलिप्रहासि	॰बलिप्रभासिभिः	
३८.	भाविनि!	भामिनि!	
३९.	न मां परं सम्प्रति॰	न मां परं सा प्रति॰	
	यतः सतां	यदा सतां	
४०.	प्रतिवक्तुमर्हसि	प्रतिबोधयिष्यसि	
४१.	॰मिवोदितं	॰मिवार्जितं	
४२.	कृशोदरि!	तलोदरि!	

का.ग्र.	अ.ना.
४३. ॰सूचये	॰सूतये
४४. स्फुटचन्द्रतारके	विनिकीर्णतारका
४८. शशाङ्कलेखा	शशाङ्करेखा
४९. लक्ष्यं चिर॰	लक्ष्यं रवि॰
५१. विवर्तिता॰	निवर्त्तिता
५२. वर्णिनम्	वाञ्छितम्
५३. मानिनी	भामिनी
५४. ॰मक्षणोद्	मक्षिणोद्
५७. ॰त्यलक्ष्यवा	॰त्यलक्षवा॰
यदा	सदा
५८. जनं कथम्	कथं जनम्
॰हस्तालिखित॰	॰हस्तोल्लिखित॰
५९. यदा च	यदा हि
६०. दृष्टमे॰	बद्धमे॰
६१. कदा	सदा
अस्रोत्तर॰	अस्रान्तर॰
॰मभ्युप॰	॰मभ्यव॰
६४. ॰नोत्सुकः (अरुणोऽप्यत्रैवादृतः)	'॰नोन्मुखः' ना॰
६५. पुनरेव	पुर एव
न च	न तु
६७. स्वयम्	स्वतः
कलहंस॰	क्व च हंस॰
गजाजिनं	क्व चाजिनं
च	तत्
७०. ॰हार्यया	॰भार्यया
७१. कपालिनः	पिनाकिनः
कलावतः	कलात्मनः
७४. विकुञ्चि॰	निकुञ्चि॰

	का.ग्र.	अ.ना.
७९.	रजोविशु॰	रजोऽपि शु
८०.	उपगम्य	उपनम्य
८३.	महतोऽपभा॰	महतो विभा
८४.	बाला स्तन	सा च स्तन
८५.	निक्षेपणाय	निक्षेप एव
८६.	॰नताङ्गि!	॰वमाङ्गि
	विधत्ते	पिधत्ते आच्छादयति ना. छादयति अ.
		षष्ठः सर्गः
२.	रिवाभ्याशे	रिवाभाष्ये
६.	हैमवल्कलाः	हेमवल्कलाः
	इव श्रिताः	इवाश्रिताः
७.	॰प्रवर्त्तिता॰	॰प्रस्थापिता॰
१३.	दारार्थमादरः	दारक्रियादरः
	॰कारणम्	॰साधनम्
१७.	मनोरथस्याविषयं	मनोरथस्याप्यपथं
१९.	सत्यमर्काच्च	नित्यमर्काच्च
२१.	त्वदनुध्यान॰	तव निध्यान॰
२८.	उत्पत्तये	उत्पादाय
३३.	॰कोशी॰	॰कौशी॰
३४.	व्रीडां	व्रीलां
३६.	ते चाकाश॰	त आकाश॰
३९.	यक्षाः किम्पु॰	यक्षकिं॰
४०.	वेश्मनाम	वेश्मसु
	मुरजस्वनाः	मुरवस्वनाः
४२.	नक्तमापान॰	नक्तं सोपान॰
४३.	दुर्दिनेष्वभि॰	दुर्दिनेऽप्य॰
४४.	आतङ्कः कुसुमायुधात्	आतङ्कः कुसुमायुधः

	का.ग्र.	अ.ना.
४५.	आप्रसादार्थिनः	अप्रसादार्थिनः
४७.	अथ ते मुनयो दिव्या	तत् कान्तं मुनयो दिव्याः
	स्वर्गाभिसन्धिसुकृतं	स्वर्गाभिसन्धि सुकृतां
५२.	तैराक्रमयामास	तैराक्रामयामास
५३.	कृतासनप॰	अनासनप॰
५५.	मूढं बुधमि	मूढं बुद्धमि॰
	हैमीभूत॰	है(हे) मीकृत॰
५६.	भूतानामधि	मर्त्यानामभि
५८.	द्विरूपमपि मे वपुः	द्वैरूप्यं तेन मे कृतम्
६८.	॰मृदुभिः	॰सदृशैः
६९.	॰र्म्यनिवा॰	॰र्मिनिवा॰
	लोकान्	लोकं
७०.	श्लाघ्यते गङ्गा	श्लाघते गङ्गा
	पादेन	पातेन
	परमेष्ठिनः	परमेष्ठिनि
		प्रथमेन द्वितीयेन
		तथैवोच्छिरसि त्वयि।
७३.	भवता	भवतः
	तु भक्तिनम्रं ते सतामारा॰	ते भक्तिनम्रमर्हदारा॰
७४.	तदागम	यदागम
७६.	येनेदं	यस्येदं
	विश्वं	व्यक्तं
७८.	अस्मत्संक्रामि॰	अस्मत्संक्रमि॰
७९.	सद्भर्त्रे प्रति॰	सद्भर्तृप्रति॰
८०.	यावदेतानि	यावद् द्वयानि
८६.	मेने मेना॰	अ.ना. पद्यमिदं न पठतः
८७.	विमृश्य	विचिन्त्य
८८.	एहि॰॰ भिक्षासि	भिक्षा त्वं परि॰

	का.ग्र.	अ.ना.
		सप्तमः सर्गः
३.	॰तोरणानां स्थानान्तरं	॰तोरणाङ्कं स्थानान्तरे
४.	आसन्नपाणि॰	उपोढपाणि॰
	उच्छ्वसितं	उच्छ्वसिता
६.	शरीरे प्रति	शरीरप्रति॰
७.	निर्णाभि कौ॰	उन्नाभिकौ॰
८.	नवेन दीक्षा॰	विवाहदीक्षा
	लेखा	रेखा
९.	॰भिमुखं व्यनैषुः	॰भिमुखीमनैषुः
१०.	अविद्धमुक्ताफल॰	आविद्धमुक्ताकृत॰
	॰चित्रे	॰लेखे
११.	॰पत्यु॰॰ वस्त्रा	॰वत्यु॰॰ वस्त्रम्
	निर्वृत्त॰	निवृत्त॰ (उपरत॰)
१५.	विन्यस्तशुक्ला	प्रसन्नशुक्ला॰
	चक्रुरस्याः	चक्रुरङ्गम्
	विभक्तमङ्गम्	विभक्तमस्याः।
१७.	॰नाक्षेप॰	॰नाभेद॰
१८.	॰क्तश्च विभ॰	॰क्तः सुविभ॰
२०.	निरीक्ष्य	समीक्ष्य
२४.	॰मनुप्रवृद्धो	॰मनु प्रवृद्धो
२८.	॰शरीरभाजा	॰शरीरलाभात्
२९.	॰गमनप्रतीक्षः	॰गमनं प्रतीक्ष्य
३१.	स्व एव वेषः	स्वभाववेषः
३२.	गजाजि॰	सिंहाजि॰
३३.	॰ष्टामलपिङ्ग	॰ष्टानलपिङ्ग
३५.	मरीचिभासा	मरीचिभाजा
	लाञ्छनेन	लक्षणेन

	का.ग्र.	अ.ना.	
३८.	मण्डलरेणु॰	मण्डलराजि॰	
	पद्माकरं चक्रु॰	पद्माकरीचक्रु॰	
३९.	॰राजी	राजि:	
४३.	संवर्धयन्त्या	संवर्धयन्त्या	संवर्धयन्तौ—मल्लि:
४८.	प्राग्रहरै:	प्राग्रसरै:	
	॰रावदान:	॰रापदान:	
५०.	कृष्यमाण:	कृष्यमाणम्	
५५.	॰कीर्णापण॰	॰गाढार्पित॰	
५७.	रुद्धोऽपि न केशपाश:	रुद्धोऽपि च केशहस्त:	
५८.	॰रागवाक्षाद्	रा गवाक्षाद्	
६०.	प्रस्थानभिन्नां न बबन्ध नीवीम्	प्रस्थानभिन्नानवद्धनीवि:	
६१.	रसना	रशना	
६२.	॰पत्राभरणा	॰पत्रावरणा	
६३.	॰द्युतीनि	॰च्छवीनि	
६४.	सर्वात्मनाचक्षुरिवप्रविष्टा	विनोपघातेन जडीबभूवु:	
६६.	व्रीडाद॰	व्रीलाद॰	
६८.	मुष्टिं	मुष्टि:	
६९.	तत्राऽव	ततोऽव	
७०.	प्रशस्तमा॰	यशस्यमा॰	
७३.	दुकूलवासा: स	दुकूलवान् सो	
७९.	मेरोरुपान्तेष्विव	मेरोरिवान्ते परि॰	
८०.	तां कारया॰	स कारया	
८२.	॰लेखमा॰	॰रेखमा	
८३.	कर्म्मसाक्षी	पूर्वसाक्षी	
८४.	वितत्य	विवृत्य	
८८.	चतुरस्त्रवेदीं	चतुरन्तवेदिं	
९२.	बद्धाञ्जल॰	॰दष्टाञ्जल॰	
	॰साने प्रति॰	॰सानप्रति॰	

	का.ग्र.	अ.ना.	
९३.	कार्यविद्धिः	कालविद्धिः	
९४.	कनककलशरक्षाभक्ति॰	॰॰रक्षाशक्ति॰	
९५.	तत्कृताक्षेप॰	तत्कृतोत्क्षेप॰	

अष्टमः सर्गः

	का.ग्र.	अ.ना.	
१.	दोहदमनोहरं वपुः	दैर्हृदसुखं मनोहरम्	
११.	कानि न	कान्यपि	
१३.	स्थाणुनारतमकारिचानया	स्थाणुना पदमकार्यत प्रिया	
१४.	रुरोध सा	रुरोध च	
१६.	निर्वृतिः	निर्वृतः	
१९.	॰दूषितम्	॰रूषितम्	
२२.	मरुदाशुगोक्षकः	मरुदाशुवाहनः	
	पुरस्कृतः	पुरस्कृतान्	
२३.	चावसत्	चाभवत्	
२४.	वारण॰	वारण॰	रावण॰ मल्लि॰
	घनबाहु॰	मृदुबाहु॰	
२८.	॰मादनगिरिं व्यगाहत	॰मादनवनान्यवर्त्तत	
२९.	॰तलाश्रयो	॰तलाश्रयी	
३१.	सीकर॰	शीकर॰	
	व्रजन्त्यमी	व्रजन्ति ते	
३२.	॰केसरत्यजोः	॰केसरत्यजोः	॰केसरस्त्रजोः मल्लिः
३७.	शेषवत् (नारायणश्च)	शेषवत् (अरुण एव)	
३८.	॰विशद्धि॰	॰वसद्धि॰	
	॰मन्तरम्	॰मुत्तरम्	
४०.	॰मग्रप॰	॰रमग्न॰	अरुणो नोल्लिखति
४१.	॰स्वरैः	॰स्वनैः	
४३.	उद्गतम्	उत्थितम्	
४४.	अनुगतं रवेर्वपुर्वन्द्य॰	अनुपदं रवेः पदं धर्म्य॰	
	येन पूर्वमुद॰	प्राक् तथेयमुद॰	

का.ग्र.	अ.ना.	
४५. सन्ध्यया	वेलया	
४६. साधु मण्डिताः	साधु वर्त्तिताः	
५०. ॰मवचनाम॰	॰मवनंताम॰	
५१. नान्यया	नान्यथा	
५३. वृद्धि	वृत्ति	
५६. न पुरतः	न च पुरो	
तिमिरौघवेष्टितो	तिमिरौघ उत्थिते	
५७. हृतान्तरम्	हतान्तरम्	
५८. रजोभिरावृतम्	रजोभिराहतम्	
६०. ॰तनु चन्द्रिकास्मिता	॰तनुचन्द्रिकास्मिता	
॰गिरति चन्द्रमण्डलं॰॰	रात्रिचोदिता दिग्॰॰	
रात्रिचोदिता	चन्द्रमण्डलम्।	
६६. आत्मसदृशी	आत्मसदृशि	
६७. निद्रिता	निर्वृता	
७२. ॰लकान्	॰लकम्	
७३. चारुमुखि!	तारमुखि!	
७४. प्रसन्नयोः	प्रपन्नयोः	
७६. मत्तरक्त	मत्तमत्त	
७७. ॰मम्बिकाम्	॰मङ्गनाम्	
८३. ॰भून्न तृप्तये	॰भूदतृप्तये	
८६. चलितमानसोर्मयः	रचितमानसो॰	
८९. ॰भङ्गि वि॰	भङ्गवि॰	
९०. तर्ष॰	तर्ष॰	हर्ष॰ मल्लिः
९१. सुखेषु	सुखेषु	सुखेभ्यः मल्लिः
जलेषु	जलेषु	

(२) अरुणगिरिनाथनारायणाभ्यामुद्धृता ग्रन्थास्तत्कर्त्तारो वा

सङ्केतः अ. = अरुणगिरिनाथः, ना. = नारायणः।

अगस्त्यः १.५ ना.
अजयः १.१५ अ.
अभिज्ञानशाकुन्तलम्
(द्र. शाकुन्तलम्)
अभिनवगुप्तः १.८ अ.ना., १.२४ अ.ना., ८.९० अ.
अमरकोषः आरम्भत
आन्तम्, पदे पदे
अमरुकः ८.४ अ.ना. रसिकचूडामणिः
अरुणाचलनाथः १.१३ ना, १.५१ ना., २.२२ ना., २.५८ ना.
३.३० ना., ८.५३ ना.
अलङ्कारनिर्णयः (?) १.३१ अ.
अलङ्कारसूत्रम्
(सर्वस्वम्) १.१४ ना., २.४१ ना., ३.३० ना. ५.११ आदिषु
अष्टाध्यायी पदे पदे
आचार्याः (सङ्गीतस्य)१.४४ ना.
आश्लेषाशतकम् ना. अन्तिमपद्य
आश्वलायनगृह्यसूत्र १.२६ अ.ना., ७.७१ अ.ना. ७.८२ अ.ना.,
७.९३ अ.ना.
उत्पलमाला (कोषः) १.२४ अ.ना.
कामसूत्रकारः
(वात्स्यायनः) ७.१८ अ.ना., ८.९ अ.ना.
कालविधान
(ज्यौतिष) ७.१ अ.
कालिदासः १.१ अ. ३.२३ ना (कवीश्वर.) प्रभृतिषु
काव्यप्रकाशः १.१ ना., १.३ अ., १.१२ अ.ना., १.१४ ना., १.२६
अ. आरम्भत आन्तम्

किरातार्जुनीयम् १.१ ना.

कुन्तकाचार्यः १.३ अ.ना.

कुमारसम्भवः आरम्भत आन्तम् कृष्णः नारायणस्य गुरुः १.१

कृष्णविलास/ श्रीकृष्णविलासकाव्यम् १.२२ ना.

केचित् १.१ अ.ना.

केशव (कोषः) १.५ ना., २.४३ ना., ३.२२ ना., ५.३६ ना., ५.४२ ना., ५.६७ ना., ७.४९ ना., १.३७ अ., ६.४६ अ., ७.३३ अ., १.१६ अ.ना., ३.३२ अ.ना., ७.२ अ.ना.

कैयटः २.५८ ना.

कौटिल्य २.३८ अ.ना., ६.३७ अ.ना.

क्षीरतरङ्गिणी २.१ अ.

गार्ग्यसंहिता २.३१ ना

गीता ५.३१ ना.

गोनर्दीयः ७.९४ अ.ना., ८.२० अ.ना.

गौतमः ७.६ ना.

घङ्घण (माघटीकाकार) १.१ अ.ना.

चीनः ७.३. अ.ना.

जयमङ्गला १.५९ ना. ७.१८ अ.ना.

जानकीहरणम् १.१ ना.

त्रिपुरदाह ५.५६ ना.

दक्षिणावर्त्तः १.२ अ., १.४ अ., १.८ अ., १.१९ अ., १.३४ अ., १.३८ अ., १.३८ अ., १.४१ अ., १.५१ अ., १.५१ अ.ना., १.५१ अ.ना २.१६ अ., २.४१ अ., २.५४ अ., ३.६१ अ., ४.१४ अ., ४.२२ अ., ४.२३ अ., ४.३३ अ., ४.४३ अ., ५.३ अ., ५.८ अ., ५.३ अ., ५.४२ अ., ५.४२ अ., ५.४३ अ., ५.५५ अ., ५.६२

	अ. ५.७० अ., ५.७१ अ., ६.४५ अ., ६.८० अ., ७.१ अ., ७.९३ अ., ८.१ ना., ८.२ अ., ८.४३ अ., ८.७६ अ., ८.७८ अ., ८.९१ अ. नारायणो दक्षिणावर्त्त वारद्वयमेव सस्मार।
दशरूपकम्	१.५४ ना., २.२० ना., ३.७३ ना., ४.५ अ.ना., ५.१ अ.ना., ६.१ ना., ८.१३ अ.ना., ८.९१ अ.ना., अनेकत्र चान्यत्र।
देवः (धातुपाठ-स्पर्धाकारः)	२.४५ ना. ३.१ ना.
धातुप्रदीप	१.३४ अ.ना.
ध्वनिकारः (आनन्द-वर्धनाभिनवगुप्तौ)	१.२४ (लोचनम्) अ., १.५२ अ., ८.९० अ.
नाट्यशास्त्रम्	७.९० ना.
नाममाला	७.६० अ.
निघण्टुः	३.१४ अ.
नैषधीयचरितम्	५.४३ ना., ६.६ ना., ७.७६ ना.
पतञ्जलि	३.४० अ. (धर्ममेघसमाधिः)
पदमञ्जरी	२.५८ ना.
पराशरसंहिता	६.३ ना. ६.४९ ना.
पालकाप्यः	८.३३ ना.
पुराणवचनम्	१.१७ अ., २.५ ना., २.८ ना., २.१२ ना., ३.२४ अ.ना., ३.७४ ना. ५.३८ ना. (पुराणकवि) ६.४ ना.
प्रयोगवृत्तिः	७.८० ना.
प्राकृतभाषा	७.८९ अ.ना.
प्राचीनाचार्यकृतटीका	१.१ ना.
प्रौढोक्ति	६.२ अ.
बालरामायणम्	७.९४ अ.ना.
ब्रह्माण्डपुराण	१.१७ अ.ना., ५.४१ अ.
भगवद्गीता	६.६७ ना.
भट्टविष्णुः	६.३६ ना.

भरतमुनिः १.८ अ., ७.९५ अ.ना., ८.८५ अ.ना.

भर्तृहरिः (वाक्यपदीयकारः) १.३४ अ.ना., ३.४४ (सुभाषित) ना.

भविष्यत्पुराणम् ८.५२ अ.ना.

भागवतम् (श्रीभागवत) १.२ ना., १.२ ना., १.५६ ना., २.७ ना., २.५३ ना., २.५५ ना., ५.७७ ना., ६.६० ना., ७.३५ ना. ८.१ ना.

भाष्यकृत् ३.२६ अ.ना., ५.३ ना.

भोजः/भोजराजः केवलेऽरुणगिरिनाथे— १.१, १.४५, ३.५५, ७.१९ केवले नारायणे १.१०, १.२३, २.१, २.१६, २.४१, २.४२, २.४४, २.५०, २.६३, ३.५, ३.३०, ३.३१, ३.४०, ३.४२, ३.६६, ४.१३, ४.१५, ४.२५, ४.३१, ४.३५, ५.१३, ५.३४, ५.४०, ५.४६, ५.५६, ५.६८, ५.७६, ६.३२, ६.३७, ६.४३, ६.४४, ६.५८, ६.६३, ६.६७, ६.७८, ६.८७, ७.८, ७.१४, ७.३३, ७.४५, ७.५९, ७.८३, ७.८४, ७.९४, ८.४४ उभयोः अरुणे नारायणे च—१.३०, ३.१, ५.६७

भोजसूत्रम् १.२ अ.ना., ३.७२ ना. ४.२ ना.

मङ्खः (मङ्खुक) १.३० ना.

मनुः २.५ अ.ना., २.७ अ.ना., २.१० अ.ना., ६.२१ अ.ना., ७.१ अ.ना., ७.७ अ.ना., ८.६ ना.

मयूरकविः १.८ अ.

महिमा (महिमभट्टः) १.८ अ.ना., १.२६ अ., १.३५ अ., १.५१ अ., ४.१७ ना., ८.३७ अ.ना.

माघः (शिशुपालवधकविः) १.८ अ., १.२३ अ., १.२५ ना., २.३९ ना., ३.३७ ना., ५.२० ना.

माधवः (कुमारसम्भवटीकाकृत्) १.२२ ना., ३.५ ना., ३.७ ना., ३.७२ ना., ६.१६ ना., ६.८२ ना., ७.२२ ना., ८.१ ना.
मुरारिः ३.७१ अ.ना., ८.५८ ना.
मुहूर्त्तदर्शनम् ७.१ ना.
मुहूर्त्तशास्त्रम् ३.४३ ना.
मेघदूतं मेघसन्देशनाम्ना १.१५ अ.ना., २.४९ ना., ४.१९ अ.ना., ६.२३ अ.
याज्ञवल्क्यः ५.१२ अ.ना., ५.६२ ना.
यादवः (कोषः) १.७ ना., १.१४ अ.ना., १.२५ ना., १.३२ अ.ना., २.२३ ना., ३.७० अ.ना., ४.१ अ.ना., ६.२० ना., ७.१७ अ.ना., ७.३३ अ. ७.६५ ना.।
युधिष्ठिरविजयम् (महाकाव्यम्) १.१ ना.
योगशास्त्रम् ३.५९ ना.
योगसारः ३.४५ अ.ना.
रघुवंशम् १.१ अ., १.४ ना., १.८ ना., १.२१ ना., १.२२ अ.ना. १.२३ ना., १.३० ना., २.२१ ना., २.४१ ना., ३.१३ ना., ३.२५ अ.ना., ३.५८ ना., ३.७० ना., ४.१६ ना., ५.१५ ना., ५.४० ना., ५.४३ ना., ५.६६ ना., ७.२२ ना., ७.३२ ना., ७.७६ अ.ना., ८.९ ना., ८.२३ ना., ८.३६ ना., ८.५१ ना. आदिषु
रघुवंशप्रकाशिका (अरुणगिरिनाथकृता) १.४ अ., ५.३४ अ., ७.७६ अ., ८.८९ अ. आदिषु
रतिरहस्यम् १.१० ना., ८.८९ ना., ८.८९ ना.
राजकन्दर्पः (नृत्यशास्त्रम्) ६.४० अ.ना.,
राजशेखरः २.२६ ना. बालरामायणकारः
रामायणम् (वाल्मीकीयम्) १.५२ अ., ५.१६ ना. आदिषु

वचनम् ५.१७ ना.
वररुचिकोषः ५.३३ ना.
वराहपुराण ६.८ अ.ना.
वराहमिहिरः ६.४९ अ., ७.८ ना.
वसिष्ठसिद्धान्तः (ज्यौतिषग्रन्थः) १.१६ ना.
वसिष्ठः (योग) ३.४५ अ., ३.५० अ.ना.
वाक्यपदीयम् ६.७९ ना.
वामनः (काव्यालङ्कारसूत्रवृत्तिकृत्) १.३० ना., १.३४ अ.ना., २.५४ अ.ना., ३.५६ अ., ७.५८ अ.ना., ८.३१ अ.ना. आदिषु
वात्स्यायनः (कामसूत्रकृत्) ७.१८ अ.ना.
विक्रमोर्वशीयम् १.३२ अ.ना. (अग्रे स्त्री.) ६.६५ अ.ना.
विद्धशालभञ्जिका ७.७ अ.ना.
विष्णुगुप्तः (कौटिल्यः) १.२९ ना.
विष्णुपुराणम् १.१८ अ.
विष्णुभट्ट ६.३६ ना.
वेणीसंहारम् २.२६ ना. (मथ्नामि)
वेदः २.११ अ.ना., २.६० ना.
वेदान्तः २.८ ना., २.११ ना.
वैजयन्तीकोषः १.४ ना., १.४१ ना., १.५४ ना., २.३४ ना.
वैद्यशास्त्रम् २.४७ ना.
व्यक्तिविवेकः (महिमभट्टस्य) १.२६ अ., १.३५ अ. आदि
शाकुन्तलम् (अभिज्ञानशाकुन्तलम्) १.८ ना., १.५३ अ.ना., १.५९ अ.ना., २.६० ना., ३.१० ना., ३.३४ अ.ना. (रम्याणि.), ४.४३ अ.ना., ५.८ अ.ना., ५.९ अ.ना., ६.१० ना., ६.५४ ना., ७.९४ ना.

शाण्डिल्यगृह्यम् ७.१४ अ.ना.
शाश्वतकोषः १.५२ ना., ४.४२ ना.
शिवदासः १.१ ना.
शिवमहिम्नःस्तोत्रम् ३.१० अ.ना., ५.८० ना.
शिशुपालवधः १.१ ना. (द्र. माघः)
शुकसन्देशः ५.६१ ना.
श्रीकृष्णविलासकाव्यम् ५.३३ ना.
श्रीमासोत्सवचम्पूः ३.७६ उपसंहारपद्येषु
श्लोकवार्त्तिकम् २.२९ ना.
सङ्गीतशास्त्रम् ३.५ ना., ६.४० ना.
सांख्यसप्ततिः
(सांख्यकारिका) २.१३ ना.
सामुद्रिकशास्त्रम् १.३२ अ.ना.
सिंहः द्र. अमरः
सुबोधः ज्यौतिषग्रन्थ ७.१ अ.
सुबोधनी ज्यौतिषे ७.६ अ.ना.
सौन्दर्यलहरी ५.१६ ना., ६.७५ ना.
स्कान्दपुराणम् ५.१६ ना., ६.७५ ना.
स्मृतिः ५.१६ ना.
हनुमद्वचनप्रकरणम् ८.७१ ना.
हयग्रीववधम् १.१ अ.ना.
हरिपुराणम् ७.५१ ना.
हलायुधकोषः १.२४ अ.ना., १.३८ अ.ना., ५.५६ अ.ना., ५.६१ अ., ५.६५ अ.ना., ७.११ अ.ना.।

(३) कालिदाससन्दर्भाः

अच्युतदत्तहस्तः	७.६९ कु.	७.७० ना.
अथ तस्य वि.	८.१ र.	५.६६ ना.
अथाङ्गिरस	६.६५ कु.	६.१५ ना.
अथाऽनुरूपा	५.७ कु.	६.८५ ना., ७.६७ ना.
अथाऽवमानेन	१.२६ कु.	८.९१ ना.
अथाऽऽह वर्णी	५.६५ कु.	५.७५ ना.
अथेन्द्रियक्षोभ	३.६९ कु.	३.७६ ना.
अथोपनिन्ये	३.६५ कु.	१.५९ अ.ना.
अथोपयन्तार	५.४५ कु.	५.५२ अ.
अद्य प्रभृत्य	५.८६ कु.	१.१ ना.
अपमेघोदयं	६.५४ कु.	६.६६ ना.
अपविद्धशुचा	१०.७४ र.	२.२१ ना.
अपि शयन	७.९४ कु.	८.५ ना.
अभिलाषमु	४.४१ कु.	७.९१ ना.
अभ्यङ्गनेपथ्य	७.७ कु.	७.८ ना.
अमी च कथ	२.२३ कु.	२.२० ना.
अयुक्तरूपं	५.६९ कु.	५.७९ अ.
अरिष्टशय्यां	३.१५ र.	१.२३ ना.
अरुणराग	९.४३ र.	३.५४ अ.ना.
अलक्तकाङ्कानि	५.५८ कु.	५.७७ ना.
अवचितबलि	१.६० कु.	१.५९ अ.ना.
अवस्तुनिर्ब	५.६६ कु.	५.७७ अ.
अव्यञ्जितहर्ष.	५.६२ कु.	५.८५ अ.
अव्याक्षेपो भ	१०.६ र.	३.५८ अ.

अस्यापि द्यां	२.१४ शा.	८.८४ अ.
अहमेव मतो	८.८ र.	५.४३ ना.
आ परितोषाद्	१.२ शा.	६.१० ना.
आमुक्ताभरण:	१७.२५ र.	७.३२ ना.
आमृष्टवक्षो	७.१ शा.	५.६९ ना.
आर्याऽप्यरुन्धती	६.३२ कु.	६.९१ अ.
आवर्जिता किञ्चि	३.५४ कु.	८.३७ अ.ना.
आवासवृक्षो	२.१७ र.	८.३६ अ.ना.
आसीद् वर:	७.२३ र.	७.७६ ना.
आसेदुरोषधि	६.३६ कु.	६.४६ अ.
इत्थमाराध्य	२.३९ कु.	२.३१ ना.
उदेति पूर्वं कु	७.३० शा	६.५४ ना.
उभे एव क्षमे	२.६० कु.	६.२८ अ.ना.
उमामुखे बिम्ब	३.६७ कु.	३.५८ ना., ३.५८ ना., ५१ ना.
उमारूपेण ते	२.५९ कु.	१.१ ना.
उमा वधू	६.८२ कु.	६.८७ अ.ना.
कथं स लक्ष्य	५.८१ कु.	२.३० ना.
कपालमेवा	७.३२ कु.	३.४९ अ.
करेण शम्भो	५.६६ कु.	५.७७-७८ ना.
काले प्रयुक्ता	७.९२ कु.	७.९१ अ.ना.
किमिव हि	१.१८ शा.	५.९ अ.ना., ५.४७ ना.
चन्द्रोदयार	३.६७ कु.	७.७२ ना.
चिन्तितोपस्थि	६.२४ कु.	६.३३ ना.
जातं वंशे भु	६. मेघसं.	२.४९ अ.ना.
ज्ञातमन्मथरसा	८.१३ कु.	८.९ ना.
त आकाश	६.३६ कु.	६.४८ ना.
तथा समक्षं	५.१ कु.	८.९१ अ.
तदङ्कशय्या	५.७ र.	५.१५ ना.

तदानपेक्ष्य	५.१८ कु.	७.६५ ना.
तदिच्छामो	२.४० कु.	१.१ ना.
तपसामुप	६.१० कु.	६.५ अ.ना.
तमादौ कुलविद्या	१७.३ र.	१.५१ अ.
तमाशु विघ्नं	३.७४ कु.	३.७६ ना.
तस्थौ निवृत्ता	१.५१ कु.	६.८५ ना., ७.६७ ना.
तस्मिन् विप्र	२.१ कु.	१.१ ना.
तस्यानुमेने	७.९३ कु.	३.४४ अ.ना., ८.२० अ.ना.
तेनामरवधू	२.४० कु.	२.४६ अ.
त्यजत मान	९.४७ र.	४.१६ ना.
त्रिभागशेषासु	५.५७ कु.	८.३० ना.
त्वमेव तावत्	५.६७ कु.	५.७८ अ.
दर्शनप्रणयिना	८.९० कु.	८.९१ ना.
दिगम्बरत्वेन नि	५.७२ कु.	५.७७-७८ ना.
दिनान्तमुग्रा	१६.११ र.	१.५ ना.
दिनान्ते निहितं	४.१ र.	८.४१ ना.
ध्यानस्तिमित	१.७३ र.	७.२२ ना.
न जातु बाला	५.५५ कु.	८.३२ ना.
नवपाणिग्रहणा	८.७ र.	८.९ अ.ना.
निवृत्तान्यवरा	१.५० कु.	१.५९ अ.
निषिञ्चन्तमि	३.२६ र.	८.२३ ना.
पत्रे निवेशित	२.१३ विक्र.	६.६५ ना.
पद्मकान्तिम	८.३० कु.	८.७७ ना.
परात्मनोः परि	१७.५९ र.	१.२१ ना.
परिणेष्यति पार्व	४.४२ कु.	७.९१ अ.ना.
पितुः प्रदेशा	५.४५ कु.	१.१ अ.ना.
पुराणस्य कवे	२.१६ कु.	२.३ ना.
(प्रतिग्रहीतुं) प्रणयिप्रिय	३.६७ कु.	३.७६ अ.

प्रशमादर्चि	२.१९ कु.	२.२२ ना.	
प्राणानामनिलेन	७.१२ शा.	१.५३ अ.ना.,	६.१० अ.ना.
प्रेम्णा शरीरा	१.५० कु.	५.१ ना.	
बलिव्याकुला	८३ मे.	६.८३ अ.	
बालार्कप्रति	१२.१०० र.	६.४९ ना.	
बाल्यात् परं	१.३९ कु.	१.५९ अ.	
भवत्प्रणीतमा	६.३१ कु.	६.३ अ.ना.	
भवभूर्वपत्नी	१.२० कु.	१.५९ ना.	
भविष्यति प्रार्थित	५.४६ कु.	२.३० ना.	
मनीषितायार्च	५.४ कु.	१.२५ ना.	
मनोरथानामगतिर्न	५.६४ कु.	६.१७ ना.	
मन्दाकिन्याः	२.४३ कु.	२.४६ अ.	
मुहुरङ्गुलिसं	३.२० शा.	७.९४ ना.	
मृणालसूत्रान्तर	१.४० कु.	१.३९ ना.	
त्रेण पदं न लब्धम् पाठ।			
यदा हि तस्याधि	५.५९ कु.	५.६४ अ.	
यन्मुखग्रहण	८.९ कु.	८.१८ ना.	
यस्य चोपवनं	६.४६ कु.	८.२८ ना.	
योषितो वनदे	६.२९ कु.	३.५२ अ.ना.	
रचितमानसो	८.८६ कु.	८.८५ अ.	
रथाङ्गनाम्नो	३.२४ र.	८.५१ ना.	
रम्याणि वीक्ष्य	५.२ शा.	३.३४ अ.ना.	
लब्धप्रतिष्ठा	२.२६ कु.	२.३० ना.	
वधूदुकूलं	५.६७ कु.	५.७८ ना.	
वपुर्विभक्तं न	१.३१ कु.	७.१८ ना.	
वपुर्विरूपाक्ष	५.४२ कु.	५.७८ ना.	
वसने परिधूसरे	७.२१ शा.	२.६० ना.	
वामश्चास्या	९४ मे.	४.१९ अ.ना.	

वार्धके मुनि	१.८ र.	५.४१ ना.
विदितं वो	६.२६ कु.	८.१ ना., ८.९० ना.
विवृण्वती शै	३.६८ कु.	५.८५ अ.
वृत्तं रामस्य	१५.६४ र.	५.५६ ना.
वृषेव सीतां	५.६१ कु.	७.९४ ना.
शक्यमरविन्द	३.४ शा.	८.६२ ना.
शक्यमोषधि	८.६२ कु.	८.७२ ना.
शमप्रधानेषु	२.७ शा.	४.४३ अ.ना.
शरीरमाद्यं खलु (आराधनायास्य)	५.३३ कु.	५.५० ना.
सखीसमग्राम्	१.५८ कु.	१.५९ ना., ३.५२ अ.ना.
स द्विनेत्रो हरेः	२.२९ कु.	२.५० ना.
सप्तर्षिहस्ता	१.१६ कु.	२.४३ ना.
समदिवसनिशीथं	५.९१ कु.	१.१ ना.
सिध्यन्ति कर्मसु	७.४ शा.	३.१० ना.
सेव्यतामिदम	८.७७	८.७७ ना.
सोऽहं तृष्णातुरै	६.२७ कु.	३.२७ ना., ८.९१ ना.
स्तनद्वयेऽस्मिन्	५.६९ कु.	५.७९ ना.
स्मरणानुग्रहात्	६.१९ कु.	६.२१ अ.
स्रस्तांसावति	१.२७ शा.	१.५९ अ.ना.
हरस्तु किञ्चित्	३.६७ कु.	३.७६ अ.ना., ५.८५ अ.

पद्यानि कालिदासस्य तदंशाश्च शताधिकाः।
उद्धृतानि तु टीकाभ्यामाभ्यां तान्यत्र कानिचित्।।

(४) टीकाकृताविमावलङ्कारशास्त्रपरिभाषासु नितान्तमभ्यस्तौ। तथापि निम्नलिखिता अलङ्कारा आभ्यां नामत उल्लिखिताः।

अलङ्काराः

अतिशयोक्तिः	१.४३ना., १.४७ना.
अन्योन्यम्	१.४१ ना.
अप्रस्तुतप्रशंसा	२.४०ना., २.४१ना., २.४३ना., ४.४४अ.ना., ५.४५ना., ५.७३ना.
अर्थान्तरन्यासः	१.१२ ना., ४.४४ अ.ना., ५.४ ना., ५.५ ना., ५.१९ अ.ना., ५.४५ ना., ६.२९ ना., ८.८६ अ.ना
उत्प्रेक्षा	१.१ ना., १.४ ना., १.२८ ना., १.३७ अ.ना., २.४८ अ.ना., ३.२५ अ.ना., ३.२९ अ.ना., ३.४९ अ., ४.४ अ., ४.६४ अ.ना., ७.४ अ., ७.५ अ.ना., ८.३६ अ.ना., ८.३७ अ.ना., ८.४२ अ., ८.५४ ना., ८.६३ अ.ना.
उपमा	१.२९ ना., २.५० ना., ८.५३ अ., ८.५४ अ.ना., ८.६० ना., ८.६१ ना., ८.६३ अ.ना., आदिषु
उदात्तम्	१.५ अ., ना., ८.५३ अ.ना.,
काव्यलिङ्गम्	१.६ ना.
तुल्ययोगिता	५.१३ अ.
दीपकालङ्कारः	५.५५ अ.
दृष्टान्तालङ्कारः	१.२६ ना.
निदर्शना	७.८० अ.ना.
परिकरालङ्कारः	३.६२ ना., ८.८० ना.
परिवृत्तिः	५.८ ना., ५.९ ना., ५.११ अ.ना. शून्यपरिवृत्तिः ५.१२ ना.
परिसंख्या	१.१८ ना., ६.४४ अ.ना., ६.४५ अ.
पर्यायः	५.११ अ.ना.
पर्यायोक्तालङ्कारः	१.१६ ना., २.४० ना., २.६० ना., ३.२१ अ.ना.
पुनरुक्तवदाभासः	१.१६ ना.

प्रतिवस्तूपमा १.२६ ना., ३.१३ ना., ८.१६ अ.ना.

भाविकम् ३.५० ना., ३.५६ अ.ना.

यथासंख्यम् १.१७ ना.

रूपकम् १.१० अ.ना., १.३० अ.ना., ३.३० अ.ना., ५.२७ ना., ८.६३ अ.ना.

रूपकविशेष १.१० अ.ना., २.२१ अ.

विकस्वरः १.३ ना.

वितर्कः १.४५ अ.

विशेषोक्तिः १.१० अ. (वामनमतम्)

विभावना ३.२६ अ.ना.

विरोधः १.३५ ना., ५.१४ अ.ना., ६.१० ना.

विषमालङ्कारः ५.४ ना., ५.६७ अ.ना.

व्यतिरेकः १.३५ अ.ना., १.४० ना., १.४४ अ.ना., १.४६ ना., १.४७. ना., २.८ ना., २.५६ ना., ५.३७ ना. ६.३८ अ.ना., ६.७१ अ.ना.

शय्यापरिवृत्तिः ५.११ ना.

शृङ्गाराङ्गानि १.१७ ना.

संसृष्टिः २.२१ ना., ५.४ ना. (विषमार्थान्तरन्यासयोः)

सङ्करः १.८ (रूपकोत्प्रेक्षयोः) ना. ३.२५ (उत्प्रेक्षासमासोक्त्योः) ना. ५.५ (दीपकार्थान्तरन्यासयोः) अ.ना. ८.६३ अ.ना. (उपमा-रूपकोत्प्रेक्षाणाम्)

समाधिः १.४ ना.

समासोक्तिः ३.२५ ना., ३.२९ ना., ३.३० अ., ८.४४ अ.ना., ८.६३ अ.ना., ८.७० अ.ना.

समुच्चयः ३.५८ ना., ३.६६ ना., ६.६९ अ.ना.

सन्देहः १.४५ अ.

सहोक्तिः ५.२३ ना.

स्वभावोक्तिः १.१५ ना., १.५५ ना., ३.३१ ना., ८.४२ ना.

(५) उद्धृतपद्यसूचिः

अग्नौ प्रास्ता ७.४७ ना.
अङ्गे तुङ्ग १.१५ ना.
अणिमा महिमा ६.७५ अ.ना.
अधनस्येव दा १.२७ अ.
अधीशितुः १.२६ ना.
अन्वर्थं स्या ३.७० ना.
अप एव सस २.५ अ.ना.
अपारकरु १.१२ ना.
अप्राधान्यं १.३४ अ.ना.
अभिधेया-गौणता ७.४७ ना.
अमृताद् बाष्प ६.३९ अ.ना.
अयाचितानि १.५१ अ.ना.
अरुणाचलना १.१.४ अ.
अरूपमपि ६.३६ ना.
अलङ्कारस्य १.३ अ.ना.
अवस्थाःपञ्च ८.९१ अ.ना.
अष्टादश नि. ७.६ ना.
अस्ति शैलो वि. १.२३ ना.
अस्नात्वा नाच ५.१६ ना.
अस्य देव १.१७ अ.ना.
आकारैरिङ्गि ८.६ अ.ना.
आग्नेयाद्या ३.४३ ना.
आतपभीता ८.३३ ना.
आदानं च प्रति ७.५९ अ.ना.
आदित्यचन्द्रा ५.२५ ना.
आयासिताना ५.३० ना.
आलिङ्गनात् ३.२६ ना.
आशंसते ३.१४ अ.ना.
आश्लेषाशतक ४.४६ ना.
इत्युक्त्वा ७.९० अ.ना.
ईजे स भग १.५६ ना.
उत्तानिते कर ३.४५ अ.
उत्तिष्ठति २.३१ ना.
उत्पाद्यानां १.४४ ना.
उद्भिज्जा ३.४२ ना.
उपक्रमोप १.१ ना.
उरगेन्द्रम् १.२३ अ.
ऊढाभोगनृ. ६.९४ ना.
एकत्रोत्प्रेक्षि १.८ अ.ना.
एकं पादम ३.४५ ना.
एनां सन्ध्यां ८.५२ अ.ना.
एवं स सर्वं २.१० अ.ना.
एषां गिरेः ६.६ ना.
एषां पल्लव ८.७१ ना.
ऐश्वर्यस्य २.३० ना.
औत्तानपादि १.१६ ना.
कन्या कामय ५.७२ ना.
कन्येति सूच ७.७ अ.ना.
कपाले मा १.४ अ.
कर्त्तुरुपाधि ४.१७ ना.
कलया चर ६.३ ना.
कामं क्रोधं ८.१ ना.
काली च नील ८.९१ ना.
किञ्चित् पुष्ट १.१८ ना.
किन्नरेशो वै ८.२४ ना.
कृते प्रतिकृ ८.८३ अ.ना.
कृष्णो विबुधा १.१६ ना.
केवलं दधति ६.८३ ना.
कैशिकी श्ल ७.९० अ.ना.
कैशिक्यारभ ७.९० ना.
कोपप्रशम ८.२४ ना.
क्षणेन स्था १.१९ ना.
गगनः स्पर्श २.२४ अ.ना.
गन्धिनी ग ८.३३ ना.
गुणानामेव १.३ अ.,
२.३३ना.
गुरुशुश्रूष १.३३ ना.
गुरोर्यत्र परी ५.८३ अ.ना.
गूहितस्तन ८.८९ ना.
गृहस्थः श्रद्ध ६.८८ ना.
गोविन्दाङ्ग १.५९ ना.
ग्राहोपन्यास १.८ अ.ना.
चक्षुःप्रीति ३.७ ना.
चतुर्थोपाय २.३९ ना.
चूर्णीभूतान् १.१९ ना.

जगत्सिसृक्षा ५.७८ अ.ना.
जगाम स्व १.२० ना.
जीवसंज्ञो ६.२१ अ.ना.
तदण्डमभव २.५ ना.
तद्वंशनाल १.२२ ना.
तस्य स्फुर ७.७८ ना.
तेजस्विमध्ये ५.२० ना.
तेभ्यः स्वधा १.१८ अ.ना.
तेषां तु मा १.१८ अ.ना.
त्रीणि वर्षा १.५९ अ.ना.
दर्शनात् क्लिष्ट ४.१५ ना.
देवानां कार्य. १.२१ ना.
द्रावणः क्षोभ ३.६६ ना.
द्रावभिष्यन्द ६.३७ ना.
द्विकत्रिक १.८ अ.ना.
द्वितीये सर्गे २.६३ ना.
द्विधा कृत्वा २.७ अ.ना.
द्विपेन्द्रजी १.५ ना.
धीरसञ्ज्ञा ४.५ अ.ना.
न तुलाविष ५.३६ ना.
न ह्यम्मया ६.६० ना.
नारायणांश १.२ ना.
निःश्वसितम २.८ ना.
नीललोहितल ३.७१ अ.ना.
नृत्तवादित्र ६.४० अ.ना.
न्यस्तहस्त ८.८९ ना.
प्राचीनाचार्य १.१.७ ना.
प्राचीनसूरि १.१८ ना.
प्रसृतसुरभि १.१० ना.
प्रधानत्वं वि १.३४ अ.ना.
पूर्वे भागे ६.४९ अ.
पुलहः क्रतुः ६.४९ अ.
पुरा किल १.२० ना.
पितामहऽ पि. ८.५२ अ.ना.
पित्रादयस्त्र ६.८३ ना.
पञ्चानां ब्रुव ७.८२ ना.
पद्मयोनेः ७.९० ना.
परमास्त पुरे ५.३२ ना.
परात्मनोः १.२१ ना.
पालने विम २.४ ना.
पितरो ब्र १.१८ ना.
पितरौ ब्र १.१८ अ.
ब्रह्मादयो ६.९४ ना.
बिम्बोष्ठं १.८ ना.
बहुप्रलाप ८.९१ ना.
ब्राह्मी माहे ७.३० ना.
भरतः प्रार्थ ७.९० ना.
भानोः समास १.२४ ना.
भुक्तिं मुक्ति ६.७७ अ.
भूमिरापो ६.२६ ना.
ममन्थुस्त १.२ ना.
मरीचिः पूर्व ६.४९ ना.
महाकार्ये कृ ५.६ ना.
महासत्त्वो १.५३ ना.
महोक्षः खट्वा ५.८० ना.
माता काली ८.९१ ना.
मार्गोपान्ते १.८ अ.
मीमांसोचि २.६३ ना.
मुखं प्रतिमु ७.९० ना.
मूलप्रकृति २.१३ ना.
मेघशब्देन १.२३ ना.
मोहान्धो य १.२० ना.
यथा रन्ध्रं १.३ अ.
यथा सन्निधि २.१३ ना.
यदज्ञानाद् वि २.९ ना.
यदा स देवो २.८ ना.
यद् दुष्करं ५.२ अ.ना.
यद् यद् विभू ५.३१ ना.
यश्च व्याकु १.२७ ना.
यस्तु प्रयु १.२७ ना.
यस्मिन् विशेष १.३ ना.
यस्य मूर्ध्नः २.५५ ना.
यस्य यस्य हि ५.५१ ना.
यस्य स्पर्शन २.५५ ना.
यस्या रक्तनखौ १.३२ अ.ना.
व्याख्यैषा १.१.९ ना.
व्याख्यान्त १.१.१० ना.
यः काव्ये पद १.१.२ अ.
यत्तदादेः १.२ अ.ना.
यज्ञाङ्गार्थं १.१७ अ.ना.
यस्यास्तुन १.१९ अ.
यावतः कुरु १.५२ ना.
यतो निर्याति ३.५० अ.ना.
यः कुलीन ५.७२ ना.

योऽस्यात्मनः ६.५१ अ.ना.
युगान्तका ६.५९ ना.
ये वाक्यार्थ ८.९१ अ.
रघुवंशे १.१३ अ.
रङ्गस्य दर्श २.१३ ना.
रमयामास ६.४ ना.
रसान्तरा १.५२ अ.
१.५३ ना.
रागाञ्चन ५.३१,८२ ना.
रागो यस्मि १.८ अ.ना.
राजाऽभावात् १.२ ना.
रुद्रभाग १.२० ना.
लास्ये च कै ७.९० ना.
लोकानामुप १.१.४ ना.
वर्ण्यते शिव १.१५ अ.
वसन्तश्च २.३५ ना.
वातपित्तक २.४७ ना.
विपञ्च्या १.४४ ना.
वीरः स्वे स्वे ५.६१ ना.
वेनो नाम १.२ ना.
वैदेहीनव ८.९१ ना.
समस्तलो ८.९१ ना.
शरः क्षत्रि ७.७ अ.ना.
शिष्यस्य बु. ७.९० ना.
शुक्लादौ ब्रा. ५.५६ अ.ना.
शैलानां हिम १.१७ अ.ना.
श्रीकृष्णशि पुष्पिका (१-८ सर्ग)ना.
श्रीमद्भागवत ५.८६ ना.
श्रीमासोत्सव ३.७३ ना.
श्वेतग्रामवना ८.९१ ना.
समस्तागम १.१.१ अ.
समुद्रसख्या १.१९ ना.
सम्बन्धमात्र १.३५ अ.
सर्गः पञ्चम ५.८६ ना.
सर्गः सप्तम ७.९४ ना.
सर्गोऽयं चरमो ८.९१ ना.
सर्गोऽयं प्रथमो १.५९ ना.
सर्वव्याख्या ५.८४ ना.
सर्वे स्वमुख्यव १.२ ना.
सर्वेऽपि पर्वताः १.१९ ना.
सलिलमये ७.८ ना.
सामान्यं वा १.३ ना.
सुरारातेर्व. १.१.३ ना.
सुराणां कार्य. १.२१ अ.
सूर्यानलेन्दु १.५५ ना.
स्तम्भप्रल ३.७३ ना.
स्वप्याद् भू ५.१२ अ.ना.
स्थानानि ध. ३.७० ना.
सङ्कल्पप्रभ ३.२४ अ.ना.
सञ्जितानि ३.३७ ना.
सकृद् वृत्तिस्तु ४.४३ ना.
सप्तर्षीणां पु ६.४ ना.
स्नायुन्यास ७.९४ अ.ना.
षट्पदमु १.१.१ ना.
षष्ठः सूक्ष्म ६.९४ ना.
हास्येन नर्म ७.९४ अ.ना.
हिरण्यगर्भो १.१७ अ.ना.,
२.५ ना.
हिमवान् नि. ६.४६ ना.

●

(६) कुमारसम्भवे १-८ सर्गाणां

श्लोकानुक्रमणी

	सर्गः	श्लोकः
अकिञ्चन	५	७७
अखण्डितं	७	२८
अगूढसद्भाव	५	६२
अङ्काद् ययावङ्क	७	५
अङ्गुलीभिरिव	८	६३
अणिमादिगुणो	,,	७५
अत आहर्तुमि	,,	२८
अतन्द्रिता सा	५	१४
अतोऽत्र किञ्चिद्	,,	४०
अथ ते मुनयः	६	१५
अथ तैः परिदेवि	४	२५
अथ मदनवधू	,,	४६
अथ मोहपरा	,,	१
अथ मौलिगत	६	२५
अथवा सुमहत्ये	,,	२४
अथ विबुध	७	९३
अथ विश्वात्मने	६	१
अथ सर्वस्य	२	३
अथ स ललित	२	६३
अथ सा पुनरव	४	४
अथाग्रहस्ते	५	६३
अथाङ्गिरसम	६	६५
अथाङ्गुलिभ्यां	७	२३
अथाजिनाषाढ	५	३०
अथानुरूपाभि	,,	७
अथावमानेन	१	२०
अथाह वर्णी	५	६५

	सर्गः	श्लोकः
अथेन्द्रियक्षोभ	३	६९
अथोपनिन्ये	,,	६५
अथोरुपदेशादव	,,	११
अथौपधीनामधि	७	१
अद्यप्रभृति	६	५६
अद्यप्रभृत्यनव	५	८६
अधः प्रस्थापिता	६	७
अध्यापितस्योश	३	६
अनन्तरत्नप्र	१	३
अनन्यभाजं	३	६३
अनर्घमर्घ्येण	१	५७
अनेन धर्मः	५	३८
अनेन सम्बन्ध	७	६७
अन्योन्यमुत्पीड	१	३९
अपमेघोदयं	६	५४
अपि क्रियार्थं	५	३३
अपि त्वदावर्जि	,,	३४
अपि प्रसन्नं	,,	३५
अप्यवस्तुनि	८	६
अभिलाषमुदी	४	४१
अभ्युन्नताङ्गुष्ठ	१	३२
अमी च कथमा	२	२३
अमी हि वीर्यप्र	३	१५
अमुना ननु	४	२९
अमुनैव कषा	,,	३४
अयाचितारं	१	५१
अयाचितोपस्थि	५	२२

	सर्गः	श्लोकः
अयि जीवितनाथ	४	३
अयि सम्प्रति देहि	,,	२८
अयुक्तरूपं किम	५	६९
अरण्यबीजाञ्जलि	,,	१५
अर्धाचिता सत्व	७	६१
अलं विवादेन	५	८२
अलकामतिवा	६	३७
अलभ्यशोकाभि	५	४३
अलिपङ्क्तिरनेक	४	१५
अवगम्य कथी	,,	१३
अवचितबलि	१	५९
अवधानपरे	४	२
अवस्तुनिर्बन्ध	५	६६
अवृष्टिसंरम्भ	३	४८
अवैमि ते सार	,,	१३
अवैमि पूतमा	६	५७
अवैमि सौभाग्य	५	४९
अशोकनिर्भर्त्सि	३	५३
असम्पदस्तस्य	५	८०
सम्भृतं मण्ड	१	३०
असम्मतः सस्तव	३	५
असह्यहुङ्कार	५	५४
असूत सद्यः	३	२६
असूत सा नाग	१	१९
अस्तोतुः स्तूयमा	६	८३
अस्त्युत्तरस्यां दिशि	१	१
अस्मिन् सुराणां वि	३	१९
अहमेत्य पतङ्ग	४	२०
अहो स्थिरः कोऽपि	५	४७
आज्ञापय ज्ञात	३	३
आत्मानमात्मना	२	१०

	सर्गः	श्लोकः
आत्मानमालोक्य	७	२२
आप्लुतास्तीरम	६	५
आमेखलं सञ्चर	१	६
आर्द्रकेसरसु	८	७६
आर्याप्यरुन्धती	६	३२
आलोकमार्गं	७	५७
आलोचनान्तं	,,	८३
आवर्जितजटा	२	२५
आवर्जिता किञ्चि	३	५४
आवसद्भिरुट	८	३८
आशंसता बाण	३	१४
आसक्तबाहुल	६	८
इच्छाविभूत्योर	७	२९
इतः स दैत्यः	२	५४
इति चापि विधाय	४	३७
इति चाह स धर्म	,,	४३
इति चैनमुवाच	४	२७
इति तेभ्यः स्तुती	२	१५
इति देहविमुक्तये	४	३९
इति प्रविश्याभि	,,	५१
इति व्याहृत्य	२	६१
इति स्थिरेच्छाम	५	५
इतो गमिष्याम्यथ	५	८४
इत्थं रतेः किमपि	४	४५
इत्थं विधिज्ञेन	७	८५
इत्थमाराध्य	२	३९
इत्यद्भुतैक	७	३६
इत्यभौममनु	८	२८
इत्यूचिवांस्तमे	६	६४
इत्योषधिप्रस्थ	७	६८
इदमत्रोत्तरं	६	८६

	सर्गः	श्लोकः
इयं च तेऽन्या	५	७०
इयं महेन्द्र	५	५३
इयेष सा	५	२
ईप्सितार्थक्रियो	६	८९
ईश्वरोऽपि	८	५०
उच्चैरुच्चैःश्रवा	२	४६
उत्तरन्ति विनि	८	३५
उत्पाट्य मेरु	२	४२
उद्घातः प्रणवो	२	११
उद्वेजयत्यङ्गुलि	१	११
उन्नतावनत	८	६९
उन्नतेन	६	३०
उन्नतेषु	८	६६
उन्मीलितं	१	३१
उपपन्नमिदं	६	६६
उपमानमभूद्	४	५
उपात्तवर्णे	५	५६
उपाददे	७	४१
उभे एव क्षमे	२	५९
उमापि नीलालक	३	६२
उमारूपेण	२	५८
उमा वधूर्भवान्	६	८२
उमास्तनोद्भेद	७	२४
उवाच चैनं	५	७५
उरुमूलनखः	८	८७
ऋजुतां नयतः	४	२३
एकैव मूर्ति	७	४४
एकैव सत्या	,,	४
एतदुच्छ्वसित	८	७०
एतावता	१	३६
एतावदुक्त्वा	६	८८
एते वयममी	,,	६३
एवं यदात्थ	२	३०
एवं वाच्यः	६	३१
एवंवादिनि	,,	८४
एवमालि!	८	५
एवमिन्द्रिय	,,	२०
एष तारमुखि!	,,	७३
एष वृक्षशिखरे	८	३६
एहि विश्वात्मने	६	८७
कण्ठस्य तस्याः	१	४१
कदाचिदासन्न	५	६
कपालनेत्रान्तर	३	४९
कपोलकण्डूः	१	९
कम्पेन मूर्ध्नः	७	४६
कयासि कामिन्!	३	८
कर्णार्पितो	७	१७
कर्तव्यं वो	६	६१
कल्पितान्योन्य	६	७६
कल्पवृक्ष	८	६८
काठिन्यं स्थावरे	६	७३
कामस्तु बाणा	३	६४
कामेकपत्नी	,,	७
किं येन सृजसि	६	२३
किञ्चायमरि	२	२०
किञ्चित्प्रकाश	३	४७
किमिदं द्युति	२	१८
किमित्यपास्या	५	४४
कियच्चिरं	,,	५०
कुबेरनाथां	३	२५
कुबेरस्य	२	२१
कुले प्रसूतिः	५	४१

	सर्ग:	श्लोक:
कुसुमायुधपत्नी!	४	४०
कुसुमास्तरणे	,,	३५
कृतवानसि	,,	७
कृताभिषेकां	५	१६
क्लृप्तोपचारां	७	८७
केनाभ्यसूया	३	४
केवलं प्रियत	८	८४
कैतवेन	८	३
कोपं प्रभो!	३	७२
क्रियतां कथ	४	२२
क्लमं ययौ	५	१९
क्लिष्टचन्द्र	८	८३
क्व नु ते हृदयङ्गमः	४	२४
क्व नु मां त्वदधीन	४	६
क्षीरोदवेलेव	७	२६
खं प्रसुप्तमिव	८	४३
खे खेलगामी	७	४९
गगनादवतीर्णा	६	४९
गङ्गास्रोतःपरि	६	३८
गणा नमेरु	१	५४
गत एव न ते	४	३०
गामधास्यत्कथं	६	६८
गीतान्तरेषु	३	३८
गुरुः प्रगल्भेऽपि	१	५०
गुरोर्नियोगाच्च	३	१७
गोप्तारं सुरसै	२	५१
घूर्णमाननयनं	८	८०
चतुष्कपुष्पप्रक	५	६८
चन्द्रं गता	१	४२
चन्द्रपाद	८	६७
चुम्बनदलक	८	१९
चुम्बनेष्वधर	८	८
चूताङ्कुरास्वाद	३	३२
जगद्योनिर	२	९
जङ्गमं प्रेष्य	६	५८
जयाशा यत्र	२	४८
जालान्तर	७	६०
ज्वलन्मणि	२	३७
तं देशमारोपित	३	३५
तं यथात्मसदृश	८	१६
तं लोकपालाः	७	४५
तं वीक्ष्य वेपथु	५	८५
त आकाश	६	३६
ततः परममि	,,	३५
ततो गणैः	७	४०
ततो भुजङ्गाधि	३	५९
ततो मन्दानिलो	२	२८
तत्कान्तं मुनयो	६	४७
तत्कृतानुग्रहा	२	३८
तत्क्षणं विपरि	८	७९
तत्प्रपतौषधि	६	३३
तत्र काञ्चन	८	२९
तत्र निश्चित्य	२	६२
तत्र वेत्रासना	६	५३
तत्र हंसधवलो	८	८२
तत्राग्निमाधाय	१	५६
तत्रावतीर्या	७	६९
तत्रेश्वरो वि	७	७१
तथातितप्तं	५	२१
तथापि ताव	६	६२
तथा समक्षं	५	१
तथेति शेषा	३	२२

	सर्गः	श्लोकः
तदङ्गसंसर्ग	५	७९
तदनु ज्वलनं	४	३६
तदा प्रभृत्यु	५	५५
तदिच्छामो	२	५०
तदिदं क्रिय	४	३२
तदिदं परि	,,	४४
तदीयास्तोय	२	४९
तदीषदार्द्रा	७	८१
तद्गौरवान्म	७	३१
तद्दर्शनादभू	६	१३
तद्भूत वत्साः	२	२७
तन्मातरं चा	६	९१
तन्मुहूर्तमनुम	८	४८
तपःपरामर्श	३	७१
तपस्विनः स्थाणु	३	३४
तमन्वगिन्द्रप्र	७	७०
तमभ्यगच्छत्	,,	४३
तमर्थमिव भा	६	७९
तमवेक्ष्य रुरोद	४	२६
तमातिथेयी	५	३१
तमाशु विघ्नं	३	७४
तमृद्धिमद्ब	७	५२
तमेकदृश्यं	,,	६४
तं मातरो देव	,,	३८
तया दुहित्रा	१	२३
तया विवृद्धान	७	७३
तया व्याहृतस	६	२
तयोः समापत्ति	७	७४
तव प्रसादात्	३	१०
तस्मात् प्रदेशा	७	१२
तस्मिन्नुपायाः	२	४७
तस्मिन् वने संयम	३	२४
तस्मिन् विप्रकृ	२	१
तस्मिन्संयमिना	६	३४
तस्मै जयाशीः	७	४७
तस्मै शशंस	३	६०
तस्मै हिमाद्रेः	३	१६
तस्य जातु म	८	२५
तस्याः करं शैल	७	७५
तस्याः प्रविष्टा	१	३७
तस्याः शलाका	१	४६
तस्याः सखीभ्यां	३	६१
तस्याः सुजातो	७	२०
तस्यात्मा शिति	२	६०
तस्यानुमेने	७	९२
तस्योपकण्ठे	७	५१
तस्योपायनयो	२	३६
तां नारदः का	१	४९
तां पार्वतीत्या	१	२५
तां पुलोमतन	८	२७
तां प्रणामादर	६	९०
तां प्राङ्मुखीं	७	१३
तां लोध्रकल्केन	,,	९
तां विलम्बितप	८	८१
तां वीक्ष्य स	३	५७
तां हंसमालाः	१	२९
तानघ्यानर्घ्य	६	५०
तामगौरवक्षे	६	१२
तामर्च्चिताभ्यः	७	२७
तामस्मद	६	२९
तामिमां तिमिर	८	५३
तावत्पताका	७	६३

	सर्गः	श्लोकः
तावद्भवस्यापि	,,	३०
तासां च पश्चात्	,,	३९
तासां मुखैरासव	,,	६२
तिर्यगूर्ध्वमधस्ता	६	७१
तिसृभिस्त्वमव	२	६
तीव्राभिषङ्ग	३	७३
तुषारसङ्घात	१	५५
तेन भङ्गविषमो	८	८९
तेनामरवधूहस्तैः	२	४०
ते प्रभामण्डलै	६	४
तेषां मध्यगता	६	११
तेषामाविरभूद्	२	२
ते सद्मनि गिरे	६	४८
ते हिमालयमा	६	९३
तौ क्षणं शिथिल	८	२६
तौ दम्पती त्रिः	७	७९
तौ सन्धिषु	,,	९०
त्रिभागशेषासु	५	५७
त्वं पितृणामपि	२	१२
त्वत्सम्भावितमा	६	२०
त्वमेव तावत्प	५	६७
त्वमेव हव्यं	२	१४
त्वया दत्तवरो	२	३१
त्वामामनन्ति	२	१३
ददौ सरःपङ्क	३	३७
दर्पणे च परि	८	११
दष्टतामरसके	,,	३२
दष्टमुक्तमधरो	,,	१८
दिने दिने सा	१	२४
दिवं यदि प्रार्थ	५	४५
दिवाकराद्	१	१२
दिवापि निष्ठ्यूत	७	३५
दुकूलवान् सोऽथ	,,	७२
दूरमग्नपरिमेय	८	४०
दृष्टिप्रतीपं परि	३	४३
देवास्तदन्ते हर	७	९१
द्रुमेषु सख्या	५	६०
द्वयं गतं सम्प्रति	,,	७१
द्विधा प्रयुक्ते	७	८९
धर्मेणापि पदं	६	१४
धातुमाम्राधर	,,	५१
धूपोष्मणा त्या	७	१४
ध्रुवेण भर्त्रा ध्रु	,,	८४
न केवलं दरी	६	६०
न नूनमारूढ	७	६६
नमोऽस्त्वमूर्त	२	४
नयनान्यरुणानि	४	१२
नवपरिणय	७	९४
न वेद्मि स	५	६१
नागेन्द्रहस्ता	१	३५
नाभिदेशनिहित	८	४
निकामतप्ता द्वि	५	२३
नत्यमर्काच्च सो	६	१९
निनाय चात्य	५	२६
निर्मितेषु पितृ	८	५२
निर्वाणभूयिष्ठ	३	५२
निर्विभुज्य	८	४९
निवर्तयास्माद	५	७३
निवार्यतामालि!	,,	८३
निवेदितं निःश्व	,,	४६
निशम्य चैनां	,,	३
निष्कम्पवृक्षं	३	४२

	सर्गः	श्लोकः
निसृष्टरागाद	५	११
नीलकण्ठपरि	८	१२
नूनमुन्नमति	,,	५८
नोर्ध्वमीक्षण	८	५६
न्यस्ताक्षरा	१	७
पत्युः शिरश्च	७	१९
पत्रान्तलम्बै	,,	८८
पदं तुषारस्त्रु	१	५
पद्मकान्तिम	८	३०
पद्मनाभवल	,,	२३
परलोकनव	४	१०
परलोकविधौ	,,	३८
परिणेष्यति	,,	४२
पर्यङ्कबन्धस्थित	३	४५
पर्याकुलत्वा	२	२४
पर्याप्तपुष्प	३	३९
पर्यायसेवामु	२	३५
पशुपतिरपि	६	९४
पश्य कल्पतरु	८	७१
पश्य पक्वफलि	,,	६१
पश्य पश्चिमदि	,,	३४
पश्य पार्वति!	,,	६४
पाकभिन्नशर	,,	७४
पाणिपीडन	,,	१
पार्वती तदुप	,,	७८
पार्ष्णिमुक्तव	,,	४७
पुनर्ग्रहीतुं नि	५	१३
पुराणस्य कवे	२	१६
पुरे तावन्तमे	२	३२
पुष्पं प्रवालोप	१	४३
पूर्वभागतिमिर	८	३७
प्रणम्य शितिक	६	८१
प्रतिक्षणं सा	५	१०
प्रतिग्रहीतु प्र	३	६६
प्रतिपद्य मनो	४	१६
प्रत्यर्थिभूता	१	५८
प्रदक्षिणप्रक्रम	७	७८
प्रभामहत्या शि	१	२७
प्रयुक्तपाणिग्रह	७	७७
प्रयुक्तसत्कार	५	३९
प्रवातनीलोत्प	१	४५
प्रशमादर्चिषा	२	१९
प्रसन्नदिक्पां	१	२२
प्रसन्नशुक्लागरु	७	१५
प्रसाधिकालम्बि	,,	५८
प्रसीद विश्राम्य	३	९
प्राक्तनानां विशु	६	१०
बद्धकोशमपि	८	३९
बबन्ध चास्त्रा	७	२५
बभूव भस्मैव	,,	३२
बभौ च सम्पर्क	,,	८
बालेन्दुवक्राण्य	३	२९
भवत्यनिष्टाद	५	४२
भवत्सम्भावनो	६	५९
भविष्यतः पत्यु	३	५८
भागीरथीनिर्झर	१	१५
भावसूचितम	८	,,
भुजङ्गमोन्नद्ध	३	४६
भुवनालोकन	२	४४
भ्रूभेदिभिः स	६	४५
मदनेन विना	४	२१
मधु द्विरेफः	३	३६

	सर्ग:	श्लोक:
मधुश्च ते	,,	२१
मध्येन सा वेदि	१	३८
मनीषितायार्च	५	४
मनो नवद्वार	३	५०
मन्दरान्तरित	८	५९
मन्दाकिनीसैकत	१	२८
मन्दाकिन्या: पय:	२	४३
महार्हशय्या	५	१२
महीभृत पुत्र	१	२६
मान्यभक्तिरथ	८	७७
मुक्तायज्ञोपवी	६	६
मुखेन सा पद्म	५	२७
मुञ्च कोपमनि	८	५१
मुनिव्रतैस्त्वा	५	४८
मूढं बुद्धमिवा	६	५५
मूर्ते च गङ्गा	७	४२
मृगा: प्रियाल	३	३१
मृणालिकापेलव	५	२९
मेरुमेत्य मरुदा	८	२२
मैत्रे मुहूर्ते शश	७	६
यं सर्वशैला:	१	२
य: पूरयन् कीचक	,,	८
यज्ञभागभुजां	६	७२
यज्ञाङ्गयोनित्व	१	१७
यज्वभि: सम्भृतं	२	४५
यत्र कल्पद्रमै	६	४१
यत्र स्फटिक	,,	४२
यत्रांशुकाक्षेप	१	१४
यत्रौषधिप्रका	६	४३
यथाप्रदेशं भुज	७	३४
यथा प्रसिद्धैर्म	५	९
यथाश्रितं वेद	,,	६४
यथैव श्लाघते	६	७०
यदध्यक्षेण च	,,	१७
यदमोघमपाम्	२	५
यदागमनकार्यं	६	७४
यदा फलं सर्व	५	१८
यदा हि तस्याधि	,,	९
यदुच्यते पार्वति	,,	३६
यदैव पूर्वे जनने	१	५२
यद्ब्रह्म सम्यगा	६	१६
यन्मुखग्रहण	८	९
यमोऽपि विलिखन्	२	२२
यश्चाप्सरोविभ्रम	१	४
यस्य चेतसि	६	१८
या न: प्रीति	,,	२१
यामिनीदिवस	८	५५
यावद् द्वयानि	६	८०
योगिनो यं	,,	७७
यौवनान्तं वयो	६	४४
रक्तपीतकपिशा:	८	४५
रक्तभावमपहा	,,	६५
रचितं रतिप	४	१८
रजनीतिमिराव	,,	११
रात्रिवृत्तमनुयो	८	१०
रुद्धनिर्गमनमा	,,	६०
रेखाविभक्त: सु	७	१८
रोमोद्गम: प्रादुर	,,	७६
लग्नद्विरेफाञ्जन	३	३०
लज्जा तिरश्चां	१	४७
लतागृहद्वार	३	४१
लब्धप्रतिष्ठा:	२	२६

	सर्गः	श्लोकः
लाङ्गूलविक्षेप	१	१३
लीनद्विरेफं परि	७	१६
लोहितार्कमणि	८	७५
वचस्यवसिते	२	५२
वधूं गिरिः प्राह	७	८२
वधूर्विधात्रा	७	८६
वनेचराणां	१	१०
वपुर्विरूपाक्ष	५	७२
वर्गावुभौ देव	७	५३
वर्णप्रकर्षे सति	३	२८
वारणध्वनित	८	२४
वासराणि कति	८	१३
विकीर्णसप्तर्षि	५	३७
विदितं वो यथा	६	२६
विधिना कृत	४	३१
विधिप्रयुक्तस	६	५२
विन्यस्तवैडूर्य	७	१०
विपत्प्रतीकार	५	७६
विबुधैरपि यत्	४	१९
विभूषणोद्भासि	५	७८
विमुच्य सा हार	५	८
विरोधिसत्त्वोज्झि	५	१७
विलोचनं दक्षिण	७	५९
विवक्षता दोष	५	८१
विवृण्वती शैल	३	६८
विश्वावसुप्राग्र	७	४८
वीज्यते स हि	२	४१
वीतसिंहभया	६	३९
वृतं तेनेद	२	५५
वृत्तानुपूर्वे च	१	३४
वैवाहिकीं तिथिं	६	९२
वैवाहिकैः कौतुक	७	२
व्यावृत्तगतिरु	२	३४
व्याहृता प्रति	८	२
शक्यमङ्गुलिभि	८	७२
शक्यमोषधिप	८	६२
शङ्खान्तरद्योति	७	३३
शशिना सह	४	,,
शिखरासक्त	६	४०
शिरसा प्रणिपत्य	४	१७
शिरीषमाला	१	४०
शिलाशयां ता	५	२५
शिष्यतां निधुव	८	१७
शीकरव्यतिकरं	८	३१
शुचौ चतुर्णां	५	२०
शुद्धमाविलमव	८	५७
शूलिनः करतल	८	७
शैलः सम्पूर्ण	६	८५
शैलात्मजापि	३	७५
श्रुताप्सरोगीति	३	४०
संयुगे सम्मुखीनं	२	५६
स सृत्तिवासास्त	१	५३
सखी तदीया त	५	५२
सख्युः प्रवालोद्ग	३	२७
स गोपतिं नन्दि	७	३७
स तथेति प्रति	६	३
स ते दुहितरं		७८
स दक्षिणापाङ्ग	३	७०
सदा बुद्धैः सर्व	५	५८
स देवदारुद्रुम	३	४४
सन्तानकतरु	६	४६
सन्तानकाकीर्ण	७	३

	सर्गः	श्लोकः
सन्ध्ययाप्यनु	८	४४
सपदि मुकुलि	३	७६
सप्तर्षिहस्तावचि	१	१६
स प्रजागर	८	८८
स प्रापदप्राप्त	७	५०
स प्रियामुख	८	९०
स प्रीतियोगाद्	७	५५
समदिवस	८	९१
स माधवेनाभि	३	२३
स मानसीं मेरु	१	१८
सम्पत्स्यते वः	२	५३
सर्गशेषप्रणय	६	९
सर्वं सखे त्वय्यु	३	१२
सर्वाभिः सर्वदा	२	३३
सर्वोपमाद्रव्य	१	४८
स वासवेना	३	२
स विनेतृ हरे	२	२९
स व्यबुध्यत बुध	८	८५
सस्वजे प्रियमुरो	,,	१४
स हि देवः परं	२	५७
साक्षाद् दृष्टोऽसि	६	२२
सा गौरीसिद्धार्थ	७	७
सान्ध्यमस्तमित	८	५४
सा भूधराणा	१	२१
सा मङ्गलस्नान	७	११
सामधिः सह	८	४१
सा राजहंसैरिव	१	३३
सा लाजधूमाञ्ज	७	८०
सा सम्भवद्भिः	,,	२१
सिंहकेसरसटा	८	४६
सुगन्धिनिःश्वास	३	५६
सुराः समभ्यर्थ	,,	२०
सोऽनुमान्य हिम	८	२१
सोऽयमानत	,,	४२
सोऽहं तृष्णातुरै	६	२७
स्त्रीपुंसावात्मभा	२	७
स्थानमाह्निकम	८	३३
स्थाने तपो दुश्चर	७	६५
स्थाने त्वां स्थावरा	६	६७
स्थिताः क्षणं पक्ष्म	५	२४
स्मरसि स्मर मे	४	८
स्मरस्तथाभूत	३	५१
स्रस्तां नितम्बा	,,	५५
स्वकालपरिमा	२	८
स्वयं विशीर्णद्रु	५	२८
स्वरेण तस्याम	१	४४
स्वागतं स्वानधी	२	१७
हरस्तु किञ्चित्	३	६७
हरितारुणारु	४	१४
हिमव्यपायाद्	३	३३
हृदये वसतीति	४	९
हेमतामरस	८	२६
हीमानभूद् भूमि	७	५४

●

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
श्रुतम् मे गोपाय